49183

00049103

SSUED
LIBRARY.

॥ अथईशावास्यटीकारघुनाथतीर्थीयसहिता ॥

4983 988

Digitized with financial assistance from
FOUNDATION
on 28 December, 2018
WITH YOU, RIGHT THROUGH



00049103

श्री[illegible]

काण्वसं[illegible] ईशाव[illegible]

गलमा[illegible]भोजं । [illegible]वलोचनालीं [illegible]

यद्भ्यां [illegible]भुजइ[illegible] भाष्यमेव [illegible]

कारप्रत्ययेगुणेरप[illegible]

[illegible]मद्धनुमद्भी[illegible]तरामकृष्णवेदव्यासात्मकलक्ष्मीहय[illegible]

[illegible]नांभो[illegible]दयसौरभं । लिहद्भ्यांलोचनालिभ्यांभगवान्पातुनोह[illegible]

[illegible]यज्ञादिभा[illegible]त् । इडोपहूतंगेहेषुहरेभागंक्रतुष्वहं । वर्णोमेहरितःश्रेष्ठस्तस्माद्धरिरितिस्मृतइतिम[illegible]ते ।

[illegible]गृहेषु । तथाच हरिःसर्वयज्ञभोक्तृत्वात्यज्ञनामाभगवान्नोऽस्मान्उक्तरूपाभ्यांलोचनालिभ्यामवलोकयन्[illegible]त्यर्थः । य

[illegible]लोचनालिभ्यांपातुअवलोकयत्वित्यर्थः । करुणामृतपूर्णाभ्यांलोचनाभ्यांविलोकयेत्यन्यत्रोक्तत्वाद्यथाश्रुतेनन्वय[illegible]वमध्या

हारादिनाव्याख्येयं । लिहद्भ्यामवलोकयन्नित्युभयत्रवर्तमानार्थकलडादेशशतृप्रयोगेण रमामुखावलोकनस्वमुखावलोकनयोः

[illegible]कालत्वोक्त्या स्वावलोकनसमयेभगवतोहर्षोद्रेकःसूचितः । एतदुपपादनायैववदनसौंदर्यलोचनानामंभोजसौरभालिस

[illegible] भाष्यं । श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ।

यज्ञभावनः ॥ यज्ञभुक्केतिपंचात्मायज्ञेष्विज्योहरिःस्वयमितिभागवततात्पर्योदाहृतप्रमाणोक्तरूपपंचकांतर्गतयज्ञभुङ्नामकभगवद्रूपकथनंवा । नाद्यः । व्यर्थत्वात् । मूलरूपस्यावताररूपस्यवाहरेरत्राप्रतिपाद्यतया प्रतिपाद्यदेवतास्तुतिनतीइत्युक्त्यनुपपत्तेश्च । अतएवनद्वितीयः । यज्ञनामानंभगवंतंतुष्टावेत्युत्तरभाष्यानुसारेणयज्ञनाम्नःप्रतिपाद्यत्वेपि यज्ञभुङ्नाम्नोतथात्वात् । अप्रतिपाद्यस्यापिनम्यत्वेहरयेइत्येतावतैवपूर्णत्वादित्यतःप्रतीकग्रहणपूर्वकंव्याचष्टे ॥ **सर्वयज्ञभुजइतीति** ॥ नेदंहरेर्विशेषणं नापितन्नामरूपकथनं येनोक्तदोषानुषंगः । किंतुयज्ञशब्दप्रवृत्तिनिमित्ताभिधानमुखेनयज्ञनामकभगवद्रूपकथनमेव । नन्वेवंप्रतिपत्तिलाघवाद्यज्ञायेत्येवकिंनोक्तमिति । नैवंशंक्यं । तथासतिप्रसिद्धयज्ञाभेदेनवा भेदेपिइंद्रसूनोरिवयज्ञाभिमानित्वाद्वा के

नित्येति ॥ सर्वयज्ञभुजइति ॥ सर्वयज्ञभोक्तृत्वाद्यज्ञनाम्नइत्यर्थः ॥

वलंसंकेताद्वा यज्ञशब्दार्थत्वंभगवतोविज्ञायेत । तन्माविज्ञायीतिसूचनायप्रवृत्तिनिमित्ताभिधानस्यावश्यकत्वात् । क्रियाभिमानाद्यज्ञोसाविंद्रसूनुःप्रकीर्तितः । यज्ञेशत्वात्स्वयंविष्णुर्यज्ञोरुचिसुतःस्मृतइतिभागवततात्पर्यनिर्णयोक्तंयज्ञेशत्वमपियज्ञभोक्तृत्वमितिनतद्विरोधः । नचैवमपिहरयइतिव्यर्थमितिवाच्यं । यज्ञनाम्नोभगवद्वतारत्वेविवदमानंप्रति स्वायंभुवेनमनुनाहरिरित्यनुक्तः ॥ तांस्तथावसितान्वीक्ष्ययज्ञःसर्वगतोहरिरितिभागवतानुसारेण हरिरितिज्ञात्वा ईशावास्यमित्यादिनानूक्तइति तत्ता त्पर्यानुसारेणचतदुपपादनज्ञापनार्थत्वादिति । नन्वेतदयुक्तं । स्वातंत्र्यंतद्गतत्वंचशब्दवृत्तेर्हिकारणमित्यत्र प्रवृत्तिनिमित्तस्वा

भा० । नित्यानित्यजगद्धात्रेनित्यायज्ञानमूर्तये । पूर्णानंदायहरयेसर्वयज्ञभुजेनमः ॥

मित्वतदधिकरणत्वयोरेवशब्दप्रवृत्तिनिमित्तत्वोक्त्या भोक्तृत्वस्यापितत्वेप्रमाणाभावादित्यतःसप्तमगीताभाष्योदाहृतंप्रमाणंप ठति ॥ यथोक्तं सुखरूपस्येति ॥ अहंसर्वस्यजगतःप्रभवःप्रलयस्तथेति गीताव्याख्यानावसरेतद्भाष्ये प्रभवादेःसत्ताप्रतीत्या दिकारणत्वात्तद्भोक्तृत्वाच्चप्रभवइत्यादीति भोक्तृत्वंशब्दप्रवृत्तिनिमित्तत्वेनप्रतिज्ञाय तत्रप्रमाणत्वेन सुखरूपस्यभोक्तृत्वान्नतुस र्वस्वरूपतइतिवाक्यंपठितं । ततोभवतिभोक्तृत्वंशब्दवाच्यत्वेनिमित्तमित्यर्थः । सुखरूपस्य सुखकारणस्येतिप्रमेयदीपिकायां व्याख्यातं । भोक्तृत्वादित्यस्य सर्वोसीत्यृषिभिःस्तुतइतिपूर्वेणान्वयः । ननुकथंतर्ह्युदाहृतानुव्याख्यानेस्वातंत्र्यतद्गतत्वयोर्द्वयो रेवशब्दप्रवृत्तिनिमित्तत्वेनोपादानं । भोक्तृत्वस्यापितत्त्वेनसंग्राह्यत्वादितिचेन्मैवं । नह्यशेषप्रवृत्तिनिमित्तसंग्रहायतदनुव्याख्या

यथोक्तं सुखरूपस्यभोक्तृत्वादिति । अपूर्णसुखाःसुखार्थं भोगान्भुंजते किंतथाहरिरपि नेत्याह ॥ पूर्णानंदायेति ॥

नप्रवृत्तिः । किंतुभगवतोदुःखिबद्धादिशब्दवाच्यत्वोपपत्तयेतद्गतत्वमिवस्वातंत्र्यस्यापिप्रयोगप्रमाणाभ्यांशब्दप्रवृत्तिनिमित्त त्वोपपादनाय । तथैवसुधायांव्याख्यातत्वात् । तत्रभोक्तृत्वग्रहणस्यकासंगतिः येनतदसंग्रहोदोषःस्यादितिभावः । यज्ञशब्दा द्यज्ञभोक्तृत्वंकथंलभ्यतइतिचेदित्थं । यज्ञशब्दोहिअर्शआदिभ्योजित्यनेनार्शआदित्वात्तदस्यास्तीत्यर्थेअच्प्रत्ययान्तः । तदस्या स्तीतिचसंबंधसामान्यं । ननुसमवायएव । तथासतिराजाजयी गोमान्देवदत्तइत्यादौमतुपास्वाम्यप्रतीत्यभावप्रसंगात् । सामा न्यंचयथानुकूलंविशेषेपर्यवस्यति । इहचभोक्तृत्वेपर्यवसानात्युक्तायज्ञशब्दाद्भोक्तृत्वप्रतीतिः । यज्ञशब्दाद्भोक्तृत्वएवार्थेतद्धि

ताइतिबहुवचनज्ञापितो अकारप्रत्ययइतिवा । यद्यपि छांदोग्यभाष्यदिशा ज्ञेंजीवंयातिप्राप्नोतिनियामकतयेत्यादिप्रकारांतरेण यज्ञशब्दवाच्यत्वंसूपपादं । तथापि यज्ञोयज्ञपुमांश्चेत्याद्युदाहृतप्रमाणेयज्ञनाम्नोयज्ञेष्विज्यइत्यनेनविशिष्ययज्ञभोक्तृत्वस्योक्तेः तदेवप्रवृत्तिनिमित्तत्वेनोक्तं । महिमातिशयलाभाद्वैवंव्याख्यातं । यथोक्तंप्रमेयदीपिकायां । यद्यपि प्रभवत्यस्मादितिप्रभवः प्रलीयतेऽस्मिन्नितिप्रलयइतिशक्यतेव्याख्यातुं तथापि महिमातिशयलाभादेवंव्याख्यातमिति । ननुपूर्णानंदत्वेभोगानुपपत्तिरि त्यतआह ॥ भोगस्त्विति ॥ नन्वेतदयुक्तं । पूर्णानंदस्याप्यचिंत्यैश्वर्यबलेनभोगोपपत्तिरितितत्त्वप्रकाशिकायां आगमिष्यत्सु खंचापितच्चास्त्येवसदापितु ॥ तथाप्यचिंत्यशक्तित्वादितिगीताभाष्येचभोगस्याचिंत्यशक्तिनिर्वाह्यत्वस्योक्तत्वात् । नहिलीला

भोगस्तुलीलयेतिभावः । पूर्णानंदत्वंहरेःकुतइत्यतआह ॥ जगद्धात्रइति ॥

त्वेननिर्वाह्यस्याचिंत्यशक्त्यानिर्वाहोयुक्तः । सर्वथादौर्घट्यएवाचिंत्यशक्त्याश्रयणादितिचेत् अस्त्यत्रविवेकः । पूर्णानंदस्यभोगा नुपपत्तिर्द्वेधा । पूर्णत्वाद्भोगोदुर्घटइति ततएवनिष्प्रयोजनश्चेति । तृप्तेपुरुषेतदुभयदर्शनात् । तथाचदौर्घट्यशंकायामचिंत्यश क्त्याश्रयणंतत्त्वप्रकाशिकादौ निष्प्रयोजनत्वशंकायांलीलात्वाश्रयणमत्रग्रंथेकृतमितिनकोपिविरोधः । अत्रग्रंथेअपूर्णसु खाइत्यादिपूर्ववाक्यपर्यालोचनयानिष्प्रयोजनत्वशंकायाःस्पष्टंप्रतिभानादिति । नन्वथापि लोकवत्तुलीलाकैवल्यमितिसूत्रानु सारेण इतिकेवललीलैवनिर्णीताप्रभुणास्वयमित्यनुव्याख्यानानुसारेण क्रीडाभोगोनचापरइतिमांडूकभाष्योक्तप्रमाणानुसारेण प्रयोजनानुद्देशे कीदृशीप्रवृत्तिरितिचेत्पृच्छसि तर्हितस्याःकेवललीलात्वंब्रूमः । नहिलीलाप्रयोजनांतरायभवतीत्यादितत्त्वप्रका

शिकासुधाद्यनुसारेणचभोगस्तुलीलेतिभावइतिवक्तव्ये कथंलीलयेतिभावःइत्युक्तं । तथात्वेहिलीलोद्देशेनेतिप्रतीयते । नचत द्युक्तं । अपूर्णतापत्तितादवस्थ्यात् । उदाहृतग्रंथविरोधात् । क्रीडार्थमितिचापरइतिनिषेध्यत्वोक्तिविरोधाच्चेतिचेत् । मैवं । अ त्रापिलीलयेत्यस्यभावप्राधान्याश्रयणेनलीलारूपत्वेनेतिव्याख्यानान्नकश्चिद्दोषः । अत्रायंविवेकः । सोमपुरोडाशादिभोग्यपदा र्थेषुद्विविधोभागः । स्थूलः सूक्ष्मश्च । तत्रस्थूलोजीवानांभोग्यः । सूक्ष्मःपरमेश्वरस्य । जीवेंद्रियागोचरःसारभागःसूक्ष्मउच्यते। अवतारेषुस्थूलमपिभुंक्तेपरमेश्वरः । कुतएतत्सर्वमवगम्यतइतिचेत् गीताभाष्यतट्टीकाभ्यां तथाहिगीताभाष्यं । नचानश्नन्न न्योअभिचाकशीति अन्योनिरन्नोपिबलेनभूयानित्यादिविरोधः । स्थूलानशनोक्तेः । आहचसूक्ष्माशनं । प्रविविक्ताहारतरइवै वभवत्यस्माच्छारीरादात्मनइति । एतद्व्याख्यानरूपाप्रमेयदीपिका । स्यादिदंव्याख्यानं यदिभगवतोविषयभोगोयुक्तःस्यात् । नचैवं । तदंगीकारेश्रुत्यादिविरोधात् । ऋतंपिबंताविति चातएवच्छत्रिन्यायेनोपचरितमित्यतआह ॥ नचेति ॥ कुतोनेत्यतआ ह ॥ स्थूलेति ॥ श्रुत्यादिषुस्थूलस्यजीवभोग्यस्यविषयस्याभोगोक्तेः । सूक्ष्मभोगस्यचांगीकारादितिभावः । सूक्ष्माशनेप्रमितेभ वेदियंव्यवस्था । तदेवकुतइत्यतआह ॥ आहचेति ॥ गंधादिषुयोजीवेंद्रियागोचरःसारभागः तस्यभोगंपरमेश्वरोऽस्माच्छारी रादात्मनोजीवादतिशयेनविलक्षणभोगएवभवति । अवतारेषुस्थूलमपिभुंक्तइतीवशब्दइति । सोयंभोगःपरमेश्वरस्यनाविद्यमा नसुखप्राप्त्यर्थो नापिविद्यमानसुखव्यक्त्यर्थः नित्यव्यक्तपूर्णसुखत्वात्परमेश्वरस्य । किंतुभक्तानुग्रहायकेवलंलीलारूपः । अत एवभोगस्यकेवललीलात्वोक्तिर्घटते । अन्यथासुखव्यक्त्यैभोगइत्युक्तिःस्यात् । सुखस्यनित्यव्यक्तत्वंकुतइतिचेत् । गीताभाष्य

तट्टीकाभ्यां । तथाहिगीताभाष्यं । आहच स्रष्टापाताचसंहर्तानियंताचप्रकाशिता ॥ यतःसर्वस्यतेनाहंसर्वोसीत्यृषिभिःस्तुतः ॥ सुखरूपस्यभोक्तृत्वान्नतुसर्वस्वरूपतः ॥ आगमिष्यत्सुखंचापितच्चास्त्येवसदापितु ॥ तथाप्यचिंत्यशक्तित्वाज्जातंसुखमतीवचेति नारदीयइति । एतद्व्याख्यानरूपाप्रमेयदीपिका । सुखरूपस्यसुखकारणस्य । ननुस्रष्टापातेत्यादिकमयुक्तं । कदाचित्क्रियावेशे विकारित्वप्रसंगात् । भोगेनयद्भाव्यंसुखंतस्यपूर्वमभावेनापूर्णत्वप्रसंगाच्चेत्यतआह ॥ आगमिष्यदिति ॥ यद्भोगेनागमिष्यत्सुखं तच्चसदाप्यस्त्येव । क्रियाश्चशक्तिरूपेणचेतिचार्थः । तर्हिकथंभोगेनसुखंजातमित्युच्यतइतिभावेनपृच्छति ॥ अपित्विति ॥ उ त्तरमाह ॥ तथापीति ॥ सदासद्भावेपीति ॥ अत्रक्रियाश्चशक्तिरूपेणेतिविशिष्योक्त्याआगमिष्यत्सुखंव्यक्तमेवास्तीतिलभ्यते । अन्यथायद्भोगेनागमिष्यत्सुखंतच्छक्तिरूपेणास्ति । क्रियाश्चशक्तिरूपेणेत्युक्तिःस्यात् । सुखव्यक्त्यंगीकारेणैवभोगनिर्वाहसंभवे अचिंत्यशक्त्यंगीकारोपिव्यर्थःस्यात् । तस्मात्सुखव्यक्त्यभावेपिभक्तानुग्रहायकेवलंलीलारूपोभोगोंगीकार्यइत्येकेवर्णयंति । ममतुप्रतिभाति ॥ यद्यपिसुखंव्यक्तमेव । तथापिभोगेनव्यज्यते । नचव्यक्तस्यव्यक्तिरनुपपन्ना । अचिन्त्यशक्त्यातदुपपाद नात् । यद्भोगेनागमिष्यत्सुखंतत्सदाव्यक्तमस्त्येव । तथापिसुखंजातं व्यक्तमित्युच्यते । कथंव्यक्तस्यव्यक्तिः । अचिंत्यशक्ति त्वात्परमेश्वरस्येतिगीताभाष्ययोजनयाअस्यार्थस्यलाभात् । इयंचयोजनोदाहृतप्रमेयदीपिकासूचितैव । किंचपुण्योगंधइतिभो गापेक्षयेतिभाष्यव्याख्यानावसरे प्रमेयदीपिकायां । सुगंधस्तुसुखहेतुरित्युपपादितमित्युक्तं । तत्सुखस्यव्यक्तस्यापिव्यक्त्यंगीका रएवोपपद्यते नान्यथा। रमणंचात्मशब्देनाऽऽदेयंमातीतिचोच्यतइत्यनुव्याख्यानसुधायां । आदेयंउपादेयंसुखंसुखसाधनंचमा

त्यनुभवतीत्यात्मेत्युक्तं । तत्सांप्रदायिकैर्व्याख्यातं । सुखसाधनंचेति । तथाचसुखसाधनतयाभिमतविषयानुभवाभिव्यक्तसुखानुभवकर्तेत्यात्मशब्दनिर्वचनेनलभ्यतइतिभावइति । ततोपिव्यक्तस्यसुखस्यव्यक्तिरस्तीतिज्ञायते । नचसुखस्यापिव्यक्तत्वंगीकारे आगमिष्यत्सुखंसदास्त्येव । क्रियाश्चशक्तिरूपेणेतिविलक्षणोक्तिर्नस्यादितिवाच्यं । क्रियावच्छक्त्यात्मनावर्तमानस्यसुखस्यनव्यक्तिः । किंतुनित्यव्यक्तस्यैव । क्रियायाश्चव्यक्तिरूपेणावर्तमानायाःव्यक्तिरितिविशेषज्ञापनायतथोक्तिसंभवात् । नचतर्हिभोगस्यसुखव्यक्त्यर्थत्वप्राप्त्यालीलात्वविरोधः । उदाहरिष्यमाणऋग्भाष्यटीकादिशाव्यक्तेर्भक्ताभीष्टसंपादनरूपत्वेनस्वप्रयोजनानुद्देशितयालीलात्वोपपत्तेरिति । ऋग्भाष्यतट्टीकोक्तरीत्याबलव्यक्त्यर्थवाभगवतोभोगः । तथाहि । इ॒मेसोमा॑स॒इंद॑वःसु॒ता स॒ोअधि॒ब॒र्हिषि॑ । ताँइ॑ंट्ट॒सह॑सेपिब ॥ अत्रभाष्यं सदाविष्णुविवक्षायांयजमानबलंसहः ॥ तदिष्टस्यैवदानायतद्गुणव्यक्तिरेववा ॥ अनुग्रहव्यक्तिरेवतद्गुणानांनचान्यथेति ॥ अत्रटीका ॥ इदंप्रसिद्धेंद्रेघटते सोमपानादिनातस्यबलवृद्धिसद्भावात् । परमेश्वरेतु योजनांतरंसूचयति ॥ विष्णिवति ॥ इंद्रशब्देनविष्णुविवक्षायांयजमानबलंसहःशब्देनोच्यते । कथंतर्ह्यन्वयइत्यतआह ॥ तदिष्टस्येति ॥ सहसेबलाय यजमानस्ययदिष्टंबलंज्ञानादिरूपंतस्यदानाय तदीयंसोमंपिबेतियोजनीयमित्यर्थः । अथसहःशब्देनपरमेश्वरबलमंगीकृत्यघटयति ॥ तदिति ॥ तस्यविष्णोर्योगुणोबलाख्यस्तत्रव्यक्तिर्वोच्यते । सहसेबलाय तवबलव्यक्त्यै । व्यक्तिश्चबलसाध्यमभीष्टसंपादनं । एवशब्दाभ्यांपरमेश्वरबलस्यसोमेनवृद्धिंनिराकरोतीति । अत्रटीकायां तवबलव्यक्त्यै इत्युक्त्याबलस्यव्यक्तिरंगीकृता । भाष्येतुव्यक्त्यंगीकारःस्पष्टएव । व्यक्तिश्चेत्यादिनाटीकायांव्यक्तिशब्दार्थनिरूपणंवस्तुस्थितिम

नुरुध्यैव । नतुव्यक्तिशब्दस्यार्थांतरमस्तीत्यभिप्रायेण । अवस्थाविशेषोव्यक्तिरितिसुधावाक्यस्याप्ययमेवार्थः । अतएवानुग्रहव्यक्तिरेवतद्गुणानांनचान्यथेत्यृग्भाष्योदाहृतप्रमाणवाक्यव्याख्यानावसरेपितट्टीकायामनुग्रहइतिभक्ताभीष्टसंपादनमुच्यतइत्युक्तं । नहिकंसहननादिक्रियाव्यक्तेत्यस्यभक्ताभीष्टसंपादनातिरेकेणार्थांतरमस्ति । भक्ताभीष्टसंपादनंनाम भक्तैकसाधनानुकूलोव्यापारः । नचैवंसोमपानादेर्बलव्यक्त्यर्थत्वांगीकारेभोगस्यलीलात्वोक्तिविरोधः । बलव्यक्तेर्भक्ताभीष्टसंपादनरूपायाःपरप्रयोजनोद्देशित्वेपिभगवतःस्वप्रयोजनानुद्देशित्वात् । एतदर्थमेवटीकायांव्यक्तिशब्दार्थोनिरूपितः । नचपरप्रयोजनोद्देशित्वेपिलीलात्वभंगः । सृष्ट्यादिव्यापारस्यापिसोयंविहारइत्यादिनापरप्रयोजनोद्देशितयाप्रमितस्यलीलात्वाभावप्रसंगात् । ततश्चायंनिष्कर्षः । भगवान्भक्तसमर्पितान्शुभान्सुरस सुगन्ध सुरूपान्विषयान्भुंक्ते । अदनाघ्राणदृष्ट्याख्यभोगत्रयविभागतः । मुखनासाचक्षुषांतद्भोग्यमन्नंहरेःश्रुतमित्यन्यत्रोक्तेः । भगवद्भोग्याश्चरसादयोजीवेंद्रियागोचराः । अतएवसूक्ष्माइत्युच्यंते । अवतारेषुजीवभोग्यस्थूलमपिभुंक्ते । जीवभोग्यस्यभोक्तेशोजीवस्तद्भोगभुङ्नतुइत्यन्यत्रोक्तेः । नित्यतृप्तस्याप्यचिन्त्यशक्त्यारसादिस्वीकारोयुक्तः । सोयंपरमेश्वरस्याचिंत्यशक्त्यानित्यव्यक्तसुखव्यक्त्यर्थवा बलव्यक्त्यर्थवा पक्षद्वयेपिभोगोलीलारूपएवनस्वप्रयोजनोद्देश्यकः । व्यक्तेर्भक्ताभीष्टसंपादनरूपत्वेनस्वप्रयोजनानुद्देशित्वादिति । तदेतत्सर्वमभिप्रेत्योक्तं भोगस्तुलीलयेतिभावइति । विष्णुभोगेप्रकारोयंभात्यन्योपिभवेद्यदि ॥ टीकाभाष्याद्यनुगुणःसुज्ञोक्तःसोपिसंमतः ॥ अचिंत्याःखलुयेभावानतांस्तर्केणयोजयेदित्युक्तेरलौकिकार्थस्ययथाप्रमाणंग्राह्यत्वादिति । जगद्भातृत्वोक्त्याकथंपूर्णानंदत्वलाभइत्यतोधातृत्वमिहचेष्टकत्वं ।

तच्चपूर्णानंदत्वसाधकत्वेनश्रुतिसिद्धमित्याशयेनाह ॥ तदुक्तमिति ॥ एषपरमात्माआसमंतात्काशनादाकाशनामाविष्णुर्यदि पूर्णानंदोनस्यात्तदाकारणांतराभावान्नलोकंप्रवर्तयेत् । नचेदेषप्रवर्तयेत् तदाकःपुमानन्यात्लोकंचेष्टयेत् । कश्चप्राण्याद्धर्मादौ प्रवर्तयेत् । अन्यस्यस्वातंत्र्याभावात् । अतोलोकचेष्टान्यथानुपपत्त्या तत्कर्ताविष्णुःपूर्णानंदइतिश्रुत्यर्थः ॥ धातृत्वंचेति ॥ नचानित्यजगद्धातृत्वेनापिपूर्णानंदत्वसिद्धिसंभवेनप्रकृतनिर्वाहात्किं नित्यधातृत्वोपपादनेनेतिवाच्यं । निरर्गलैश्वर्याभावेलोक रीत्यापूर्णानंदत्वानुपपत्त्यावा वस्तुस्थितिकथनार्थंवा नित्यधातृत्वोपपादनोपपत्तेरितिद्रष्टव्यं ॥ अनाधेयातिशयत्वादिति ॥

तदुक्तं कोह्येवान्यादित्यादि । धातृत्वंचानित्यानामेवनतुनित्यानां अनाधेयातिशयत्वादितिनाशं कनीयमितिभावेनाह ॥ नित्यानित्येति ॥ नित्यंनित्यात्मनायतइत्यादेः । अशरीरस्यनजगद्धातृ त्वं शरीरित्वेमरणंस्यादित्यतआह ॥ ज्ञानमूर्तयेनित्यायेति ॥ मूर्तिमत्त्वाज्जगद्धातृत्वोपपत्तिः ।

उत्पत्तिविनाशस्वभावरूपातिशयाधानशून्यत्वादित्यर्थः । नित्येषूत्पत्तिविनाशयोःस्वरूपतएवाभावात्स्वभावस्यचानागंतुकतया अन्याधीनत्वासंभवादितिभावः । नन्वनाधेयातिशयत्वादित्यस्यकःपरिहारइत्यतोनुव्याख्यानोक्तएवेत्याशयेनतत्पठति ॥ नित्यमिति ॥ नित्यंनित्यात्मनायतः ॥ तथाऽनित्यतयाऽनित्यंनित्यशक्त्यास्वयेश्वरः ॥ नियामयतिनित्यंचेत्येतावतोग्रहणंसू चयितुमित्यादेरित्युक्तं । यथाअनित्यंघटादिकमनित्यतयानियम्यते । तथानित्यंनित्यात्मनानित्यंचसर्वदैवेश्वरोनियामयति । यतएवंतस्मादुक्तमुपपन्नमितियोजना ॥ एतदुक्तंभवति । यथाहिघटादयोऽनित्यत्वस्वभावाअपिनाकस्मादनित्याभवंति । तथा

॥ ६ ॥

त्वेचोत्पत्त्युत्तरक्षणएवविनाशप्रसंगात् । एवंनित्यस्यापिनित्यतायदिपराधीना तदाकोदोषः । नचानित्यतापराधीनेतिकदाचित् घटादेर्नित्यताप्राप्ता । विनाशकारणोपनिपातध्रौव्यात् । तथानित्यस्यनित्यतायाःपराधीनत्वेपि नजात्वनित्यताप्रसक्तिः । तन्नि यमननियमनात् । तदिदमुक्तंनित्यंचेति ॥ नचैतदलौकिकं । नित्यकर्मभिर्दुरितप्रागभावानुवृत्तेःसाध्यत्वेनवादिभिरभ्युपगत त्वात् । अनुवृत्तेर्नित्यतासंपादनानतिरेकात् । सज्ज्ञानानंदशीर्षोसौसज्ज्ञानानंदबाहुकः ॥ यदात्मकोभगवांस्तदात्मिकाव्यक्तिः ॥ किमात्मकोभगवान्ज्ञानात्मकऐश्वर्यात्मकइत्यादिप्रमाणानुसारेणज्ञानपदमुपलक्षणमित्यभिप्रेत्याह ॥ ज्ञानाद्यात्मकत्वेनेति ॥ प्रतिपाद्यदेवतास्तुतीत्युक्तोपपादनायभाष्योक्तांस्तुतिमुपनिषदारूढांकर्तुमाह ॥ वक्ष्यतेचेति ॥ उपनिषदीतिशेषः ॥ एतत्स

तस्याश्चमूर्तेर्ज्ञानाद्यात्मकत्वेन नित्यत्वोपपत्तिरिति । वक्ष्यतेचैतत्सर्वं याथातथ्यतोर्थान्व्यदधात्। वायुरनिल र्चमिति ॥ सर्वयज्ञभोक्तृत्वांतंविशेषणपंचकमित्यर्थः । तान्येववाक्यानिविशेषणक्रमेणपठति ॥ याथातथ्यतइत्यादि ॥ य द्यपि याथातथ्यतइतिवाक्यस्य व्यवधानान्निर्मितवानितिविष्णुतत्वनिर्णयटीकानुसारेणोत्पत्तिप्रतिपादकत्वमेवप्रतीयते ननिया मकत्वप्रतिपादकत्वं । जगद्धातृत्वंचैतद्ग्रंथपर्यालोचनयानियामकत्वं । ततोनैतद्वाक्योदाहरणमत्रोचितं । तथापि विपूर्वस्यद धातेरनेकार्थत्वेनेहनियमनार्थत्वाद्वा उपलक्षणतयानियामकत्वस्यापिविवक्षितत्वाद्वानोक्तदोषः । अतएवैतद्वाक्यव्याख्यानरू पप्रमाणव्याख्यानावसरे ससृजइत्युपलक्षणमि यतीतिज्ञातव्यं ॥ वायुरनिलममृतमिति ॥ अःब्रह्मैवनिलंनिलयनंआश्र

योयस्यवायोःसोप्यमृतःकिमुपरमेश्वरइतिकैमुत्येनात्रनित्यत्वंलभ्यतइतिभावः ॥ यत्तेरूपमिति ॥ रूपशब्दोक्तायामूर्तेःकल्याणतमत्वंनाम ज्ञानाद्यात्मकत्वमेवेतिभावः ॥ सपर्यगाच्छुक्रमिति ॥ शुक्रंतच्छोकराहित्यादितिवक्ष्यमाणानुसारेणशोकराहित्योक्त्यापूर्णानंदत्वलाभइतिभावः ॥ तस्मिन्निति ॥ मारुत्येवयतश्चेष्टासर्वातांहरयेर्पयदितिवक्ष्यमाणप्रमाणानुसारेणापूशब्दोक्तसर्वयज्ञभोक्तृत्वलाभइतिभावः । यद्यपि त्रिविधाहिदेवतावंद्याभवति विशिष्टाइष्टाअधिकृताचेति । तत्रविशिष्टत्वोपपादनायाद्यंविशेषणद्वयं । इष्टत्वोपपादनाय ज्ञानमूर्तयेपूर्णानंदायेतिविशेषणद्वयं । तंयथायथोपासतेतदेवभवतीतिश्रुतेः। अधिकृतत्व

ममृतं यत्तेरूपंकल्याणतमं सपर्यगाच्छुक्रं तस्मिन्नपोमातरिश्वादधातीत्यादि । देवताप्रणामानंतरंगुरुप्रणामःकर्तव्यइतिशिष्यान्ग्राहयितुंगुरुत्वेनापिहरिंप्रणमति ॥ यस्मादिति ॥

सूचनाययज्ञभुजइतिविशेषणमितिवा अनिर्धारितस्वरूपस्यनमनायोगान्निर्धारणस्यचलक्षणसाध्यत्वेनविभवाद्धरेर्लक्षणान्याहेतिवा आद्यंपद्यंप्रकारांतरेणव्याख्यातुंशक्यं । व्याख्यातंचटीकाकृताग्रंथान्तरे । तथापि शिष्यैरेवोह्यतामितिभावेननव्याख्यातमितिद्रष्टव्यं ॥ गुरुत्वेनापीति ॥ अत्रापिपदेनभगवतोभाष्यकारस्यगुरुदेवतयोरभेदंसूचयति । तर्हिपुनःप्रणामोव्यर्थइत्यतोनिमित्तसमावेशेनैमित्तिकविलोपनियमाभावादितिन्यायंमनसिनिधायोक्तं ॥ गुरुत्वेनेति ॥ निबंधस्यप्रयोजनमाह ॥ शिष्यान्ग्राहयितुमिति ॥ हरिंप्रणमतीति ॥ ननुनायंप्रणामःकिंतूपनिबंधः । अतोगुरुत्वेनापिहरिप्रणामंनिबध्नातीत्येववक्तुमुचि ॥ ७ ॥

भा० । यस्माद्ब्रह्मेंद्ररुद्रादिदेवतानांश्रियोपिच । ज्ञानस्फूर्तिःसदातस्मैहरयेगुरवेनमः ।

तं । अतएवप्राक्निबध्नातीत्युक्तं । अन्यथापूर्वोत्तरविरोधापातादितिचेत् । भवत्येवायमपिप्रणामोपनिबंधः । प्रणामवाचकनमइत्यादिशब्दप्रयोगएवहिप्रणामोपनिबंधः । स्तुतिनिबंधोनामोत्कर्षप्रतिपादकशब्दप्रयोगएव । नतुस्तौमीतिस्तुतिवाचकशब्दप्रयोगः । तथात्वेकुत्रापिस्तुतिनिबंधोनस्यात् । नचैवंप्रणमतीत्यनुपपत्तिः । भक्तिपूर्वंनमआदिशब्दप्रयोगस्यवाचिकनमस्कारत्वेननिबंधस्यापिप्रणामरूपत्वोपपत्तेः । प्रमाणत्वस्यमानसादौनिबंधत्वव्यभिचारेपि निबंधस्यप्रणामाव्यभिचारात् । प्रणामवाचकशब्दानुमापकलिपिर्निबंधइत्यंगीकारेहिनिबंधस्यप्रणामव्यभिचारोभवेत् । नचैवमित्युक्तं ॥ नचैवंनमस्काराधिकारग्रथनसूचनेशिष्यशिक्षार्थमितितत्वप्रकाशिकायां नमस्कारग्रथनस्यशिष्यशिक्षार्थत्वोक्तिविरोधइतिवाच्यं । स्वयंवाचिकनमस्काररूपत्वेप्यानुषंगिकशिष्यशिक्षार्थत्वेबाधकाभावात् । एतदभिप्रायेणैवचतत्रतत्रटीकाकाराणांसंकलय्यव्यवहारः । तद्यथा नारायणप्रणामादिकंग्रंथादौनिबध्नाति ॥ नारायणमिति ॥ नारायणप्रणामस्येवगुरुप्रणामस्याप्यभिमतसिध्यंगतयाकार्यारंभे अवश्यमनुष्ठेयत्वात्तदाचरणपुरःसरंब्रह्ममीमांसाशास्त्रव्याख्यानंसमर्थयमानःप्रतिजानीते ॥ तमेवेति ॥ पौनःपुन्येनप्रणमति ॥ निःशेषेति ॥ अपरोक्षतयासंबोध्यप्रणमति ॥ अशेषेतीत्याद्यंतयोःसुधायामुक्तं । नारायणनमस्कारंग्रथयति । देवतानतिसमनंतरंगुरूनपिनमति । देवतात्वेनगुरुत्वेनचांतेपिनमतीत्याद्यंतयोःतत्वप्रकाशिकायामुक्तं । नारायणवंदनंस्वयमंतरायविधुरोपिशिष्यान् ग्राहयितुंप्रकरणादौनिबध्नाति ॥ सदागमैकविज्ञेयमिति ॥ अंतेपिमंगलाचरणस्यकर्तव्यत्वान्नारायणस्तुतिप्रणामौकरोति ॥ स्वतंत्रोयमितीत्याद्यंतयोर्विष्णुतत्वनिर्णयटीकायामुक्तं । एवमन्यत्रापिटीकाकारीयोव्यवहारःस्फुटः । अत्राप्यंतेनारायणंस्तुतिन

तिभ्यांप्रीणयतीत्युक्तं । चंद्रिकायामपि ग्रंथादौमंगलमाचरतीत्युक्तं । नचैतत्सर्वमुक्तविधयावाचिकनमस्कारनिबंधनयोरेकत्वा भावेसंभवति । तस्मात्प्रणामनिबंधस्यापिप्रणामरूपत्वात्प्रणमतीत्युपपन्नतरं । रमाब्रह्मादीनामित्येवोक्किंविहाययोगविभागकरणस्यप्रयोजनमाह ॥ ब्रह्मादीनामिति ॥ नचब्रह्मणोप्राप्तज्ञानांगीकारेविरिंचेतरेषांतिरोहितलाभोवेतितत्वप्रकाशिकाविरोधः । तत्रविरिंचज्ञानतिरोधानाभावस्योक्तत्वेनाप्राप्तप्राप्तिनिषेधादितिवाच्यं । विरिंचज्ञानतिरोधानस्याल्पत्वाभिप्रायेणैवतत्वप्रकाशिकायांविरिंचेतरेषामित्युक्तं । नतुसर्वात्मनातिरोधानाभावाभिप्रायेण । अन्यथातत्रैवोक्तार्थसंमतित्वेनोदाहृते ब्रह्मणस्तुप्रायोनाप्रतिभासितं ॥ विष्णोःप्रीत्यर्थमेवास्यश्रोतव्यंप्रायशोभवेदितिगीतातात्पर्यवाक्येप्रायःशब्देनब्रह्मणोप्यन्यप्रतिभानानुज्ञा

ब्रह्मादीनामप्राप्तज्ञानमुत्पद्यते श्रियस्तुसर्वदाविद्यतइतिसूचयितुं श्रियोपीतिपृथग्ग्रहणं ।

नेनतद्विरोधापातात् । आमुक्तेर्व्यक्त्यतिशयोपेतमितिप्रमाणलक्षणविरोधापाताच्चेतिभावः ॥ श्रियस्त्विति ॥ बुद्ध्याविवेकेनज्ञानमितिवर्तते । नन्वेतदैतरेयभाष्यविरुद्धं । तत्रजानंत्याअपिदेव्यालोकानुग्रहार्थंविशेषज्ञानार्थंचपृष्टःसभगवानाह । कतरःसआत्मेतीत्यादौविशेषज्ञानार्थमित्यनेनरमाज्ञानेप्यप्राप्तातिशयलाभस्योक्तत्वादितिचेत् मैवं । अत्ररमाज्ञानस्यसर्वदाविद्यतइतिनित्यत्वमेवोक्तं । नत्वभिव्यक्त्यभावः । तत्रतुनित्यव्यक्तस्यापिरमाज्ञानस्यभगवदुपदेशरूपसामग्रीमहिम्नाव्यक्तिविशेषएवोच्यते । यथा विशिष्टादक्षिणासुखइत्यत्रभगवत्संयोगविशेषेणार्धनारीरूपरमायाःरूपांतरापेक्षयाव्यक्तस्यापिसुखस्यव्यक्तिविशेषरूपोतिशयउक्तस्तद्वज्ज्ञानेप्युपपद्यतइतिसांप्रदायिकाः । यद्वा अनुव्याख्याने नित्यमेकप्रकाराचनारायणमतिःपरा ॥ सूर्यप्रभावा

दखिलंभासयन्तीनिरंतरा ॥ निर्लेपावीतदोषाचनित्यमेवाविकारिणीत्यादिनानारायणमतेर्वृद्धिह्रासराहित्यलक्षणैकप्रकारत्वमुक्त्वा तदेवप्रायस्तल्लक्षणाश्रियइत्यनेनरमामतावतिदिश्य तथैवस्पष्टताभावादित्यनेनस्पष्टतायाएवप्रायःशब्दव्यावर्त्यत्वेनोक्तेस्तद्वलाद्रमाज्ञानस्यनित्यमेकप्रकारत्वमेवेत्यवसीयते । स्पष्टत्वंतुनविषयोपाधिकमितिप्रसिद्धमेव । सर्गस्थितिर्यतिर्ज्योतिर्नित्यानंदप्रदोक्षरेइत्येतद्व्याख्यानरूपविष्णुतत्वनिर्णयटीकायां ज्योतिर्नित्याविर्भूतोभगवदितरसर्वसाक्षात्कारइत्यनेनरमाज्ञानस्यनित्याविर्भूतत्वोक्तेश्च । विशिष्टादक्षिणासुखइत्यपिसुखविषयकमेव । नज्ञानविषयकं । ऐतरेयभाष्यवचनमपि अज्ञलोकानुग्रहार्थज्ञानिलोकस्यविशेषज्ञानार्थंचेत्येवंपरतयाव्याख्येयं । कुतएतत्सर्वमितिचेत् । निरवकाशोदाहृतानुव्याख्यानानुरोधादेवेतिसर्वसमंज

चशब्दोऽवधारणे । यस्मादित्यनेनसंबध्यते ।

सं । ननुमूलेचशब्दोव्यर्थः । नचदेवतासमुच्चयार्थइतियुक्तं । अपिशब्देनैवतत्सिद्धेः । एकक्रियायोगेसमुच्चयसंभवेपिप्रकृतेक्रियाभेदस्यवक्ष्यमाणत्वेनसमुच्चयानुपपत्तेश्च । अतएवचशब्दस्यदेवतानामित्यनेनसंबंधेनान्योन्यसमुच्चयार्थौचापिशब्दावित्यपिव्याख्यानंनयुक्तमित्यतआह ॥ चशब्दइति ॥ नन्ववधारणार्थत्वमप्ययुक्तं । अपिशब्दस्यसमुच्चयार्थत्वेविरोधेनावधारणानुपपत्तेः । अर्थांतरपरत्वेप्यवधारणस्यव्यर्थत्वादित्यतोर्थविशेषज्ञापनायभिन्नक्रमेणसंबंधांगीकारान्नदोषइत्याशयेनाह ॥ यस्मादित्यनेनेति ॥ तथाच ननुरमायानित्यमुक्तत्वेनस्वभावसिद्धतज्ज्ञानस्यनभगवदधीनत्वं । अन्येषामपिदेवानांस्वस्वगुरूपदेशलब्धज्ञानस्यतदनुत्पन्नत्वमेव । ततोनभगवतोगुरुत्वमुपपद्यतइत्याशंकापरिहारायययस्मादेवेत्युक्तं । नित्यमुक्तायाःश्रियोपिज्ञान

स्फूर्तिर्यस्मादेव नस्वभावबलायत्ता द्रव्यंकर्मचेत्यादिप्रमाणसिद्धत्वात् । तथाब्रह्मादिदेवतानांज्ञानस्फूर्तिर्यस्मादेव । नतुस्वस्वगुरूपदेशात् । अज्ञानांज्ञानदोविष्णुः अगम्यत्वाद्धरिस्तस्मिन्नाविष्टइत्यादिप्रमाणसिद्धत्वात् । तेषांचनिमित्तमात्रत्वादितियोजनोक्ताभवति । ज्ञानशब्दस्यभावसाधनत्वेज्ञानज्ञानस्यभगवदधीनत्वप्राप्त्या नगुरुत्वोपपादनंस्यादित्यतोव्याचष्टे ॥ ज्ञातव्यार्थेति ॥ ज्ञानशब्देनज्ञेयमुपलक्ष्यतइतिप्रमेयदीपिकानुसारेणलक्षणयावा साध्यतइतिसाधनंकृत्यल्युटोबहुलमितिस्मरणादितिसुधानुसारेणकर्मणिल्युडंततयावा ज्ञानशब्देनज्ञातव्यलाभइतिभावः । ननुक्रियाकारकसंबंधस्यवाक्यार्थत्वात्तस्यचक्रियाभिसंबंधसापेक्षत्वेनात्रक्रियाध्याहारेकर्तव्येउत्पद्यतइत्यध्याहारेश्रियइत्यस्यानन्वयप्रसंगः । विद्यतइत्यध्याहारेब्रह्मादीनामित्यस्यान

ज्ञानस्फूर्तिःज्ञातव्यार्थप्रतिभा । यथायोगंक्रियाध्याहारः ।

न्वयप्रसंगइत्यतउत्पद्यतेविद्यतइतिक्रियाद्वयाध्याहारमंगीकृत्यब्रह्मादीनांज्ञानस्फूर्तिरुत्पद्यते । श्रियोज्ञानस्फूर्तिःसदाविद्यतइत्यन्वये नकोपिदोषइत्याशयेनाह ॥ यथायोगमिति ॥ यथासंभवमित्यर्थः । एतद्विवरणायैवपूर्वमुत्पद्यतेविद्यतइतिचोक्तं । नचनीलमुत्पलंराज्ञोयंपुरुषइत्यादौक्रियाभिसंबंधाभावेपिवाक्यार्थबोधान्नतन्नियमइतिवाच्यं । तत्रहिनीलमुत्पलंनरक्तं राज्ञोयंपुरुषोनदेवदत्तस्येतिविशेषणांतरव्यावृत्तिप्रतीतावेवतात्पर्येणक्रियासंबंधाभावस्यादोषत्वात् । इहचक्रियासंबन्धबोधएवतात्पर्येण तस्यावश्यकत्वात् । एतच्चानभिहितसूत्रेआकरेस्पष्टमितिज्ञातव्यं । मूले सदेत्यस्यविद्यतइत्यध्याहृतक्रिययाअन्वयः । अतएव प्राक्सर्वदाविद्यतइत्युक्तं नमनंस्वभावइतिज्ञापयितुंसदानमइतिवान्वयः । हरयेगुरवेनमइत्येतावताचारितार्थेपिगुरुत्वोपपाद

नायस्मादित्यादिकमितिसुज्ञेयत्वान्नोक्तमित्यवगंतव्यं । ननुऋषिदेवताज्ञानस्यानावश्यकत्वेनतज्ज्ञापकोत्तरभाष्यमनर्थकं । यदिचयोहवाइत्यादिश्रुत्यातस्यावश्यकत्वं तर्हितयैवच्छंदःप्रभृतिज्ञानस्याप्यावश्यकत्वावगमात्तदपिवक्तव्यमेवेत्यर्धचरतीयानुपपत्तिरित्यतःश्रुत्युपन्यासपूर्वकंछन्दःप्रभृत्यकथनेनिमित्तंचवदन्उत्तरंभाष्यंसंगमयति ॥ योहवाइति ॥ छन्दोगानांब्राह्मणवाक्यमिदं । अस्यार्थः । ऋषिर्मंत्रद्रष्टा तस्येदमार्षं । ऋषिदृष्टत्वमितियावत् । छंदोगायत्र्यादि देवतामंत्रप्रतिपाद्योर्थः । सैव दैवतं । ब्राह्मणपदेनतद्व्याख्येयमंत्रार्थोलक्ष्यते । इदंचोत्तरटीकायामेवव्यक्तं । आर्षंचछन्दश्चदैवतंचब्राह्मणंच आर्षछन्दोदैवतब्राह्मणानि अविदितानि यस्यमंत्रस्य । तेनमंत्रेणेतिसमुदायैकवचनं । मंत्रशब्दोवेदमात्रपरो नतुछन्दोबद्धवाक्यपरः । तथास

योहवाअविदितार्षच्छंदोदैवतब्राह्मणेनमंत्रेणयजतियाजयतिअध्यापयतिवा स्थाणुं वर्च्छतिगर्तंवापद्यतेप्रमीयतइतिश्रुतेर्देवतादिज्ञानवतएवविद्याफलतीतिज्ञायते ।

तिसर्वत्रऋष्यादिज्ञानस्यावश्यकतानस्यात् । यइतिश्रवणात्सइत्यध्याहार्यं । योऋषिछन्दोदैवतार्थानज्ञात्वाकेवलेनमंत्रेणयाजयतिअध्यापयतिवासःस्थाणुंस्थाणुत्वंतप्तस्थाणुरूपंनरकं स्थावरजातिंवाऋच्छतिप्राप्नोति । गर्तं भूगर्तरूपेनरके कूपांतश्चारिमंडूककच्छपादितिर्यग्योनिषुवा पद्यतेपात्यते । प्रमीयतेवाअल्पायुर्भवतीति । अस्यपापीयान्भवतीति । तस्मादेतानिमंत्रेमंत्रेविद्यादितिवाक्यशेषेणान्वयः ॥ देवतादिज्ञानवतइति ॥ यद्यपिश्रुत्यनुसारेणऋष्यादीतिवक्तव्यं तथापिप्राधान्याभिप्रायेणैवमुक्तमितिज्ञेयं ॥ फलतीतिज्ञायतइति ॥ नचवाच्यंऋष्याद्यज्ञानेअनर्थएवोच्यते नतुतज्ज्ञानेफलंभवतीति । नहिनिंदानिंद्यंनिंदि

तुंप्रवर्तते अपितुविधेयंस्तोतुमितिन्यायेनविदितऋष्यादिकेनमंत्रेणकृतंयजनादिकंसफलंभवतीत्यत्रतात्पर्यात् । एतच्छ्रुतिव्याख्यानरूपानुक्रमणिकासमाख्यानाच्चायमर्थोज्ञायते । तथाह्यनुक्रमणिका मंत्राणांब्राह्मणार्षेयछंदोदैवतवित्याजनाध्यापनाभ्यां श्रेयोधिगच्छतीति । ननुयोहवेतिश्रुतौब्राह्मणपदेनगाथारूपब्राह्मणज्ञानस्यावश्यकत्वमुच्यते । तदसंगतं । ऋषिछंदोदैवतानि ब्राह्मणार्थस्वराद्यपि ॥ अविदित्वाप्रयुंजानोमंत्रकंटकउच्यते ॥ स्वरोवर्णोक्षरंमंत्रोविनियोगोर्थएवच ॥ मंत्रंजिज्ञासमानेनवेदितव्यंपदेपदेइतिस्मृतिभ्यामवश्यवक्तव्यत्वेनप्राप्तार्थज्ञानानुक्तिश्च । ब्राह्मणजाप्योर्थोब्राह्मणार्थः । सच विनियोगोमंत्रार्थश्च । ब्राह्मणपदस्यार्थोपलक्षकत्वांगीकारेणश्रुतौतद्दोषपरिहारेपि भाष्ये ऽर्थानुक्त्यान्यूनतायाअपरिहारादित्यतआह ॥ तत्रब्राह्मणपदोपलक्षितार्थज्ञानंव्याख्यानादेवभविष्यति । छंदोज्ञानंत्वक्षरगणनयासुकरमेव । पदोपलक्षितेति ॥ तत्र ऋष्यादिचतुष्टये । ब्राह्मणपदोपलक्षितोयोमंत्रार्थस्तज्ज्ञानमित्यर्थः । ब्राह्मणस्यमंत्रव्याख्यानरूपतयामंत्रार्थस्यब्राह्मणज्ञाप्यत्वात् ज्ञाप्यज्ञापकभावरूपशक्यसंबंधेनलक्षणोपपन्नेतिभावः । उपलक्षणाचगौणीचतिस्रःशब्दस्यवृत्तयइत्यादौलक्षणामात्रेप्युपलक्षणशब्दप्रयोगादिहोपलक्षणाजहल्लक्षणैवेतिज्ञातव्यं । तथाप्यवश्यज्ञातव्यछन्दोनुक्त्याभाष्येन्यूनतेत्यतआह ॥ छंदोज्ञानंत्विति ॥ चतुर्विंशत्यक्षरागायत्री । द्वादशाक्षराजगती । इत्यादिप्रमाणानुसारेणाक्षरगणनयेत्यर्थः । सुकरमेवेत्यतःपरं स्वरादिज्ञानमप्यध्ययनादिनासुकरमितिद्रष्टव्यं । तेनोदाहृतश्रुतिस्मृतिभ्यांस्वरादेरप्यवश्यवेदितव्यत्वेनोक्तेस्तदनुक्तिदोषइतिचोद्यानवकाशः । नचैवमप्युदाहृतस्मृतिभ्यामेवावश्यवेद्यत्वेनोक्तविनियोगानुक्त्यान्यूनतातादवस्थ्यमिति

वाच्यं । एकैकस्मिन्यज्ञादावप्रधानकर्मणामतिबहुत्वात्केनमंत्रेणकिंकर्मानुष्ठेयमितिजिज्ञासायांहि कर्मणेवांदेवेभ्यःशकेयं हस्तावनिक्ते ऐंद्र्यागार्हपत्यमुपतिष्ठतइत्यादिब्राह्मणवाक्येनमंत्राणांविनियोगःक्रियते । अयंचकर्मानुष्ठानएवोपयुक्तोनब्रह्मज्ञाने । ब्रह्मज्ञानेपीत्थंभावानामनेकत्वेनतत्रतत्रमंत्राणांविनियोगसद्भावेपि एतदुपनिषद्गताःसर्वेपिमंत्राःकेवलंब्रह्मपराइतिनान्यत्रविनियोगमपेक्षन्ते।आद्यमंत्रत्रयस्यब्रह्मज्ञानोपयुक्ताधिकारप्रतिपादकत्वेपिनोदाहृतमंत्राणामिवान्यत्रविनियोगः।अतोयुक्ताविनियोगानुक्तिरिति । नचछन्दःप्रभृतीनामिवऋषिदेवते अप्यनुक्रमणिकादिनासुज्ञानेइतिवाच्यं । ऋग्भाष्यदिशाऽनुक्रमणिकादेस्तत्रतत्रस्वऋषिदेवतेतुज्ञापयन्नाह ॥ स्वायंभुवइति ॥ व्याचिकीर्षितत्वेनबुद्धौप्रकृतत्वादेतैरित्युक्तं । मूर्त्यंतरंविहाययज्ञस्यस्तुतौकिंकारणमित्यतोविशेषतःस्वसंबंधमाह ॥ आकूतिसूनुमिति ॥ भगवंतमितिपूजार्थलितत्वेनतदुक्ते अनाश्वासाद्वा प्राधान्यज्ञापनायवा तदुभयोक्तिसंभवादितिसर्वंसमंजसं ॥ ज्ञापयन्निति ॥ (सूचयन्निति ॥) स्वायंभुवोऋषिःयज्ञोदेवतेतिकण्ठतोनुक्तत्वादेवमुक्तमितिज्ञातव्यं । ननुसर्वनाम्नांप्रकृतपरामर्शकत्वात्कथमेतैरितिप्रागप्रकृतमंत्रपरामर्शइत्यतोबुद्ध्याप्रकृतत्वमेवहिप्रकृतत्वं ग्रंथप्रकृतत्वंतुबुद्धिप्रकृतत्वस्यज्ञापकं । प्रकृतेचबुद्ध्याप्रकृतत्वाद्युक्तःपरामर्शइत्याशयेनाह ॥ बुद्धाविति ॥ तदुपपादनायोक्तं ॥ व्याचिकीर्षितत्वेनेति ॥ इच्छायाःज्ञानपूर्वकत्वेनव्याकर्तव्यज्ञानाभावेव्याचिकीर्षानुपपत्तिरितिभावः ॥ विशेषतःस्वसंबंधमिति ॥ (विशेषसंबंधमिति ॥) दौहित्रत्वरूपमित्यर्थः । अतएवप्रमाणे

भा० । स्वायंभुवोमनुरेतैर्मंत्रैर्भगवंतमाकूतिसूनुंयज्ञनामानंविष्णुंतुष्टाव ।

स्वदौहित्रमितिवक्ष्यति । अनेनान्यस्ययज्ञनाम्नोभगवतोऽभावात्कथमिदंविशेषणमितिचोद्यंपरिहृतं । उक्तशंकापरिहारकतयासं
बंधविशेषज्ञापनायस्वरूपकथनत्वांगीकारात् ॥ कुतएतदिति ॥ स्वायंभुवादेर्ऋष्यादित्वंकुतःप्रमाणादित्यर्थः । अप्रतीतिनि
रासायपदद्वयार्थमाह ॥ सावधानेनेति ॥ रक्षोभिःखादितुंप्राप्तस्यापिभगवत्स्तुतिविषयेजागरूकत्वज्ञापनायेदंविशेषणमिति
ज्ञातव्यं । एतदभिप्रायेणैव इतिमंत्रोपनिषदंव्याहरंतंसमाहितमितिभागवतेसमाहितमित्युक्तं । ननुकिंमोक्षार्थंतुष्टावउतरक्षो
निरसनार्थं । अथोभयार्थं । नाद्यः । रक्षोभिरुग्रैरित्यादिनारक्षोनिरसनार्थत्वप्रतीतेः । नद्वितीयः । स्तोत्रंश्रुत्वैवतदसहमानैः
कुतएतदवगम्यतइत्यतआह ॥ स्वायंभुवइति ॥ अवहितात्मना सावधानेनमनसा । यद्य
प्यसौस्वपरमोक्षार्थंतुष्टाव तथाप्यवांतरमस्यफलांतरंसिद्धमित्याह ॥ रक्षोभिरिति ॥
खादितुंप्राप्तइतिप्रमाणानुसारेण इतिमंत्रोपनिषदंव्याहरंतंसमाहितं ॥ दृष्ट्वाऽसुरायातुधानाजग्धुमभ्यद्रवन्क्षु(क्रु)धाइत्यादिभाग
वतानुसारेणचस्तोत्रारंभानंतरंरक्षसांप्राप्तत्वेपिततःप्रागप्राप्तत्वेनतन्निरसनस्योद्देश्यत्वासंभवात् । अतएवनतृतीयोपीत्यतस्तृतीयं
पक्षमंगीकृत्यरक्षोनिरसनस्यावांतरफलत्वान्नदोषइत्याह ॥ यद्यपीति ॥ अत्रमनुयोग्यब्रह्मवाय्वादिप्रतीकेषु देवतांतरयोग्यपूषा
दिप्रतीकेषूपासनस्यसर्वसाधारणाहमाद्युपासनस्यचोक्तत्वात्स्वपरमोक्षार्थमित्युक्तं । यद्यप्यवहितात्मनेत्यंतेनैवक्रुष्यादेरुक्तत्वादवां

भा० । स्वायंभुवःस्वदौहित्रंविष्णुंयज्ञाभिधंमनुः । ईशावास्यादिभिर्मंत्रैस्तुष्टावावहितात्मना । रक्षोभिरुग्रैःसंप्राप्तःखादितुंमोचितस्तदा ।
स्तोत्रंश्रुत्वैवयज्ञेनतान्हत्वाऽवध्यतांगतान् ।

तरफलप्रतिपादकप्रमाणशेषोदाहरणमनर्थकं । तथापिशिववरातिक्रमणयुक्त्यायज्ञस्यविष्णुत्वसमर्थनज्ञापनार्थंवा उपनिषदोमोक्ष
रक्षोनिरसनरूपप्रधानावांतरप्रयोजनज्ञापनार्थंवातदुदाहरणं।अवांतरप्रयोजनोक्त्याप्रधानस्यापिसुज्ञानत्वात् । अतएवमोक्षस्येत्या
दिनातथैववक्ष्यतीतिज्ञातव्यं।तदेत्यस्यमोचनकालइत्याद्यर्थप्रतीतिनिरासाय इतिमंत्रोपनिषदंव्याहरंतंसमाहितं ॥ दृष्ट्वाऽसुरायातु
धानाजग्धुमभ्यद्रवन्क्षु(न्क्रु)धेत्यादिभागवताविरोधेनार्थमाह ॥तदास्तुतिकालइति ॥ इदंचखादितुंसंप्राप्तइत्यनेनान्वेति।तत्रनि
मित्तंस्तोत्रंश्रुत्वैवेति॥अनेनस्तोत्रंश्रुत्वैवप्रसन्नेनयज्ञेनमोचितइत्यन्वयभ्रांतिःपरिहृताभवति । तथात्वेउदाहृतभागवतविरोधापा
तदा स्तुतिकाले स्तोत्रंश्रुत्वैव तदसहमानैःरक्षोभिःखादितुंसंप्राप्तोयज्ञेनतेभ्योमोचितइत्यर्थः ।
तात्राक्षसानित्यध्याहारेणपुल्लिंगोपपत्तिः । अवध्यत्वेकारणमाह ॥ प्रादाद्धीति ॥ ननुबाधने
कथंतेषांशक्तिरित्यतआह ॥ तैरिति ॥ अन्येषांतैर्वध्यत्वमितितेषामन्यवधेसामर्थ्यमित्यर्थः ।
तादितिद्रष्टव्यं । स्तोत्रश्राविणांसर्वेषामेवप्रवृत्त्यभावात्रक्षसामेवकुतइत्यतएवशब्दाभिप्रायउक्तस्तदसहमानैरिति ॥ रक्षःश
ब्दस्यनपुंसकत्वात्तानीतिवक्तव्यमित्यतोध्याहृतेनपुल्लिंगेनान्वयान्नदोषइत्याह ॥ तात्राक्षसानितीति ॥ ननुरक्षोभ्योऽवध्य
त्ववरदानसमये अन्येषांरक्षोवध्यत्वशापदानंहरस्यानुचितं । अन्यैस्तदाहरद्रोहानाचरणादित्यतो नेदमन्येषांशापदानं । किंतुर
क्षोभ्योवरांतरदानमित्यभिप्रेत्यतत्परतयाभाष्यंयोजयति ॥ अन्येषामिति ॥ ननुनकेवलंतेषामवध्यत्वं किंत्वन्येषांवध्यत्वंचे

भा० । प्रादाद्भिगवांस्तेषामवध्यत्वंहरःप्रभुः । तैर्वध्यत्वंतथाऽन्येषामतःकोन्योहरेःप्रभुरितिब्रह्मांडे ।

त्यस्यार्थस्यसमुच्चायकेनतथाशब्देनप्रतीतेःकथमेवंव्याख्यानमित्यतस्तथाशब्दस्यतात्पर्यार्थवरसमुच्चायकत्वेपि श्रुतार्थसमुच्चायकत्वाभावान्नदोषइत्याशयेनाह ॥ तथाशब्दइति ॥ नकेवलमवध्यत्ववरं किंत्वन्यवधसामर्थ्यरूपंवरंचेत्येवंवरसमुच्चयेइत्यर्थः । नन्वतःकोन्योहरेःप्रभुरित्यत्रहरेरेवपरमसमर्थत्वेपूर्वोक्तस्यहेतुत्वमुच्यते तदयुक्तं । प्रादादित्याद्यव्यवहितवाक्योक्तवरदानस्यहेतुत्वमुत व्यवहितवाक्योक्तस्य । नाद्यः । अप्रयोजकत्वेनहेतुहेतुमद्भावानुपपत्तेः । द्वितीयेपि यतोराक्षसाःयज्ञेनहताः अतइति वा । यतःस्वायंभुवोयज्ञेनमोचितः अतइतिवा । यतस्तुष्टावअतइतिवावक्तव्यं पक्षांतराभावात् । नचतद्युक्तं । राक्षसहननादेरत्यल्पत्वेनेतरसाधारण्येनचहरेरेवपरमसमर्थत्वसाधकत्वानुपपत्तेरित्यतः पूर्ववाक्यसमुदायलब्धशिववरातिक्रमणस्यहेतुत्वेना

तथाशब्दोवरसमुच्चये । यतएवंहरिःशिववरमप्यतिक्रां
तवानतोहरेरन्यःकोनामप्रभुःसमर्थःकिंतुहरिरेवेत्यर्थः ।

न्वयांगीकारान्नकश्चिद्दोषइत्याशयेनहेतुहेतुमद्भावंस्पष्टयति ॥ यतइत्यादि ॥ अतःशब्दश्रवणाद्यतइत्यध्याहारः । हेतोरसिद्धिपरिहारायएवमित्युक्तं । ननुहरेरन्यःसमर्थोनास्ति हरेःशिववरातिक्रमणवत्त्वात् इतिव्यधिकरणमित्यतःश्रुतसाध्येहेतुत्वासंभवेपि पर्यवसितेतत्संभवतीत्यभिप्रेत्याक्षेपार्थककिंशब्दलब्धंपर्यवसितसाध्यंदर्शयति ॥ किंतुहरिरेवेति ॥ ननुभागवतेचायमर्थएवोक्तइत्युत्तरभाष्येणेशावास्यादिमंत्राणांस्वोक्तार्थेभागवतंप्रमाणत्वेनोच्यते । उतमन्वादीनामृष्यादित्वे । नाद्यः । मंत्रार्थस्याद्याप्यनुक्तत्वेनतत्रप्रमाणानपेक्षणात् । नद्वितीयः । तत्रप्रमाणस्योक्तत्वात् । प्रमाणांतरत्वेपिभागवतेचायमृष्यादिरुक्तइत्युक्ति

प्रसंगादित्यतोद्वितीयंपक्षंमनसिनिधायावतारयति ॥ अत्रेति ॥ स्वायंभुवो ऋषिर्यज्ञोदेवतेत्यत्रेत्यर्थः । प्रमाणांतरमित्युक्त्याचशब्दोव्याख्यातः । मंत्रार्थस्यप्रागनुक्तत्वादयमितिपरामर्शानुपपत्तिरित्यतोबुद्धिस्थवक्ष्यमाणपरामर्शकत्वान्नदोषइत्याशयेनोक्तं ॥ योर्थोवक्ष्यतेऽयमिति ॥ अष्टमादाविति ॥ अष्टमस्कंधस्यादिभागेप्रथमाध्याये तत्रापिप्रथमभागइत्यर्थः । तद्यथा । आत्मावास्यमिदंविश्वंयज्जगत्यांजगन्मनः ॥ तेनत्यक्तेनभुंजीथाःमागृधःकस्यचिद्धनमिति । अस्तुकिंततइत्यतआह ॥ तत्रचेति ॥ तस्मिन्नेवभागवते इतिमंत्रोपनिषदंव्याहरंतंसमाहितमित्यनेनमनोःस्तोतृत्वं तांस्तथाऽवसितान्वीक्ष्ययज्ञःसर्वगतोहरिरि

अत्रप्रमाणांतरमाह ॥ भागवतेचेति ॥ ईशावास्यादिमंत्राणांयोर्थोवक्ष्यते
ऽयमेवभागवतेऽष्टमादावुक्तः । तत्रचमनुःस्तोता यज्ञनामाविष्णुःस्तुत्यइति
स्पष्टंप्रतीयते । तत्समाख्यानादत्रापितयोरेवऋषिदेवतात्वंज्ञायतइतिभावः ।

त्यत्रयज्ञनाम्नोविष्णोःस्तुत्यत्वंचस्पष्टंप्रतीयतइत्यर्थः । ततोपिकिंप्रकृतइत्यतआह ॥ तत्समाख्यानादिति ॥ (तत्समाख्येति ॥ यद्यपिभागवतेचायमेवार्थउक्तइतिभाष्यस्यभागवतेऽष्टमादावयंमनोःस्तोतृत्वंयज्ञनाम्नःस्तुत्यत्वमित्येवंरूपोर्थउक्तइत्येवव्याख्यानमुचितं । तावतैवोक्तार्थेभागवतस्यप्रमाणत्वलाभात् । नत्वीशावास्यादिमंत्राणांयोर्थइत्यादिव्याख्यानं तस्यप्रकृतानुपयोगात् । तथापि तथाव्याख्यानेमन्वादेर्ऋषित्वादिकंभागवतोक्तमित्येवविज्ञायते । नत्वीशावास्यादिमंत्रऋषित्वादिकं । भा

भा० । भागवतेचायमेवार्थउक्तः ।

गवतेईशावास्यादिमंत्रोदाहरणपूर्वकंमन्वादेःस्तोतृत्वाद्यकथनात् । टीकोक्तव्याख्यानेत्वीशावास्यादिमंत्राणांभागवतेअर्थतोनुवादलाभेनमन्वादेरीशावास्यादिमंत्रऋषित्वादिकंसुज्ञानं । अत एवंव्याख्यातमितिज्ञातव्यं । अनेनेशावास्यादिमंत्राणांयोर्थोवक्ष्यतेअयमेवभागवतेअष्टमादावुक्तः । तत्रचार्थतोमंत्रानुवादरूपेभागवते अयंमन्वादेःस्तोतृत्वादिरूपोर्थउक्तइत्यावृत्त्याभाष्यंयोजितंभवति । व्याख्येयत्वप्रयोजकविषयाद्यकथनप्रयुक्तांभाष्यकृतोन्यूनतांपरिहरति ॥ अनेनेति ॥ ऋष्यादिप्रदर्शनपरग्रंथेनेत्यर्थः । अभ्यर्हितत्वाद्विषयाधिकारीतिवक्तव्ये अधिकार्यादित्वेनवचनं स्ववचनप्रमाणभाष्यानुसारेणेतिज्ञेयं । विषयादिसमुदाय

अनेनोपनिषदोधिकारिविषयप्रयोजनाभिसंबंधोपिदर्शितोभवति । मन्वादीनामधिकारिणां यज्ञनाम्नोविष्णोर्विषयस्य मोक्षस्यप्रधानस्यरक्षोनिरसनस्याप्रधानस्यचप्रयोजनस्यसूचितत्वात् । अतोयुक्तमेतदुपनिषदोव्याख्यानं गहनार्थत्वाच्चेति । उपदिष्टमपितत्वंअधिकारिणएवहृदयेऽवतिष्ठते नान्यस्येति

स्यैवव्याख्येयत्वप्रयोजकत्वं नत्वेकैकस्येत्यभिप्रायेणसंबन्धइत्येकवचनं । विषयादिमतोप्युत्तानार्थस्यानादरेणव्याख्येयत्वमित्यतआह ॥ गहनार्थत्वाच्चेति ॥ उक्तंचटीकाकारैरन्यत्र गहनार्थत्वाच्चान्यपरित्यागेनास्यैवव्याख्येयत्वमिति ॥ नन्वाद्यमंत्रस्यैवव्यर्थत्वात्तद्गतेशावास्यपदव्याख्यानपरमुत्तरभाष्यंसुतरामनर्थकमित्यतोमंत्रंतावदवतारयति ॥ उपदिष्टमपीत्यादिना ॥ उपनिषत् विच्छिन्नतृष्णत्वमाद्येनमंत्रेणविधत्तेऽत्यन्वयः । यद्वा मनरितिकर्तृपदमध्याहार्यं । तथात्वेउपनिषदधिकारसिद्ध्यर्थ

मित्येकंपदं । ननुतत्वप्रतिपादनायप्रवृत्तोपनिषत् विच्छिन्नतृष्णत्वंकथंप्रतिपादयेदित्यतउक्तं ॥ तावदिति ॥ तदेवस्पष्टयति ॥ तत्वंविवक्षुरिति ॥ अनेजदेकमित्यादिनेतिशेषः । तर्ह्यर्थभेदादेकवाक्यत्वंनस्यादित्यतोऽवांतरार्थभेदोनदोषायेत्याशयेनोक्तमधिकारसिद्ध्यर्थमिति ॥ तत्वज्ञानाधिकारस्यवैराग्यस्यसिद्ध्यर्थमित्यर्थः । ननुतत्वोपदेशेनैवतत्वज्ञानसिद्धेःकिंवैराग्यस्य तत्राधिकारत्वकल्पनयेत्यतउक्तमुपदिष्टमपीत्यादीतिशब्दांतं ॥ अनेनान्वयव्यतिरेकावुक्तौ इतिशब्दोहेतौ । अधिकारसिद्ध्यर्थमित्यनेनान्वयः । नन्वेवंमागृधःकस्यस्विद्धनमित्येतावतावैराग्यस्यविहितत्वादन्यद्ध्यर्थमित्यतउक्तं॥ सोपपत्तिकमिति॥

तत्वंविवक्षुरुपनिषदधिकारसिध्यर्थंविच्छिन्नतृष्णत्वंतावदाद्येनमंत्रेणसोपपत्तिकंविधत्ते । तत्रेशावास्यपदंदुर्गमार्थत्वाद्व्याख्याति ॥ ईशस्येति ॥ अनेनावासमर्हतीत्यावास्यं ईशस्यावास्यंईशावास्यमित्युक्तंभवति ।

एतच्चाग्रेस्पष्टं । एवंमंत्रमवतार्यभाष्यमवतारयति ॥ तत्रेति ॥ मंत्रइत्यर्थः । मंत्रस्यावश्यकत्वेसिद्धइतिवा । ननुविग्रहप्रदर्शनार्थमुत्तरभाष्यस्यप्रवृत्तिरुताऽऽवास्यपदव्याख्यानार्थं । नाद्यः । ईशस्यावास्यमीशावास्यमित्येववक्तव्यत्वात् ।नद्वितीयः । ईशस्येत्यस्यव्यर्थत्वात् । आवास्यपदेनतदर्थलाभाच्चेत्यतःउभयोरपिविवक्षितत्वान्नान्यतरवैयर्थ्यमित्यभिप्रेत्यावास्यपदेनावासयोग्यत्वलाभप्रकारंदर्शयन्विग्रहमपिदर्शयति ॥ अनेनेति ॥ आवासमर्हतीति ॥ अनेनाऽऽपूर्वाद्वसनिवासइत्यस्मादर्हेकृत्य

भा० । ईशस्यावासयोग्यमीशावास्यं ।

तृचश्चेत्यर्हार्थेण्यत्प्रत्ययेआदिवृद्धौआवास्यमितिभवतीत्युक्तंभवति । नन्वीशावास्यमित्यत्राऽध्यापकैरीशेति वास्यमितिच पद द्वयस्यपठ्यमानत्वात्कथंभाष्येएकपदत्वेनव्याख्यानं । परेणाप्यतएवभिन्नपदत्वेनव्याख्यातमितिचेन्मैवं ॥ द्रर्वत्पाणीशुर्भस्प तीइत्यादावध्यापकपदपाठातिक्रमेणऋग्भाष्येप्रकारांतरेणव्याख्यातत्वेनाध्यापकपाठस्यापपाठत्वाभिप्रायेणवा ऋष्यंतरदृष्टैकप दत्वाभिप्रायेणवा सर्वज्ञभाष्यकृद्व्याख्यानस्योपपन्नतरत्वात् । नचपदद्वयस्यापिऋष्यंतरदृष्टत्वेतेनभाष्यकृदुक्तार्थालाभइतिवा च्यं । ईशापरमेश्वरेणविभक्तिव्यत्ययेनेशस्यपरमेश्वरस्यवास्यंवासार्हमितिव्याख्यानेनतल्लाभोपपत्तेः । अपव्याख्यानंत्वर्थानुप

जगत्यामित्येतत्पृथिव्यामित्यन्यथाप्रतीतिंनिरासायव्याचष्टे ॥ जगत्यामिति ॥ तेनेतिपरामर्शस्य विषयोनप्रतीयते त्यक्तस्यचभोगसाधनत्वमयुक्तमतोदुर्गमार्थंतृतीयपादंव्याख्याति ॥ तेनेति ॥

पत्तेरेवानुपपन्नं । नतुभिन्नपदत्वेन । युक्तंचैकपदत्वाश्रयणेनव्याख्यानं । आत्मावास्यमिदंसर्वंयज्जगत्यांजगन्मनः इतिभागव तेएकपदत्वेनैवार्थतोस्यानुवादात् । भिन्नपदत्वस्यार्थतोनुवादपक्षे आत्मवास्यमित्येवस्यान्नतुदीर्घतयेतिभाति ॥ अन्यथाप्रती तीति ॥ जगतीशब्दस्यपृथिवीपरत्वे सर्वमस्वतंत्रंपरमेश्वराधीनमितिवक्ष्यमाणार्थालाभात्प्रकृतासंगतिः । प्रवृत्तयेप्रकृतिगमि तिवक्ष्यमाणप्रमाणविरोधश्च । अतोन्यथाप्रतीतित्वमितिभावः ॥ **नप्रतीयतइति** ॥ प्रतीयमानस्यजगतईशस्यवापरामर्शोनो पपद्यते । जगतेशेनवात्यक्तेनेत्यस्यासंगतत्वात् । समासेअप्रधानतयाप्रकृतस्येशस्यप्राधान्येनपरामर्शायोगाच्चेतिभावः । ईशप

भा० । जगत्यांप्रकृतौ । तेनईशेनत्यक्तेनदत्तेनभुंजीथाः ।

रामर्शपक्षोक्तद्वितीयंदोषंपरिहरति ॥ **समासइति** ॥ **बुद्ध्याविवेकेनेति** ॥ प्राधान्येनोपस्थितस्यविशिष्टस्यप्रथममन्वयबोधे जातेविशेषणविशेष्यव्यतिरेकेणविशिष्टस्याभावाद्विशेष्यान्वयेबाधिते विशेषेणान्वयस्यन्यायप्राप्तत्वमिति बुद्ध्याविवेकेनेत्यर्थः । एतस्यस्वर्गीध्वस्तइत्याद्युदाहरणं । यद्वाशब्दतःप्राधान्यार्थतःप्राधान्ययोर्बुद्ध्याप्राबल्यदौर्बल्यविवेकेक्रियमाणेअर्थतःप्राधान्य स्यैवप्रबलत्वादीशस्यचार्थतःप्रधानत्वाद्युज्यते तेनेतिपरामर्शइत्यर्थः । त्यक्तेनेत्यस्यदत्तेनेतिव्याख्यानेनैवप्रथमदोषपरिहारःसु ज्ञानइतिभावः । ननुतेनेतीशपरामर्शांगीकारेपिवाक्यार्थाव्यवस्थितिरेवजगदीशस्यावासमर्हति । प्रकृत्यांजगत् । ईशेनदत्तेन भुंजीथाः । कस्यस्विद्धनंमागृधइत्येतेषामन्योन्यान्वयशून्यत्वादित्यतोभाष्यमुपलक्षणमित्यभिप्रेत्य स्वतःप्रवृ

समासेउपसर्जनीभूतस्यापीशस्यबुद्ध्याविवेकेनायंपरामर्श इतिभावः । पूर्वार्धोक्ततात्पर्यपरामर्शश्चायमितिज्ञातव्यं ।

त्यशक्त्वादितिवक्ष्यमाणप्रमाणानुसारेणतेनेत्येतत्प्रकारांतरेणव्याचष्टे ॥ **पूर्वार्धेति** ॥ जगतईशावास्यत्वे ईशाधीनप्रकृत्याधार त्वेचोक्ते ततएवेशस्यस्वातंत्र्यंजगतोस्वातंत्र्यंचयत्तात्पर्यतःसिद्धं तत्परामर्शश्चायमित्यर्थः । एवंचसतिततश्चायमितिवक्ष्यमा णदिशाश्रौतविशेषणानांहेतुहेतुमद्भावेनान्वयःसुगमइतिभावः । नन्वेवमपिमंत्रार्थानुपपत्तिरेव । जगत्स्वप्रवृत्तयेईशस्यावासम र्हतीत्येतदसिद्धं । प्रमाणाभावात्जगत्यांजगदित्यप्यप्रामाणिकं । प्रामाणिकत्वेवाजगतःप्रकृत्यधीनत्वप्राप्तावपीशाधीनत्वाप्रा सेः । नचप्रकृतेरीशाधीनत्वादीशाधीनप्रकृत्याधारस्यजगतःईशाधीनत्वमविकलमितिवाच्यं । प्रकृतेरीशाधीनत्वेप्रमाणाभावादि

त्यतःसर्वत्रप्रमाणोपन्यासेनासिद्धिंपरिहरन्श्रौतपदानांहेतुहेतुमद्भावेनयोजनाप्रकारप्रदर्शनपूर्वकंमंत्रार्थंसंगृह्णाति ॥ ततश्चेति ॥ इदंसर्वंयत्किंचजगदित्येतेषांतच्छब्दाध्याहारपूर्वकमन्वयंप्रदर्शयति ॥ यत्किंचजगदिदंतत्सर्वमिति ॥ यदिदंकिंचजगत्तत्सर्वमितियोजना । प्रवृत्त्यर्थमात्मनइत्यस्यात्मनःप्रवृत्त्यर्थमितिसंबंधः । एवमसिद्धिंपरिहृत्य तेनत्यक्तेनेत्यत्रास्यसाक्षाद्धेतुत्वासंभवादवांतरसाध्यमध्याहरति ॥ तेनज्ञायतइति ॥ एवमेवातोपीत्युत्तरवाक्यमपिव्याख्येयं । नन्वीशावास्यमित्यनेनैवेशजगतोःस्वातंत्र्यपारतंत्र्यसिद्ध्याजगत्यांजगदितिव्यर्थमित्यतः प्रकारांतरेणेशादेःस्वातंत्र्याद्युपपादकत्वान्नवैयर्थ्यमित्याशयेनाह ॥

ततश्चायंमंत्रार्थः । यत्किंचजगदिदंतत्सर्वंप्रवृत्त्यर्थमात्मनईशस्यावासमर्हतीतितावत्तदेवानुप्रविशदितिश्रुतिप्रसिद्धं । तेनज्ञायतेस्वयमिदंप्रवृत्तावशक्तंपरमेश्वराधीनमिति । किंच जगत्यांप्रकृतावित्यंसर्वमाश्रितमित्येतदाकाशएवतदोतंचप्रोतंचेतिश्रुतिसिद्धं । प्रकृतिश्चपरमेश्वराधीना । किंचेति ॥ नचजगत्यांजगदितिश्रुतेःस्वयंप्रमाणत्वात्तदुक्तेर्थे आकाशएवेतिश्रुत्युपन्यासोऽयुक्तइतिवाच्यं । प्रमाणस्यप्रमाणं चेद्बलवद्विद्यतेमुने ॥ ब्रह्मदृष्टानतोमंत्रान्प्रमाणंसलिलेश्वरइत्यादिप्रमाणानुसारेणबलवत्त्वार्थंवा मीमांसाप्रकारप्रदर्शनार्थंवा तदुपन्यासोपपत्तेः ॥ आकाशएवेति ॥ दीप्तेराकाशशब्दोक्ताश्रीर्हिसर्वाश्रयामतेतिबृहद्भाष्यदिशा आकाशशब्दश्चिल्प्रकृतिवाचकइतिभावः । एवमसिद्धिंपरिहृत्यासंगतिंपरिहर्तुश्रुतावध्याहर्तव्यमाह ॥ प्रकृतिश्चेति ॥ अत्राप्यसिद्धिंपरिहरति ॥ एत

उप० । ईशावास्यमिदꣳसर्वंयत्किंचजगत्यांजगत् ।

स्मिन्निति ॥ अक्षरमंबरांतधृतेरित्युक्तदिशाअक्षरशब्दवाच्योविष्णुरितिभावः । एवंप्रकारद्वयेनेशजगतोःस्वातंत्र्यपारतंत्र्येउपपाद्य तत्रतात्पर्यसिद्धंस्वातंत्र्यं तेनत्यक्तेनेत्यत्रहेतुत्वेनयोजयति ॥ यतएवमिति ॥ आवृत्तस्यतेनेत्यस्यहेतौतृतीयांतत्वमित्याशयेनोक्तं ॥ कारणेनेति ॥ परमेश्वरस्यसाक्षाद्राजादिवद्वित्तदातृत्वमसंभवीत्यतउक्तं ॥ यदृच्छयेति ॥ भगवदिच्छयेत्यर्थः । भुजधातोरनेकार्थत्वाद्विवक्षितमर्थंदर्शयति ॥ भोगंकुर्याइति ॥ अत्रयज्जगत्यांजगन्मनइतिभागवतसमाख्ययास्वकीयंमनः

एतस्मिन्खल्वक्षरेगार्ग्याकाशओतश्चप्रोतश्चेत्यादिश्रुतेः । ततोपिसर्वमस्वतंत्रंपरमेश्वराधीनमितिविज्ञायते । यतएवमीश्वरएवस्वतंत्रस्तेनकारणेन तेनेशेनत्यक्तेनदत्तेन वित्तेन यदृच्छयालब्धेनेतियावत् । भुंजीथाःभोगंकुर्याः । यतश्चेशादन्यदस्वतंत्रंतेनतस्यदानेसामर्थ्याभावात्कस्यस्वित्कस्यापिराजादेःसकाशात्धनंमागृधः माकांक्षेथाः ॥ ७ ॥ मंत्रार्थस्थापनायस्मृतिसमाख्यामाह ॥

संबोध्यमध्यमपुरुषप्रयोगःकृतइतिद्रष्टव्यं । प्रकारद्वयसिद्धमस्वातंत्र्यमपिहेतुत्वेनयोजयति ॥ यतश्चेति ॥ तेनेत्यतःपरंकारणेनेत्यनुवर्तते । अप्रयोजकत्वपरिहाराय तस्यदानेसामर्थ्याभावादित्युक्तं । ननुमागृधःकस्यस्विद्धनमित्यत्र परकीयद्रव्यापहारेच्छानकार्येतिप्रतीयते । तथात्वेऽस्यमंत्रस्यवैराग्योपदेशरूपत्वंनस्यादित्यतो ऽतोनान्यंप्रयाचयेदितिभाष्यंमनसिनिधायव्याचष्टे ॥ राजादेःसकाशादिति ॥ ननुप्रमाणेइदंजगत्ईशावास्यंस्वतःप्रवृत्त्यशक्तत्वादितिसाध्यसाधनभावःप्रतीयते । सोनुपप

उप० । तेनत्यक्तेनभुंजीथामागृधःकस्यस्विद्धनं ॥ १ ॥

न्नः । असिद्धेनस्वतःप्रवृत्त्यशक्तत्वेन सिद्धेशावास्यत्वस्यसाधनानुपपत्तेः । अनुपयुक्तंचेशावास्यत्वसाधनं । स्वतंत्रत्वादीशेन दत्तेनभुंजीथाः । राजादेरस्वतंत्रत्वात्ततोमागृधइतिह्यर्थोत्रविवक्षितः । तत्रजगतईशावास्यत्वसाधनस्यकउपयोगः । किंतुईश जगतोःस्वातंत्र्यपारतंत्र्यसाधनस्यैवेत्यत एवशब्दाध्याहारेणस्वतःप्रवृत्त्यशक्तत्वस्यसाध्यत्वलाभप्रकारंदर्शयति ॥ स्वतःप्रवृत्त्य शक्तत्वादेवेति ॥ एवशब्दाभिप्रायमाह ॥ अन्यथेति ॥ यदिस्वतःप्रवृत्त्यशक्तंनस्यात्तर्हिप्रयोजनाभावादीशावास्यंनस्यादि त्यर्थः । अयंभावः । नात्रयथाश्रुतःसाध्यसाधनभावः किंत्वीशावास्यत्वात्स्वतःप्रवृत्त्यशक्तमितिविपरीतएव । नचैवंवक्रोक्ति

स्वतइति ॥ स्वतःप्रवृत्त्यशक्तत्वादेवेदंजगत्प्रवृत्तयेईशावास्यं अ
न्यथातन्नस्यात् । अतईशावास्यत्वात्स्वतःप्रवृत्त्यशक्तंईशाधीनं ।

र्व्यर्थेतिवाच्यं । साधनस्येशावास्यत्वस्य साध्यस्वतःप्रवृत्त्यशक्तत्वायोगव्यवच्छेदज्ञापनार्थत्वात् । साधनस्यसाध्यायोगव्यवच्छे देज्ञापिते व्यभिचारशंकायाहेतूच्छेदेनाप्रयोजकत्वशंकायाश्चानुदयात् । एवमेवहिवह्निमत्त्वादेवधूमवत्त्वमित्यादिप्रयोगोव्या ख्यायतेशास्त्रेषु । अन्यथातत्रापियथाश्रुतसाध्यसाधनभावप्रसंगेनबहुविप्लवप्रसंगादिति । अवधारणमहिम्नालंब्धंयथास्थितसा ध्यसाधनभावंदर्शयति ॥ अतईशावास्यत्वादिति ॥ तेनत्यक्तेनेत्यत्रेशाधीनत्वस्यैवहेतुत्वं नतुस्वतःप्रवृत्त्यशक्तत्वस्येत्यत ईशा

भा० । स्वतःप्रवृत्त्यशक्तत्वादीशावास्यमिदंजगत् ।

॥ १६ ॥

धीनमित्युक्तं । यस्मादित्यस्यपूर्वोत्ताभ्यांसंबंधमभिप्रेत्याह ॥ यस्मादिति ॥ ततोपीत्यस्य स्वतःप्रवृत्त्यशक्तमीशाधीनमि तिपूर्वेणान्वयः । अतःशब्दान्वयार्थंयच्छब्दमनूद्यव्याचष्टे ॥ यदिति ॥ यदित्यस्याव्ययत्वंवा प्रथमायाविपरिणामंवांगीकृत्ये दंव्याख्यानमित्यवगंतव्यं । तदधीनप्रवृत्तित्वादित्येतत्पूर्वसिद्धानुवादरूपमेव नापूर्वहेतुकथनमित्याशयेनोक्त मेवमुक्तप्र कारेणेति ॥ अतइत्यस्यपूर्वेणोत्तरेणचसंबंधइत्याशयेनोक्त मतस्तदत्तेनेति ॥ अतइति ॥ यतोजगत्स्वतःप्रवृत्त्यशक्तं अतोराजादेरस्वतंत्रत्वेनदानेसामर्थ्याभावादित्यर्थः । प्रयाचयेदितिस्वार्थेणिजित्याशयेनाह ॥ प्रयाचेतेति ॥ प्रमाणेणिजंतस्य

किंच यस्मादिदंप्रकृतिगं यस्माच्चविष्णुःप्रकृतीश्वरस्ततोपि । यद्यस्मादेव
मुक्तप्रकारेणतदधीनस्वरूपत्वात्सर्ववित्तंतदीयमेवातस्तदत्तेनैवभुंजीथाः ।
अतःपरमेश्वरादन्यंनप्रयाचेतज्ञवानित्यर्थः ॥१॥ तृष्णाविच्छेदवत्स्वोचित

धात्वंतरत्वेनपरस्मैपदप्रयोगेपि वस्तुतोयाचतेरात्मनेपदित्वात्प्रयाचेतेत्युक्तमितिज्ञातव्यं । उदाहृतभागवतानुसारेणस्वमनःसंबो ध्यमनुनोक्तत्वाद्भवानित्युक्तं ॥ १ ॥ प्रथममंत्रेवैराग्यरूपाधिकारप्रतिपादनानंतरंद्वितीयमंत्रेतत्त्वंप्रतिपाद्यतइतिभ्रमनिरासायत त्प्रतिपाद्यंसोपपत्तिकंदर्शयति ॥ तृष्णाविच्छेदवदिति ॥ उपदिष्टमपितत्वंस्वोचितकर्मानुष्ठानेनशुद्धएवहृदयेऽवतिष्ठतेनान्य त्रेतिपूर्ववदुपपादनमितिज्ञेयं ॥ नन्वयंवतिःप्रथमांताव्याख्यातव्यः । नचासौयुक्तः । तत्रतस्येवेतिसूत्रविरोधादितिचेत् । न ।

भा० । प्रवृत्तयेप्रकृतिगंयस्मात्सप्रकृतीश्वरः । तदधीनप्रवृत्तित्वात्तदीयंसर्वमेवयत् । तदत्तेनैवभुंजीथाअतोनान्यंप्रयाचयेदितिब्रह्मांडे ॥१॥

तत्रतस्येवेत्यस्यप्रायिकत्वात् । अन्यथा पूर्ववत्सनइत्यत्रपूर्वस्मादिवेतिपंचम्यंताद्वतिर्नस्यात् । कार्यत्वानुमानेघटवदित्यादिप्रयोगनिवाहायकुसुमांजलिकारादिभिःप्रायिकत्वेनव्याख्यातत्वाच्च। उक्तंचटीकाकृताविष्णुतत्वनिर्णयटीकायां तत्रतस्येवेतिलक्षणस्य प्रायिकत्वेनाभियुक्तैर्व्याख्यातत्वाद्वटवदितियुज्यतइति । विस्तृतंचैतदाकरे विद्धवदितिच्छांदसोद्वितीयांताद्वतिरितिसुधावाक्याभिप्रायस्तुतत्रैवावगंतव्यः । इतिशब्दोहेतौ ॥ तदिति ॥ कर्मानुष्ठानंवातदावश्यकत्वंवेत्यर्थः । ननुश्रुतौकर्माणिकुर्वन्नेव

कर्मानुष्ठानमप्यावश्यकंज्ञानार्थिनामित्येतत्कुर्वन्नेवेतिद्वितीयमंत्रेणविधत्ते॥ तत्रनान्य
थेतोस्तीत्येतदुर्गमार्थत्वाद्व्याख्याति ॥ अकुर्वतइति ॥ ततश्चायंमंत्रार्थः । शतंसमाः श
तंवर्षाणि इहमानुषादिजन्मनि यज्जिजीविषेत्जीवितुमिच्छेत्तत्तत्कर्माणिस्वोचितानि

जिजीविषेदित्ययुक्तं । कर्मकरणमात्रस्यविधेयत्वेनजीवनेच्छाविधानस्यव्यर्थत्वात् । इच्छायाअविधेयत्वाच्चेत्यतोयत्तच्छब्दाध्याहारपूर्वकमुद्देश्यविधेयभावंव्यत्यासेनदर्शयति ॥ यज्जिजीविषेदिति ॥ यच्छब्दयोगाज्जीवनेच्छायाअनुवाद्यत्वमेव नविधेयत्वमितिभावः । जीवनमिच्छेदितियत्तत्कर्मकरणपूर्वकमेवेत्यर्थः । जीवनेच्छाकर्मकरणयोःसमानकालत्वोक्तेरभिप्रायमाह ॥ आमरणमिति ॥ यद्धाननुकर्माणिकुर्यादित्येवालं किंजिजीविषेदित्यनुवादेनापीत्यतः कर्मकरणेनैरंतर्यरूपेत्थंभावज्ञापकं

उप० । कुर्वन्नेवेहकर्माणिजिजीविषेच्छतꣳसमाः । एवंत्वयिनान्यथेतोस्तिनकर्मलिप्यतेनरे ॥ २ ॥
भा० । अकुर्वतःकर्मनलिप्यतइतिनास्ति ।

तत् । तथाभूतस्यैवज्ञानोपयोगित्वादित्याशयेनतात्पर्यार्थमाह ॥ आमरणमिति ॥ एवशब्दार्थःसर्वथेति ॥ पूर्वार्धोक्तार्थहेतुत्वेनोत्तरार्धमवतारयति ॥ कुतइति ॥ ज्ञानार्थिनास्वोचितानिकर्माणिकुतःकार्याणि । तेषांसाक्षाज्ज्ञानकारणत्वाभावादित्याक्षेपार्थः । एवमित्यनुवादेन कर्माणिकुर्वतीतिव्याख्यानं । एवंभूतेत्वयीत्युक्तंभवति । कर्ममात्रस्यलेपकत्वाभावात्पापमित्युक्तं । काम्यपुण्योपलक्षणमेतत् । एवमुत्तरत्रापिद्रष्टव्यं । ननुकर्माणिकुर्वतीत्यत्रकर्मशब्देनपापरूपाणिविवक्षितान्युतस्वोचितानि । नाद्यः । पापानिकुर्वतिपापंनलिप्यतइत्यस्यव्याहतत्वादसंगतत्वाच्च । नद्वितीयः । स्वोचितानिकर्माणिकुर्वतिपापप्रसक्तेरे

कुर्वन्नेवामरणंभगवत्पूजात्मकानिअसंकल्पितफलानिस्वोचितानिकर्माणिसर्वथा
कुर्यादितियावत् । कुतः एवंकर्माणिकुर्वतिनरेमनुष्यमात्रेपित्वयि कर्मपापंनलि
प्यते । स्वोचितेनासंकल्पितफलेनकर्मणाभगवत्पूजांकुर्वतमल्पाधिकारिणम
पि नप्रागुत्तराणिकर्माणिपापानिबाधंते। ततश्चज्ञानाधिकारीसभवतीतियावत् ।

वाभावेनपापंनलिप्यतइतिनिषेधानुपपत्तिः । नचपापशब्देनश्रवणादिप्रागुत्तरपापानांविवक्षितत्वात्नाप्रसक्तिरितिवाच्यं । तर्हिनलिप्यतइतिलेपाभावोक्त्ययोगात् । लेपाभावोहिनरकाद्यनर्थाभावः । नचासौज्ञानार्थिकृतस्वोचितकर्मानुष्ठानमात्रेणशक्योंगीकर्तुं । सिद्धांतविरुद्धत्वात्प्रमाणविरुद्धत्वाच्च । ज्ञानार्थिनास्वोचितानिकर्माणिकुतःकार्याणीतिशंकायांज्ञानसाधनत्वेवाच्ये कर्मणामलेपकत्वोक्तेरसंगतिश्चेत्याशंकाःपरिहरन्अक्षरार्थमुक्त्वातात्पर्यार्थमाह ॥ स्वोचितेनेत्यादिना यावदित्यंतेन ॥ अत्रपू

जामित्यंतेनकर्माणीत्यस्य अल्पाधिकारिणमपीत्यनेनमनुष्यमात्रेपीत्यस्य प्रागुत्तराणिपापानीत्यनेनसमुदायैकवचनांतपापमित्यस्य नबाधंतइत्यनेन नलिप्यतइत्यस्य तात्पर्यमुक्तमित्यवगंतव्यं । अत्रनबाधंतइत्यस्यज्ञानविघ्नकराणिनभवंतीतिवा । अंतःकरणस्याशुद्धिसंपादकानिनभवंतीतिवाऽर्थस्यविवक्षितत्वान्नापसिद्धांतादिदोषावकाशः । अतएव ततश्चज्ञानाधिकारीसभवतीत्येतद्ग्रंथोक्तः ततश्चासौज्ञाने नाधिक्रियतइतिवक्ष्यमाणश्च हेतुहेतुमद्भावःश्लिष्टोभवतीतिज्ञातव्यं । एवमन्वयेनस्वोचितकर्मणांज्ञानसाधनत्वमुपपाद्य व्यतिरेकेणापितदुपपादनायप्रवृत्तंनान्यथेतोस्तीतिश्रुतिशेषंव्याख्याति ॥ इतइति ॥ अनेनाकुर्वतइति

इतः कर्मकरणात् । अन्यथाकर्मनलिप्यतइतिनास्ति । भगवत्पूजामकुर्वंतंपापानिबाधंत एव । ततश्चासौज्ञानेनाधिक्रियते । अशुद्धचित्तत्वात् । अतःकर्माणिकार्याणीति ॥ ७ ॥

भाष्यमितोन्यथेत्यस्यतात्पर्यकथनरूपमित्युक्तंभवति । अक्षरार्थमुक्त्वापूर्ववत्तात्पर्यार्थमाह ॥ भगवदिति ॥ बाधंतइत्यस्यपूर्वएवार्थोद्रष्टव्यः । द्वौनञौप्रकृतमर्थंसातिशयंगमयतइतिन्यायंमनसिनिधायनञ्द्वयाभिप्रायमाह ॥ बाधंतएवेति ॥ एवमन्वयव्यतिरेकाभ्यांस्वोचितकर्मणांज्ञानार्थिनाऽवश्यानुष्ठेयत्वमुपपाद्योपसंहरति ॥ अतइति ॥ ज्ञानार्थिनेतिशेषः । कर्माणिस्वोचितानि । एतच्चश्रुतौशेषपूरणाभिप्रायेणोक्तमितिज्ञातव्यं । यद्यपि पुरुषार्थाधिकरणेनियमाच्चेतिसूत्रभाष्ययोरयंमंत्रोपरोक्षज्ञानिपरत्वेनव्याख्यातः तथाप्यस्यव्याख्यानांतरत्वान्नविरोधइतिज्ञातव्यं । ज्ञानिनोपिकर्मानुष्ठानस्यावश्यकताप्रतिपादक

मज्ञस्येतिप्रमाणंभाष्यकृद्व्याख्यानसमर्थनानुपयोगित्वादपव्याख्याननिरासेव्यापारयितुंमंत्रद्वयापव्याख्यानमनुवदति ॥ अपरइत्यादि ॥ ईशाइत्येतदीदृशब्दस्यतृतीयांतमित्यभिप्रेत्यप्रतिपदमाह ॥ ईशित्रेति ॥ वास्यमाच्छाद्यमिति ॥ वसआच्छादनइतिधातोरितिभावः । त्यक्तेनेत्येतद्भावेनिष्ठांतमित्याशयेनोक्तं ॥ त्यागेनेति ॥ भुजपालनाभ्यवहारयोरितिधातुंमनसिनिधायापरेव्याचक्षते ॥ ज्ञानिनःसर्वकर्मत्यागःपूर्वमंत्रेणविहितः । यथा ईशाईशित्रापरमेश्वरेणयत्किंचजगत्यांपृथिव्यांजगदिदंतत्सर्वं वास्यमाच्छाद्यं तेनकारणेन त्यक्तेनसर्वकर्मत्यागेन भुंजीथाःपालयेथाः । एवंत्यक्तेषणस्त्वं कस्यस्विद्धनंमागृधःमाकांक्षीः । अथवा मागृधः कस्मात्कस्यस्विद्धनंनकस्यापि । अतोमिथ्याविषयेबुद्धिमाकार्षीरिति । यस्तुनरमात्रोल्पज्ञस्तंप्रति कर्मानेनमंत्रेणोच्यतइति । तदनुपपन्नं । अज्ञवज्ज्ञानिनोपिभगवत्पूजात्मकस्वकर्मकरणेपापलेपसद्भावेनद्वाभ्यामपितत्कर्तव्यतायाःस्मार्तत्वादितिभावेनाह ॥ अज्ञस्येति ॥ याह ॥ पालयेथाइति ॥ इतिशब्दःप्रथममंत्रार्थसमाप्तौद्वितीयमंत्रार्थतात्पर्यतोनुवदति ॥ यस्त्विति ॥ अत्र यस्त्वनात्मज्ञतयाप्रथममंत्रार्थग्रहणाशक्तः सोग्निहोत्रादिकर्माणिकुर्वन्नेवशतंसमाजिजीविषेत् । एवं एवंप्रकारे । त्वयिजिजीविषतिनरे इतः एतस्मात्कर्मकुर्वतोवर्तमानादन्यथाप्रकारांतरंनास्ति । येनप्रकारेणाशुभंकर्मनलिप्यते । नकर्मणालिप्स्यसेइतिद्वितीयमंत्रस्याप्य

भा० । अज्ञस्यकर्मलिप्येतकृष्णोपास्तिमकुर्वतः ।

क्षरार्थोद्रष्टव्यः । दूषणोपयोगित्वात्तात्पर्यार्थएवानुदितइतिज्ञातव्यं । ननुज्ञान्यज्ञानिनोःकर्मकरणस्यावश्यकताप्रतिपादनाय प्रवृत्तेप्रमाणेउपास्तिशब्देनशास्त्राभ्यासरूपायाःध्यानरूपायावाउपास्तेर्ग्रहणेअसंगतिःस्यादित्यतोऽपेक्षिताध्याहारेणोपास्तिपदं व्याख्याति ॥ स्वकर्मणेतिशेषइति ॥ अनेनस्वकर्मणाकृष्णोपास्तिं कृष्णपूजामितिव्याख्यातंभवति । ततश्चस्वकर्मणाकृष्णो पास्तिमकुर्वतोऽज्ञस्यज्ञाननोपिकर्मउपास्त्यकरणजन्यंपापंलिप्येतेतियोजनोक्ताभवति । अत्रोत्तरग्रंथानुसारेणाज्ञस्यलेपोज्ञानमो क्षप्रच्युतिरूपोद्रष्टव्यः । ननुकृष्णोपास्तिमकुर्वतोऽज्ञस्येवज्ञानिनोपिप्रसिद्धलेपसंभवादानंदह्रासपर्यंतंधावनंभाष्येनुचितमित्यतो

कृष्णोपास्तिं स्वकर्मणेतिशेषः । नियतमोक्षत्वेन कर्मणामकिं चित्करत्वादलेपस्यज्ञानिनःकुतःकर्मलेपइत्यतआह ॥ यतइति ॥

ऽज्ञवैलक्षण्यंज्ञानिनोदर्शयन्प्रसिद्धलेपानुपपत्तिमाह ॥ नियतेति ॥ अलेपस्य लेपायोग्यस्यज्ञानिनःकथंपापलेपः । नकथमपि। नन्ववश्यकरणीयकर्मत्यागेकथमलेपइत्यतस्तदेवासिद्धमित्याशयेनोक्तं ॥ कर्मणामकिंचित्करत्वादिति ॥ कर्मणामावश्यक त्वंवदताज्ञानार्थत्वंवामोक्षार्थत्वंवावाच्यं । नाद्यः । ज्ञानस्यप्राप्तत्वादित्याशयेनोक्तं ॥ ज्ञानिनइति ॥ मोक्षस्यापिप्राप्तप्रायत्वा न्नद्वितीयोपीत्याशयेनोक्तं ॥ नियतमोक्षत्वेनेति ॥ ज्ञानिनइत्यत्रापिसंबध्यते । यद्वाकर्मणामुपास्त्यकरणजन्यपापानांप्राप्तज्ञा नत्वेननियतमोक्षत्वेनचाकिंचित्करत्वात्व्यर्थत्वादलेपस्यज्ञानमोक्षप्रच्युतिरूपलेपरहितस्यज्ञानिनःकथंकीदृशःपापलेपइतिव्या

भाष्यं । ज्ञानिनोपियतोह्रासआनंदस्यभवेद्ध्रुवं । अतोऽलेपिलेपःस्यादतःकार्यैवसासदेतिनारदीये ॥ २ ॥

ख्येयं । ननुज्ञानिनोपिकृष्णोपास्तिमकुर्वतःआनंदह्रासोभवतीत्यनुपपन्नं । ह्रासस्यपापसाध्यत्वेनकर्माकरणसाध्यत्वासंभवादि त्यतोह्रासोभवेदित्यनूद्यततःपरमपेक्षितंपूरयति ॥ ह्रासोभवेदिति ॥ ह्रासोनामानभिव्यक्तिः । नचावरणानामपगतत्वात्कथ मनभिव्यक्तिरितिवाच्यं । आनंदांशावरकत्वेनेश्वरेच्छायाःसत्वात् । नन्वलेपेपिलेपःस्यादित्येतद्विरुद्धमित्यतोव्यवस्थायाविरो धंपरिहरन्वाक्यंयोजयति ॥ यतइति ॥ अतःकार्यैवेत्येतदव्यवहितप्रकृतज्ञानिमात्रपरमितिभ्रमनिरासायाह ॥ यतएवमुभ योरिति ॥ कृष्णोपास्तिरिति ॥ स्वकर्मणाकृष्णपूजेत्यर्थः । नचज्ञानोत्तरविकर्मणएवानंदह्रासकारणतायास्तत्रतत्रोक्तत्वेन कथंभगवत्पूजात्मककर्माकरणस्यापितत्कारणत्वमितिवाच्यं । एतत्प्रमाणतट्टीकयोरपिनिरवकाशत्वेनभगवत्पूजात्मककर्माकरण

ह्रासोभवे त्कृष्णोपास्त्यकरणनिमित्तपापेनेतिशेषः । यतोह्रासोभवेदतोमोक्षप्रच्युतिरूपलेपरहि तेपिज्ञानिनि कर्मलेपःस्यादेव । यतएवमुभयोर्लेपोऽतोद्राभ्यामपिसाकृष्णोपास्तिःकार्यैवेत्यर्थः ॥

स्यापितत्कारणत्वेबाधकाभावात् । उक्तंचपंचमेबृहदारण्यकभावबोधे । यावत्स्वरूपानंदाननुभवलक्षणह्रासंप्रतिविकर्मवत् भ गवत्पूजात्मककर्माकरणमपिनिमित्तं । यथोक्तं । कृष्णोपास्तिमकुर्वतः ज्ञानिनोपियतोह्रासआनंदस्यभवेद्ध्रुवमितीति । ननु अ ज्ञोर्चयेदेवार्चायामन्यथादोषवान्भवेत् । ज्ञस्त्वर्चयन्सगुणवानन्यथादोषवान्नत्वितिचतृतीयस्कंधतात्पर्येज्ञानिनःस्वविहितकर्मा ननुष्ठानेदोषाभावस्योक्तत्वा दत्रानंदह्रासाभिधानेकथंतद्विरोधोनस्यादितिचेत् मैवं । तत्रदोषशब्देनमुक्तिप्रतिबन्धकदोषस्यवि वक्षितत्वेनानंदह्रासाविवक्षणात् । यद्वा तात्पर्यस्यानंदह्रासरहितोत्तमाधिकारिपरत्वेनास्यचतद्युक्तमानुषोत्तमपरत्वेनविरोधवा

र्ताभावात् । अस्यमानुषोत्तमपरत्वंतुबृहदारण्यकभावबोधेस्पष्टमिति । तात्पर्यार्थनिराकरणपरंभाष्यमुपलक्षणमित्यभिप्रेत्याक्ष रार्थमपिनिराचिकीर्षुरीशावास्यशब्दार्थतावन्निराकरोति ॥ असंगतंचेति ॥ कथमसंगतमितिचेदित्थं । ईशावास्यत्वंहिकर्माक रणेहेतुत्वेनोच्यते । तेनेतितृतीययातस्यहेतुत्वेनपरामर्शात् । तत्रपृच्छामोवाचनिकमीशावास्यत्वमेवकर्माकरणेहेतुरुतलाक्षणिकं ज्ञानमिति ॥ आद्यंनिराकरोति ॥ नहीति ॥ तत् ईशाच्छाद्यत्वं । कुतइत्यतआह ॥ तथासतीति ॥ तत्प्रसंगेनेति ॥ क र्माकरणप्रसंगेनेत्यर्थः । स्वरूपसदीशाच्छाद्यत्वस्याज्ञंप्रत्यप्यविशिष्टत्वादितिभावः । द्वितीयेपि किमीशावास्यत्वज्ञानेलक्षणा

असंगतंचतस्येशाच्छाद्यत्वकथनं । नहितत्कर्माकरणेहेतुः । तथासत्यज्ञस्यापि तत्प्रसंगेनोत्तरमंत्रविरोधात् । ईशावास्यत्वज्ञानोपलक्षणपक्षेप्यसंगतिरेव । नहिजगदीशावास्यमितिजानता कर्मनकार्यमितिनियमोस्ति । अद्वैतज्ञानम

उताद्वैतज्ञाने । आद्यमाशंक्यनिराकरोति ॥ ईशावास्यत्वज्ञानोपलक्षणत्वपक्षेपीति ॥ अनेनविषयविषयिभावलक्षणःश क्यसंबंधोपिसूचितोवेदितव्यः । तामेवोपपादयति ॥ नहीति ॥ कर्मणोह्यकर्तव्यत्वमपरमार्थत्वेनिषिद्धत्वेनिष्फलत्वेवाज्ञातेभ वितुमर्हति । नचजगदीशाच्छाद्यमितिज्ञानेनकर्मतथाज्ञातंभवति । किंतुजगदंतःपातितयेशाच्छाद्यत्वेन । नचेशाच्छाद्यत्वज्ञान मकर्तव्यताहेतुरप्रयोजकत्वादितिभावः ॥ द्वितीयमाशंकते ॥ अद्वैतज्ञानमिति ॥ अयंभावः । जगतईशाच्छाद्यत्वंनाम नघ टस्यपटेनेवप्रसिद्धं । येनकर्माकर्तव्यतायांहेतुर्नस्यात् । किंत्वीशेऽध्यस्तत्वमेव । परमार्थसत्यरूपेणपरमात्मनाऽनृतमिदंसर्वमा

च्छादनीयं । यथाचंदनागर्वादेरुदकादिसंबंधजक्लेदादिजंदौर्गंध्यंतत्स्वरूपनिर्घर्षणेनाच्छाद्यतेस्वेनपारमार्थिकेनगंधेन । तद्वदेव हिस्वात्मन्यध्यस्तमस्वाभाविकंकर्तृत्वभोक्तृत्वादिलक्षणंजगद्वैतरूपमितिपरेणोक्तत्वात् । नचाध्यस्तत्वंस्वरूपसत् कर्माकर्तव्यत्वे हेतूकर्तुशक्यं । अज्ञस्यापितत्प्रसंगेनोत्तरमंत्रविरोधात् । किंत्वीशेऽध्यस्तत्वेनज्ञानं । एतदेवचपरमतेऽद्वैतज्ञानंनाम । तथाच विषयवाचकेनपदेनविषयिणोऽद्वैतज्ञानस्योपलक्षणोपपद्यते । शक्यसंबंधसद्भावात् । कर्माध्यस्तत्वज्ञानंचकर्माकर्तव्यतायांमु ख्योहेतुरितिनासंगतिरिति ॥ अनेनेति ॥ ईशावास्यपदेनेत्यर्थः । कुतोनेतिचे दत्रवक्तव्यं । ईशाध्यस्तत्वंनामेशाभेदोवा ईश व्यतिरेकेणासत्वंवा यज्ज्ञानंकर्माकरणेहेतुःस्यादिति । नद्वितीयः । ईशव्यतिरेकेणासत्वोक्तावीशाधीनत्वेनाऽस्तीत्युक्तंस्यात् ।

नेनोपलक्षितमितिचेन्न । विरोधात् । नह्याच्छाद्याच्छादकयोरभेदोदृष्टपूर्वः ।

राजव्यतिरेकेणराष्ट्रंनास्तीत्यादौतदनुभवात् । नचेशाधीनत्वेनज्ञानंकर्माकरणेहेतुरित्यसंगतितादवस्थ्यादितिभावेनाद्यंदूषयति ॥ विरोधादिति ॥ तदुपपादयति ॥ नहीति ॥ आच्छाद्याच्छादकयोः अध्यस्ताधिष्ठानयोरित्यर्थः । ततश्चादृष्टकल्पनाप्रसं गादितिभावः । यद्यपिपरेणसर्वमेवनामरूपकर्माख्यंविकारजातंपरमार्थसत्यात्मभावनयात्यक्तंस्यादित्यादिनाद्वैतज्ञानस्यैवकर्म त्यागेहेतुत्वेनोक्तत्वात्तदेवटीकाकृतानिराकार्यं नान्यत् । अनुक्तोपालंभप्रसंगात् । तथापिशिष्याणांकथाक्रमशिक्षार्थंवा संभावित त्वाद्वा पक्षांतरनिराकरणमितिज्ञातव्यं । एवमीशावास्यपदव्याख्यानंनिराकृत्य जगत्यांपृथिव्यामित्येतदपिनिराकरोति ॥

सर्वमपीति ॥ आधारैकदेशपृथिवीवाचकजगतीशब्दस्यांतरिक्षादिसर्वाधारोपलक्षणत्वमंगीकर्तव्यं । कुतइत्यतोमुख्यार्थानुपपत्तिसद्भावादित्याशयेनोक्तं ॥ सर्वमपीति ॥ यद्यपि पृथिव्यांजगत्यामित्युपलक्षणार्थत्वादितिवदतापरेण जगतीशब्दस्योपलक्षणत्वमंगीकृतमेवेत्यंगीकर्तव्यमित्युक्तिरनुपपन्नेतिभाति । तथापि परःस्वोक्तापलापिनांप्रथमोदाहरणत्वात् नमयांगीकृतमितिवक्तुमुत्सहेतापि । अतोन्यायेनोपपादयितुमंगीकर्तव्यमित्युक्तं । यद्वा अंगीकर्तव्यमित्यतः परमंगीकृतंचपरेणेत्यध्याहारेण योज्यमितिनकश्चिद्दोषः । ननुजगतीशब्दस्यपृथिवीवाचकस्यसर्वोपलक्षणत्वेयावदाधारगताधेयलाभेनश्रौतसर्वशब्दस्वारस्यंसंपद्यते । अतएवलक्षणापिसोढव्या । वाचकत्वलोभेनप्रकृतिपरत्वेतु प्रकृत्याश्रितमात्रस्येशावास्यत्वप्राप्तावपितदनाश्रितस्यतद

सर्वमपीशावास्यमंगीकुर्वताऽवश्यंजगतीपदस्यसर्वोपलक्षणत्वमंगीकर्तव्यं । ततो वरं प्रकृतिवाचकत्वग्रहणमेव । सर्वार्थलाभात् । नचतत्पक्षेऽस्योपयोगोस्ति ।

प्राप्यासर्वशब्दास्वारस्यप्रसंगादित्यतआह ॥ सर्वार्थलाभादिति ॥ आकाशएवतदोतंचप्रोतंचेत्यादिश्रुत्या प्रकृतेरीशातिरिक्तसर्वाधारत्वस्यप्रमितत्वेनप्रकृतिपरत्वपक्षेपितदाश्रितत्वेनसर्वार्थलाभसंभवादित्यर्थः । नचपक्षद्वयेपिसर्वार्थलाभाविशेषेपिलक्षणापेक्षयाशक्तेर्ज्यायस्त्वाज्जगतीशब्दस्यप्रकृतिपरत्वेनव्याख्यानमेवोचितंनपृथिवीपरत्वेन । तदेतदेवाभिप्रेत्योक्तं । वाचकत्वग्रहणमेवेति ॥ एवंपरपक्षेजगतीशब्दस्योपयोगमंगीकृत्यतद्व्याख्यानमेवानुपपन्नमित्युक्त मिदानींसएवव्यर्थइत्याह ॥ नचेति ॥ नापीत्यर्थः । अस्यजगतीशब्दस्यतत्त्यागेप्यनेनवाक्येनसर्वस्येशाच्छाद्यत्वसिद्धेरितिभावः । अस्मत्पक्षेकिंचेत्याद्युक्तप्रकारेणोपयो

गोस्तीत्यभिप्रायेणतत्पक्षइत्युक्तं ॥ आत्मनेपदविरोधइति ॥ भुजोऽनवनइतिसूत्रेणभुजधातोःपालनातिरिक्तएवार्थेआत्मनेपदस्यविहितत्वात्पालनार्थत्वेतद्विरोधइत्यर्थः । अथवेत्यादिनोक्तंधनमिथ्यात्वंनिराकरोति ॥ प्रत्यक्षादीति ॥ आदिशब्देनार्थक्रियाकारित्व प्रमाणदृष्टत्वाद्यनुमानस्य विश्वंसत्यमित्याद्यागमस्यच संग्रहः । ननुवर्तमानकालेसत्वग्राहिणाप्रत्यक्षेणत्रैकालिकसत्वात्यंताभावस्याग्रहणात्कथंमिथ्यात्वस्यप्रत्यक्षविरुद्धत्वं । ग्राह्याभावात्रगाहिनएवविरोधित्वात् । प्रत्यक्षस्यचातथात्वादिति चेन्मैवं । प्रतिपन्नोपाधौवर्तमानकालीनसत्वग्राहिणाप्रत्यक्षेणतत्रत्रैकालिकसत्वात्यंताभावोविरुध्यतएव । तथाहि उक्तरूपमि

भुंजीथाइत्यस्यपालनार्थतायामात्मनेपदविरोधः । धनमिथ्यात्वंच प्रत्यक्षादिविरुद्धमिति ॥ २ ॥

एवंप्रासाधिकारंप्रति परमात्मतत्वबुभुत्साजननायासुर्याइतिमंत्रेणापरमात्मविदांनिंदाक्रियते ।

थ्यात्वप्रतिषेधोहितत्प्रतियोगिभूततत्सत्वरूपएव । सामान्याभावस्ययत्किंचित्प्रतियोगिसत्वविरोधित्वेन तत्तद्विशेषाणामेवसामान्याभावंप्रतिप्रतियोगित्वावश्यंभावात् । सामान्याभावाभावस्यचरूपद्वयं । सामान्याभावाभावत्वं तत्तद्विशेषत्वंच । तत्रप्रकृतेप्रत्यक्षस्यवर्तमानमात्रग्राहित्वेनकालत्रयवर्तिसत्वनिषेधरूपासत्वाभावत्वेनतदभावविषयत्वासंभवेपिवर्तमानकालीनबाधाभावत्वेनरूपेणतद्ग्राहकत्वमुपपन्नमेवेतितद्विरोधोदुष्परिहरइति ॥ २ ॥ असुर्याइतितृतीयमंत्रस्याधिकारांतरप्रतिपादकत्वभ्रांतिं परमात्मतत्वप्रतिपादकत्वभ्रांतिंच परिहर्तुंप्रतिपाद्यमाह ॥ एवमिति ॥ एवं उक्तमंत्रद्वयोक्तप्रकारेणप्राप्ताधिकारंप्रत्यपरमा

उप० । असुर्यानामतेलोकाअंधेनतमसावृताः । तांस्तेप्रेत्याभिगच्छंतियेकेचात्महनोजनाः ॥ ३ ॥

त्मविदांनिंदाक्रियतइतिसंबंधः । ननुपरमात्मतत्वप्रतिपादिकेऽत्रग्रंथे नातत्वविदांनिंदाकार्या । निंदायास्तत्वप्रतिपादनरूपत्व भावात् । तदुपयोगाभावाच्चेत्यतस्तदुपयोगोस्तीत्याशयेनोक्तं परमात्मतत्वबुभुत्साजननायेति । उपदेशस्यपरार्थत्वात् बुभुत्सा वतएवचपरस्योपदेश्यत्वा त्तस्याश्चविरोधिनिंदासाध्यत्वादस्त्येवनिंदायाउपयोगइतिभावः ॥ **तत्रेति** ॥ मंत्रइत्यर्थः । असुर्य पदेनकथंसूर्यप्रकाशहीनत्वंलभ्यतइत्यतउक्तं वर्णविपर्ययेणेति । ह्रस्वस्योकारस्यदीर्घतयाविपर्ययेणेत्यर्थः । नन्वेवमप्यसूर्याः सूर्यहीनाःइत्यर्थःसंपद्यते । नचासौदोषइत्यतःसूर्यशब्दस्यसूर्यप्रकाशेलक्षणामभिप्रेत्योक्तं सूर्यप्रकाशहीनाइति ॥ अन्यथाप्रती

तत्रासुर्याइत्यस्य वर्णविपर्ययेणासुर्याःसूर्यप्रकाशहीनाइत्यन्यथाप्रतीतिनिरासाया
र्थमाह ॥ सुष्ठुरमणेति ॥ सुष्ठुरमणंसुखंसुर्यतद्विरुद्धमहादुःख(ब)त्वादसुर्याइत्यर्थः ।

तीति ॥ एतन्मंत्रव्याख्यानरूपप्रमाणविरुद्धत्वात् अंधेनतमसेत्यनेनपुनरुक्तत्वाच्चेतिभावः । भाष्येसुष्ठुरमणेत्येतत्सूर्यशब्दार्थ कथनमतोनासंगतिरित्याशयेनाह ॥ **सुष्ठुरमणंसूर्यमिति** ॥ अनेनैवसुपूर्वाद्रमेर्जमंताड्डइतिडप्रत्ययेटिलोपेसुष्ठुरमणंसुरं तद्वि रुद्धत्वादसुराइत्येवस्यान्नत्वसुर्याइतिचोद्यंपरिहृतंभवति । बाहुलकाड्यप्रत्ययांतत्वेनडांतत्वाभावात् ॥ **तद्विरुद्धमहादुःखत्वा दिति** ॥ बहुव्रीहिरयं । दुःखवत्त्वादित्यपिपाठः । अनेनासूर्यशब्दान्मत्वर्थेअर्शआद्यच्प्रत्ययइत्युक्तंभवति ॥ यद्यप्यत्र यथाश्रुत भाष्यानुसारेण सुष्ठुरमणंसुर्यं तद्विरुद्धत्वादसुर्याइत्येववक्तव्यं । तथापिदुःखस्यैवसुष्ठुरमणविरुद्धत्वंसाक्षात् । नतुलोकानामि ॥ २२ ॥

भा० । सुष्ठुरमणविरुद्धत्वादसुराणांप्राप्यत्वाच्चासुर्याः ।

त्याशंकापरिहारायमहादुःखैकहेतुत्वादितिवक्ष्यमाणप्रमाणानुसारेण असुर्यान्नामलोकान्नित्यनिरतिशयदुःखानितिदशमभाग वततात्पर्यानुसारेणचतद्विरुद्धमहादुःखवत्त्वादितिव्याख्यातमितिज्ञातव्यं । नन्वसुरप्राप्यत्वस्यस्वर्गादिसाधारण्यात्कोविशेषस्त मसइत्यतो नचरमंतीत्युदाहरिष्यमाणप्रमाणं असुर्यान्नामलोकान्निरस्तसमस्तसुखानितिभागवततात्पर्यंचमनसिनिधायविव क्षितमर्थमाह ॥ **असुराणांप्राप्यत्वादित्यनेनेति** ॥ भाष्यंतु असुरशब्दोपपदाद्याप्रापणइत्यस्माद्ध्यर्थेकविधानमितिकर्मणिक प्रत्ययेआतोलोपइटिचेत्यकारलोपेनिर्वचनत्वात्पूर्वपदांत्यलोपेचनिष्पन्नासुर्यशब्दार्थकथनमात्रपरमितिद्रष्टव्यं । ननुप्रमाणेरमणा

असुराणांप्राप्यत्वादित्यनेन सकलसुखराहित्यमुपलक्ष्यते । कुतोयमसुर्यपदार्थइत्यतआह
॥ नचेति ॥ एतमेवमंत्रंमूलीकृत्यप्रवृत्तेऽस्मिन्वाक्येऽसुर्यपदार्थवर्णनं नचरमंतीतिक्रियते ।

भावोक्तावपिअसुर्यपदार्थत्वेनानुक्तत्वात्कथमुक्तशंकापरिहारइत्यतआह ॥ **असुर्यपदार्थवर्णनमिति** ॥ भागवतवाक्ये नचर मंतीत्यनेनासुर्यपदार्थवर्णनंक्रियते यतोऽतोऽयमसुर्यपदार्थइत्यर्थः । तत्रासुर्यपदार्थवर्णनस्यकासंगतिरित्यतउक्त मेतमेवमंत्रमि ति ॥ श्रुतिगीतिकायां नचरमंतीत्येतद्भागवतवाक्यमूलत्वेनतात्पर्येभगवत्पादैरसुर्यानामेतिश्रुतेःपठितत्वादेतमेवमंत्रंमूलीकृत्ये त्युक्तं । भागवतस्यमंत्रमूलत्वंनाम मंत्रसंवादित्वमेव नतुमंत्रतोर्थमुपलभ्यरचितत्वं । स्वतःसर्वज्ञत्वाद्भागवतकृतइतिज्ञेयं । न न्वेवमप्यसुर्यपदार्थत्वेनोक्तयोर्द्वयोर्मध्येऽसुरप्राप्यत्वादित्युक्तार्थस्यप्रामाणिकत्वलाभेपिसुष्ठुरमणविरुद्धत्वादित्यस्यनतल्लाभइत्य

भा० । नचरमन्त्यहोअसदुपासनयात्महनइत्युक्तत्वात् ।

तोनुभवंतिच । नित्यदुःखमितिचशब्देनोक्तमितिभागवततात्पर्यमनसिनिधायप्रमाणेचशब्दार्थमाह ॥ तत्रेति ॥ नचरमंतीति भागवतवाक्यइत्यर्थः । ननुभागवतोक्तरीत्याअसुर्यशब्दस्यमहादुःखसुखाभावपरत्वेपिसुष्ठुरमणेत्याद्युक्तासुर्यपदाक्षरयोजनायां नकिमपिनियामकंपश्यामः । योजनांतरेणापिउक्तार्थद्वयलाभसंभवादित्यतोऽसिद्धंतदित्याह ॥ महादुःखेति ॥ महादुःखप रता सुखाभावपरताचेत्यर्थः ॥ उक्तव्याख्यानएवेति ॥ सुष्ठुरमणेत्याद्युक्तव्याख्यानएवेत्यर्थः । नन्वसुर्यपदार्थवर्णनस्याप्रा माणिकत्वशंकायाः नचरमंतीत्येतावतैवनिरासादवशिष्टप्रमाणोदाहरणंव्यर्थमित्यतःश्रुतौशंकांतरनिरासार्थत्वात् नतदितिभावे

> तत्र चशब्देनमहादुःखमनुभवंतीत्येषोर्थःसमुच्चीयते । महादुःखसुखाभावपरताऽस्यप
> दस्योक्तव्याख्यानएवसंभवतिनान्यथेतिभावः । आत्मनोनित्यत्वेन हननासंभवात्त
> त्रानर्थकथनमयुक्तमित्येतदप्यनेनपरिहृतं । असदुपासनयाआत्महनइतिव्याख्यात
> त्वात् । विपरीतंभावयताहितद्याथात्म्यंतिरस्कृतमितितस्यगौण्यावृत्त्याऽऽत्महंतृत्वं ।

नाह ॥ आत्मनइति ॥ उक्तत्वमात्रस्योक्तशंकानिरासकत्वाभावादाह ॥ व्याख्यातत्वादिति ॥ असदुपासनयेत्यनेनआत्म हंतृत्वस्यव्याख्यातत्वादित्यर्थः । घटादीनामिवात्मनःस्वरूपेणहननानंगीकारान्नोक्तशंकावकाशइतिभावः । नन्वेवंतर्हिअसदु पासकेष्वात्महंतृशब्दप्रयोगानुपपत्तिः । तन्निमित्तात्मविनाशकत्वाभावादित्यतोगौण्यावृत्त्याप्रयोगइत्याशयेनगुणयोगंदर्शयति ॥ विपरीतमिति ॥ आत्महंतृत्वं आत्महंतृशब्दप्रतिपाद्यत्वं । स्वरूपतिरस्कर्ताहिमुख्यहंतोच्यते । असदुपासकस्त्वात्मयाथा

॥ २३ ॥

त्म्यस्यतिरस्कर्ता तिरस्काररूपगुणयोगाद्धंतृशब्देनोपचर्यतइतिभावः ॥ स्पष्टमिति ॥ अतोनपूर्वेणगतार्थतेतिभावः । पूर्वप्र माणस्यासुर्यपदार्थकथनरूपतायाएतमेवमंत्रंमूलीकृत्येत्याद्युपादनसापेक्षत्वादस्पष्टत्वं । अत्रचासुर्यानामेतिकंठतउक्तत्वात्स्पष्ट त्वमितिभावः । असुरैःप्राप्यत्वादित्येतत्स्ववचनभाष्यवद्व्याख्येयं ॥ अत्रेति ॥ भाष्यकृदुक्तासुर्यपदार्थइत्यर्थः ॥ अत्रेति ॥ आत्महनइतिमंत्रइत्यर्थः ॥ इतिचेति ॥ नकेवलमसुर्यपदार्थउक्तइतिचशब्दार्थः ॥ आत्मशब्दस्यहरिपरत्वेविवादाभावात्किं

> स्पष्टंचात्रप्रमाणमाह ॥ महादुःखेति ॥ विमुखाहरावितिसमाख्ययाऽत्रात्मशब्दो
> हरिपरइतिचोक्तंभवति । तथाच नित्यशुद्धबुद्धमुक्तस्वरूपमात्मानंजीवंयेविपरीतंप्र
> तिपद्यंते तेआत्महनइत्यपव्याख्यानमेव । तेलोकाइतितच्छब्दःप्रसिद्धिद्योतकः ।

व्याख्यानेनेत्यतआह ॥ तथाचेति ॥ नित्यशुद्धबुद्धमुक्तस्वरूपं तदात्मकब्रह्मस्वरूपं । यद्यपिनैवंप्रकारेणकण्ठतोव्याख्यातं । किंतुआत्मानंघ्नंतीत्यात्महनः । कथमात्मानंनित्यंहिंसंति । अविद्यादोषेणविद्यमानस्यात्मनस्तिरस्करणादित्याद्येवोक्तं । तथापि तत्तात्पर्यानुवादोवा । अपव्याख्यातृणामनेकत्वादन्येनैवंव्याख्यातत्वाद्वैवमनुवादइतिज्ञेयं । ननुतान्यांतीत्येतावतासमंजस त्वादाद्यस्तच्छब्दोव्यर्थइत्यतआह ॥ तच्छब्दइति ॥ द्वितीयतच्छब्दभ्रांतिंपरिहर्तुंतेलोकाइतीत्यनुवादः । तर्हितेप्रसिद्धा

भा० । महादुःखैकहेतुत्वात्प्राप्यत्वादसुरैस्तथा । असुर्यानामतेलोकास्तान्यांतिविमुखाहरावितिवामने ।

स्तान्यांतीत्यनन्वयदोषइत्यतोयच्छब्दाध्याहारेणतंदर्शयन्नर्थमाह ॥ येतेप्रसिद्धाइति ॥ तइत्यनुवादेनप्रसिद्धाइतिव्याख्यानं । ततश्चयच्छब्देनतेषांप्रसिद्धिंविधाय तानित्यनेनप्रसिद्धाननूद्य यांतीतिविधीयते । येलोकास्तेप्रसिद्धाः तान्प्रसिद्धान्यांतीत्युक्तं भवति । ननुतमसोंधत्वहेतुत्वेपिनस्वयमंधत्वमचेतनत्वात् । तत्कथमंधेनेतितमसोविशेषणंश्रुताविवयतोंतर्णीतणिच्त्वेनांधत्व हेतुत्वस्यैवविवक्षितत्वान्नदोषइत्याह ॥ अंधयतीत्यंधमिति ॥ ननुतमसोनंधस्याप्रसिद्ध्याव्यर्थविशेषणमित्यतः सिद्धेसत्यारं

येतेप्रसिद्धास्तान्यांतीत्यर्थः । येआत्महनस्ते केचनताँल्लोकानभिगच्छंति केचननेत्यन्य थाप्रतीतिनिरासायाह ॥ येकेचेति ॥ येकेचात्महनस्तेसर्वेपीत्येवंनियमपरमेवेदं ननू क्तप्रकारेणविभागपरमित्यर्थः । कुतइत्यतआह ॥ नियमेनेति ॥ नियमेनेत्यस्यैव विवरणंसर्वेपीति । अंधयतीत्यंधं । अतिनिबिडांधकारावृताइत्यर्थः । प्रेत्यमृत्वा ।

भोनियमार्थइतिन्यायंमनसिनिधायतदभिप्रायंवदंस्तमसावृताइत्येतद्व्याचष्टे ॥ अतिनिबिडेति ॥ अनेनांधेनादर्शनात्मकेनत मसाअज्ञानेनावृताइतिपरव्याख्यानमपहस्तितंभवति । लोकशब्दस्यशरीरपरत्वेहिकथंचित्तदुपपद्येत । नचतदस्ति । उत्तरवा क्येनैवतस्यनिराकरिष्यमाणत्वात् । प्रसिद्धलोकानांचाज्ञानावृतत्वस्यबाधितत्वादिति । लक्ष्मणःप्रेत्यसुग्रीवंबभाषेरामचोदित मित्यादौप्रेत्येत्यस्यप्राप्तावपिप्रयोगाच्छ्रुतौतदर्थत्वभ्रांतिपरिहारायतदनूद्यव्याचष्टे ॥ प्रेत्यमृत्वेति ॥ भाष्यकृतोऽपव्याख्यान

भा० । येकेचेत्यनेननियमउक्तः । नियमेनतमोयांतिसर्वेपिविमुखाहरावितिच ॥ ३ ॥

निराकरणाभावप्रयुक्तांन्यूनतापरिहरति ॥ एवमुदाहृतेति ॥ देवादिशरीराणीति ॥ इयमत्रपरव्याख्या । अथेदानीमविद्वन्निं दार्थोयंमंत्रआरभ्यते । असुर्याःपरमात्मभावमद्वयमपेक्ष्यदेवादयोप्यसुराः । तेषांसंभूताःअसुर्याः । तेलोकाः । कर्मफलानिलोक्यं तेदृश्यंतेभुज्यन्तेइतिजन्मानिब्रह्मादिदेहाः अंधेनादर्शनात्मकेनाज्ञानेनतमसाआवृताःआच्छादिताःतान्स्थावरान्प्रेत्यइमंदेहंत्य क्त्वाऽभिगच्छंतियथाकर्मयथाश्रुतमिति ॥ ३ ॥ उत्तरमंत्रस्याप्युपोद्घातत्वभ्रांतिंपरिहरन्अनुष्ठानोपयोगितयावृत्तमंत्रत्रयार्था

एवमुदाहृतवचनविरोधादेव देवादिशरीराण्यसुर्यालोकाइतिव्याख्यानमयुक्तमेवेति ॥३॥ एवंनिवृत्तकर्मणाविशुद्धाशयस्यैहिकामुष्मिकाशेषविषयेभ्योव्यावृत्तस्ये श्वरतत्वबुभुत्सा वतः कोसावात्मा यद्विपरीतोपासनमसुर्यलोकप्राप्तिसाधनंस्यादित्यपेक्षायां परमात्मतत्वो पदेशःक्रियते ॥ अनेजदित्यादिना ॥ तत्राद्यंमंत्रमन्यथाप्रतीतिनिरासायस्मृत्यैवव्याचष्टे ॥ नुवादेनावसरसंगतिप्रदर्शनपूर्वकंवर्तिष्यमाणमंत्रसंदर्भमवतारयति ॥ एवमित्यादिना ॥ आशयस्येत्यंतेनद्वितीयमंत्रस्यार्थोऽ नूदितः । व्यावृत्तस्येत्यंतेनप्रथमस्य वैराग्यंप्रतिनिवृत्तकर्मणामंतःकरणशुद्धिद्वाराहेतुत्वज्ञापनायक्रमोल्लंघनं । बुभुत्सावतइत्यं तेनतृतीयस्य अपेक्षायामित्यंतेनावसरसंगतिरुक्ता । अवशिष्टेनोत्तरमंत्रसंदर्भप्रतिपाद्यमुक्तमितिज्ञातव्यं ॥ तत्रेति ॥ उत्तरमं त्रसंदर्भइत्यर्थः ॥ अन्यथाप्रतीतिनिरासायेति ॥ एतदुभयमुत्तरटीकायांस्पष्टं । स्मृत्यैवेत्यवधारयतालाघवंसूचितं । प्रथ

उप० । अनेजदेकंमनसोजवीयोनैनद्देवाआप्नुवन्पूर्वमर्षत् । तद्धावतोन्यानत्येतितिष्ठत्तस्मिन्नपोमातरिश्वादधाति ॥ ४ ॥

मंस्ववचनेनव्याख्यायतत्रप्रमाणोपन्यासेगौरवंस्यादितिभावः । तच्छब्दत्रयंविशेष्यसमर्पकंसर्वत्रान्वेतीतिभावेनाद्यमनूद्यव्याच ष्टे ॥ तदिति ॥ उत्तरंद्वयमप्येवमेवव्याख्यातव्यमितिभावः । निर्भयत्वादित्यादिहेतूनामेकमित्यादिनान्वयभ्रांतिंपरिहरन्हे त्वनुवादेनसाध्यसंबंधंदर्शयति ॥ निर्भयत्वादेवेति ॥ अपव्याख्याननिराकरणस्यभाष्यारूढत्वार्थमचिंत्यशक्तिश्चैवेत्येवश ब्दस्यसर्वैःपंचम्यंतैःसंबंधमभिप्रेत्यात्रसंबंधोदर्शितः । एवमुत्तरत्रापिद्रष्टव्यं ॥ अनेजदिति ॥ अनेजदित्युच्यतइत्यर्थः । एक मित्यप्येवंव्याख्येयं । निर्भयत्वादीनांशब्दवाच्यत्वएवहेतुत्वात् । अतएवोत्तरत्रागम्यमुच्यतेइत्याद्युक्तं । एजृकंपनइतिधातुंमन

अनेजदिति ॥ तत्परमात्मस्वरूपंनिर्भयत्वादेवानेजत् । अकंपमानं नतुनिष्क्रियत्वा त् । प्राधान्यतएवचैकं नतुद्वितीयवस्तुरहितत्वात् । तथाशब्दोविशेषणसमुच्चये ।

सिनिधायाह ॥ अकंपमानमिति ॥ अवधारणव्यावर्त्यतयाअपव्याख्यानंदर्शयति ॥ नतुनिष्क्रियत्वादिति ॥ एवमुत्तर त्रापिज्ञातव्यं । उपमार्थत्वासंभवादाह ॥ तथाशब्दोविशेषणसमुच्चयइति ॥ समुच्चयइत्येवोक्ते नकेवलंनिर्भयत्वादनेजत् तथाएकमितिविशिष्टसमुच्चयःप्रतीयेत । सचायुक्तः । निर्भयत्वस्यैकशब्दवाच्यत्वेनिमित्तत्वासंभवात् । अतोविशेषणसमुच्चय इत्युक्तं । नकेवलमनेजत्तथाएकमितिविशेषणसमुच्चयइत्यर्थः । मनसोजवीयइत्येतत्प्रमाणेअव्याख्यातत्वात्स्वयंव्याचष्टे ॥

भा० । अनेजन्निर्भयत्वात्तदेकंप्राधान्यतस्तथा । सम्यग्ज्ञातुमशक्यत्वादगम्यंतत्सुरैरपि ।

मनसोपीति ॥ श्रौतक्रमानुसारेणात्रव्याख्यातमित्यवगंतव्यं । मनोग्रहणस्याभिप्रायमाह ॥ मनोहीति ॥ सम्यगिति ॥ साकल्येनेत्यर्थः । ननुप्रमाणेतत्सुरैरगम्यमुच्यतइतिसाध्यकथनमयुक्तं । श्रुतौ नैनद्देवाआप्नुवन्नित्युक्तत्वेनतद्विसंवादप्रसंगादि त्यतस्तदर्थानुवादरूपत्वान्नदोषइतिभावेननैनद्देवाआप्नुवन्नितीत्युक्तं । नैनद्देवाआप्नुवन्नित्यनेनतत्सुरैरगम्यमुच्यतइत्यर्थः । अत्र देवाःएनत्परमात्मस्वरूपंमनआदिभिर्नाप्नुवन्नितियोजनयाश्रुतौगमेरवगमार्थत्वेन भाष्येचदेवाज्ञेयत्वमुच्यते नतुदेवाप्राप्यत्वं । सम्यग्ज्ञातुमशक्यत्वादितिहेतुकथनेन । नतुसर्वथाऽगोचरत्वादित्यपव्याख्याननिराकरणेनचविरोधप्रसंगादितिज्ञातव्यं । एव

मनसोपिजवीयोवेगवत्तरं । मनोहिवेगवत्प्रसिद्धं। सम्यग्ज्ञातुमशक्यत्वादेवनैनद्देवाआप्नुवन्नितितत्सुरैरप्य गम्यमुच्यते । नतुसर्वथाऽगोचरत्वात् । पूर्वमर्षदित्यस्यव्याख्यानंस्वयंतुसर्वानिति । अगमत्व्यजानात् ।

शब्दव्यावर्त्यतयाऽपव्याख्यानंदर्शयति ॥ नतुसर्वथाऽगोचरत्वादिति ॥ एवंहिपरेषांव्याख्या । द्योतनाद्देवाश्चक्षुरादींद्रि याणि एनत् प्रकृतपरमात्मतत्वं । नाप्नुवन् ज्ञापनायनाप्नुवंतीति । टीकायांसर्वथाअगोचरत्वादित्युक्तिरर्थानुवादइतिज्ञातव्यं । गमेर्गत्यर्थतायामृषज्ञानइत्युत्तरभाष्यविरोधप्रसंगादवगत्यर्थमाह ॥ व्यजानादिति ॥ ननुप्रमाणेस्वभावतइतिव्यर्थं श्रुत्यननु गुणंच । नचपूर्वमेवेतिश्रौतपदव्याख्यानरूपत्वान्नदोषइतिवाच्यं । तथासतिपूर्वमेवेत्यस्यवैयर्थ्यप्रसंगादित्यतोव्याख्येयपदानु

भा० । स्वयंतुसर्वानगमत्पूर्वमेवस्वभावतः । अचिन्त्यशक्तिश्चैवसर्वगत्वाच्चतत्परं । द्रवतोऽतिसंतिष्ठत्तस्मिन्कर्माण्यधान्मरुत् ।

वादरूपत्वान्नतदित्याशयेनाह ॥ पूर्वमेवेत्यनुवादेनेति ॥ नचश्रुतावेवशब्दाभावात्प्रमाणेकथंपूर्वमेवेत्यनुवादइतिवाच्यं । स्वभावतइत्यर्थलाभायसर्ववाक्यंसावधारणमितिन्यायेनाध्याहृतावधारणस्यानुवादोपपत्तेः । सावधारणत्वेहिपूर्वमेवनत्वागंतुकस्येत्युक्त्यास्वभावइत्यर्थलाभसंभवादितिभावः । एतदर्थमेवचानुवादइतिज्ञातव्यं ॥ अचिंत्यशक्तितश्चेति ॥ इयमत्रयोजना तत्परंब्रह्मद्रवतोन्यानत्येतीत्युच्यतइत्यत्रसर्वगतत्वमेवहेतुः । नत्वचिंत्यशक्तिरपि । गगनादीनामिवसर्वगतत्वमात्रनिर्वाह्येऽचिंत्यशक्त्यनपेक्षणात् । सर्वगत्वात्सदूरेचेतिवक्ष्यमाणप्रमाणानुरोधाच्च । संतिष्ठत्द्रवतोन्यानत्येतीत्युच्यतइत्यत्राचिंत्यशक्तितइतिहेतुः । तिष्ठतोद्रवदतिक्रमणस्यलोकविरुद्धत्वेनसर्वगतत्वानिर्वाह्यस्याचिंत्यशक्त्यपेक्षणात् । ऐश्वर्यादेवासीनोदूरंव्रजती

पूर्वमेवेत्यनुवादेनस्वभावतइतिविवरणं । अचिंत्यशक्तितश्चसर्वगतत्वाच्चतत्परंब्रह्म संतिष्ठत्द्रवतोऽन्यानत्येतीत्युच्यते । नत्वन्यस्यकल्पितत्वात् । अपइत्यस्यव्याख्यानंकर्माणीति॥आसमंतात्पालयंतीतिकर्माण्यापः ।

त्यादि । आसीनोदूरंव्रजतिशयानोयातिसर्वतः । ऐश्वर्याद्भगवान्विष्णुर्विरुद्धंघटयत्यसाविति काठकभाष्योक्तेश्च । नचैवंहेतुद्वयस्याभिन्नसाध्यकत्वे चशब्दानुपपत्तिः । हेतुसमुच्चयमात्रेचशब्दांगीकारात् । अत्राचिंत्यशक्तितः सर्वगतत्वादित्युभयं नत्वित्यपव्याख्याननिरासलाभायसावधारणंव्याख्येयं । पूर्वन्यायेनसिद्धत्वादचिंत्यशक्तितश्चैवेत्यवधारणसद्भावाच्चटीकायांनोक्तमितिज्ञातव्यं । श्रुतिभाष्ययोर्विसंवादंपरिहरति ॥ अपइत्यस्येति ॥ यद्यप्यत्रापइतिनापूशब्दस्यद्वितीयाबहुवचनांतं । तस्यकर्मवाचकत्वासंभवात् । तद्धिरूढ्यायोगेनवा । नाद्यः । वेदनिघंटौपकारांतस्यापूशब्दस्यकर्मनामस्वपठितत्वात् । अपःअम्नःदं

सःवेपइत्यादीनिकर्मनामानीतिसकारांतस्यैवापःशब्दस्यकर्मनामसुपठितत्वाच्च । टीकाकृतापि दक्षंदधातेअपसमित्यस्यामृचि कर्मापसंचकर्तारमितिभाष्यव्याख्यानावसरे अपसंकर्मेतिऋक्पदभाष्यपदयोःसंबंधंप्रदर्श्यतदुपपादनायापःशब्दःकर्मनामेत्युक्त्वाच्च । नद्वितीयः । उणादिवृत्तौआप्नोतेर्ह्रस्वश्च आपुव्याप्ताविति स्मात्क्विप्प्रत्ययेह्रस्वेचकृतेनिष्पन्नस्यापूशब्दस्यांभोवाचित्वमित्युक्तत्वेनांभसियोगेपिकर्मणितदभावात् । तथापि विश्वेदेवासोअमुरइत्यस्यामृचि अमुरःकर्मवेगिनइतिभाष्यव्याख्यानावसरेटीकायामपूशब्दःकर्मवाचीत्युक्तत्वेनात्रापिपकारांतस्यैवापूशब्दस्यग्रहणोपपत्तेः । नचयोगरूढ्योरभावः । उणाद्यनुसारेणयोगोपपत्तेः । नचतत्रांभोवाचित्वमित्युक्तत्वेनकर्मणियोगासंभवइतिवाच्यं । प्रयोगानुसारेणांभोवाचित्वमित्युणादिवृत्तेःकर्मवा

सर्वैःक्रियमाणानिकर्माणितस्मिन्नर्पितवानित्यर्थः ।

चित्वोपलक्षणत्वोपपत्तेः । कर्मणामपिप्रतिपुरुषंव्याप्तत्वात् । अथवाआङ्पूर्वात्पारक्षणइत्यस्मात्क्विपिनिर्वचनत्वादाङोह्रस्वत्वेचनिष्पन्नस्यापूशब्दस्यकर्मवाचित्वेबाधकाभावात्। नह्युणादिवृत्त्यनुसारेणैवयोगोंगीकार्यइतिनिर्बंधेकारणमस्ति । अतएवानुव्याख्यानेआपआपालनाच्चेत्युक्तं । एतदेवाभिप्रेत्यटीकायां आसमंतात्पालयंतीतियोगप्रदर्शनंकृतमितिज्ञातव्यं । ननुकर्मणांभगवत्याधानंनामभगवतिसमर्पणमेवनान्यत् । सर्वातांहरयेर्पयदित्युत्तरप्रमाणानुरोधात् । तत्रकिंमातरिश्वा स्वकृतानिकर्माण्यर्पितवानुत सर्वैःक्रियमाणानि । नाद्यः । तस्यभगवद्भक्तमात्रसाधारणत्वेनविशिष्यमातरिश्वनस्तत्कथनानुपपत्तेः । नद्वितीयः । अन्यदीयस्यकर्मणोअन्येनसमर्पणानुपपत्तेरित्यतोद्वितीयपक्षांगीकारपरत्वेनभाष्यंव्याचष्टे ॥ सर्वैःक्रियमाणानीति ॥ अत्र

समर्पणंनाम सर्वकर्मणांभगवत्कर्तृत्वेनतत्पूजात्वेनतद्भक्तिप्रसादफलकत्वेनानुसंधीयमानत्वं । यथोक्तं गीतातात्पर्यनिर्णये । नाहंकर्ताहरिःकर्तातत्पूजाकर्मचाखिलं । तथापिमत्कृतापूजातत्प्रसादेननान्यथा । तद्भक्तिःतत्फलंमह्यंतत्प्रसादःपुनःपुनः । कर्मन्यासोहरावेवंविष्णोस्तुष्टिकरःसदेति । अनेन मातरिश्वाऽपःकर्माणिअग्न्यादीनांज्वलनदहनप्रकाशनाभिवर्षणादीनि दधाति विभजतिधारयतिचेत्यपव्याख्यानंनिरस्तंभवति। इदानींद्वितीयपक्षोक्तदोषपरिहारायोत्तरंभाष्यंव्याख्यातुंतमेवदोषमाशंकते ॥ अन्यकर्माणीति ॥ अन्यकृतकर्माणीत्यर्थः । अन्यथासर्वेषामपितत्स्यादविशेषादितिभावः । सर्वैःक्रियमाणाचेष्टाकथंमारुती

अन्यकर्माणिकथंमातरिश्वाऽर्पयेदित्यतआह ॥ मारुतीति ॥ यतःसर्वाचेष्टामरुत्प्रेरणयोत्पन्नत्वान्मारुतीअतस्तांहरये हरावर्पयेदित्युक्तमित्यर्थः । अर्षदित्येतदगमदितिव्याख्यातं ।

स्यात् बाधादित्याशंकांपरिहरन्नपेक्षिताध्याहारपूर्वकंभाष्यंयोजयति ॥ यतइति ॥ अन्येषाममुख्यकर्तृत्वेपिप्रेरकत्वाद्वायोरेव मुख्यकर्तृत्वमतोनबाधोनाप्यविशेषइतिभावः। यद्यप्यासमंतात्पालयंतीतिपूर्वोक्तव्युत्पत्त्या सत्कर्मणामेवपालकत्वादपूशब्दार्थत्वं प्रतीयते । तथापि सर्वैःक्रियमाणानिकर्माणितस्मिन्नर्पितवान् यतःसर्वाचेष्टामरुत्प्रेरणयोत्पन्नेत्यादिटीकानुसारेण मारुत्येवयत श्चेष्टासर्वेत्यादिभाष्यानुसारेणचोपलक्षणत्वेनासत्कर्मणामप्यपूशब्दार्थत्वंज्ञातव्यं । तेषांभगवदर्पणंनामतत्कर्तृकत्वेनानुसंधान

भा० । मारुत्येवयतश्चेष्टासर्वातांहरयेऽर्पयेदितिब्रह्मांडे ।

मितिज्ञातव्यं ॥ तन्मूलभूतमिति ॥ व्याख्यानमूलभूतमित्यर्थः ॥ धातुसूत्रमपीति ॥ आगमस्यस्वयंप्रमाणत्वादपिशब्दः । धातुसूत्रापठनेगमेर्ज्ञानार्थत्वंनज्ञायेत । सम्यग्ज्ञातुमशक्यत्वादितिपूर्ववाक्यार्थपर्यालोचनयातज्ज्ञानसंभवेपि प्रतिपत्तिगौरवप्रसंगादितिभाष्यकृतोभावःस्फुटत्वान्नवर्णितइतिबोध्यं । यद्यपिकाशिकायांऋषीगताविितिधातुंपठित्वाईदित्त्वादेवहिऋष्टइत्यादौश्वीदितोनिष्ठायामितिनिष्ठायाअनिट्त्वमुक्तं । धातुपाठेपि ऋषीगताविितिईदित्त्वेनगत्यर्थकएवधातुःपठ्यते नतुऋषज्ञानइति । तथापि गत्यर्थस्यऋषतेर्ज्ञानार्थत्वमुक्तानुबंधत्वंचाभिप्रेत्यभाष्येऋषज्ञानइतिधातुःपठितइतिद्रष्टव्यं । यद्वासर्वज्ञभाष्यकृत्प्र

तन्मूलभूतंधातुसूत्रमपिपठति ॥ ऋषज्ञानइति ॥ अनेजदित्या
देर्निष्क्रियत्वाद्यर्थकल्पने मनसोजवीयइत्यादिविरोधश्च ।

योगानुसारेणऋषज्ञानइत्यपिधातुरस्तीतिज्ञातव्यं । अपव्याख्यानेप्रमाणविरोधपरंभाष्यमुपलक्षणमित्याशयेनांतरंगानुपपत्तिमप्याह ॥ अनेजदित्यादेरिति ॥ अत्राद्येनादिशब्देनएकमित्यादेर्द्वितीयेनाद्वितीयत्वादेस्तृतीयेनतद्धावतोन्यानित्यादेर्ग्रहणं ॥ ७ ॥ ततश्चायमर्थः ॥ अनेजदित्यस्यनिष्क्रियार्थत्वेसक्रियत्वप्रतिपादकेनमनसोजवीयइत्यनेनविरोधः । एकमित्यस्यद्वितीयराहित्यार्थत्वे तद्धावतोन्यानित्याद्यन्यसद्भावप्रतिपादकविरोधः । नैनद्देवाआप्नुवन्नित्यस्यसर्वथाइंद्रियागोचरत्वार्थत्वेयत्तेरूपं कल्याणतमंतत्तेपश्यामीतिदर्शनप्रार्थनविरोधः। एवमन्यत्रापिविरोधोद्रष्टव्यःइति । ननुनिरुपाधिकचैतन्यस्यनिष्क्रियत्वंसर्वेंद्रिया

भा० । ऋष ज्ञाने ॥ ४ ॥

गोचरत्वंचोच्यते। सक्रियत्वमिंद्रियगोचरत्वंचसोपाधिकस्य। मनसोजवीयइत्यस्यांतःकरणावच्छिन्नचैतन्यपरत्वेनयत्तेरूपमित्या देरादित्यपरत्वेनपरेणव्याख्यातत्वादेवंपरमार्थापेक्षयाऽद्वितीयत्वंव्यावहारिकापेक्षयान्यप्रतिपादनमित्यतोनकोपिविरोधइत्याशं क्यपरिहरति ॥ नचेति ॥ सोपाधिकेत्याद्युपलक्षणं पारमार्थिकत्वव्यावहारिकत्वेनेत्यपिद्रष्टव्यं । कुतोनेत्यतआह ॥ मुख्यार्थे ति ॥ निरुपाधिकचैतन्यस्याकल्पितत्वेनमुख्यत्वात् सोपाधिकस्यकल्पितत्वेनामुख्यत्वा दस्मदुक्तन्यायेनसर्वस्यमुख्यब्रह्मपर त्वसंभवेनमनसोजवीयइत्यादेःकल्पितामुख्यचैतन्यार्थत्वायोगात्। व्यावहारिकस्यापिकल्पितत्वेनामुख्यतया तद्भावतोन्यानि त्यादेरस्मदुक्तन्यायेनाकल्पितमुख्यार्थत्वसंभवेअमुख्यार्थत्वायोगादित्यर्थः। उपलक्षणमेतत्। एवशब्दस्यपरमार्थद्वितीयराहि

नचसोपाधिकनिरुपाधिकत्वेनव्यवस्था। मुख्यार्थसंभवेऽमुख्यार्थायोगात्।

त्यार्थत्वे याथातथ्यतोर्थानित्यादिविरोधः। तत्रमहदादीनांयाथातथ्यतइत्यनेनपरमार्थत्वस्योक्तत्वादित्यपिद्रष्टव्यं। यद्वा अमु ख्यार्थायोगादित्यस्यलक्ष्यार्थायोगादित्यर्थः। अनेजदेकमित्यादेर्निरुपाधिकचैतन्यपरत्वंवदतापरेणलक्षणायाअंगीकर्तव्यत्वादं गीकृतत्वाच्चेतिव्याख्यातव्यं। ननुनलक्षणांगीकारएवदोषः। तथासतिकुत्रापिसानस्यादित्यतउक्तं मुख्यार्थसंभवइति ॥ अस्म दुक्तरीत्यावाच्यार्थसंभवइत्यर्थः। नन्वपव्याख्यानइवभाष्यकृव्याख्यानेप्यस्त्यनुपपत्तिः। तथाहि। अनेकपदात्मकवाक्यश्रव णादनेकार्थप्रतीतावपिवाक्यस्यतावदेकत्रतात्पर्यकल्प्यं। अन्यथैकवाक्यत्वासंभवात्। यत्परःशब्दःसशब्दार्थइतिचशाब्दाः। वाक्यतात्पर्यविषयश्चसएव। यत्प्रतिपादनेनवाक्यपर्यवसानं यत्प्रतिपादनायचपदांतरोपादानं। तथाभूतश्चकार्यात्मैव। नहि

गौरश्वःपुरुषोहस्तीतिवा देवदत्तःपचतीतिवा वाक्यंपर्यवसितमनुभूयते। किंतुदेवदत्तगामानयेत्यादिकार्यनिष्ठमेव। अतःकार्य मेवसर्वत्रवाक्यार्थः। कार्यत्वंचकृतिसाध्यत्वेसतिकृत्युद्देश्यत्वं। तत्रलिङ्लोट्तव्यप्रत्ययःसाक्षात्कार्याभिधायी। पदांतराणितु तत्प्रतीतयेतदन्वितस्वार्थाभिधायीनितत्पराण्येव। नचानेजदेकमित्यादौतद्बोधकंलिंगादिश्रूयते। ततःकेवलसिद्धस्वरूपब्रह्मप्र तिपादकस्यास्यापर्यवसितत्वेनाप्रामाण्यप्रसंगः। नचविष्णुरुपांशुयष्टव्यइत्यादिकर्मविधिशेषत्वेनवा आत्माद्रष्टव्यःश्रोतव्यइत्या दिज्ञानविधिशेषत्वेनवाऽत्रब्रह्मप्रतिपादनेनकार्यपरत्वान्नापर्यवसितत्वमितिवाच्यं। तथात्वेब्रह्मणःकार्यशेषत्वापत्त्या स्वप्रधाने ब्रह्मणिवेदांतानांमहातात्पर्यमितिसिद्धान्तव्याकोपप्रसंगादित्यतआह ॥ स्वप्रधानइति ॥ कार्यानन्वितइत्यर्थः। सत्यंपर्यवसि

स्वप्रधानेब्रह्मणिवेदांतानांतात्पर्यादत्रस्वरूपकथनमात्रेणवाक्यपरिसमाप्तिः ॥ ४ ॥

तमेववाक्यंप्रमाणं कार्यपरमेवचपर्यवसितमिति। तथापि कृतिसाध्यत्वेसतिकृत्युद्देश्यत्वंनकार्यत्वं। तथासतिमात्रादीन्जिज्ञा समानंप्रति इयंतेमाता अयंतवपितेत्यादिसिद्धबोधकवाक्यस्याप्रामाण्यप्रसंगात्। किंत्विष्टेष्टसाधनतान्यतररूपमेव। तच्चक्व चित्सिद्धं क्वचित्कृतिसाध्यमित्यन्यदेतत्। तदिहापिब्रह्मणउत्तमानामिष्टत्वान्मध्यमादीनामिष्टसाधनत्वात्तद्बोधकवाक्यस्ययु क्तापरिसमाप्तिरितिभावः ॥ ४ ॥ ननुतदेजतीत्याद्युत्तरभाष्यंव्यर्थं। नचश्रौतपदानुवादेनव्याख्यानार्थमितिवाच्यं। अप्रतीत्य न्यथाप्रतीतिरूपव्याख्यानबीजाभावेनतदयोगात्। नचतद्ब्रह्मबिभेतीत्यन्यथाप्रतीतिरेवबीजमितिवाच्यं। तच्चेष्टतइतियथाप्र

तीतेरपिसंभवेना न्यथाप्रतीत्यैवभाव्यमितिनिर्बंधेकारणाभावादित्यतःपरिशेषएवतत्कारणमित्याशयेनाह ॥ उत्तरमंत्रइति ॥ प्रायपाठविरुद्धमिति ॥ अनेजदित्यत्रएजतेर्भयार्थत्वेनव्याख्यातत्वात्तत्प्रायपठितत्वविरुद्धमित्यर्थः ॥ अतइति ॥ अर्थात रप्रतीत्यसंभवादित्यर्थः । ननुतदित्यस्यततइतिव्याख्यानमलाक्षणिकत्वादयुक्तमित्यतस्तद्धटयन्नुत्तरभाष्यमवतारयति ॥ तदित्यव्ययंपंचम्यर्थेचेदमंगीक्रियतइति ॥ ननुतच्छब्दरूपस्यतदित्यस्यप्रथमात्वेपिसप्तसुप्रथमेतिमहाव्याकरणसूत्रात् सुपांसु

उत्तरमंत्रेतदेजतीत्यस्य तद्ब्रह्मचेष्टतइतितुव्याख्यानं प्रायपाठविरुद्धं । अतःत
द्विभेतीत्यन्यथाप्रतीतिःस्यात्तन्निरासायाह ॥ तदिति ॥ तदित्यव्ययंपंचम्यर्थेचे
दमंगीक्रियते । तर्ह्येजनस्यकिंकर्तृ तत्राह ॥ अन्यदिति ॥ ननुकिमध्याहारेण

लुक्इतिप्रसिद्धव्याकरणसूत्राद्वापंचम्यर्थत्वसंभवेअव्ययत्वांगीकारोऽयुक्तः । नामब्रह्मेत्यादौप्रथमादेःसप्तम्याद्यर्थत्वस्योदाहृत व्याकरणद्वयानुसारेणभाष्यटीकाकृद्भ्यांबहुशोंगीकृतत्वाच्चेतिचेन्मैवं । महाव्याकरणसूत्रेणप्रथमायाःपंचम्यर्थत्वेपि प्रसिद्धव्या करणसूत्रेणचप्रथमायाःपंचम्यादेशत्वेनपंचम्यर्थत्वेपि नसाक्षात्पंचम्याएवपंचम्यर्थत्वं । अव्ययत्वांगीकारेतु । सर्वासुचविभ क्तिषु ॥ वचनेषुचसर्वेषुयन्नव्येतितदव्ययमित्युक्तन्यायेन तदित्यस्यैवपंचमीत्वेनतदर्थत्वोपपत्तेःप्रतिपत्तिलाघवादव्ययत्वांगी

उप० । तदेजतितन्नैजतितद्दूरेतद्वंतिके । तदंतरस्यसर्वस्यतदुसर्वस्यबाह्यतः ॥ ५ ॥

भा० । तदेजतिततएवएजत्यन्यत् ।

कारोयुक्तः । यद्वा एतद्ग्रंथस्योपायांतरत्वान्नकश्चिद्दोषः । तदित्यस्याव्ययत्वंतुस्वरादित्वेनेतिमंतव्यं । नन्वध्याहाराभावेकथंक त्रांकांक्षाशांतिरित्यतउक्तं ॥ तद्ब्रह्मेति ॥ ननुततएजतिबिभेतीतिव्याख्यानेकर्तृवाचकशब्दाभावोदोषः । तद्बिभेतीतिव्या ख्याने उत्तरवाक्यविरोधोदोषइतिपक्षद्वयस्यापिदुष्टत्वसाम्यात्कथंनिर्णयइत्यतआह ॥ शाब्द्याद्यनुपपत्तेरिति ॥ आर्थानु पपत्तेरन्यतरवाक्याप्रामाण्यहेतुत्वेनबलवत्त्वं । शाब्दानुपपत्तेस्त्वध्याहारेणपरिहार्यत्वान्नतद्धेतुत्वमितिततोदुर्बलत्वमितिभावः । ननूपपत्तिसिद्धेर्थेप्रमाणांतरानपेक्षणादुत्तरंभाष्यमनर्थकमित्यतउपपत्तेःसावकाशत्वशंकापूर्वकंभाष्यमवतारयति ॥ तन्नेजती

तद्ब्रह्मबिभेतीत्येवार्थःकिंनस्यादित्यतस्तन्नेजतीत्युत्तरवाक्यविरोधात् । शाब्द्याद्यनुपपत्तेरार्थीबलव
तीतिभावेनतद्व्याख्याति ॥ तत्स्वयमिति ॥ तन्नेजतीत्येतन्निष्क्रियत्वार्थमपिव्याख्यातुंशक्यमित्यतो

त्येतन्निष्क्रियत्वार्थमपीति ॥ तथाचोत्तरवाक्यस्याविरोधकत्वात्तदेजतीत्यस्यतद्ब्रह्मबिभेतीत्येवार्थोयुक्तः । अध्याहाराभावा दितिभावः । नचतन्नेजतीत्यस्यनिष्क्रियत्वार्थत्वेमनसोजवीयइत्यनेनविरोधःशंक्यः । निर्भयत्वार्थत्वेपिअनेजदित्यनेनपौनरु क्त्यदोषसाम्यात् । यदिचतात्पर्यज्ञापकत्वेनपौनरुक्त्यंपरिहियते तदासोपाधिकनिरुपाधिकविषयत्वेनविरोधोपिपरिहियतां । नचैवंपक्षद्वयेपिसाम्यादेवमेवव्याख्यानेकिंबीजमितिवाच्यं । तदेजतीत्यस्यततएजत्यन्यदितिव्याख्यानस्यातिक्लिष्टत्वेनसाम्या भावात् । साम्येप्यर्थानिर्णयेनसिद्धांतिनएवानिष्टत्वात् । अतएवनिष्क्रियत्वार्थमपीत्युक्तमितिशंकितुरभिप्रायः । यद्यपि मु

भा० । तत्स्वयंनैजति ।

ख्यार्थसंभवेअमुख्यार्थायोगादित्युक्तरीत्यासोपाधिकनिरुपाधिकविषयत्वेनविरोधस्यपरिहर्तुमशक्यत्वेन मनसोजवीयइत्येतद्विरोधस्यापरिहार्यत्वान्नैतच्चोद्यावकाशः । तथापि तदाच्छादनेनैवैतच्चोद्यमितिमंतव्यं ॥ **मंत्रार्थइति** ॥ अतोनोत्तरार्धस्यवैयर्थ्यमितिभावः । ननुसर्वगतत्वस्यदूरइत्यादावेकैकत्रतावन्नहेतुत्वं । असर्वगतानामपिघटादीनांदूरादिस्थत्वात् । नापिद्वयोर्द्वयोः । सर्वगतत्वाद्दूरेबाह्येच । सर्वगतत्वादंतःसमीपगश्चेत्यत्रापिपूर्वदोषानुवृत्तेरित्यतो द्वितीयंपक्षमंगीकृत्यतत्रोक्तदोषपरिहारायश्रुत्यनुसारेण प्रतियोग्यनुयोगिक्रमानुसारेणच पदानियोजयति॥**दूरइति** ॥ भा० ॥५॥ ततश्चानेजदेकमित्यादिमंत्रद्वयस्यायमर्थः।

मंत्रार्थेसमाख्यामाह ॥ ततइति ॥ दूरेसमीपतश्चबाह्येंतश्चेतियोज्यं ॥ ५ ॥

तद्धावतइत्यत्रश्रूयमाणंतदित्येतत्सर्वत्रान्वेति । तद्ब्रह्म निर्भयत्वादेवानेजदित्युच्यते । नतुनिष्क्रियत्वात् । प्रधानत्वादेवैकमित्युच्यते । नतुद्वितीयशून्यत्वात्। मनसोजवीयः । मनोहिवेगवत्त्वेनप्रसिद्धं । ततोप्यतिशयेनवेगवत् । एनत् एतद्ब्रह्म देवाः ब्रह्माद्याः। नाप्नुवन्सस्यक्नज्ञातवन्तः। स्वयंतुपूर्वं पूर्वमेवानादितएवसर्वान्अर्षत्व्यजानात्। ऋषज्ञाने तद्ब्रह्म स्वयमेकत्रतिष्ठदेव धावतोद्रवतोऽन्यानत्येतिअतिक्रम्यवर्तते । एवंमाहात्म्योपेततस्मिन्ब्रह्मणि मातरिश्वामुख्यवायु रपःसर्वैःक्रियमाणानिकर्माणि दधातितत्पूजात्वेनसमर्पितवान् ॥ खं० ४ ॥ वायोःसर्वप्रेरकत्वेन सर्वकृतकर्मणांमुख्यतोवायुकर्तृकत्वेन युक्तंवायोःसर्वकर्मस

भा० । ततोबिभेतिसर्वोपिनबिभेतिहरिःस्वयं । सर्वगत्वात्सदूरेचबाह्येंतश्चसमीपगइतितत्त्वसंहितायाम् ॥ ५ ॥

मर्पणं । ब्रह्मणोऽन्यस्माद्भयाभाववदन्यस्यापिब्रह्मणःसकाशाद्भयाभावेसाम्यंस्यादित्यतआह ॥तदेजतीति॥ तदित्यव्ययंपंचम्यर्थे।अन्यदितिकर्त्रध्याहारः। तत्ततोब्रह्मणः सकाशा दन्यत्ब्रह्मादिजग देजतिबिभेति। भीषास्माद्वातःपवतइत्यादेः।तत्ब्रह्मस्वयं नैजतिनबिभेति । तद्दूरेतदुतदेवांतिकेसमीपेचवर्तते । सर्वगतमितियावत् । नचानेजदित्यनेननिर्भयत्वस्य तद्धावतइत्यादिना सर्वगतत्वस्यचोक्तत्वात्पुनरुक्तिरितिवाच्यं श्रुतिःस्वस्यपरमात्मनिर्भयत्वसर्वगतत्वप्रतिपादनेतात्पर्यमस्तीतिज्ञापनाय तदभ्यस्तीत्यंगीकारेदोषाभावात् । तद्ब्रह्मास्यसर्वस्यांतर्नियामकत्वेनवर्तते । तदु तदेवास्यसर्वस्यबाह्यतोबहिराश्रयत्वेनवर्ततइति । खं० ॥ ५ ॥ प्रकरणवशादुत्तरमंत्रस्यापिभगवन्माहात्म्यप्रतिपादकत्वमितिभ्रमनिरासायप्रतिपाद्यंकथयन्भाष्यंसंगमयति ॥

तद्दूरेतद्वंतिकइत्यादौपरमेश्वरस्यसर्वभूताश्रयतयासर्वभूतगतत्वमुक्तं ।

तद्दूरइत्यादि ॥ यद्यप्यत्रसर्वभूताश्रयत्वंसर्वभूतगतत्वंचोक्तमित्येववक्तव्यं । तदुसर्वस्यबाह्यतइत्यनेनसर्वभूताश्रयत्वस्य तदंतरस्येत्यनेनसर्वभूतगतत्वस्यचपृथगुक्तत्वात् । अतएव इत्यादावित्युक्तं । यस्त्वित्युत्तरमंत्रेतद्व्याख्यानश्रुतौचोभयोःसमकक्ष्यतयोक्तत्वाच्च । तथापि श्रुत्युक्तंसर्वभूताश्रयत्वंसर्वभूतगतत्वेप्रकारसमर्पकमेव । नतुस्वातंत्र्येणज्ञेयमितिज्ञापनायतथोक्तिसंभवात् । पृथगुभयोर्ज्ञेयत्वसंभवेकिंप्रकारसमर्पकताज्ञापनेनेतिचे त्नैवंशंक्यं । सर्वभूतगतत्वस्यगगनादिसाधारणस्य स्वावस्थानाय सर्वभूतोपजीवनरूपस्यवा भगवन्माहात्म्यरूपत्वाभावेनमुमुक्षुज्ञेयत्वासंभवादितिशंकावकाशात् । सर्वभूतगतत्वोक्तौतुनैतच्चोद्यावकाशः । भगवतःसर्वभूतगतत्वंसर्वभूतस्थितिहेतुव्यापारप्रेरकत्वेन । एतदेवसर्वभूताश्रयतयासर्वभूतगतत्वंनाम । नचै

तद्गगनादिसाधारणं नवास्वावस्थानायसर्वभूतोपजीवनं । येनोक्तदोषःस्यात् । सर्वाधारतयासर्वभूतेषुपरमात्मानंविजानतः पूर्वमंत्रोक्तस्यसर्वाधारतयासर्वभूतगतत्वस्यात्रानुवादः । प्राक्सर्वाधारत्वेनसर्वगतत्वदर्शनफलमुक्तमित्याद्युत्तरटीकाग्रंथादप्य यमेवार्थष्टीकाकृदभिप्रेतोज्ञायते । अन्यथाटीकायांक्वचिदपिसर्वभूताश्रयत्वस्यसर्वभूतगतत्वसमकक्ष्यतयोक्तिप्रसंगेननियमेनप्र कारतयोक्तिर्नस्यात् । उक्तंचप्रमेयदीपिकायां । नहिसर्वभूतप्रेरकत्वेनसर्वभूतगतत्वंगगनादिसाधारणं । येनमुमुक्षूपास्यत्वाभाव इति । उक्तंचतत्वप्रकाशिकायां । नसर्वभूतेषुस्थितिमात्रंसर्वभूतांतर्यामीचेति ॥ तज्ज्ञानफलमिति ॥ अत्रज्ञानसामान्यग्रह णेन यस्त्वितिमंत्रे सर्वगमितिभाष्योदाहृतश्रुतौच दृशेर्ज्ञानसामान्यार्थत्वं । पश्यार्थैश्चानालोचनइत्यादौदृशेर्ज्ञानमात्रार्थताया

तज्ज्ञानफलं यस्तुसर्वाणीतिमंत्रेणोच्यते ।

दृष्टत्वादित्युक्तंभवति । कुतोविशेषशब्दस्यसामान्यपरत्वमितिचेत् । यस्त्वितिमंत्रस्य यस्मिन्नितिमंत्रस्यच पौनरुक्त्यमाशंक्या द्यस्यज्ञानसामान्यवाचकत्वं द्वितीयस्यविशेषज्ञानपरत्वंचाश्रित्य विजानतश्चात्रोच्यतइत्युत्तरभाष्येणपरिहारादिदंज्ञायते । ए तच्चतद्वाक्यव्याख्यानटीकायांस्पष्टं । प्राप्ताधिकारस्यपरमेश्वरतत्वबुभुत्सावतःपरमात्मतत्वोपदेशःक्रियते । अनेजदित्यादि नेत्यादिपूर्वटीकापर्यालोचनयाचास्यज्ञानसामान्यपरत्वंविज्ञायते । नचयस्त्वितिमंत्रस्यज्ञानसामान्यपरत्वेतत्साक्षात्कारोमोक्षसा धनमित्यतीतग्रंथेनोक्तमित्यग्रिमटीकाविरोधइतिवाच्यं । अत्रोक्तपरोक्षज्ञानस्यापरोक्षज्ञानद्वारामोक्षसाधनत्वेनसाक्षात्कारस्यापि

उप० । यस्तुसर्वाणिभूतान्यात्मन्येवानुपश्यति । सर्वभूतेषुचात्मानंततोनविजुगुप्सते ॥ ६ ॥

मोक्षसाधनत्वमुक्तप्रायमित्यभिप्रायेणवा यस्मिन्नितिमंत्रेविजानतइत्यनेनसाक्षात्कारस्योक्त्वाभिप्रायेणवा अग्रिमग्रंथप्रवृत्त्युप पत्तेरिति ॥ सर्वभूतात्मकत्वमुच्यतइति ॥ ७ ॥ इयमत्रापव्याख्या ॥ यस्तुपरिव्राट्मुमुक्षुःसर्वाणिभूतान्यव्यक्तादीनि स्थावरांतानि आत्मन्येवानुपश्यति । आत्मव्यतिरिक्तानिनपश्यतीत्यर्थः । सर्वभूतेषुचात्मानं तेषामपिभूतानामहमेवात्मेति । सर्वभूतेषुचात्मानंयस्तुपश्यतिसः ततःतस्मादेवदर्शनात् । नविजुगुप्सतेविजुगुप्सांघृणांनकरोति । सर्वाहिघृणा आत्मनोन्यंनिकृष्टंपश्यतोभवति आत्मानमेवात्यंतविशुद्धंनिरंतरंपश्यतोनघृणानिमित्तमस्तीति ॥ ७ ॥ मंत्रसमाख्याश्रुत्योः

तत्रजीवस्यसर्वभूतात्मकत्वमुच्यतइत्यपव्याख्याननिरासाय मंत्रंश्रुत्याव्याचष्टे ॥

सर्वगमिति ॥ सर्वगंपरमात्मानमिति सर्वभूतेषुचात्मानमित्यस्यार्थः । सर्वं चपरमात्मनीतिपूर्वार्धस्य । भयाभावादिति ततोनविजुगुप्सतइत्येतद्व्याख्यानस्य

क्रमेणव्याख्यानव्याख्येयभावभ्रमंनिवारयति ॥ सर्वगमिति ॥ पूर्वार्धस्यार्थइतिसंबंधः । ननुव्याख्यानश्रुतौभयाभावादि तिव्यर्थं । व्याख्येयमंत्रे तद्व्याख्येयपदाभावादित्यतआह ॥ भयाभावादितीति ॥ भयाभावादित्येतन्नात्मानंगोमुमिच्छती त्यस्योपपादनमित्यन्वयः । ततश्चभयाभावादित्येतदुपपत्तिसमर्पकतयामंत्रेअध्याहाररूपमेव नव्याख्यानरूपमित्युक्तंभवति । ननुमंत्रेनात्मानंगोमुमिच्छतीतिसाध्यमेवनश्रूयते । कस्योपपादनायाध्याहारइत्यतउक्तं ॥ ततोनविजुगुप्सतइत्येतद्व्याख्या

भा० । सर्वगंपरमात्मानंसर्वचपरमात्मनि । यःपश्येत्सभयाभावान्नात्मानंगोमुमिच्छतीतिसौकरायणश्रुतिः ॥ ६ ॥

नस्येति ॥ यद्यप्यत्रनविजुगुप्सतइत्येतद्व्याख्यानस्येत्येववक्तव्यं नतुततइति । तद्व्याख्यानाभावात् । तथापिभयाभावादित्य ध्याहारेनिमित्तसूचनाययथाश्रुतानुवादःकृतः । ततोनविजुगुप्सतइतिविशिष्टानुवादेहि ततःपरमेश्वरस्यसर्वभूताश्रयत्वादिज्ञा नान्नात्मानंगोप्तुमिच्छतीत्यर्थप्रतीत्याअप्रयोजकत्वशंकायांतन्निरसनोचितस्यभयाभावादित्यस्याध्याहारोविज्ञायेत । ततश्चपर मेश्वरस्यसर्वभूताश्रयत्वादिज्ञानाद्भयाभावः । भयाभावान्नात्मगोपनेच्छेतिसुगमःसाध्यसाधनभावः । नचततइत्यस्यव्याख्यानं भयाभावादितीत्येवकिंनोक्तमितिवाच्यं । ज्ञानस्येवभयाभावस्याप्रकृतत्वेनपरामर्शानुपपत्तेरित्याशयात् । यद्वाटीकायांततइत्य तःपर मित्यस्यार्थइत्यनुवर्तते । ततइत्यस्यार्थोभयाभावादितीतियोजना । बुद्ध्याप्रकृतत्वात्परामर्शोपपत्तिरितिभावः । ननुकिं

नात्मानंगोप्तुमिच्छतीत्यस्योपपादनं । अभेदार्थतायांसप्तम्यनुपपत्तिश्च ॥ ६ ॥

बुद्ध्याप्रकृतत्वमंगीकृत्यभयाभावपरामर्शेनेत्यतआह ॥ नात्मानंगोप्तुमिच्छतीत्यस्योपपादनमिति ॥ भयाभावादितीत्यनु वर्तते । भयाभावादित्येतन्नात्मानंगोप्तुमिच्छतीत्यस्योपपादनमुपपादकं । नतुसर्वभूताश्रयत्वेनसर्वभूतगतत्वज्ञानंसाक्षात्तदुपपा दकं । अप्रयोजकत्वात् । अतोबौद्धपरामर्शोयुक्तइतिभावइतिव्याख्येयं । अथवा ततइत्येतत्भयाभावादितीत्यतःपूर्वसंबध्य ते । तथाचततइत्यनूद्यभयाभावादितिव्याख्याय नविजुगुप्सतइत्यादिनातस्योपयोगःकथितोभवतीतिव्याख्येयं । भाष्यमुप लक्षणमित्याशयेनांतरंगानुपपत्तिमप्याह ॥ अभेदार्थतायामिति ॥ यस्त्वितिमंत्रस्थजीवस्यसर्वभूताभेदार्थतायामात्मनीति सर्वभूतेष्वितिचसप्तम्यनुपपत्तिः । तथाआधाराधेयभावप्रतीत्याभूतलघटयोरिवभेदस्यैवप्रतीतेरित्यर्थः । चशब्देनसमाख्याश्रु

तिविरोधंसमुच्चिनोति ॥ भा० ॥ ६ ॥ **ततश्चायंमंत्रार्थः** ॥ यस्त्वधिकारी सर्वाणिभूतानिचेतनाचेतनात्मकान्यात्मन्येवआ त्माधारतयैवानुपश्यतिजानाति सर्वभूतेषुचात्मानं नियामकत्वेनानुपश्यति सःआत्मानंनविजुगुप्सतेगोप्तुंनेच्छति । कुतः । त तःसर्वाश्रयतयासर्वभूतगतत्वज्ञानात् । तथाज्ञानेपिकुतोनगोपनेच्छेत्यतोपिततइत्युक्तं । भयाभावादित्यर्थः । भयकारणेषुस त्ताप्रदत्वेनपरमेश्वरंजानतस्तेषामकिंचित्करत्वेनज्ञानावश्यंभावाद्भयाभावः । ततश्चनात्मनोगोपनेच्छेति ॥ खं० ॥ ६ ॥ एत न्मंत्रार्थेति ॥ अतोनमंत्रप्रतिपाद्यंपृथग्वक्तव्यं । नापिपुनरुक्तिरितिभावः ॥ वक्ष्यतीति ॥ पूर्वोक्तानुवादेनेत्यादिनेतिशेषः ॥

एतन्मंत्रार्थविवरणार्थोयस्मिन्सर्वाणीत्ययंमंत्रइतिवक्ष्यति । तत्र यस्मिन्नात्मनिजीवेसर्वभू तानिसआत्मैवयस्यविजानतःतानिसंवृत्तइत्याद्यन्यथाप्रतीतिनिरासाय मंत्रंव्याख्याति ॥

तत्रेति ॥ उत्तरमंत्रइत्यर्थः । एतस्यान्यथाप्रतीतिनिरासायेत्यनेनान्वयः । यस्मिन्काले यथोक्तआत्मनिवा तान्येवसर्वाणिभू तानि परमार्थदर्शनादात्मैवाभूदात्मैवसंवृत्तः । परमार्थवस्तुविजानतः । तत्रतस्मिन्काले तत्रात्मनिवा कोमोहःकःशोकःशोक श्चमोहश्चकामबीजमजानतोभवति । नत्वात्मैकत्वंशुद्धंगगनोपमंपश्यतइत्यपव्याख्यांकिंचिद्विवरणपूर्वकंसंग्रहेणानुवदति ॥ यस्मिन्नित्यादिना ॥ विजानतस्तानिसंवृत्तइति ॥ परमार्थवस्तुविजानत स्तानिभूतानिसंवृत्तो भूतानिजातःभूताभिन्नइ तियावत् । परेणात्मैवाभूदात्मैवसंवृत्तइत्यत्राभूदित्येतत्प्रतिपदत्वेनसंवृत्तइतिप्रयोगात्संग्रहानुवादेऽत्रसंवृत्तइत्येवानूदितं । तस्य

उप० । यस्मिन्सर्वाणिभूतान्यात्मैवाभूद्विजानतः । तत्रकोमोहःकःशोकएकत्वमनुपश्यतः ॥ ७ ॥

चायमेवार्थइतिज्ञातव्यं । तानिसंवृक्तइतिक्वचित्पाठः । सतुस्वपरमूलकोशादर्शनात्कल्पितोज्ञातव्यः । इत्याद्यन्यथाप्रतीतीत्यादिशब्देन तत्रकोमोहइत्याद्यन्यथाप्रतीतिसंग्रहः । सर्वभूतानीत्यस्याभूदित्यनेनान्वयासंभवात्तदनुवदन्नपेक्षितंपूरयति ॥ सर्वभूतानीति ॥ तत्रेत्यनुवादेनेति ॥ तत्रकोमोहइत्यत्रविद्यमानस्यतत्रेत्यस्यानुवादेनेत्यर्थः । ननुइदानीमपिपरमेश्वरस्य सर्वभूतगतत्वादभूदित्यतीतत्वोक्तिरयुक्तेत्यतो नातीतत्वाभिप्रायेणाभूदित्युक्तं । किंत्वागंतुकत्वशंकानिरासायानादितोवर्तमानत्वाभिप्रायेणेत्याशयेन प्रयोगएककालीनःसर्वकालेनुषज्जते ॥ ददर्शविष्णुरित्यादौनित्यचिद्रूपतोहरेरितिप्रमाणंमनसिनिधायानूयस्मिन्निति ॥ सर्वभूतानि तिष्ठंतीतिशेषः । तत्रेत्यनुवादेनसर्वभूतेष्वितिव्याख्यानं । अभूत् अनादितोवर्तते । विजानतइत्यस्यान्वयसिद्ध्यर्थमेवमित्यध्याहारःकृतः। व्याचष्टे ॥ अभूत्अनादितोवर्ततइति ॥ ननुभाष्येएवमितिनतावच्छ्रौतपदानुवादः श्रुतौतदभावात् । नाप्यध्याहारः तस्यव्यर्थत्वादित्यतो द्वितीयंपक्षमंगीकृत्याध्याहारस्यप्रयोजनमाह ॥ विजानतइत्यस्यान्वयसिद्ध्यर्थमिति ॥ अभूदित्यंतेनपूर्वेणान्वयसिद्ध्यर्थमित्यर्थः । एवंविजानतइत्युक्तेहिपूर्वोक्तस्यज्ञानेप्रकारत्वप्रतीत्याविजानतइत्यस्यपूर्वेणान्वयोघटते । विजानतइत्येवोक्तौयेनकेनापिप्रकारेणेतिप्रतीत्यानपूर्वोक्तेनान्वयसिद्धिः। अतएवोदाहरिष्यमाणसमाख्याश्रुतौ एवंसर्वत्रयोविष्णुंपश्येदित्युक्तमितिभावः । ननुमंत्रे परमात्मनःसर्वभूतगतत्वेनज्ञानं तेष्वेकत्वेनज्ञानंचपृथगेवानूद्यफलमुक्तं। तत्रविजानतइति एकत्व

भा० । यस्मिन्परमात्मनिसर्वभूतानि सपरमात्मैवतत्रसर्वभूतेष्वभूत् । एवंसर्वभूतेष्वेकत्वेनपरमात्मानंविजानतःकोमोहः ।

मनुपश्यतइतेचपृथक्श्रवणात् । भाष्येतु सर्वभूतेष्वेकत्वेनपरमात्मानंविजानतइत्युभयविषयकैकज्ञानानुवादेनफलमुक्तमतोमंत्रभाष्ययोर्विरोधइत्यतोमंत्रानुसारेणभिन्नवाक्यतयाभाष्यंयोजयति ॥ एवंसर्वाधारतयेति ॥ सर्वभूतेषुपरमात्मानमितिसंबंधप्रदर्शनं । तंचेतिशेषकथनमितिज्ञातव्यं । यद्यप्यत्रटीकायांसर्वाधारतयासर्वभूतेष्वित्यादिकमेववक्तव्यं । नत्वेवमिति तस्य योजनानुपयोगात् तथापि सर्वभूतेष्वित्यादिभाष्यमध्याहृतैवंशब्दव्याख्यानरूपमितिज्ञापनायतदुक्त्युपपत्तेः । नचैवमपिटीकायां सर्वाधारतयेत्यधिकं भाष्येतदभावादनावश्यकत्वाच्चेतिवाच्यं । मंत्रे यस्मिन्सर्वाणिभूतानीत्युक्तंसर्वभूताश्रयत्वंसर्वभूतगतत्वेप्रकारप्रदर्शकतयोपयुज्यते । नतुसर्वभूतगतत्वादिकमिवपृथक्ज्ञातव्यतया । तथात्वेतद्वत्पृथग्विजानतइतिवक्तव्यत्वापात्

एवंसर्वाधारतयासर्वभूतेषुपरमात्मानं

तात् । सर्वभूतगतत्वेप्रकारप्रदर्शनंत्वावश्यकमितिप्रागुपपादितमेव । भाष्येतदनुक्तिरपिस्वातंत्र्येणाज्ञेयत्वसूचनायेत्येतावतोर्थस्यज्ञापनायसर्वाधारतयेत्युक्तेरावश्यकत्वात् । यद्वा भाष्येएवमित्यस्यवैयर्थ्यशंकायां यस्मिन्सर्वाणिभूतानीत्युक्तसर्वाधारत्वस्य प्रकारतयाऽनुवादार्थत्वान्नतदितिभावेनैवमित्यनूद्यसर्वाधारतयेतिव्याख्यातं । अस्मिन्पक्षेभाष्ये सर्वभूतगतत्वमिवसर्वभूताधारत्वस्यापिवक्तव्यत्वात्न्यूनतेतिशंकानिरस्ताभवति । एवंशब्देनोक्तिस्तुप्रकारत्वज्ञापनायेतिबोध्यं । ननुतंचैकत्वेनविजानतइतियोज्यमित्युक्तमयुक्तं । मंत्रानुसारेणतंचैकत्वेनानुपश्यतइतिवक्तव्यत्वात् । नचयथाभाष्यमुक्तत्वान्नदोषः । तथासतिभाष्यस्यमंत्रविरोधप्रसंगः । मंत्रेविजानतइत्यस्योभयत्रसंबंधाभिप्रायेणभाष्यप्रवृत्त्यंगीकारेमंत्रेऽनुपश्यतइत्यस्यवैयर्थ्यप्रसंगइत्यतआ

ह ॥ विजानतइति ॥ अत्रयद्यपिविजानतइत्येतन्नविजानतइत्यस्यव्याख्यानं । यथाश्रुतानुवादत्वेनाधिकोक्त्यभावात् । नाप्यनुपश्यतइत्यस्य उभयोःसमानार्थत्वेनविशेषाभावात् । तथापिविजानतइत्यनुवादेनकोमोहइतिसंबंधस्यप्रदर्शितत्वात्तद्व्याख्यानत्वोक्तिर्घटते । नह्यर्थकथनमेवव्याख्यानं । अनुपश्यतइत्यस्यतुनपूर्वमंत्रइवात्रदृशेर्ज्ञानसामान्यार्थत्वं । किंतुसाक्षात्काराथमितिज्ञापनायविजानतइतिव्याख्यानंकृतं । विशेषतोजानतःअपरोक्षज्ञानिनइति ॥ ततश्चेत्थंमंत्रयोजना ॥ यस्मिन्परमा

> विजानतः तंचैकत्वेनविजानतइतियोज्यं । विजानतोनुपश्यतइतिद्वयोर पिव्याख्यानंविजानतइति । अर्थांतरेसंभवतिकुतोयंमंत्रार्थइत्यतःश्रुत्यं तरेणव्याख्यानादितिभावेनाह ॥ यस्मिन्निति ॥ विजानतःएकत्वंचेतिशेषः ।

त्मनिसर्वाणिभूतानितिष्ठंति । सपरमात्मैव तत्र तेषुभूतेष्वभूत् । सर्वभूताधारतयासर्वभूतेष्वनादितोवर्तते । इत्येवंपरमात्मानं विजानतःविशेषतोऽपरोक्षतोजानतः तथासर्वेषुभूतेषुस्थितस्यपरमात्मनःएकत्वंअधिष्ठानभेदप्रयुक्तभेदाभावं ततश्चानुग्राह्यानुग्राहकभावाभावंचानुपश्यतः आपरोक्ष्येणजानतः कोमोहःनकोपि । तदभावेचकःशोकःनकोपीति । एकत्वमनुपश्यतइतिमंत्रानुसारेणापेक्षितंपूरयति ॥ एकत्वेनेति ॥ एकत्वंचेतिशेषइत्यपिपाठः । अध्याहृतस्यान्वयप्रदर्शनायविजानतइत्यनुवादइति ॥ ३४ ॥

भा० । यस्मिन्सर्वाणिभूतानिसआत्मासर्वभूतगः । एवंसर्वत्रयोविष्णुंपश्येत्तस्यविजानतः । कोमोहःकोथवाशोकः

ज्ञेयं । विमतःशोकाद्यभाववान् परमेश्वरज्ञानित्वादितिमंत्राभिप्रेतानुमानेऽप्रयोजकत्वमाशंकते ॥ ननुपरमेश्वरज्ञानेपीति ॥ परमेश्वरज्ञानेनतत्प्राप्तिमनुमाय तयाशोकाद्यभावसाधनान्नदोषइत्याशयेनव्याचष्टे ॥ यतइति ॥ सइत्यस्यव्याख्यानं ज्ञानीति ॥ सुप्तौविष्णुप्राप्तावप्यात्यंतिकशोकाद्यभावाभावाद्व्यभिचारनिरासायश्रुत्युक्तस्यपरीत्यस्यव्याख्यानं सम्यगिति ॥ गमेर्ज्ञानार्थत्वभ्रमनिरासायप्राप्नोतीत्युक्तं । अनियमःसर्वेषामविरोधादित्युक्तन्यायेनज्ञानिनोविष्णुप्राप्तिनियमान्नासिद्धिराशंकनीये

> ननुपरमेश्वरज्ञानेपिकुतःशोकाद्यभावइत्यतआह ॥ सविष्णुमिति ॥ यतोज्ञानीविष्णुंपर्यगात् सम्यक्प्राप्नोत्येव । अतःशोकाद्यभावःतस्ययुक्तइत्यर्थः । अनेनसपर्यगादित्युत्तर मंत्रार्थतात्पर्यमप्युक्तंभवति । एकत्वमित्यस्यपौनरुक्त्यंचान्यथा । अनुवादस्यवैयर्थ्यात् ।

त्याशयेनावधारणप्रयोगइतिज्ञातव्यं ॥ अनेनेति ॥ विष्णुप्राप्तेर्हेतुत्वकथनेनेत्यर्थः ॥ तात्पर्यमिति ॥ ज्ञानिनःशोकाद्यभावे युक्तिकथनेतात्पर्यमित्यर्थः । अन्यथोत्तरार्धस्यपूर्वमंत्रेणसंगत्यभावप्रसंगइतिभावः । नकेवलंशोकाद्यभावेहेतुरुक्तोभवति किंतु तात्पर्यमपीत्यपिशब्दः । भाष्यमुपलक्षणमित्याशयेनापव्याख्यानेआंतरानुपपत्तिमप्याह ॥ एकत्वमिति ॥पौनरुक्त्यमिति॥ सर्वाणिभूतान्यात्मैवेतिविजानतइत्यनेनैक्यज्ञानस्योक्तत्वात्पौनरुक्त्यमित्यर्थः । अन्यथा परोक्तव्याख्याने ॥ वैयर्थ्यादिति ॥ अ

भा० । सविष्णुंपर्यगाद्यतइतिपिप्पलादशाखायां ।

धिकविधाननिषेधयोरन्यतरस्याभावादितिभावः॥एवमिति॥भाष्यकारोक्तरीत्येत्यर्थः। अपिशब्देनव्याख्यानद्वयस्यापिसमबाधकत्वाद्भाष्यकृदुक्तमेवयुक्तमितिनिर्णयोनोपपद्यतइतिसूचयति। ननुभाष्येसाध्यानुक्तेर्न्यूनता नपुनरुक्तिरितितदध्याहारेप्यनन्वयप्रसंगः। तदर्थमतइत्यध्याहारेपिसमग्रस्यपुनरुक्त्यभावहेतुत्व मुतपूर्वोक्तानुवादेनेत्येतावन्मात्रस्य नोभावपि। पूर्वोक्तानुवादेन नपुनरुक्तिरित्येतावतैवसमंजसत्वेनशोकमोहेत्यादेर्व्यर्थत्वादित्यतः आकांक्षाक्रमेणभाष्ययोजयति ॥ पूर्वमंत्रोक्तस्येति ॥ पू

> नन्वेवंमंत्रव्याख्यानेपिपुनरुक्तिःस्यात्। यस्तुसर्वाणिभूतान्यात्मन्येवेत्यस्य यस्मिन्सर्वाणिभूतानीत्यनेनोक्त्वा त्सर्वभूतेषुचात्मानमित्यस्यचात्मैवाभूदित्यनेनोक्त्वात्। अतो नायंमंत्रार्थइत्यतआह ॥ पूर्वेति॥ पूर्वमंत्रोक्तस्यसर्वाधारतयासर्वगतत्वस्यात्रानुवादोतो नपुनरुक्तिरित्यर्थः। नचवाच्यमधिकविधानायानुवादोभवति। नचात्राधिकंकिंचिदिति।

र्वमंत्रोक्तस्य ततोनविजुगुप्सतइत्यंतस्यानुवादेनेत्यर्थभ्रमनिरासाय सर्वाधारतयेत्यादिना पूर्वोक्तशब्दार्थकथनमितिज्ञातव्यं। मंत्रे यस्त्विवत्यादिना सर्वाधारतायाःपृथगुक्तत्वेपि नात्रस्वातंत्र्येणज्ञेयताविवक्षिता। किंतुसर्वभूतेषुचात्मानमित्युक्तसर्वभूतगतत्वेप्रकारतयेतिज्ञापयितुं सर्वाधारतयेत्युक्तं। एवमेवप्रागित्युत्तरवाक्यमपिव्याख्यातव्यं। एतच्चप्रागुपपादितमनुसंधेयं। ननुतर्ह्यवशिष्टंभाष्यंव्यर्थंस्यादित्यतस्तन्निवर्त्यांशंकामुत्थापयति ॥ नचेति ॥ कुतोनवाच्यमित्यतोभाष्येशोकमोहाभावश्चात्रोच्यते

भा०। पूर्वोक्तानुवादेनशोकमोहाभावोपिविजानतश्चात्रोच्यते।

विजानतश्चात्रोच्यतइतिवाक्यद्वयमाश्रित्य तत्राप्याद्यस्यफलाधिक्यप्रदर्शकत्वं द्वितीयस्यसाधनाधिक्यप्रदर्शकत्वंचाश्रित्य पूर्वमंत्रोक्तफलानुवादपूर्वकंफलांतरप्रदर्शकत्वेनाद्यवाक्यंयोजयति ॥ पूर्वमेवंविदइति ॥ यस्त्विवतिमंत्रेसर्वाधारतयासर्वगतत्वविदइत्यर्थः। अधुना पूर्वमंत्रोक्तसाधनानुवादपूर्वकमधिकसाधनप्रदर्शकत्वेनद्वितीयंवाक्यंयोजयति ॥ प्रागिति ॥ यस्त्विवतिमंत्रइत्यर्थः ॥ दर्शनफलमिति ॥ ज्ञानफलमित्यर्थः ॥ अत्रेति ॥ यस्मिन्नितिमंत्रइत्यर्थः। ज्ञानाधिक्यलाभायविशब्दोविशे

> पूर्वमेवंविदोभयाभावःफलत्वेनोक्तः। अत्रपुनःशोकमोहाभावोपि। प्राक्सर्वाधारत्वेनसर्वगतत्वदर्शनफलमुक्तं। अत्रतुविशेषतोजानतइत्येवंफलेज्ञानेचाधिक्यसद्भावादित्यर्थः। उपलक्षणंचैतत्। एकत्वमनुपश्यतइत्याधिक्यंचद्रष्टव्यं। तद्भावतइत्यस्यसर्वगतत्वस्य तद्दूरइत्यादिनापुनरुच्यमानत्वात्पुनरुक्तिदोषइत्याशंकां

षतइतिव्याख्यातः। यद्यपिविजानतःशोकमोहाभावश्चात्रोच्यतइत्येकवाक्यत्वेनापिभाष्ययोजनाघटते नचैवंचशब्दोव्यर्थः। पूर्वमंत्रोक्तभयाभावसमुच्चायकइत्युपपत्तेः। तथाप्युक्तन्यायेनाधिकार्थलाभसंभवेकिमेकवाक्यत्वश्रद्धाजाड्येनेत्याशयात्। एकवाक्यतायांविजानतइत्यस्यातीवोपयोगादर्शनाच्च। नन्वियंपुनरुक्तिस्तद्दूरइतिवाक्यव्याख्यानावसरेपरिहार्या नात्र। असं

गतत्वादित्यतउक्तं ॥ पुनरुक्तिदोषपरिहारप्रसंगादिति ॥ ७ ॥ उत्तरभाष्यंसंगमयितुंसपर्यगादितिमंत्रप्रतिपाद्यंतावदाह ॥ ज्ञानिनइत्यादिना ॥ तत्रचेति ॥ विष्णुप्राप्तौनिमित्तत्वेनोक्तायामित्यर्थः । निमित्तविशेषाभावेपिपरमेश्वरंप्राप्तस्यशोकाद्यभावेराजादीन्प्राप्तस्यापिशोकाद्यभावःस्यात् । ततश्चद्वितीयानुमानेअप्रयोजकत्वमित्याशयेनोक्तं ॥ राजादीनिवेति ॥ इत्य

पुनरुक्तिदोषपरिहारप्रसंगात्परिहरति ॥ अभ्यासश्चेति ॥ श्रुतिःस्वस्यपरमात्मसर्वगतत्वेतात्पर्यद्यो तयितुंतदभ्यस्यतीतिनदोषइत्यर्थः । सर्वगतत्वस्येत्युपलक्षणं । अनेजत्तन्नेजतीत्यभयत्वस्यापिद्रष्टव्यं ॥७॥ ज्ञानिनःशोकाद्यभावेयुक्तित्वेनसपर्यगादितिविष्णुप्राप्तिरुक्ता । तत्रच राजादीनिवपरमेश्वरंप्राप्तस्यापिशोकाद्यभावःकिंनिमित्तइत्यतः शुक्रमित्यादिविशेषणानि । तत्रादेहोक्त्याप्राप्तशंकापरिहाराय कविरित्युत्तरार्धः । तमिमंमंत्रमप्रतीत्यादिपरिहारायपुराणवाक्येनव्याख्याति ॥ तइति ॥ इतियतःशंकाअतस्तन्निरासायेत्यर्थः ॥ तत्रादेहत्वोक्त्येति ॥ शुक्रमित्यादिविशेषणेष्वकायमस्नाविरमितिविशेषणाभ्यामदेहत्वोक्त्येत्यर्थः ॥ प्राप्तशंकेति ॥ यद्यशरीरोविष्णुरित्यादिवक्ष्यमाणरीत्याप्राप्तशंकेत्यर्थः ॥ अप्रतीत्यादीति ॥ आदिपदेनपरोक्तान्यथाप्रतीतेरकायास्नाविरशब्दयोःपौनरुक्त्यस्यचसंग्रहः । ननुबृहद्भाष्ये शुक्रंजीवमादायेत्युक्त्वाशोकेन

भा० । अभ्यासश्चसर्वगतत्वस्यतात्पर्यद्योतनार्थः ॥ ७ ॥

उप० । सपर्यगाच्छुक्रमकायमव्रणमस्नाविरंशुद्धमपापविद्धं । कविर्मनीषीपरिभूःस्वयंभूर्याथातथ्यतोर्थान्व्यदधाच्छाश्वतीभ्यःसमाभ्यः॥८॥

॥ ३६ ॥

रत्यायुक्तत्वाच्छुक्रोजीवउदाहृतइत्युपन्यस्तेप्रमाणेशोकवत्तायाःशुक्रशब्दार्थत्वप्रतीतेः । कथंशोकराहित्यंशुक्रशब्दार्थइत्यतः शुक्रशब्दस्यशोकराहित्येयोगंदर्शयति ॥ शुचमिति ॥ अनेनशुचूशब्देकर्मण्युपपदेरहत्यागइत्यस्माद्वाहुलकेडप्रत्ययेटिलोपेउपपदांत्यस्यकुत्वेशुक्रमितिसिध्यतीत्युक्तंभवति । एतेनशुक्रंरोचिष्मत्दीप्तिमदित्यपव्याख्यानमपहसितंवेदितव्यं । ननुपूर्णशब्दोक्तधर्मिणःप्रवृत्तिनिमित्तत्वाभावात्पूर्णतइत्ययुक्तं । प्रकरणवशाद्भावप्राधान्येपि नित्यशब्दोव्यर्थइत्यतःप्रवृत्तिनिमित्तद्वयं भावप्राधान्यं पंचम्यंतात्तसिंचमनसिनिधायव्याचष्टे ॥ नित्यत्वेति ॥ अव्रणशब्देनोक्तार्थद्वयलाभप्रकारंदर्शयति ॥ व्रणसंचूर्णन

शुक्रमिति ॥ शुचंशोकंरहतित्यजतीतिशुक्रमित्यर्थः । नित्यपूर्णतइति॥नित्यत्वपूर्णत्वाभ्यामित्यर्थः । व्रणसंचूर्णनइत्यतःस्तोकोव्रणःकालेनास्तोकंनित्यं गुणैरस्तोकंपूर्णमिति । पावनत्वात्पाविन्यहेतुत्वात् ।

इत्यतइति ॥ स्तोकोऽल्पः । अनेनाव्रणमक्षतमित्यपव्याख्यानंनिरस्तंभवति । पावनत्वादित्यस्य पवित्रत्वादितिव्याख्याने अपापत्वातिरिक्तपवित्रत्वाभावादपापविद्धमित्यनेनपुनरुक्तिःस्यादित्यतआह ॥ पाविन्यहेतुत्वादिति ॥ अनेनशुद्धंनिर्मलमितिपरोक्तंनिरस्तंभवति ॥ साधारणइति ॥ तथाचाकायंदेहवर्जनादितिव्याख्येयं । ननुसामान्यशब्दस्यविशेषेलक्षणामंगीकृत्यलिंगवर्जनादिति । लक्षणायामुख्यार्थानुपपत्तिपूर्वकत्वादत्रचतदभावादितिभावः । अस्त्यत्रापिमुख्यार्थानुपपत्तिरित्याह ॥

भा० । शुक्रंतच्छोकराहित्यादव्रणंनित्यपूर्णतः । पावनत्वात्सदाशुद्धमकायंलिंगवर्जनात् । स्थूलदेहस्यराहित्यादस्नाविरमुदाहृतं ॥

तथापीति ॥ नन्वकायंस्थूलवर्जनात् । लिंगदेहस्याहित्यादस्नाविरमुदाहृतमित्येवप्रमाणेकिंनोक्तं । पुनरुक्तिपरिहारस्यैवमपि संभवादित्यतआह ॥ स्नावोपलक्षितेति ॥ मांसमज्जादिसप्तधातुविकारस्यस्थूलदेहस्यस्नाविरमात्रत्वानुपपत्तेःस्नावोपलक्षितेत्युक्तं ॥ स्थूलशरीरमेवहिप्रसिद्धमिति ॥ नतुलिंगशरीरं अतोनवैपरीत्येनवक्तुंशक्यमितिभावः । अनेन स्नावाःशिराःयस्मिन्विद्यंतइतिस्नाविरं नस्नाविरंअस्नाविरं । अव्रणमस्नाविरमित्याभ्यांस्थूलशरीरप्रतिषेधइत्यपव्याख्यानंनिराकृतंभवति । ननुयदुक्तंराजादीनिवपरमेश्वरंप्राप्तस्यापिशोकाद्यभावःकिंनिमित्तइत्यतः शुक्रमित्यादिविशेषणानीति । तत्रकिंसर्वेषांविशेषणा

यद्यपिकायशब्दःस्थूलसूक्ष्मशरीरसाधारणस्तथापि अस्नाविरमितिस्थूलशरीराभावस्यपृथगुक्तेरकायंलिंगवर्जनादित्युक्तं । स्नावोपलक्षितधातुमयंस्नाविरं स्थूलशरीरमेवहिप्रसिद्धं । यतोहि ब्रह्मशुद्धंतस्मादपापविद्धं । ततश्चपापमूलस्थूलसूक्ष्मशरीरविधुरं । तथाचदेहनिमित्तशोकादिशून्यं । एवंभूतंचज्ञानीपर्यगात् । सारूप्यादिलक्षणांतद्गतिंगतोभवति ।

नांपरमेश्वरंप्राप्तस्यशोकाद्यभावोपपादकत्वमभिप्रेतमुतैकस्य । नाद्यः । अप्रयोजकत्वेनतदभावात् । नद्वितीयः । अमुकस्येतिनिर्धारणोपायाभावाद्विशेषणांतरवैयर्थ्यप्रसंगाच्चेत्यतःशुक्रमित्यस्यैवोक्तसाध्योपपादकत्वं । शोकादिशून्यपरमेश्वरसारूप्यादिप्राप्तिमतःशोकाद्यभावनियमात् । इतरेषांतुविशेषणानांसाक्षात्परंपरयांशुक्रत्वोपपादकत्वान्नवैयर्थ्यमित्याशयेनहेतुहेतुमद्भावेन विशेषणानियोजयति॥यतोहीति॥एवंभूतंचेति॥ उक्तप्रणाड्याशोकादिशून्यमित्यर्थः । अनेनराजादिवैषम्यमुक्तंभवति । सपर्य

॥ ३७ ॥

गादित्यस्यहेतोः पूर्वमंत्रोक्तशोकाद्यभावेनसाध्येनान्वयमाह॥अतइति ॥ मंत्रेयत्तच्छब्दावध्याहार्याविति॥ज्ञापनायातइत्युक्तं। इदमुक्तंभवति। विमतोज्ञानीशोकादिरहितः। शोकादिरहितब्रह्मप्राप्तिमत्त्वात्। योयद्रहितयत्प्राप्तिमान् सतद्रहितः। यथादारिद्र्यरहितराजादिप्राप्तिमान्दारिद्र्यरहितः। सारूप्यादिलक्षणप्राप्तिविशेषस्यविवक्षितत्वान्नसुप्तेव्यभिचारः। एतदर्थमेवसारूप्यादिलक्षणामित्युक्तं। नचसुप्तेसाध्यस्यापिसत्वान्नव्यभिचारप्रसक्तिरितिवाच्यं । तस्याप्यंतःकरणरूपेणशोकादिमत्त्वात् । नचशोकादिरहितेतिव्यर्थं । विपक्षेव्याघातसूचनार्थत्वात् । शोकरहितब्रह्मसारूप्यंगतः स्वयंचशोकादिमानित्यस्यव्याहतत्वात् । बहिरेवाप्रयोजकत्वपरिहारेब्रह्मप्राप्तिमत्त्वादित्येवहेतुरस्तु । नचब्रह्मणःशोकादिशून्यत्वासिद्धिः । ब्रह्मशोकादिशून्यं स्थूलसूक्ष्मशरीर

अतस्तस्यशोकाद्यभावोयुक्तइतिभावः ।

शून्यत्वात् । व्यतिरेकेणदेवदत्तादिवत् । नचाप्रयोजकता । शोकस्योक्तशरीरद्वयनिमित्तकत्वेनाकारणकार्योत्पत्तिप्रसंगात् । एतदेवाभिप्रेत्योक्तं देहनिमित्तेति ॥ ब्रह्मणोपिस्वरूपदेहवत्त्वेनासिद्धिवारणायस्थूलसूक्ष्मेत्युक्तं । ननुदेहद्वयघटितएकएवहेतुरुतहेतुद्वयं । नाद्यः । स्थूलपदवैयर्थ्यात् । तमोगतेषुव्यभिचारापाताच्च । नद्वितीयः । स्थूलदेहशून्यत्वस्यतमोगतेषुप्रलयकालीनेषुचव्यभिचारित्वात् । सूक्ष्मदेहशून्यत्वस्यतमोगतेष्वनैकांत्यात् । अतएवजडदेहशून्यत्वेतात्पर्यमित्यपिनिरस्तं । प्रलयकालीनेव्यभिचारनिवारणेपितमोगतेतदनिवारणात् । तस्मात्कथमेतदितिचेत्मैवं । शोकादिनिमित्तदेहशून्यत्वस्यहेतुत्वेतात्पर्यात् ।

तमोगतानांस्वरूपदेहस्यविशेषबलेनस्वरूपशोकादिव्यक्तिनिमित्तताया: सिद्धांतेंगीकृतत्वेनतत्रहेतोरभावेनव्यभिचारशंकानवकाशात् । शोकादिनिमित्तलिंगदेहवतिप्रलयकालीनेपिनव्यभिचारः । नचैवमपिदेहपदंव्यर्थं । असिद्धिपरिहारायपक्षेहेतूपपादनार्थत्वात् । यद्वा आनंदाद्यात्मकदेहातिरिक्तदेहशून्यत्वंहेतुरितिनकश्चिद्दोषः । नचस्थूलसूक्ष्मदेहशून्यत्वस्यासिद्धिः । ब्रह्म स्थूलसूक्ष्मदेहशून्यं पापविधुरत्वा द्व्यतिरेकेणास्मदादिवदित्यनुमानेनतत्सिद्धिसंभवात् । अत्रापि विपक्षेअकारणकार्योत्पत्तिप्रसंगएवबाधकोज्ञातव्यः । अतएवपापमूलेतिशरीरविशेषणं । नचसाध्येस्थूलपदंव्यर्थमितिवाच्यं । गुणादिकंगुण्यादिनाभिन्नाभिन्नमित्यादाविवोद्देश्यसिध्यर्थत्वसंभवात् । शोकनिमित्तदेहशून्यत्वस्यसाध्यत्वेतात्पर्यान्नोक्तशंकावकाशःइतिवा । न चात्रापिहेतोरसिद्धिः । ब्रह्मपापविद्धंनभवति जगत्पाविंत्यहेतुत्वादित्यनुमानेनतत्सिद्धेः । अत्रचविपक्षेहेतूच्छेदएवबाधकः । नहिस्वयंपापविद्धस्यजगत्पाविंत्यहेतुत्वंसंभावनार्हमिति । ननुशुक्रमित्यादिविशेषणानीतिपूर्वग्रंथे पूर्वार्धगतानांषण्णांविशेषणानांशोकाद्यभावोपपादकत्वंप्रतिज्ञाय यतोहीतितदुपपादनपरेऽत्रग्रंथे अव्रणमित्यस्यहेतुत्वानुपपादनाद्विरोधः । पूर्वमादिशब्देनतद्व्यतिरिक्तविशेषणविवक्षायामव्रणमित्यस्यमंत्रेवैयर्थ्यापातादितिचेन्मैवं । शुद्धत्वादीनामिवनाव्रणत्वस्यपरंपरयाशोकादिशून्यत्वोपपादकत्वमपितु अव्रणत्वाच्छोकादिशून्यं । नहिस्वरूपतोदेहतश्चानादिनित्यमानंदादिगुणपूर्णब्रह्मशोकादिमद्भवितुमर्हति । विरोधादिति साक्षादेवतदुपपादकत्वमितिज्ञापनायात्राग्रहणोपपत्तेः । इदानींकविरित्याद्युत्तरार्धव्याख्यानरूप मेवंभू

तोपीतिभाष्यंयोजयितुं यदुक्तंप्राक्तत्रादेहत्वोक्त्याप्राप्तशंकापरिहारायकविरित्युत्तरार्धइति तांशंकांतावदर्शयति ॥ यद्यशरीरइत्यादिना ॥ पूर्वार्धेअकायास्नाविरशब्दाभ्यामशरीरत्वस्योक्तत्वादितिभावः । विष्णुर्नाशरीरः स्रष्टृत्वात् । घटस्रष्टृवदिति विवक्षितानुमाने विपक्षेहेतूच्छेदरूपंबाधकमुक्तं ॥ यद्यशरीरइति ॥ यद्वा यदिविष्णुरशरीरःस्यात्तदास्रष्टानस्यादितितर्कएवानेनोक्तः । तत्रकुलालादौव्यतिरेकव्याप्तिंसप्रमाणकमाह ॥ घटादीति ॥ विवर्तवादःपरिणामवादश्चेतिद्विविधोहिमायावादः । तत्राद्यमतानुसारेणदृष्टांतदार्ष्टांतिकयोर्वैषम्यमाशंक्यनिषेधति ॥ नचेति ॥ इयंचशंका मंत्रेयाथातथ्यतइत्येतद्व्यावर्त्यत

यद्यशरीरोविष्णुर्नतर्हितस्यजगत्सर्जनाद्युपपद्यते । घटादिसृष्ट्यादौशरीरान्व
यव्यतिरेकानुविधानदर्शनात् । नचवाच्यं शुक्तिकायामिवरजतं परमात्मनि
जगदारोपितमेव । अतोनशरीरापेक्षेति । बाधाभावेनतत्सत्यत्वनिश्चयात् ।

याकथितेतिद्रष्टव्यं ॥ आरोपितमेवेति ॥ नतुकुलालादिनाघटादिकमिवपरमात्मनाजगत्सृज्यमित्येवशब्दार्थः । अधिष्ठानस्याप्यारोपार्थशरीरसापेक्षत्वेशुक्तिकायाअपितत्स्यादित्याशयेनदृष्टांतोपादानमितिद्रष्टव्यं । कुतोनवाच्यमित्यतःसन्घटः अहं दुःखीत्यादिप्रत्यक्षेण । प्रमाणदृष्टत्वाद्यनुमानेन । विश्वंसत्यमित्याद्यागमेनचजगतःसत्यत्वेनप्रमितत्वादित्याह ॥ तत्सत्यत्वेति ॥ अनेनयाथातथ्यतइत्येतद्व्याख्यातंभवति । ननुतर्हिशुक्तिरजतादिसत्तापिप्रत्यक्षेणसिध्येदविशेषादित्यतोबाधकभावाभावाभ्यांविशेषादित्याशयेनोक्तं बाधाभावेनेति ॥ ननुसृष्ट्यादिसमयेपरमेश्वरस्यादेहत्वं । येनसृष्ट्याद्यनुपपत्तिः । किंतुसमयां

तरे । अतोनादेहत्वोक्तिविरोधोपीत्याशंक्यनिषेधति ॥ नचेति ॥ इयंचशंकामंत्रेशाश्वतीभ्यःसमाभ्यइत्येतद्यावर्त्यतयोक्तेति ज्ञातव्यं । कुतोनेत्यतःप्रवृत्तस्यशाश्वतीभ्यःसमाभ्यइत्यस्यतात्पर्यमाह ॥ जगदिति ॥ अनाद्यनंतंजगदेतदीदृक्प्रवर्ततेनात्रवि चार्यमस्तीत्यादिप्रमाणेनप्रमितत्वादित्यर्थः । अत्रप्रमितत्वादित्युक्त्या पूर्वत्रनिश्चयादित्युक्त्याचमंत्रेविशेषणद्वयस्यासिद्धिःपरि हृता । अतएवैतत्पदद्वयव्याख्यानरूपे ससत्यंजगदेतादृगितिप्रमाणे एतादृगित्यनेनसत्यत्वानाद्यनंतत्वयोःप्रमितत्वमुक्तमिति

नचादेहत्वस्यजगत्सृष्ट्यादेश्चकालभेदेनव्यवस्था । जगत्सृष्ट्यादिप्रवाहस्यानाद्यं
ततयाप्रमितत्वात्। अतः सत्यानाद्यनंतकालीनजगदुत्पत्त्यादिकारणंस्यविष्णोःक
थमशरीरत्वमित्याशंकापरिहारायोक्तस्यकविरित्यादेर्व्याख्यानं। एवंभूतोशरीरोपिसपुरुषोत्तमः सत्यंप्रवाहतोनित्यमपिजगत्ससृजइतिसंबंधः ॥

ज्ञातव्यं । एवंभूतोपीत्येतत् शुक्रत्वादिविशिष्टोपीतिप्रतीतिनिरासायाकायमस्नाविरमितिपदद्वयोक्ताशरीरत्वपरामर्शकतयानू द्यव्याकुर्वन्नशरीरत्वस्यकवित्वेनविरोधस्यानाशंकना देवंभूतोपिकविरितिशब्दितइत्यसंगतमित्यतःससृजइत्यनेनसंबंधान्नासंग तिरितिभावेनव्यवहितानांपदानामन्वयंचदर्शयति ॥ एवंभूतोशरीरोपीत्यादि ॥ एतादृगित्यस्यवैयर्थ्यमाशंक्यप्रमाणसूच

भा० । एवंभूतोपिसार्वज्ञात्कविरित्येवशब्द्यते । ब्रह्मादिसर्वमनसांप्रकृतेर्मनसोपिच । ईशितृत्वान्मनीषीसपरिभूःसर्वतोवरः । सदाऽन न्याश्रयत्वाच्चस्वयंभूःपरिकीर्तितः ।

कत्वान्नतदित्याशयेनव्याचष्टे ॥ सत्यत्वादिनेति ॥ आदिपदेनप्रवाहतोनित्यत्वस्यग्रहणं ॥ अत्रनित्यमेवेत्येवशब्दस्यएतादृ गेवेतिसंबंधोभिप्रेतः । नतुयथाश्रुतः । सत्यमित्यनेनविरोधापातात् । अतएवैवंभूतोपीत्यपिशब्दस्यावृत्तिमाश्रित्य नित्यमपीति पूर्वमुक्तं । अन्यथानित्यमेवेत्यवक्ष्यत् । तथाच यथालोकेअयंघटइत्युक्त्वापुनर्घटोभवत्येवेत्युक्त्याप्रमितत्वंप्रतीयते तथेहापि जगत्सत्यंप्रवाहतोनित्यमपीत्युक्त्वापुनरेतादृगेवेत्युक्त्याप्रमितत्वंलभ्यतइतिभावः । परमेश्वरस्यादेहत्वेप्राप्तशंकायास्तत्परिहार स्यचसृष्ट्यादिसर्वविषयत्वात्ससृजेइतिसृष्टिमात्रोक्तिरयुक्तेत्यतआह ॥ ससृजइत्युपलक्षणमिति ॥ स्थित्यादीनामुपलक्षणमि

एतादृगिति ॥ सत्यत्वादिनाप्रमितमित्यर्थः । ससृजइत्युपलक्षणं । प्रवाहतो
नित्यत्वेपिपूर्वोत्तराणांजगतांवैचित्र्यंसंभवति । तन्नास्तीतिस्वरूपकथनं ।
अनादीति ॥ नियमेनप्रवाहैकप्रकारतइतिप्रवाहिणामेकप्रकारत्वमभिप्रैति ।

त्यर्थः । अनेनमंत्रेव्यदधादित्युपलक्षणमित्युक्तंभवति । नन्वनादीत्यादिनापूर्वोत्तरजगतांवैचित्र्याभावोक्तिर्नप्रकृतसंगता । अ देहत्वस्यजगत्सृष्ट्यादेश्चकालभेदेनव्यवस्थाशंकायाःजगत्प्रवाहेनित्यत्वोक्तिमात्रेणपरिहारसंभवादित्यत उक्तशंकापरिहारानुपयो गेपि वस्तुस्थितिकथनरूपत्वान्नदोषइत्याह ॥ प्रवाहतइति ॥ ननुजगतोनेकप्रकारत्वशंकायां प्रवाहस्यैकप्रकारत्वकथनमसंग तमित्यतः प्रवाहशब्दस्यप्रवाहिषुलक्षणामभिप्रेत्याह ॥ नियमेनेति ॥ नियमेनेत्यस्योत्तरशेषत्वभ्रमनिरासायात्रसंबंधोदर्शितः।

भा० । ससत्यंजगदेतादृङ्नित्यमेवप्रवाहतः । अनाद्यनंतकालेषुप्रवाहैकप्रकारतः। नियमेनैवससृजेभगवान्पुरुषोत्तमः ।

ननूक्तशंकापरिहारस्यनियमेनप्रवाहैकप्रकारतइत्येतावतैवसिद्धेरनाद्यनंतकालेष्वितिव्यर्थमित्यतोमंत्रगतपंचम्याः सप्तमीत्वेनविपरिणामज्ञापनार्थत्वान्नतदित्याशयेनाह ॥ तदनेनेति ॥ तच्चतदिदंचतदिदं तेन । अनाद्यनंतकालेष्वित्यनेनेत्यर्थः । इतीत्यतः परं पंचम्यंतमितिशेषः । पंचम्याःसप्तम्यर्थत्वेनलब्धंयाथातथ्यतइत्यादिमंत्रवाक्यार्थमन्वयप्रदर्शनपूर्वकमाह ॥ अनाद्यनंतेति ॥ याथातथ्यतइत्यस्ययाथार्थ्येनेतिव्याख्यानेननृतीयांतात्तसिरित्युक्तंभवति । वर्तमानानपीतिमंत्रेअध्याहारः । अशरीरस्याप्यारोपाधिष्ठानत्वेनस्रष्टृत्वमुपपद्यतइत्यन्यथासिद्धिशंकायाःयाथार्थ्येनवर्तमानानित्यनेननिरासादशरीरत्व यथार्थस्रष्टृत्वयो

तदनेनशाश्वतीभ्यःसमाभ्यइतिसप्तम्यर्थेव्याख्यातंभवति ॥ अनाद्यनंत
संवत्सरेषुयाथार्थ्येनवर्तमानानपीत्यर्थः । अशरीरस्यजगत्सृष्ट्यादिनिर्वा
हार्थमाह ॥ सार्वज्ञादिति ॥ एवाद्येवैवाहीतिवत् कविरित्येवकविरित्येवं

र्विरोधस्फोरणायापीत्युक्तं । एतस्यार्थान्महदादीन्व्यदधादुत्पादयामासेतिमंत्रेणान्वयः । अनेनयाथातथ्यतः । यथातथाभावो याथातथ्यं । यथाभूतकर्मफलसाधनतः अर्थान्कर्तव्यपदार्थान् व्यदधात् । यथानुरूपंविभजन्शाश्वतीभ्योनित्याभ्यःसमाभ्यःसंवत्सरेभ्यःप्रजापतिभ्यःइत्यपव्याख्यानमपहस्तितंवेदितव्यं । ननुशुक्रमित्यादिशब्दवाच्यत्वस्याप्युक्तत्वेन कविरित्येवशब्दइत्यवधारणार्थकैवशब्दानुपपत्तिरित्यतोनायमेवशब्दःकिंतुबिंदुलोपेनैवंशब्दः । एवशब्दत्वेपिवा अव्ययानामनेकार्थत्वेनएवंशब्दार्थभूतप्रकारार्थकएवनावधारणार्थकोऽतोनोक्तदोषइत्याशयेनानूद्यव्याचष्टे ॥ कविरित्येवकविरित्येवमिति ॥

इदंचव्याख्यानंभाष्यकृत्संमतमित्याशयेनोक्तमेवाद्येवैवाहीतिवदिति।भगवत्पादैःकर्मनिर्णयेविदामघवन्नितिखंडव्याख्यानावसरे एतद्वाक्यस्य एवंहिएवमेवहीतिव्याख्यातत्वेन तद्वदिहापिव्याख्यायतइत्यर्थः। कर्मनिर्णये एवहीत्यस्यैवंहीतिव्याख्यानं।एवैवहीत्यस्यैवमेवहीतिव्याख्यानं। दैर्घ्यंतुसांहितमितिज्ञातव्यं। यद्यप्येवाहीतिवदित्येतावतैवप्रकृतनिर्वाहात्तावदेवोदाहर्तव्यं । तथापि स्पष्टत्वार्थमधिकोदाहरणंकृतमित्यवधेयं। नचात्रेतिशब्देनैवप्रकारसमर्पणादेवंशब्दोव्यर्थइतिवाच्यं। अथवेत्यादिव दित्येवमितिनिपातसमुदायत्वांगीकारेणतदनवकाशात्। नचसार्वज्ञादेवकविरितिशब्द्यतइतिभिन्नक्रमेणैवशब्दसंबंधसंभवात्किमेवंव्याख्यानेने

परिभवविसर्वंवशीकरोतीतिपरिभूःसर्वतोवरः । स्वयमेव परमनपेक्ष्यभवतीतिस्वयंभूः । सदानन्या
श्रयः । चशब्दौविशेषणसमुच्चयार्थौ । ननुशरीराधीनत्वात्सर्जनादेःकथंसार्वज्ञादिनाघटतइत्यतआह

तिवाच्यं । परेणापि कविःसर्वद्दगितिव्याख्यातत्वेनापव्याख्याननिरासादिप्रयोजनाभावेनतथासंबंधस्यव्यर्थत्वादित्याशयात् । तात्पर्यार्थपरंभाष्यमित्यभिप्रेत्याक्षरार्थंदर्शयति॥ परिभवतीति॥ स्वयंभूःशब्देन सदानन्याश्रयत्वलाभप्रकारंदर्शति ॥ स्वयमेवेति॥ ननुस्वयंभूशब्दवाच्यत्वेनिमित्तांतरानुक्त्या समुच्चेतव्याभावादनन्याश्रयत्वाच्चेतिचशब्दानुपपत्तिः। प्रकृत्यामनसोपिचेत्यत्रापिशब्देनैवब्रह्मादिमनःसमुच्चयसिद्धेश्चशब्दोव्यर्थइत्यतआह ॥ चशब्दौविशेषणसमुच्चयार्थाविति॥ स्वयंभूश्चमनीषी चेतिविशेषणसमुच्चायकावेवचशब्दौनतुयथाश्रुतसंबंधेननिमित्तसर्वमनःसमुच्चायकौ येनोक्तदोषःस्यादितिभावः । ननुपरमेश्वर

स्यसदेहत्वेअकायत्वोक्तिविरोधइत्यतोव्यवस्थयातंपरिहरति ॥ जडशरीरेति ॥ देहवत्त्वस्यस्रष्टृत्वेहेतुत्वलाभाययत्तच्छब्दाव
ध्याहृत्ययोजयति ॥ यतएवंभूतइति ॥ ज्ञानाद्यात्मकदेहवानित्यर्थः । ननुविग्रहवत्त्वांगीकारेततएवसर्जनाद्युपपत्तेःकविरित्या
दिनासार्वज्ञादिवर्णनंव्यर्थमित्यतआह ॥ सज्ज्ञानाद्यात्मकेति ॥ अत्रसच्छब्देनपारतंत्र्यादिदोषराहित्यस्यविवक्षितत्वादन्ये
षामविद्यमानमितिघटते । व्यदधात्निर्मितवान् निर्माणशक्तिप्रदर्शनार्थंकविरित्यादीति विष्णुतत्वनिर्णयटीकायामपिकवित्वा

॥सज्ज्ञानेति ॥ जडशरीराभावेपि सज्ज्ञानाद्यात्मकशीर्षादिमान्भवति ।
यतएवंभूतस्तस्माज्जगत्ससर्जेतियोजना । सज्ज्ञानाद्यात्मकविग्रहवत्त्वम
न्येषामविद्यमानं तस्योपपादयितुंसार्वज्ञादिमाहात्म्यमुक्तमितिभावः ।

दीनांसज्ज्ञानात्मकविग्रहत्वोपपादकत्वेनैवनिर्माणशक्तिप्रदर्शकत्वंविवक्षितं नतुसाक्षात् । अतोनविरोधः । यद्वाविग्रहवतोपिप
रमेश्वरस्यकुलालादिवन्नानंतजगन्निर्मातृत्वंयुक्तं । तदुपयुक्तसार्वज्ञाद्यभावादितिशंकापरिहारायकवित्वादीनांनिर्माणशक्तिप्रदर्श
कत्वंतत्रोक्तं । अत्रतुप्रकारांतरेणतेषामुपयोगउक्तइतिनकोपिविरोधइतिज्ञातव्यं । सविष्णुंपर्यगाद्यतइतिप्रमाणशेषेण उत्तरमं
त्रस्यसंगतिसूचनपूर्वकं सपर्यगादित्येतज्ज्ञानिविषयतयाव्याख्यातं । तेनपरोक्तसंगतिव्याख्यानयोरयुक्तत्वंसूचितमितिभावेन

भा० । सज्ज्ञानानंदशीर्षोसौसज्ज्ञानानंदबाहुकः । सज्ज्ञानानंददेहश्चसज्ज्ञानानंदपादवान् । एवंभूतोमहाविष्णुर्यथार्थंजगदीदृशं । अना
द्यनंतकालीनंससर्जात्मेच्छयाप्रभुरितिवाराहे ॥ ८ ॥

ससंगतिकंतव्याख्यानंदूषयितुमनुवदति ॥ अपरेत्विति ॥ अयंमंत्रइति ॥ सपर्यगादित्यादिकोमंत्रइत्यर्थः ॥ एतदपीति ॥
नकेवलंशुक्रमित्यादिकमित्यपेरर्थः । तदेवव्याख्यानंदर्शयति ॥ सआत्मेति ॥ शुक्रमित्यादिकमस्मद्रीत्याद्वितीयांतमभ्युपे
यते । आद्यंनिराचष्टे ॥ शुक्रमित्यादेरिति ॥ अन्वयाभावेति ॥ विशेष्यभूतात्मवाचिसइतिप्रथमांतेनान्वयाभावप्रसंगादि
त्यर्थः । द्वितीयमाशंक्यनिराकरोति ॥ नचैतदिति ॥ कुतोनेत्यतआह ॥ लिंगेति ॥ शुक्रमित्यादेर्विशेषणस्यप्रथमांतत्वे न
पुंसकत्वावश्यंभावात्सइतिविशेष्यस्यचपुल्लिंगत्वाल्लिंगव्यत्ययेनविशेषणविशेष्यभावानुपपत्तिरित्यर्थः । नचघटोद्रव्यमित्यादिव

अपरेतु योयमतीतैर्मंत्रैरुक्तआत्मासखेनरूपेणकिंलक्षणकइत्यपेक्षायामयंमं
त्रइत्युक्त्वा सपर्यगादित्येतदप्यात्मविषयंव्याकुर्वते । सआत्मापर्यगाद्व्यासो
भूदिति । तत्त्वसत् । शुक्रमित्यादेर्द्वितीयांतस्यान्वयाभावप्रसंगात् । नचैतत्प्र
थमांतमात्मनएवविशेषणं लिंगव्यत्ययात् । विपरिणामस्त्वगतिकागतिः ।

दुपपत्तिः। तत्रनियतलिंगत्वात्। अत्रशुक्रमित्यादीनामनियतलिंगत्वात् । अनियतलिंगानांविशेषणानांविशेष्यनिघ्नत्वावश्यंभावा
दितिभावः। ननुनलिंगव्यत्ययः। शुक्रमित्यादीनामपिपुल्लिंगत्वेनविपरिणामांगीकारात् । यथोक्तंपरेण । शुक्रमित्यादीनिवचांसि
पुल्लिंगत्वेनविपरिणेयानि । सपर्यगादित्युपक्रम्यकविमनीषीत्यादिनापुल्लिंगत्वेनोपसंहारादितीत्यतआह ॥विपरिणामस्त्विति ॥
अगतिकागतिः । गत्यंतररहितागमनिकेत्यर्थः । अस्मदुक्तरीत्याशुक्रमित्यादिद्वितीयांतानां सपर्यगादित्युक्तप्राप्तिकर्मत्वेन

कविरित्यादिप्रथमांतानां व्यदधादित्युक्तसृष्ट्यादिकर्तृत्वेन यथाश्रुतान्वयसंभवे विपरिणामांगीकारोऽनुचितइतिभावः । स्वयं भूरित्यस्यापव्याख्यानंनिराकरोति ॥ स्वयमेवेति ॥ विरुद्धमिति ॥ मनीषीमनसईशिता परिभूःसर्वेषामुपर्युपरिभवतीतिपर व्याख्यानानुसारेण भाष्यकृद्व्याख्यानानुसारेणवा सर्वभेदस्यैवप्राप्तासर्वात्मकत्वंविरुद्धमित्यर्थः । एवंसपर्यगादित्येतद्व्याख्या नंनिराकृत्य मंत्रस्यपरोक्तांसंगतिमपिनिराकरोति ॥ नचेति ॥ नापीत्यर्थः ॥ एवंविधमिति ॥ कविरित्याद्युक्तसार्वज्ञादिवि शिष्टमित्यर्थः । तेषांनिर्विशेषत्ववादिनामितिहेतुगर्भविशेषणं । ततश्चास्यमंत्रस्यनिष्कृष्टात्मप्रतिपादकत्वाभावाद्योयमतीतैर्मंत्रै रित्युक्तसंगत्यनुपपत्तिरितिभावः । यद्वास्वयमेवसर्वंभवतीतिव्याख्यानेदोषांतरमाह ॥ नचेति ॥ एवंविधं चेतनाचेतनसर्व

स्वयमेवसर्वंभवतीतिस्वयंभूरितिचमनीषीपरिभूरित्यनेन

विरुद्धं । नचैवंविधमात्मनोनिष्कृष्टंरूपंतेषामिति ॥ ८ ॥

जगदात्मकं । तथाच निष्कृष्टात्मस्वरूपप्रतिपादनायप्रवृत्तेऽत्रमंत्रेऽतथाभूतसर्वात्मकत्वप्रतिपादनमसंगतमितिभावः । भा० ॥ ८ ॥ ततश्चायंमंत्रार्थः ॥ पूर्वमंत्रेज्ञानिनःशोकाद्यभावउक्तः तत्रहेत्वाकांक्षायामाह ॥ सपर्यगादिति ॥ यतोज्ञानीपरमे श्वरप्रसादात्विष्णुंपर्यगात् सम्यक्प्राप्नोत्येव परमेश्वरसारूप्यलक्षणांगतिंगतोभवतीतियावत् । अतःशोकाद्यभावोयुक्तः । परमेश्वरसारूप्येपिकुतस्तदभावः । राजादिसारूप्यवतस्तदभावादित्यतउक्तं ॥ शुक्रमिति ॥ शुचंशोकंरहतित्यजतीतिशुक्रं । शोकादिरहितब्रह्मसारूप्यंगतस्यशोकाद्यभावोयुक्तइतिभावः । ब्रह्मणःशोकादिराहित्यमेवकुतः । यतोऽकायं । शोकहेतुलिंग

देहवर्जितं । तथाअस्नाविरं स्नावोपलक्षितसप्तधातुमयस्थूलशरीरवर्जितं । अकायत्वादिकमपिकुतः । यतोअपापविद्धं देहारं भकपापशून्यं । तदपिकुतः । यतःशुद्धं जगत्पावित्र्यनिमित्तं । नह्येवंभूतेपापंसंभावनार्हं । किंचयतोअव्रणं । नित्यत्वेसत्यानंदा दिगुणपूर्णं । अतोपिशुक्रं । ननुब्रह्मणोदेहशून्यत्वेश्रुत्यादिसिद्धसर्वजगत्सर्जनादिविरोधः । तस्यदेहसापेक्षतायाःघटादौदृष्ट त्वादित्यतःकविरित्याद्युत्तरार्धः । तत्रादौसज्ज्ञानानंददेहवानित्युपस्कर्तव्यं । यतःसज्ज्ञानानंददेहवान् अतोऽर्थान्महदादीन् व्यदधात्उत्पादयामास । स्थित्याद्युपलक्षणमेतत् । ननुजगदारोपाधिष्ठानत्वरूपजगत्स्रष्टृत्वस्यशरीरानपेक्षत्वात्किंतदंगीकारे णेत्यतोर्थान्विशिनष्टि ॥ याथातथ्यतइति ॥ तृतीयांतात्तसिः वर्तमानानितिशेषः । अबाधितप्रत्यक्षादिसिद्धतयायाथार्थ्येन

अंधंतमःप्रविशंतीत्यादिमंत्रानप्रतीत्यन्यथाप्रतीतिनिरासायस्मृत्यैवव्याचष्टे ॥ अन्यथोपासकाइति ॥

वर्तमानानित्यर्थः । नचादेहत्वस्यजगत्सृष्ट्यादेश्चकालभेदेनव्यवस्था । जगत्सृष्ट्यादिप्रवाहस्यानाद्यनंततयाप्रमितत्वात् । तदेत दुक्तं ॥ शाश्वतीभ्यःसमाभ्यइति ॥ पंचमीसप्तम्यर्थे । अनाद्यनंतवत्सरेषुव्यदधात् । सज्ज्ञानाद्यात्मकदेहवत्त्वमन्येषामवि द्यमानंपरमेश्वरस्योपपादयितुंसार्वज्ञादिमाहात्म्यमुक्तंकविरित्यादिविशेषणैः । कविःसर्वज्ञः । मनीषीरमाब्रह्मादिमनसामीशिता परिभवतिसर्ववशीकरोतीतिपरिभूः सर्वतोवरः । स्वयमेवपरमनपेक्ष्यभवतीतिस्वयंभूः सदानन्याश्रयइति ॥ खं० ॥ ८ ॥ इत्यादिमंत्रानिति ॥ आदिपदेनसंभूत्यामृतमश्नुतइत्यंतामंत्राःग्राह्याः ॥ अन्यथोपासकाइतीति ॥ एतच्चमंत्रषट्कव्या

उप० । अंधंतमःप्रविशन्तियेऽविद्यामुपासते । ततोभूयइवतेतमोयउविद्यायांरताः ॥ ९ ॥

ख्यानरूपकौर्मइत्यंतस्मृतिप्रतीकग्रहणमितिमंतव्यं । ननुमंत्राएवव्यर्थास्ततस्तद्व्याख्यानपरंभाष्यंसुतरामनर्थकमित्यतस्त्रिकद्वये आद्यत्रिकस्यतावत्ससंगतिकंप्रतिपाद्यमाह ॥ यथावदित्यादि ॥ मोक्षसाधनमित्युक्तमिति ॥ ततोनविजुगुप्सते तत्रको मोहःकःशोकइतिभयशोकाद्यभावसाधनत्वोक्त्या तद्रूपमोक्षसाधनत्वमुक्तमित्यर्थः ॥ नकेवलंतदिति ॥ मोक्षसाधनमित्यनुवर्तते । केवलमसहायं तत्परमात्मज्ञानं मोक्षसाधनंनेत्यर्थः ॥ तत्रतावदिति ॥ तत्र आद्यमंत्रत्रयेप्याद्येनमंत्रेणताव दन्य

> यथावत्परमात्मज्ञानंमोक्षसाधनमित्युक्तं । नकेवलंतत् । किंनामान्यथाज्ञाननिंदासमुचित मेवेत्येतदर्थप्रतिपादकमाद्यमंत्रत्रयं । तत्रतावद्यथावज्ज्ञानस्येवान्यथाज्ञाननिंदायाअप्या वश्यकत्वोपपादनायान्यथाज्ञानस्योक्तमसुर्यलोकसाधनत्वमनूद्यान्यथाज्ञानानिंदनस्यततो धिकानर्थसाधनत्वमाद्येनमंत्रेणोच्यते । तस्यार्थोऽन्यथेति ॥ उपासकाः विष्णोरितिशेषः ।

थाज्ञानाऽनिंदनस्यततोन्यथाज्ञानादधिकानर्थसाधनत्वमुच्यतइत्यन्वयः । तर्हिपूर्वार्धस्यवैयर्थ्यं । नचान्यथाज्ञानस्यानर्थसाधनत्वंवक्तुंतदितिवाच्यं । तस्यासुर्यानामेतिमंत्रेणोक्तत्वेनपुनरुक्तिप्रसंगादित्यत उक्तानुवादरूपत्वान्नदोषइत्याशयेनोक्त मन्यथाज्ञानस्योक्तमसुर्यलोकसाधनत्वमनूद्येति ॥ अनूद्येत्यतःपूर्वं पूर्वार्धेनेतिशेषः । ननुअनुवादोपिव्यर्थः । अधिकविधानाद्यभावादित्यतउक्तं । यथावज्ज्ञानस्येवान्यथाज्ञाननिंदायाअप्यावश्यकत्वोपपादनायेति ॥ उपासनाकर्मानुक्तेराह ॥ विष्णोरितिशेष

भा० । अन्यथोपासकायेतुतमोंधंयांत्यसंशयम् ।

इति ॥ अनुपपत्तिस्फोरणायवा अध्याहृतस्यसंबंधज्ञापनायवा उपासकाइत्यनुवादः । ननुयेऽविद्यामुपासते यतस्तद्वेदेतिमंत्रे अन्यथोपासकायेतु येविदुःसहसज्जनाइतिभाष्येच ज्ञानोपासनयोर्व्यामिश्रोक्तिरयुक्ता । अनिर्णयप्रसंगादित्यतआह ॥ सर्वत्रेति ॥ मंत्रेभाष्येचेत्यर्थः ॥ उपासनापर्यंतत्वादिति ॥ सामान्यशब्दस्यविशेषेलक्षणेतिभावः । यद्यप्युपासनाशब्दस्यज्ञानपरत्वेनांगीकारेणापिव्यामिश्रोक्तिघटनासंभवति । तथापि तमःप्राप्तिरूपानर्थस्य मृत्यूत्तारणादिरूपमोक्षस्यचोपासनाफलत्वेपि ज्ञानमात्रफलत्वाभावादेवमेवघटनाकृतेतिद्रष्टव्यं । भाष्यमंत्रयोर्व्याख्यानव्याख्येयभावंघटयति ॥ तत्रेति ॥ आद्यमंत्रइत्य

> सर्वत्रज्ञानशब्दस्योपासनापर्यंतत्वाद्व्यामिश्रोक्तिः । तत्राविद्यापदंविषयि वाचकंविषयस्यान्यथाकारस्यलक्षकमित्यभिप्रेत्याविद्यामुपासतइत्येतदन्य थोपासकाइतिव्याख्यातं । ततोऽन्यथाज्ञानिप्राप्यात्तमसोऽधिकमिव ।

र्थः ॥ विषयिवाचकमिति ॥ विद्याविरुद्धमिथ्याज्ञानवाचकमित्यर्थः । विषयविषयिभावरूपशक्यसंबंधसूचनायविषयिवाचकमिति विषयस्येतिचोक्तं । मिथ्याज्ञानरूपाविद्यायाउपास्यत्वाभावान्मुख्यार्थानुपपत्तिर्द्रष्टव्या । ननुततइत्यनेनतमसःपरामर्शः क्रियते उतान्यथोपासकानां । नाद्यः । स्वतःस्वस्याधिक्यस्यबाधितत्वात् । नद्वितीयः । विजातीयत्वेनाधिक्यासंभवादित्यतो न्यथोपासकास्तमोयांतीतिवाक्यंतात्पर्यार्थपरामर्शान्नकश्चिद्दोषइत्याशयेनाह ॥ ततइति ॥ ननुमंत्रव्याख्यानरूपेप्रमाणे व्य

भा० । ततोधिकमिवव्यक्तंयांति

क्तमितिकिंमंत्रपदानुवादः उतव्याख्यानं । नाद्यः । मंत्रेतत्पदाभावात् । नद्वितीयः । व्याख्येयपदाभावादित्यतोद्वितीयपक्ष मंगीकृत्याह ॥ इवार्थमाहेति ॥ अनेनभाष्येअधिकमिवेतिमंत्रगतेवशब्दानुवादेन व्यक्तमितितद्व्याख्यानंकृतमित्युक्तंभवति । ननुइवशब्दस्यव्यक्तत्वार्थत्वे भूयइवेत्यस्यव्यक्तमधिकंसम्यगधिकमित्यर्थःसंपद्यते । प्रकारांतराभावात् । तथाचान्यथोपासका येस्यतेयांतिह्यधरंतमः ॥ ततःकिंचिद्विशेषेणदुर्ज्ञानस्याविनिंदकाइ त्येतन्मंत्रव्याख्यानरूपबृहद्भाष्यविरोधः । तत्रकिंचिदित्य नेनेवशब्दस्याल्पार्थतयाव्याख्यानेनाल्पाधिकतमःप्राप्तेःफलत्वेनोक्तत्वात् । नचतत्रकिंचिदिति नेवशब्दस्यव्याख्यानमितिवा च्यं । उन्मूलत्वापातात् । इवशब्दस्यव्याख्यानाभावप्रसंगाच्च । उपमार्थेतथाल्पत्वेपीवशब्दःप्रयुज्यतेइतितत्रैवपूर्वोक्तप्रमाण

इवार्थमाह ॥ व्यक्तमिति ॥

प्राप्ताल्पत्वार्थतायाहातुमशक्यत्वाच्च । किंचिदित्यस्येवशब्दार्थत्वाभावेपि विरोधापरिहाराच्चेतिचेन्मैवं । अत्राप्यधिकमित्यस्य किंचिदधिकमित्येवार्थोभिप्रेतः । व्यक्तत्वार्थकेवशब्दस्यतुअन्यथोपासकास्ततोल्पमधिकंतमोयांतीतिव्यक्तंप्रमितमितिभिन्नक्रमे णसंबंधस्यविवक्षितत्वेनविरोधाभावात् । इयांस्तुविशेषः । अत्रभूयइत्यस्यैवकिंचिदाधिक्यार्थकत्वमंगीकृत्येवशब्दोव्यक्तत्वार्थ तयाव्याख्यातः । तत्रेवशब्दःकिंचिदित्यर्थकत्वेनेति । नन्वन्यथाज्ञानिप्राप्यतमसःसकाशात् तदनिंदकानामधिकतमःप्राप्तिर्भ वतीत्युक्तंतदयुक्तं । अन्यथाज्ञानानिंदनस्योभयोरपिसमत्वेनाधिकतमःप्रापकाभावात् । अंगीकृत्यचैतदुक्तं । वस्तुतस्तु अन्य

थाज्ञानानिंदकस्यविद्यारतत्वेनान्यथोपासकापेक्षयासमीचीनत्वेनानिंदनप्रयुक्ताल्पतमःप्राप्तेरेववक्तुमुचितत्वादितिचेत् । अस्त्य त्रविवेकः । नतावदन्यथोपासकापेक्षया तदनिंदकस्यविद्यारतत्वप्रयुक्तंसमीचीनत्वं । अनिंदनदोषदूषितस्यविद्यारतत्वस्यभर्जि तबीजवदकिंचित्करत्वेनसामीचीन्यानापादकत्वात् । नाप्यन्यथाज्ञानानिंदकत्वेनोभयोःसाम्यं । अन्यथोपासकस्यसम्यगाचा र्योपदेशाभावेनान्यथाज्ञानानिंदनस्यकर्तव्यत्वेनाप्राप्ततया तत्त्यागिनोऽप्राप्तत्यागित्वात् । विद्यारतस्यतु सम्यगाचार्योपदेशाव श्यंभावेन ततएवब्रह्मनिर्गुणत्वादिनिंदनस्यकर्तव्यत्वेनप्राप्तस्याप्यकरणेनप्राप्तनिष्ठाहीनत्वात् अप्राप्तत्यागिनःप्राप्तनिष्ठाहीनोह्य धिकदोषवान् । आचार्योपदेशाभावेनाप्राप्तनित्यकर्मादित्यागिनःसकाशादाचार्योपदेशादिनाप्राप्तेनित्यकर्मादौनिष्ठाहीनोदोष वानितिलोकेप्रसिद्धत्वात् अतोऽन्यथोपासकापेक्षयाअन्यथाज्ञानानिंदकस्याधिकपापित्वाद्युक्तमधिकतमःप्राप्तिकथनं । तदेत त्सर्वमुक्तमेतन्मंत्रव्याख्यानरूपेबृहद्भाष्ये । अन्यथोपासकायेस्यतेयांतिह्यधरंतमः । ततःकिंचिद्विशेषेणदुर्ज्ञानस्याविनिंदकाः ॥ सम्यगाचार्यवचनमवज्ञायविरोधिनि । सत्वबुद्धियतःकुर्युस्ततस्तेधिकपापिनः । अप्राप्तत्यागिनःप्राप्तनिष्ठाहीनोहिदोषवान् इति । सम्यगाचार्यवचनं ब्रह्मनिर्गुणत्वादिनिंदापरं । अवज्ञायतिरस्कृत्य । विरोधिनिब्रह्मनिर्गुणत्वादौसत्वबुद्धियतःकुर्युरिति तद्वाक्यार्थः । ननुमंत्रे विद्यारतानामधिकतमःप्राप्तिरुच्यते । तद्विरुद्धंप्रकृतासंगतंच । नचयउविद्यायांरताइत्यस्यनविद्यारत त्वमात्रेतात्पर्यं । किंत्वन्यथाज्ञानानिंदनेपि । अतोनोक्तदोषद्वयावकाशः । अतएवभाष्येतेषामनिंदका इतितद्वाक्यमन्यथाव्या

ख्यातमितिचेत् सत्यं । तेनतदर्थालाभादित्यतोलाभप्रकारंदर्शयति ॥ उशब्दोवधारणार्थइत्यादि ॥ ननुतस्मादित्यादिभा
ष्यमाद्यमंत्रस्यव्याख्यान मुतविद्यांचाविद्यांचेतितृतीयमंत्रस्य । नाद्यः । पूर्वश्लोकेनैवसम्यग्व्याख्यातत्वात् । नद्वितीयः ।
तस्मादित्यंशवैयर्थ्यादित्यत आद्यंपक्षमंगीकृत्यपदव्याख्यानत्वाभावेपि मंत्रेऽनन्वयशंकायामध्याहृतसाध्येनान्वयप्रदर्शनार्थत
दित्यभिप्रेत्यसाध्याकांक्षामुत्थापयति ॥ ततःकिमिति ॥ यस्मादित्यध्याहृत्यपूर्वश्लोकार्धेनान्वयंदर्शयति ॥ यस्मान्मिथ्या
ज्ञानेति ॥ ननुभाष्येपि साध्यानुक्तेरनन्वयदोषस्तदवस्थः । ततःकिमित्यपेक्षायाअनिवृत्तिश्चेत्यतःसाध्यमध्याहरति ॥ विद्या
उशब्दोवधारणार्थः । विद्यायामित्यनेनसंबध्यते । तेनविद्यायांयथार्थज्ञानएवरताः नत्व
न्यथाज्ञाननिंदांकुर्वंतीत्येषोर्थोलभ्यते । अतउक्तं तेषामनिंदकाइति ॥ ततःकिमत्यतोवक्ति ।
तस्मादिति ॥ यस्मान्मिथ्याज्ञानतदनिंदाभ्यांतमःप्राप्तिः ॥ निंदांचविद्यादितिशेषः ॥
दितिशेषइति ॥ एतच्चयेविदुरितिभाष्ये यस्तद्वेदेतिमंत्रेचानुवादेनसूचितमितिबोध्यं । शेषपूरणंचनिंदांचेत्यतःपरमितिज्ञाप
नायतत्पदानुवादः । एवंसर्वत्रापिज्ञातव्यं । अत्रयस्मान्मिथ्याज्ञानेनतमःप्राप्तिस्तस्मान्नारायणमनामयंयथास्वरूपंविद्यात् । य
स्मात्तदनिंदयातमःप्राप्तिस्तस्मादयथार्थस्यनिंदांचविद्यादितिप्रत्येकमन्वयोज्ञातव्यः । ननुनिंदांविद्यादित्ययुक्तं । निंद्यत्वज्ञान
स्यविशिष्टफलहेतुत्वेपिनिंदाज्ञानस्यतदभावादित्यतोविषयिवाचकनिंदाशब्दस्यविषयेनिंद्यलक्षणां भावप्राधान्यंचांगीकृत्यानू

भा० । तेषामनिंदकाः । तस्माद्यथास्वरूपंतुनारायणमनामयं ।

द्यव्याचष्टे ॥ अयथार्थस्यनिंदामितीति ॥ ज्ञानस्येत्युक्त्यादुर्ज्ञानस्याविनिंदकाइतिबृहद्भाष्यानुसारेणायथार्थप्रातिपदिका
त्परं ज्ञानप्रातिपदिकस्याध्याहारइत्युक्तंभवति । अनेन येअविद्यामुपासते विष्णोरन्यथाकारस्यनिर्गुणत्वादेरुपासकाः तेअंधंत
मःप्रविशंतियस्मात्तस्माद्यथास्वरूपंनारायणंविद्यादुपासीत येविद्यायामु विद्यायामेव यथार्थज्ञानएवरताः । सम्यगाचार्यवचन
मवज्ञायायथार्थज्ञानस्यानिंदकाइतियावत् । ते ततः मिथ्याज्ञानिप्राप्यतमसःसकाशात्भूयःकिंचिदधिकं । तमःप्रविशंतीतिइ
अयथार्थस्यनिंदामिति ॥ अयथार्थज्ञानस्यनिंद्यत्वमित्यर्थः ॥९॥ किंविपक्षेअनर्थप्राप्तेरेवसम्यज्ञानासम्यग्ज्ञा
ननिंदनयोःकर्तव्यता नेतिब्रूमः । किंतुमोक्षफलस्यांशतउभयसाध्यत्वादपीतिप्रतिपादकोन्यदेवाहुर्विद्य
येतिद्वितीयमंत्रः । तथाहि । विद्यया यथार्थज्ञानेना न्यदेव मोक्षैकदेशलक्षणंफलं प्राप्यमाहुर्वृद्धाः ।
वव्यक्तं प्रमितं । यस्मात्तस्मादयथार्थज्ञानस्यनिंद्यत्वंचविद्यात् । ततश्चनिंदाकार्येतिसाध्याध्याहारेणमंत्रयोजनासूचिताभवति ।
द्वितीयमंत्रार्थविवरणरूपतृतीयमंत्रव्याख्यानेनैवद्वितीयमंत्रस्यापिव्याख्यातत्वंमन्यमानेनभाष्यकृताअव्याख्यातंद्वितीयमंत्रं
स्वयमवतार्यव्याचष्टे ॥ किंविपक्षेऽनर्थप्राप्तेरेवेत्यादिना ॥ सम्यग्ज्ञानासम्यग्ज्ञाननिंदनयोःकर्तव्यतेति ॥ अत्र
सम्यग्ज्ञानस्यकर्तव्यत्वंनामसंपाद्यत्व मसम्यग्ज्ञाननिंदनस्यतुप्रसिद्धमेवेतिज्ञातव्यं । एवमवतार्यव्याख्यातुंप्रतिजानीते ॥ तथा

भा० । अयथार्थस्यनिंदांच ॥ ९।१० ॥
उप० । अन्यदेवाहुर्विद्ययाअन्यदाहुरविद्यया । इतिशुश्रुमधीराणांयेनस्तद्विचचक्षिरे ॥ १० ॥

हीति ॥ अन्यथाज्ञानवाचकाविद्याशब्दस्यतन्निंदायांजहल्लक्षणेत्याह ॥ अन्यथाज्ञाननिंदयाचेतियावदिति ॥ धियार मंतइतिव्युत्पत्तिमभिप्रेत्योक्तं धीराणांधीमतामिति ॥ वृद्धवचनसंमतियुक्तमिति ॥ अन्यदेवाहुरितिधीरवचनगताहुरित्य स्यास्मद्वृद्धाएवमाहुरित्यर्थकत्वादेवमुक्तमितिज्ञातव्यं ॥ ९–१० ॥ विवरणार्थइति ॥ अन्यदेवेतिसामान्येनोक्तस्यमृत्युंती

अविद्यया अन्यथाज्ञाननिंदयाचेतियावत् । अन्यदेवफलमाहुरिति धीराणां धीम तां । वृद्धवचनसंमतियुक्तंवचनंशुश्रुम । ये धीराः नोस्मभ्यंमोक्षसाधनंविचचक्षि रेव्याचचक्षिरे । तस्मादुपपन्नःसमुच्चयइति ॥ १० ॥ अस्यैवार्थस्यविवरणार्थोविद्यांचे तितृतीयोमंत्रः । तस्येदंव्याख्यानं येविदुरिति ॥ यथास्वरूपंत्वित्याद्युक्तावृत्त्यान्वयः ।

र्त्वाऽमृतमश्नुतइतिविस्पष्टमुक्तत्वाद्विवरणार्थइत्युक्तं । अतोनगतार्थतेतिभावः । ननुयेविदुरित्यारभ्यैवभाष्यस्यतृतीयमंत्रव्या ख्यानत्वे विद्यांचाविद्यांचेतिपदद्वयस्याव्याख्यातत्वप्रसंगः । भाष्येवेदनकर्मानुक्त्याऽनन्वयप्रसंगश्चेत्यतआह ॥ यथास्वरूपं त्वित्यादीति ॥ ननूक्तावृत्त्यान्वयांगीकारेपि मंत्रभाष्ययोर्विसंवादएव । मंत्रेविद्याविद्ययो र्भाष्येचेश्वरयाथात्म्यायथार्थज्ञान

उप० । विद्यांचाविद्यांचयस्तद्वेदोभयँसह ॥ अविद्ययामृत्युंतीर्त्वाविद्ययाऽमृतमश्नुते ॥ ११ ॥

भा० । येविदुःसहसज्जनाः ।

निंद्यत्वयोर्वेद्यत्वेनोक्तत्वादित्यतो मंत्रगतपदद्वयव्याख्यानत्वाद्भाष्यस्यनदोषइतिभावेन व्याख्यानतांघटयति ॥ तेनेति ॥ आवृत्तेनयथास्वरूपंचेत्यादिनेत्यर्थः । अत्राद्या विषयिवाचकस्यविषयेजहल्लक्षणा । द्वितीयातु धर्मिवाचकस्यधर्मे । उपलक्षणा चगौणीचेत्यादौलक्षणामात्रेप्युपलक्षणाशब्दप्रयोगादितिद्रष्टव्यं । यौगपद्यार्थत्वभ्रमनिरासायाह ॥ सहेत्येकपुरुषार्थेति ॥ निर्दुःखपरमानंदरूपैकपुरुषार्थेत्यर्थः । अयथार्थस्यनिंदया दुःखाज्ञानादिरूपिणश्चनिंदयेतिवा दुःखाज्ञानादिरूपिणस्तेइतिवा अन्वयभ्रमनिरासायविशेषणविशेष्यभावेनतत्प्रदर्शनपूर्वकं अयथार्थज्ञानस्यनिंद्यत्वप्रस्तावेप्ययथार्थस्यतदभावाद्भगवत्यसंभवा

तेनविद्यापदं ईश्वरयाथात्म्यस्याविद्यापदंचान्यथाज्ञाननिंद्यत्वस्योपलक्षणमित्युक्तंभवति ।

सहेत्येकपुरुषार्थहेतुत्वेनेत्यर्थः । दुःखाज्ञानादिरूपिणोऽयथार्थस्येति । तज्ज्ञानस्येत्यर्थः ।

च्चेतिशंकापरिहारायदुर्ज्ञानस्याविनिंदकाइतिबृहद्भाष्यानुसारेणायथार्थपदंतज्ज्ञानलक्षकतयाव्याचष्टे ॥ दुःखाज्ञानादीति ॥ दुःखाज्ञानादिरूपिणोऽयथार्थज्ञानस्येति कार्यकारणयोरभेदोपचारः । यद्वादुःखाज्ञानादिरूपयत्युत्पादयतीतिव्युत्पत्त्यातत्कार णस्येत्येवार्थः । सुखज्ञानादिरूपिणोयथार्थस्येत्यत्रतुसाक्षादभेदएव । यथार्थपदोदितेश्वरयाथात्म्यस्य सुखज्ञानादिव्यतिरेकेणा न्यस्याभावेनतदात्मकत्वादितिबोध्यं । ननुदुःखाज्ञानादिरूपिणइतिभाष्ये दुःखाज्ञानादि रूपंयस्येतिबहुव्रीहिणैवमत्वर्थलाभा

भा० । तेनिंदयाऽयथार्थस्यदुःखाज्ञानादिरूपिणः । दुःखाज्ञानादिसंतीर्णाःसुखज्ञानादिरूपिणः । यथार्थस्यपरिज्ञानात्सुखज्ञानादिरूप

तां । यांति ॥ ११ ॥

दिनिप्रत्ययवैयर्थ्यमितिचेत् । बहुव्रीहिमाश्रित्यमतुबर्थप्रत्ययप्रयोगेवैयर्थ्येपि दुःखाज्ञानादिकंचतत्रूपंचदुःखाज्ञानादिरूपं त
दस्यास्तीतिदुःखाज्ञानादिरूपीतिकर्मधारयमाश्रित्यतत्प्रयोगेशब्दांतरत्वेनदोषाभावात् । नच नबहुव्रीहिनिर्वाह्येभवंतिमतुबाद
यइत्याद्युक्तिबलाद्बहुव्रीह्यंगीकारएवोचितो नकर्मधारयमत्वर्थीयांगीकारइतिवाच्यं । यतोस्त्यत्रव्यवस्था । यत्रकर्मधारयमत्व
र्थीयेबहुव्रीहौचशब्दसाम्यंतत्रकर्मधारयमत्वर्थीयएवांगीकार्योनबहुव्रीहिः । तस्यान्यपदार्थप्रधानकस्यकर्मधारयाज्जघन्यत्वेनवृ
थातदंगीकारस्यानुचितत्वात् । यत्रचकर्मधारयमत्वर्थीयात्बहुव्रीहौशब्दलाघवं तत्रबहुव्रीहिरेवांगीकार्योनकर्मधारयमत्वर्थीयः।

अयथार्थज्ञाननिंदया मृत्युपदोदितदुःखादितरणंभवति ।
यथार्थज्ञानेनच सुखज्ञानादिरूपतालक्षणामृतप्राप्तिर्भवती

अल्पेनशब्देनाभिमतार्थप्रतिपादनसंभवे बहुयत्नाश्रयणस्यदोषत्वात् । यथोक्तं । कर्मधारयमत्वर्थीयाद्बहुव्रीहिरेवेष्टोलघुत्वा
दिति । संमतंचैतट्टीकाकारस्य । अतएवप्रमेयदीपिकायां । यद्विकारीत्यत्र कर्मधारयमत्वर्थीयमभ्युपगम्यानादिमदित्यत्रतदनं
गीकारः । एतच्चएकगोपूर्वाट्ठञ्नित्यमितिसूत्रेदुर्घटवृत्तिकृताप्रपंचितमनुसंधेयं । तस्माद्युक्तं दुःखाज्ञानादिरूपिणइत्यत्रकर्मधा
रयमत्वर्थीयाश्रयणमिति । मंत्रानुक्तविशेषणोपादानस्यप्रयोजनमाह ॥ अयथार्थज्ञानेत्यादि ॥ ननुमंत्रे मृत्यूत्तरणमुक्तं प्र
माणेतुदुःखादितरणं । अतोवैरूप्यमित्यतउक्तं मृत्युपदोदितेति । एवमेवसुखज्ञानादिलक्षणामृतप्राप्तिर्भवतीत्येतदपिव्याख्ये

यं ॥ इत्येतदुपपादनायेति ॥ दुःखादितरणेदुःखादिरहितत्वेनभगवदुपासकत्वरूपोपपत्तेःसुखज्ञानादिरूपत्वेचसुखादिमत्त्वे
नभगवदुपासकत्वरूपोपपत्तेःसूचकत्वेनोपपादनायेत्यर्थः । कथमनेनविशेषणद्वयेनतत्सूचनमितिचेदित्थं । ज्ञानशब्दस्योपासना
पर्यंतत्वस्योक्तत्वादयथार्थज्ञानंनाम जीवाभिन्नत्वादिनाभगवदुपासनं । जीवस्यचदुःखादिमत्त्वात्तदेवदुःखादिमत्त्वेनभगवदुपा
सनमित्युच्यते । तस्यचदुःखाज्ञानादिरूपिणइत्यनेनदुःखाज्ञानादिसाधनत्वेननिंद्यत्वेऽभिहितेदुःखादिरहितत्वेनभगवदुपासन
स्यकर्तव्यत्वंलभ्यते । ततश्चदुःखादिरूपिणोऽयथार्थज्ञानस्यनिंदयादुःखादितरणंभवतीत्यनेनदुःखादिरहितत्वेनभगवदुपासक

त्येतदुपपादनाय दुःखाज्ञानादिरूपिणो अयथार्थस्य सुखज्ञानादिरूपिणोयथार्थस्ये
तिविशेषणोपादानंकृतं । तथाचश्रुतिः । तंयथायथोपासतेतदेवभवतीति ॥ ११ ॥

त्वात्दुःखादितरणंभवतीत्यर्थःसंपद्यते । एवंयथार्थस्यपरिज्ञानंनाम परमेश्वरयाथात्म्यस्योपासनं । तस्यचयाथात्म्यस्यसुखज्ञा
नादिरूपत्वेऽभिहिते सुखादिमत्त्वेनभगवदुपासकत्वंस्फुटंलभ्यते । तथाच सुखज्ञानादिरूपिणः । यथार्थस्यपरिज्ञानात्सुखज्ञाना
दिरूपतां ॥ यांतीत्यनेनसुखज्ञानादिमत्त्वेनभगवदुपासकत्वात्सुखज्ञानादिरूपतांयांतीत्यर्थःसंपद्यते । अतोयुक्तंतत्सूचकत्वं ।
अवश्यमेतदेवंव्याख्येयं । अन्यथा तंयथायथेतिश्रुत्युदाहरणासंगतिप्रसंगादितिध्येयं । दुःखाज्ञानादिरहितत्वेनतदुपासकस्यसु
खादिरूपताभवतीत्येतत्कुतइत्यतआह ॥ तथाचेति ॥ तामेवपठति ॥ तंयथेति ॥ तदेव तत्सदृशमेव भवतिप्राप्नुवंति । अ

न्यथोपासतइतिबहुवचनानुपपत्तेरेकवचनस्यभूप्राप्ताविधातोःपरस्मैपदस्यचछांदसत्वात् । एतदभिप्रायेणैववैश्वानराधिकरणटीकायां तदेवभवतिप्राप्नुवंतीत्युक्तं । भाष्ये सुखज्ञानादिरूपतामिति । सुखज्ञानादिरूपताव्यक्तिमित्यर्थः । अतएवतद्व्यक्तिमात्रजेदितिवक्ष्यतीतिज्ञेयं ॥ भा० ॥ ११ ॥ ततश्चायंमंत्रार्थः ॥ विद्यां विद्याविषयीभूतमीश्वरयाथात्म्यं । अविद्यां अन्यथाज्ञाननिंद्यत्वं । चशब्दावन्योन्यसमुच्चये । तदिदमुभयंयःसज्जनःसहनिर्दुःखानंदरूपैकपुरुषार्थसाधनत्वेनवेद जानाति उपास्ते

अन्यथाज्ञानमेवानर्थसाधनं यथार्थज्ञानमेवमोक्षसाधनमित्येतद्विवरणार्थं मंधंतमःप्रविशंतीत्युत्तरमंत्रत्रयं । तत्राद्यमंत्रस्यार्थः । एवमिति ॥

इतियावत् । सः अविद्यया दुःखाज्ञानादिरूपिणोऽयथार्थज्ञानस्यनिंदया दुःखादिरहितत्वेनपरमेश्वरोपासनयेतियावत् । मृत्युंदुःखादिकंतीर्त्वाविद्ययासुखज्ञानादिरूपिणःपरमेश्वरयाथात्म्यस्योपासनया अमृतत्वंसुखज्ञानादिरूपताव्यक्तिमश्नुतेप्राप्नोति। तंयथायथोपासतेतदेवभवतीतिश्रुतेरिति ॥ खं० ११ ॥ इत्येतद्विवरणार्थमिति ॥ असंभूतिमित्यनेनायथार्थज्ञानस्य संभूतिंचेत्यादिनायथार्थज्ञानस्यविवृतत्वादितिभावः । एवंशब्दस्यदार्ष्टांतिकार्थकस्यदृष्टांताकांक्षायां यथार्थस्यपरिज्ञानादितिसन्नि

उप० । अंधंतमःप्रविशंतियेऽसंभूतिमुपासते । ततोभूयइवतेतमोयउसंभूत्याꣳरताः ॥ १२ ॥

भा० । एवंसृष्टिकर्तृत्वंनांगीकुर्वंतियेहरेः ।

हितप्रकृतयथार्थज्ञानिनांदृष्टांतत्वस्यविरुद्धत्वात्तेषामनिंदकाइतिव्यवहितोक्तंदृष्टांतमाह ॥ यथेति ॥ अत्रान्यथाज्ञानानिंदकानामधिकतमःप्राप्तेरुक्तत्वेपि तमःप्राप्तिमात्रेदृष्टांतत्वंज्ञातव्यं । तथासंहारकर्तृतां नांगीकुर्वंतीत्यस्य यउसंभूत्यांरताइत्येतद्व्याख्यातत्वंघटयति ॥ अत्राप्युशब्दइत्यादि ॥ नकेवलंयउविद्यायामित्यत्रेत्यपेरर्थः । तेप्येवमित्यत्राप्येवंशब्दस्य यथान्यथाज्ञानानिंदका एवमित्यर्थःप्रतीयतेऽतोनूद्यव्याचष्टे ॥ तेप्येवमिति ॥ अव्यवहितस्यदृष्टांतत्वसंभवेव्यवहितस्यतदंगीकारोनुयथाऽन्यथोपासकाःअन्यथाज्ञानानिंदकाइत्यर्थः । असंभूतिंजगत्सृष्टेरकर्तारमित्यस्यतात्पर्यं सृष्टीति॥अत्राप्युशब्दोवधारणार्थः। संभूत्यामित्यनेनसंबध्यते तेनसंभूत्यांउजगत्स्रष्टृत्वएव। जगत्स्रष्टैवविष्णुः नतुसंहारकर्तेत्यस्मिन्नर्थेरताइत्येषोर्थोलभ्यते । तस्मादुक्तंतथेति ॥ तेप्येवंसृष्टिकर्तृत्वानंगीकारिणइवतमोयांतीत्यर्थः । ततःकिमित्यतआह । तस्मादिति॥यस्मादेवंसृष्टिकर्तृत्वानंगीकारेऽनर्थः । चितइतिभावः । अत्रतमःप्राप्तिमात्रेदृष्टांतदार्ष्टांतिकभावोज्ञातव्यः । अन्यथा संहारकर्तृत्वानंगीकारिणांभूयःशब्देनाधिकतमःप्राप्तेरुक्तत्वेनवैषम्यापातादितिद्रष्टव्यं । ननुसृष्टिकर्तृत्वानंगीकारिप्राप्यतमसःसकाशात्संहारकर्तृत्वानंगीकारिप्राप्यतमसोभूयइवेतिमंत्रेआधिक्यमुक्तं । तदयुक्तं । आधिक्यप्रापकदोषाधिक्याभावादितिचेदस्त्येवदोषाधिक्यं । तथाहि । सृष्टिकर्तृत्वानंगीकारिणः सम्यगाचार्योपदेशाभावेनाप्राप्तत्यागित्वात् । सृष्टिकर्तृत्वमंगीकृत्यसंहारकर्तृत्वानंगीकारिणस्तु सृष्टिकर्तृत्वांगीका

भा० । तेपियांतितमोघोरंतथासंहारकर्तृतां । नांगीकुर्वंतितेप्येवंतस्मात्सर्वगुणात्मकं । सर्वकर्तारमीशेशंसर्वसंहारकारकं ॥ १२ ॥ १३ ॥

रायसम्यगाचार्योपदेशस्य तन्मूलभूत यतोवेत्यादिवेदवाक्यानुसरणस्यचावश्यकत्वेनताभ्यामेवसंहारकर्तृत्वस्यापिप्राप्त्यातत्त्या
गिनःप्राप्तनिष्ठाहीनत्वात् । अप्राप्तत्यागिनःप्राप्तनिष्ठाहीनस्याधिकदोषवत्तायाःपूर्वोदाहृतप्रमाणसिद्धत्वात् । अतःसंहारकर्तृत्वा
नंगीकारिणोयुक्ताऽधिकतमःप्राप्तिरिति।साध्यानुक्तेस्ततःकिमितिशंकायाअपरिहारइत्यतआह ॥ विद्यादितिवाक्यशेषइति॥
अन्यथा योवेदेत्यनुवादानुपपत्तेरितिभावः । सर्वसंहारकारकमितिवाक्यांतेशेषोवाक्यशेषः । यत्रक्वाप्यन्वयभ्रांतिपरिहाराय
वाक्यशेषइत्युक्तं । अनेन मंत्रेऽनन्वयशंकायांयस्मात्तस्मादित्यध्याहारेणान्वयोज्ञातव्यइत्युक्तंभवति । ननुमंत्रेसर्वगुणात्मकत्वा
ज्ञानेऽनर्थानुक्तेस्तस्मात्सर्वगुणात्मकंविद्यादितिसाध्यकथनमसंगतमित्यतआह ॥ सृष्टीति ॥ सर्वगुणात्मकमित्युक्तमिति॥
विद्यादितिवाक्यशेषः । सृष्टिकर्तृत्वानंगीकारेऽनर्थकथनमुपलक्षणार्थमितिज्ञापयितुंस
र्वगुणात्मकमित्युक्तं । एतदप्युपलक्षणं । उपसंहारेधिकस्यापिवक्ष्यमाणत्वात् ॥ १२॥
अत्रसर्वगुणात्मकमित्यतःपरमीशेशमितिशेषः । अन्यथातद्विशेषणवैयर्थ्यप्रसंगात् । यद्वा तस्यविशेष्यसमर्पकत्वादनुपादानमि
तिज्ञातव्यं ॥ एतदप्युपलक्षणमिति ॥ सर्वगुणात्मकमित्येतदपिसर्वदोषविनिर्मुक्तत्वादेरुपलक्षणमित्यर्थः । कुतइत्यतआह
॥ उपसंहारइति ॥ सर्वदोषविनिर्मुक्तमित्याद्युपसंहारग्रंथेसर्वदोषविनिर्मुक्तत्वादेरधिकस्यवक्ष्यमाणत्वादित्यर्थः ॥ भा० ॥ १२॥
ततश्चायंमंत्रार्थः ॥ येपरमेश्वरमसंभूतिंजगत्सृष्टेरकर्तारमुपासते तेअंधयतीत्यंधंतमःप्रविशंति । येचसंभूत्यामु जगत्स्रष्टृत्व
एव । जगत्स्रष्टैवविष्णुर्नतुसंहारकर्तेत्यस्मिन्नर्थेरताः उपलक्षणमेतत् । परमेश्वरस्यसर्वगुणात्मकत्वसर्वदोषविनिर्मुक्तत्वादिकंनां

गीकुर्वंति । तेपि ततः सृष्टिकर्तृत्वानंगीकर्तृप्राप्यतमसःसकाशात् भूयःकिंचिदधिकंतमःप्रविशंतीत्येतदिवव्यक्तमसंदिग्धमिति
यावत् । यद्वात्रेवशब्दस्यैवाल्पार्थत्वांगीकारेणभूयइवकिंचिदधिकमितिव्याख्येयं । यस्मादेवंसृष्टिसंहारकर्तृत्वसर्वगुणात्मकत्वा
द्यनंगीकारेऽनर्थः तस्मात्परमेश्वरंस्रष्टृत्वाद्युपेतंविद्यादुपासीतेति ॥ खं० ॥ १२ ॥ द्वितीयमंत्रविवरणरूपतृतीयमंत्रव्याख्याने
नैवद्वितीयस्यापिव्याख्याततांमन्यमानेनभाष्यकारेणाव्याख्यातंद्वितीयमंत्रंस्वयंससंगतिकंव्याचष्टे ॥ किंविपक्षइत्यादि ॥

किंविपक्षेबाधकसद्भावादेवैतज्ज्ञातव्यं । नेतिब्रूमः । किंतु मोक्षोपयोगित्वादपीतिप्रतिपादयितुम
न्यदेवाहुःसंभवादितिद्वितीयोमंत्रः । तत्रसंभवात्सृष्टिकर्तृत्वज्ञानाद संभवात्संभवविपरीतसं
हारकर्तृत्वज्ञानादित्यर्थः ॥ १३ ॥ तस्यैवविवरणार्थःसंभूतिंचेतितृतीयोमंत्रः । तस्यार्थो योवेदेति॥

एतादिति ॥ सृष्टिसंहारकर्तृत्वमित्यर्थः ॥ मोक्षोपयोगित्वादपीति ॥ मोक्षफलस्यांशतउभयसाध्यत्वादपीत्यर्थः ॥ सृष्टि
कर्तृत्वज्ञानादिति ॥ अनेनसंभवत्यनेनेतिसंभवःसृष्टिकर्ता । भावप्रधानोनिर्देशः । विषयवाचकस्यविषयिणिज्ञानेलक्षणेत्युक्तं
भवति । नञोऽभावार्थत्वभ्रमनिरासायविरुद्धार्थत्वमंगीकृत्यासंभवादितिपदंव्याचष्टे ॥ संभवविपरीतेति ॥ इतिशुश्रुमधी

उप० । अन्यदेवाहुःसंभवादन्यदाहुरसंभवात् । इतिशुश्रुमधीराणांयेनस्तद्विचचक्षिरे ॥ १३ ॥ संभूतिंचविनाशंचयस्तद्वेदोभयꣳसह ।
विनाशेनमृत्युंतीर्त्वासंभूत्याऽमृतमश्नुते ॥ १४ ॥

राणामित्युत्तरार्धस्यप्रागेवव्याख्यातत्वादत्रनव्याख्यानंकृतं ॥ १३ ॥ योवेदेत्यत्रवेदनकर्मानुक्तेराह ॥ पूर्वावृत्त्येति ॥ सर्वगुणात्मकमित्याद्यावृत्त्येत्यर्थः । यः सर्वसंहारकारकंभगवंतंवेद सःसंहृतिज्ञानेनबंधाद्विमुच्यतेइत्यसंगतिः । भगवज्ज्ञानस्यबंधमोचकत्वेपिसंहृतिज्ञानस्यतदभावाद्विरोधश्चेत्यतःसुखज्ञानादीत्युत्तरभाष्यानुसारेणव्याचष्टे ॥ संहृतीति ॥ ननुमंत्रेमृत्युंतीर्त्वेति मृत्यूत्तरणंफलमुक्तं । भाष्येतुदेहबंधमोचनमतोवैरूप्यमित्यतोव्याख्यानव्याख्येयभावंघटयति ॥ देहसंबंधस्येति ॥ तद्धेतुत्वादितिवदता मृत्युशब्दस्यदेहबंधेलक्षणा कार्यकारणभावःशक्यसंबंधइत्युक्तंभवति । ननुसंभूत्येतिमंत्रे सर्वकर्तारमितिपूर्वभा

पूर्ववदावृत्त्यैवान्वयः । संहृतिज्ञानादिति ॥ तत्कर्तृत्वज्ञानादित्यर्थः । देह

संबंधस्यमृत्युत्वंतद्धेतुत्वाज्ज्ञातव्यं । सुखज्ञानादीतिपूर्ववद्युक्तिसूचनार्थं।

ष्येचा विशेषेणसर्वकर्तृत्वस्यप्रकृतत्वादत्रसुखज्ञानादीतिविशिष्योक्तिर्व्यर्थेत्यतआह ॥ सुखेति ॥ पूर्ववदिति ॥ पूर्वभाष्येसुखज्ञानादिरूपिणइतिविशेषणमिवेत्यर्थः ॥ युक्तिसूचनार्थमिति ॥ अधिकारिणःसुखज्ञानादि व्यक्तिमत्त्वेसुखज्ञानादिकर्तृत्वेनभगवदुपासकत्वरूपयुक्तिसूचनार्थमित्यर्थः ॥ यद्यप्यत्रसंभूतिंचविनाशंचेत्यादिपूर्वमंत्रानुसारेणसुखज्ञानादिकर्तृत्वेत्याद्युक्त्वाऽनंतरंसंहृतिज्ञानादिकंवक्तव्यं । नच विनाशेनमृत्युंतीर्त्वेत्युत्तरार्धानुसारेणभाष्यप्रवृत्तेर्नदोषइतिवाच्यं । उत्तरार्धेपिपूर्वक्रमोल्लंघनेनिमित्ताभावात् । तथापिमुक्तिर्हित्वान्यथारूपंस्वरूपेणव्यवस्थितिरित्यादिप्रमाणानुसारेणविशिष्टरूपेपिमोक्षेसंसारनिवृत्तेः

भा० । योवेदसंहृतिज्ञानाद्देहबन्धाद्विमुच्यते । सुखज्ञानादिकर्तृत्वज्ञानात्तद्व्यक्तिमात्रजेत् ।

पूर्वभावित्वात्फलानुसारेणोत्तरार्धेक्रमोल्लंघनं । तदनुसारेणप्रवृत्तत्वाद्भाष्यस्यनतत्रापिकश्चिद्दोषः ॥ ततश्चायंमंत्रार्थः ॥ संभूतिंसुखज्ञानादिसर्वकर्तृत्वं विनाशंविनाशकर्तृत्वं सर्वसंहारकत्वमितियावत् । चशब्दावन्योन्यसमुच्चये । तदिदमुभयं योधिकारी सहएकपुरुषार्थसाधनत्वेनवेदउपास्ते सःविनाशेन परमेश्वरस्यविनाशकर्तृत्वोपासनेन मृत्युं मृत्युकारणदेहादिबंधंतीर्त्वा संभूत्यासुखज्ञानादिकर्तृत्वोपासनेना मृतंसुखज्ञानादिव्यक्तिमश्नुतेप्राप्नोति । तंयथायथोपासतइतिश्रुतेरिति । ननूपसंहारज्ञापकाभावादुपसंहरतीत्यनुपपन्नमित्यतआह ॥ तस्मादिति ॥ भाष्ये नगुणानांचभागहानिमिति ज्ञानानंदादिगुणानांमध्ये ज्ञाने

मंत्रार्थमुपसंहरति। सर्वेति॥ तस्मादितिवक्ष्यमाणमादौयोज्यं।

हरेःसाम्यंनचिंतयेदितिवक्ष्यमाणेनान्वयः । विष्णोरभिन्नतां

च्छाद्यंगीकृत्य आनंदाद्यनंगीकारेणहानिंनैवप्रकल्पयेदित्यर्थः ॥ वक्ष्यमाणमिति ॥ नैवप्रचिंतयेत्तस्मादित्यत्रवक्ष्यमाणं तस्मादितिपदं सर्वदोषविनिर्मुक्तमित्यस्यादौयोज्यमित्यर्थः ॥ हरेःसाम्यंनेति ॥ हरेःसाम्यंनेत्यस्यचिंतयेदितिवक्ष्यमाणेनान्वयइत्यर्थः । नमुक्तानामितिनञःसंबंधप्रदर्शनाय हरेःसाम्यंनेत्यनुवादःकृतः । क्वचिद्धरेःसाम्यंचिंतयेदितिवक्ष्यमाणेनान्वयइतिपाठोदृश्यते । तत्रसाम्यमित्यस्यचिंतयेदितिवक्ष्यमाणेनान्वयइत्यर्थः । नेत्यस्यपूर्ववदेवसंबंधोज्ञातव्यः । मुक्तानामित्यस्यपू

भा० । सर्वदोषविनिर्मुक्तंगुणरूपंजनार्दनं । जानीयान्नगुणानांचभागहानिंप्रकल्पयेत् । नमुक्तानामपिहरेःसाम्यंविष्णोरभिन्नतां । नवैप्रचिन्तयेत्तस्माद्ब्रह्मादेस्साम्यमेववा ।

र्वत्रान्वितत्वादभेदस्यचप्रतिसंबंधिसापेक्षत्वादाह ॥ मुक्तानामित्यनुवर्ततइति ॥ ननुसाम्यमेवेत्यवधारणंविरुद्धं । ब्रह्मादेः साम्यमेवनचिंतयेत् । अभिन्नतांतुचिंतयेदित्यर्थप्रतीतेरित्यतो नावधारणार्थत्वमेवशब्दस्य येनोक्तदोषः । किंतुकैमुत्यार्थत्वमित्याह ॥ साम्यमेवकिमुताभिन्नतामिति ॥ नचिंतयेदित्यनुकर्षस्यवक्ष्यमाणत्वात्साम्यमेवेतियथाश्रुतानुवादः । साम्यमेवन किमुताभिन्नतामितिपाठस्तु वक्ष्यमाणानुकर्षसिद्धवत्कारेणेतिद्रष्टव्यं । ननु नमुक्तानामित्यनेनैवब्रह्मादिसाम्यस्यनिषिद्धत्वात्पुनरुक्तिदोषइत्यतउक्त ममुक्तवर्गस्येति ॥ ननुभाष्येसाम्यमेवेत्यस्यान्वयाभावः । विकल्पाप्रसक्ते वाशब्दवैयर्थ्यंचेत्यतआह ॥

मुक्तानामित्यनुवर्तते । ब्रह्मादेरमुक्तवर्गस्यसाम्यमेव । किमुताभिन्नतां । वाशब्दोनचिंतयेदित्यस्यानुकर्षणार्थः । मानुषादीत्यत्र जानीयादित्यनुवर्तते । ततोमुक्तामुक्तगणावाशब्दइति ॥ साम्यमेवनेतिपाठेतु ननुसाम्यमेवनेत्यनुवादोनयुक्तः । नञोऽश्रवणात् । वाशब्दवैयर्थ्यंचेत्यतआह ॥ वाशब्दइतीत्यवतारणीयं । अव्ययानामनेकार्थत्वादितिभावः । नैवप्रचिंतयेदित्यन्वयभ्रमनिरासायाह ॥ मानुषादीत्यत्रेति ॥ विमुक्तिगं मानुषादिविरिंचांततारतम्यमित्यत्र विष्णोःपरोत्कर्षमित्यत्रचेत्यर्थः । यद्यपिसन्निहितत्वात्प्रचिंतयेदित्यनुवर्ततइति वक्तव्यं । तथापितस्यनञ्संबद्धत्वेनैवपूर्वत्रान्वितत्वान्नञ्परित्यागेनकेवलस्यानुवृत्तेरनन्यगतिकत्वाज्ज्ञानीयादित्यनुवर्ततइत्यु

भा० । मानुषादिविरिंचांतंतारतम्यंविमुक्तिगं । ततोविष्णोःपरोत्कर्ष

र्षं । ननु विष्णोःपरोत्कर्षंजानीयादित्यंतेनैवोपसंहारसिद्धेः सम्यक्ज्ञात्वाविमुच्यतइतिव्यर्थमित्यतआह ॥ तस्मादितिपरामृष्टमिति ॥ अनेनयस्मात्परमेश्वरंसम्यक्ज्ञात्वाविमुच्यतेतस्मात्सर्वदोषविनिर्मुक्तमित्यादिप्रकारेणजानीयादित्यर्थइत्युक्तंभवति । ननुमंत्राणामुक्तार्थस्थापनायावश्यकरणीयस्यापव्याख्याननिराकरणस्यभाष्ये अकरणात्न्यूनतेत्यतस्तांपरिहरिष्यन्ज्ञानकर्मसमुच्चयवादिनामपव्याख्यानमनुवदति ॥ केचिदिति ॥ केचिज्ज्ञानकर्मणोःसमुच्चयस्यप्रतिपादकमाद्यंमंत्रत्रयंइतिमन्यंत इत्यन्वयः । किंमायावादिवत्स्वर्गादिसाधनत्वेनेत्यतउक्तं ॥ मोक्षइति ॥ तादर्थ्येसप्तमी । मोक्षार्थंमोक्षसाधनत्वेनेतियावत् ।

त्तस्मादितिपरामृष्टंहेतुंदर्शयति ॥ सम्यगिति ॥ केचिदविद्यापदंकर्मवाचकंमत्वैकैकनिंदयामोक्षेज्ञानकर्मणोःसमुच्चयस्यप्रतिपादकमाद्यमंत्रत्रयमितिमन्यंते । अन्येतुविद्यापदंदेवताज्ञानस्यवाचकंमत्वास्वर्गादौतत्कर्मणासमुच्चयंप्रतिपादयतीदमित्याचक्षते ।

एवंस्वर्गादाविल्येतदपिव्याख्येयं । नन्वाद्यमंत्रेसमुच्चयस्यसाधनत्वप्रतिपादकपदाभावात्कथंतत्प्रतीतिरित्यत आर्थिकप्रतीत्यंगीकाराद्दोषइत्याशयेनोक्तमेकैकनिंदयेति । नन्वर्थादपिनज्ञानकर्मसमुच्चयसिद्धिः । अविद्यामात्रस्य विद्यामात्रस्यच निंदितत्वेनाविद्याज्ञानसमुच्चयस्यैवसिद्धेरित्यतउक्त मविद्यापदंकर्मवाचकंमत्वेति ॥ अधुनामायावादिनामपव्याख्यानमनुवदति ॥ अन्येत्विति ॥ विद्यापदमिति ॥ अविद्यापदंकर्मवाचकंमत्वेतिपूर्वन्यायेनसिद्धत्वान्नोक्तं । किंतार्किकादिवन्मोक्षसाधनत्वेनेत्य

भा० । सम्यग्ज्ञात्वाविमुच्यतइतिकौर्मे ॥ १४ ॥

तउक्तं स्वर्गादाविति ॥ इदमिति ॥ आद्यंमंत्रत्रयमित्यर्थः ॥ उत्तरंत्विति ॥ अंधंतमःप्रविशंतियेसंभूतिमुपासतइत्याद्युत्तर मंत्रत्रयंतु सत्यलोकादिप्राप्तौ प्राप्त्यर्थं । तदुपासनयोः हिरण्यगर्भप्रकृत्युपासनयोः । समुच्चयस्यप्रतिपादकमितिप्रतिपन्नाइति संबंधः । हिरण्यगर्भप्रकृतिवाचकपदाभावात्कथमेतदित्यतउक्तं संभूत्यसंभूतिपदयोरित्यादि । यथोक्तंपरेण । अधुनाव्याकृता व्याकृतोपासनयोःस्वर्गादौसमुच्चिचीर्षयाप्रत्येकंनिंदाक्रियतइत्यादि । एवमनूदितंव्याख्यानद्वयंनिराकर्तुंप्रतिजानीते ॥ तदेत दिति ॥ पुराणवाक्येनैवेति ॥ अतो नभाष्यकारस्यापव्याख्याननिराकरणाभावप्रयुक्तान्यूनतेतिभावः । उभयसाधारणं

> उत्तरंतुमंत्रत्रयंसंभूत्यसंभूतिपदयोरुत्पत्त्यनुत्पत्तिमत्परत्वेनहिरण्यगर्भप्रकृतिवाचकत्वंगृ हीत्वातदुपासनयोःसत्यलोकादिप्राप्तौसमुच्चयस्यप्रतिपादकमितिप्रतिपन्नाः ॥ तदेतदप व्याख्यानं । पुराणवाक्येनैवान्यथाव्याख्यातत्वात् । नान्यःपंथेत्यादिश्रुतिविरुद्धश्चसमुच्च यपक्षः । केवलकर्मिणोप्यधिकःकेवलज्ञानिनःसंसारइतिचकामकारेणचैकेइत्यादिविरुद्धं ।

दोषमुक्त्वा समुच्चयवादिनामसाधारणंदोषमाह ॥ नान्यःपंथेत्यादीति ॥ अयनायमोक्षायज्ञानान्यःपंथाःकर्मादिर्नविद्यतइ तिकर्मणोमोक्षसाधनतायानिषिद्धत्वात्कर्मसमुच्चयपक्षःश्रुतिविरुद्धइत्यर्थः । समुच्चयपक्षेप्रधानप्रमेयानुपपत्तिमभिधाय ततोभू यइवतेतमोयउविद्यायांरताइतिवाक्यार्थानुपपत्तिमप्याह ॥ केवलकर्मिणइति ॥ एवंहिपरेणव्याख्यातं । येऽविद्यांकर्मोपा सते तेअंधंतमःसुखदुःखपुण्यपापात्मकंसंसारंप्रविशंति । येविद्यायामेव ज्ञानएव रतास्ततःतः केवलकर्मिंप्राप्यसंसाराद्भूयोधि

॥ ५२ ॥

कंतमःसंसारंप्राप्नुवंतीति । तदेतद्व्याख्यानं कामकारेणचैकइत्यादिसूत्रेण तद्गृहीतया कामचाराःकामभक्षाःकामवादाःकामेनैवे मंदेहमुत्सृज्याथपरात्परमीयुरनारंभणमितिश्रुत्याचविरुद्धं । तत्रकेवलज्ञानिनःसंसारनिवृत्तेरुक्तत्वेनाधिकसंसारस्यदूरापास्तत्वा त् । मायावादिपक्षेप्यसाधारणंदोषमाह ॥ आत्मज्ञानेति ॥ अत्रा स्यामुपनिषदि ॥ निर्णीतत्वादिति ॥ अत्राद्येनमंत्रेणस र्वेषणापरित्यागेनात्मज्ञाननिष्ठतोक्तेत्यादिनाग्रंथेनपरेणनिर्णीतत्वादित्यर्थः । यद्वाभाष्यकारेणनिर्णीतत्वादित्यर्थः । सर्वेषामपि मंत्राणांप्रमाणेनभगवत्परतयाव्याख्यानेनात्मज्ञाननिष्ठायाःनिर्णीतत्वलाभात् । आत्मज्ञाननिष्ठायामुपक्रमादिकमपियथायथंज्ञा

> आत्मज्ञाननिष्ठायाएवात्रोपक्रमादिभिर्निर्णीतत्वा देवताज्ञानकर्मणोःसमुच्चयश्चनप्रकरणानुगुणः । कुर्वन्नेवेतिमंत्रस्यापिनिवृत्तकर्मविषयतयाव्याख्यातत्वात् । संभूतिंचविनाशंचेत्यत्रकुतोयंविनाश आपतितइतिचिंत्यं । विनाशधर्मकत्वाद्विनाशोहिरण्यगर्भइतिचेन्न । संभूतिपदेनपौनरुक्त्यात् ।

तव्यं । ननुदेवताज्ञानस्यप्रकरणाननुगुणत्वेपि नकाम्यकर्मणःप्रकरणाननुगुणत्वं । कुर्वन्नेवेतिमंत्रेतस्यप्रकृतत्वादित्यतआह ॥ कुर्वन्नेवेतिमंत्रस्यापीति ॥ दूषणांतरमाह ॥ संभूतिंचेति ॥ कुतःकस्मादापतितइत्यत्यंतासंगतिज्ञापनायपरिहासः । अ स्मत्पक्षेआद्यमंत्रेसंभूत्यामेवेत्यवधारणेनद्वितीयमंत्रेअसंभवशब्देनप्रकृतस्यसंहर्तृत्वस्यात्रमंत्रेविनाशशब्देनानुवादसंभवेपिपरेण मंत्रत्रयस्यहिरण्यगर्भप्रकृतिपरत्वांगीकारेणात्रतदुभयग्रहणायसंभूतिंचासंभूतिंचेतिवक्तव्यत्वेपि विनाशंचेतिवचनमत्यंतासंगत मित्यर्थः । विनाशग्रहणस्यप्रकृतोपयोगमाशंकते ॥ विनाशधर्मकत्वादिति ॥ इदंचलक्षणाबीजशक्यसंबंधप्रदर्शनायोक्तं ॥

अव्याकृतोक्तीति ॥ प्रकृत्युक्तीत्यर्थः । नन्वसंभूतिशब्देनाव्याकृताकाशग्रहणान्नाव्याकृतोक्त्यभावो नापिपौनरुक्त्यं । न चासंभूतिशब्दाश्रवणंदोषः । असंभूतिशब्दगताकारलोपेसंभूतिशब्दस्यैवासंभूतिशब्दत्वादित्यतआह ॥ अकारलोपेनेति ॥ यथोक्तंपरेण । संभूतिंचविनाशंचेत्यत्रावर्णलोपेननिर्देशोद्रष्टव्यइति ॥ व्याकरणकौशलमिति ॥ व्याकरणस्यव्याख्यानस्य कौशलमपूर्वमितिवा । व्याकरणशास्त्रेकौशलमपूर्वमितिवापरिहासः ॥ १४ ॥ ननुहिरण्मयेनेत्यादिमंत्रस्यैवव्यर्थत्वात्तद्व्याख्या नपरंभाष्यंसुतरामनर्थकमित्यत उक्तार्थानुवादेनसंगतिकथनपूर्वकमुत्तरमंत्रसंदर्भप्रतिपाद्यमाह ॥ एवमित्यादिना ॥ अती

अव्याकृतोक्त्यभावाच्च । अकारलोपेनसंभूतिरव्याकृतमित्यपूर्वंव्याकरणकौशलमित्यास्तां ॥ १४ ॥ एवं प्रासाधिकारंशिष्यंप्रतिपरमात्मस्वरूपंनिरूप्यतत्साक्षात्कारोमोक्षसाधनमित्यतीतग्रंथेनोक्तं । सचेश्वरसाक्षात्कारोनश्रवणादिमात्रेणभवति । नापिमोक्षःसाक्षात्कारमात्रेण । किंतुभगवत्प्रसादादेवेत्यतोऽनुष्ठितश्रवणादिकेनापिसाक्षात्कारार्थंप्राप्तसाक्षात्कारेणापिचमोक्षार्थंयथाभगवत्प्रार्थनंकार्यं तग्रंथेनोक्तमिति ॥ यस्तुसर्वाणिभूतान्यात्मन्येवानुपश्यतीत्याद्यतीतग्रंथेनेत्यर्थः ॥ नश्रवणादिमात्रेणेति ॥ अव्यक्तस्वभावस्यभगवतःप्रयत्नशतेनापिसाक्षात्कर्तुमशक्यत्वस्य अपिसंराधनेप्रत्यक्षानुमानाभ्यामित्यादावुक्तत्वादितिभावः ॥ नापिमोक्षइति ॥ राजादिसाक्षात्कारमात्रेणनिगडमोक्षादर्शनादितिभावः । तर्हिसाक्षात्कारशास्त्रस्यमोक्षशास्त्रस्यचाप्रामाण्यंस्यादित्याशयेनशंकते ॥ किंत्विति ॥ उत्तरमाह ॥ भगवदिति ॥ अतोऽनंतेनतथाहिलिंगमित्यादौ प्रसादस्यसाक्षात्कारसाधनतायाः

ततोह्यस्यबंधविपर्ययौ भवपाशाच्चमोचकः यस्यप्रसादा दित्यादौप्रसादस्यमोक्षसाधनतायाश्चप्रमितत्वादितिभावः ॥ उत्तरोग्रंथइति ॥ अग्नेनयेत्यनेनमोक्षार्थंप्रार्थनमितरेणसाक्षात्कारार्थमितिविवेकोद्रष्टव्यः ॥ तत्रेति ॥ मंत्रस्यावश्यकत्वेसिद्धइत्यर्थः ॥ एकर्षिप्रभृतिशब्दाभिधेयमिति ॥ यद्यपिपूषन्नित्यादिशब्दाभिधेयमितिवक्तव्यं । मंत्रेतस्यैवादित्वात् । परेणापिजगतःपोषणात्पूषारविरित्युक्तत्वाच्च । तथापि तस्यादित्यवाचकतायाःप्रसिद्धत्वादनुपादानं । यद्वापूषञ्छब्दस्यादित्येप्रसिद्धत्वेनकथं

तत्प्रकारप्रदर्शनार्थोहिरण्मयेनपात्रेणेत्याद्युत्तरोग्रंथः । तत्रसगुणब्रह्मप्राप्त्यर्थमेकर्षिप्रभृतिशब्दाभिधेयमादित्यंप्रति मार्गयाचनमनेनक्रियतइत्याद्यन्यथाप्रतीतिनिरासाय तद्व्याख्यानरूपांस्मृतिंतावदुदाहरति ॥ पात्रमिति ॥ सत्यस्येत्यनूद्यविष्णोरितिव्याख्यातं ।

चित्तच्छब्दाभिधेयत्वसंभवेप्येकर्ष्यादिशब्दाभिधेयत्वमादित्यस्याप्रामाणिकमितिदूषणसूचनायातदादित्वेनग्रहणंकृतमितिद्रष्टव्यं ॥ इत्याद्यन्यथाप्रतीतीति ॥ मंत्रप्रतिपाद्यान्यथाप्रतीतिरियं । आदिशब्देनमंत्रगतसत्यादिपदार्थान्यथाप्रतीतिर्ग्राह्या । स्ववचनेनापिव्याख्यास्यमानत्वात्तावदित्युक्तं । विष्णुविशेषणत्वप्रतीतिनिरासायाह ॥ सत्यस्येत्यनूद्येति ॥ अनेनसत्यस्या

उप० । हिरण्मयेनपात्रेणसत्यस्यापिहितंमुखं । तत्त्वंपूषन्नपावृणुसत्यधर्मायदृष्टये ॥ १५ ॥

भा० । पात्रंहिरण्मयंसूर्यमंडलंसमुदाहृतं । विष्णोःसत्यस्यतेनैवसर्वदाऽपिहितंमुखं । तत्तपूर्णत्वतःपूषाविष्णुर्दर्शयतिस्वयं । सत्यधर्मायभक्ताय ॥ १५ ॥

दित्यमंडलस्येतिव्याख्यानंनिरस्तंभवति । मुखमात्रस्यापिहितत्वानुपपत्तेर्यत्तेरूपंकल्याणतममित्युत्तरग्रंथानुरोधाच्चाह ॥ सम स्तविग्रहोपलक्षणमिति ॥ अनेनमुखंद्वारमितिव्याख्यानमपाकृतंवेदितव्यं । अत्रसूर्यमंडलेसाक्षात्कारयोग्यानांतदमुख्य मावरणं । मुख्यंत्वविद्यादिकमेव । अतएव तत्वंपूषन्नपावृणुत्यनेनसूर्यमंडलाख्यावरणापगमंप्रार्थयित्वा व्यूहरश्मीन् समूह तेजइतिस्वरूपज्ञानादिविस्तारप्रार्थनेनाविद्याद्यावरणापगमप्रार्थनमुपपद्यते । अन्यथातस्यव्यर्थत्वात् । अतएवचोत्तरटीकायांर

मुखमितिसमस्तविग्रहोपलक्षणं । यद्यपिमंत्रेऽपावृणुवातिप्रार्थनं । अत्रतुदर्श
यतीतिस्वरूपकथनं । तथापिमंत्रतात्पर्यमात्रोक्तिरियमितिनदोषः । पुषपुष्टा
वित्यतःपूर्णत्वेनपूषेत्युक्तं । सत्यधर्मायेत्यनूद्यभक्तायेतिव्याख्यानं ॥ १५ ॥ ए
कशब्दस्यप्रधानवाचकत्वादृषज्ञानइत्यतश्चप्रधानज्ञानरूपत्वतएकर्षिरित्युक्तं ।

श्मितेजःशब्दौस्वरूपज्ञानादिपरत्वेनव्याख्यातौ । सूर्यमंडलस्यैवावरणत्वेतुतद्व्याख्यानंविरुध्येतेति । पूर्णत्वलाभायधातुसूत्रंप ठति ॥ पुषपुष्टाविंतीति ॥ पुषपुष्टावित्यतःकनिन्प्रत्ययेकित्वाद्गुणाभावेनिर्वचनत्वेनधातोर्दैर्घ्यंपूषन्निंतिभवति । अनेनजग तःपोषणात्पूषेतिव्याख्यानमपास्तं।भक्तविशेषणत्वभ्रांतिंपरिहरति॥सत्यधर्मायेत्यनूद्येति ॥१५॥ प्रधानज्ञानरूपत्वतइति ॥

उप० । पूषन्नेकर्षेयमसूर्यप्राजापत्यव्यूहरश्मीन्समूहतेजोयत्तेरूपंकल्याणतमंतत्तेपश्यामि ॥ १६ ॥

भा० । प्रधानज्ञानरूपतः । विष्णुरेकऋषिर्ज्ञेयोयमोनियमनाद्धरिः ।

अनेनभावप्रधानोनिर्देशइत्युक्तंभवति।एतेनएकएवऋषतीत्येकर्षिरित्यपास्तं।रमादिव्यावृत्त्यर्थंप्राधान्यंव्याचष्टे॥प्राधान्यंचेति॥ आदिपदेननिरतिशयस्पष्टत्वादेर्ग्रहणं । प्रसिद्धयमस्यापियत्किंचिन्नियामकत्वादाह ॥ सर्वस्येतिशेषइति ॥ सूरिशब्दोपप दस्ययातेरिति ॥ तृतीयांतेसूरिशब्देउपपदे याप्रापणइत्यस्मादातोनुपसर्गेकइतिकर्मणिकप्रत्यये आतोलोपइटिचेत्याकारलोपे निर्वचनत्वादुपपदैकारलोपेसूर्यइतिरूपमित्यर्थः । नन्वातोनुपसर्गेकइतिसूत्रस्यकाशिकायामाकारांतेभ्योनुपसर्गेभ्यःकर्मण्युपप देकप्रत्ययोभवतीतिव्याख्यातत्वादत्रकर्मणउपपदस्याभावात्कथमनेनकप्रत्ययः । किंचकर्तरिकृदितिपरिभाषयाकर्तर्येवकप्रत्यय

प्राधान्यंचज्ञानस्य सर्वविषयत्वादिनाज्ञातव्यं । नियमना त्सर्वस्येतिशेषः ।
सूर्यःससूरिगम्यत्वादित्यनेन सूरिशब्दोपपदस्ययातेरूपमिदमित्युक्तंभवति ।

स्यगांददातीतिगोदइत्यादाविवसंभवेपीहसूरिगम्यत्वादितिभाष्यानुसारेणकर्मणितदयोगादितिचेत्सत्यं । छंदस्त्वेनात्रोपाधिद्व यव्यभिचारस्यादोषत्वात् । संमतंचैतट्टीकाकारस्य । द्वितीयाध्याये आनो भजपरमेष्वित्यस्यामृचि अंतेमोक्षेमितत्वेनज्ञा नमंतममुच्यतइतिभाष्यव्याख्यानावसरे अंतेसंसारस्येतिशेषः । तस्यार्थो मोक्षइति तादर्थ्येसप्तमी । मोक्षसाधनतयेतियावत् । मितत्वेनप्रमितत्वेन । आतोनुपसर्गेकइतिटीकायामुक्तत्वात् । तत्रहिसप्तम्यंतेअंतशब्देउपपदेमाङ्मानइत्यस्मात्कर्मणिकप्रत्ययो ऽभिमतः । नचासावुक्तोपाधिद्वयस्याव्यभिचारित्वेसंभवतीति । यद्वासुपिस्थइतिसूत्रव्याख्यानावसरेकाशिकायामत्रयोगवि

भा० । सूर्यःससूरिगम्यत्वात्

भागःकर्तव्यः । सुपिआकारांतेभ्यःकप्रत्ययोभवति । द्वाभ्यांपिबतीतिद्विपइत्युक्तत्वादत्रापियोगविभागेनाकर्मणिसूरिशब्देउपपदेयातेःकर्मणिकप्रत्ययेवाधकाभावात् । नचयोगविभागाश्रयणेनोपपदनियमाभावेपिकर्तरिकृदितिपरिभाषयाकर्तर्येवकप्रत्ययःप्राप्नोतिनकर्मणीतिवाच्यं । योगविभागस्येष्टसिध्यर्थत्वेनकर्तरीत्यननुवृत्त्याकर्मण्यपितत्संभवात् । अथवा ग्रहवृदृनिश्चिगमश्चेत्येतत्सूत्रीयाद्धञर्थेकविधानमितिवार्तिकादिहकर्मणिकप्रत्ययांगीकारात् । नचघञर्थेकविधानमित्युक्त्वा स्थास्त्रागापाव्यधिहनियुध्यर्थमित्युक्तत्वेनवार्तिकस्यापिस्थास्त्रादिषुनियमितत्वात्कथंतेनापियातेःकप्रत्ययइतिवाच्यं। अभियुक्तप्रयोगानुसारेणास्यापि

प्रजापतेर्हिरण्यगर्भस्यायंप्राजापत्यइत्यभिसंधाय संबंधोदर्शितः । प्रजापतेर्गम्यत्वादिति ॥ तर्हिसूर्य इत्यनेनगतार्थत्वमित्यतउक्तं । विशेषेणैवेति ॥ एतेनप्रजापतेरपत्यमितिव्याख्यानंनिरस्तंभवति ॥ १६ ॥

तत्रोपसंख्येयत्वात् । अतएवसुधायां मायामात्रमिदंद्वैतमित्येतद्व्याख्यानावसरेघञर्थेकविधानमितिकर्मणिकप्रत्ययइत्युक्तमितिध्येयं । एतस्यैवसूर्यशब्दस्य सूर्यऊरीकृतेरयमितिबृहद्भाष्येकृतस्यव्याख्यांतरत्वान्नदोषः । ननुप्रजापतेर्गम्यत्वात्प्राजापत्यइतिव्याख्यानमयुक्तं । दित्यदित्यादित्यपत्युत्तरपदाण्ण्यइतिप्राग्दीव्यतीयेषुविहितस्यण्यप्रत्ययस्यसंबंधार्थेविधानेपि गम्यत्वार्थेअविधानादित्यतःतात्पर्यार्थत्वेनभाष्यंयोजयति ॥ **प्रजापतेरिति** ॥ **अभिसंधायेति** ॥ संबंधार्थेण्यप्रत्ययमभिप्रेत्येत्यर्थः ॥ **तर्हीति** ॥ सूर्यशब्देनसूरिमात्रगम्यत्वोक्त्याहिरण्यगर्भगम्यत्वस्यापिप्राप्तत्वादितिभावः ॥ १६ ॥ अहेयत्वादहंनामेतिप्रमाणा

भा० । प्राजापत्यःप्रजापतेः । विशेषेणैवगम्यत्वात् ॥ १६ ॥

नुसारेणभावप्रधानोनिर्देशइत्याह ॥ **अहेयत्वतइति** ॥ अहंशब्देनाहेयत्वलाभप्रकारंसूचयति ॥ **नहीयतइति** ॥ अनेनन्यूपूर्वादोहाकृत्यागइत्यस्मात्कर्मणिघञर्थेकविधानमितिवार्तिकेणकप्रत्ययेकित्त्वादातोलोपइटिचेत्यकारलोपेऽहमितिरूपनिष्पत्तिरित्युक्तंभवति । यद्यप्यस्मदादेशभूतस्याहमित्यस्यरूढत्वान्ननिर्वचनीयत्वं । तथापि हरौतद्वृत्तौनजीवाभेदोनिमित्तमितिप्रतिपादनायप्रयोजनवशान्निर्वचनंकृतमितिज्ञातव्यं । नन्वहमितिप्रथमैकवचनस्योक्तनिर्वचनलब्धाहेयत्वेननिमित्तेनभगवतिप्रवृत्तिसंभवेपि द्विवचनबहुवचनयोर्द्वितीयादिविभक्तीनांचकथमहेयत्वेननिमित्तेनभगवतिप्रवृत्तिः । तत्रनहीयतइतिनिर्वचनासंभवात् । नचभगवतिद्विवचनादिवृत्तिर्नाहेयत्वेन किंतुनिमित्तान्तरेण । अतोनैतन्निर्वचनगवेषणप्रयासइतिवाच्यं । अस्मच्छ

अहेयतः अहेयत्वतः । नहीयतइत्यहमित्यर्थः ॥

ब्दगतसप्तविभक्तीनांसर्ववचनानामप्यहेयत्वेनैवभगवतिवृत्तेःप्रमाणसिद्धत्वाद्भगवत्पादवचनसिद्धत्वाच्च । यथोक्तंबृहद्भाष्ये । मे सर्वाहेयस्यविष्णोः । अस्मच्छब्दगतैर्विष्णुर्वाच्यःसप्तविभक्तिभिः ॥ सर्वाहेयत्वतस्त्वेकइत्यादि । सर्वाहेयत्वेनाहमितिप्रथमांतशब्दवाच्यत्वसंभवेपि मइतिषष्ठ्यंतशब्दवाच्यत्वंकथमित्यतस्तत्रप्रमाणमाह ॥ अस्मदिति ॥ इतिभावबोधेअवतारितत्वाच्चेतिचेत् । अस्यार्थस्यप्रमाणज्ञेयत्वेपिनिर्वचनाज्ञेयत्वात् । निर्वचनस्यापिमहाव्याकरणरीत्यासंभवेप्याधुनिकरीत्याऽसंभवात् । अहंशब्देतुप्रसिद्धव्याकरणरीतिसंभवान्निर्वचनंकृतमितिभाति । अधिकंतुविचार्यं । अस्तितामानादित्यत्र अस्तितयामानादिति

भा० । अहंचासावहेयतः ।

तृतीयातत्पुरुषः । तृतीयाचप्रकारे । मानशब्दःप्रमापरः । निर्विशेषस्यमुख्यार्थत्वात् । सत्त्वेनप्रमितत्वस्यवस्तुमात्रसाधारण त्वादसाधारण्यायनित्येतियोग्यतयासंबध्यतइत्याशयेनव्याचष्टे ॥ नित्यसत्त्वेनेति ॥ अस्मिशब्दात्सत्त्वेनप्रमितत्वंकथंलभ्य तइत्यतआह ॥ अनेनेति ॥ असभुविमाङ्मानइत्याभ्यांडिप्रत्ययेद्वितीयधातोष्टिप्रत्ययेअस्मीतिरूपमितिभावः । ननुकथंधातु द्वयादेकःप्रत्ययः । परश्चेतिसूत्राद्धातोरितिपंचम्याचधातोरव्यवहितोत्तरमेवकार्यंभवतीतिविज्ञानात् । धातोरित्येकवचनाद पिनधातुद्वयादेकप्रत्ययोत्पत्तिरितिचेन्मैवं । धातुद्वयादपिप्रत्ययोत्पत्तेरपिभूभ्यांडुतजित्युणादिसूत्रेउक्तत्वात् । अदभक्षणेभूस

नित्यास्तितामानादिति ॥ नित्यसत्त्वेनप्रमितत्वादित्यर्थः । अनेनअसभुविमाङ्मानइत्येतयो रिदंरूपमित्युक्तंभवति । अहमस्मिशब्दोक्तत्वेपिनजीवैक्यंहरेराशंकनीयमित्याह ॥ स्वयं त्विति ॥ सर्वजीवेभ्योव्यतिरिक्तोप्यहेयत्वादियोगेनैवाहमस्मिशब्दाभ्यामुच्यतइत्यर्थः ।

त्तायामितिधातुद्वयात्डुतच्प्रत्ययेटिलोपेचसतिअद्भुतमितिरूपसिद्धंगीकारात् । नचप्रसिद्धोणादिवृत्तावदिभुवोडुतजितिसूत्रं पठित्वा अद्युपपदेभुवोधातोर्डुतज्भवतीतिसूत्रस्यव्याख्यातत्वात्कथंधातुद्वयात्प्रत्ययोभवतीत्यत्रैतत्सूत्रोदाहरणमितिवाच्यं । मूलकोशेष्वदिभूभ्यामित्येवपाठदर्शनात् । वृत्त्यंतरेअदिभूभ्यामित्येवपठित्वाव्याख्यातत्वाच्च । धातुव्यतिरिक्तस्यादित्युपपद स्याभावेनादिभुवइतिपाठस्यायुक्तत्वाच्च । निघंटुभाष्ये वेदभाष्येचधातुसमुदायादेकप्रत्ययस्यबहुशोभिहितत्वाच्च । तस्माद्धातु

भा० । अस्मिनित्यास्तितामानात्सर्वजीवेषुसंस्थितः । स्वयंतुसर्वजीवेभ्योव्यतिरिक्तःपरोहरिः ।

द्वयात्प्रत्ययांगीकारोयुक्तइति ॥ एतेनेति ॥ अहेयत्वादिनाअहमादिशब्दवाच्यत्वकथनेनेत्यर्थः ॥ मूर्तिनियमोपीति ॥ नकेवलमहेयत्वादिप्रवृत्तिनिमित्तनियमइत्यपेरर्थः । ननुसर्वजीवेषुसंस्थितइत्ययुक्तं । भगवदुपासकैरेवसाक्षात्कारार्थमहमस्मि शब्दवाच्यतयाभगवतःप्रार्थ्यमानत्वेनोपासकांतर्गतस्यैवाहमादिशब्दवाच्यतायावक्तुमुचितत्वादित्यतआह ॥ उपासकेष्वि त्यर्थइति ॥ विशिष्योक्त्याअहमस्मिशब्दवाच्यत्वएवमूर्तिनियमो नतुपूषादिशब्दवाच्यत्वइतिप्रतीतिःस्यादतआह ॥ उपल क्षणंचैतदिति ॥ एतत् अहमस्मिशब्दाभिधेयस्यहरेर्मूर्तिनियमकथनमुपलक्षणमित्यर्थः । उपलक्षणीयंदर्शयति ॥ पूषादि

एतेन नाहंत्वांभृत्यवद्याचे किंनाम योसावादित्येपुरुषःसोहमस्मीत्यपव्याख्यानमित्यु क्तंभवति । अहमस्मिशब्दाभिधेयत्वेहरेर्मूर्तिनियमोप्यस्तीत्याह ॥ सर्वजीवेष्विति ॥ उपासकेष्वित्यर्थः । उपलक्षणंचैतत् । पूषादिशब्दैरप्यादित्याद्यंतर्गतएवोच्यते ।

शब्दैरपीति ॥ यद्यप्यत्रपूषादिशब्दैः पूषाद्यंतर्गतएवोच्यतइतिवक्तव्यं । तथापिपूष्णोपिद्वादशादित्यांतर्गतत्वादादित्यांतर्ग तइत्युक्तमितिज्ञेयं । अत्रादित्याद्यंतर्गतएवोच्यतइत्येवपाठः । मूलकोशेषुतथैवदर्शनात् । एकर्षियमादिशब्दवाच्यत्वोपपादना यादिशब्दस्यावश्यकत्वाच्च । योग्यताभेदेनेत्याद्युत्तरवाक्यानुगुण्याच्च । आदित्यांतर्गतइतिकाचित्कपाठे आदित्यशब्दस्योप लक्षणत्वेनादित्याद्यंतर्गतएवोच्यतइतिव्याख्यातव्यं । अन्यथाआदित्यांतर्गतस्यपूषसूर्यशब्दवाच्यत्वसंभवेप्येकर्षियमादिशब्द वाच्यत्वासंभवादुत्तरवाक्यवैगुण्याच्च । नन्वादित्यांतर्गतभगवत्साक्षात्कारायानेकप्रतीकेषुभगवत्प्रार्थनमसंगतमित्यतस्तस्याभि

प्रायमाह ॥ योग्यताभेदेनेति ॥ अतोयुक्तंनानाप्रतीकगतभगवत्प्रार्थनमितिभावः । ननुक्रतुशब्दस्ययज्ञवाचित्वेपि ज्ञानवाचितायाअप्रसिद्धत्वात्कथंसक्रतुर्ज्ञानरूपत्वादितिव्याख्यानमित्यतोगीताभाष्योदाहृताभिधानपठनेनतद्धटयति ॥ क्रतुर्मतिर्मनीषेत्यभिधानादिति ॥ यथोक्तंगीताभाष्ये । आत्ममायया आत्मज्ञानेन । केतुःकेतश्चितिश्चित्तंक्रतुर्मतिर्मनीषामायेतिह्यभिधानमिति । इतिप्रज्ञायानामधेयानीतिवाक्यशेषादितिप्रमेयदीपिकायामुक्तत्वाज्ज्ञाननामधेयत्वंगम्यते । नचमेधादृष्टिर्धृतिर्मनीषाजूतिःस्मृतिःसंकल्पःक्रतुरसुःकामोवशइत्यैतरेयश्रुतेः । प्रकृतोपयुक्तसंबंधाभिप्रायेणायमनुवादः । प्रज्ञानस्यनामधेयानि

> अधिकारियोग्यताभेदेनखल्वनानाप्रतीकेषुभगवदापरोक्ष्यमत्रप्रार्थ्यते । क्रतुर्मतिर्मनीषेत्यभिधानात्सक्रतुर्ज्ञानरूपत्वादित्युक्तं । अंगंशरीरमप्रधानंजगद्वा नयतीत्यग्निरित्यर्थः । एवंपुराणवाक्येनतात्पर्यतोव्याख्यातान्मंत्रानिदानींस्ववाक्येनविशदय न्सत्यधर्मपदं कथंभक्तस्यवाचकमित्यतास्तन्निर्वक्ति ।

भवंतीत्युक्तत्वादभिधानादित्युक्तमितिव्याख्यानंकिंनस्यादितिवाच्यं । स्पष्टंभगवत्पादोदाहृताभिधानसद्भावेउक्तकुसृष्ट्याश्रयणस्यानुचितत्वात् । मतिर्मायासुततत्वतः । मनुनाम्नामजादीनांमनीषेशोयतोहरिः ॥ क्रतुःससर्वकर्तृत्वादित्यादिनाऐतरेयभाष्ये क्रतुमतिमनीषाशब्दानांप्रकारांतरेणव्याख्याततयाज्ञानपरत्वाभावेनतदुदाहरणस्यात्यंतासंगतत्वाच्च । तस्मादुक्तमेवव्याख्यानं युक्तमिति । किंतदंगं कथंचतत्प्रणेतृत्वमग्निशब्दार्थइत्यतआह ॥ अंगंशरीरमिति ॥ अनेनअंगशब्दोपपदात्नीञ्प्रापणइ ॥ ५७ ॥

भा० । सक्रतुर्ज्ञानरूपत्वादग्निरंगप्रणेतृतः ।

त्यस्मात्कर्तरिडिप्रत्यये निर्वचनादुपपदानुस्वाराकारयोर्लोपेअग्निरितिरूपमित्युक्तंभवति । अनन्वयशंकायांसत्यधर्मायभक्तायेतिप्रमाणानुसारेणशेषंपूरयति ॥ भक्तउच्यतइतिशेषइति ॥ ननुब्रह्माधारकत्वस्यभक्ताभक्तसाधारणत्वाद्विशिष्यभक्तउच्यत इतिशेषपूरणमयुक्तं । नचाध्याहृतहृदयपदमहिम्नाएतल्लभ्यइतिवाच्यं । हृदयपदाध्याहारस्यैवाकर्तव्यत्वात् । कर्तव्यत्वेपितेनभक्तलाभासंभवादित्यतोहृदयपदाध्याहारस्यावश्यकत्वप्रदर्शनपूर्वकंतेनभक्तलाभप्रकारंचदर्शयति ॥ अत्रसत्यमित्यादि ॥ अ

> सत्यमिति । भक्तउच्यतइतिशेषः । अत्रसत्यंब्रह्मधारयतीतिसत्यधर्मेत्युक्ते कथमनाधारंब्रह्मार्थं धारयतीतिशंकास्यात्तन्निवृत्त्यर्थं हृदयेधारयतीत्युक्तं । हृदयेब्रह्मधारणंचादरनैरंतर्योपेतं तद्ध्यानादिकमेव तच्चभक्तस्यैवसंभवतीतिभावः । सत्यस्यचतथाभूतस्यधर्मस्यानुष्ठातेतिव्याख्याने सत्यस्यापिहित मितिप्रकृतपरित्यागोदोषः ॥ १७ ॥ ततश्चायमर्थः । हिरण्मयमिवहिरण्मयंज्योतिर्मयं

नाधारमिति ॥ सभगवःकस्मिन्प्रतिष्ठितइतिस्वेमहिम्नीत्यनन्याधारत्वश्रुतेरितिभावः । अनेनापव्याख्यानंनिरस्तमित्याह ॥ सत्यस्येति ॥ इतिप्रकृतपरित्यागइति ॥ इत्यत्रसत्यशब्देनप्रकृतपरित्यागइत्यर्थः । परेणसत्यस्यादित्यमंडलस्येतिव्याख्यातत्वादस्माभिःपरमात्मनइतिव्याख्यातत्वात्पक्षद्वयेपिपरस्यप्रकृतपरित्यागइतिभावः । भा० ॥१७॥ उदकंपीयतेतेनतमसस्त्राय

भा० । सत्यंब्रह्महृदयेधारयतीतिसत्यधर्मा ॥ १७ ॥

तेजगत् ॥ यतोयःपात्रमुद्दिष्टंविद्वद्भिःसूर्यमंडलंइतिबृहद्भाष्योदाहृतप्रमाणंमनसिनिधायव्याचष्टे ॥ पिबतिरसानिति ॥ सूर्यमंडलेनेति ॥ तदुपलक्षिताज्ञानादिनाचेत्यर्थः ॥ १५ ॥ स्वरूपंबाह्यंचेति ॥ रश्मिशब्दव्याख्यानंस्वरूपंज्ञानमिति ॥१६॥ तत्वप्रदीपे अहंतत्तेजोरश्मीन्नारायणमित्येतद्व्याख्यानावसरे रतिःशंचमितमस्येतिरश्मिर्जीवइतिव्याख्यातत्वेन जीववाचकस्यरश्मिशब्दस्यतत्स्वरूपज्ञानेलक्षणामभिप्रेत्येदंव्याख्यानमितिद्रष्टव्यं । तेजःशब्दस्यव्याख्यानं बाह्यंज्ञानमिति । वृत्तिरूपंज्ञान

पिबतिरसांस्त्रायतेचजगदितिपात्रं । तेन हिरण्मयेनपात्रेणसूर्यमंडलेन। सत्यस्यसद्गुणपूर्णस्य आदित्यमंडलांतर्गतस्य तवमुखंपिहितमस्ति। हेपूषंस्तद्रपुस्त्वं सत्यधर्माय त्वद्विषयध्यानादिमते मह्यंदृष्टये ममत्वदर्शनसिद्ध्यर्थमितियावत् । अपावृणु अपगतावरणंकुरु । खं० ॥ १५ ॥ हेपूषन्नेकर्षे यम सूर्य प्राजापत्य मदीयान्रश्मीन्व्यूह । तेजश्चसमूह। स्वरूपंबाह्यंचमदीयज्ञानंविस्तारयेतियावत् । तथा चयत्तेरूपंकल्याणतमंतत्तेप्रसादादहंपश्यामीति । आदित्यरश्म्यादीनामपगमनादिनातदंतर्गत

मित्यर्थः । इदंचांतःकरणस्यतैजसत्वेनतत्परिणामरूपवृत्तेरपितेजःशब्दवाच्यत्वात् । एवंतेजःप्रातिभाख्यंबाह्यंचेतिद्विधामतमितिप्रमाणानुसाराच्चोपपद्यतइतिभावः । द्वितीयस्यतइत्यस्यपश्यामीत्यनेनसाक्षादन्वयासंभवाद्रूपमित्यनेनचाद्यस्यान्वितत्वादपेक्षिताध्याहारेणान्वयमाह ॥ तेप्रसादादिति ॥ रश्मितेजःशब्दौस्वरूपबाह्यज्ञानपरतयास्वयंव्याख्यायययत्परेणव्याख्यातं रश्मीन्स्वान्व्यूह विगमय । तेजस्तावकं समूह एकीकुरुउपसंहरेति । तद्दूषयति ॥ आदित्यरश्म्यादीनामिति ॥ आद्ये

नादिशब्दनतजसाद्वृतीयनोपसंहरणस्यचसंग्रहः ॥ ब्रह्मप्रतीत्यसंभवादिति ॥ श्रवणादिसाधनपरिपाकंअव्यक्तस्वभावस्य ब्रह्मणोनुग्रहंचविना रश्म्याद्यपगममात्रेणसाक्षात्कर्तुमशक्यत्वादितिभावः ॥ ७ ॥ ननुप्रातिपदिकमात्रस्यशब्दत्वेनव्यवहारेइतिशब्दानपेक्षायामपिविभक्त्यंतस्यतुतत्वेनव्यवहारे अस्तीतिशब्दापेक्षा । तथैवसांव्यवहारिकत्वात् । प्रकृतेचनप्रातिपदिकमात्रग्रहणं । तथात्वेएकोसुशब्दइतिवाअदसूशब्दइतिवास्यात् । किंतुविभक्त्यंतस्य । तथात्वेअसावितिशब्दइतिवक्तव्यं । तत्कथमसौशब्दइत्युक्तमित्यतः सत्यमत्रापीतिशब्दाध्याहारान्नदोषइत्याशयेनाह ॥ असौशब्दोऽसाविति शब्दइति ॥ यद्वा

ब्रह्मप्रतीत्यसंभवादादित्यरश्म्यादिविषयंव्याख्यानंनयुक्तं। खं० ॥१६॥ योसावसौपुरुषइत्यत्र हिरसाविति किमर्थमित्यतआह ॥ एकइति ॥ असौशब्दोसाविति शब्दः। इतिवक्तीतिशेषः ।

यःकश्चनासावेकःशब्दःप्राणेइत्यर्थभ्रांतिनिरासायाह ॥ असौशब्दोसाविति शब्दइति ॥ असुशब्दस्यसप्तम्यंतमिदमिति ज्ञापनाय भाष्येप्राणइतिसप्तमीप्रयोगइत्याशयेन कथंतेनतज्ज्ञापनमित्यतोपेक्षितमध्याहरति ॥ इतिवक्तीतिशेषइति ॥ एवंचअसाविति शब्दःप्राणेइत्यर्थवक्तीत्युक्त्यासप्तम्यंतोयमसुशब्दःप्राणप्रतिपादकइतिभाष्यार्थःसंपद्यते । शेषपूरणाभावेतु एकोसाविति प्रथमांतःशब्दःप्राणेवर्तते प्राणविषयतयाव्याख्यातव्यइतिभाष्यार्थःप्रतीयेतेतिभावः । भाष्ये प्राणइत्यतःपरंश्रूयमाण

भा० । एकोसौशब्दः

स्यस्थितइत्यस्यवैयर्थ्यशंकायां पूर्वभाष्यार्थविवरणपूर्वकं तद्व्यावर्त्यांशंकामुत्थापयति ॥ यद्यसुःप्राणइति ॥ असुशब्दःप्राण वाचकः । तस्यसप्तमीअसाविति । ततश्चासौप्राणे । इत्यर्थोयदिस्यादित्यर्थः ॥ अस्येति ॥ असाविति सप्तम्यंतस्येत्यर्थः । कु तइत्यतआह ॥ क्रियापेक्षत्वादिति ॥ असावित्यधिकरणसप्तमीत्वात्क्रियाश्रययोःकर्तृकर्मणोराधारस्यचाधिकरणत्वात् क्रि यापेक्षत्वमधिकरणस्येत्यर्थः ॥ क्रियाध्याहारेणेति ॥ क्रियाश्रयकर्तृवाचकस्थितपदाध्याहारेणेत्यर्थः । अत्रटीकायांस्थितइ तीत्येवप्रतीकग्रहणमुचितं । तस्यैवोक्तशंकानिवर्तकत्वात् । भाष्येपि प्राणेइत्यतःपरं स्थितइतिपाठदर्शनात् प्राणेस्थितोयःपुरु

यद्यसुःप्राणस्तस्मिन्नित्यर्थःस्या त्तर्ह्यस्यान्वयोनास्ति । क्रियापेक्षत्वा
दधिकरणस्येत्यतःक्रियाध्याहारेणान्वयंदर्शयति ॥ स्थितइति ॥

षःसोसावहमितिस्मृतइत्येतन्मंत्रव्याख्यानरूपेबृहद्भाष्योदाहृतप्रमाणेप्राणइत्यतःपरं स्थितइतिक्रियाध्याहारस्यस्पष्टत्वेनतदनु सारेणात्रापिभाष्येप्राणइत्यतःपरंस्थितइतिपाठस्यावश्यकत्वाच्च । यस्मिन्नितीतिप्रतीकग्रहणंतुप्रकृतानुपयुक्तत्वादयुक्तं । उत्तर त्रावतारिकापूर्वकंतस्यव्याख्यास्यमानत्वाच्च । नचयस्मिन्नितिवाक्यगतस्यस्थितइत्यस्यप्रकृतोपयोगाभिप्रायेणतत्प्रतीकग्रहणमि तिवाच्यं । तस्यप्रागध्याहृतानुवादरूपत्वेपिस्वयमध्याहाररूपत्वाभावेनक्रियाध्याहारेणान्वयंदर्शयतीतिटीकायाअस्वारस्यप्रसं गात् । भाष्येप्राणइत्यतःपरंस्थितइतिपाठस्यमूलकोशेषुदर्शनाच्चेति । भाष्यकृव्याख्याने असावसाविति शब्दयोरेकत्रश्रुतयोर्वै

भा० । प्राणेस्थितइति ॥

रूप्यं स्थितइत्यध्याहारंचासहमानःप्रकारांतरमाशंकते ॥ असावसाविति ॥ वीप्सार्थतयेति ॥ प्रयोक्तुर्व्याप्तिविषयाइ च्छावीप्सा तदर्थतयेत्यर्थः । योयोधूमवानसावसावग्निमानित्यादौदृष्टत्वादितिभावः । किमध्याहारादिरेवभाष्यकृव्याख्याने दोषः उतवीप्सायाअसिद्धिः । आद्येआह ॥ एवंव्याख्यानइति ॥ प्रतीकांतरस्यसर्वप्रतीकोक्तमत्वंसूचयितुंप्राणाख्येत्युक्तं । महार्थलाभादध्याहारादिर्गुणएवनदोषः । नहि मृगभयाद्बीजानामनवापःसंभवतीतिभावः । द्वितीयंदूषयति ॥ एकेनापि शब्देनेति ॥ असावितिशब्देनेत्यर्थः । योयोधूमवानितिवद्योधूमवानसावग्निमानितीत्युदाहरणवाक्यस्यापिसांव्यवहारिकत्वा

असावसावितिवीप्सार्थतयाकिंनव्याख्यायतइतिचेन्न । एवंव्याख्याने
प्राणाख्यप्रतीकांतरस्याप्युक्तिलाभात् । एकेनापिशब्देनवीप्सासिद्धेः ।

त् । अन्यथातत्रवीप्सायाअसिद्धिप्रसंगादितिभावः । नन्वेकेनशब्देनवीप्सासिद्धंगीकारेनित्यवीप्सयोरित्येतत्सूत्रविरोधः । नित्यवीप्सयोः । सर्वस्यद्वेइत्यनुवर्तते । नित्यमाभीक्ष्ण्यं वीप्साव्याप्तिप्रतिपादनेच्छा नित्येवीप्सायांचार्थेतद्वर्ततेतस्यद्वेभवतः । नित्ये पचतिपचतीत्यादि । वीप्सायां ग्रामोग्रामोरमणीयः । वृक्षंवृक्षंसिंचतीत्यादि । अत्रवीप्सायांद्विर्भावस्यविहितत्वादिति चेत् मैवं ॥ ब्राह्मणोनहंतव्यइत्यादौव्यभिचारेण नित्यवीप्सयोरित्यस्यानित्यतायादुर्घटवृत्त्यादावुक्तत्वेनात्रद्विर्भावाभावसंभवा दित्याशयात् । ननुदर्शनप्रार्थनप्रकरणे योसावित्यादिस्वरूपप्रतिपादनमसंगतमित्यतः पश्यामीतिपूर्वेणान्वयमंगीकृत्यश्रुतियो

जनाप्रकारंदर्शयति ॥ तथाचेति ॥ एवंयोसावित्यादेःपूर्वेणएकवाक्यत्वमंगीकृत्य तंचपश्यामीतिपूर्वेणसंबंधोदर्शितः । तस्मिन्पक्षेभगवद्रूपेषुभेदशंकानिवर्तकस्यान्यस्याभावात्तन्निवर्तकतयाभिन्नवाक्यतामंगीकृत्ययोजनांतरमाह ॥ अथवेति ॥ अयमत्रयोजनाक्रमः । अथवातत्रभेदशंकायामिदमाहेत्यन्वयः । तत्र प्राणाद्यनेकप्रतीकस्थभगवद्रूपेषु भेदशंकायां अधिष्ठानभेदप्रयुक्तभेदशंकायामिदमाह । योसावित्यादिवाक्यमभेदप्रतिपादनायाहेत्यर्थः । ननुपूर्वभगवतःपूषाद्यनेकप्रतीकस्थत्वोक्तावपिप्राणादिस्थत्वानुक्तेःकथंतत्रभेदशंकेत्यतउक्तं ॥ पूषादिशब्दैरुपलक्षणयेत्यादि ॥ विशिष्यलक्षणायांनियामकाभावात्पू

तथाचयोसौप्रसिद्धोसौप्राणेस्थितःपुरुषःसएवाहेयत्वनित्यसत्तामानाभ्यामहमस्मिशब्दाभिधेयस्तंचपश्यामीतिवाक्यार्थः । अथवापूषादिशब्दैरुपलक्षणयाप्राणाद्यनेकप्रतीकस्थत्वंविष्णोरुक्तं । तत्रभेदशंकायामिदमाह ॥ सर्वप्रतीकेषुस्थितएकएवेत्यर्थः । भा० ॥ १७ ॥

षादिशब्दैरित्युक्तं । अजहल्लक्षणेतिसूचनायो पलक्षणयेत्युक्तमिति । नन्वेवमपियोसावित्यादिपरिहारवाक्यासंगतिरेव । तत्र योसौ प्रसिद्धोसौ प्राणेस्थितःपुरुषः । सएवाहेयत्वनित्यास्तितामानाभ्यामहमस्मिशब्दवाच्यतयोपासकेषुस्थितइतियोजनया प्राणप्रतीकस्थस्योपासकप्रतीकस्थस्यचविष्णोरभेदोक्तावपि पूषादिप्रतीकस्थस्यतदनुक्तेरित्यतस्तद्वाक्यतात्पर्यमाह ॥ सर्वप्रतीकेष्विति ॥ एकएवेतिवदताश्रुतौतदध्याहर्तव्यमितिसूचितं ॥ भा० ॥ १७ ॥ ततश्चयोसौ प्रसिद्धोसौप्राणेस्थितः यश्चाहम

उप० । योसावसौपुरुषःसोहमस्मि ॥ १७ ॥

स्मिशब्दवाच्यतयोपासकेषुस्थितः उपलक्षणमेतत् । यश्चपूषादिशब्दवाच्यतयापूषादिषुस्थितः । ससर्वोप्येकएव नाधिष्ठानभेदप्रयुक्तभेदवान् । सर्वेषुभूतेष्वेतमेवब्रह्मेत्याचक्षतइतिश्रुतेरितियोजनोक्ताभवतीति ॥ खं० ॥ १७ ॥ वायुरनिलममृतमितिवाक्यस्यभाष्यकृद्व्याख्यानदृढीकरणायापव्याख्यानमनूद्यदूषयति ॥ वायुरनिलममृतमित्येतद्वाक्यमित्यादि ॥ इत्येतद्वाक्यमित्यस्य इतिकेचिद्व्याचक्षतेइत्यनेनान्वयः ॥ अवश्यंभाविनीति ॥ मरिष्यतःप्राणोवायुंप्रतिपद्यतइत्यस्यार्थस्यप्रार्थनाभावेपिसिद्धत्वात्प्रार्थनानुपयोगः । कथंचित्तस्यदेवतानुस्मरणरूपत्वेनप्रार्थनीयत्वेपिदेहभस्मीभावस्यातथारूपस्यावश्यंभाविनः

वायुरनिलममृतमित्येतद्वाक्यं मरिष्यतोवायुःप्राणोध्यात्मपरिच्छेदंहित्वाधिदैवमात्मानं अनिलमामृतंप्रपद्यतां । अथेदंशरीरमग्नौहुतंभस्मांतंभूयादितिकेचिद्व्याचक्षते । तदसत् ।

अवश्यंभाविन्यर्थेप्रार्थनानुपयोगात् । प्रकरणादप्युपपत्तेर्बलीयस्त्वात् । अतोलिंगव्यत्ययेन

प्रार्थनानुपयोगएवेतिभावः । ननुतत्तेपश्यामीतिप्रार्थनाप्रकरणत्वादिदमपिप्रार्थनापरत्वेनव्याख्यायते । अन्यथाप्रकरणविरोधप्रसंगादित्यतआह ॥ प्रकरणादपीति ॥ उपपत्तेरिति ॥ प्रार्थनानुपयोगरूपोपपत्तेरित्यर्थः । वायविंद्रःसोमआदित्योबृहस्पतिरित्यत्र वायुशब्दस्य पृथिव्यामृभवोलीयंते वरुणेऽश्विनावग्नावग्नयइतिभूतप्रकरणेपठ्यमानस्यभूतवायुपरत्वशंकायामिंद्रादिलयाधिकरणत्वरूपोपपत्तिविरोधेन प्रकरणंबाधित्वामुख्यवायुपरतायाः भूतेषुतच्छ्रुतेः प्रधानवायुस्त्विहवायुनामाभूतेष्विति प्रोक्तगतेपियुक्त्येत्यादिनाशास्त्रेव्यवस्थापितत्वेनप्रकरणादुपपत्तेर्बलीयस्त्वमित्यर्थः । अपव्याख्याननिराकरणफलमाह ॥ अत

इति ॥ वायुरनिलंप्रपद्यतामितिवैयधिकरण्येनव्याख्यानस्यायुक्तत्वाद्वायुरनिलममृतमित्येतानिपदानिसमानाधिकरणानिप्रथमांविभक्तिमदायैकविभक्तिकानीत्यर्थः । ननुवायुरनिलममृतमितिस्पष्टंव्यधिकरणत्वात्कथंसमानाधिकरणानीत्यतः किंभिन्नलिंगत्वाद्व्यधिकरणत्वमाशंकसे उतपुल्लिंगत्वेनसमानलिंगत्वेपिभिन्नविभक्तिकत्वात् । नाद्यः । शब्दःप्रमाणमित्यादौभिन्नलिंगानामपिविशेषणविशेष्यभावदर्शनात् । ननुतत्रोभयोर्नियतलिंगत्वेनभिन्नलिंगत्वस्यादोषत्वेपि प्रकृतेअनिलामृतशब्दयोरनियतलिंगत्वादनियतलिंगानांविशेष्यनिघ्नत्वावश्यंभावात्कथंभिन्नलिंगानांविशेषणविशेष्यभावइत्यतउक्तं लिंगव्यत्ययेनेति ॥ अनि

विभक्तिव्यत्ययेनवा समानाधिकरणान्येतानिपदानि । ननुतर्हिप्रकृतासंगता निस्युः । वायुरनिलंइतिपुनरुक्तिःस्यादित्यतआह ॥ यस्मिन्निति ॥ यस्मिन्वायौ

लममृतमितिनपुंसकयोःपुंलिंगत्वेनव्यत्ययेनेत्यर्थः । नद्वितीयइत्याह ॥ विभक्तिव्यत्ययेनेति ॥ अनिलममृतमितिद्वितीयायाःप्रथमात्वेनव्यत्ययेनेत्यर्थः । सुपूतिङुपग्रहलिंगनराणामितिस्मरणादुभयव्यत्ययोपपत्तिरितिभावः ॥ प्रकृतासंगतानीति ॥ भगवन्माहात्म्याप्रतिपादकत्वादितिभावः । यस्मिन्नित्यस्यपूर्वप्रकृतप्राणपरामर्शकत्वे यत्तदोःसमानविषयत्वात्सोप्यमृतइत्यत्रापिप्राणपरामर्शोवाच्यः । नचासौयुक्तः वायुरनिलममृतमितिश्रुतिविरोधापातात् । अतोव्याचष्टे ॥ यस्मिन्वायाविति ॥ प्राणस्यवायुत्वाकारेणवा वायोरेवबुद्ध्याप्रकृतत्वाद्वाऽयंपरामर्शइतिभावः । अयंवायुरितिभ्रमनिरासायब्रह्मशब्दप्रकृतस्यवा ।

भा० । यस्मिन्नयंस्थितःसोप्यमृतःकिमुपरः ।

बुद्ध्याप्रकृतस्यवा परामर्शइतिभावेनाह ॥ अयंपरमेश्वरइति ॥ किमुपरइत्यस्यानन्वयादपेक्षितंपूरयति ॥ अमृतइतिवक्तव्यमितिशेषइति ॥ अमृतइत्यस्यावृत्त्याकिमुपरइत्यनेनसंबंधे इतीत्यादिकमेवशेषइतिद्रष्टव्यं ॥ अस्यार्थस्येति ॥ यस्मिन्वायावयंपरमेश्वरःस्थितइत्यस्यार्थस्येत्यर्थः ॥ तात्पर्यतोव्याख्यातमिति ॥ यस्मिन्नयंस्थितइत्यनेनेतिशेषः । भाष्येनिलयनमित्येतच्छ्रौतनिलमित्यस्यव्याख्यानमितिज्ञापनायाह ॥ निलंनिलयनमिति ॥ तद्व्याचष्टे ॥ आश्रयइति ॥ ननुभाष्ये

अयंपरमेश्वरःसोपिवायुरपिअमृतः किमुपरो ऽमृतइतिवक्तव्यमितिशेषः । नन्वस्मिन्वाक्ये वायुरमृतमित्येवोच्यते । नतुयस्मिन्वायावयंस्थितइति तत्कुतःकैमुत्यं लभ्यते । नहिवायोरमृतत्वमात्रेणेश्वरामृतत्वसिद्धिरितिचेन्मैवं । अस्यार्थस्यानिलपदेनोक्तत्वात् । तत्कथमित्यतस्तात्पर्यतोव्याख्यातं तदिदानींनिर्वक्ति । अः ब्रह्मैवेति । निलंनिलयनमाश्रयः । यथाश्रुतस्यानुवादोयमित्यतोऽनिलमित्युक्तं ।

सोनिलइतिवक्तव्यं वायुविशेषणत्वात् । नचश्रुत्यनुसारेणानिलमित्युक्तिरितिवाच्यं । लिंगविभक्तिव्यत्ययेनतत्राप्यनिलइतिव्याख्यातव्यत्वस्योक्तत्वादित्यतआह ॥ यथाश्रुतस्येति ॥ लिंगादिव्यत्ययरहितस्येत्यर्थः । भाष्येयथाश्रुतानुवादोपि अदोषत्वादइत्युक्तोवायुस्तन्निलयोयतः । अनिलंततएवासावमृतंचेतिकीर्त्यतइत्यन्यत्रोदाहृतप्रमाणानुसारेणेतिज्ञातव्यं । अत्रप्रमाणे

भा० । अःब्रह्मैवनिलयनंयस्यवायोःसोनिलं ।

अइत्युक्तइत्यतःपरंहरिरितिशेषोद्रष्टव्यः ॥ अनेनेति ॥ अनिलशब्दस्ययौगिकत्वाश्रयणेनवायुरनिलमितिपुनरुक्तिःपरिहृतेत्यर्थः ॥ तत्कथमिति ॥ यस्मिन्नयंस्थितइत्यादेरप्यनिलपदार्थत्वस्योक्तत्वात् विरुद्धयोश्चैकपदार्थत्वासंभवादितिभावः । अस्मिन्पक्षेनियामकत्वेनेत्यध्याहारोभवतीत्यतः तदाश्रयोपिह्यमृतःकिमुसाक्षात्स्वयंहरिरित्यन्यत्रोदाहृतप्रमाणानुसारेणपक्षांतरमाह ॥ अथवेति ॥ ननुयच्छब्देनपरमेश्वरपरामर्शे सोपीतितच्छब्देनतस्यैवग्रहणावश्यंभावेनकिमुंपरइतिकैमुत्योक्तिरयुक्ता अनेनपुनरुक्तिरपिपरिहृताभवति । ननुयस्मिन्नयंस्थितइत्यनेनवायुरीश्वराश्रयइत्युक्तं । अनेननिर्वचनेनेश्वरोवायोराश्रयइतिलक्ष्यते । तत्कथमनिलपदार्थोसाविति चेन्मैवं । यस्मिन्नयंस्थितइत्यनेनापियस्मिन्वायावयंपरमेश्वरोनियामकत्वेनस्थितइति वायोरीश्वराश्रितत्वस्यैवकथितत्वात् । अथवा यस्मिन्परमेश्वरेऽयंवायुःस्थितः यदधीनोवर्ततइतियावत् । सवायुरपि यदामृतः तदाकिमुवक्तव्यंसपरोमृतइतिव्याख्येयं । भा० ॥ १८ ॥ ततश्चेदमुक्तंभवति ॥ सोहमस्मीतिजीवांतर्गतस्यपरमेश्वरस्यनित्यास्तित्वंकल्याणतमरूपत्वंचोक्तं । तन्नयुक्तं । प्रत्यक्षतएवदेहस्यभस्मांतत्वदर्शनात् । स्यादित्यतस्तात्पर्यार्थमाह ॥ यदधीनइति ॥ अनेन यदाश्रयोपीतिप्रमाणस्यापीदमेवतात्पर्यमित्युक्तंभवति ॥ भा० ॥ १८ ॥ ननुवायुरनिलममृतमितिविशेषणानाममृतत्वरूपभगवन्माहात्म्यप्रतिपादकत्वेपि तत्प्रतिपादनस्यकापूर्वेणसंगतिः । अथेदंभस्मांतंशरीरमित्यस्यतुसर्वथानोपयोगंपश्यामइत्यतआह ॥ ततश्चेदमुक्तंभवतीति ॥ कल्याणतमरूपत्वंचेति ॥ इदंचाहे

यत्वोक्तिलब्धमितिज्ञातव्यं । यद्वाआदित्यांतर्गतस्योक्तंकल्याणरूपत्वंसर्वजीवांतर्यामिसाधारणमित्यभिप्रेत्येदमुक्तं ॥ मरणादीति ॥ आदिपदेनदुःखादिप्रयुक्तमकल्याणरूपत्वंद्रष्टव्यं । तथापीत्यादि प्रसंगइत्यंतंश्रुतौशेषकथनं ॥ परमेश्वरइति ॥ अचिंत्यैश्वर्यवानित्यर्थः । अनेनजीववदितिदृष्टांतवैषम्यमुक्तंभवति । यद्वापरमेश्वराश्रितस्यवायोरमृतत्वोक्त्यैवाचिंत्यशक्तिमत्त्वे देहनाशेचतदंतर्गतस्यपरमेश्वरस्यजीववन्मरणाद्यवश्यंभावादित्याशंक्येदमुक्तं । वायुरनिलमिति ॥ अयमर्थः । यद्यपीदंशरीरंभस्मांतं । तथापितदंतर्गतस्यपरमेश्वरस्यनमरणादिदोषप्रसंगः । कुतः अनिलः परमेश्वराश्रितोवायुरपि यदामृतः । अथतदा परमेश्वरः किंवक्तव्यइति तदमृतत्वस्यकैमुत्यसिद्धत्वादिति ॥ ननुसंसारिणोवायोःकथममृतत्वं संभवति । यद्युपचारेण तर्हिईश्वरस्यापिकिंतथाविधममृतत्वमस्तीत्याशंकां स्मृत्यैवपरिहरति ॥ अतिरोहितेति ॥ देहनाशेपितत्कार्यविज्ञानतिरोभावाभावसादृश्यादित्यर्थः । नजीववैषम्यमुक्तमितिज्ञातव्यं । नन्वेतच्छंकायाःपूर्वार्धेनैवपरिहारादुत्तरार्धवैयर्थ्यमित्यतस्तद्व्यावर्त्यमाह ॥ यदीति ॥ अतिरोहितविज्ञानादित्येतद्वायोरमृतशब्दवाच्यत्वेनिमित्तकथनमितिभ्रमनिरासायव्याचष्टे ॥ विज्ञानतिरोभावेति ॥ अनेन

उप० । वायुरनिलममृतमथेदंभस्मांतंशरीरं ॥ १८ ॥
भा० । अतिरोहितविज्ञानाद्वायुरप्यमृतःस्मृतः ।

नामृतशब्दस्यवायौमुख्यवृत्तिः । येनसंसारित्वविरोधः । किंतुगौणी । तत्रयोगप्रदर्शनायातिरोहितेत्यादिविशेषणमित्युक्तंभवति । विज्ञानंचनस्वरूपमित्याशयेनोक्तं तत्कार्येति ॥ देहकार्येत्यर्थः । वृत्तिरूपेतियावत् । अत्रविज्ञानतिरोभावाभाववत्त्वेनैववायोर्मुक्तसादृश्यं । तच्चविज्ञानंमुक्तानांस्वरूपभूतं वायोस्तुवृत्तिरूपमितियोज्यं । ननुवृत्तिज्ञानतिरोभावाभाववत्वेनैवसादृश्यं । मुक्तेषुवृत्तिज्ञानप्रसक्तेरभावात् । ननुवृत्तिज्ञानतिरोभावाभावस्यरुद्रादिसाधारणत्वात्कोविशेषोवायोरित्यतउक्तं देहनाशेपीति । प्रलयेदेहनाशेपीत्यर्थः । अतएवोक्तमन्यत्रभगवत्पादैः । प्रलयेप्यविलुप्तज्ञानोवायुरिति । प्रलयेपिप्रतिभातपरावरः । मुख्यवायुर्नित्यसमइतिच । रुद्रादीनांतुप्रलयेवृत्तिज्ञानतिरोभावएवेतिभावः । अत्रवायोरिवभारत्याअपिप्रलयेवृत्तिज्ञानतिरोभावाभावोज्ञातव्यः । वियदधिकरणे अथहवावनित्यानिपुरुषःप्रकृतिरात्माकालइति । अथयान्यनित्यानि प्राणःश्रद्धाभूतानिभौतिकानिइत्येतद्व्याख्यानावसरेतत्वप्रकाशिकायां । आत्मापरमात्मा पुरुषादिपदैःजीवचैतन्यप्रकृतिस्वरूपकालप्रवाहाउच्यंते । तदभिमानिप्रकृतिश्च । प्राणोमुख्यवायुः श्रद्धातत्पत्नी । पुरुषपदेनगृहीतयोरप्यनयोश्चैतन्यमात्रादधिकमपिनित्यमस्तीतिदर्शयितुंपुनःसपरिकरयोर्ग्रहणमित्युक्तं । चैतन्यमात्रादधिकंचवृत्तिज्ञानमेव । एतदुत्तराधिकरणांतेतत्वप्रकाशिकायां । अत्रवायोःपरात्परनित्यत्वं स्वातंत्र्यलक्षणंदेहादेरपिनित्यत्वंचनास्त्येव । तथापिसम्यगनित्यताशून्येभ्योवियदादिभ्यःस्वरूपातिरिक्तज्ञाननित्यत्वाभिप्रायेणातिशयेननित्यतोच्यतइत्युक्तत्वात् । ननुप्रलयेवृत्तिज्ञानतिरोभावाभावेवायोःसुस्थनुपपत्तिः । वृत्त्युपरमस्यैवसुप्तित्वात् । नचनास्त्येववायोःप्रलयेसुप्तिरितिवाच्यं । सुषुप्तिसंस्थान्ब्रह्मादिकानितितदुक्तिविरोधापातात् । ब्र

॥ ६३ ॥

ह्मग्रहणेनवायोरपिगृहीतत्वात् । नचब्रह्मादिकानित्यतद्गुणसंविज्ञानोबहुव्रीहिः । सुप्तास्तत्रयतोजीवाःसर्वेब्रह्मशिवादिकाइतिविशेषप्रमाणविरोधादितिचेत् मैवं । यतस्तेषांसाऽस्मत्स्वप्नावस्थासदृशी । मनोवृत्तेःसद्भावात् । बाह्यव्यापाराभावाच्च । एवंचस्वप्नसुषुप्त्युभयसाधारणसुप्तिशब्दस्यतस्यामवस्थायांगौण्यावृत्त्याप्रयोगः । सुप्तिशब्दस्योभयसाधारणत्वंकुतइतिचेत् । उक्तंचबृहद्भाष्ये स्वप्नसुषुप्त्युभयाभिप्रायेण तानिसुप्तइत्युक्तमिति । उक्तंचषट्प्रश्नभाष्यटीकायां । स्वापोद्विविधः । स्वप्नःसुषुप्तिश्चेतीति । ततश्चवायोर्वृत्तिज्ञानाविरोधिस्वप्नएवप्रमाणेसुषुप्तिशब्दार्थोनतुवृत्तितिरोभावरूपाप्रसिद्धासुप्तिरतोनकश्चिद्दोषः । ननुप्रलयेऽन्येषामपिजीवानांमनोवृत्तिसद्भावेनकथंवायोरेवायंविशेषः । नचतत्रप्रमाणाभावः । यएषुसुप्तेषुजागर्तिकामंकामंपुरुषोनिर्ममाणइतिश्रुतेःपरमेश्वरस्यस्वाप्नपदार्थस्रष्टृत्वेनिर्मातारमितिसूत्रभाष्येप्रमाणत्वेनोपन्यासात् । एषुजीवेषुप्रलयादिषुसुप्तेष्वितिकाठकभाष्येप्रलयपरत्वेनास्याएवश्रुतेर्व्याख्यातत्वाच्च । तदुभयपर्यालोचनयाचप्रलयेपरमेश्वरस्यस्वाप्नपदार्थानिर्मातृत्वसिद्धिसंभवात् । नचप्रलयेनिर्माणमात्रमत्रोच्यते । नतुतत्कालीनमितिवाच्यं । भुंजानोनोत्सृजेद्वाचमित्यादाविवप्रकरणप्राप्तत्वात् । स्वाप्नपदार्थज्ञानंचवृत्तिरूपमेवेतिसिद्धोऽन्येषामपिप्रलयेवृत्तिसद्भावइतिचेन्मैवं । सुप्तिष्वित्यत्रसुप्तिशब्देनेदानींतनसुप्तिविवक्षायांस्वाप्नपदार्थनिर्माणस्य प्रलयकालीनसुप्तिविवक्षायांब्रह्मादिमनोवृत्तेः कालक्षणादेश्चनिर्माणस्यश्रुत्यर्थतयाविवक्षितत्वेनसर्वजीवानांप्रलयेस्वाप्नपदार्थनिर्माणासिद्धेः । तस्मात्प्रलयेवृत्तिज्ञानतिरोभावाभावोवायोरेवेतियुक्तमिति । नन्वतिरोहितविज्ञानादित्यस्यबहुव्रीहित्वेनवायुपरत्वात्तेनसादृश्यंविरुद्धं । तिरोभावाभावसादृश्यादित्यर्थइतिचायुक्तमित्यतआह ॥

अतिरोहितविज्ञानादितिभावप्रधानइति ॥ अतिरोहितविज्ञानस्यवायोर्भावोविज्ञानतिरोभावाभावएव अतोयुक्तंतेनसाद्दृश्यमुक्तंव्याख्यानंचेतिभावः । परमात्मेत्यादिविशेषणद्वयस्यवैयर्थ्यंपरिहरति ॥ परमात्मेति ॥ रामः देहनाशादिरहितः । परमचेतनत्वात्सनातनत्वाच्चेति तत्रमुख्यामृतत्वेयुक्तिद्वयमित्यर्थः । ननुसनातनत्वंनामनित्यत्वंदेहनाशादिरहितत्वमेवेतिसाध्यावैशिष्ट्यमितिचेत् मैवं । नादेनसहितःसनादनःसनादनएवसनातनः । तृतीयोतिशयेइतिसूत्रात् । देहनाशादिरहितत्वेनश्रुतिप्रमितइतियावत् । अतोनसाध्यवैशिष्ट्यं । उक्तंच नित्यःसर्वगतःस्थाणुरचलोयंसनातनइत्यत्रनित्यपदेनपौनरुक्त्यमाशंक्यगीता

अतिरोहितविज्ञानादितिभावप्रधानोनिर्देशः । मुख्यामृतः देहनाशादिरहितः । परमात्मासनातनइतितत्रयुक्तिद्वयं ॥ खं० ॥ १८ ॥

तात्पर्यनिर्णये नादेनसहवर्ततइतिसनादनएवसनातनइति ॥ **ततश्चयोसावसावित्यादिसार्धमंत्रस्यायमर्थः** ॥ प्राणादिप्रतीकस्थंभगवंतंप्रार्थयते ॥ **योसावित्यादि** ॥ योसौप्रसिद्धोऽसौप्राणवाचकस्यासुशब्दस्यसप्तम्यंतमिदं । प्राणेनियामकतयास्थितःपुरुषःसएवोपासकांतर्गतो अहं अहेयत्वादहंशब्दवाच्यः । अस्मि नित्यास्तित्वेनप्रमितत्वादस्मिशब्दवाच्यस्तंचपश्यामि । अथवापूषन्नित्यादिनापूषादिशब्दैरुपलक्षणयाप्राणाद्यनेकप्रतीकस्थत्वंविष्णोरुक्तं तत्रभगवतोधिष्ठानभेदप्रयुक्तभेदशंकायां योसावित्याद्यर्धःप्रवर्तते । योसौप्रसिद्धोऽसौप्राणेस्थितः यश्चाहमस्मिशब्दवाच्यतयोपासकेषुस्थितः । उपलक्षणमेतत् । यश्च

भा० । मुख्यामृतःस्वयंरामःपरमात्मासनातनःइति रामसंहितायां ॥ १८ ॥

पूषादिशब्दवाच्यतयापूषादिषुस्थितःससर्वोप्येकएव । नाधिष्ठानभेदप्रयुक्तभेदवान् । ननुसोहमस्मीतिजीवांतर्गतस्यपरमेश्वरस्यनित्यास्तित्वमहेयत्वेनकल्याणतमरूपत्वंचोक्तं । तन्नयुक्तं । प्रत्यक्षतएवदेहस्यभस्मांतत्वदर्शनात् । देहनाशेचतदंतर्गतस्यजीववन्मरणाद्यवश्यंभावादित्याशंकानिरासायोक्तं वायुरनिलमित्यादि ॥ यद्यपीदंशरीरंभस्मांतं । तथापिनतदंतर्गतस्यपरमेश्वरस्यमरणादिदोषप्रसंगः । कुतइत्यतःकैमुत्येनपरमेश्वरस्यामृतत्वसिद्धेरित्याशयेनोक्तं वायुरनिलममृतमिति ॥ अनिलंव्यत्ययेनानिलः । अःब्रह्मैव निलंनिलयनंआश्रयोयस्यासौतथोक्तः । परमेश्वराश्रितोवायुरपि यदामृतंअमृतः अथतदापरमेश्वरोअमृतइतिकिमुवक्तव्यमिति ॥ खं० १८ ॥ विशकलिततयाटीकोक्तस्यमंत्रार्थस्यबुद्ध्यारोहायसंग्रहान्नदोषःशंकनीयः । ए

अथप्रणवप्रतीकंप्रार्थयते ॥ ॐमिति ॥ ओतत्वादिगुणयुक्त क्रतोमांस्मर ।

वमन्यत्रापि । उत्तरंभाष्यमवतारयितुमोमित्यादिश्रुतिप्रतिपाद्यंतावदाह ॥ **अथप्रणवप्रतीकमिति** ॥ प्रणवप्रतीकमितिबहुव्रीहिः । भगवंतमितिशेषः । अग्निप्रतीकंभगवंतमितिवक्ष्यमाणत्वात् । ॐओंप्रतीकात्मकेतिव्याख्यानं 'अकारवाच्येन तत्पदार्थेनोकारवाच्यस्यत्वंपदार्थस्याभेदोमकारेणोच्यतइतिव्याख्यानंचानुपपन्नमप्रामाणिकत्वात् । प्रमाणविरुद्धत्वाच्चेत्याशयेन ओतमत्रजगद्यस्मादोंतस्माद्भगवान्हरिरित्यादिप्रमाणंमनसिनिधायव्याचष्टे ॥ **ओतत्वादिगुणेति** ॥ जगदाधारत्वादिगुणयुक्तेत्यर्थः ॥ **मांस्मरेति** ॥ अनेनश्रुतौमामित्यध्याहर्तव्यमित्युक्तंभवति । ततश्चक्रतोस्मर । यन्ममकर्तव्यंतस्यकालोयंप्रत्युपस्थि

उप० । ॐक्रतोस्मरकृतꣳस्मर । ॐक्रतोस्मरकृतꣳस्मर ॥ १९ ॥

तः । अतस्तत्स्मरेतिव्याख्यानमयुक्तं । कृतश्रवणादिकेनमोक्षार्थसाक्षात्कारायभगवदनुग्रहस्यप्रार्थनीयत्वेपि स्वकर्तव्यस्मरण स्याप्रार्थनीयत्वात्भगवतःस्मरणासंभवेनतत्प्रार्थनानुपपत्तेश्चेतिभावः ॥ ध्यानादिकंचेति ॥ अनेन अग्नेयन्मयाबाल्यप्रभृतिअनुष्ठितंकर्मतच्चस्मरेतिव्याख्यानमयुक्तमित्युक्तंभवति । भक्तानामितिकर्तरिषष्ठीतिभ्रमनिरासायाह॥ भक्तकर्मकमिति ॥

मयाकृतंच ध्यानादिकंचस्मरेति । अभ्यासस्तात्पर्यार्थः । अत्रस्मरणंनामप्रसिद्धमेवेतिप्रतीतिंस्मृत्यैवपरिहरति ॥ भक्तानामिति ॥ भक्तकर्मकंयद्विष्णोःस्मरणं तदनुग्रहोन्मुखत्वमेव । विष्णोयःस्मरणशब्दःप्रयुज्यतेसस्मरणकार्यानुग्रहोन्मुखत्वएव लक्षणयावर्ततइतियावत् । नैवान्य त्संस्कारकारणकंज्ञानमित्यर्थः । नकेवलंभक्तविषयएवं किंतुसर्वत्रापीत्युक्तं ॥ क्व चिदिति ॥ कुतः नित्यज्ञप्तिस्वरूपतः । स्मरणंह्यनुभवनाशे तज्जन्यसंस्कारसहकृतेनमनसा जायते । ईश्वरश्चनित्यज्ञानस्वरूपइतितस्यस्मरणासंभवाल्लक्षणाश्रयणमितिभावः ॥ १९ ॥

अनेनकर्मणिषष्ठीत्युक्तंभवति ॥ अनुग्रहोन्मुखत्वमेवेति ॥ अनेनैवशब्दसंबंधोदर्शितः । नन्वनुग्रहोन्मुखत्वं नस्मरणाभिन्नं । नापितत्पदवाच्यं । तत्कथंसामानाधिकरण्यमित्यतआह ॥ विष्णाविति ॥ शक्यसंबंधसूचनायस्मरणकार्येत्युक्तं । मुख्यार्थानुपपत्त्यभावान्नलक्षणांगीकार्येत्याशयेनशंकते ॥ कुतइति ॥ १९ ॥ अग्नेनयेतिप्रार्थनस्यपूर्वेणसंगतिमाह ॥

भा० । भक्तानांस्मरणंविष्णोर्नित्यज्ञप्तिस्वरूपतः । अनुग्रहोन्मुखत्वंतुनैवान्यत्कचिदिष्यतइतिब्रह्मतर्के ॥ १९ ॥

साक्षात्कारेति॥भाष्ये त्वदत्तयत्यतद्भागवतेभगवंतंप्रतिध्रुवस्यवचनं । नन्वस्मानल्पीकुर्वदित्ययुक्तं । अस्मानित्यस्यनयेत्यनेनान्वितत्वादित्यतआह ॥ अस्मानित्यन्वयसिध्यर्थमावर्तितमिति ॥ अस्मानित्यावर्तितमित्यन्वयः । आवर्तनप्रयोजनकथनमन्वयसिद्ध्यर्थमिति । जुहुराणमित्यस्यान्वयसिद्ध्यर्थमित्यर्थः । अस्मानित्यस्यान्वयसिद्ध्यर्थमावर्तितमितिपाठे । अस्यजुहुरा

साक्षात्कारप्रार्थनानंतरमग्निप्रतीकंभगवंतंमोक्षार्थंप्रार्थयते ॥ अग्नइति ॥ वयुनानिकर्माणीतिकेषांचिद्व्याख्यानं तदसत् । मोक्षस्यकर्मसाध्यत्वाभावेनतदुक्तेर्वैयर्थ्यप्रसंगादित्यभिप्रेत्य वयुनशब्दार्थमाह ॥ वयुनमिति ॥ वयुनशब्दस्यज्ञानवाचित्वंकुतइतिचेत्प्रयोगंदर्शयति ॥ त्वदत्तयेति ॥ जुहुराणं कुटिलमित्यन्यथाप्रतीतिनिरासायाह ॥ जुहुराणमिति ॥ अस्मानित्यन्वयसिद्ध्यर्थमावर्तितं । युयोधीत्यप्रतीतार्थपदंव्याख्याति ॥ युयोधीति ॥ कुतोयंपदद्वयार्थइत्यतःसमाख्यानादित्याह ॥

णमित्यन्वयसिद्ध्यर्थमस्मानित्यावर्तितमितियोजनाद्रष्टव्या ॥ समाख्यानादित्याहेति ॥ यद्यपिभाष्ये पूर्वार्धेनैवपदद्वयंव्याख्यातं । तथापि समाख्यानत्वज्ञापनायास्मानित्यावृत्तेःग्रामाणिकत्वज्ञापनायचोत्तरार्धोदाहरणमितिज्ञातव्यं ॥ धातुसूत्रमि

उप० । अग्नेनयसुपथारायेअस्मान्विश्वानिदेववयुनानिविद्वान् । युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांतेनमउक्तिंविधेम ॥ २० ॥

भा० । वयुनंज्ञानं त्वदत्तयावयुनयेदमचष्टविश्वमितिवचनात् । जुहुराणंअस्मानल्पीकुर्वत् । युयोधिवियोजय

ति ॥ धातुव्याख्यानरूपंसूत्रमित्यर्थः । ननुयुयुइत्यस्यधातुत्वेपि विशिष्टस्यतदभावाद्धातुरित्ययुक्तमित्यतआह ॥ धात्विति ॥ भा० ॥ २० ॥ अर्चिरादिमार्गेणेति ॥ एतच्चोपलक्षणं । स्वोत्तमदेवतासुलयेनचेत्यपिद्रष्टव्यं । यथाश्रुते स्वायंभुवादिदेवानामर्चिरादिमार्गरहितानांप्रार्थनानुपपत्तेः ॥ मोक्षाख्यवित्तायेति ॥ अनेनराये धनाय । कर्मफलभोगायेत्यर्थइतिव्याख्यानमपास्तंभवति ॥ नयनोमोक्षवित्तायेतिसमाख्याविरुद्धत्वात् । एतदर्थंचोत्तरार्धोदाहरणंकृतं । विश्वंपूर्णमिहोच्यतइतिप्रमाणानुसारेणाह ॥ संपूर्णानीति ॥ भगवदितरेषामसंपूर्णज्ञानत्वादाह ॥ मोक्षायेति ॥ प्रारब्धपुण्यस्यापिमोक्षप्रतिबंधकत्वात्पापमात्रग्रहणमयुक्तमित्यतोविशेषशब्दस्यसामान्येलक्षणेत्यभिप्रेत्याह ॥ कर्मेतियावदिति ॥ प्रारब्धपुण्यपापात्मकमित्यर्थः ॥ अनिष्टमिति ॥ परमपुरुषार्थविरोधीत्यर्थः । एतच्चस्वरूपकथनं । संचितेष्टनाशस्यापुरुषार्थत्वेनसंचितानिष्टपुण्यस्यैवनाश्यत्वेनसंचितपुण्येइष्टानिष्टपुण्यविभागसद्भावेपिप्रारब्धेपुण्यमात्रस्यभोगनाश्यत्वेनव्यावर्त्याभावादितिज्ञेयं ॥ वियोजयेति ॥ भोगेननाशयेत्यर्थः ॥ भूयिष्ठामिति ॥ भक्तिज्ञानाभ्यामितिशेषः । तेनभूयिष्ठांबहुतरामितिव्याख्यानंनिरस्तंभवति । नमउक्तिं नमइत्युक्तिं । इतिशब्दस्यततश्चायमर्थइत्यनेनान्वयः ॥ समापितभाष्योपीत्यपिपदेननभगवतोभाष्यकारस्य समाप्त्युद्देशेननत्याद्यनुष्ठानं । येनसमाप्त्यनंतरंतद्व्यर्थमितिशंक्येत । किंतुस्वभावइतिसूचयति ॥ २० ॥ भाष्ये पूर्णेत्यादिविशेषणद्वयोपादानस्याभिप्रायमाह ॥ यत्तेरूपमित्यादि ॥ अत्रपूर्णशक्तीत्याद्येनविशेषणेन यत्तेरूपंकल्याणतममित्येतत्प्रतिपादितस्यनारायणस्यस्तुतिःकृताभवति । रूपशब्दंमूर्तिपरतयाव्याख्याय मूर्तेःकल्याणतमत्वस्यपूर्णशक्त्याद्यात्मकत्वकथनेनोपपादनात् । ममाभ्यधिकमित्रायेतिद्वितीयविशेषणेन योसावसौपुरुषइतिप्राणप्रतीकस्थतयोक्तनारायणस्यस्तुतिःकृतावेदितव्या । अधिकमित्रत्वोक्त्या प्रतीकांतरेभगवदुपासनापेक्षयाप्राणप्रतीकेभगवदुपासनस्यभगवदतिप्रीतिहेतुत्वेनावश्यकत्वोपपादनादि

भा० । यदस्मान्कुरुतेऽत्यल्पांस्तदेनोऽस्मद्वियोजय । नयनोमोक्षवित्तायेत्यस्तौद्यङ्गमनुःस्वराडितिस्कांदे । युयुवियोगइतिधातुः । भक्तिज्ञानाभ्यांभूयिष्ठांनमउक्तिंविधेम ॥ २० ॥

तिद्रष्टव्यं ॥ स्तुतिनतिभ्यामिति ॥ नमइत्युक्तेर्नतित्वंप्रागेवसमर्थितं वेदितव्यं । मूर्तेःपूर्णशक्त्यादिनिर्मितत्वादिप्रतीतिर्नि
रस्यन्स्पष्टपदव्यावर्त्यमाह ॥ पूर्णशक्तीत्यादि ॥ करचरणादिमतीत्यर्थइति ॥ अत्रच सज्ज्ञानानंदश्रीर्षोसावित्यादिप्र
माणंपूर्वोदाहृतमनुसंधेयं । ननुप्रत्युपकारनिरपेक्षयोपकारकृत्सुहृ त्क्लेशस्थानंनिरूप्ययोरक्षांकरोतिसमित्रमितिगीताभाष्ये अ
निमित्तस्नेहवांस्तुसुहृज्ज्ञात्वोपकारकृत् । मित्रमित्यादिगीतातात्पर्येचमित्रादिलक्षणमुक्त्वा सुहृदेषुविशिष्यतइतिसुहृदोमित्रापे
क्षयाआधिक्यस्योक्तत्वादत्रापिममाभ्यधिकसुहृदेइतिवक्तव्यं । तत्कथंमित्रायेत्युक्तमित्यतोभ्यधिकमित्रत्वोक्त्यासुहृत्त्वमेवोक्तंभ

इत्यादिनाप्रतिपादितंनारायणंस्तुतिनतिभ्यांप्रीणयति ॥ पूर्णेति ॥ पूर्णशक्तिश्चिदानंदश्रीतेजांस्ये
वमूर्तिर्यस्येत्युक्ते करचरणादिमान्विग्रहोनास्तीतिप्रतीतिःस्यात् । अतउक्तं॥ स्पष्टेति॥ स्पष्टाप्रसि
द्धाकरचरणादिमतीत्यर्थः । अभ्यधिकमित्रं निरतिशयोपकारकं । अतिपरमप्रीतिविषयश्चेति ॥७॥

वतीत्यभिप्रेत्यसुहृच्छब्दसमानार्थतयातत्पदंव्याचष्टे ॥ अभ्यधिकमित्रंनिरतिशयोपकारकामिति ॥ निरतिशयोपकारश्च
स्वस्यसंसारावस्थायामेववायुरनिलममृतमित्युक्तामृतत्वप्रदानरूपोतिविशदानादिसार्वज्ञप्रदानादिरूपश्च । यथोक्तं । भक्तानुकं
पादतिशुद्धसंविद्दात्रइति । तद्व्याख्यातंसुधायां । भक्तेमय्यनुकंपादिति ॥ प्रेयसेमेसुपूर्णायेत्यादिभगवत्पादोक्तिंमनसिनिधाय
प्रकारांतरेणव्याचष्टे ॥ अतिपरमप्रीतिविषयश्चेति ॥ इतिशब्दःसमाप्तौ ॥ अथसमापितभाष्यव्याख्यानोभगवांष्टीकाका

भा० । पूर्णशक्तिश्चिदानंदश्रीतेजःस्पष्टमूर्तये । ममाभ्यधिकभिन्नायनमोनारायणायते ॥

रोमंगलांतानिकार्याणिवीर्यवंतिभवंतीत्युक्तवादंतेपिस्तुतिनतिभ्यांभगवंतंप्रीणयति ॥ कमलेति ॥ परमेष्टत्वाद्विष्णोरेववंद्यत्व
मित्यभिप्रायेणकमलेत्याद्युक्तं । अनेनकमलापिवंदिताभवति । विशिष्टत्वाच्चतस्यैवतदित्याशयेनपरमात्मनइत्युक्तं । आत्मश
ब्दश्चेतनपर्यायः । विशिष्टत्वोपपादनायोक्तं ॥ जगज्जनिस्थेमहेतवइति ॥ स्थेमस्थितिः संहाराद्युपलक्षणमेतत् । केचित्तुन
पालकत्वंभगवतोस्ति सृष्टिसंहारकर्तृत्वात् । सत्यांचसृष्टौयावत्संहारंजगत्स्थितेःस्वतएवसिद्धेः । संहर्तुरसंहारव्यतिरिक्तस्यैवर
क्षादिरूपस्यायोगात् । अन्यस्यतुसृष्ट्यादिकर्तृत्वेसंभवतिनिवारणादिव्यापारः । एतेनावांतरोपद्रवनिवारणंचप्रत्युक्तं । तत्रापि
स्वयंकर्तृत्वात् । अतोनविष्णोःपालकत्वमितिवदंति । तन्न । असंहारव्यतिरिक्तस्यधारणपोषणादिव्यापारस्य नैतावदेनापरो

कमलावदनांभोजराजहंसायविष्णवे । नमोजगज्जनिस्थेमहेतवेपरमात्मने ॥ ७ ॥

अन्यदस्त्युक्षासद्यावापृथिवीबिभर्तीत्यादिश्रुतिसिद्धत्वेन पालकत्वस्यावश्यमंगीकार्यत्वादित्याशयेन स्थेम्नःस्वशब्देनोपा
दानं । यद्यप्यजिरशिशिरशिथिलस्थिरेत्युणादिसूत्रेणस्थाधातोःकिरच्प्रत्यये आतोलोपइतिधात्वाकारलोपेचनिष्पन्नस्यदृढार्थ
स्थिरशब्दस्यदृढादित्वेनवर्णदृढादिभ्यइतीमनिच्प्रत्यये प्रियस्थिरेत्यादिनास्थादेशेनिष्पन्नस्यस्थेमशब्दस्यदार्ढ्येप्रसिद्धिर्नतुस्थि
तौ । तथापि उणादयोबहुलमितिबहुलग्रहणात्जनिमवेमेत्यादिवत्स्थाधातोर्भावेइमनिच्प्रत्ययेगुणेचनिष्पन्नस्थेमशब्दस्यस्थि
त्यर्थत्वोपपत्तेः । अखिलभुवनजन्मस्थेमभंगादिलीलेविनतविविधभूतव्रातरक्षैकदीक्षे ॥ श्रुतिशिरसिविदीप्तेब्रह्मणिश्रीनिवासेभ
वतुममपरस्मिन्शेमुषीभक्तिरूपेतिरामानुजनांदीश्लोके द्राघीयांसःसंहतास्थेमभाजइत्याद्यन्यत्रापिस्थितावभियुक्तप्रयोगाच्च ।

एतच्चस्थेमस्थितिरितिश्रुतप्रकाशिकाव्याख्यायांभावप्रकाशिकायांस्पष्टमिति ॥ रघुनाथेनयाज्ञीयमंत्रभाष्यस्यपंचिका ॥ अनू

इतिश्रीमदानंदतीर्थभगवत्पादविरचितस्ययाज्ञीयमंत्रभाष्यस्यविवरणंश्रीमज्जयतीर्थभिक्षुविरचितंसंपूर्णं ॥ छ ॥

दितातत्सुकृतंमद्गुरूनेवगच्छतु ॥ छ ॥ इतिश्रीमद्रघुनाथतीर्थविरचिताईशावास्यभाष्यटीकाविवृतिःसंपूर्णा ॥

भा० । इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितमीशावास्योपनिषद्भाष्यंसंपूर्णं ॥

अयं ग्रंथः कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागरमुद्रणालये मुद्रयित्वा प्रकाशितः.
शाकः १८२९ सन १९०७.

॥ रघुनाथतीर्थीयसहिता ईशावास्यटीकासंपूर्णा ॥

2626.1934

॥ अथकाठकवेदेशीयप्रारंभः ॥

श्रीमद्भनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ प्रणम्यवामनंदेवंश्रियंमध्वंगुरूंस्तथा । काठकोप निषद्भाष्यव्याख्यानंक्रियतेमया ॥ इहहिविषयविरक्तस्यशमदमादिमतोमुमुक्षोरधिकारिणआत्यंतिकानिष्टनिवृत्तीष्टप्राप्तिहेतुभग वत्स्वरूपज्ञापनायप्रवृत्तापिकाठकोपनिषदन्यथाव्याख्यानावरुद्धत्वेननतज्ज्ञापनसमर्थेतिमन्यमानोभगवानानंदतीर्थमुनिस्तांय थावद्व्याचिख्यासुःप्रारिप्सितपरिसमाप्त्यादिप्रयोजनतयाशिष्टाचारावगतामेतदुपनिषत्प्रतिपाद्यदेवताप्रणतिंशिष्यशिक्षणार्थंआ दौनिबध्नाति ॥ **नमइति** ॥ भगवते ऐश्वर्यादिषड्गुणसंपन्नाय । तस्मै वेदादिप्रसिद्धायवामनायनमइतिपरोक्षतोनमस्कृत्यापरोक्ष तोपिनमस्करोति । तेवामनायनमोनमइति । अपरोक्षीकृतेभगवद्रूपेभक्त्यतिशयद्योतनायनमोनमइतिद्विरुक्तिः । नम्यत्वोपपा दकविशिष्टत्वोपपादनायसर्वतःपरमायेत्युक्तं । सर्वतः इंद्रियादेरव्यक्तांतात् । सर्वतःपरमत्वंचनराजादिवन्मंतव्यमित्याह ॥ **सर्वेति** ॥ सर्वतःपरमस्योपासनार्थंनदूरेगंतव्यमितिवाह ॥ **सर्वेति** ॥ उपनिषत्प्रतिपाद्यभगवन्मूर्तिकथनं वामनायेति । वक्ष्य तेच ईशानोभूतभव्यस्येत्यादिना ऐश्वर्यादिरूपंभगवत्त्वं । ब्रह्मजज्ञमित्यत्रब्रह्मजेत्यनेन वेदादिप्रसिद्धत्वं । इंद्रियेभ्यःपराह्यर्था इत्यादिना सर्वतःपरमत्वं । विद्धित्वमेतंनिहितंगुहायामित्यादिना सर्वप्राणिहृदिस्थत्वं । मध्येवामनमासीनमित्यनेनवामनत्वंच ज्ञातव्यं । ननुऋषिदेवताच्छंदोब्राह्मणपरिज्ञानएवविद्याफलति । अन्यथानर्थोक्तेः । तथाहिश्रुतिः । योहवाअविदितार्षच्छंदो

भा० । श्रीमद्भनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः॥ नमोभगवतेतस्मैसर्वतःपरमायते । सर्वप्राणिहृदिस्थायवामनाय नमोनमः ।

दैवतब्राह्मणेनेत्यादि । ततस्तदत्रवक्तव्यमितिचेत् । सत्यं । वामनायेत्यनेनदेवतोक्तैव । यमादेःस्पष्टंऋषित्वावगमादक्षरपरिगणनयाछंदःपरिज्ञानसंभवात् । विनियोजकवाक्यपरब्राह्मणपदोपलक्षितार्थज्ञानस्यव्याख्यानादेवसंभवात्तदनुक्तिरिति । अत्र वामनस्यविषयत्वोक्त्यैव । यत्परैरुक्तमस्याविद्यायाःपरब्रह्मप्रत्यगात्मभूतंविषयइति तदपिपरास्तं । यथाचैतत्तत्तथावक्ष्यत्याचार्यःस्वयमेव । अत्रउशन्हवैवाजश्रवसइत्याख्यायिकाविद्याप्रशंसयाश्रोतृणांश्रद्धातिशयजननार्थं । स्मर्यतेहिश्रद्धादीनांतत्वज्ञानहेतुत्वंश्रद्धावान्लभतेज्ञानमिति । ननुस्वर्गेलोकेनभयंकिंचनास्तीत्यादिनास्वर्गलोकंप्रशस्य सत्वमग्निंस्वर्ग्यमध्येषिमृत्योइत्यत्राग्नेःस्वर्गसाधनत्वमुच्यते तदयुक्तं । अग्निमात्रस्यस्वर्गसाधनत्वेऽकृताग्निचयनस्यापिस्वर्गप्राप्त्यापत्तेः । नचयोग्निंनाचिकेतंचिनुतेइतियजुर्वेदोक्तिबलादत्राप्यग्निचयनस्यैवस्वर्ग्यत्वंविवक्षितमितिवाच्यं । अग्निचयनस्यापिस्वर्गमात्रंप्रतिहेतुत्वसंभवेपिस्वर्गलोकाअमृतत्वंभजंतइत्युक्तस्यस्वर्गप्राप्त्यनंतरंमोक्षंप्रतिहेतुत्वस्यानुपपत्तेः । तमेवंविद्वानित्यादिश्रुतिविरोधादित्यतःप्रमाणेनतद्व्याचष्टे ॥ अग्नाविति ॥ अतएवनाग्निचयनमात्रेणपूर्यतइतिभावेनयएवंविद्वांश्चिनुतेनाचिकेतमित्युत्तरत्र । यउचैनमेवंवेदेतिशाखांतरेप्युक्तमितिभावः । त्रिशश्चयीतेतिसंबंधः । त्रिनाचिकेतइत्यादिप्रयोगात्त्रिशइत्युक्तं । तत्रभयातिगइत्यनेनस्वर्गेलोकेनभयंकिंचनास्तीत्यस्यतात्पर्यमुक्तं । नतत्रत्वमितिस्वर्गलोकेमृत्योरभावउक्तः । सनयुक्तः । पुनरावृत्तिसद्भावेनसर्वथामरणाभावायोगादित्यतउक्तं । उष्यमन्वंतरंकालमिति । तथाचमन्वंतरकालपर्यंतंनतत्रत्वमितिव्याख्येयमितिभावः । स्वर्गलोकाअमृतत्वंभजंतइत्य

वेदेशी० भाष्यार्थः १ । १ ॥ २ ॥

भा० । अग्नौविष्णुंसदाध्यायंस्त्रिशोग्निंनाचिकेतकं । यश्चयीतसतुप्राप्यस्वर्गंतत्रभयातिगः । उष्यमन्वंतरंकालं

स्यार्थमाह ॥ अमृतत्वमिति ॥ मोक्षमित्यर्थः । ब्रह्मणासहैवमोक्षप्राप्तेःस्वर्गप्राप्त्यनंतरमेवतदभावात्क्रमादित्युक्तं । एतेन स्वर्गलोकाअमृतत्व ममरणतांदेवत्वंभजंतइत्येतदपव्याख्यानमित्युक्तंभवति । प्राप्तस्वर्गलोकानांसर्वथामरणाभावस्यबाधात् । मन्वंतरादिकालमात्रवासित्वंचेन्नतत्रत्वमित्यनेनैवगतार्थत्वात् । अमरणतांदेवत्वंभजंतइत्यर्थइतिचेत् न । तस्ययोग्यतामात्रसाध्यत्वेनकर्मिमात्रस्यतदभावात् । मोक्षोपियोग्यमात्रसाध्यएवेतिचेत् । सत्यं । अग्नौविष्णुंसदाध्यायन्नितिसमाख्याबलान्मोक्षयोग्यपरत्वस्यकल्पनात् । नचतथात्वत्पक्षेकिंचिज्ज्ञापकमस्तीति । ननुउशन्हवैवाजश्रवसइत्यादिप्रथमतएवाव्याख्याय मध्यमवाक्यं किमर्थमादौव्याख्यायते । नचस्पष्टत्वात्तदुपेक्ष्येदंवाक्यंव्याकृतमितिवाच्यं । उत्तरत्रादितोपिव्याख्यानात् । उच्यते । संकरेण हिस्वभाष्येअथकाठकोपनिषद्बलीनांसुखार्थप्रतिबोधनार्थमल्पग्रंथावृत्तिरारभ्यतइतिप्रतिज्ञायोपनिषच्छब्दार्थविचारःकृतः । उपनिषदिति उपनिपूर्वस्यसदेर्विशरणगत्यवसादनार्थकस्यक्विप्प्रत्ययांतस्यरूपं । उपनिषदितिव्याचिख्यासितग्रंथप्रतिपादितवेद्यवस्तुविषयाविद्योच्यते । कस्मात् येमुमुक्षवोपिदृष्टानुश्राविकविषयवितृष्णाःसंतउपनिषच्छब्देनवाच्यांवक्ष्यमाणलक्षणांविद्यामुपगम्यतन्निष्ठतयानिश्चयेनशीलयंतितेषामविद्यादेःसंसारबीजस्यविशरणात्विनाशात्ब्रह्मविद्योपनिषदित्युच्यते । तथाचवक्ष्यते निचाय्यतंमृत्युमुखात्प्रमुच्यतइति । पूर्वोक्तविशेषणान्मुमुक्षून्एतत्ब्रह्मगमयतीतिगमयितृत्वेनयोगेनवाब्रह्मविद्योपनिषदित्युच्यते । तथाचवक्ष्यति । ब्रह्मप्राप्तोविरजोभूद्विमृत्युरिति । लोकादिर्ब्रह्मजोयोग्निस्तद्विषयायाःविद्यायाःद्वितीयेनवरेणप्रार्थ्यमानायाःस्वर्गलोकफलप्राप्तिहेतुत्वेनगर्भवासजन्मजराद्युपद्रवसंबंधस्यलोकांतरेपौनःपुन्येनप्रवृत्तस्यावसादयितृत्वेनशैथिल्यापादनेन

अमृतत्वंभजेत्क्रमादितिब्रह्मसारे ।

योगेनसापिविद्योपनिषदित्युच्यते । तथाचवक्ष्यतिस्वर्गलोकाअमृतत्वंभजंतइत्यादीति ॥ ७ ॥ तदेतदूषयितुंस्वर्गलोकाअमृतत्वंभजंतइतिवाक्यतात्पर्यमादावेवोक्तं । तथाहि । यदुक्तं लोकादिर्ब्रह्मजोयोग्निरित्यादि तदयुक्तं । स्मृतिसमाख्ययाद्वितीयवरेणप्रार्थ्यमानायाअपिविद्यायाअग्निस्थविष्णुविषयतयातस्याअपिमोक्षहेतुत्वेनस्वर्गमात्रहेतुत्वाभावात् । किंचोपनिषदितिग्रंथप्रतिपादितवेद्यवस्तुविषयाविद्योच्यतइत्यसत् । विद्यायामुपनिषच्छब्दप्रयोगादर्शनात् । सर्वासुशाखास्वारणमावर्तयेदारणमावर्तयेदुपनिषदमावर्तयेदुपनिषदमावर्तयेदित्यादिश्रुतौ उपनिषदमधीमहेअध्यापयामइतिलौकिकव्यवहारे उपनिषच्छब्दस्यग्रंथएवप्रयोगाच्च । नचसंसारहेत्वविद्यादिविशरणादेर्धात्वर्थस्यग्रंथमात्रेऽसंभवात्विद्यायांचसंभवात्विद्यायामेवोपनिषच्छब्दोमुख्यःग्रंथस्यतुतादर्थ्येनतच्छब्दइतिवाच्यं । ग्रंथस्यापिज्ञानद्वाराऽविद्यानिवृत्त्यादिहेतुत्वसद्भावात् । नहियत्रप्रयोगोवर्ततेतत्रशब्दोऽमुख्यः । यत्रतुसनास्तितत्रमुख्यइतिदृष्टचरमिति । एवंपरकीयादिभाष्यनिरासायस्वर्गलोकाअमृतत्वंभजंतइतिवाक्यमादौव्याख्यायेदानींअप्रतिपत्तिविप्रतिपत्तिनिरासायादितएवव्याचक्षाणस्तावदुशन्हवाइतिप्रथमवाक्यंप्रमाणेनैवव्याचष्टे ॥ इच्छन्निति ॥ उशन्नित्यस्यार्थइच्छन्निति । वशइच्छायामितिधातोः । वकारस्योकारः । उशइच्छायामित्येववाधातुः । उक्तंचउशइच्छाप्रकीर्तितेति । वशकांतौकांतिरिच्छेतिवा । स्वर्गलोकमिच्छन्नित्यन्वयः । स्वर्गलोकमिति श्रुतौशेषोक्तिः । वाजश्रवोनसेत्यनेन वाजश्रवाइतिकश्चिदृषिस्तस्यापत्यंवाजश्रवसइतिव्याख्यानमसदित्युक्तंभवति । सर्ववेदसमित्यस्यार्थःसर्वस्वदक्षिणामिति । उद्दालको

भा० । इच्छन्वाजश्रवोनप्रादद्दौसर्वस्वदक्षिणां । उद्दालकस्स्वर्गलोकं

नामतः । कथंतर्ह्यौद्दालकिरित्युत्तरत्रप्रयोगः । उद्दालकएवौद्दालकिरितिव्याख्यानात् । यद्वाएतत्पितुरपिउद्दालकइतिनाम । अतोनानुपपत्तिः । सर्ववेदसंददावित्येतदनंतरमध्याहार्यमाह ॥ ददाविति ॥ निरिंद्रियाइतिवक्ष्यमाणविशेषणोपलक्षणं । अन्यथादक्षिणासुनीयमानासुकुमारस्यश्रद्धाप्रवेशेकारणाभावप्रसंगः । पीतोदकाइत्याद्यनुवादासंभवश्चेतिभावः । ननुसर्वस्वदक्षिणादानावसरेस्वस्यदेयकोटौप्रवेशाभावात्तातकस्मैमांदास्यसीतिवचनेकिंनिमित्तमित्यतस्तदभिप्रायमाह ॥ मामिति ॥ तेत्वया ईदृशाःईदृश्यःगावोनदातव्याः । नचैवंगोदानप्रतिज्ञाभंगः । मांदत्वापितस्याःपूरणीयत्वादित्यर्थः । सहोवाचपितरमित्यस्यार्थउवाचेति । तंहोवाचमृत्यवेत्वाददानीतिवाक्यस्ययथाश्रुतमात्रार्थप्रतीतिनिरासायाभिप्रेतमर्थमाह ॥ तमिति ॥ त्वंम्रियस्व । मृत्वामृत्योर्गृहान्गच्छ । तदापिप्रवसंतंमृत्युंप्रतिगंतासि । तस्यगृहेतिस्रोरात्रीरनश्नन्नेववसतादित्यादिशशापेत्यर्थः । तथाचोक्तंयजुर्वेदकाठके । सहोवाच । तातकस्मैमांदास्यसीति । द्वितीयंतृतीयं । तंहपरीतउवाचमृत्यवेत्वाददानीति । परेहिमृत्योर्गृहान्मृत्यवेत्वादामिति । तंवैप्रवसंतंगंतासीतिहोवाच । तस्यस्मतिस्रोरात्रीरनश्नन्गृहेप्रवसतात् । सयदित्वापृच्छेत्कुमारकतिरात्रीरवात्सीरितितिस्रइतिप्रतिब्रूतात् । किंप्रथमांरात्रिमाश्राइति प्रजांतइति । किंद्वितीयामिति पशूंस्तइति । किंतृतीयामिति साधुकृत्यांतइतीति । एवंचात्रश्रुतौमृत्यवेत्वाददानीतिउपलक्षणं । अतएवशाखांतरोक्तस्यापिसंग्रहाभिप्रायेणैवतंशशापेतिसामान्येनोक्तं । य

भा० । ददौगाश्चनिरिंद्रियाः । मांदत्वापिनतेगावोदातव्याईदृशाइति । उवाचपुत्रस्तंबालःतंशशापपितास्वयं ।

थाश्रुतेसंगत्यदर्शनाद्वैश्वानरःप्रविशतीत्यतःप्रागध्याहार्यमाह ॥ **सजगामेत्यादिनायमंसेत्यंतेन** ॥ यमंप्रवसंतमितिशेषः । तंवैप्रवसंतंजगामेतिशाखांतरोक्तेः । अतएवयमस्यपत्न्यासंपूज्यमानोपीत्युक्तं । अर्घ्यादिकंनजग्राह । पित्रायमलोकंप्रतिगत्वा पितस्यगृहेत्रिरात्रंनभोक्तव्यमित्युक्तत्वात् । तथाचोक्तं । तस्यस्रतिस्रोरात्रीरित्यादि । हरापहरेतिप्रतीतिनिवारणायहरवैवस्व तोदकमित्यस्यार्थमाह ॥ **उदकमाहरेति** ॥ इत्युक्तइतीतिशब्दस्यपूर्वोत्तराभ्यांसंबंधः । अनेन वैश्वानरइत्यादिकं यमामात्या दिकानांवचनमित्येतदपव्याख्यानमित्युक्तंभवति । नमस्तेस्तुब्रह्मन्नित्यादिकंकस्यवचनमितिनज्ञायते । विशेषानुक्तेर्यमभार्यावचनमितिचप्रतीयतेअतआह ॥ **इत्युक्तइति** ॥ तथाचोक्तं । नमस्तेअस्तुभगवइतिहोवाचेति । तमागत्यपप्रच्छेतिपूर्वयमस्यप्रस्तुतत्वेनयमवाक्यमिदं । किंतद्वरत्रयमित्यतआह ॥ **सौमनस्यमिति** ॥ एवशब्दश्चशब्दार्थः । हरिमित्यनेनसंबंधः । इतितेनयाचितमितिशेषः । सौमनस्यंपितुरित्यनेन शांतसंकल्पइत्यादिप्रथमप्रश्नवाक्यं यथापुरस्ताद्भविताप्रतीतइतिपरिहारवाक्यं चोक्तात्पर्यकं । नाचिकेताग्निगंहरिमित्यनेन द्वितीयप्रश्नप्रतिवचनयोरग्निमात्रविषयत्वमसदित्युक्तंभवति । हरिंहरिज्ञानमित्यर्थः । एवमुत्तरत्रापि । येयंप्रेतेविचिकित्सेत्यादिप्रश्नपरिहारवाक्यतात्पर्यं अन्यथाप्रतीतिनिरासायाह ॥ **मुक्तेस्थितमिति** ॥

भा० । सजगामयमंबालोब्रह्मचारीयमस्यतु । पत्न्यासंपूज्यमानोपिजग्राहार्घ्यादिकंनतु । आगतेतुयमेग्राह्यमंसोदकमाहर । इत्युक्तस्सयमस्तंतुसंपूज्यादाद्वरत्रयं । सौमनस्यंपितुश्चैवनाचिकेताग्निगंहरिं । मुक्तेस्थितंचतंविष्णुमितिप्रादाद्वरत्रयमितिगतिसारे ।

॥ ४ ॥

मृतेस्थितमितिक्वचित्पाठः । सत्वमग्निंस्वर्ग्यमित्यादिद्वितीयप्रश्नपरिहारयोःश्रूयमाणोग्निशब्दस्तदंतर्गतभगवत्परइत्युक्तं । तत्केननिमित्तेनेत्याशंकांपरिहरन्ननंतलोकाप्तिमितिवाक्यंप्रसिद्धाग्निपरमित्यन्यथाप्रतीतिनिरासायस्मृत्यैवव्याचष्टे ॥ **अग्र्यत्वादिति** ॥ अग्र्यत्वा दग्रेभवत्वादुत्तमत्वादितियावत् । अग्रशब्दात्सप्तमीसमर्थाद्भवार्थेनिप्रत्ययेरशब्दलोपश्चेतिभावः । अनंतलोकाप्तिमित्यस्यार्थमाह ॥ **लोकइति** ॥ अनंतस्येत्यनुवादेनविष्णोरितिव्याख्यानं । अनेनअनंतस्यलोकआप्यतेयेनसोनंतलोकाप्तिरितिविग्रहइत्युक्तंभवति । अनंतोलोकआप्यतेयेनसोनंतलोकाप्तिरित्यपिविग्रहंदर्शयति ॥ **नित्यइति** ॥ नित्योलोकइत्यन्वयः । स्वरूपसतस्तस्यानंतलोकाप्तिसाधनत्वेतिप्रसंगात्तज्ज्ञानादित्युक्तं । एतेनानंतलोकाप्तिं स्वर्गलोकफलप्राप्तिसाधनमितिव्याख्यानमपास्तं । स्वर्गलोकस्यानंतलोकत्वाभावात् । स्वर्गलोकोपिअनंतस्यदेशतोपरिच्छिन्नस्यलोकोभवत्येवेतिचेत् अथाप्यसाधारण्येनैवव्यपदेशात्अनंतत्वाभावाच्चार्थांतरांगीकारोयुक्तः । प्रतिष्ठाशब्देनधारकत्वमुक्तं । प्रतिष्ठाधारकःपुमानितिवचनात् । तत्कस्यधारकइत्यतआह ॥ **प्रतिष्ठेति** ॥ निहितंगुहायामित्यस्यार्थमाह ॥ **सविष्णुरिति** ॥ एतेन निहितंगुहायामित्यस्यविदुषांबुद्धौप्रविष्टमितिव्याख्यानमपास्तं । किंचात्मास्यजंतोर्निहितोगुहायामित्यादावुत्तरत्रात्मनोजीवहृद्गुहानिहितत्वमेवोच्यते । त्वयापितथैवव्याख्यानात् । एवंचात्रापिहृद्गुहानिहितत्वमेवोच्यतइतिकिंनव्याक्रियते । नचाग्नौतस्यासंभवादेवंव्याख्यानमितिवाच्यं । ततएवविष्णुपरत्वांगीकारौचित्यात् । अन्यथाप्रायपाठविरोधादिति । लोकादिमित्यस्यलोकानामादिंप्रथमशरीरत्वादि

भा० । अग्र्यत्वादग्निनामासौनाचिकेताग्निगोहरिः । लोकोविष्णोरनंतस्यतज्ज्ञानान्नित्यआप्यते । प्रतिष्ठासर्वलोकस्यसविष्णुस्सर्वहृद्गतः ।

तिव्याख्यानमसत् । अग्नेःप्रथमशरीरत्वेमानाभावात् । तत्तेजोसृजतेतिश्रुतिरस्तीतिचेत् । नआत्मनआकाशःसंभूतइत्यपिविद्यमानत्वादितिभावेनव्याचष्टे ॥ सएवेति ॥ त्रिभिरेत्यसंधिं तरतिजन्ममृत्यू निचाय्येमांशांतिमत्यंतमेतीत्यादेस्तात्पर्यमाह ॥ तंज्ञात्वेति ॥ याइष्टकाःश्रोतव्याःस्वरूपेणताश्चोवाचेतिव्याख्यानमसत् । इष्टकास्वरूपस्यप्रत्यक्षसिद्धत्वेनावक्तव्यत्वादितिभावेनतदनूद्यव्याचष्टे ॥ याइति ॥ किंचत्रिनाचिकेतस्त्रयमेतद्विदित्वा शांतिमत्यंतमेतीत्युत्तरत्रत्रयमेतद्विदित्वेत्यनेनयाइष्टकाइत्याद्युक्तत्रयपरिज्ञानिनोमोक्षःफलत्वेनोच्यते । नचप्रसिद्धेष्टकाग्रहणेतदुपपद्यते । ननुइष्टकादेवताग्रहणेपिकथंतदुपपत्तिः । अन्यदेवताज्ञानेनमोक्षासंभवादित्यतःस्मृत्यैवेष्टकादेवतास्वरूपंनिरूपयन्यावतीर्वेत्युक्तेष्टकादेवतासंख्यांचदर्शयन्यथावेत्युक्तंविवृणोति ॥ इष्टकादेवतामिति ॥ यद्यप्यन्यत्राशीत्युत्तरसहस्ररूपमिष्टकासुसंस्थितमित्युक्तं । अशीत्युत्तरसहस्ररूपंवर्णेषुसंस्थितमित्युपक्रम्य रूपाणिविष्णोस्तावंतिचेष्टकासुपृथक्पृथगित्यैतरेयभाष्येउक्तत्वात् अशीतिसहस्रंवार्कलिनइतिश्रुतेश्च । तथापित्कौंठरव्यमतमाश्रित्योक्तं । अथकौंठरव्यइत्युपक्रम्यअशीतिसहस्रंवाअर्कलिनइत्युक्तत्वात् । ऋषिमतांतरमाश्रित्येदमुक्तमित्यविरोधः । यद्वाप्रत्येकमेकैकेष्टकायांअशीत्युत्तरसहस्ररूपपरंतद्वचनं । अतएवपृथक्पृथगित्युक्तं । अत्रतुइष्टकानांषष्ट्युत्तरशतत्रयसंख्याकत्वात्तत्तद्वतैकैकरूपविवक्षयाषष्ट्युत्तरशतत्रिकमित्युक्तमित्यविरोधः । त्रिभिरेत्यसंधिमित्येतदप्रतीतेरनूद्यतात्पर्यमाह ॥

भा० । सएवसर्वलोकादिस्तंज्ञात्वामुच्यतेध्रुवमितिच । याइष्टका याइष्टकादेवताः । इष्टकादेवतांविष्णुंषष्ट्युत्तरशतत्रिकं । यथावदेवविज्ञाय मुच्यतेकर्मबंधनादितिच ।

त्रिभिरिति ॥ त्रिभिः ऋग्यजुःसामाथर्वाख्यैःवेदैःसंधिं । संबंधमेत्यप्राप्येत्यक्षरार्थमभिप्रेत्यतत्तात्पर्यमुक्तं ॥ वेदैरविरुद्ध इति ॥ वेदविरुद्धत्वेवेदैःसहसंबंधायोगादितिभावः । ननुवेदाविरुद्धत्वंवेदाध्ययनवत्त्वं तदुक्तकर्मानुष्ठानवत्त्वंवावाच्यं । अन्यस्यासंभवात् । नचतद्युक्तं । अज्ञानामपिवेदाध्ययनादिसत्त्वेनजन्ममृत्यूत्तरणप्रसंगादित्यतआह ॥ वेदेति ॥ तथाचत्रिनाचिकेतस्त्रिकर्मकृज्जन्ममृत्यूतरतिइत्युक्ते भगवज्ज्ञानेनैवमोक्षश्रवणात्कथमेतदित्याशंकायांज्ञानद्वारैवकर्मणोमोक्षसाधनत्वमभिप्रेतं नसाक्षादितिभावेनत्रिभिरेत्यसंधिमित्युक्तमितिभावः । एतेन त्रिभिः मातापित्राचार्यैः संधिं संबंधमेत्य मात्राद्यनुशासनंयथावत्प्राप्येत्यर्थ इत्येतदपव्याख्यानमित्युक्तंभवति । तस्यापिकर्ममात्रत्वेनसाक्षाज्जन्ममृत्यूत्तरणहेतुत्वासंभवात् ॥ त्रिकर्मकृत् इज्याध्ययनदानानांकर्तेतिव्याख्यानमसदितिभावेनतद्व्याचष्टे ॥ त्रिकर्मकृदिति ॥ परोक्तएवार्थःकिंनस्यादित्यतो यज्ञदानतपसामावश्यकत्वस्मरणादितिभावेनाह ॥ यज्ञेति ॥ अध्ययनमपिनित्याज्यमितिचेत् । न । अत्रतपःशब्दस्य देवद्विजगुरुप्राज्ञपूजनंशौचमार्जवं । ब्रह्मचर्यमहिंसाचशारीरंतपउच्यते । अनुद्वेगकरंवाक्यंसत्यंप्रियहितंचयत् । स्वाध्यायाभ्यसनंचैववाङ्मयंतपउच्यते । मनःप्रसादःसौम्यत्वंमौनमात्मविनिग्रहः । भावसंशुद्धिरित्येतत्तपोमानसमुच्यतइत्युक्तत्रिविधतपःपरत्वेनाध्ययनस्यापितदंतर्गतत्वादितिभावः । त्रयमेतदित्यत्रोक्तंत्रयंकिमितिनज्ञायते अतआह ॥ त्रयमेतदिति ॥

भा० । त्रिभिरेत्यसंधिं । वेदैरविरुद्धः । वेदोक्तप्रकारेणभगवत्तत्वादिकंजानन्नित्यर्थः । त्रिकर्मकृत् । यज्ञदानतपःकर्ता । यज्ञदानतपःकर्म । नित्याज्यंकार्यमेवतदितिवचनात् । त्रयमेतत्याइष्टकाइत्यादि ।

ब्रह्मजज्ञमित्येतस्यब्रह्मणोहिरण्यगर्भोजायतइतिब्रह्मजः । सचासौज्ञश्चेतितथोक्तइतिव्याख्यानमसदितिभावेनब्रह्मजज्ञपदंस्मृत्यैवव्याचष्टे ॥ ब्रह्मेतीति ॥ अनेकरूपांविचित्रामित्यन्यथाप्रतीतिनिरासायतदनूद्यव्याचष्टे ॥ अनेकरूपामिति ॥ अनेकरूपशब्दस्यसुवर्णवाचित्वेऽभिधानमाह ॥ बहुरूपमिति ॥ बहुशब्दोनेकपरः । अस्त्वनेकरूपशब्दःसुवर्णवाची तथापिप्रकृतेसुवर्णपरइतिकुतइत्याशंकांपरिहरन् सचापितत्प्रत्यवदद्यथोक्तमित्यारभ्यशृंकांचेमामनेकरूपांगृहाणेत्यंतवाक्यव्याख्यानरूपांस्मृतिंपठति ॥ यमइति ॥ शृंकामित्यनुवादेनकंठमालामितिव्याख्यानं । अनेनशृंकांशब्दवतीमित्येतदपव्याख्यानमित्युक्तंभवति । एवंस्वर्ग्याग्निप्रकरणंतदंतर्गतभगवत्परमित्यागमेनसाधितं । इदानींआंतरोपपत्तिभिश्चतत्साधयति ॥ लोकादिरित्यादिना ॥ यद्वा नन्वस्त्वेतत्प्रकरणंविष्णुपरं । प्रसिद्धाग्निपरमपिकिंनस्यात् । उभयपरत्वेबाधकाभावात् । नचसर्वेषांशब्दानांभगवन्नामत्वेनाग्निशब्दस्यापिभगवद्वाचकत्वादन्यत्रावृत्तिः समाकर्षन्यायेनान्यत्रापिशब्दस्यवृत्त्यंगीकारादित्यतआह ॥ लोकादिरिति ॥ आदिपदेन गुहानिहितत्वजन्ममृत्यूत्तरणादिमोक्षहेतुज्ञानविषयत्वादीनांग्रहणं । चशब्देनोक्तागमसमुच्चयः । भगवानेव एतत्प्रकरणप्रतिपाद्यइतिशेषः । एवशब्देनाग्निव्यावृत्तिः । सत्यमन्यत्रापिशब्दप्रवृत्तिरंगीक्रियतइति । त-

भाष्यं ॥ ब्रह्मेतिवेदउद्दिष्टस्तस्माद्ययक्तोयतोहरिः । ब्रह्मजस्तेनकथितस्सएवज्ञोऽखिलज्ञतइतिनामनिरुक्तौ । अनेकरूपांस्वर्णमयीं । बहुरूपंचपुरटंकार्तस्वरमितीर्यतइत्यभिधानात् । यमोनुवादसंतुष्टोवह्नेस्तन्नामतामपि । शृंकांस्वर्णमयींचैवकंठमालामदाद्विभुरितिपाद्मे । लोकादिःप्रतिष्ठा ब्रह्मजज्ञोनंतलोकाग्निरित्यादिविशेषणैश्चभगवानेव ।

थापियत्रान्यग्रहणेबाधकाभावस्तत्रैव । यथाऽव्यक्तात्पुरुषःपरइत्यादावव्यक्तादिशब्दानांप्रकृत्यादिपरत्वं । यत्रबाधकसद्भावस्तत्रभगवन्मात्रपरत्वं । यथाजीवाद्भवंतिभूतानीत्यादौजीवादिशब्दानां । ततश्चप्रकृतेपिएतत्प्रकरणस्याग्निपरत्वांगीकारेबाधकसद्भावाद्भगवानेवात्रप्रतिपाद्यः । लोकादित्वादीनांभगवत्येवसंभवादग्नावसंभवादितिभावः । नन्वेतेषांविशेषणानांभगवत्परत्वमेवकुतइतिचेत्न । उदाहृतवचनैस्तथाव्याख्यातत्वात् । किंचकामस्याप्तिंजगतःप्रतिष्ठांक्रतोरानंत्यमभयस्यपारं । स्तोममहदुरुगायंप्रतिष्ठांदृष्ट्येत्युत्तरमंत्रे अनंतलोकाप्तिमथोप्रतिष्ठामित्याद्यत्रोक्तमेवपरामृश्यते । जगतःप्रतिष्ठामित्यनेनाथोप्रतिष्ठामित्यस्य क्रतोरानंत्यमित्यनेना नंतलोकाप्तिमित्यस्या भयपारस्यमित्यनेन तरतिजन्ममृत्यूशांतिमत्यंतमेतीत्यादेः स्तोममहदित्यनेन ब्रह्मजेत्यस्य प्रतिष्ठामित्यनेन मोदतेस्वर्गलोकइत्यस्यपरामर्शात् । तत्रचैतानिह्युरुगायविशेषणानिकथ्यंते । अतोत्रापिअनंतलोकाप्तिमित्यादीनिभगवतएवविशेषणानि नाग्नेरित्याह ॥ स्तोमेति ॥ इतिवाक्ये प्रतिष्ठात्वानंतलोकाप्तित्वादीनामितिशेषः । यद्यप्यादितएवोदाहर्तव्या । तथापिकामस्याप्तिमित्यनेनकस्याप्यपरामर्शात्पूर्वार्धेउरुगायपदाभावात्सर्वोदाहरणेगौरवप्रसंगाच्चैतदेवोदाहृतं । ननुजगतःप्रतिष्ठामित्यादीनांउरुगायविशेषणत्वेपिभगवद्विशेषणत्वंकुतइतिचेत्न । विचक्रमाणस्त्रेधोरुगायः । अत्राहतदुरुगास्यवृष्णःपरमंपदमवभातिभूरि । यःपार्थिवानित्रिभिरिद्विगामभिरुरुक्रमिष्ठोरुगायायजीवसइतिविष्णुसूक्ते । ऊर्जंपृथिव्याभक्त्वायोरुगायमुपासतेत्वंविष्णुरुरुगायोनमस्यइतिश्रुत्यंतरे । श्रीर्यत्ररूपिण्युरुगायपादयोःकरोतिमानंबहुधाविभूतिभिरि

भाष्यं ॥ स्तोममहदुरुगायंप्रतिष्ठमितिपरामर्शाच्च ।

तिभागवतेचोरुगायशब्दस्यभगवत्येवप्रसिद्धत्वेनतेषामुरुगायविशेषणत्वेभगवद्विशेषणत्वस्यैवप्राप्तेरित्याह ॥ **भगवतइति** ॥ हिशब्दोहेतौ । यदुक्तमित्यादिविशेषणैरित्यनेनगुहानिहितत्वविशेषणेनभगवानेवेति तदयुक्तं । जाठराग्निरूपेणाग्नेरपिगुहानिहितत्वसंभवात् । अग्नेरपिदेवत्वेनशरीरत्वाच्चतत्संभवः । तत्किंभगवतइत्यतआह ॥ **गुहेति** ॥ तस्यैव भगवतएव । प्रसिद्धं योवेदनिहितंगुहायामित्यादिषु । हृदिह्येषआत्मेतिजीवेपिहृद्गुहानिहितत्वप्रसिद्धेर्विशेषतइत्युक्तं । सत्यमग्नेरपिहृद्गुहानिहितत्वंप्रसिद्धमिति । तथापिविशेषतःश्रुत्यादौभगवतएवप्रसिद्धं । विशेषतःप्रसिद्धमेवहिग्राह्यं । नहिमैथिलःपांचालइत्युक्तेयःकोपिमिथिलायांपंचालेषुवाभवोगृह्यते । किंतुप्रसिद्धस्तदधिपतिरेवेतिभावः । एवंप्रतिष्ठाब्रह्मजज्ञानंतलोकाग्निरित्यादिविशेषणानांभगवत्परत्वमुपपाद्यान्यत्रासंभवप्रदर्शनायोपलक्षणत्वेनानंतलोकाग्निरितिविशेषणस्याग्नावसंभवंदर्शयति ॥ **नचेति** ॥ भगवदधिष्ठानत्वादिनाग्निपरिज्ञानस्यापिमोक्षहेतुत्वान्मात्रपदं । तद्व्यवच्छेद्यमाह ॥ **भगवज्ज्ञानंविनेति** ॥ ननुभगवज्ज्ञानाभावेपिअग्निपरिज्ञानपूर्वकं यज्ञादिकरणेनानंतलोकाप्त्युपपत्तेरग्नावप्यनंतलोकाप्तित्वंसावकाशमित्यतस्तदभावेश्रुतिमाह ॥ **तद्वाइति** ॥ हेगार्गितदेतदक्षरमविदित्वायदस्मिन्लोकेजुहोति वैश्वदेवादिकान्होमान्करोति यजतेअश्वमेधादियज्ञांश्चकरोति बहूनिवर्षसहस्राणितपस्तप्यते । अस्यभगवदज्ञानिनः तत् होमादिकंसर्वं अंतवदेवांतवत्फलमेवभवतीत्यर्थः । जुहोति ददाति । यजते यज्ञादिकं

भाष्यं ॥ भगवतोह्युरुगायनामप्रसिद्धं । गुहानिहितत्वंचतस्यैवविशेषतःप्रसिद्धं । नचाग्निपरिज्ञानमात्रेणानंतलोकाप्तिर्भगवज्ज्ञानंविना । तद्वाएतदक्षरंगार्ग्यविदित्वाऽस्मिँल्लोकेजुहोतियजतेतपस्तप्यतेबहूनिवर्षसहस्राण्यंतवदेवास्यतद्भवतीत्यादिश्रुतेः ।

करोतीतिवा । जुहोतियज्ञादिकंकरोति । यजतिददातीतिवार्थः । नन्वग्निपरिज्ञानमात्रेणाप्यनंतलोकाप्तिरस्त्येव । मोक्षप्राप्तेरभावेपिस्वर्गप्राप्तेःसत्त्वात् । नचास्यानंतत्वाभावः । बहुकालावस्थानमात्रेणतथाव्यवहारोपपत्तेरित्यतआह ॥ **नचेति** ॥ सतिसंभवतीत्यर्थः । अनंतलोकशब्दस्यमोक्षोहिमुख्यार्थः । स्वर्गस्त्वमुख्यार्थः । नहिबाधकाभावेन मुख्यार्थेसंभवत्यमुख्यार्थोयुज्यतइत्यर्थः । नन्वस्त्वनंतलोकशब्दोमोक्षपरएव । तथाप्यग्निपरिज्ञानस्यानंतलोकाप्तिसाधनत्वमस्त्येव । साक्षान्मोक्षसाधनत्वाभावेपिपरंपरयातत्साधनत्वादित्यतआह ॥ **नचेति** ॥ मुख्ये साक्षात्साधनत्वे । नन्वनंतलोकाप्तिरितिविशेषणस्याग्नावसंभवेपिलोकादिरित्यादिविशेषणानिसंभवंत्येव । तथाहि । लोकानामादिःप्रथमशरीरत्वात् । प्रतिष्ठाजगतआश्रयः । ब्रह्मजोहिरण्यगर्भजोज्ञःसर्वज्ञश्चेतिब्रह्मजज्ञो गुहानिहितोविदुषांबुद्धौप्रविष्टइति । तत्कथमेतैर्विशेषणैर्भगवानेवात्रप्रतिपाद्यइतिनिश्चयइतिचेत्न । अग्नेरपिमुख्यतोलोकादित्वविशेषणासंभवात् । यथाकथंचित्संभवतीतिचेत् तत्राह ॥ **नचेति** ॥ येयंप्रेतइतितृतीयप्रश्नवाक्यस्येयंविचिकित्सासंशयः । प्रेतेमनुष्ये अस्ति शरीरेंद्रियमनोबुद्धिव्यतिरिक्तोदेहांतरसंबंध्यात्मेत्येके । नायमेवंविधोस्तीत्येके । अत्रचास्माकंनप्रत्यक्षेणनाप्यनुमानेननिर्णयोयुज्यतइतिव्याख्यानमसदितिभावेनस्वयंतद्वाक्यंव्याचष्टे ॥ **प्रेतइति** ॥ प्रेतशब्दस्यमृतसामान्यवाचकत्वेपितद्विशेषोमुक्तोत्रग्राह्यइतिभावेनमुक्तइत्युक्तं । मनुष्यशब्दश्चेतनपरः । अज्ञानामपिकेषांचिन्मतेभगवतोव्याप्तत्वांगीकारेणमुक्तेमनुष्येआकाशादिवत्सत्त्वमात्रमंगीक्रियतइत्यतोनियामकत्वेनेत्युक्तं । नास्तीत्य

भाष्यं ॥ नचमुख्येसत्यमुख्यार्थोयुज्यते । प्रेतेमुक्तेमनुष्येनियामकत्वेनभगवानस्तीतिज्ञानिनोवदंति । नास्तीत्यज्ञाः ।

ज्ञाइत्यनेन ज्ञानिनामेवायंविवादउच्यतइतियथाश्रुतप्रतीतिरपिपरास्ता । एवंवदतांज्ञानित्वाभावात् । ननुमुक्तनियामकत्वेन भगवानस्तीतिज्ञानिनोवदंति नास्तीत्यज्ञाइतिजानतोनचिकेतसःसंशयोनिवृत्तएव । ज्ञानिमतस्यैवग्राह्यत्वेनमुक्तेनियामकतया भगवानस्तीत्येवसिद्धत्वात् । अतएतद्विद्यामितिकिंप्रार्थ्यतइत्यतस्तद्व्याचष्टे ॥ तस्येति ॥ एतच्छब्दार्थस्तस्यनियामकस्यस्व रूपमिति । तस्य संशयविषयीभूतस्येत्यर्थः । नात्रनचिकेतसामुक्तेनियामकतयाभगवानस्तिनवेतिसंशयसत्त्वात्तन्निर्णयः कथमितिप्रार्थ्यते किंतुमुक्तेनियामकत्वेनभगवानस्तीतिसिद्धमेव । तस्यनियामकस्यस्वरूपंयथावद्विद्यामित्येवप्रार्थ्यते अतोनानुप पत्तिरित्यर्थः । ननुकुतएवंव्याख्येयं परोक्तएवार्थःकिंनस्यादित्यतस्तज्ज्ञापकमाह ॥ अस्येति ॥ किमत्रपरिशिष्यतइत्यतः परमेतत्प्रश्नविषयस्यैवानुवादादितिशेषः । तेनचशब्दोपपत्तिः । येयंप्रेतेविचिकित्सेत्यत्रोक्तस्यैवोत्तरत्रा स्यविस्रंसमानस्येत्य नेनानुवादेसत्येतदित्यनेन यत्पृष्टंतदेतदितिप्रतिज्ञाय नप्राणेननापानेनेत्यादिनाजीवनहेतुत्वादिनाभगवत्स्वरूपस्यैवोक्त्वादत्रा पिमुक्तस्थोभगवान्पृच्छयतइतिसिद्धमित्यर्थः । स्यादेतत् । यदिअस्यविस्रंसमानस्येत्येतदेवमुक्तपरंस्यात् । तदेवकुतइत्यत आह ॥ देहादिति ॥ अन्यथाविशब्दवैयर्थ्यादितिभावः । नन्वथाप्यस्यप्रश्नवाक्यस्यमुक्तविषयत्वंनोपपद्यते । नचिकेतोमरणं मानुप्राक्षीरितिमरणविषयेप्रश्नोनकर्तव्यइत्युक्त्याप्रश्नवाक्यस्यमरणविषयत्वप्रतीतेरित्यतआह ॥ मुक्तेरपीति ॥ भवत्युपपद्य

॥ ८ ॥

भाष्यं ॥ तस्यनियामकस्यस्वरूपंयथावदहंविद्यां । अस्यविस्रंसमानस्यशरीरस्थस्यदेहिनः । देहाद्विमुच्यमानस्यकिमत्रपरिशिष्यते । एतद्वै तदितिपरिहाराच्चमुक्तेस्थितोभगवान्पृच्छयतइतिसिद्धं । देहाद्विशेषेणमोचनंनाममुक्तिरेव । मुक्तेरपिमरणात्मकत्वान्मरणमित्यपिभवति ।

ते । यदुक्तंदेहाद्विशेषेणमोचनंनाममुक्तिरेवेति तदयुक्तं । देहाद्विमुच्यमानस्येत्यस्यस्थूलशरीरंत्यजतइत्यर्थोपपत्तेरितिचेत् न । विस्रंसमानस्येत्यनेनैवास्यार्थस्योक्तत्वेनपौनरुक्त्यापातादितिभावेनाह ॥ स्थूलेति ॥ व्याख्यानव्याख्येयभावस्त्वगति कागतिरितिभावः । यदुक्तंद्वितीयतृतीययोरुभयोरपिप्रश्नयोर्भगवद्विषयत्वमिति तदयुक्तं । तथासतिद्वितीयप्रश्नस्यझडिति परिहाराभिधानं तृतीयप्रश्नस्यत्वतिकृच्छ्रेणपरिहाराभिधानमितिविशेषासंभवात् । नचोभयोरपिप्रश्नयोर्भगवद्विषयत्वे एकस्यझडितिपरिहाराभिधानेअपरस्यकृच्छ्रेणतदभिधानेकारणमस्तीत्यतस्तत्रकारणविशेषंप्रमाणेनाह ॥ अग्निस्थमिति ॥ अग्निस्थस्यैवपरमात्मनोवक्ष्यमाणविशेषणप्रकारकज्ञानंभवत्येवमोक्षहेतुरतउक्तं । सामान्यादिति । तुशब्दोअवधारणार्थः । सामान्यादेवेतिसंबधः । चशब्दात्संसारेचजीवांतस्थत्वंनाकाशसाधारण्येनेत्याह ॥ नियामकंचेति ॥ तथाहरेस्सर्वोत्तमत्वा दीन्गुणान् इंद्रियेभ्यःपराह्यर्थाइत्यादिनोक्तानविज्ञायस्थितस्यनैवमुक्तिर्भवेदित्यर्थः । अतएवयमेनंदुर्दर्शंगूढमनुप्रविष्टमित्यादि नावक्ष्यमाणविद्याप्रशंसाक्रियते । मुक्तजीवनियामकहरिज्ञानमंतरेणमोक्षप्राप्यभावेपितद्रूपंकिमितिकृच्छ्रेणवक्तव्यमित्यतआह ॥ तस्येति ॥ तर्ह्यग्निस्थभगवन्निरूपणंपृथक्नकार्यस्यात् । तज्ज्ञानस्यमुक्तिसाधनत्वाभावेनव्यर्थत्वादित्यतआह ॥ तथापीति ॥

भाष्यं ॥ स्थूलदेहपरित्यागस्तुविस्रंसमानस्येत्यनेनैवोक्तोभवति । अग्निस्थंपरमात्मानंसामान्याज्जानतोपितु । अजानतस्तुमुक्तौचजीवांतस्थितमी श्वरं । नियामकंचजीवानांमुक्तानामपिसर्वदा । गुणान्सर्वोत्तमत्वादीनविज्ञायहरेस्तथा । नैवमुक्तिर्भवेत्तस्मात्कृच्छ्रात्तदवदद्यमः । तस्यगोप्यत्वविज्ञस्यै तथाप्यग्निस्थवेदनात् । सुखाधिक्यंभवेन्मुक्तौतस्मात्तत्पृथगीरितमितितत्वसारे ।

संसारनिवृत्तिलक्षणमोक्षहेतुत्वाभावेपीत्यर्थः । एवंचामृतत्वंभजेत्कमादितिपूर्वत्रामृतत्वशब्दोमौक्तसुखाधिक्यपरतयाव्याख्येय इतिनतद्विरोधइतिमंतव्यं । अनेनपरव्याख्यानेजीवस्यातिगोप्यत्वाभावात्कृच्छ्रेणपरिहारोक्तिर्नस्यादितिबाधकंसूचितं । ईश्वरविषयएवतृतीयप्रश्नइत्यत्रज्ञापकांतरमाह ॥ स्थाणुमिति ॥ यएषुसुप्तेष्वित्युत्तरवाक्येजीवेषुस्थितस्यभगवतएवकथनात्प्रश्नवाक्येपि जीवेषुस्थितोभगवानेवविषयइतिवक्तव्यं । अन्यथाप्रश्नोत्तरयोरनानुगुण्यापातात् । नचैषुसुप्तेष्वित्यस्यजीवपरत्वंकुतइतिवाच्यं । स्थाणुमन्येनुसंयंतीत्यव्यवहितपूर्ववाक्येजीवानांप्रस्तुतत्वेनतेषामेवैष्वित्यनेनपरामर्शादित्यर्थः । यएषुसुप्तेष्वित्यत्रसंसारिजीवस्थ ब्रह्मस्वरूपंनिरूप्यते। प्रश्नवाक्येतुमुक्तस्यनियामकोहरिर्विषयस्तथाचप्रश्नपरिहारयोरनानुगुण्यमेवेत्यतोजीवेष्वितिसामान्येनोक्तं। मुक्तामुक्तजीवमात्रस्थितभगवतःप्रश्नविषयत्वादत्रामुक्तजीवस्थभगवन्निरूपणंनप्रश्नाननुगुणमितिभावः।नन्वेतत्पूर्वोत्तरविरुद्धं। मुक्तेस्थितोभगवान्पृच्छ्यतइतिप्रागुक्तं। इदानींजीवेषुस्थितोभगवान्पृच्छ्यतइत्युच्यतेइत्यतस्तंविरोधंप्रश्नवाक्याभिप्रायकथनेनप रिहरति॥मृतेति॥विवक्षितो येयंप्रेतइतिप्रश्नवाक्यइतिशेषः।प्रेतशब्दस्यउभयसाधारणत्वादितिभावः। नकेवलंप्रश्नानानुगुण्याभा वः।किंतुविरोधश्चनास्तीतिचशब्दार्थः।यद्वायदियेयंप्रेतइत्यत्रमुक्तनियामकभगवत्स्वरूपंप्रश्नविषयःस्यात्तर्हि हंततइदंप्रवक्ष्यामि गुह्यंब्रह्मसनातनं।यथामरणंप्राप्यआत्माभवतिगोतमेतिम्रियमाणजीवस्थभगवत्स्वरूपवचनेप्रतिज्ञाविरुद्धास्यात्। पृष्टस्यैववक्तव्य

भाष्यं ॥ स्थाणुमन्येनुसंयंतियथाकर्मयथाश्रुतमित्युक्त्वा । यएषुसुप्तेषुजागर्तिकामंकामंपुरुषोनिर्मिमाणइतिवचनाच्चजीवेषुस्थितोभगवान्पृच्छ्यतइतिसिद्धं । मृतजीवेस्थितश्चोभयात्मकोभगवान्विवक्षितइत्येतस्माच्चाविरोधः ।

त्वादितिचेत् न । मुक्तेरपिमरणात्मकत्वादित्युक्तन्यायेनमरणंप्राप्येतिमरणशब्दस्यापिमुक्तिपरत्वोपपत्तेर्विरोधाभावात्। प्रकारांतरेणाप्यविरोधमाह॥मृतजीवेइति॥ पूर्वोक्तपरिहारसमुच्चयार्थश्चशब्दः। अविरोधो मरणंप्राप्येतिवचनस्यप्रश्नवाक्येनेतिशेषः। ननु यदुक्तं यएषुसुप्तेष्वितिवचनात्प्रश्नवाक्यस्यभगवद्विषयत्वमिति । तदसत् । तस्यैववाक्यस्येश्वरविषयत्वाभावात् । नहितत्रेश्वर ज्ञापकंकिंचिदस्तीतिचेत्।न।सुप्तेषुजागर्तीतीश्वरलिंगश्रवणात्स्वाप्नपदार्थनिर्मातृत्वश्रवणाच्च । नचतत्रनिर्मातृत्वमात्रश्रवणेपिस्वाप्न पादार्थनिर्मातृत्वंनश्रूयतइतिवाच्यं । भुंजानोनोत्सृजेद्वाचमित्यादाविवप्रकरणप्राप्तत्वात् । हंततइदंप्रवक्ष्यामिगुह्यंब्रह्मसनातनमि तिप्रतिज्ञातस्यैवात्रकथनाच्च । तदेवशुक्रंतद्ब्रह्मेतिवाक्यशेषाच्च । ननुवाक्यशेषेयोजीवः एषु प्राणेषु सुप्तेषु कामंकामं तंतमभि प्रेतंरूयाद्यर्थमविद्ययानिर्ममाणोजागर्ति नस्वपिति तदेवशुक्रंशुद्धं ब्रह्मनान्यत्गुह्यंब्रह्मास्तीतिब्रह्मैक्यमेवजीवस्योच्यतइतिकथं तत्साधकंइति चेत्न।तस्यदूष्यत्वात्।तस्मिँल्लोकाःश्रिताःसर्वइत्युक्तविशिष्टेजीवैक्यानंगीकाराच्च।लक्षणाचागतिकागतिः। किंचैषुसु प्तेष्वित्यत्रैतच्छब्देन स्थाणुमन्यइत्यव्यवहितपूर्ववाक्यप्रकृतजीवपरामर्शइत्येवयुक्तं । नतुसर्वात्मनाअप्रकृतप्राणपरामर्शइति । नचग्रंथप्रकृतपरामर्शेसंभवतिबुद्धिस्थपरामर्शोयुक्तः । अतएवोक्तंस्थाणुमन्येनुसंयंतियथाकर्मयथाश्रुतमित्युक्त्वेति । ननुहंतत इदंप्रवक्ष्यामीतिप्रतिज्ञावाक्ये गुह्यंसनातनंब्रह्मस्वाविद्ययामरणंप्राप्यात्मासंसारीयथाभवति तथाप्रवक्ष्यामीत्युक्त्वेनात्रापितदे वबोध्यतइतिव्याख्येयमितिचेत् न । मरणंप्राप्येत्यस्म्रियमाणंजीवंप्राप्येत्यर्थोपपत्तेरितिभावेनश्रुत्यर्थनिश्चायकंप्रमाणमाह ॥

गुह्यमिति ॥ अपिशब्दौचशब्दार्थौवाक्यद्वयार्थसमुच्चयार्थौ । यद्वा म्रियमाणमपीत्यन्वयः । तेनजायमानमित्यस्यसमुच्चयः । एतेनगुह्यंतत्परमंब्रह्मेत्यारभ्ययोनिमन्यइत्यादेस्तात्पर्यमुक्तं । स्वपितेष्वपिजीवेषुजागर्तीत्यनेन । यएषुसुप्तेष्विति वाक्यार्थउक्तोभवति । सुप्तेषुजीवेष्वित्युक्त्याएषुप्राणेष्वित्येतदपव्याख्यानमित्युक्तंभवति । नकेवलंजागरितेषु सुप्तेष्वपीत्यपिशब्दः । नन्वेतद्विद्यामनुशिष्टस्त्वयाहमितिनचिकेतसाजीवगतभगवत्स्वरूपेपृष्टे नहिसुज्ञेयोणुरेषधर्मइतियमेनधर्मस्याणुत्वेनसुज्ञेयत्वाभावकथनंअसंगतं । नहिधर्मस्वरूपंनचिकेतसापृष्टमित्यतोधर्मशब्दंव्याचष्टे ॥ धारकत्वादिति ॥ सर्वंजगद्धत्तइतिधर्मः । पृथिवीधर्ममूर्धनीतिप्रयोगान्मोक्षधर्मे । धर्मोवाइदमग्रआसीदित्यादिश्रुतेश्चेतिभावः । ननुनचिकेतोमरणंमानुप्राक्षीरितियमेनमरणंनप्रष्टव्यमितिकथमुच्यते । नहिनचिकेतसामरणंपृष्टं किंतुमृतस्थोमुक्तस्थोवाभगवानेवेत्यतस्तदपियथावद्व्याचष्टे ॥ मरणइति ॥ म्रियमाणइत्यर्थः । एतेनमरणंमरणसंबंधिप्रश्नंप्रत्यस्तिनास्तीत्येवंरूपंमानुप्राक्षीरितिव्याख्यानमसदित्युक्तंभवति । मरणशब्दस्यलाक्षणिकत्वापातात् । अस्मत्पक्षेतुमरणशब्दस्यतदंतर्गतभगवद्वाचकत्वात् । प्रश्नस्यप्रश्नविषयत्वाभावेनप्रश्नंमानुप्राक्षीरित्यस्यायोगाच्चेति । किंचैतद्विद्यामनुशिष्टस्त्वयाहमित्यत्रमुक्तस्थोभगवानेवविषयइत्यंगीकर्तव्यं । यस्मि

भाष्यं ॥ गुह्यंतत्परमंब्रह्मशीर्यमाणंशरीरिणं । संप्राप्तमपिजीवेषुजागर्तिस्वपितेष्वपीतिब्रह्मांडे । धारकत्वाद्धर्मोभगवान् । मरणेस्थितंभगवंतंमानुप्राक्षीः । महतिसांपरायेमुक्तौ ॥ प्रथमाध्यायस्यप्रथमावल्ली ॥ १ । १ ॥

न्निदंविचिकित्संतिमृत्योसांपरायेमहतिब्रूहिनस्तदित्युत्तरवाक्येयस्मिन्महतिसांपरायेइदंब्रह्मास्तिनवेतिविचिकित्संति तद्ब्रूहीति प्रार्थनादितिभावेनमहतिसांपरायइत्यस्यार्थमाह ॥ महतीति ॥ सांपरायशब्दस्यश्रेयोमात्रवाचकत्वेपिमहच्छब्दसमानाधिकृतस्यमुक्तिवाचकत्वोपपत्तेरित्यर्थः ॥ प्रथमाध्यायस्यप्रथमावल्ली ॥ १ । १ ॥ ततश्चोशन्हवाइत्यादेरेवमक्षरयोजना ॥ उशन् स्वर्गलोकमिच्छन् । वाजश्रवसःनप्ता वाजश्रवोनप्ता । सर्ववेदसं सर्वस्वदक्षिणां ददौ । हवाइतिनिपातौवृत्तार्थस्मारणार्थौ । निरिंद्रियागाश्चददाविति शेषः । तस्यऋषेर्नचिकेतानामपुत्रआस हकिल । तंसंतंकुमारं तासुगोषु दक्षिणासुनीयमानासु दक्षिणात्वेनदीयमानासुसतीषु । श्रद्धा पितुर्हितकामप्रयुक्तास्तिक्यबुद्धिराविवेश । हेत्याश्चर्ये । कुमारस्यापिश्रद्धाजातेति । सआविष्टश्रद्धोनचिकेताएवममन्यत । कथं पीतमेवं नतुपातव्यमुदकंयाभिस्ताः पीतोदकाः । जग्धंभक्षितमेव नतुभक्षणीयं तृणंयासांताजग्धतृणाः । दुह्यतइतिदोहःक्षीरं । दुग्धमेवदोहो नतुदोह्यमस्तियासांतास्तथोक्ताः । निरिंद्रियाश्चक्षुःपादादींद्रियशून्याः । अप्रजननसमर्थावा । यागावस्ताददत् प्रयच्छन्यःपुरुषः स ये ते प्रसिद्धाः अनंदानामलोकास्तान्गच्छतीति । अत्रप्रामादिकैकगोदानव्यावृत्त्यर्थंपीतोदकाइत्यादिबहुवचनं । नन्वन्यत्रानंदशब्दस्तमःपरतयाव्याख्यातः । यथोक्तं । नि

उप० ॥ श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकश्रीलक्ष्मीहयग्रीवायनमः ॥ हरिः ॐ । उशन्हवैवाजश्रवसस्सर्ववेदसंददौ । तस्यह नचिकेतानामपुत्रआस । तंहकुमारंसंतंदक्षिणासुनीयमानासुश्रद्धाविवेश ॥ १ ॥ पीतोदकाजग्धतृणादुग्धदोहानिरिंद्रियाः । अनंदानामतेलोकास्तान्सगच्छतिताददत् ॥ २ ॥

त्यदुःखस्वरूपत्वादनंदंतत्तमोमतमिति । तत्कथमेतादृग्गोदानमात्रेणतमःप्राप्तिरिति । सत्यं अत्रापिगोदानकर्तुस्तमोयोग्यत्वे नंदशब्दस्यतमःपरत्व मन्यथातादृगनित्यनरकपरत्वमित्यंगीकारादिति ॥ २ ॥ तएतादृशगोदानकर्तुरेवमनर्थः अयंचतादृ शीरेवगाःप्रयच्छति । अतोस्यानर्थोभविष्यति । पुत्रेणचसतामयासपरिहर्तव्यइतिमन्यमानःसकुमारोमांदत्वापि ते नगावोदा तव्याईदृश्यइतिभावेन पितरमुवाच । किमिति । हेतात मांकस्मैदास्यसीति । एवमुक्तेबालकत्वात्यत्किंचिद्वदतीतिमन्यमाने नपित्रोपेक्ष्यमाणःसद्वितीयंतृतीयंद्विवारंत्रिवारमप्येवमेवोवाच । नायंबालकस्वभावइतिमत्वाक्रुद्धःसन् तं कुमारं प्रत्युवाच । किमिति । त्वा त्वां मृत्यवे यमाय दास्यामीति । त्वंम्रियस्वेतिशशाप । उपलक्षणमेतत् । मृत्वामृत्योर्गृहान्गच्छ । तदापि प्रवसं तंमृत्युंप्रतिगंतासि । तस्यगृहेतिस्रोरात्रीरनश्नन्नेववसतात् । सदेशांतरादागतोयमोयदित्वांपृच्छेत् । कुमार कतिरात्रीरवात्सी रिति तदातिस्रइतिप्रतिब्रूयात् । किंप्रथमरात्रावाश्नाइतियदिपृच्छेत्तदातेप्रजामितिप्रतिब्रूतात् । किंद्वितीयरात्रावाश्नाइतिपृच्छेत्त दापशूंस्तइतिप्रतिब्रूयात् । किंतृतीयरात्रावाश्नाइतिपृच्छेत्साधुकृत्यांतइतिप्रतिब्रूतादितिशशापेतिग्राह्यं । एतादृशंपुत्रंप्रत्यपिसाक्षा त्पिताप्येवमुक्तवानितिआश्चर्यद्योतनायहेत्युक्तं ॥ ३ ॥ एवंशसतःपुत्रआह ॥ बहूनामिति ॥ यद्यप्यहमद्यबहूनांपुरुषाणांमध्ये प्रथमोमुख्यःसन्यममेमि । वर्तमानसामीप्याद्वर्तमानव्यपदेशः । एवंबहूनांपुरुषाणांमध्यमःसन्वायममेमि । तथापियमोम

उप० ॥ सहोवाचपितरंततकस्मैमांदास्यसीतिद्वितीयंतृतीयं । तंहोवाचमृत्यवेत्वाददानीति ॥ ३ ॥ बहूनामेमिप्रथमोबहूनामेमिमध्यमः । किं स्विद्यमस्यकर्तव्यंयन्मयाद्यकरिष्यति ॥ ४ ॥

यायत्करिष्यति तत्कर्तव्यं यमस्यकिंस्वित्किमेव नकिमपि । तथाचव्यर्थमेवत्वदीयंदानमितिभावः । अप्रयोजकतयागमनेत्व यानतस्यप्रयोजनमित्यतउक्तंप्रथमःसन्नेमीति । मुख्यत्वेनाऽऽगतस्यशुश्रूषाद्यनंगतयानतस्यत्वयाप्रयोजनमित्यतउक्तंमध्यमःस न्निति । तच्छुश्रूषकाणांनियतत्वेनतन्मध्येममप्रवेशायोगादितिभावः ॥ ४ ॥ त्वदीयंदानंव्यर्थभवतीत्येवममक्लेशो नतुममममरणं दत्तमिति । देहिनांमरणस्यनियतत्वादितिभावेनाह ॥ अनुपश्येति ॥ हेपितस्त्वंयथापूर्वेदेहिनःसर्वेमृताअभवन् तदनुपश्यवि जानीहि । पूर्वेषांमृतत्वेप्यपरेषांमरणंकुतइतिचेत् यथापूर्वेमृतास्तथाऽपरेमरिष्यंतीतिप्रतिपश्यविजानीहि । देहित्वाविशेषादिति भावः । देहिनांमरणंनियतमित्येतमर्थंदृष्टांतेनसाधयति ॥ सस्यमिवेति ॥ यथासस्यंपच्यतेपरिपक्वंभवति । ततश्चजी र्यते । एवंमर्त्योपिजरादिनापरिपक्वस्सन्नश्यतीत्यर्थः । नघटादिवत्देहिनःसर्वथानाशइतिलभ्यते सस्यदृष्टांतकथनेन । यद्वा देहिनांमरणस्यनियतत्वेपिबाल्यावस्थायामेवेतिनियमाभावात् बालकस्यममत्वयामरणंदत्तमित्यपिनक्लेशइतिभावेनाह ॥ सस्य मिवेति ॥ अवश्यंभाविन्यर्थेकाव्यथेतिभावः ॥ ५ ॥ सबालएवंपितृसन्निधावुक्त्वातंप्रवसंतंयमंप्रतिजगाम । यमेप्रवासायगते तद्गृहंप्रतिजगामेतियावत् । अतस्तस्यपल्यासंपूज्यमानोप्यर्घ्यादिकंनजग्राह । सचयमागमनमेवावेक्षणमाणस्तस्यगृहेतिस्रोरा त्रीरनश्नन्नेवोवास । ततोयमोलोकांतरादागतइतिमध्येवक्तव्यं ॥ ७ ॥ आगतेतुयमेयमभार्यायमंप्रत्याह ॥ वैश्वानरइति ॥

उप० ॥ अनुपश्ययथापूर्वेप्रतिपश्यतथापरे । सस्यमिवमर्त्यःपच्यतेसस्यमिवजायतेपुनः ॥ ५ ॥ वैश्वानरःप्रविशत्यतिथिर्ब्राह्मणोगृहान् । तस्यैतांशांतिंकुर्वंतिहरवैवस्वतोदकं ॥ ६ ॥

हेवैवस्वत विवस्वतःसूर्यस्यपुत्र । अतिथिर्ब्राह्मणःगृहिणांगृहान्वैश्वानरोअग्निःसन्प्रविशति । अतस्तस्यातिथिरूपवैश्वानर स्यैतां शुत्याद्युक्तां अर्घ्यादिरूपां शांतिंशांतिकारणं कुर्वन्ति । अन्यथावैश्वानरेणेवातिथिनादाहःस्यात् । अतोअर्घ्याद्यर्थमुद कंहरआहर ॥ ६ ॥ किंचानश्नन्ब्राह्मणोयस्याल्पमेधसःपुरुषस्यगृहेवसतिएतत्एतस्यआशाप्रतीक्षे । अप्राप्तस्यप्राप्त्यर्थं मिच्छाआ शा । इदमेतस्मिन्कालेसिध्यतीतिनिश्चित्यतत्कालप्रतीक्षणंप्रतीक्षातेआशाप्रतीक्षे संगतं सुहृत्संगतं सूनृतांच साध्वींवाणीमिष्टा पूर्तेइष्टापूर्तजन्यंफलं सर्वान्पुत्रपशूंश्च वृङ्क्तेछेदयति । अयंचमत्कृतांपूजांअगृह्णन्नेवास्तइति ॥७॥ एवमुक्तोयमस्तंकुमारंपप्रच्छ । कुमारकतिरात्रीरवात्सीरिति । तिस्रइतिप्रत्युवाच । किंप्रथमांरात्रिमाश्नाइति प्रजांतइति किंद्वितीयामिति पशूंस्तइति किंतृ तीयामिति साधुकृत्यांतइतीतिशाखांतरोक्तंग्राह्यं ॥ ७ ॥ एवंकुमारोक्तोयमआह ॥ तिस्रइति ॥ हेब्रह्मन्नमस्योनमस्कारार्हो तिथिस्त्वं यत्यस्मान्मेममगृहेतिस्रोरात्रीरनश्नन्नेवावात्सीर्वासमकार्षीस्तस्मात्हेब्रह्मन्तेतुभ्यंनमोस्तु मेमह्यंस्वस्त्यस्तुमंगलमस्तु प्रति तस्यप्रतीकाराय । त्रीन्वरान्वृणीष्व ॥ ८ ॥ एवमुक्तोनचिकेताःप्रथमंवरंवृणोति ॥ शांतसंकल्पइति ॥ मृत्योगौतमो गोतमगोत्रापत्यंममपिता । मामभिमांप्रति वीतमन्युर्विगतकोपो तएव मदनिष्टेशांतसंकल्पः सुमनाःप्रसन्नमनाश्च यथास्यात् । किंच

उप० ॥ आशाप्रतीक्षेसंगतंसूनृतांचेष्टापूर्तेपुत्रपशूंश्चसर्वान् । एतद्वृङ्क्तेपुरुषस्याल्पमेधसोयस्यानश्नन्वसतिब्राह्मणोगृहे ॥ ७ ॥ तिस्रोरात्रीर्यद वात्सीर्गृहेमेअनश्नन्ब्रह्मन्नतिथिर्नमस्यः । नमस्तेस्तुब्रह्मन्स्वस्तिमेस्तुतस्मात्प्रतित्रीन्वरान्वृणीष्व ॥ ८ ॥ शांतसंकल्पस्सुमनायथास्याद्वीतमन्युर्गौ तमोमाभिमृत्यो । त्वत्प्रसृष्टंमाभिवदेत्प्रतीतएतत्रयाणांप्रथमंवरंवृणे ॥ ९ ॥

त्वत्प्रसृष्टंत्वयाप्रेषितंमांप्रतीतःसएवायंपुत्रइतिप्रत्यभिजाननन्यथाभिवदेत्सम्यग्वदेत् । एतत्पूर्वोक्तत्रयाणांवराणांमध्येप्रथमंव रंवृणे ॥ ९ ॥ एवमुक्तोयमस्तथाभवत्वित्याह ॥ यथेति ॥ औद्दालकिरुद्दालकएवऔद्दालकिः । उद्दालकस्यापत्यंपुमानितिवा ॥ औद्दालकि रारुणिररुणायाअपत्यंपुमानारुणिस्तवपितामृत्युमुखात्प्रमुक्तंत्वांदृष्टशिवान्पश्यन्मत्प्रसृष्टोमत्प्रेरितोवीतमन्युःसन्पु रस्तात्पूर्वत्वांप्रतियथायेनप्रकारेणावर्त्तत तथाभविता । प्रतीतःप्रत्यभिज्ञावांश्चभविता । रात्रीःसुखंशयिता । अत्रयथापुरस्ताद्भवि तेत्यनेन सुखंरात्रीःशयितेत्यनेनच शांतसंकल्पत्वंसुमनस्कत्वंचोक्तंभवति ॥ १० ॥ नचिकेताद्वितीयंवरंप्रार्थयितुमाह ॥ स्वर्ग इति ॥ हेमृत्योस्वर्गेलोकेभयं किंचन किमपिनास्ति । क्षुद्रभयाभावेपिमरणंस्यादित्यतउक्तं । नतत्रत्वमिति । नतत्रमन्वंतरका लपर्यंतंमृत्युरस्तीत्यर्थः । जरयानबिभेति । अशितुमिच्छाअशनाया पातुमिच्छापिपासा तेउभेतीर्त्वा शोकमतिक्रम्यगच्छतीतिशोका तिगःस्वर्गलोकेमोदते ॥ ११ ॥ किंततइत्यतआह ॥ सत्वमिति ॥ हेमृत्योसत्वंममवरदातात्वंस्वर्ग्यंपूर्वोक्तमाहात्म्यवत्स्वर्ग साधनीभूतमग्नि मग्निस्थमग्यत्वादग्निनामानंविष्णुमध्येषि अधिकंजानासि तंश्रद्दधानायमह्यंप्रब्रूहि सम्यक्कथयेत्येतत्द्वितीयेन वरेणवृणे । नकेवलंज्योतिष्टोमाग्निस्थविष्णुज्ञानिनःस्वर्गएवफलं । किंतुस्वर्गप्राप्त्यनंतरंमोक्षोपीत्याह ॥ स्वर्गलोकाइति ॥ स्वर्गो

उप० ॥ यथापुरस्ताद्भविताप्रतीतएतऔद्दालकिरारुणिर्मत्प्रसृष्टः । सुखंरात्रीश्शयितावीतमन्युस्त्वांदृष्टशिवान्मृत्युमुखात्प्रमुक्तं ॥ १० ॥ स्वर्गेलोकेनभयंकिंचनास्तिनतत्रत्वंनजरयाबिभेति । उभेतीर्त्वाअशनायापिपासेशोकातिगोमोदतेस्वर्गलोके ॥ ११ ॥ सत्वमग्निंस्वर्ग्यमध्येग्निमृत्यो प्रब्रूहित्वंश्रद्दधानायमह्यं । स्वर्गलोका

लोकोयेषांतेस्वर्गलोकाःस्वर्गेविद्यमानाजनावाअमृतत्वंमोक्षंक्रमाद्भजंते ॥ एवमुक्तोयमआह ॥१२॥ प्रतेब्रवीमीति ॥ हेनचिकेतः स्वर्ग्यंस्वर्गसाधनीभूतमग्निमग्निस्थमग्निनामकंभगवंतंप्रकर्षेणजानन्नहंतेतं ब्रवीमि । त्वंतुमेममसकाशात्ततत्त्वदीप्सितंवस्तुनिबोध विजानीहि । एवंप्रतिज्ञायाग्निस्थभगवत्स्वरूपमाह ॥ अनंतेति ॥ हेनचिकेतस्त्वं एतंत्वयापृष्टमग्निस्थंअग्निनामकंभगवंतं अनंत लोकाप्तिं अनंतस्यलोकआप्यतेयेनेति अनंतलोकआप्यतेयेनेतिवा अनंतलोकाप्तिस्तं । अथोइतिविशेषणांतरसमुच्चयार्थः । प्रति ष्ठांसर्वलोकस्यधारकं । गुहायांसर्वेषांहृद्गुहायां । निहितंविद्धिजानीहि ॥ १३ ॥ श्रुतिःस्वयमाह ॥ लोकादिमिति ॥ तंनचि केतसापृष्टंलोकादिंसर्वलोकादिं । अग्निमग्निस्थंभगवंतं तस्मैनचिकेतसे यमउवाच । नकेवलमेतावत् । किंतुइष्टकाःइष्टकादेवताः याः यत्स्वरूपाः यावतीर्यावत्योयावत्संख्याकाः यथावा येनैवप्रकारेणज्ञातव्याःयत्परिमाणकावा तत्सर्वमप्युवाचेत्यर्थः । एवमु पदिष्टःसबालोनचिकेताःतत्मृत्युप्रोक्तंभगवत्स्वरूपं । मृत्युनायथोक्तंतथैव । प्रत्यवदत्अनूदितवांश्च । अथानुवादानंतरमस्यन चिकेतसस्तुष्टःप्रसन्नोमृत्युःपुनराह ॥ १४ ॥ किमाहेत्यतउक्तमनुवदन्नाह ॥ तमिति ॥ यद्वायदाहतत्प्रीत्यनंतरमेवाहनतुका

उप ॥ अमृतत्वंभजंते । एतद्वितीयेनवृणेवरेण ॥ १२ ॥ प्रेतब्रवीमितदुमेनिबोधस्वर्ग्यमग्निंनचिकेतःप्रजानन् । अनंतलोकाप्तिमथोप्रतिष्ठां विद्धित्वमेतंनिहितंगुहायां ॥१३॥ लोकादिमग्निंतमुवाचतस्मैयाइष्टकायावतीर्वायथावा । सचापितत्प्रत्यवदद्यथोक्तमथास्यमृत्युःपुनराहतुष्टः ॥१४॥

लांतरइत्याह ॥ तमिति ॥ प्रीयमाणोमहात्मायमस्तंनचिकेतसंप्रत्यब्रवीत् । किं । तवाद्येहप्रीतिनिमित्तंवरंभूयोददामि । तंवरं दर्शयति ॥ तवैवेति ॥ अयंमदुपदिष्टोग्निस्तवैवनाम्नाप्रसिद्धोभविता । इमामनेकरूपांस्वर्णमयीं शृंकांकंठमालांच गृहाणेति वरमदात् ॥ १५ ॥ अनंतलोकाप्तिमित्यनेनाग्निस्थभगवज्ज्ञानमनंतलोकाप्तिसाधनमित्युक्तं । तत्रततज्ज्ञानमेवकथंस्यादित्याशंकां परिहरन्ननंतलोकाप्तिमित्युक्तंविवृणोति ॥ त्रिनाचिकेतइति ॥ नचिकेतसोयंनाचिकेतः त्रिशश्चितोनाचिकेतोग्निर्येनसःत्रिना चिकेतः त्रिकर्मकृत्यज्ञदानतपःकर्त्ता त्रिभिःऋग्यजुःसामाख्यैर्वेदैः संधिंसंधानमेत्य वेदैरविरुद्धोभूत्वा वेदोक्तप्रकारेणभगवत्त त्वादिकंज्ञात्वेतियावत् । जन्ममृत्यूतरति । नवेदोक्तप्रकारेणभगवज्ज्ञानमपिसाक्षान्मोक्षसाधनं किंतुमननादिद्वारैव । मोक्षोपि नजन्ममृत्यूत्तरणरूपएव । किंतुसुखरूपश्चेतिभावेनप्रकारांतरेणाप्यग्निस्थभगवज्ज्ञानंमोक्षसाधनमित्याह ॥ ब्रह्मजज्ञमिति ॥ ब्रह्मणोवेदाज्जायतेअभिव्यज्यतइतिब्रह्मजः सर्वंजानातीतिज्ञः । ब्रह्मजश्चासौज्ञश्चेतिब्रह्मजज्ञस्तं देवंक्रीडादिगुणसंपन्नं ईड्यंस्तुत्यं तंविदित्वानिचाय्यविचार्य तथाऽपरोक्षतोनिश्चित्येमामत्यंतशांतिंआत्यंतिकसुखरूपांशांतिंमुक्तिमेति । मोक्षश्शांतिश्चशरणं निर्वाणंचाभिधीयतइतिवचनात् ॥ १६ ॥ नकेवलमग्निस्थभगवज्ज्ञानमेवमोक्षसाधनं । किंतुयाइष्टकाइत्याद्युक्तेष्टकादेवताज्ञान

उप । तमब्रवीत्प्रीयमाणोमहात्मावरंतवेहाद्यददामिभूयः । तवैवनाम्नाभवितायमग्निःशृंकांचेमामनेकरूपांगृहाण ॥ १५ ॥ त्रिनाचिकेतस्त्रिभिरेत्यसंधिंत्रिकर्मकृत्तरतिजन्ममृत्यू । ब्रह्मजज्ञंदेवमीड्यंविदित्वानिचाय्येमांशांतिमत्यंतमेति ॥ १६ ॥

मपीत्याह ॥ त्रिनाचिकेतइति ॥ त्रिवारकृतनाचिकेतः त्रयमेतत्याइष्टकायावतीर्वायथावेत्युक्तेष्टकादेवतांविष्णुं तत्संख्यांषष्टयुत्तरशतत्रयलक्षणां तत्परिमाणंचविदित्वा शांतिमत्यंतमेतीतिपूर्वेणसंबंधः । इदानीमुक्तरीत्याजानन्कर्मकर्ता योग्यश्चेद्भवति सायुज्यंचतस्यफलमित्याह ॥ यएवमिति ॥ योधिकारीएवमुक्तप्रकारेणाग्निस्थविष्णुंविद्वान् नाचिकेतमग्निंचिनुते त्रिशइति शेषः । सपुरतःप्रथमतो मृत्युपाशान्संसारमितियावत् । प्रणोद्यशोकातिगःसन् स्वर्गलोके आनंदज्ञानप्रकाशरूपेविष्णौप्रविष्टः सन्मोदते । स्तोममहदुरुगायंप्रतिष्ठामित्युत्तरत्रमोक्षेप्रवेशार्थकप्रतिष्ठाशब्दस्यपूर्वोक्तपरामर्शरूपत्वस्यभाष्येउक्तत्वात् अन्यस्यतत्परामृश्यस्यपूर्वमभावात् स्वर्गलोकइत्येतदेवतत्परामृश्यमिति एवंव्याख्यातं । यद्वा योधिकारीउक्तरीत्याविद्वान्कर्मकरोतितस्यसर्वस्यापिउक्तंफलंभवतीत्याह ॥ एवमिति ॥ स्वर्गलोकेप्रसिद्धेमोदते । तदनंतरंक्रमात् स्वर्गलोकेविष्णुलोके मोदतइतिव्याख्येयं । नचायंस्वर्गलोकःप्रसिद्धएव । स्वर्गलोकाअमृतत्वंभजंतइत्युपक्रमात् ॥ १७ ॥ प्रीत्यास्वदत्तंवरमवधारयति ॥ एषइति ॥ त्वंयंद्वितीयवरेणावृणीथाः एषस्वर्ग्योग्नि र्नाचिकेतइति तेतव नाम्नाप्रसिद्धोभविता । कथं । एतमग्निंतवैव ताम्ना जनासोजनाः प्रवक्ष्यंति । एवंद्वितीयंवरंदत्वाप्रीत्यास्वदत्तंवरंचावधार्येदानींतृतीयंवरंप्रार्थयेत्याह ॥ तृतीयमिति ॥ १८ ॥ एवमुक्तोनचिकेताःतृतीयंवरंवृणोति ॥ येयमिति ॥ प्रेतेमुक्तेमृतेवामनुष्येऽयंभगवान्नियामकत्वेनास्तीत्येकेज्ञानिनोवदंतीतिशेषः ।

उप । त्रिनाचिकेतस्त्रयमेतद्विदित्वायएवंविद्वांश्चिनुतेनाचिकेतं । समृत्युपाशान्पुरतःप्रणोद्यशोकातिगोमोदतेस्वर्गलोके ॥ १७ ॥ एषतेग्निर्नाचिकेतस्स्वर्ग्योयमवृणीथाद्वितीयेनवरेण । एतमग्निंतवैवप्रवक्ष्यंतिजनासः तृतीयंवरंनचिकेतोवृणीष्व ॥ १८ ॥ येयंप्रेतेविचिकित्सा

नास्तीत्यज्ञावदंति । अतोविप्रतिपत्तेर्विचिकित्सासंशयोस्ति । किमिति । प्रेतेमनुष्येऽयंभगवान्नियामकत्वेनास्तिनवेति । किंततः। इयंविचिकित्सा या यद्विषया एतत्संशयविषयीभूतस्यमुक्तामुक्तनियामकस्यस्वरूपं । त्वयानुशिष्टोयथावद्विद्यांजानीयां । एष एवत्वदत्तानांवराणांमध्येतृतीयोवरोवृतोमयाप्रार्थितः ॥ १९ ॥ एवमुक्तोयमोमुक्तामुक्तजीवनियामकभगवज्ज्ञानमेवमोक्षसाधनं तच्चातिगोप्यं अतःश्रोतुर्बुद्धिदार्ढ्याभावेनवक्तव्यमितिभावेन तद्बुद्धिपरीक्षणायं तस्यदुर्ज्ञेयत्वमाह ॥ देवैरिति ॥ हेनचिकेतः पुरापूर्व मत्रमुक्तामुक्तजीवनियामकभगवद्विषये देवैरपिविचिकित्सितं । कुतः हियस्मादेषधर्मोधारकत्वाद्धर्मनामाभगवान् सुज्ञेयोन । कुतः यतोणुःसूक्ष्मः तस्मादन्यंवरंवृणीष्व । मामां मोपरोत्सीरिदमेववक्तव्यमित्युपरोधंमाकार्षीः मामांप्रति एनंवरं अतिसृजविमुंचेत्यर्थः ॥ २० ॥ एवमुक्तोनचिकेतआह ॥ देवैरिति ॥ हेमृत्योत्वमेव यत्यस्मात् देवैरपि अत्रविचिकित्सितं किलेतिपुरावृत्तद्योतनार्थः । अतएवभगवत्स्वरूपंसुज्ञेयंनभवतीत्यात्थ । तस्मात्सएववरोमयार्थितोनान्यः । कुतइत्यतएतत्सदृशस्याभावादित्याह ॥ नान्यइति ॥ अयमेववरोऽन्यस्मात्संपाद्यतांइत्यतआह ॥ वक्ताचेति ॥ २१ ॥ एवमुक्तोयमःसर्वात्मना विषयविरक्तस्यैवमोक्षशास्त्रेधिकारइतिज्ञापनायनचिकेतसःस्थैर्यनिरीक्षणायनानाविषयैस्तंप्रलोभयति ॥ शतायुषइत्यादिना॥

उप । मनुष्येअस्तीत्येकेनायमस्तीतिचैके । एतद्विद्यामनुशिष्टस्त्वयाहंवराणामेषवृतस्तृतीयः ॥१९॥ देवैरत्रापिविचिकित्सितंपुरानहिसुज्ञेयोणुरेषधर्मः । अन्यंवरंनचिकेतोवृणीष्वमामोपरोत्सीरतिमासृजैनं ॥२०॥ देवैरत्रापिविचिकित्सितंकिलत्वंचमृत्योयन्नसुज्ञेयमात्थ । वक्ताचास्यत्वादृगन्यो नलभ्योनान्योवरस्तुल्यएतस्यकश्चित् ॥ २१ ॥ शतायुषः

शतंवर्षाण्यायूंषियेषांतेशतायुषस्तान्पुत्रपौत्रान्वृणीष्व । बहून्पशून्गोमहिष्यादिरूपान् । हस्तीहिरण्यंचहस्तिहिरण्यमितिद्वंद्वैकवद्भावः । अश्वान् भूमेर्महदायतनंच भूमेरितिपंचमीसप्तम्यर्थे । महद्विस्तीर्णमायतनमाश्रयंमहाराज्याधिपत्यमितियावत् । वृणीष्व । नकेवलंपुत्रपौत्राणामेवशतायुष्ट्वं किंतु स्वयंचयावज्जीवितुमिच्छसि तावतीःशरदोजीव । सर्वमेतदनर्थकं स्वयंचेदल्पायुरित्यतोवाह ॥ स्वयंचेति ॥ २२ ॥ नन्वेवंत्वदत्तोवरोमृषैवजातः मत्प्रार्थितस्यत्वयाअदानादित्यतआह ॥ एतत्तुल्यमिति ॥ त्वदीयंवरमेतत्तुल्यंएतस्यमयादीयमानस्यसमंयदिमन्यसे तर्हिदीयमानंवित्तंचिरजीविकांचदीर्घजीवनहेतुक्षेत्रंदीर्घजीवनंवा उक्तोपलक्षणमेतत् । वृणीष्व । नचेदन्यदपिदास्यामीत्याह ॥ महाभूमाविति ॥ हेनचिकेतः त्वं महाभूमौ निमित्तसप्तमीयं । महाराज्याधिपत्येसतीतियावत् । एधिअभिवृद्धोभव । त्वांकामानांकाम्यानांमध्येकामितभाजंकरोमीत्यर्थः ॥ २३ ॥ एतदेव विवृणोति ॥ येयइति ॥ कामाःकाम्याः छंदतइच्छानुसारेण । तानेवविशिष्याह ॥ इमाइति ॥ रथेनसहवर्ततइतिसरथाः सतूर्याःसवादित्रा इमारूपादिगुणवतीः मल्लोकस्थावा रामारमणीयाःस्त्रियः प्रार्थयस्व । तासुविशेषमाह ॥ नहीदृशाइति ॥ तर्ह्येतादृशीभिःकिंमेप्रयोजनमित्यतआह ॥ आभिरिति ॥ मत्प्रत्ताभिर्मद्दत्ताभिराभिःस्त्रीभिःपरिचारयस्वनृत्तगानादिनात्मनःपरिचर्यांकारय । हेनचिकेतोमरणंमरणेस्थितं म्रियमाणजीवस्थितं भगवंतं मानुप्राक्षीः ॥२४॥ एवंप्रलोभितोनचिकेताःशता

उप । पुत्रपौत्रान्वृणीष्वबहून्पशून्हस्तिहिरण्यमश्वान् । भूमेर्महदायतनंवृणीष्वस्वयंचजीवशरदोयावदिच्छसि ॥ २२ ॥ एतत्तुल्यंयदिमन्यसेवरं वृणीष्ववित्तंचिरजीविकांच । महाभूमौनचिकेतस्त्वमेधिकामानांत्वाकामभाजंकरोमि ॥ २३ ॥ येयेकामादुर्लभामर्त्यलोकेसर्वान्कामांश्छंदतःप्रार्थयस्व । इमारामास्सरथास्सतूर्यानहीदृ(शी)शालंभनीयामनुष्यैः । आभिर्मत्प्रत्ताभिःपरिचारयस्व

युषइत्यादेरुत्तरमाह ॥ श्वोऽभावाइति ॥ हेअंतक मर्त्यस्यमरणशीलस्यपुरुषस्य यदेतत्ययएतेपुत्रपौत्रपश्वादयस्ते श्वोऽभावाः श्वोपिनविद्यतेभावःसत्तायेषांतेश्वोऽभावाः क्षिप्रविनाशाइतियावत् । नकेवलमेतावत् । किंतुस्वसद्भावदशायांचसर्वेंद्रियाणांतेजःसामर्थ्यं स्ववृद्धिक्षयचिंतयाजरयंतिच । तस्मान्नतेमयाप्रार्थ्याः । स्वयंचजीवशरदोयावदिच्छसीत्यस्योत्तरमाह ॥ अपिसर्वमिति ॥ सर्वमपिजीवितंब्रह्मकल्पपर्यंतंजीवनमप्यल्पमेव । तस्यापिपर्यवसानात् । निरवधिकजीवनस्यमोक्षादन्यत्राभावात् । तस्मात्तदपिनप्रार्थये । इमारामाःसरथाःसतूर्याइत्यादेरुत्तरमाह ॥ तवैवेति ॥ वाहारथास्तवैवतिष्ठंतु ॥ २५ ॥ वृणीष्ववित्तमित्यस्योत्तरमाह ॥ नवित्तेनेति ॥ महावित्तलाभेपिमनुष्यस्यतृप्त्यदर्शनादित्यर्थः । किंचत्वद्विधेभ्योवित्तादिप्रार्थनंचनकार्यं । तस्यनांतरीयकतयासिद्धत्वादित्याह ॥ लप्स्यामहइति ॥ चेत्यदि त्वामद्राक्ष्म तर्हिवित्तंलप्स्यामहेप्राप्स्यामहएव । त्वद्दर्शनमात्रेणवित्तलाभोभविष्यतीतिनपृथक्प्रार्थनीयमितिभावः । जीवनमपिनपृथक्प्रार्थनीयं । तस्यत्वदधीनत्वादित्याह ॥ जीविष्यामइति ॥ त्वंयावदीशिष्यसिरक्षयिष्यसितावज्जीविष्यामोतोनायंवरोवरणीयः । किंतुमेमयावरणीयस्तुवरःसएव यःप्राक्प्रार्थितइत्यर्थः ॥ २६ ॥ कुतएवंनिर्बंधइतिचेत् यतस्त्वादृशगुरुप्राप्तावपिभगवत्स्वरूपमविज्ञायपुत्रपौत्रादिकंवृण्वतोमेतमएवभ

उप । नचिकेतोमरणंमानुप्राक्षीः ॥ २४ ॥ श्वोभावामर्त्यस्ययदंतकैतत्सर्वेंद्रियाणांजरयंतितेजः । अपिसर्वजीवितमल्पमेवतवैववाहास्तवनृत्तगीतं ॥ २५ ॥ नवित्तेनतर्पणीयोमनुष्योलप्स्यामहेवित्तमद्राक्ष्मचेत्त्वां । जीविष्यामोयावदीशिष्यसित्वंवरस्तुमेवरणीयस्सएव ॥ २६ ॥

विष्यति । तथाहिश्रुतिः । इहचेदवेदीदथसत्यमस्तीत्यादिका । तस्मादेवंजानतामयानतत्प्रार्थ्यतइतिभावेनाह ॥ अजीर्यता मिति ॥ प्रजानन्मर्त्यः अजीर्यतांजराशून्यानां अमृतानांमरणशून्यानां त्वद्विधानांदेवानामुपसमीपमेत्य भगवदुपदेशमप्राप्यैवजीर्यन्विनश्यमानः क्व नक्वापीत्यर्थः । जीवस्यस्वरूपतोनाशाभावात् । देहवियोगस्यभगवज्ज्ञानिनोपिसत्त्वात्जीर्यन्नित्युक्तंविवृणोति ॥ क्वाधस्तइति ॥ अंधंतमआद्यधोगतिस्थःक्व नक्वापीत्यर्थः । प्रजाननितियमस्यसंबोधनंवा । दुःखहेतुत्वाच्चन दीर्घजीवनंवरणीयमित्याह ॥ अभिध्यायन्निति ॥ वर्णेत्यतःपूर्वस्त्रीपुत्रादीनामितिशेषः । वर्णःस्त्रीपुत्रादिरूपविशेषः रतिः क्रीडा प्रमोदस्तदुत्थःसुखविशेषः वर्णरतिप्रमोदान्निवृत्तानितिशेषः । अतिदीर्घकालजीवनेहिस्वजीवनमध्यएवान्येषांविनाशः स्यात् । तेषामतिदीर्घकालजीवननियमाभावात् । ततश्चतन्नाशेतेषांस्मरणेनतुदुःखंस्यात् । अतोनदीर्घजीवनंपुरुषार्थः । प्रत्युतअनर्थहेतुरितिभावः ॥ २७ ॥ पूर्वोक्तमेवनिर्धारयति ॥ यस्मिन्निति ॥ हेमृत्यो महतिसांपरायेमुक्तौ नियामकतयेदंब्रह्मास्ति नवेतियस्मिन्विचिकित्संति तत्मुक्तनियामकभगवत्स्वरूपमेव नोब्रूहीतियोजना । श्रुतिःस्वयमाह ॥ यइति ॥ योयंवरोगूढं गूढत्वमनुप्रविष्टःप्राप्तस्तमेवनचिकेतावृणीतेनतस्मादन्यमित्यर्थः ॥ २८ ॥ इतिप्रथमाध्यायस्यप्रथमावल्ली ॥ १ ॥ एवंनचिकेतसोविषयाभिलाषराहित्यादयंब्रह्मविद्यायोग्यइतिभावेनविषयकामनायुक्तस्यतद्रहितस्यचस्वरूपंनिरूपयति ॥ अन्यदि

उप । अजीर्यतामसृतानामुपेत्यजीर्यन्मर्त्यःक्वाधस्तःप्रजानन् । अभिध्यायन्वर्णरतिप्रमोदानतिदीर्घेजीविते कोरमेत ॥२७॥ यस्मिन्निदंविचिकित्सं तिमृत्योसांपरायेमहतिब्रूहिनस्तत् । योयंवरोगूढमनुप्रविष्टोनान्यंतस्मान्नचिकेतावृणीते ॥ २८ ॥ इतिप्रथमाध्यायस्यप्रथमावल्ली ॥ १ ॥ १ ॥
भाष्यं । शृंकांशृंखलां ।

त्यादिना ॥ अत्रनैतांश्रृंकांवित्तमयीमवाप्तइत्यत्राप्रतीतेःशृंकाशब्दार्थमाह ॥ श्रृंकामिति ॥ यद्यपिशृंकांचेमामनेकरूपांगृहाणेत्यत्रशृंकाशब्दःकंठमालापरतयाव्याख्यातः । तथाप्यनुवादसंतुष्टयमदत्तकंठमालायानचिकेतसाप्राप्तत्वात् तृतीयवरत्वेनकंठमालायायमेनादत्तत्वान्नचिकेतसामास्त्वित्यनुक्तत्वाच्च नैतांशृंकांवित्तमयीमवाप्तइत्युक्त्ययोगात् यस्यांमज्जंतीत्युक्तसर्वमनुष्यबंधकत्वायोगाच्चात्रशृंखलापरत्वेनव्याख्यातइत्यवधेयं । अनन्यप्रोक्तेगतिरत्रनास्तीत्यस्यानन्येनैवापृथग्दर्शिनाचार्येणप्रतिपाद्यब्रह्मभूतेन प्रोक्तेअत्रात्मनि गतिरनेकधास्तिनास्तीत्यादिलक्षणाचिंतानास्तीतिव्याख्यानमसत् । वक्ष्यमाणरीत्याब्रह्मात्मैकत्वस्वबाधितत्वेन वस्तुतआचार्यस्यप्रतिपाद्यब्रह्मभूतत्वायोगात् ज्ञानमात्रव्युत्पन्नेनगतिशब्देनतद्विशेषसंशयापरपर्यायचिंतारूपार्थग्रहणायोगाच्चेतिभावेनाह ॥ अन्यइति ॥ वस्तुगत्यानन्यत्वंबाधितमित्येवंव्याख्यातं । तद्विपरीतंचजानन्नित्यपिग्राह्यं । ज्ञानंसम्यग्ज्ञानं । ननुज्ञानवाचकगतिशब्दस्यतद्विशेषपरत्वंभवतामप्यावश्यकं । अतःसंशयपरत्वमेवकिंनस्यादितिचेन्न । प्रमासंशययोःप्रमायाअतिशयितत्वेनतद्ग्रहणस्यैवोचितत्वात् वक्ष्यमाणदोषाच्चेति । कुतएवंव्याख्येयं परोक्तएवार्थःकिंनस्यादित्यत आह ॥ प्रोक्तेति ॥ वाक्यशेषे अन्येनैव जीवेश्वरभेदज्ञानिनाचार्येण प्रोक्तावेदप्रवचनोत्पादितैवमतिः सुज्ञानायसाक्षात्कारायभवतीत्युक्तत्वेन अनन्यप्रोक्तइतिवाक्यमपि जीवेश्वरभेदाज्ञानिना तदभेदज्ञानिनाचप्रोक्तेज्ञानंनास्तीत्येवव्याख्येयं । नत्वपृथग्दर्शिनाप्रोक्तेआत्मनिउक्तप्रकारसंशयोनास्तीति । वाक्यशेषविरोधादितिभावः । ननुवाक्यशेषस्थस्यान्येनेत्यस्यागमाभिज्ञेनेत्य

भाष्यं । अन्योभगवानन्योहमित्यजानन्ननन्यः । तेनप्रोक्तेगतिर्ज्ञानंनास्ति । प्रोक्तान्येनैवसुज्ञानायप्रेष्ठेतिवाक्यशेषात् ।

र्थकत्वान्नविरोधइतिचेन्न । तथासत्यनन्यप्रोक्तइत्यस्यागमानभिज्ञप्रोक्तइतिव्याख्येयत्वेनापृथग्दर्शिप्रोक्तइतिव्याख्यानायोगात् । अपदार्थत्वादनन्यशब्दःआगमानभिज्ञपरतयानव्याख्यायतइतिचेत्तर्हिअन्येनेत्यस्यापिपृथक्दर्शिनेत्येवव्याख्येयतयाआगमाभिज्ञेनेतिव्याख्यानायोगात् । एतेनानन्यप्रोक्तेगतिरत्रनास्तीत्यत्रागतिरितिपदच्छेदमभ्युपेत्यानन्येनप्रोच्यमानब्रह्मभूतेनाचार्येणप्रोक्तेसतिआत्मनि अगतिरनवगतिरनवबोधोनास्ति । भवत्येवावगतिस्तद्विषयाश्रोतु स्तदनन्योहमित्याचार्यस्येवेत्यर्थइतियत्परकीयंव्याख्यानांतरं तदपिपरास्तं । आचार्यस्यवस्तुतःप्रोच्यमानब्रह्मभूतत्वस्यबाधितत्वात् । अपृथग्दर्शिनेत्यर्थांगीकारेपिऐक्यज्ञानिनाप्रोक्तेश्रोतुरैक्यज्ञानसंभवेपितस्यज्ञानस्यभ्रांतित्वेनसम्यग्ज्ञानत्वाभावात् । ऐक्यज्ञानस्यभ्रांतित्वंकुतइतिचेत् । वाक्यशेषेजीवेश्वरभेदज्ञानिनाचार्येणवेदप्रवचनोत्पादितामतिःमुज्ञानायभवतीत्युक्त्याभेदज्ञानस्यैवसम्यग्ज्ञानत्वावगमादितिभावः । यच्चोक्तमनन्येस्वात्मभूतेआत्मनिप्रोक्तेसतिगतिरवगतिरन्यासंपाद्यानास्ति । ऐक्यादन्यस्यज्ञेयस्याभावात् । ज्ञानस्यैषानिष्ठायदात्मैकत्वविज्ञानमिति । तदप्यसत् । अनन्यप्रोक्तइत्यस्यसमस्तत्वेन अनन्येआत्मनीतिव्याख्यानायोगात् । बुद्ध्याविवेकेनअनन्यइत्यस्यात्रेत्यनेनान्वयंकृत्वाव्याख्यायतइतिचेत् न । यथाश्रुतानुपपत्तौतथाव्याख्येयत्वात् । प्रोक्तइत्यत्रकर्त्रनुक्तिप्रसंगात् । अन्यावगतिरित्यन्यशब्दाध्याहारप्रसंगात् । वाक्यशेषपर्यालोचनयाभेदज्ञानस्यैवावश्यसंपाद्यत्वावगमेनतद्विरोधाच्चेति । प्रमाणविरोधाच्चनपरव्याख्यानंयुक्तं । किंतुस्वकृतमेवेतिभावेनश्रुत्यर्थनिश्चायकंप्रमाणमाह ॥ जीवानामिति ॥ अभिदांचवेत्तीति

भाष्यं । जीवानांचैवविष्णोश्चयोनवेत्तिभिदांपुमान् । तदनुव्रताश्चयेकेचित्तेषांज्ञानंनजायतइतिब्रह्मवैवर्ते ।

ग्राह्यं । ज्ञानंसम्यग्ज्ञानं । नजायतएवेतिसंबंधः । जानाम्यहंशेवधिरित्यादिकंपरेणैवंव्याख्यातं । पुनरपितुष्टोयमआह । जानामीति । अहंशेवधिः कर्मफललक्षणोनिधिरनित्यइतिजानामि । हियस्मादध्रुवैरनित्यैर्द्रव्यैः यत्ध्रुवंनित्यंपारमाख्यंशेवधिस्तन्नहिप्राप्यते । यस्त्वनित्यसुखात्मकःशेवधिःसएवअनित्यैर्द्रव्यैःप्राप्यतेहियतस्ततोमयाअनित्यसाधनैर्नित्यंनप्राप्यतइतिजानतापिअनित्यद्रव्यैःपश्वादिभिर्नाचिकेतोग्निःस्वर्गसुखसाधनीभूतोग्निश्चितः तेनाहमधिकारापन्नोनित्यमापेक्षिकनित्यंयाम्यस्थानंस्वर्गाख्यंप्राप्तवानस्मीति । तत्रतावदादिवाक्यव्याख्यानमसत् । नह्यध्रुवैरित्युत्तरवाक्यैर्नित्यब्रह्मप्राप्तेरनित्यद्रव्यासाध्यत्वकथनस्यासंगतत्वात् । तुष्टेनयमेनतत्पृष्टब्रह्मस्वरूपस्यैववक्तव्यतयाकर्मफलानित्यत्वकथनस्यासंगतत्वात् । तस्मादिदंब्रह्मपरमेव । तर्हितस्यनित्यत्वेनकथमनित्यत्वमुपपन्नंस्यात् । ज्ञापकाभावेनेदंब्रह्मपरमेवेतिवाकथंनिर्धारणमित्यतस्तद्व्याचष्टे ॥ आख्यमिति ॥ अः इतिब्रह्मेत्यादिश्रुतेरितिभावः । नित्यंवस्त्वितिशेषः । शेवधिःसुखनिधिः । नन्वेवंतर्हितंततोमयानाचिकेतश्चितोग्निरनित्यद्रव्यैरित्युत्तरवाक्यमनुपपन्नं । तर्ह्यनित्यद्रव्यैःपश्वादिभिरनुष्ठितस्याग्निचयनस्यनित्यभगवत्प्राप्तिहेतुत्वमस्तीत्यतोऽनित्यद्रव्यैरित्येतद्यथावद्व्याचष्टे ॥ नित्यमिति ॥ अनित्यद्रव्यैरित्यत्रनित्यपदस्यव्यत्यासः । ततश्चनित्याद्रव्यैरितिलभ्यते । अस्यद्रव्याणि अद्रव्याणीतिषष्ठीसमासः । षष्ठ्यर्थश्चविषयविषयिभावइतिभावेनोक्तंआख्यविष्णुविषयैरिति । नित्यंविष्णुविषयैरितिसंबंधः । ततश्चनित्यत्वंषष्ठ्यर्थविषयीकरणरूपक्रियाविशेषणमित्युक्तंभवति । अन्येषांद्रव्याणांसविषयकत्वाभावान्मनआदिभिरित्युक्तं ।

भाष्यं । आख्यंविष्ण्वाख्यंनित्यंशेवधिरितिजानामि । नित्यमाख्यविष्णुविषयैर्द्रव्यैर्मनआदिभिः ।

एवमनित्यद्रव्यैरित्यत्रनित्यपदस्यव्यत्यासेनक्रियाविशेषणत्वमभ्युपेत्यव्याख्यातं । इदानींतदनाश्रयेण अश्वासौनित्यश्चानित्यः तस्यद्रव्याणीतिविग्रहमभिप्रेत्यव्याचष्टे ॥ आख्येति ॥ तदेवविशदयति ॥ विष्ण्वाख्येति ॥ ततश्चकेवलाग्निचयनमात्रस्य भगवत्प्राप्तिहेतुत्वाभावेपिसर्वदानिर्दोषगुणपूर्णजीवभिन्ननित्यभगवद्विषयमनआदिपूर्वमनुष्ठितस्यतत्प्राप्तिहेतुत्वोपपत्तिरितिभावः । नन्वनित्यद्रव्यैरितिप्रसिद्धार्थकमेवकिंनस्यात् । नचप्राप्तवानस्मिनित्यमित्येतदनुरोधेनतथाव्याख्यायतइतिवाच्यं । नित्यमापेक्षिकनित्यंयाम्यंस्थानंस्वर्गाख्यंप्राप्तवानस्मीत्यर्थोपपत्तेरित्यतस्तद्व्याचष्टे ॥ नित्यमिति ॥ नित्यशब्दस्यमुख्यार्थग्रहणोपपत्तावमुख्यार्थग्रहणायोगात् । याम्यस्थानस्यापिज्ञानमात्रसाध्यत्वेनविनाशिद्रव्यानुष्ठिताग्निचयनमात्रसाध्यत्वाभावाच्चस्वर्ग्यमग्निमित्यादावग्निचयनस्यस्वर्गसाधनत्वेनोक्तत्वात् । यमस्थानप्राप्तिहेतुत्वासंभवाच्च । नचयमस्थानंस्वर्गइत्युच्यते । प्रमाणाभावादितिभावः । किंच नह्यध्रुवैःप्राप्यतेहिध्रुवंतदितिपूर्ववाक्येध्रुवशब्दान्नित्यत्वेनभगवानेवप्रस्तुतः । त्वयापिध्रुवशब्दस्यब्रह्मपरत्वांगीकारात् । एवंचात्रापिनित्यशब्दोब्रह्मपरएवास्त्वितिभावेनाध्रुवैरित्यस्यपरोक्तार्थनिरासायतद्व्याचष्टे ॥ ध्रुवइति ॥ तद्भक्तिवर्जितैस्तद्भक्तिदार्ढ्यशून्यैरित्यर्थः । अन्यथाऽनित्यैरेवज्ञानादिभिरस्मदादिभिर्वाध्रुवस्यप्राप्यत्वादनुपपत्तिः । यद्वा अनित्यद्रव्यैरित्यस्यनित्यमाख्यविष्णुविषयद्रव्यैर्मनआदिभिरित्यादिव्याख्यानमयुक्तं । तथात्वेततोमयानचिकेतश्चितोग्निरनित्यद्रव्यैरित्यत्रततइत्यनेन नह्यध्रुवैरितिपूर्वोक्तार्थस्यहेतुत्वेनपरामर्शायोगादित्यतोनह्यध्रुवैरितिवाक्यंव्याचष्टे ॥ ध्रुवइति ॥ ततश्चध्रु ॥ १८ ॥

भाष्यं । आख्यनित्यविषयैःविष्ण्वाख्यनित्यविषयैर्द्रव्यैः । नित्यंभगवंतंप्राप्तवानस्मि । ध्रुवोभगवान्अध्रुवैस्तद्भक्तिवर्जितैर्नप्राप्यते ।

वोभगवानध्रुवैस्तद्भक्तिवर्जितैर्माहात्म्यज्ञानपूर्वकस्नेहवर्जितैर्नप्राप्यते हि यस्मात्तस्मात्ततोनित्यभगवद्विषयमनआदिभिरेवमयाग्निश्चितइतिहेतुहेतुमद्भावोपिसंगच्छतइतिभावः । प्रत्युतत्वत्पक्षएवहेतुहेतुमद्भावानुपपत्तिः । नह्यनित्यैर्नित्यंनप्राप्यतेयस्मात्ततोमयाअनित्यद्रव्यैःपश्वादिभिरग्निश्चितइतिहेतुहेतुमद्भावःसंभवति । विरोधात् । नचयतोऽनित्यसाधनैर्नित्यंनप्राप्यते यश्चानित्यसुखात्मकःशेवधिःसएवानित्यद्रव्यैःप्राप्यते ततोमयानाचिकेतश्चितोग्निरितिहेतुहेतुमद्भावोपपत्तिरितिवाच्यं । अश्रुतकल्पनाप्रसंगादितिभावः । क्रतोरानंत्यमितिकथं । क्रतुस्वरूपस्याशुतरविनाशित्वात् । नचानंत्यंअनंतफलत्वमितिवाच्यं । तथापितस्यभगवद्विशेषणत्वासंभवादित्यतस्तद्व्याचष्टे ॥ क्रतोरिति ॥ क्रतोर्ज्ञानस्य । एवंचानंतलोकाप्तिमित्युक्तानुवादरूपत्वमेतस्यसंभवतीतिभावः । स्तोममहदित्यस्यस्तोमंअणिमाद्यैश्वर्याद्यनेकगुणसहितंच महत् निरतिशयंचेतिस्तोममहदितिव्याख्यानमसत् । एतस्यप्रागनुक्तत्वेनानुवादासंभवादितिभावेनतत्तात्पर्यतावदाह ॥ स्तोमैरिति ॥ वेदसमूहैरित्यर्थः । प्राप्तुंज्ञातुं । किमुप्रत्यक्षादिभिरित्यपिशब्दः । तर्हिसर्ववेदायत्पदमामनंतीतिवक्ष्यमाणविरोधइत्यतउक्तं ॥ सर्वात्मनेति ॥ एवंचब्रह्मजज्ञेत्युक्तानुवादरूपमेतदितिभावः । ननुस्तोममहदित्यस्मात्पदात्कथमेषोर्थोलब्धइत्यतःतत्पदार्थमाह ॥ स्तोमेभ्योपीति ॥ उरुगायमित्यस्यपुल्लिंगत्वेनश्रुतौमहदितिलिंगव्यत्यासइतिभावेनमहांतमित्युक्तं । वेदसमूहापेक्षयामहत्त्वंनामसाकल्येनतदप्रतिपाद्यत्वमेव । स्वरूपमहत्त्वस्याल्पत्वादितिभावः । तृतीयप्रश्नस्यजीवविषयकत्वंवदंतंप्रतिएतद्वाक्यगतमपिबाधकमाह ॥ उरुगायमि

भाष्यं । क्रतोरानंत्यहेतुं । स्तोमैरपिसर्वात्मनाप्राप्तमशक्यं । स्तोमेभ्योपिमहांतं । उरुगायमित्युक्तत्वाच्चनजीवविषयोयंप्रश्नः ।

ति ॥ उरुगायशब्दस्यभगवत्परत्वंसाधितमेवेतिभावः । ननुनजीवविषयोयंप्रश्नइत्यनुपपन्नं । जीवपरत्वेबाधकाभावात् । नच ब्रह्मपरश्रुतिर्लिंगाद्यनुपपत्तिः । तस्यब्रह्माभिन्नत्वेनस्वरूपापेक्षयाजीवेपिसंभवादितिचेन्न । स्यादेवंयदिजीवेश्वराभेदएवस्यात् नचसोस्ति । अप्रामाणिकत्वात् । प्रमाणविरुद्धत्वाच्चेत्याह ॥ शरइति ॥ आत्माजीवःशरस्थानीयः ब्रह्मलक्ष्यस्थानीयं । तन्मयस्तत्रसंलग्नचेताः । नहिशरलक्ष्ययोरभेदोस्तीतिभावः । अभयमित्यादेरर्थोवक्ष्यते । आदिपदेनानन्यप्रोक्तेगतिरत्रनास्ति । अन्यत्रधर्मात् नित्योनित्यानामित्यादिवाक्यग्रहणं । जीवब्रह्माभेदनिरासायाभयंतितीर्षतांपारमितिवाक्योदाहरणेनस्मारितंद्वितीयप्रश्नस्यभगवद्विषयत्वेयुक्त्यंतरमाह ॥ नाचिकेतमिति ॥ यस्सेतुरीजानानामक्षरंब्रह्मतत्परं । अभयंतितीर्षतांपारंनाचिकेतंशकेमसीतिनाचिकेताग्नेरक्षरत्वपरब्रह्मत्वाभयत्वादिकथनात्नाचिकेताग्निस्थोभगवानेवात्रस्वर्ग्यमग्निमित्यादावुच्यतइतिसिद्धं । प्रसिद्धाग्नौतेषामसंभवात् विष्णौतुसंभवादितिभावः । अपव्याख्यानंतूत्तरत्रनिराकरिष्यामः । कामस्याप्तिमित्यत्रजगतःप्रतिष्ठामित्यादिवत्कामस्याप्तिमित्येतदपिउरुगायविशेषणमितिव्याख्यानमसत् । पूर्वतस्यानुक्तत्वेनानुवादायोगात् । अत्यस्राक्षीरित्यस्य कर्मानुक्तिप्रसंगाच्च । संसारभोगजातमितिअध्याहारस्त्वगतिकागतिरितिभावेनतद्वाक्यंयोजयति ॥ उरुगायमिति ॥ काम

भाष्यं । शरोह्यात्माब्रह्मतल्लक्ष्यमुच्यते । शरवत्तन्मयोभवेत् । अभयंतितीर्षतांपारं । तादृगेवभवतीत्यादौसर्वत्रभेदस्यैवोक्तेश्चनजीवाभेदः । नाचिकेतंशकेमसीत्युक्तत्वाच्चनाचिकेताग्निस्थोभगवानेवोच्यतइतिसिद्धं । उरुगायंदृष्ट्वाकामस्याप्तिमत्यस्राक्षीः ।

स्यकाम्यस्य तृतीयप्रश्नस्यमृतविषयत्वेयेयंप्रेतेविचिकित्सेतिवाक्यार्थएवनयुज्यतइतिबाधकांतरमाह ॥ नचेति ॥ मरणानंतरमपिजीवसद्भावस्यस्वस्मिन्नेवप्रत्यक्षेणनिश्चितत्वात्निश्चितेसंशयायोगादितिभावः । नचनचिकेतसोमरणमेवकुतःसिद्धं । सशरीरस्यैवमृत्युंप्रतिगमनोपपत्तेरितिवाच्यं । तथासतितस्यशापरूपत्वायोगात् । पितरमेवजीवन्यानीतिशाखांतरेजीवन्नित्युक्तस्य योगाच्च । नहिपूर्वममृतत्वेजीवन्नित्येतत्स्वरसं । नचनचिकेतसःसंशयाभावेप्यन्येषांसंशयःस्यादेव । वादिविप्रतिपत्तेः । नह्यत्रनचिकेतसइतिविशिष्योच्यतइतिवाच्यं । अत्रचास्माकंनप्रत्यक्षेणनाप्यनुमानेननिर्णयोयुज्यतइतित्वयैवोक्तत्वेननचिकेतसएव संशयाभ्युपगमात् । स्वस्यसंशयाभावेएतद्विद्यामनुशिष्टस्त्वयाहमितिप्रार्थनायोगाच्च । नचप्रेक्षावद्भिर्महतांवरोल्पप्रयोजनायव्ययीक्रियतइतिभावः । गह्वरेष्ठं गह्वरेविषमेअनेकानर्थसंकटेतिष्ठतीतिगह्वरेष्ठमितिव्याख्यानमसदितिभावेनतद्व्याचष्टे ॥ गह्वरइति ॥ मुक्तजीवस्यशास्त्रंविनासंसार्यगम्यत्वाद्गह्वरत्वं । तस्यजीवपरत्वेदुर्दर्शत्वमनुपपन्नं । तस्ययत्तदद्रेश्यमदृश्यत्वादिगुणकोधर्मोक्तेरितिब्रह्मण्येवश्रवणात् । गुहानिहितत्वंचभगवतएवेत्युक्तं । नचजीवज्ञानाद्धर्षशोकत्यागरूपोमोक्षःसंभवतीतिभावः । प्रवृह्य शरीरादेःपृथक्कृत्येतिव्याख्याननिरासायतत्पदमनूद्यव्याचष्टे ॥ प्रवृह्येति ॥ पृथक्कृत्यपृथक्ज्ञात्वेत्यर्थः । शरीरादेःपृथक्करणंचकिंजीवस्यभगवतोवा । नाद्यः । एनमाप्यसमोदतइतिमुक्तप्राप्यत्वव्यपदेशायोगात् । नद्वितीयः । भगवतःसंसारिशरीराद्यभेदस्यकेनापिवादिनानंगीकृतत्वेनतन्निषेधायोगादितिभावः । ननुनात्रमुक्तज्ञापकमस्ति । येनायंमुक्तप्राप्यत्वव्यपदेशः

भाष्यं ॥ नचमृत्वायमंप्राप्तस्यनचिकेतसोमृतोस्तिनवेतिसंशयोयुज्यते । गह्वरेमुक्तजीवेस्थितं । प्रवृह्य जीवात्पृथक्कृत्य ।

स्यादित्यतोगह्वरेष्ठंप्रवृह्योतिपदद्वयस्योक्तार्थत्वे एनमाप्यसमोदते मोदनीयंलब्ध्वेत्यस्यमुक्तपरत्वेचप्रमाणमाह ॥ मुक्तेति ॥ किंचनेदंप्रकरणंजीवपरं । तथासतिसर्वेवेदायत्पदमामनंतीतिसर्ववेदप्रतिपाद्यत्वोक्त्ययोगात् । तस्यतत्तुसमन्वयादिति सूत्रकृताब्रह्मण्येवोक्तत्वात् । नचजीवेसमन्वयोभिधीयते । नचात्रजीवेशाभेदोविवक्षितइतिसर्वस्याप्युपपत्तिरितिवाच्यं । अन्यत्रधर्मादन्यत्राधर्मादितिधर्माधर्मकार्यकारणभूतभविष्यद्वर्त्तमानप्रपंचभिन्नत्वस्यैवोक्तत्वात् । नचात्रजीवाब्रह्मेदोनोक्तइतिवाच्यं । धर्माधर्मपदाभ्यामेवपुण्यपापात्मनांजीवानांग्रहणात् । किंचओमित्येतदितितस्योंनामकत्वमुच्यते तच्चब्रह्मणएवनजीवस्य । ओमितिब्रह्मेतिश्रुतेः । ॐतत्सदितिनिर्देशोब्रह्मणस्त्रिविधःस्मृतइत्यादिस्मृतेश्च । किंच एतद्ध्येवाक्षरंब्रह्मएतद्ध्येवाक्षरंपरमितिपरब्रह्मत्वादिव्यपदेशाद्विष्णुरेवनजीवः । ननुओमित्येतदितिपूर्वमात्मतत्वस्योंशब्दवाच्यत्वंतत्प्रतीकत्वंचोक्तं । अत्रतु एतदेवाक्षरंओमित्यक्षरं ब्रह्म अपरं एतदेवाक्षरं परंचब्रह्मेतितस्यैवोंकारस्यपरापरब्रह्मत्वमुच्यतइतिकथमिदंसाधकमितिचेन्न । ॐकारस्यशब्दात्मकस्यजडत्वेनपरापरब्रह्मत्वाभावात् । एतदालंबनमित्युक्तसर्वाश्रयत्वासंभवाच्च । नचाविद्यमानमप्युपासनार्थमुच्यतइतिवाच्यं । तत्त्वमसीत्यादावप्यविद्यमानमैक्यंउपासनार्थमुच्यतइत्यापातात् । अविद्यमानोपासनस्यानर्थफलत्वाच्च । प्रमाणविरोधाच्चनैवंव्याख्यानंयुक्तमितिभावेनमंत्रद्वयार्थनिश्चायकंप्रमाणमुदाहरति ॥ एतद्ध्येवेति ॥ परमित्यत्रापिएतद्ध्येवाक्षरमितिसंबध्यते । एवंचएतद्ध्येवाक्षरंब्रह्मएतद्ध्येवाक्षरंपरमितिअनुवादेनविष्ण्वाख्यमितिव्याख्यानं । अक्षरशब्दार्थोऽव्ययमिति ।

भाष्यं ॥ मुक्तजीवेस्थितंविष्णुंविदित्वाजीवतःपृथक् । मोदतेमोदनीयंतंप्राप्यमुक्तस्सदैवचेतिमहावाराहे । एतद्ध्येवाक्षरंब्रह्मविष्ण्वाख्यंपरमव्ययं ।

ननुयदुक्तमिदंप्रकरणंविष्णुपरमेवेति तन्न । नजायतइतिमंत्रेजीवस्यजननमरणाभावोक्तेस्तस्यजीवविषयकत्वावगमात् । तथाहि विपश्चित्अविपरिलुप्तज्ञानस्वभावोनजायतेनम्रियतेच । नायमात्माकुतश्चित्कारणाद्बभूव स्वस्माच्चनबभूवकश्चित्पदार्थः । अतोयमात्माअजोनित्यश्चशाश्वतः अपक्षयवर्जितः अतएवपुराणः पुरातनएवेति । नचैतत्प्रकरणस्यविष्णुपरत्वेमंत्रःसंगच्छते । असंगतत्वादितिचेत् । मैवं । विपश्चिच्छब्दस्यज्ञानिमात्रेनिरूढस्याविपरिलुप्तज्ञानस्वभावइतिज्ञान्यज्ञानिसाधारण्यकरणायोगात् । कुतश्चिन्नजायतइत्येतावतापूर्तेर्नायमित्यस्यवैयर्थ्यात् । कारणांतराभावेपिस्वस्मादेवोत्पत्तिर्भवत्वित्याशंकायाएवानुदयेनानबभूवकश्चिदित्यस्यावक्तव्यत्वाच्च । कारणमात्रस्यापिकुतश्चिदित्यनेननिषेधसंभवात् । नचास्माकमसंगतिदोषः । एतदालंबनंज्ञात्वेतिप्रकृतज्ञानिनोजननमरणाभावलक्षणफलप्रतिपादकत्वेनसंगतत्वादितिभावेनमंत्रार्थनिश्चायकंप्रमाणमेवोदाहरति ॥ देहेति ॥ नकेवलंभगवतःकिंतुज्ञानिनोपीत्यर्थोपिशब्दः । उद्भवाभावौउत्पत्तिविनाशौनेत्यस्यपूर्वोत्तराभ्यांसंबंधः । मुक्तिदशायामेतत् । अनेनमंत्रतात्पर्यमुक्तंभवति । ननुदेहोत्पत्तिविनाशाख्यौउत्पत्तिविनाशौयदिभगवतइवज्ञानिनोपिनस्तस्तर्हिभगवद्विपश्चितोरविशेषःस्यादितिचेन्न । विपश्चितउत्पत्तिविनाशाभावयोर्भगवज्ज्ञानसाध्यत्वादित्यभिप्रेत्य नजायतेम्रियतेवाविपश्चिदित्यत्रनायंकुतश्चिदितिहेतुप्रतिपादकमितिभावेनतद्व्याचष्टे ॥ कुतश्चिदिति ॥ म्रियतेचेतिग्राह्यं । भावाभावौ देहोत्पत्तिविनाशौ । यादृशोभावितस्त्वीशस्तादृशोजीवआभवेदित्यादेरित्यर्थः । ननुभगवद्विपश्चितोरुभयोरपिदेहोत्पत्तिविनाशाभावमंगीकृत्यविप

भाष्यं ॥ सर्वस्यालंबनंज्ञात्वामुच्यतेनात्रसंशयइतिच । देहोत्पत्तिविनाशाख्यौज्ञानिनोप्युद्भवाभवौ । नकुतश्चिद्यतोविष्णुर्जायतेतस्तदीक्षणात् ।

श्चितस्तदभावोभगवज्ज्ञानसाध्यइतितयोर्विशेषःकुतःसमर्थनीयः । ज्ञानिनःस्वरूपतएवोत्पत्तिविनाशाभावोभगवतस्तुदेहतोप्युत्पत्तिविनाशाख्यौउद्भवाभवौनस्तइतिकुतोनव्याख्यायतइत्यतआह ॥ **यस्मादिति** ॥ तस्मात्देहतोप्युत्पत्तिविनाशाख्यावेवोद्भवाभवौज्ञानिनोनस्तइतिव्याख्येयं । नतुस्वरूपोत्पत्तिविनाशाख्यौ । तदभावस्यसर्वसाधारण्येनज्ञानिनोविशेषाभावप्रसंगादित्यर्थः । ननुदेहिनोजीवस्यकथंस्वरूपेणजननमरणाभावइत्यतःप्राप्तमजोनित्यःशाश्वतोयंपुराणइतिवाक्यंव्याचष्टे ॥ **अजइति**॥ स्वरूपेणेतिवर्त्तते । पुरंदेहमणन्नपीत्यनेनदेहित्वस्याप्रयोजकत्वमुक्तं । अनेनहन्यमानेपीत्यपिशब्दस्यपुराणशब्देनापिसंबंधइत्युक्तंभवति । एवंप्रमाणमुदाहृत्यस्ववचनेनापिविवृण्वन् नायंकुतश्चिदित्यत्रप्रकृतविपश्चितएवपरामर्शइतिभ्रमंवारयन्पूर्वत्रायंहेतुरितिभावेनतद्व्याचष्टे ॥ **अयंभगवानिति** ॥ कुतोपिकारणात् । उपलक्षणमेतत् । नम्रियतइत्यपिग्राह्यं । म्रियतेचेत्यनेनवाशब्दश्चशब्दार्थइत्युक्तंभवति । अत्रज्ञानिनोजननमरणाभावौदेहोत्पत्तिविनाशाभावाख्यावेवविवक्षितौनतुस्वरूपेणजननमरणाभावावित्यभिप्रेत्यनबभूवकश्चिदितिवाक्यंव्याचष्टे ॥ **यतइति** ॥ स्वतःस्वरूपेणम्रियतेनचेतिग्राह्यं । तर्हिकागतिर्जीवोत्पत्त्यादिवाक्यानामित्यतआह ॥ **देहसंबंधादिति** ॥ देहवियोगान्म्रियतेचेतिग्राह्यं । हिशब्दःप्रमाणप्रसिद्धिमाह । हेतौवा । यस्मादेहसंबंधादेवजायतेतस्मात्कश्चिदपिस्वतोनबभूवेति । अस्त्वेवंसर्वेषांजीवानांस्वरूपेणोत्पत्तिविनाशाभावौ । किंततइत्यतआह ॥

भाष्यं ॥ भावाभावौनविदुषोयस्माज्जीवोनकश्चन । जायतेम्रियतेवापिस्वरूपेणकथंचन । अजोनित्योऽविकारश्चजीवःपुरमणन्नपीतिच । अयं भगवान्कुतोपिनबभूवयस्मादतस्तद्वेत्तापिविपश्चिन्नजायतेनम्रियतेच । यतःकश्चिज्जीवःस्वतोनबभूव । देहसंबंधाद्धिजायते ।

विपश्चितस्त्विति ॥ तुशब्दोऽज्ञानिभ्योविशेषद्योतकः । यतःकश्चिदपिजीवःस्वतोनबभूव अतोविपश्चितोमुक्त्यनंतरंकर्मनिर्मितदेहसंबंधाभावान्नजायते । तद्वियोगाभावान्नम्रियतइत्येववक्तव्यं । नतुस्वरूपोत्पत्तिविनाशाभावेन । तस्यसर्वजीवसाधारणत्वेनज्ञानफलत्वानुपपत्तेरितिभावः । ननूभौतौनविजानीतइतिहंतृत्वहतत्वज्ञानस्यभ्रांतित्वमुक्त्वातत्रनायंहंतिनहन्यतइत्यर्थाभावोहेतुरुच्यते । तदयुक्तं । देहविनाशरूपहननकर्मत्वस्यतत्कर्तृत्वस्यचसत्त्वादित्यतोहेतुहेतुमद्भावंस्फोरयन्हेतुवाक्यंव्याचष्टे ॥ **जीवस्यापीति** ॥ देहविनाशाख्यमरणवत्त्वेनप्रसिद्धस्यापीत्यपिशब्दः । स्वतःस्वरूपेण । ननुअणोरणीयानितिमंत्रोजीवपरएव । हंताचेन्मन्यतेहंतुमितिजीवस्यैवप्रकृतत्वात् । अन्यथामध्येजीवनित्यत्वकथनस्यासंगतत्वादित्यतस्तस्योपयोगंदर्शयन् अस्यजंतोर्निहितोगुहायामितिवाक्यंव्याचष्टे ॥ **एवमिति** ॥ अस्येत्यस्यैवार्थएवंनित्यस्येति । तथाचपरमात्मनोनित्यभूतजीवह्रत्तत्वंवक्तुंजीवस्यनित्यत्वमुक्तमितिनासंगतिरितिभावः । नचजीवस्याणोरणीयस्त्वंमहतोमहीयस्त्वंवायुज्यते । तस्याणुत्वात् । नचाणुमहद्वायल्लोकेस्ति तत्तदात्मकत्वेनतथाव्यवहारः । तर्हिअणुर्महानित्येववक्तव्यत्वापातात् । अणोरणीयान्महतोमहीयानितिअणुमहद्भिन्नत्वस्यैवावगमाच्च । नचाणोःश्यामाकादेरणीयानितिश्यामाकाद्यपेक्षयासूक्ष्मवस्त्वात्मकत्वं महतःपृथिव्यादेरपिमहानितिपृथिव्याद्यपेक्षयास्थूलवस्त्वात्मकत्वमुच्यतइतिवाच्यं । पंचम्यंताणुमहच्छब्दयोःसामान्यशब्दत्वेनसर्वाणुमहद्विषयत्वात् । नचबाधकंविनासामान्यशब्दोविशेषपरोंगीकर्तुमुचितः । नचैकस्यात्मनोविरुद्धपरिमाणद्वयासंभवादेवमंगीकारः ।

भाष्यं ॥ विपश्चितस्तुदेहसंबंधाभावान्नजायतेनम्रियतेच । जीवस्यापिस्वतोमरणाभावादुभौतौनविजानीतः । एवंनित्यस्यजंतोर्गुहायांनिहितः ।

अणुमहत्पदार्थात्मकत्वस्यसुतरांविरुद्धत्वात् । यथाचनविरोधस्तथोपपादितमन्यत्राचार्यैः । वक्ष्यतेचविरुद्धधर्मघटकमैश्वर्यभगवतः । अक्रतुरकामोदृष्टादृष्टविषयोपरतइतिव्याख्यानमसत् । दृष्टादृष्टविषयवैराग्यस्यसाक्षादर्शनहेतुत्वाभावादितिभावेनतद्व्याचष्टे ॥ एविष्णाविति ॥ अइत्यस्यसप्तमीएइति । अशब्दोब्रह्मवाची । अःइतिब्रह्मेतिश्रुतेरितिभावः । अनेनअक्रतुः क्रतूपलक्षितकर्मरहितइतियथाश्रुतप्रतीतिरप्यपास्ता । तर्हिविष्णुविषयक्रतुमान्पश्यतीतिकथं । क्रतोःकर्मात्मकत्वेनतस्यसाक्षादपरोक्षज्ञानसाधनत्वाभावादित्यतआह ॥ तन्निश्चयइति ॥ श्रवणादिरूपनिश्चयएवक्रतुशब्दार्थइतिभावः । आत्मनःस्वस्यमहिमानंमाहात्म्यमित्यन्यथाप्रतीतिनिरासाय महिमानमात्मनइत्येतद्व्याचष्टे ॥ आत्मनइति ॥ षष्ठीभ्रमवारणायसकाशादित्युक्तं । जीवादित्यर्थः । अन्यथावीतशोकोभवतीत्यस्यानुपपत्तिः । प्रमाणविरोधाच्चनान्यथाव्याख्यानंयुक्तमितिभावेनतदर्थनिश्चायकंप्रमाणमाह ॥ जीवादिति ॥ श्रुतौ महिमानमात्मनइत्यस्यां । नन्वासीनस्यदूरव्रजनादिकंविरुद्धं । नहिभगवान्मायावी । येनैंद्रजालिकक्रियावदुपपत्तिःस्यादित्यतआह ॥ ऐश्वर्यादेवेति ॥ तत्रप्रमाणमाह ॥ आसीनइति ॥ अनेनाणोरणीयान्महतोमहीयानित्येतद्विरुद्धमितिपरास्तं ॥ प्रथमाध्यायस्यद्वितीयावल्ली ॥ १ । २ ॥ दीयमानमपिपुत्रादिकंपरित्य

भाष्यं ॥ एविष्णौक्रतुर्यस्यसोक्रतुस्तन्निश्चयः । आत्मनस्सकाशान्महिमानंमहामानं । जीवाद्गुणपरीमाणंयस्माद्विष्णोर्महत्तरं । तस्माज्जीवात्सहिमाविष्णुरित्युच्यतेश्रुताविति च । ऐश्वर्यादेवासीनोदूरंव्रजतीत्यादि । आसीनोदूरंव्रजतिशयानोयातिसर्वतः । ऐश्वर्याद्भगवान्विष्णुर्विरुद्धंघटयत्यसाविति च ॥ १ ॥ २ ॥

ज्यब्रह्मविद्यामर्थयमानंनचिकेतसंस्तोतुंतदुभयस्वरूपमाह ॥ अन्यदिति ॥ अत्रश्रेयइतिब्रह्मविद्योच्यते । निःश्रेयससाधनत्वात् । प्रेयइतिप्रीतिविषयपुत्रादिकाम्यमुच्यते । उतशब्दश्चशब्दार्थः । इवशब्दोवधारणार्थः । श्रेयोन्यद्विलक्षणमेव प्रेयसइतिशेषः। प्रेयश्चश्रेयसोन्यदेव । जानतांश्रेयःप्रेयसोरेकत्वंसूचयितुंवाइवशब्दः । कथंश्रेयःप्रेयसोःपरस्परवैलक्षण्यमित्यतआह ॥ तेउभेइति ॥ तेउभेश्रेयःप्रेयसीनानार्थेमोक्षतदितराख्यविलक्षणप्रयोजनविषये पुरुषंजीवं सिनीतोबध्नीतः । षिञ्बंधनइतिधातोः । किंततइत्यतस्तदुभयमाददानस्यफलमाह ॥ तयोरिति ॥ तयोःश्रेयःप्रेयसोर्मध्येयःपुरुषःश्रेयएवादत्तेतस्यसाधुभद्रंमोक्षाख्यंभवतीत्यर्थः । यउयश्चप्रेयएववृणीते सअर्थात्मोक्षाख्यप्रयोजनात्हीयते हीनोभवति ॥ १ ॥ तदेवविशदमाह ॥ श्रेयश्चेति ॥ श्रेयश्चप्रेयश्चेत्येतौकर्मवशान्मनुष्यमेतःप्राप्नुतः । तदाधीरःपुरुषस्तौप्राप्तौश्रेयःप्रेयोरूपार्थौ संपरीत्यसम्यक्ज्ञात्वाविविनक्ति इदंपुरुषार्थप्रदमिदंनेतिविवेचयति । एवंविवेकानंतरंधीरःप्रेयसः प्रेयःपरित्यज्यश्रेयएववृणीते । मंदस्तुयोगक्षेमान् अप्राप्तलाभोयोगः प्राप्तपरिपालनंक्षेमः । योगक्षेमात्मकंप्रेयएववृणीते ॥ २ ॥ यत्प्रशंसार्थमेतदुक्तंतमिदानींप्रशंसति ॥ सइति ॥ हेनचिकेतः स मयाप्रलोभितोपित्वंप्रियान् तत्रहेतुः प्रियरूपान् मनोहररूपान्कामान्काम्यान्मयादत्तानपिअभिध्यायन् तेषा

उप ॥ अन्यच्छ्रेयोन्यदुतेवप्रेयस्तेउभेनानार्थेपुरुषंसिनीतः । तयोश्श्रेयआददानस्यसाधुभवतिहीयतेर्थाद्यउप्रेयोवृणीते ॥ १ ॥ श्रेयश्चप्रेयश्चमनुष्यमेतस्तौसंपरीत्यविविनक्तिधीरः । श्रेयोधीरोभिप्रेयसोवृणीतेप्रेयोमंदोयोगक्षेमान्वृणीते ॥ २ ॥ सत्वंप्रियान्प्रियरूपांश्चकामानभिध्यायन्नचिकेतोत्यस्राक्षीः ।

मनित्यत्वादिदोषानितिशेषः । अत्यस्राक्षीरतिसृष्टवानसि । एतांमयादत्तांवित्तमयींसुवर्णमयींशृंकांशृंखलांनैवावाप्तः । यद्यन्येपिनैवाप्ताः तर्हिकोविशेषोस्येत्यतआह ॥ यस्यामिति ॥ यस्यांवित्तमय्यांशृंखलायांबहवोमनुष्यामज्जंति तयाशृंखलयात्मानं बध्नंतीत्यर्थः ॥ ३ ॥ श्रेयःप्रेयसोःस्वरूपंनिरूपयन्तेउभेनानार्थेइत्युक्तमेवविवृणोति ॥ दूरमेतेइति ॥ याप्रेयोरूपाअविद्या विद्याविरुद्धेतिविज्ञाता । याचश्रेयोरूपाविद्येतिज्ञाताविद्वद्भिः तेएतेश्रेयःप्रेयसी । दूरंविपरीतेअतिविरुद्धे । विरुद्धत्वमेवविवृणोति । विषूचीइति । विरुद्धगतिहेतूइत्यर्थः । तत्राहंनचिकेतसंविद्याभीप्सितमेवमन्ये । कुतः । त्वात्वांबहवःकामानलोलुपंतःनलोलुपंति । नप्रलोभयंतीतियावत् ॥ ४ ॥ श्रेयःकामएवश्रेष्ठइतिभावेनप्रेयःकामान्निंदयति ॥ अविद्यायामिति ॥ अविद्यायां पुत्रपौत्रादिलक्षणायां अंतरेमध्येवर्तमानाः स्वयंधीराःस्वात्मानंस्वयमेवधीरान्वदंतः पंडितंआगमाभिज्ञंमन्यमानाःदंद्रम्यमाणाःवक्रगतयोमूढाःपरियंतिप्रवर्तंते । ननुबहूनांएवंप्रवृत्तेःकथमियंमूढप्रवृत्तिःस्यादित्यतस्तत्रदृष्टांतमाह ॥ अंधेनैवेति ॥ ५ ॥ नित्यपुमर्थमोक्षसाधनंश्रेयःपरित्यज्यानित्यंकाम्यंपुत्रपौत्रादिकंप्रेयोपरनामकंकिमितिकामयंतइत्यतआह ॥ नेति ॥ सांपरायोमोक्षस्तत्साधनीभूतोभगवानितियावत् । वित्तमोहेनमूढं अतएवप्रमाद्यंतंबालंप्रतिनभाति । अयमेवलोकोस्तीत्यभिमानी

॥ २३ ॥

उप ॥ नैतांशृंकांवित्तमयीमवाप्तोयस्यांमज्जंतिबहवोमनुष्याः ॥ ३ ॥ दूरमेतेविपरीतेविषूचीअविद्यायाचविद्येतिज्ञाता । विद्याभीप्सितंनचिकेतसंमन्येनत्वाकामाबहवोलोलुपंतः ॥ ४ ॥ अविद्यायामंतरेवर्तमानास्स्वयंधीराःपंडितंमन्यमानाः । दंद्रम्यमाणाःपरियंतिमूढाअंधेनैवनीयमानायथांधाः ॥ ५ ॥ नसांपरायःप्रतिभातिबालंप्रमाद्यंतंवित्तमोहेनमूढं । अयंलोकोनास्तिपरइतिमानीपुनःपुनर्वशमापद्यतेमे ॥ ६ ॥

पुनःपुनर्मेवशमापद्यते ॥ ६ ॥ यदाश्रवणादिप्रयत्नवतोपिनसांपरायःप्रतिभाति किमुतप्रमादादिमतइतिभावेनाह ॥ श्रवणायापीति ॥ बहुभिःश्रवणायापिश्रोतुमपिनलभ्यः प्राणिनांमध्येबहूनांप्राणिनांभगवद्विषयकश्रवणमपिनास्तीत्यर्थः । अस्तिकेषांचित्श्रवणं तथापिनसांपरायस्तेषांयथार्थतःप्रतिभातीत्याह ॥ शृण्वंतोपीति ॥ कुतइत्यतोवक्तृश्रोतृदौर्लभ्यादित्याह ॥ आश्चर्यइति ॥ कुशलेनगुरुणानुशिष्टोस्यभगवतोयथार्थतोज्ञाताज्ञानानुसारेणास्यवक्ताआश्चर्योदुर्लभः । कुशलोस्यभगवतोलब्धागुरूक्तप्रकारेणज्ञाताश्रोताप्याश्चर्यइतियोजना ॥ ७ ॥ ननुशैवादिशास्त्रव्याख्यातृणांबहूनामुपलंभेनतएवास्यवक्तारोभविष्यंतीतिकथंदुर्लभइत्यतआह ॥ ननरेणेति ॥ नरेणमनुष्येण शैवब्राह्मसौरगाणपत्यादिना प्रोक्तएषःसुज्ञेयोनभवति । यतस्तेनावरःप्रोक्तः । शिवादिरेवसर्वोत्तमोभगवांस्तदपेक्षयाऽवरइत्युक्तः । तर्हितदुक्तप्रकारेणायमवरएवकिंनस्यादित्यतआह ॥ बहुधेति ॥ बहुगुणत्वेनपूर्णगुणत्वेनचिंत्यमानोवेदादिभिर्यतोतोनायंतेनतथोक्तोप्यवरस्तस्यमिथ्याज्ञानित्वादितिभावः । तर्हिमास्तुशैवादिरस्यवक्ता अद्वैतवादीतुभविष्यतीत्यतआह ॥ अनन्येति ॥ अन्योभगवानन्योहमित्यजानन् सएवाहमितिजानंश्चानन्यः तेनप्रोक्तेअत्रब्रह्मणिगतिर्ज्ञानंसम्यग्ज्ञानंनजायते कुतः जीवेश्वरयोर्विरुद्धधर्माधिकरणत्वेनभिन्नत्वात्तदभेदज्ञानिनोमिथ्याज्ञानित्वा

उप ॥ श्रवणायापिबहुभिर्योनलभ्यःशृण्वंतोबहवोयन्नविद्युः । आश्चर्योस्यवक्ताकुशलोस्यलब्धाआश्चर्योज्ञाताकुशलानुशिष्टः ॥ ७ ॥ ननरेणावरःप्रोक्तएषसुज्ञेयोबहुधाचिंत्यमानः । अनन्यप्रोक्तेगतिरत्रनास्ति ।

दितिभावेनाह । अणुप्रमाणादपिजीवादणीयान्हीति । तस्मादस्ययथार्थतोज्ञाताकुशलानुशिष्टोवक्ताआश्चर्यइतिध्येयं । एवंव्याख्यात्रभावेनागमात्तज्ज्ञानासंभवेपिप्रत्यक्षेणतज्ज्ञानंसंभवतीत्यतस्तदविषयत्वंचाह ॥ अणीयानिति ॥ अणुप्रमाणादप्यणीयान्हियस्मात्अतःप्रत्यक्षंनभवति ॥ तर्हिअनुमानेनतन्निश्चयोभविष्यतीत्यतआह ॥ अतर्क्यमिति ॥ ८ ॥ तदेवविवृणोति ॥ नैषेति ॥ आ अपेति विरुद्धार्थकोपसर्गयोःक्रमेणसंबंधः । एषाब्रह्मविषयामतिस्तर्केणकेवलानुमानेनानेयोत्पाद्याऽपनेयानिराकार्याचनभवति । तस्यप्रतिपक्षादिग्रस्तत्वेनाप्रमाणत्वात् । आगमानुकूलतर्कश्चागमव्याख्यात्रभावेननिश्चायकइतिभावः । तर्हिभगवज्ज्ञानोपायाभावेनमोक्षाभावाच्छास्त्रवैयर्थ्यमेवस्यादित्यतआह ॥ प्रोक्तेति ॥ हेप्रेष्ठ प्रीतिविषयनचिकेतः अन्येनैव अन्योभगवानन्योहमितिज्ञानवान्योभेदज्ञानीतेनैवप्रोक्ता वेदप्रवचनोत्पादितामतिः सुज्ञानायसाक्षात्काराय भवति । एषामतिरित्युक्तामतिःकेत्यतआह ॥ यामिति ॥ त्वंयांमतिमापःप्राप्तवानसि एषेतिपूर्वेणान्वयः । तस्मात्हेनचिकेतःत्वंसत्यधृतिरचाल्यधैर्यवानसि । बतेत्यास्वादने । अतस्त्वादृक्प्रष्टानोभूयान्नभविष्यतीत्यर्थः ॥ ९ ॥ नाहंत्वत्पृष्टंवक्तुमसमर्थस्त्वांविषयैःप्रलोभितवान् किंतुत्वत्परीक्षणार्थमेव । यतस्त्वत्पृष्टंजानामीत्याह ॥ जानामीति ॥ अनित्यंआख्यविष्णवाख्यनित्यंवस्तु शेवधिःसुखनिधिरितिजानामि । तत्ध्रुवंनित्यंविष्णवाख्यं अध्रुवैस्तद्भक्तिदार्ढ्यशून्यैर्नप्राप्यतेहियस्मात्ततोमयैवंजानताऽनित्यद्रव्यैर्नित्यमाख्यविष्णु

उप ॥ अणीयान्ह्यतर्क्यमणुप्रमाणात् ॥ ८ ॥ नैषातर्केणमतिरापनेयाप्रोक्तान्येनैवसुज्ञानायप्रेष्ठ । यांत्वमापस्सत्यधृतिर्बतासित्वादृङ्नोभूयान्नचिकेतःप्रष्टा ॥ ९ ॥ जानाम्यहंशेवधिरित्यनित्यंनह्यध्रुवैःप्राप्यतेहिध्रुवंतत् । ततोमयानचिकेतश्चितोग्निरनित्यद्रव्यैःप्राप्तवानस्मिनित्यं ॥ १० ॥

विषयद्रव्यैःमनआदिभिर्नाचिकेतोग्निःचितस्तेनाहंनित्यंभगवंतंप्राप्तवानस्मीत्यर्थः ॥ १० ॥ सत्वंप्रियान्प्रियरूपांश्चकामानभिध्यायन्नचिकेतोत्यस्राक्षीरित्युक्तं । तत्रनचिकेतसःकामविसर्जनेकिंनिमित्तमित्यतोनंतलोकाप्तिमित्याद्युक्तप्रकारेणमुक्तनियामकभगवत्स्वरूपज्ञानमेवेत्याशयवानाह ॥ कामस्येति ॥ हेनचिकेतस्त्वंजगतःस्वर्गलोकस्य प्रतिष्ठांधारकं क्रतोरानंत्यंआनंत्यहेतुमभयस्यपारंमोक्षहेतुमितियावत् । प्रतिष्ठां मोक्षेप्रवेश्यं । मोक्षेयस्मिन्प्रवेशःस्यात्सप्रतिष्ठाहीत्युक्तेः । स्तोममहत् । स्तोमेभ्योवेदसमूहेभ्योमहांतं । वेदसमूहैरपिसर्वात्मनाप्रतिपादयितुमशक्यमितियावत् । अतएव उरुगायं उरुभिर्वेदैरुरुभिर्ब्रह्मादिभिरुरुत्वेनसर्वोत्कृष्टत्वेनगीयतइत्युरुगायनामानंभगवंतंदृष्ट्वा धृत्याधैर्येणकामस्याप्तिमत्यस्राक्षीः ॥ ११ ॥ वक्ष्यमाणरीत्यामुक्तनियामकभगवत्स्वरूपज्ञानेनैवमोक्षप्राप्तिः । सामान्यादग्निस्थभगवज्ज्ञानेपिवक्ष्यमाणरीत्यामुक्तनियामकभगवज्ज्ञानाभावेमोक्षासंभवात् । अतएवतत्स्वरूपकथनेममातिकृच्छ्रतेतिभावेनमुक्तस्थितभगवज्ज्ञानस्यमोक्षसाधनत्वमाह ॥ तमिति ॥ धीरोधिकारीगह्वरेमुक्तजीवेतिष्ठतीतिगह्वरेष्ठं । तत्रापिगुहाहितंमुक्तजीवहृद्गुहानिहितं । अतएवगूढंगूढत्वमनुप्रविष्टंप्राप्तं अतएव दुर्दर्शं पुराणंसनातनं अनाद्यनंतकालेषुमुक्तस्थत्वोपपादकमेतत् । देवंक्रीडादिगुणसंपन्नंभगवंतंमत्त्वाध्यात्वा अध्यात्मयोगाधिगमेन अधिकश्चासावात्माचाध्यात्मा सएवयोगोमोक्षोपायइत्यध्यात्मयोगस्तस्याधिगमस्तदपरोक्षज्ञानंतेन । अध्यात्मयो

उप० । कामस्याप्तिंजगतःप्रतिष्ठांक्रतोरानंत्यमभयस्यपारं । स्तोममहदुरुगायंप्रतिष्ठांदृष्ट्वाधृत्याधीरोनचिकेतोत्यस्राक्षीः ॥ ११ ॥ तंदुर्दर्शंगूढमनुप्रविष्टंगुहाहितंगह्वरेष्ठंपुराणं । अध्यात्मयोगाधिगमेनदेवंमत्वाधीरोहर्षशोकौजहाति ॥ १२ ॥

गोध्यानयोगस्तज्जन्याधिगमेनवा । हर्षशोकौजहाति ॥ १२ ॥ ननुहर्षशोकौजहातीतिसुखप्रहाणिरुच्यते । तदयुक्तं । तुल्यायव्ययफलत्वे नापुरुषार्थत्वप्रसंगादित्याशंकांपरिहरन् मत्वेत्युक्तमननसाधनंचदर्शयन्भगवतोजीवाद्भेदेनज्ञानमपिमोक्ष साधनमित्याह ॥ एतच्छ्रुत्वेति ॥ योमर्त्योमरणशीलोधिकारी । नश्रवणादिविषयेप्रमदितव्यमितिभावेनैतदुक्तं । सएतत् मुक्तनियामकभगवत्स्वरूपंश्रुत्वाकुशलानुशिष्टाचार्येभ्यःसंपरिगृह्य सम्यगवधार्य सम्यङ्मत्त्वेतियावत् । प्रवृह्यजीवात्पृथ क्कृत्यपृथक्त्वेननिश्चित्य । निदिध्यासनापरोक्षज्ञानद्वारामुक्तःसन् धर्म्यं धारकत्वाद्धर्मो धर्मएवधर्म्यस्तमणुंपरमसूक्ष्ममेनंभगवंत माप्यमोदतेइत्यर्थः । वैषयिकहर्षप्रहाणिरेवप्राग्विवक्षितेतिभावः । एतादृशोभगवांस्त्वयापृष्टोतस्तवापिमोक्षोनिश्चितएवे त्याह ॥ मोदनीयमिति ॥ मोदनीयंसंतोषणीयंभगवंतंलब्ध्वाज्ञात्वास्थितंनचिकेतसंप्रति । सद्म वैकुंठादिस्थितब्रह्मसदनं विवृतमपावृतं हिनिश्चितमितिमन्ये ॥ १३ ॥ एवंयमेनोक्तोनचिकोताअलंप्रशंसयातत्वंब्रूहीतिप्रवृह्येत्यनेनोक्तंजीवाद्भेदंसविशे षमनुवंदन्प्रार्थयते ॥ अन्यत्रेति ॥ अव्ययानामनेकार्थत्वादन्यत्रेत्यस्यान्यदित्यर्थः । धर्मात्पुण्यात्मनोजीवादन्यत् अधर्मा त्मनोजीवादन्यत् नकेवलंचेतनादेव किंतुकृताकृतात् कार्याकार्यात्अचेदनादप्यन्यत् नकेवलंवर्त्तमानादेव किंतुभूतात्भ व्याच्चान्यत् तत्मुक्तनियामकंब्रह्म यत्येनप्रकारेणत्वंपश्यसि तत्तेनप्रकारेणवदेत्यर्थः ॥ १४ ॥ एवंप्रार्थितोयमोबुद्ध्यारोहार्थं

उप० । एतच्छ्रुत्वासंपरिगृह्यमर्त्यःप्रवृह्यध(मे)र्म्यमणुमेनमाप्य । समोदतेमोदनीयंहिलब्ध्वाविवृतंसद्मनचिकेतसंमन्ये ॥ १३ ॥ अन्यत्रधर्मा दन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् । अन्यत्रभूताच्चभव्याच्चयत्तत्पश्यसितद्वद ॥ १४ ॥

संग्रहेणभगवत्स्वरूपवचनंप्रतिजानीते ॥ सर्वइति ॥ संग्रहेणकथनस्यानुपादेयताशंकापरिहारायसर्वेवेदाइत्याद्युक्तं । सर्वेवे दाऋगाद्यायत्पदंयस्यस्वरूपंआमनंति तपांसिचयत्प्रतिवदंतिवेदाः यज्ज्ञानमिच्छंतोब्रह्मचर्यंगुरुकुलवासादिरूपं गुह्येंद्रियनियम नंवा चरंति तत्पदंभगवत्स्वरूपंतेतवसंग्रहेणब्रवीमि । एवंप्रतिज्ञातंभगवत्स्वरूपंउपदिशति ॥ ॐमित्येतदिति ॥ एतत्त्व यापृष्टंभगवत्स्वरूपं ॐ गुणपूर्णत्वादोंनामकमित्युपासीतेतिशेषः । उपदेशसमाप्तौवाइतिशब्दः । अन्यथाभावनिवृत्त्यर्थंवा । इतिशब्दोन्यथाभावनिवृत्त्यर्थमुदाहृतइत्युक्तेः ॥ १५ ॥ ॐनामकस्यैवभगवतोमाहात्म्यमाह ॥ एतदिति ॥ एतदेवोन्नामक मेवाक्षरंअव्ययं देहादिनाशशून्यं ब्रह्मगुणपूर्णंहि एतदेवाक्षरंपरंसर्वोत्तमंहि । अतएवैतदेवाक्षरंज्ञात्वायोधिकारीयदिच्छति तस्य तत्भवति हिप्रसिद्धमित्यर्थः ॥ १६ ॥ एतत् ॐनामकंब्रह्म श्रेष्ठमालंबनं मुख्यतःसर्वाश्रयः । नराजादिवदाश्रयइत्याह । एतत्परंविलक्षणमालंबनमिति । ब्रह्मलोकेसत्यलोकेविष्णुलोकेवामहीयतेपूज्यतेस्वावरैः ॥ १७ ॥ ननुब्रह्मलोकंप्राप्तस्यापिज्ञानि नोयदिजनिमृती तदानतदतिशयितंफलमित्यतआह ॥ नजायतइति ॥ विपश्चित्ज्ञानीब्रह्मलोकंप्राप्तोनजायतेनम्रियतेच । कुतः यतोयंभगवान्कुतोपिनबभूव उपलक्षणमेतत् । नम्रियतेच । अतस्तद्वेत्तापिनजायतेनम्रियतेच । अत्रविपश्चितोजननमर

उप० । सर्वेवेदायत्पदमामनंतितपांसिसर्वाणिचयद्वदंति । यदिच्छंतोब्रह्मचर्यंचरंतितत्तेपदंसंग्रहेणब्रवीमि । ओमित्येतत् ॥ १५ ॥ एतद्ध्येवाक्षरं ब्रह्मएतद्ध्येवाक्षरंपरं । एतद्ध्येवाक्षरंज्ञात्वायोयदिच्छतितस्यतत् ॥ १६ ॥ एतदालंबनंश्रेष्ठमेतदालंबनंपरं । एतदालंबनंज्ञात्वाब्रह्मलोकेमही यते ॥ १७ ॥ नजायतेम्रियतेवाविपश्चिन्नायंकुतश्चिन्नबभूवकश्चित् ।

णराहित्यंनामदेहोत्पत्तिविनाशशून्यत्वमेव । नतुस्वरूपोत्पत्तिविनाशशून्यत्वं तस्यसर्वजीवसाधारणत्वादितिभावेनाह ॥ नबभूवेति ॥ यतःकश्चिदपिजीवःस्वरूपेणनबभूव । नजातोनजायतेनजनिष्यतेच । अतएवनम्रियतेच । किंतुदेहसंबंधादेवजायतेम्रियतेच । अतोविपश्चित्देहोत्पतिविनाशशून्यत्वादेवनजायतेनम्रियतेचेत्यर्थः । ननुजीवस्यदेहित्वात्कथंस्वरूपेणजननाद्यभावइत्यतआह ॥ अजइति ॥ जीवःपुराणोपिपुरंदेहमणन्नपिस्वरूपेणाजोनित्यःशाश्वतोअविकारश्च । नित्यत्वमेवस्पष्टमाह । नहन्यतइति । देहेहन्यमानेपिजीवःस्वरूपेणनहन्यते तस्यततोभिन्नत्वादितिभावः ॥ १८ ॥ नन्वेतत्कथं जीवहननस्य अहंहंतातेनाहंहतइत्यादिप्रत्यक्षसिद्धत्वादित्यतस्तस्यभ्रांतित्वमाह ॥ हंतेति ॥ हंता मैत्रदेहहननकर्त्ताचैत्रः स्वात्मानंहंतुं हंतारं मैत्रजीवस्वरूपहननकर्त्तारंमन्यतेचेत् हतश्चमैत्रःस्वस्वरूपंहतंमन्यतेचेत् तर्हितौउभौनविजानीतोनसम्यग्जानीतः । भ्रांताविवियावत् । कुतइत्यतस्तत्रार्थाभावंहेतुमाह ॥ नायमिति ॥ अयंचैत्रोनहंति । मैत्रस्वरूपं अयंमैत्रोवास्वरूपेणनहन्यते यतोतोदेहविनाशनिमित्तकोयंभ्रमइत्यर्थः ॥ १९ ॥ उपदेशप्रकारमेवाह ॥ अणोरिति ॥ आत्माभगवानणोरणीयान् सूक्ष्मादपिसूक्ष्मतरः । महतोमहीयान् स्थूलादपिस्थूलतरः । स्थूलस्यैवाणुप्रतियोगित्वात्अणोरणीयस्त्वमेवलेशेनदर्शयति । अस्यैवंनित्यस्यजंतोर्जीवस्यपरमसूक्ष्मस्यापिगुहायांहृदयेनिहितइति । एतद्ध्येवाक्षरंज्ञात्वेत्यत्रनज्ञानमात्रंविवक्षितं किंत्वपरोक्षज्ञानमेवेतिभावेनतत्सा

उप० । अजोनित्यश्शाश्वतोयंपुराणोनहन्यतेहन्यमानेपिदेहे ॥ १८ ॥ हंताचेन्मन्यतेहंतुंहतश्चेन्मन्यतेहतं । उभौतौनविजानीतोनायंहंतिनहन्यते ॥ १९ ॥ अणोरणीयान्महतोमहीयानात्मास्यजंतोर्निहितोगुहायां ।

धनंदर्शयन्तस्यफलमाह ॥ तमिति ॥ अक्रतुः अशब्दोविष्णुवाची । एविष्णौक्रतुःनिश्चयोयस्यासौअक्रतुस्तन्निश्चयवानधिकारी आत्मनोजीवात् महिमानं महि महत् मानंगुणपरिमाणंयस्यसमहिमानस्तंपरमात्मानं । धातुःधारकस्यपरमात्मनःप्रसादात् पश्यति । ततश्चधातुःप्रसादादेववीतशोकोभवतीत्यर्थः ॥२०॥ पुनरपितन्माहात्म्यमाह ॥ आसीनइति ॥ आसीनःउपविष्टएवदूरंव्रजति । शयानएवसर्वतोयातिपरमैश्वर्यात् । तंमदामदं मदःसुखं अमदोदुःखं मदसहितोऽमदोयेनासौमदामदस्तं विबुधासुरसुखदुःखकारणमितियावत् । भगवंतंमदन्यःकोवामद्वत्ज्ञातुमर्हति नकोपीत्यर्थः । योमदन्यस्तंमदामदंकोवासाकल्येनज्ञातुमर्हति । नकोपीतिवायोज्यं । यद्वामदन्यःकोब्रह्मैवतंमदामदंदेवंसकलवेदोक्तप्रकारेणज्ञातुमर्हति नत्वन्यइत्यर्थः ॥ २१ ॥ अशरीरं प्राकृतशरीरशून्यं अनवस्थेषुनश्वरेष्वपिशरीरेषुअवस्थितं महांतंविभुंव्याप्तमात्मानंधीरोमत्त्वानशोचति ॥२२॥ धातुःप्रसादोज्ञानमोक्षहेतुरित्युक्तमयुक्तं । प्रवचनादिनैवज्ञानमोक्षयोरुपपत्तेरित्यतआह ॥ नायमिति ॥ अयमात्माभगवान्प्रवचनेनवेदव्याख्यानेनैवलभ्योज्ञेयःप्राप्यश्चन मेधयैवलभ्योन नापिबहुनाश्रुतेनैव किंतुएषआत्माप्रसन्नःसन्मदीयोयमितियंवृणुतेतेनलभ्योज्ञेयःप्राप्यश्च । ततश्चैषआत्मातस्याधिकारिणःस्वांतनुंस्वस्वरूपंपूर्वमविद्यावृतंविवृणुतेप्रकाशयतीत्यर्थः । यद्वाज्ञानमोक्षहेतुःप्रसादोपिनप्रवचनादिमात्रसाध्यः किंतुभक्त्येकसाध्यइत्याह ॥ नायमिति ॥ लभ्यःप्रसन्नोभवति । वृणुतइत्यनेनभक्तत्वंसूचितं ।

उप० ॥ तमक्रतुःपश्यतिवीतशोकोधातुःप्रसादान्महिमानमात्मनः ॥२०॥ आसिनोदूरंव्रजतिशयानोयातिसर्वतः । कस्तंमदामदंदेवंमदन्योज्ञातुमर्हति ॥२१॥ अशरीरंशरीरेषुअनवस्थेष्ववस्थितं । महांतंविभुमात्मानंमत्वाधीरोनशोचति ॥२२॥ नायमात्माप्रवचनेनलभ्योनमेधयानबहुनाश्रुतेन । यमेवैषवृणुतेतेनलभ्यस्तस्यैषआत्माविवृणुतेतनूंस्वां ॥ २३ ॥

ततश्चतस्याधिकारिणएषआत्मास्वस्वरूपंतद्योग्यतानुसारेणविवृणुतेप्रकाशयतीत्यर्थः ॥ २३ ॥ शमदमादिसाधनैरेवभगवत्प्राप्त्युपपत्तौकिंतज्ज्ञानेनेत्यतआह ॥ नेति ॥ योदुश्चरितात्इंद्रियाणांदुष्टविषयेषुचरणादविरतोऽनिवृत्तोन किंतुसर्वात्मनानिवृत्तएव निगृहीतेंद्रियएवेतियावत् । अशांतोभगवन्निष्ठबुद्धिरहितोन किंतुतन्निष्ठबुद्धिरेव असमाहितोयथावस्तुज्ञानादिशून्योन किंतुयथावस्तुज्ञानादिमानेव अशांतमानसोविषयालंबुद्धिशून्योन किंतुविषयालंबुद्धिमानेव सोपिप्रज्ञानेनैवभगवदपरोक्षज्ञानेनैवएनंप्राप्नुयादित्यर्थः ॥ २४ ॥ भगवतःसर्वसंहारकत्वरूपंमाहात्म्यंवदंस्तस्यदुर्ज्ञेयत्वमाह ॥ यस्येति ॥ यस्यभगवतोब्रह्मचक्षत्रंचेत्युभेओदनः अशनेभवतः तत्रब्रह्मशब्देनब्राह्मणजात्यभिमानीस्वयंब्राह्मणश्चतुर्मुखाख्योग्राह्यः क्षत्रशब्देनक्षत्रजात्यभिमानीस्वयंक्षत्रियोवायुः यथोक्तं विष्णोर्ब्राह्मणजातिःसनब्रह्माजज्ञेचतुर्मुखइत्यादि । मृत्युर्मारणात्मृत्युनामारुद्रः । मृत्युनामातुसंहाराद्रुद्रइतिवचनात् । यस्यभगवतउपसेचनं व्यंजनंघृतंवा तंभगवंतंइत्थाउक्तप्रकारेणकोवेद न कोपि यत्रवैकुंठादौसतिष्ठतितच्चकोवेदेतियोजना । यद्वाकश्चतुर्मुखएवेत्थावेदोक्तप्रकारेण तंवेद सोपिकिंस्वसामर्थ्येननेत्याह ॥ यत्रसइति ॥ यत्रकेब्रह्मणिसपरमात्मातिष्ठति नियामकतया सइत्यन्वयः । एवंचस्वांतर्गतभगवत्प्रसादादेववेदेतिलभ्यते । यद्वाकइतिकिंशब्दोयच्छब्दार्थः । यइत्थावेद सयत्र सभगवान्यत्रतिष्ठतितत्रतिष्ठतीत्यर्थः ॥ २५ ॥ प्रथमाध्यायस्य

उप० । नाविरतोदुश्चरितान्नाशांतोनासमाहितः । नाशांतमानसोवापिप्रज्ञानेनैनमाप्नुयात् ॥ २४ ॥ यस्यब्रह्मचक्षत्रंचोभेभवतओदनः । मृत्युर्यस्योपसेचनंकइत्थावेदयत्रसः ॥ २५ ॥ इतिकाठकेप्रथमेद्वितीयावल्ली ॥ १ । २ ॥

द्वितीयावल्ली ॥१।२॥ अध्यात्मयोगाधिगमेनेतिभगवतोध्यानमुक्तं। सकुत्रध्येयइत्यतस्तन्निरूपयन्पुनरपिभगवन्माहात्म्यमाह। ऋतमित्यादिना। केचित्तु ऋतंपिबंतावित्यत्रबुद्धिजीवावुच्येते द्विवचनश्रुतेः । नचबुद्धौकर्मफलभोक्तृत्वानुपपत्तिः । जीवस्यभोक्तृत्वेनतत्सहितबुद्धौछत्रिन्यायेनोपचारोपपत्तेरित्याहुः। तदपरेनक्षमंते। अन्यतरस्यपातृत्वेनजीवत्वेसिद्धेद्वितीयस्यचेतनतयैवभाव्यत्वात् ।अस्यगोर्द्वितीयोन्वेष्टव्यइत्यादौसजातीयग्रहणस्यैवलोकेदर्शनात् । नचैवंजीवांतरंग्राह्यं । एकस्मिन्शरीरेभोक्तृजीवद्वयायोगात् । तस्माज्जीवेश्वरावेवात्रोच्येते । नचेशस्यकर्मफलभोगायोगः । छत्रिन्यायेनपातृजीवसंबंधात्पिबंतावित्युपचारादिति । तदसत् । पिबतोर्बुद्धिजीवत्वजीवेश्वरत्वयोर्हानिलाभादर्शनात् । पातृत्वस्यजीवनिष्ठत्वस्यतेनाप्यंगीकारात् । बुद्धाविवौपाचारिकत्वस्येश्वरेत्वयाप्यंगीकारात् । तस्मादयंमंत्रःईश्वरमात्रपरएव । तथासतिद्विवचनानुपपत्तिरितिचेन्न । तस्यद्विरूपत्वाभिप्रायेणसावकाशत्वादितिभावेनमंत्रंप्रमाणेनैवव्याचष्टे ॥ आत्मेति ॥ आत्मादेहहृदयेस्थितः अंतरात्माजीवहृदयेस्थितइत्याहुः । तत्वप्रकाशिकायांतुद्विरूपतयाविष्णुर्देहनिविष्टइत्युक्तं । स्थितोहृदयइतिशेषः । तेनगुहांप्रविष्टावित्येतद्व्याख्यातं । परमेपरार्धइत्यस्यबाह्याकाशस्थानापेक्षयापरमंपरस्यब्रह्मणः। स्थानंपरार्द्धहार्दाकाशः । तत्रपरब्रह्मोपलभ्यते । तस्मिन्परमेपरार्धे हार्दाकाशेप्रविष्टाविति व्याख्यानमसत् । हार्दाकाशस्यपरमत्वाभावात्। बाह्याकाशापेक्षयांतराकाशस्यपरमत्वेनियामकाभावात् । नचतत्रपरब्रह्मोपलब्धिर्नियामिका । बाह्याकाशेपियोग्यानांपरब्रह्मोपलब्धेः । गुहांप्रविष्टावित्यनेनैवहार्दाकाशस्थितिलाभाच्च ।

भाष्यं । आत्मांतरात्मेतिविभुरेकएवद्विधास्थितः । सविष्णुः

प्रमाणविरोधाच्चेतिभावेनव्याचष्टे ॥ परमइति ॥ सर्वजीवोत्तमेइत्यर्थः । परेभ्योपिरुद्रादिभ्यऋद्धरूपकेऽतिपरिपूर्णस्वरूप इत्यर्थः । सविभुर्विष्णुरेकएवात्मांतरात्मेतिद्विधाहृदये तत्रापिपरमे परेभ्योपिऋद्धरूपकेवायौस्थितइत्यन्वयः । विष्णुशब्दव्याख्यानंविभुरिति । तथापिकथमयंमंत्रःईश्वरपरः । तस्यकर्मफलपातृत्वायोगादितिचेन्न । रसंपिबतिकर्मजमित्यादिवचनेनेश्वरस्यापिकर्मफलपातृत्वश्रवणात् । तथासतिदुःखभोगोऽनश्नन्नन्योभिचाकशीतीत्यादिश्रुतिविरोधश्चस्यादित्यतः ऋतंपिबंतावित्येतद्व्याचष्टे ॥ शुभानिति ॥ सावधारणमेतत् । पिबतिअनुभवति । भुज्यंतइतिभोगाविषयाः । ऋतंसत्यंतथाधर्मइतिस्मृतेःऋतशब्दस्यधर्मवाचकत्वाच्छुभानित्युक्तं । प्रत्युतजीवपक्षएवेदमनुपपन्नं । तस्याधर्मफलंप्रत्यपिभोक्तृत्वात् । नचापूर्णानंदत्वप्रसंगः । अचिंत्यैश्वर्यबलेनसुखभोगोपपत्तेः । अशुभभोगाभावविषयंतद्वाक्यमितिभावः । नन्वेवमस्येश्वरपरत्वेछायातपत्वविरोधः । तयोर्विद्वदविद्वत्परत्वेनजीवेश्वरपरत्वावगमादित्यतआह ॥ छायेवेति ॥ छायेवसुखकारणमित्यर्थः । आतपइत्यत्रापिइवशब्दोनुवर्तते । दुःखकारणमित्यर्थः । नचैवमौपचारिकत्वंदोषः । त्वन्मतेपिछायातपावित्यस्यविद्वदविद्वद्वाचकत्वाभावेनामुख्यार्थस्यग्राह्यत्वात् । नन्वेवंकिंबलाद्विष्णुमात्रपरत्वेनव्याख्यायतइतिचेत् । गुहाप्रविष्टत्वलिंगादेव । तच्चविष्णुमात्रनिष्ठमित्युक्तं । किंचयस्सेतुरितिपिबतोरेकवचनेनविशेषणादेकएवपाता । अतएवश्रुतौद्विवचनप्रयोगेपिभाष्येएकवचनप्रयोगः । सचयाजकसेतुत्वादिविशेषणाच्चविष्णुरितिभावेन सेतुरीजानानामितिवाक्यंसर्वेषांयाजिनामित्यन्यथाप्रतीतिनिरासायव्याचष्टे ॥ २८ ॥

भाष्यं ॥ परमेवायौपरेभ्योप्यृद्धरूपके । शुभान्पिबतिभोगान्सछायेवविदुषांप्रभुः । आतपःपापिनांनित्यं

॥ मर्यादेति ॥ सद्विस्वरूपकोविष्णुर्विष्णुमुद्दिश्ययाजिनांमर्यादाआश्रयइत्यर्थः । एतेनयत्परैरुक्तं यःसेतुरीजानानांतंनाचिकेतमग्निं यच्चाक्षरंपरंब्रह्माभयंपारंसंसारपारंतीर्तिर्षतामाश्रयश्च तच्चशकेमसि परापरब्रह्मणी कर्मब्रह्मविदाश्रयेवेदितव्येइतिवाक्यार्थइति । तदपिपरास्तं । यःसेतुरीजानानां यच्चाक्षरंपरंब्रह्म तंनाचिकेतमग्निंशकेमसीत्येकवाक्यत्वसंभवेवाक्यभेदाश्रयणायोगात् । त्वत्पक्षेजीवेश्वरस्वरूपनिरूपणावसरेग्निस्वरूपनिरूपणस्यासंगतत्वाच्च । अपरब्रह्मभूताग्नेःकर्मविदाश्रयस्यज्ञातव्यत्वस्य प्रागेवोक्तत्वाच्चेति । संसारपारंतितीर्षतामितिव्याख्यानमसत् । पारमित्यस्यपृथग्विशेषणत्वेगुणांतरलाभात् । मुमुक्षूणांसंसारपारमोक्षतितीर्षायाअभावाच्चेतिभावेन पारमित्येतत्सोपस्करंव्याचष्टे ॥ संसारस्येति ॥ संसारस्यपारोमोक्षस्तस्मिंस्तिष्ठतीत्यर्थः । इंद्रियेभ्यइतिमंत्रंजडानामेवतारतम्यमुच्यतइत्यन्यथाप्रतीतिनिरासायव्याचष्टे ॥ देवेभ्यइति ॥ इंद्रियात्मभ्यः इंद्रियाभिमानिभ्यइत्यर्थः । अनेनश्रुताविंद्रियार्थादिशब्दाअभिमान्यधिकरणन्यायेनतदभिमानिपराइत्युक्तंभवति । केतेइंद्रियाभिमानिनोदेवाइत्यतआह ॥ सोमेति ॥ दक्षश्चेत्येतेदशेंद्रियेशाः । तत्रश्रोत्रस्यसोम स्त्वचोवित्तप श्चक्षुषःसूर्यो रसनस्याऽऽप्पोवरुणो घ्राणस्याश्विनौ वाचोग्निः पाण्योरिंद्रः पादयोरिंद्रसूनुर्जयंतः पायोर्यमो गुह्यस्यदक्षइतिविवेकः । श्रोत्राद्यभिमानिनोबहवइतिअन्यत्रान्यथोक्तावप्यविरोधः। केतेअर्थाभिमानिनो येषामिंद्रियदेवेभ्यउत्तमत्वमित्यतआह ॥सु(सौ)पर्णीति॥

भाष्यं । मर्यादाविष्णुयाजिनां । संसारस्यचपारस्थस्सविष्णुर्द्विस्वरूपकः । देवेभ्यइंद्रियात्मभ्योज्यायांसोर्थाभिमानिनः । सोमवित्तपसूर्याप्पाश्वयग्नींद्रेंद्रसूनवः । यमोदक्षश्चेंद्रियेशाःसु(सौ)पर्णीवारुणीतथा ।

ननुशब्दादयःपंचार्थाः । सौपर्ण्याद्यास्तुतिस्रः । अतःकथंतासांतदभिमानित्वमित्यतआह ॥ **द्विद्येकदेवताइति** ॥ द्वौचद्वौ चैकश्चद्विद्येकेद्विद्येकेषांदेवताद्विद्येकदेवताः । सुपर्णीवारुण्यौद्वयोर्द्वयोरभिमानिन्यौ । उमात्वेकस्येत्यर्थः । तत्रसुपर्णीशब्द स्पर्शयो र्वारुणीरूपरसयो रुमागंधस्येतिविवेकः । अर्थेभ्यश्चपरंमनइतिवाक्यंव्याख्यातुंमनोभिमानिदेवताआह ॥ **मनोभिमा निनइति** ॥ अपिरभिव्याप्तौ । इंद्रकामादिव्यावृत्त्यर्थंतुशब्दोवधारणार्थः । इदानींतद्वाक्यंव्याचष्टे ॥ **तेइति** ॥ मनसस्तु परावुद्धिरितिवाक्यंव्याचष्टे ॥ **तेभ्यइति** ॥ मनोभिमानिभ्यः । लिंगवचनव्यत्ययेनश्रेष्ठेत्यनुवर्त्तते । बुद्धेरात्मामहानितिवैय धिकरण्यप्रतीतिनिरासायतद्व्याचष्टे ॥ **तस्याइति** ॥ वायुरपिग्राह्यः । महान्महत्तत्वाभिमानी । आत्मासर्वजीवस्वामी । महतःपरमव्यक्तमित्येतद्व्याचष्टे ॥ **ततइति** ॥ अव्यक्तात्पुरुषःपरःइत्येतद्वाक्यंव्याचष्टे ॥ **तस्यास्त्विति** ॥ पुरुषशब्दप्रवृत्ति निमित्तमाह ॥ **पूर्णत्वादिति** ॥ पूर्णषड्गुणत्वादित्यर्थः । पुरुषान्नपरंकिंचित्साकाष्ठासापरागतिरितिपुरुषाच्छ्रेष्ठोनास्तीत्युक्तं । तत्कैमुत्येनसाधयति ॥**नैवेति**॥ कुतश्चित्कुत्रापिदेशेकालेवा । ननुरमासमाभावेपितदधिकवत्भगवदधिकोपिकिंनस्यादितिचेन्न । भगवतएवरमासमस्यसत्त्वात् । नहितदधिकःतत्सदृशगुणवान्नेतियुक्तं । पुरुषादुत्तमस्यपाशुपतादिशास्त्रेषुकथनात्कथमेतदित्यत उक्तं ॥ **साकथेति** ॥ किंम्वित्यनुवर्त्तते । साकथा श्रेष्ठोस्तीतिकथा किमु कथमुप्पन्ना । उक्तयुक्तिविरुद्धत्वादित्यर्थः ॥ य

भाष्यं । उमेतिचार्थमानिन्यस्तिस्रोद्विद्येकदेवताः । मनोभिमानिनोरुद्रवींद्रशेषास्त्रयोपितु । तेश्रेष्ठाअर्थमानिभ्यस्तेभ्योबुद्धिस्सरस्वती । तस्याब्रह्मामहानात्माततोऽव्यक्ताभिधारमा । तस्यास्तुपुरुषोविष्णुःपूर्णत्वान्नैवतत्समः । कश्चित्कुतश्चिच्छ्रेष्ठस्तुनास्तीतिकिमुसाकथा ।

च्छेद्वाङ्मनसीप्राज्ञइत्यादिकमपिप्रसिद्धजडवागादिपरमितिप्रतीतिनिरासायप्रमाणेनव्याचष्टे ॥ **तस्मादिति** ॥ उक्तरीत्याउमा दीनांपरस्परनियम्यनियामकभावसत्त्वादित्यर्थः । वागात्मिकाःवागभिमानिनीःशिवादिषुनियच्छेदित्यन्वयः ॥ यद्यपिप्राक् वागभिमान्यग्निरुक्तस्तथापितस्यसाक्षान्मनोभिमानिरुद्रादिनियम्यत्वाभावादुमाद्यागृहीताः । अनेनयच्छेद्वाङ्मनसीप्राज्ञइत्ये तद्व्याख्यातं । शिवादीन्ब्रह्मवाय्वोस्तुनियच्छेदित्यत्रसरस्वतीद्वारेतिग्राह्यं । तद्यच्छेज्ज्ञानआत्मनि । ज्ञानमात्मनिम हतीत्युक्तत्वात् । तद्यच्छेच्छांतआत्मनीतिमहदभिमानिब्रह्मवाय्वोःसाक्षाद्भगवन्नियतत्वमुच्यते । तदयुक्तं । महतःपरमव्यक्त मित्युक्तत्वात्इत्यतआह ॥ **तौरमायामिति** ॥ परानंदइतिशांतशब्दार्थः । आत्मशब्दार्थःपरमात्मनीति । यच्छेदित्यनेनवा गादीनांमनआदौनियमनकर्तृत्वंजीवस्योच्यतइतिप्रतीतिनिरासायतस्यविवक्षितमर्थमाह ॥ **तद्वशत्वेनेति** ॥ प्रतीतएवार्थः किंनस्यादित्यतआह ॥**कुतस्त्विति**॥ तत्रहेतुर्विनियामकानिति । अनाद्यनंतंमहतःपरमितिवाक्येऽव्यक्तमेवप्रतिपाद्यते । महत्प रत्वलिंगात् । महांतंचसमावृत्यप्रधानंसमवस्थितमितिवचनात् । महतःपरमव्यक्तमितिअव्यक्तस्यैवमहतःपरत्वेनप्रकृतत्वाच्चेति कश्चित् । तदसत् । तस्यमोक्षार्थज्ञेयत्वानुपपत्तेः । सोध्वनःपारमाप्नोतितद्विष्णोःपरमंपदमितिवचनात्अस्यविष्णुप्रकरणत्वाच्च । अत्रोक्तरीत्यापितृसौमनस्यस्वर्ग्याग्निपरमात्मनांत्रयाणामेवप्रश्नेनतत्स्वरूपस्यैवोपन्यासादव्यक्तकथनस्यासंगतत्वाच्च । तस्मात्प्रा

भाष्यं । तस्माद्वागात्मिकादेवीरुमाद्यास्तुशिवादिषु । शिवादीन्ब्रह्मवाय्वोस्तुनियच्छेन्महदात्मनोः । तौरमायांपरानंदेतांविष्णौपरमात्मनि । तद्वशत्वेनतद्ज्ञानंनियमोनामनापरः । कुतस्तुमानुषोदेवान्नियच्छेद्विनियामकानितिच ।

ज्ञःपरमात्माहितत्रोच्यते । नचमहतःपरत्वलिंगानुपपत्तिः । महतोपिमहीयानितिश्रुतेः । सर्वस्मात्परस्यमहत्परत्वस्याप्युक्तत्वात् तर्ह्यव्यक्तपरत्वेनप्रकृतेपरमात्मनिविशिष्यमहतःपरत्वंकथमुच्यते । तथोक्तौविशेषकारणाभावादित्यतआह ॥ स्वभार्यायाइति ॥ प्रथमाध्यायस्यस्तृतीयावल्ली ॥ १ ॥ ३ ॥ (अथखण्डार्थः) ॥ सुकृतस्यलोकेसुकृतनिर्मितशरीरे । गुहांहृदयगुहांप्रविष्टौ । तत्रापिपरमेसर्वजीवोत्तमे परार्धे आकृद्धःअर्धः परेभ्योऽर्द्धःपरार्धः । परेभ्योप्यृद्धरूपकेअतिपरिपूर्णेवायौप्रविष्टौ ऋतंसुकृतफलं पिबंतौभुंजानावात्मांतरात्माख्यभगवद्रूपविशेषौ । येपंचाग्नयः पंचमहायज्ञवंतोद्युपर्जन्यादिपंचाग्निविद्यानिष्ठावा त्रिनाचिकेताः त्रिवारकृतनाचिकेताश्चब्रह्मविदस्ते छायातपौविद्धदविदुषोःसुखदुःखकारणीभूतौवंदंति ॥ १ ॥ यत्पूर्वमनंतलोकाप्तिमित्यादि नाग्निस्थभगवत्स्वरूपमुक्तं यच्चओमित्येतदित्यादिनामुक्तनियामकभगवत्स्वरूपमुक्तं तदुभयमेकमेव तद्ध्यानेचाहमेवाधिकारी त्याह ॥ यःसेतुरिति ॥ यःपूर्वोक्तोद्विरूपकोविष्णुरीजानानांविष्णुयाजिनांसेतुर्मर्यादा यच्चसंसारभयंतितीर्षतामभयमभयप्र दंपारं संसारस्थं मुक्तनियामकमितियावत् । अक्षरंपरंब्रह्मतं नाचिकेतमग्निंअग्निस्थंभगवंतं शकेमसि ध्यातुंशक्ताःस्मः ॥ २ ॥ इंद्रियनियमनमवश्यंसंपाद्यमितिवक्तुंतदुपयुक्तत्वेनकिंचिदुपदिशति ॥ आत्मानमिति ॥ आत्मानंशरीरिणमेव रथिनंरथस्वा

भाष्यं । स्वभार्यायाःपरत्वंसिद्धमितिमहतःपरमित्येवोक्तं ॥ १ । ३ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेश्रीकाठकोपनिषद्भाष्येप्रथमोध्यायः ॥ १ ॥

उप० । ओं । ऋतंपिबंतौसुकृतस्यलोकेगुहांप्रविष्टौपरमेपरार्द्धे । छायातपौब्रह्मविदोवदंतिपंचाग्नयोयेचत्रिनाचिकेताः ॥ १ ॥ यस्सेतुरीजानानामक्षरंब्रह्मयत्परं । अभयंतितीर्षतांपारंनाचिकेतंशकेमसि ॥ २ ॥ आत्मानंरथिनंविद्धिशरीरंरथमेवच ।

मिनंविद्धि शरीरंतुरथंविद्धि अश्वस्थानीयैरिंद्रियैर्विकृष्यमाणत्वात् । बुद्धिंतुसारथिंविद्धि शरीरप्रवर्त्तकत्वात् । बुद्ध्याविचार्य हिकिंचित्करोति । मनःप्रग्रहमेवरशनामेवविद्धि । चशब्दस्तुशब्दार्थः । मनसाप्रगृहीतानांश्रोत्रादीनांप्रवर्तनात् ॥ ३ ॥ इंद्रियाणिहयानाहुः शरीराख्यरथाकर्षकत्वात् । तेषुतेषामिंद्रियाणांगोचरान्शब्दादीन्विषयान् । अश्वसंचारदेशानाहुः । तेष्विंद्रियाणांसंचारात् । संत्वात्मादयोरथ्यादिरूपाः किंततइत्यतोयथासारथिशून्योरथीदुःखभोक्तैवंबुद्धिशून्यआत्मापीत्या ह ॥ आत्मेति ॥ आत्मेतिद्वितीयार्थे । आत्मानंशरीरिणंइंद्रियमनोयुक्तंतन्मात्रयुक्तंबुद्धिशून्यंदुःखभोक्तेत्याहुर्मनीषिणः । यद्वात्रबुद्धिरपिग्राह्या । तथाचप्रसिद्धरथिवत्सुखभोक्तेत्याहुरितिव्याख्येयं ॥ ४ ॥ इदानीमश्वस्थानीयेंद्रियनियमनंकार्यमि तिभावेनमनोनियमनंविज्ञानंचतत्साधनमित्यन्वयव्यतिरेकाभ्यामाह ॥ यस्त्विति ॥ यस्तुअविज्ञानवान् । शास्त्रादिजनितविशेषबु द्ध्याख्यविवेकिसारथिशून्योऽतएवायुक्तेनानिगृहीतेनमनसासदायुक्तोभवति तस्यपुरुषस्येंद्रियाण्यवश्यानिभवंति । तत्रदृष्टां तमाह ॥ दुष्टाश्वाइति ॥ अनिगृहीताश्वाइत्यर्थः ॥ ५ ॥ प्राधान्याद्व्यतिरेकमुक्त्वान्वयमाह ॥ यस्त्विति ॥ ६ ॥ अस्त्वेवम न्वयव्यतिरेकाभ्यांइंद्रियनियमनेमनोनियमनादिसाधनं । तदेवकिमर्थमितिचेन्न । तस्यपरंपरयामोक्षोपयोगित्वादितिभावेनें

बुद्धिंतुसारथिंविद्धिमनःप्रग्रहमेवच ॥ ३ ॥ इंद्रियाणिहयानाहुर्विषयांस्तेषुगोचरान् । आत्मेंद्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणः ॥ ४ ॥ यस्त्व विज्ञानवान्भवत्ययुक्तेनमनसासदा । तस्येंद्रियाण्यवश्यानिदुष्टाश्वाइवसारथेः ॥ ५ ॥ यस्तुविज्ञानवान्भवतियुक्तेनमनसासदा । तस्येंद्रिया णिवश्यानिसदश्वाइवसारथेः ॥ ६ ॥

द्रियनियमनाद्यभावेमोक्षाभावंतावदाह ॥ यस्त्विति ॥ अमनस्कोऽगृहीतमनस्कः । अतएवेंद्रियाणांदुष्टविषयेषुयथेष्टंप्रवृत्त्या निरंतरमशुचिः ॥ ७ ॥ इदानीमन्वयमाह ॥ यस्त्विति ॥ यस्मात्यत्पदंप्राप्य ॥ ८ ॥ तदेवविवृणोति ॥ विज्ञानेति ॥ अध्वनःसंसाराध्वनः ॥ ९ ॥ भगवज्ज्ञानंतारतम्यांतगत्वेनसंपाद्यमितिभावेनदेवतातारतम्यमाह ॥ इंद्रियेभ्यइति ॥ इंद्रियेभ्यः श्रोत्रादींद्रियाद्यभिमानिदेवेभ्यःइंद्रादिभ्योऽर्थाःअर्थाभिमानिदेवताःसौपर्णीवारुण्युमाचपराउत्तमाः । अर्थेभ्यश्च परंमनः मनोभिमानिदेवतारुद्रादयउत्तमाः । मनसस्तुपराबुद्धिस्तदभिमानिनीसरस्वती । बुद्धेर्महानात्मा । महत्तत्वाभिमानीब्रह्मापरः ॥ १० ॥ महतःपरमव्यक्तं तदभिमानिश्रीतत्वं । अव्यक्तात्पुरुषःपूर्णषड्गुणोभगवान्परः । पुरुषादप्युत्तम मस्तिकिमित्यतआह ॥ पुरुषान्नपरमिति ॥ पुरुषात्किमपिपरंन । यतःसाकाष्ठा सएवावधिः । कुतःसापरागतिः गम्यतइति गतिः ॥ ११ ॥ सुकृतस्यलोकइतिभगवतःशरीरस्थत्वमुक्तं। तर्हिजीववत्कुतोनदृश्यतइतिचेन्न । किंसर्वेषांदर्शनमापाद्यते उ

उप० । यस्त्वविज्ञानवान्भवत्यमनस्कस्सदाऽशुचिः । नसतत्पदमाप्नोतिसंसारंचाधिगच्छति ॥७॥ यस्तुविज्ञानवान्भवतिसमनस्कस्सदाशुचिः । सतुतत्पदमाप्नोतियस्माद्भूयोनजायते ॥ ८ ॥ विज्ञानसारथिर्यस्तुमनःप्रग्रहवान्नरः । सोध्वनःपारमाप्नोतितद्विष्णोःपरमंपदं ॥ ९ ॥ इंद्रियेभ्यःपराह्यर्थाअर्थेभ्यश्चपरंमनः । मनसस्तुपराबुद्धिर्बुद्धेरात्मामहान्परः ॥ १० ॥ महतःपरमव्यक्तमव्यक्तात्पुरुषःपरः । पुरुषान्नपरंकिंचित्सा काष्ठासापरागतिः ॥ ११ ॥

तयोग्यानामेव । आद्यआह ॥ एषइति ॥ द्वितीयेत्वाह ॥ दृश्यतइति ॥ अग्र्यत्वमेवविशदयतिसूक्ष्मयेति । सूक्ष्मवस्तुविषयया ॥ १२ ॥ इंद्रियादिदेवेभ्यअर्थादिदेवाउत्तमत्वेनध्येयाइत्युक्तं । नकेवलमुत्तमत्वेनकिंतुपूर्वपूर्वेषांउत्तरोत्तरनियतत्वंच ध्येयमित्याह ॥यच्छेदिति॥ इंद्रियाभिमानिदेवान्वाचिवागभिमानिदेवतासुउमादिषुयच्छेदितिग्राह्यं । वाक्वाचंवागभिमानिनीं मनसिमनोभिमानिनिरुद्रादौयच्छेत् । तद्यच्छेत् तत्मनोभिमानिरुद्रादिकं ज्ञानआत्मनिज्ञानाभिमानिन्यांसरस्वत्यांयच्छेत् । ज्ञानंज्ञानाभिमानिनींसरस्वतीं महत्यात्मनि महदभिमानिनि ब्रह्मवाय्वोर्नियच्छेत् । महांतंचाव्यक्तेश्रीतत्वेनियच्छेत् । इति ग्राह्यं । तत्अव्यक्तंश्रीतत्वं शांतेपरमानंदेआत्मनिपरमात्मनिनियच्छेत्इत्यर्थः ॥ १३ ॥ वेदपुरुषःस्वयंसाधूनांहितमुपदिशति ॥ उत्तिष्ठतेति ॥ हेअधिकारिणःसंसारएवनिषण्णायूयमुत्तिष्ठतअविद्यासुप्ताश्चजागृत कथंजागरणं वरान्उत्तमाचार्यान्प्राप्यनिबोधत । भगवत्स्वरूपमितिशेषः । किमर्थंभगवद्बोधःसंपादनीयः संसारनिवृत्तेःकारणांतरेणापिसंभवादित्यतआह ॥ क्षुरस्येति ॥ इयंसंसृतिःक्षुरस्यधारेवनिशिता अतएवदुरत्यया ज्ञानंविनाअत्येतुमशक्या । तत्तस्मात्पथःपंथानंमोक्षमार्गंदुर्गज्ञानंविनागंतुमशक्यमितिकवयोवदंति । भगवज्ज्ञानस्यापिप्रत्यक्षादिनापिसंभवात्किमाचार्योपदेशेनेत्यतआह दुर्गमिति। तंपंथानंसुखहेतुप्राप्तिमंतं । तत्प्राप्तेःसुखहेतुत्वात्पंथाइतिहरिःस्मृतइतिवचनात्दुर्गं आचार्योपदेशमंतरेणज्ञातुमशक्य

उप० । एषसर्वेषुभूतेषुगूढोत्मानप्रकाशते । दृश्यतेत्वग्र्ययाबुद्ध्यासूक्ष्मयासूक्ष्मदर्शिभिः ॥१२॥ यच्छेद्वाङ्मनसीप्राज्ञस्तद्यच्छेज्ज्ञानआत्मनि । ज्ञानमात्मनिमहतियच्छेच्छांतआत्मनि ॥ १३ ॥ उत्तिष्ठतजाग्रतप्राप्यवरान्निबोधत । क्षुरस्यधारानिशितादुरत्ययादुर्गपथस्तत्कवयोवदंति ॥१४॥

मितिकवयोवदंति ॥ १४ ॥ कुतः शब्दाद्यनात्मकत्वेन श्रोत्राद्यविषयत्वात्इत्याह ॥ अशब्दमिति ॥ यद्वादुर्गमत्वमुपपादयितुंतस्येतरवैलक्षण्यंवदन्नाचार्योपदेशेनभगवन्निश्चयएवमोक्षसाधनमित्याह ॥ अशब्दमिति ॥ शब्दोनभवतीत्यशब्दमित्यादिनापंचतन्मात्रावैलक्षण्यमुच्यते । अगंधमित्यपिग्राह्यं । अगंधमित्यनेनोपलक्षणयापंचमहाभूतवैलक्षण्यं । तत्रहेतुरव्ययमिति । यद्वानविद्यतेशब्दोयस्यतदशब्दमित्यादिनाशब्दादिगुणशून्यत्वमुच्यते । अशब्दमितिशब्दाविषयत्वंच । यच्छब्दस्यतमित्युत्तरेणान्वयः । नविद्यतेआदिरुत्पत्तिःपराधीनप्राप्त्यादिलक्षणायस्यसोनादिः । नविद्यतेंतःपरिच्छेदोदेशतःकालतोगुणतोवायस्यसोनंतः । अनादिश्चासावनंतश्चअनाद्यनंतःतं महतश्चतुर्मुखात्परंतंविष्णुंनिचाय्याचार्योपदेशेननिश्चित्यमृत्युमुखात्प्रमुच्यते॥१५॥ वेदपुरुषःपूर्वोक्तांविद्यांस्तौति ॥ नाचिकेतमिति ॥ सनातनंअनादिकालतइत्थमेवागतं । श्रुत्वाउक्त्वाचेतियोज्यं ॥ १६ ॥ देशकालविशेषेस्तोत्रवदेतद्विद्यापठितुरानंत्यंफलं । किमुश्रुत्वाव्याख्यातुरुक्तंफलमितिभावेनाह ॥ यइति ॥ तत्श्रावणं । श्राद्धंवा । सर्वाध्यायार्थविधारणार्थाध्यायांतेद्विरुक्तिः ॥ १७ ॥ इतिप्रथमोऽध्यायः ॥ १ ॥ ३ ॥

उप० । अशब्दमस्पर्शमरूपमव्ययंतथारसंनित्यमगंधवच्चयत् । अनाद्यनंतंमहतःपरंध्रुवंनिचाय्यतंमृत्युमुखात्प्रमुच्यते ॥ १५ ॥ नाचिकेतमुपाख्यानंमृत्युप्रोक्तंसनातनं । उक्त्वाश्रुत्वाचमेधावीब्रह्मलोकेमहीयते ॥ १६ ॥ यइदंपरमंगुह्यंश्रावयेद्ब्रह्मसंसदि । प्रयतश्राद्धकालेवातदानंत्यायकल्पतेतदानंत्यायकल्पतइति ॥ ३ ॥ इतिप्रथमोऽध्यायः ॥ १ ॥

॥ हरिः ॐ ॥ ब्रह्मविद्याधिकारवैराग्यनिरूपणपूर्वंब्रह्मस्वरूपंप्रपंचेनाहानेनाध्यायेन । परांचिखानिव्यतृणादित्यत्र व्यतृणादित्यस्यहिंसितवान् हननंकृतवानितिव्याख्यानमसदितिभावेनधातुंपठति ॥ तृण्विति ॥ धातुर्धातुव्याख्यानमित्यर्थः । कात्करणंनामकुत्सितत्वेनकरणं । तृणुधातोर्हननार्थत्वस्याश्रुतत्वादितिभावः । मायावादिनोह्यस्मिन्नध्यायेजीवेशाभेदएवप्रतिपाद्यते । यइदंमध्वदंवेदात्मानंजीवमितिसामानाधिकरण्यात् । यदेवेहतदमुत्रेत्यादेश्चेतिवदंति । तदसत् । हंततइदंप्रवक्ष्यामिगुह्यंब्रह्मसनातनं । यथामरणंप्राप्यआत्माभवतिगोतमेत्युत्तरत्रजीवेशभेदस्यैवोक्तत्वेनतद्विरोधादितिभावेनतद्वाक्यमन्यथाप्रतीतिनिरासायव्याचष्टे ॥ इदमिति ॥ स्वप्नांतंचेत्यतःपूर्वंहंततइदंप्रवक्ष्यामीतिप्रतिज्ञावाक्यंद्रष्टव्यमितिभावेनतद्वाक्यव्याख्यानमत्रक्रियतइत्यप्याहुः । जीवोमरणंप्राप्ययथाभवतितच्चेतिसंबंधः । यद्यपिपूर्वं गुह्यंतत्परमंब्रह्ममृियमाणंशरीरिणंसंप्राप्तमपीतिमरणशब्दंम्रियमाणपरमंगीकृत्यायंमंत्रोभगवत्परतयैवव्याख्यातः । तथापिव्याख्यानांतरमेतदित्यविरोधः । नन्विदंगुह्यंप्रवक्ष्यामीतिप्रतिज्ञाऽसंगता । ब्रह्मस्वरूपस्यनचिकेतसाऽपृष्टत्वात् । जीवोमरणंप्राप्ययथाभवतितच्चप्रवक्ष्यामीतिप्रतिज्ञात्वसंगतैव । नचिकेतसाजीवस्वरूपस्यापृष्टत्वात्इत्यतआह ॥ जीवेश्वरेति ॥ जीवेश्वरभेदज्ञापनंचजीवेश्वरस्वरूपकथनंविनानभवतीतिभावः । ननुयद्यत्रजीवेश्वरभेदज्ञापनायजीवेश्वरस्वरूपनिरूपणंप्रतिज्ञातंस्यात्तर्ह्युत्तरत्रविरुद्धधर्मवत्तयातदुभयोक्तिःस्यादित्यतोस्त्येवतथातदुभयोक्तिः । योनिमन्येप्रपद्यंतेशरीरत्वायदेहिनः । स्थाणुमन्येनुसंयंतियथाकर्मयथाश्रुतं । यएषुसुप्तेषु

भाष्यं ॥ तृणुकात्करणइतिधातुः । इदंगुह्यंब्रह्मप्रवक्ष्यामि । यथामरणंप्राप्यजीवोभवतितच्चप्रवक्ष्यामिजीवेश्वरभेदज्ञापनाय ।

जागर्तिकामंकामंपुरुषोनिर्ममाणस्तदेवशुक्रंतद्ब्रह्मेतिजीवेश्वरयोस्तथोक्तत्वादितिभावेनतद्वाक्यंव्याचष्टे ॥ यइति ॥ कर्मफलभोक्तेत्यनेनयोनिमन्यइत्यादिकंव्याख्यातं । सुप्त्यादिमानित्यादिपदेनशोकमरणादिपरिग्रहः । जागर्तीत्यनंतरंयःशोकराहित्याच्छुक्रः यश्चनित्यामृतोयश्चसर्वलोकाश्रयोयंचकोपिनात्येतीतिग्राह्यं । तेनसुप्त्यादीत्यादिपदोपपत्तिः । जीवेषुसुप्तेषुयोजागर्तिसविष्णुरितिनयुक्तं । देवदत्तेसुप्तेपियज्ञदत्तस्यजागरणदर्शनेनतस्यविष्णुलिंगत्वासंभवादित्यतउक्तंप्रलयादिष्विति । आदिपदेनसृष्टिस्थितिकालग्रहणं । नन्वेतदयुक्तं । तथासतिकामंकामंनिर्ममाणइत्यस्यानुपपत्तिः । नचप्रलयेनिर्माणमस्ति । नचनिर्माणमात्रमत्रोच्यते । नतुतत्कालीनमितिवाच्यं । भुंजानोनोत्सृजेद्वाचमित्यादाविवप्रकरणप्राप्तत्वादित्युक्तत्वात् । अतएवसूत्रकारोपिनिर्मातारंचैकइतिस्वाप्नपदार्थनिर्मातृत्वमीश्वरस्यैतच्छ्रुत्यवष्टंभेनोक्तवानितिचेत्न । प्रलयेपिब्रह्मादिजीवमनोवृत्त्यादिनिर्माणस्यसत्वात्कथमन्यथातन्मनोवृत्तेःप्रवाहतोनादित्वं । उक्तंच प्रलयेपिप्रतिभातपरावरइति । उक्तंचतत्वप्रकाशिकायां । स्वरूपातिरिक्तज्ञाननित्यत्वाभिप्रायेणेति । सूत्रकृतेश्वरस्यस्वाप्नपदार्थनिर्मातृत्वेएतच्छ्रुतेरुपपादनादत्रचभाष्येप्रलयादिष्वित्युक्तत्वात्संस्कारादेःसत्त्वाच्चप्रलयेपिस्वाप्नपदार्थनिर्माणमस्तीत्यप्याहुः । ननुप्रलयेयदिब्रह्मादिमनोवृत्तिनिर्माणंतर्हिकथंतेषांसुप्तिः।नचब्रह्मादिव्यतिरिक्तानामेवसुप्तिरितिवाच्यं । सुषुप्तिसंस्थान्ब्रह्मादिकान् । सुप्तास्तत्रयतोजीवाःसर्वेब्रह्मशिवादिकाइत्यन्यत्रोक्तेरिति चेन्न । यतस्तेषांसावस्थाअस्मत्स्वप्नावस्थासदृशी।मनोवृत्तेस्सद्भावात् । बहिर्व्यापाराभावाच्च । एवंचस्वप्नसुषुप्त्युभयसाधारणसु ॥ ३३ ॥

भाष्यं ॥ यःकर्मफलभोक्तासुप्त्यादिमान्सजीवः । यःप्रलयादिषुजीवेषुसुप्तेषुजागर्तिसविष्णुःपरंब्रह्मेत्यर्थः ।

प्तिशब्दस्यतत्रगौण्यावृत्त्याप्रयोगइति । उक्तंचबृहदारण्यकभाष्ये । स्वप्नसुषुप्त्युभयाभिप्रायेणकानिसुप्तइत्युक्तमिति । उक्तंचषट्प्रश्नभाष्यटीकायां । स्वापोपिद्विविधःस्वप्नःसुषुप्तिश्चेतीति । ननुजीवःसुप्तिशोकादिमान् विष्णुस्तुतेषुसुप्तेषुजागर्तिशोकादिरहितश्चेत्यस्तुतयोर्भेदः । जीवस्यकर्मफलभोक्तृत्वेनकथंतयोर्भेदसिद्धिः । विष्णोरपिकर्मफलभोक्तृत्वांगीकारादितिचेत् । न । यतोत्र कर्मफलंश्रुत्युक्तंजीवस्ययोन्यादिगमनमेवविवक्षितं । नहिजीवस्ययत्योन्यादिगमनंतत्ब्रह्मप्राप्नोति । अतस्तयोर्भेदःसिद्धइतिभावेनाह ॥ नहीति ॥ प्राप्नोतीतिशेषः। यद्यपिजीवनियामकतयायोन्यादिगमनमपिप्राप्नोत्येवब्रह्म तथापिनस्वकर्मार्जितशरीरप्राप्त्यर्थं अतएवश्रुतौशरीरत्वायेत्युक्तमितिभावः । ननुहंततइदंप्रवक्ष्यामीत्यत्रेदंगुह्यंब्रह्मप्रवक्ष्यामि । यथामरणंप्राप्यजीवोभवतितच्चप्रवक्ष्यामीतिप्रतिज्ञाद्वयंकृत्वातदुभयंपश्चादभिधीयतइतिकुतोंगीकर्त्तव्यं । ब्रह्मप्रवक्ष्यामीतिप्रतिज्ञायपश्चात्तन्निरूपणमेवक्रियतइत्यर्थःकिंनस्यात् । नचैवंयथामरणंप्राप्येत्येतद्व्यर्थस्यादितिवाच्यं । आत्मामरणंप्राप्ययथाभवतितदिदंब्रह्मप्रवक्ष्यामीतिवाक्ययोजनोपपत्तेः । संभवत्येकवाक्यत्वेवाक्यभेदायोगाच्चेतिचेन्न । तथासति योनिमन्येप्रपद्यंतइत्यादिनाजीवस्ययोन्यादिगमनमुच्यमानमसंगतंस्यात् । नचजीवस्ययोन्यादिगमनमपिब्रह्मतयोच्यतइतिनासंगतिरितियुक्तमित्याह ॥ नहीति ॥ योन्यादिगमनस्यब्रह्मत्वेतस्यानित्यत्वप्रसंगइत्यर्थइत्यप्याहुः । नन्वेवंप्रतिज्ञाद्वयमित्यंगीकारेजीवस्वरूपकथनंव्यर्थं । तस्याजिज्ञासितत्वात् । नचजीवेश्वरभेदज्ञापनायतत्कथनमित्युक्तमितिवाच्यं । जीवेश्वरभेदस्याप्यजिज्ञासितत्वेनतज्ज्ञापनस्यापिव्यर्थ

भाष्यं । नहिजीवस्ययोन्यादिगमनंब्रह्म ।

त्वादित्यतआह ॥ जीवादिति ॥ ब्रह्मणोयथावज्ज्ञानंचनचिकेतसाप्रार्थितमितिभावः । नन्वेवंतर्हियइदंमध्वदंवेदात्मानंजीव मंतिकादितिवाक्यविरोधः । तत्रसामानाधिकरण्यव्यपदेशेनजीवेशाभेदप्रतीतेरित्यतस्तद्व्याचष्टे ॥ जीवस्येति ॥ अनेनजीवमि तिद्वितीयाषष्ठ्यर्था । अंतिकादितिपंचमीसप्तम्यर्थेत्युक्तंभवति । ननुजीवमितिद्वितीयाकुतःषष्ठ्यर्थत्वेनव्याख्येया । आत्मानं जीवंस्यांतिकेवेदेतियथाश्रुतार्थेबाधकाभावादित्यतआह ॥ नहीति ॥ स्वयंजीवःस्वस्यांतिकेहियस्मान्नभवेत्तस्माज्जीवस्यांतिक इतिव्याख्येयमित्यर्थः । स्वयंजीवःस्वांतिकेकुतोनभवतीत्यत स्तस्यभेदसापेक्षत्वादित्याह ॥ वस्त्वंतरस्येति ॥ हियस्मात्वस्त्वं तरस्यवस्त्वंतरात्दूरत्वमंतिकत्वंवा । नतुतस्यैवतस्मादेव । अतोजीवःस्वयंस्वस्यांतिकेनभवतीत्यर्थः । यःपूर्वतपसोजातमितिमंत्रस्य योमुमुक्षुःपूर्वतपसोज्ञानरूपात्ब्रह्मणोजातंहिरण्यगर्भं किमपेक्षयापूर्वमित्यतआह । अद्भ्यःपूर्वमजायतेति । यःअद्भ्यःभूतेभ्यःपूर्व मजायत । तंप्रथमजंसर्वप्राणिहृदयगुहांप्रविश्यतिष्ठंतंभूतेभिर्भूतैःसहतिष्ठंतंयःपश्यति एतद्वैतदितिव्याख्यानमसत् । एतद्वैतदितिव चनानुसारेणयःपूर्वमितियच्छब्दस्यविष्णुपरत्वेनमुमुक्षुपरत्वाभावात् । नहिनचिकेतसामुमुक्षुस्वरूपंपृष्टं । तपश्शब्दस्यपरब्रह्म परत्वेएकस्यपूर्वमित्यस्यव्यर्थत्वाच्च । अद्भ्यःपूर्वइत्येतावतापूर्तेः । अद्भ्यःपूर्वंजातमित्यन्वयोपपत्त्याऽजायतेत्यस्यव्यर्थत्वात्अयुक्त त्वाच्च । यच्छब्दाध्याहारेणयोजनायांसएवदोषः । गुहाप्रविष्टत्वस्यविष्णुलिंगत्वस्योक्तत्वेनचतुर्मुखविशेषणत्वायोगाच्च । भूतानांहृ दयेअवस्थानाभावेनतैःसहतिष्ठंतमित्युक्त्ययोगाच्च । पूर्वमेकस्ययच्छब्दस्यविद्यमानत्वेनयोभूतेभिरितियच्छब्दस्यव्यर्थत्वात्

भाष्यं ॥ जीवाद्भेदेनज्ञातंहिब्रह्मयथावज्ज्ञातंभवति । जीवस्यांतिके । नहिस्वस्यस्वयंजीवोंतिकेभवति । वस्त्वंतरस्य[illegible]रत्वमंतिकत्वंवा ।

॥ ३४ ॥

प्रमाणविरोधाच्चेतिभावेनवाक्यभेदमंगीकृत्यप्रमाणेनमंत्रंव्याचष्टे ॥ अन्नामभ्यइति ॥ ननुभूतानामन्नामत्वंकथं । अन्नान्नो भूतविशेषणवाचकत्वादितिचेत् न । पंचीकरणपक्षेभूतविशेषस्यापिसर्वभूतात्मकत्वेनान्नान्नःसर्वभूतवाचकत्वात् । तर्हिअप् शब्दप्रयोगःकथमितिचेत् न । पार्थिवादिशरीरेषुअपांभूयस्त्वात् । यद्वाएतत्प्रमाणबलादेवान्नान्नःसर्वभूतवाचकत्वंज्ञा यते । भूतेभ्यःतदभिमानिभ्यः । शिवादपिअहंकारतत्वाभिमानिनः । अजायतेत्यस्यार्थोजनयामासेति । पूर्वाजातमित्युक्त्या नासत्पक्षेपूर्वशब्दस्यवैयर्थ्यमित्युक्तंभवति । चतुर्मुखमितिविशेष्योक्तिः । गुहांप्रविश्येत्येतत्चतुर्मुखपरमितिप्रतीतिनि रासायव्याचष्टे ॥ स्वात्मानंचेति ॥ अभिभवतिसर्वानित्यभिभूः । सर्वभूतैःसहपश्यतीत्यन्वयः । एतद्वैतदित्यस्यार्थ माह ॥ सएषइति ॥ तथाचजीवमंतिकादित्युक्तजीवसमीपस्थभगवत्स्वरूपप्रतिपादनायायंमंत्रःप्रवृत्तइतिभावः । नन्वेवं व्याख्यानेपिपूर्वमजातमितिविशेषणंव्यर्थं । व्यावर्त्याभावात् । नहिकश्चित्पूर्वंजातःपुनर्जायते । येनतत्सार्थकंस्यात् यःपूर्वमजातंचतुर्मुखंतपसोऽद्भ्यःपूर्वमजायतेत्यनन्वयश्चेत्यतआह ॥ यथेति ॥ इत्यादिनावाक्येनजाताः भगवन्मुखा दिनाजातत्वेनावगताइत्यर्थः । नतथाभगवतोब्रह्मापूर्वंजातएवजायते । ननुहिरण्यगर्भस्याद्भ्यःपूर्वंजननांगीकारेअद्भ्यःसंभूतोहि

भाष्यं ॥ अन्नामभ्यश्चभूतेभ्यस्तपोनाम्नश्शिवादपि । पूर्वंयोजनयामासपूर्वाजातंचतुर्मुखं । स्वात्मानंचगुहासंस्थंसर्वभूतैस्सहाभिभूः । यःपश्यतिसदाविष्णुस्सएषहृदिसंस्थितइतिच । यथामुखादिंद्रश्चाग्निश्चेत्यादिनाजाताएवेंद्रादयःकश्यपात्पुनर्जायंते नतथाभगवतोब्रह्मा । किंत्व जातमेवाभ्यःपूर्वमजायतजनयामास ।

रण्यगर्भइतिश्रुतिविरोधइतिचेत् । न । तद्वाक्यस्यब्रह्मांडांतःसृष्टिपरत्वात् । अस्यबाह्यसृष्ट्यपेक्षत्वादिति । अजायतेत्यस्यस्वय मुत्पन्नइत्यर्थत्वात्कथंजनयामासेतिव्याख्यानमित्यतोंतर्णीतणिचूत्वान्नानुपपत्तिरितिप्रयोगपूर्वमाह ॥ अजायतेति ॥ याप्रा णेनसंविशतीतिमंत्रःप्रसिद्धादितिपरइत्यनुपपन्नं । पितृसौमनस्यस्वर्ग्याग्निपरात्मनांत्रयाणामेवनचिकेतसापृष्टत्वेनादितिकथन स्यासंगतत्वात् । अतोविष्णुपरएवायंमंत्रः । नन्वेतदप्ययुक्तं । अदितिशब्दस्यदेवमातरिरूढत्वेनविष्णौस्त्रीलिंगांतादितिशब्दप्रयो गायोगात् । देवतामयीत्युक्तदेवतास्वरूपत्वायोगात् । प्राणेनप्राणस्वरूपेणेत्युक्तमुख्यप्राणस्वरूपत्वस्यासंभवाच्च । किंचगुहांप्र विश्यतिष्ठंतीमित्युक्तोगुहासंस्थःकिंविष्णुरन्योवा । नाद्यः । तस्ययाभूतेभिर्व्यजायतेतिउक्तभूतजन्यत्वासंभवात् । नद्वितीयः । प्रागुक्तविरोधादित्यतस्तंमंत्रंप्रमाणेनव्याचष्टे ॥ अदनादित्यादिना ॥ अदनाददितिरित्यनेनादितिशब्दोयोगेनविष्णुपरइत्युक्तं भवति । नचस्त्रीलिंगानुपपत्तिः । भगवतःस्त्रीरूपत्वस्यापिभावात् । ननुस्मृतौउत्तमोदेवताभ्यश्चेत्येतत्कस्यव्याख्यानमितिनप्र तीयतइत्यतोदेवतामयीतिपदव्याख्यानमितिभावेनतदनूद्यव्याचष्टे ॥ देवतेति ॥ मयटःप्राधान्यार्थकत्वादितिभावः । इदंच प्रसिद्धादितिपरत्वेनुपपन्नं । नचानेनदेवतास्वरूपत्वमुच्यतइतिवाच्यं । विशिष्टेविशिष्टाभेदस्यबाधात् । चैतन्यैक्यविवक्षायाम ॥ ३५ ॥

भाष्यं ॥ अजायतेति जज्ञेबहुज्ञमितिवदंतर्णीतणिचू । अदनाददितिर्विष्णुर्यःप्राणसहितःस्थितः । उत्तमोदेवताभ्यश्चसोत्मानंविविधात्मना । मत्स्यकूर्मादिरूपेणगुहासंस्थमजीजनत् । भूतैस्सहमहाविष्णुःपरमात्मायुगेयुगइतिच । देवतामयीदेवतोत्तमा ।

दितिदेवताशब्दयोर्लक्षणिकत्वापातात् । ननुप्राणेनसंविशतीत्यस्यप्राणसहितःस्थितइतिकथमर्थस्ततस्तस्यैप्रतीतेरित्यतःप्राणे नसंविशतीत्येतद्व्याचष्टे ॥ प्राणेनेति ॥ सहयोगेतृतीयेतिभावेनसहितइत्युक्तं । अनेनप्राणरूपेणेतिव्याख्यानमपास्तं । आदि तेःप्राणस्वरूपत्वस्यतेनाप्यनंगीकारात् । चैतन्यैक्यस्याप्रामाणिकत्वात् । संविशतीत्यस्यार्थःस्थितोभवतीति । ननुमत्स्यकूर्मादि रूपेणगुहासंस्थमजीजनदितिअनुपपन्नं । मत्स्यकूर्मादिरूपस्यत्वहिष्ठत्वेनगुहासंस्थत्वाभावा दित्यतोगुहांप्रविश्येतिवाक्यंव्याचष्टे ॥ गुहामिति ॥ स्वात्मानमितिविशेष्याध्याहरः । भूतैःसहेत्युक्तयाभूतेभिरितितृतीयानहेत्वर्थेत्युक्तंभवति । विविधं मत्स्यकूर्मा दिरूपेण । तथाचस्मृतौगुहासंस्थमित्येतत्आत्मानमित्यस्यविशेषणमितिनानुपपत्तिरितिभावः । अरण्योर्निहितोजातवेदाइतिमंत्रः प्रसिद्धाग्निपरइत्यसत् । तत्कथनस्यासंगतत्वादितिभावेनतंमंत्रंविष्णुपरतयाप्रमाणेनव्याचष्टे ॥सर्वज्ञइति॥ जातवेदाइत्यस्यार्थः सर्वज्ञइति । जातंवेत्तीतिजातवेदाः । अरण्योरित्यनुवादेनगुरुशिष्ययोरितिव्याख्यानं । निहितइत्यस्यार्थःसुभृतइति । जागृवद्भिरीड्यइत्यस्यार्थोजानद्भिःस्तूयतइति । नचैवंसत्यग्निशब्दानुपपत्तिः । तस्यप्रागेवभगवत्परतयाव्याख्यातत्वात् । गु रुशिष्ययोःकथमरणीशब्दवाच्यत्वमित्यतस्तद्व्युत्पादयति ॥ अर्यतइति । अर्यतेज्ञायतेणआनंदरूपो णश्चनिर्वृतिवाचकइत्यु क्तेः बलरूपोवा णकारोबलमितिश्रुतेः । मायावादिनस्तुयदेवेत्यादिकमेवव्याचक्षते । ब्रह्मादिस्थावरांतेषुवर्त्तमानंतत्तदु

भाष्यं ॥ प्राणेनसहितोभवति । गुहांप्रविश्यतिष्ठंतंस्वात्मानंभूतैस्सहविविधंजनयामास । सर्वज्ञोभगवान्विष्णुररण्योर्गुरुशिष्ययोः । सुभृ तःस्तूयतेनित्यंजानद्भिःपुरुषोत्तमइतिच । अर्यतेणआभ्यामित्यरणी ।

पाधिवशादब्रह्मवदवभासमानंसंसारि । परस्मात्ब्रह्मणोन्यदितिशंकापरिहारार्थमाह ॥ यदेवेति ॥ यदेवेहकार्यकारणोपाधिसमन्वितंसंसारधर्मवदवभासमानंस्वात्मस्थं तदमुत्रनित्यंविज्ञानघनस्वभावं संसारधर्मवर्जितंब्रह्म यच्चामुत्रामुष्मिन्नात्मनिस्थितंतदेवेहनामरूपकार्यकारणोपाधिमनुभाव्यमानंनान्यत् । तत्रैवंसत्यविद्ययामोहितःसन्यइहब्रह्मण्यनानाभूतेपरस्मादन्योहंमत्तोन्यत्परंब्रह्मेतिनानेवभिन्नमिवपश्यति समृत्योमृत्युंपुनर्जन्ममरणभावमाप्नोति । तस्मात्तथानपश्येत् । विज्ञानैकरसंब्रह्मैवाहमितिपश्येदितिवाक्यार्थः । प्रागेकत्वविज्ञानादाचार्यागमसंस्कृतेनमनसेदंब्रह्माप्तव्यं । आत्मैवास्तिनान्यदस्तीति आप्तेतुनानात्वप्रत्युपस्थापिकायाअविद्यायानिवृत्तत्वादिहब्रह्मणिनानास्ति । किंचनाणुमात्रमपिवस्तु । यहइहनानेवपश्यति समृत्योःमृत्युंगच्छत्येव स्वयमपिभेदमध्यारोपयन्नित्यर्थइति । तदसत् । चैतन्यैक्यस्याप्रामाणिकत्वात्प्रमाणविरुद्धत्वाच्चेतिभावेनश्रुतिव्याख्यानरूपंप्रमाणमेवोदाहरति ॥ यइति ॥ अनेनयदेवेहतदमुत्रेत्येतद्व्याख्यातं । प्रादुर्भावगइत्यनेनेहेत्यस्य भूम्यादावित्यर्थोवक्तव्यइतिसूचितं । तस्यैवार्थांतरंदेहादिषुचेति । सएवेत्युक्त्याश्रुतावेवकारोभिन्नक्रमइत्युक्तंभवति । चशब्दोवधारणार्थः । साक्षादित्यनेनसंबंध्यते । यदमुत्रतदनुइहेत्येतत्व्याचष्टे ॥ मूलरूपश्चेति ॥ आद्यश्चशब्दःप्रकृतत्वानुसंधानार्थः । द्वितीयोवधारणार्थः । सइत्यनेनसंबध्यते । नन्ववतारादिरूपस्यमूलरूपाभेदेमूलरूपस्यावताराभेदःसिद्धएव । नहियेनाभिन्नंतत्तेनभिन्नमितिशंकार्हं । अतोयदमुत्रतदन्विहेत्येतद्व्यर्थमितिचेन्न । तथासतित्वत्पक्षेपिवैयर्थ्यापातात् । संघातस्यचै

भाष्यं । यःप्रादुर्भावगोविष्णुर्देहादिषुचसंस्थितः । सएवमलरूपश्चसाक्षान्नारायणाभिधः । मलरूपश्चयोविष्णुःप्रादुर्भावादिगश्चसः ।

तन्यस्यनिर्विशेषचैतन्याभेदेनिर्विशेषचैतन्यस्यापितदभेदस्यसिद्धत्वात् । अस्मत्पक्षेतुइंद्रार्जुनादिवत्सर्वविशेषाभावज्ञापनार्थत्वेनसार्थक्यात् । अतएवात्यल्पविशेषदर्शिनामप्यनर्थःकथ्यते मृत्योःसमृत्युमित्युत्तरवाक्येनेतिभावेनतद्वाक्यंव्याचष्टे ॥ गुणतइति ॥ नानेत्यस्यार्थोविशेषमिति । क्वचिदंतरशब्दश्चविशेषस्यैववाचकइतिनानाशब्दपर्यायांतरशब्दस्यविशेषवाचकत्वस्मरणात् । गुणतःस्वरूपतइत्यस्य योग्यतयासंबंधः । इवशब्दार्थोत्यल्पमिति । अनेनपरमतेइवशब्दोव्यर्थःस्यादित्युक्तंभवति । अपिशब्देनाधिकविशेषदर्शिनस्तमोयांतीतिकिंवक्तव्यमितिसूचयति । मृत्योर्मृत्युमित्यस्यतात्पर्यंतमोंधमिति । पुनर्जन्ममरणभावमात्रस्यमिथ्याज्ञानफलत्वायोगात् । एवंयदेवेहेत्यनेनावतारादिरूपस्यमूलरूपस्यचविशेषशून्यतयाऽत्यंताभेदेभिहिते किमित्यंताभेदेन भेदाभेदःकिंनस्यादित्यतस्तज्ज्ञानिनामनर्थोक्तेरितिभावेनभेदाभेदज्ञानिनामनर्थोक्तिपरतयापिमृत्योःसमृत्युमितिवाक्यंव्याचष्टे ॥ भेदेति ॥ नानेवेत्यस्यार्थोभेदाभेदेति । अत्रावतारमूलरूपयोः ॥ १० ॥ इदानींमृत्योःसमृत्युंगच्छतीतिवाक्यंव्याचष्टे ॥ तथैवेति ॥ यथास्वरूपेषुभेदाभेददर्शिनस्तमःप्राप्तिस्तथैवेत्यर्थः । अनेन नानेवेतिइवशब्दउपमार्थतयापिव्याख्यातः । तेनविष्णुनाएतेषामवयवादीनांभेदविच्चेत्यनेन एवंधर्मान्पृथक्पश्यन्नित्येतदुक्तार्थं । उभयविदःभेदाभेदविदः । एवंनानेवेतीवश

भाष्यं० ॥ गुणतस्स्वरूपतोवापिविशेषंयोत्रपश्यति । अत्यल्यमपिमृत्वासतमोंधंयात्यसंशयं । भेदाभेदविदश्चात्रतमोयांतिनसंशयः । तथैवावयवानांचगुणानांचपरस्परं । क्रियाणांतेनचैतेषांभेदविच्चोभयंविदः । यांत्येवांधंतमोनात्रकार्याकाचिद्विचारणेतिच ।

49103

न्दोऽल्पार्थउपमार्थोभेदाभेदार्थश्चव्याख्यातः । तत्कुतइत्यतःसप्रमाणकंतत्समर्थयते ॥ **भवेदिति** ॥ विरुद्धयोर्धर्मयोःसंयोगे विवक्षिते एकविरोधिवाचकशब्दस्योपरिइवशब्दोभवेदित्यर्थः । उपमायांविवक्षितायांनानेवेतीवशब्दः नानाशब्दशिरःस्थइव शब्दइत्यर्थः । चशब्दादुपमाद्यर्थश्चेतिसमुच्चिनोति । किंचयदेवेहेत्यनेनैवजीवब्रह्मभेदस्यनिषिद्धत्वात्त्वत्पक्षेनेहनानेतिवाक्यंव्यर्थंस्यात् । ननुभवत्पक्षेपिव्यर्थं यदेवेहेत्यनेनात्यंताभेदमुक्त्वातत्रभेदाभेददर्शिनामनर्थोक्त्याभेदनिषेधस्यप्रागेवजातत्वादित्यतः पूर्वोत्तरवाक्यतात्पर्यमाह ॥ **प्रथममिति** ॥ भगवत्स्वरूपाणांमूलरूपावतारादिरूपाणांभेदनिषेधार्थमित्यर्थः । तदवयवादीनां भेदनिषेधोत्रक्रियतइतिकुतः ज्ञापकाभावादित्यतउक्तं किंचनशब्दादिति । किंचनशब्दस्यसर्वनामत्वेनप्रकृतवाचित्वात् । आसीनोदूरंव्रजतिशयानइत्यादिनावयवानां महांतंविभुमात्मानमित्यादिनागुणानां यःपूर्वंतपसोजातमद्भ्यःपूर्वमजायतेत्यादिनाकर्मणांचप्रकृतत्वादितिभावः ॥ **भेदनिषेधार्थमिति** ॥ इहब्रह्मणि किंचन प्रकृतमवयवादिकं नानाभिन्नंनास्तीत्युक्तेऽवयवादीनांभेदएवनिषिध्यते । सविशेषणेहीतिन्यायात् । लोहितोष्णीषाऋत्विजःप्रचरंति नजीर्णमलवद्वासाःस्नातकःस्यादित्यादौदर्शनाच्च । अन्यथाधर्माणांस्वरूपतएवनिषेधेनानेतिव्यर्थंस्यादितिभावः । ननुयदिनेहनानेतिवाक्यंभगवदवयवादिधर्माणांभेदनि

भाष्यं० ॥ भवेदेकत्रसंयोगइवशब्दोविरुद्धयोः । धर्मयोरुपमायांवास्वल्पत्वेवाविवक्षितइतिशब्दनिर्णये । अतोनानेवेतीवशब्दोत्यल्पविषयो भेदाभेदविषयश्च । प्रथमंयइहनानेवपश्यतीतिस्वरूपभेदनिषेधार्थं । नेहनानास्तिकिंचनेतिकिंचनशब्दादवयवानांगुणानांक्रियाणांचपरस्परंतद्वता चभेदनिषेधार्थं ।

षेधार्थं तर्हिएवंधर्मानितिवाक्यंव्यर्थंस्यात् । तत्राप्यवयवादिधर्माणांभेददर्शिनामनर्थोक्त्यातन्निषेधादित्यतआह ॥ **भेदेति** ॥ अवयवानामित्यारभ्यतद्वताचेत्यंतमत्रानुवर्तते । मृत्योस्समृत्युंगच्छतीत्यत्रावयवादीनांभेदाभेदएवनिषिध्यते । तद्दर्शिनामेवानर्थोक्तेः । नतुभेदः । तद्दर्शिनामनर्थानुक्तेः । तथाचनेहनानेतिभेदनिषेधप्रतिज्ञानुपपन्नेत्याशंकांनिवर्तयितुमित्यर्थः । एवंधर्मानितिवाक्यस्योक्तात्पर्यकत्वाप्रतीतेःकथमेतदित्यतोयथोदकमितिदृष्टांतवाक्यव्याख्यानपूर्वकंतद्व्याचष्टे ॥ **पर्वतेष्विति** ॥ अनेनधर्मदर्शिनामनर्थोक्त्याधर्मनिषेधएवात्राभिप्रेतइत्यसदित्युक्तंभवति । पृथगित्यस्यवैयर्थ्यापातात् । विजानतोमुनेरात्मास्वरूपमेवंब्रह्माभिन्नंभवतीतिनिरासायैवंमुनेर्विजानतआत्माभवतीत्येतद्व्याचष्टे ॥ **विजानतइति** ॥ आत्माब्रह्मीत्यर्थः । तादृगेवेत्यनेनदृष्टांतवाक्यस्थंतादृगितिपदंअत्रअनुवर्ततइत्युक्तंभवति । एवकारव्यावर्त्यमाह ॥ **नत्विति** ॥ वायुरपीत्यध्याहृतापिशब्दसूचितकैमुत्यमाह ॥ **किम्वन्यइति** ॥ अन्येजीवास्तादृशाएवभवंति । नतुसएवभवंतीतिकिमुवक्तव्यमित्यर्थः । वायोःसंसारितयासादृश्यमात्रप्राप्तावपिमुक्तस्यतदैक्यप्राप्तिःकिंनस्यादित्याशंकांपरिहरन्श्रुतेःस्वकृतंव्याख्यानंप्रमाणेनद्रढयति ॥ **सर्वेषामिति** ॥ अत्रबहुवचनश्रवणाद्विजानतइत्येकवचनंसमुदायाभिप्रायं । वायुर्ब्रह्मा चशब्दोपिशब्दार्थः । वायोस्तद्रूपत्वा

भाष्यं० ॥ भेदाभेदएवनिषिध्यतेनतुभेदइत्याशंकांनिवारयितुंएवंधर्मान्पृथक्पश्यन्नितिभगवद्धर्माणामवयवगुणकर्मणांभेददर्शनेपृथग्दोषमाह । पर्वतेपुदुर्गेशिखरेवृष्टमधोविधावति । एवंविष्णोश्चधर्मान्पृथक्पश्यन्नंधंतमोविधावति । विजानतोमुनेरात्मावायुरपितादृगेवभवति । नतुसएवभवति । किम्वन्येजीवाः । सर्वेषांज्ञानिनामात्मादेवानांचविशेषतः । मुक्तोवायुश्चसादृश्यमेवविष्णोस्तुगच्छति । नतुतद्रूपतांयातिकिम्वन्येदेवमानुषाः ।

भावेपिअन्येषांतत्किंनस्यादित्यतआह ॥ आभासेति ॥ केचनसाक्षादाभासाः केचनाभासाभासाइत्यर्थः ॥ इतिद्वितीयाध्यायस्यप्रथमावल्ली ॥ २ ॥ १ ॥ ओं ॥ स्वयंभूर्ब्रह्मापरांचिपराङ्खानिविषयासक्तानि । लोकेंद्रियस्वरूपकथनमेतत् । खानिइंद्रियाणिव्यतृणात् कात्कृतवान् । विषयव्यावृत्तान्यकरोत् । तस्माद्विषयव्यावृत्तेंद्रियत्वात्पराङ्नपश्यति । विषयासक्तोनभवतिकिंत्वंतरात्मनिपश्यति । अंतरात्मन्येवासक्तोभवतीत्यर्थः । यतएवमतःकश्चिद्धीरोअमृतत्वंमोक्षमिच्छन्आवृत्तचक्षुर्विषयव्यावृत्तेंद्रियःसन्प्रत्यगात्मानमंतरात्मानमैक्षत्अपश्यत् पश्येदित्यर्थः ॥ १ ॥ नसर्वथामुमुक्षुर्विषयप्रमादीस्यादितिभावेनोक्तमेवविवृणोति ॥ पराचइति ॥ यद्वाविषयव्यावृत्तेंद्रियाणांफलकथनेनतदेवसमर्थ्यते ॥ पराचइति ॥ बालाअविवेकिनःपराचोबहिष्टान्कामाननुयंति । अतस्तेवititतस्यसर्वदेशकालेषुविस्तृतव्यापारस्यमृत्योर्यंमस्यपाशंमरणमितियावत्यंतियांति । अथतस्मात्धीराअमृतत्वंमोक्षंध्रुवंनित्यंविदित्वाइहाध्रुवेषुविषयेषुनप्रार्थयंते ॥ २ ॥ एवमुक्तोनचिकेताःस्वयंविषयव्यावृत्तेंद्रियत्वात्पुनरपिजीवनियामकभगवत्स्वरूपंपृच्छति ॥ येनेति ॥ येन सर्वेवेदाइत्याद्युक्तमाहात्म्यवता । एतेनैवऋतंपिबंतावित्याद्युक्तमाहात्म्यवताविष्णुनैव । जीवोरूपादिकंविजानाति यच्चात्रमुक्तौपरिशिष्यते तदेतत्किं कैर्विशेषणैर्विशिष्टमित्यर्थः ।

भाष्यं० ॥ आभासाभासरूपास्तुवायोर्देवस्यसर्वेशइतिभविष्यत्पर्वणि ॥ २ ॥ १ ॥

ओं । परांचिखानिव्यतृणात्स्वयंभूस्तस्मात्पराक्पश्यतिनांतरात्मन् । कश्चिद्धीरःप्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ॥ १ ॥ पराचः कामाननुयंतिबालास्तेमृत्योर्यंतिविititतस्यपाशं । अथधीराअमृतत्वंविदित्वाध्रुवमध्रुवेष्विहनप्रार्थयंते ॥२॥ येनरूपंरसंगंधंशब्दान्स्पर्शाश्चमैथुनान् ।

परिहारमाह ॥ एतद्वैतदिति ॥ तत्त्वत्पृष्टंजीवनियामकभगवत्स्वरूपंएतद्वक्ष्यमाणविशेषणविशिष्टं वैप्रसिद्धमित्यर्थः ॥ ३ ॥ तदेवाह ॥ स्वप्नांतमिति ॥ अत्रस्वप्नांतशब्दःस्वप्नसुषुप्त्युभयाभिप्रायेण । येनप्रेरितोजीवः । उभौ तस्यैवविवरणं स्वप्नाख्यौतःस्थानंस्वप्नांतःतं । अंतःस्थानंस्थलंवासःप्रदेशइतिचोच्यतइत्यभिधानात् । जागरितांतंच जागरितस्थानंचपश्यति तंमहांतंपरममहत्त्वोपेतं अतएवविभुमात्मानंमत्त्वाधीरोनशोचति ॥ ४ ॥ किंचयइदंइमंमध्वदंसुखभोक्तारं मध्वित्यानंदउद्दिष्टइतिवचनात् । भूतस्यभव्यस्यवर्तमानस्यचेशानमात्मानंभगवंतं जीवमंतिकात्जीवस्यांतिकेवेद सततोभगवज्ज्ञानसामर्थ्येनान्यविषयकभयाभावात्नविजुगुप्सतेआत्मानंगोप्तुंनेच्छति ॥ ५ ॥ जीवस्यांतिकेविद्यमानंहृद्गतंभगवत्स्वरूपंकीदृशमित्याकांक्षायांतत्स्वरूपं वक्तुंपुनःप्रतिजानीते ॥ एतद्वैतदिति ॥ तत्जीवस्यांतिकेविद्यमानंभगत्स्वरूपं एतद्वै यःपूर्वमजातंचतुर्मुखंतपसस्तपोनाम्नश्रिशवात्अद्भ्योऽन्नामकभूतेभ्यश्चपूर्वमजायतजनयामास । यश्चहृद्गुहांप्रविश्यतिष्ठंतंस्वात्मानंभूतैर्भिर्भूतैःसहव्यपश्यतपश्यति । एतच्छब्दस्यपूर्वेणान्वयः ॥ ६ ॥ किंचयादेवतामयीदेवतोत्तमा अदनाददितिःस्त्रीरूपाभगवती प्राणेनमुख्यप्राणेनसहिता संविशतिदेहादौस्थिताभवति याचगुहांप्रविश्यतिष्ठंतींस्वात्मानंभूतैःसहविविधंमत्स्यकूर्मादिरूपेणाजायतजनयामास । एतद्वैतदि

उप० ॥ एतेनैवविजानातिकिमत्रपरिशिष्यते । एतद्वैतत् ॥ ३ ॥ स्वप्नांतंजागरितांतंचोभौयेनानुपश्यति । महांतंविभुमात्मानंमत्त्वाधीरो नशोचति ॥४॥ यइदंमध्वदंवेदात्मानंजीवमंतिकात् । ईशानंभूतभव्यस्यनततोविजुगुप्सते । एतद्वैतत् ॥५॥ यःपूर्वंतपसोऽजातमद्भ्यःपूर्वमजायत । गुहांप्रविश्यतिष्ठंतंयोभूतेभिर्व्यपश्यत । एतद्वैतत् ॥६॥ याप्राणेनसंविशत्यदितिर्देवतामयी । गुहांप्रविश्यतिष्ठंतींयाभूतेभिर्व्यजायत । एतद्वैतत् ॥ ७ ॥

त्यन्वयः ॥ ७ ॥ किंचजातंवेत्तीतिजातवेदाःसर्वज्ञो गर्भिणीभिर्गर्भोयथासुधितःसुभृतस्तथारण्योरर्यतेणःसुखरूपोबलरूपोवाभगवान्आभ्यामित्यारणीगुरुशिष्यौतयोर्निहितःसुभृतोजागृवद्भिर्जानद्भिर्हविष्मद्भिःपूजासाधनद्रव्यवद्भिश्चमनुष्यैर्दिवेदिवेप्रतिदिनंईड्यःस्तुत्योयोग्निरदनादग्निनामाभगवान् एतद्वैतत् ॥ ८ ॥ किंचसूर्यःसृष्टिकालेयतउदेति यत्रचप्रलयकालेस्तमदर्शनंच गच्छति तंसर्वेदेवाअर्पिताःप्राप्ताःतद्भगवत्स्वरूपंकश्चननात्येत्येव ॥ ९ ॥ गुहांप्रविश्यतिष्ठंतंयोभूतेभिर्व्यपश्यत । गुहांप्रविश्यतिष्ठंतींयाभूतेभिर्व्यजायतेत्यनेनभगवद्रूपाणांभगवतासहभेदप्राप्तावाह ॥ यदेवेति ॥ इहभूम्यादौदेहादौचयद्रूपंवर्तते तदेवामुत्रवैकुंठादावप्यस्ति । अभेदेपिइंद्रार्जुनादाविवज्ञानादौविशेषोनमंतव्यइतिभावेनाह ॥ यदमुत्रेति ॥ यद्रूपंवैकुंठादावस्ति । तदेवभूम्यादावस्ति । नतत्रज्ञानादावत्यल्पोपिविशेषोज्ञेयइतिभावः । कुतोनज्ञेयइत्यतस्तज्ज्ञानिनामनर्थमाह ॥ मृत्योरिति ॥ यइहमूलरूपावताररूपादौनानेवअत्यल्पमपिविशेषंपश्यतिसमृत्योरनंतरंमृत्युंनरकमंधंतमःप्राप्नोति । यदेवेहतदमुत्रेतिभगवद्रूपाणामत्यंताभेदोक्तिरयुक्ता । भेदाभेदस्यापिसंभवादित्यतोभगवत्स्वरूपेषुभेदाभेदनिषेधायतद्दर्शिनांवानर्थमाह ॥ मृत्योरिति ॥ यइहभगवत्स्वरूपेषु । नानेव नानाशब्दोभेदवाची । मुक्तोपसृप्यव्यपदेशादित्यादाविवभावप्रधानत्वात् । इवशब्दस्तुत

उप० ॥ अरण्योर्निहितोजातवेदागर्भइवसु(धि)भृतोगर्भिणीभिः । दिवेदिवईड्योजागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः ॥ ८ ॥ यतश्चोदेति सूर्योस्तंयत्रचगच्छति । तंदेवास्सर्वेअर्पितास्तदुनात्येतिकश्चन । एतद्वैतत् ॥ ९ ॥ यदेवेहतदमुत्रयदमुत्रतदन्विह । मृत्योस्समृत्युमाप्नोतियइहनानेवपश्यति ॥ १० ॥

द्धिरुद्धाभेदाभिधायकः । तस्ययद्वाचकशब्दशिर(स्त्वं)स्कत्वं तद्विरुद्धाभिधायकत्वस्वाभाव्यात् । तथाचभेदाभेदंपश्यति । समृत्योर्मृत्युंतमःप्राप्नोति । अतोनतत्रभेदाभेदइत्यर्थः ॥ १० ॥ इदंचस्वमनस्येवस्थापनीयंनान्यस्मैब्रूयादित्याह ॥ मनसैवेति ॥ यद्वा तंदेवाःसर्वेअर्पिताइत्युक्तभगवत्प्राप्तिसाधनंकिमित्यतआह ॥ मनसेति ॥ श्रवणादिसंस्कृतेनमनसेत्यर्थः । नकेवलंभगवदवतारादीनामेवभगवताभेदाभावः किंनामप्रागुक्तभगवदवयवगुणकर्मादीनामपिपरस्परंभगवताचभेदोनास्तीत्याह ॥ नेति ॥ इहब्रह्मणिकिंचनावयवगुणकर्मादिकंपरस्परंभगवताचनानाभिन्नंनास्तीत्यर्थः । इहब्रह्मणिकिंचनावयवादिप्रयुक्तंनानानानात्वं भेदोनास्तीत्यर्थः । ननुकुतएवंभगवदवयवादीनांपरस्परंभगवताचभेदाभावः घटादाविवाभेदेपिभेदःकिंनस्यादित्यतोभेदाभेदज्ञानिनामनर्थमाह ॥ मृत्योरिति ॥ इवशब्दउपमायामपिवर्तते । यथाभगवत्स्वरूपेषुभेदाभेदज्ञानीतमःप्राप्नोति तथैवयइहभगवदवयवगुणकर्मादिषुपरस्परंभगवताचनानेवभेदाभेदंपश्यति समृत्योर्मृत्युंतमोगच्छति । अतोनतत्रभेदाभेदइत्यर्थः ॥ ११ ॥ किंचांगुष्ठमात्रोंगुष्ठपरिमाणः । हृद्यवकाशापेक्षयांगुष्ठमात्रत्वोक्तिः । पुरुषःपूर्णषड्गुणआत्मनिमध्यदेहेहृद्गुहायांतिष्ठति । ईशान इत्याद्युक्तार्थं ॥ १२ ॥ धूमानावृताग्निरिवप्रकाशरूपइत्यर्थः । सएवाद्यवर्तते सएवश्वोपिवर्तिष्यते । अनाद्यनंतकालेपिसदावर्ततइत्यर्थः ॥ १३ ॥ ननुमृत्योःसमृत्युंगच्छतीत्यनेनभगवदवयवादीनांभगवतापरस्परंचभेदाभेदएवनिषिध्यते । नतुभेदः ।

उप० ॥ मनसैवेदमाप्तव्यंनेहनानास्तिकिंचन । मृत्योस्समृत्युंगच्छतियइहनानेवपश्यति ॥ ११ ॥ अंगुष्ठमात्रःपुरुषोमध्यआत्मनितिष्ठति । ईशानोभूतभव्यस्यनततोविजुगुप्सते । एतद्वैतत् ॥१२॥ अंगुष्ठमात्रःपुरुषोज्योतिरिवाधूमकः । ईशानोभूतभव्यस्यसएवाद्यसउश्वः । एतद्वैतत् ॥१३॥

तद्दर्शिनामनर्थानुक्तेः । अतोनेहनानेतिकथंभेदाभावउक्तइत्यतोभेददर्शिनामप्यनर्थवक्तुंप्रतिजानीते ॥ यथेति ॥ यथापर्वतेषु दुर्गेशिखरेवृष्टमुदकंअधोविधावति । एवंविष्णोर्धर्मान्पृथक्विष्णुनापरस्परंचभेदेनपश्यन्तानेव पृथग्दृष्टधर्मानेव धर्मपार्थक्य दर्शनानंतरमेवेतियावत् । विधावतिअंधंतमइत्यर्थः ॥ १४ ॥ ननुयथाभगवत्स्वरूपाणांभगवताभेदाभावस्तथामुक्तानामपिभग वताभेदाभावःकिंनेत्याह ॥ यथेति ॥ हेगोतमयथाशुद्धेउदकेआसिक्तंशुद्धमुदकंतादृगेवभवतिनतुतदेव । अन्यथावृद्धिदर्श नासंभवात् । एवंविजानतोमुनेरात्मास्वामीवायुरपिमुक्तःसन्तादृगेवभगवत्सदृशएवभवति । नतुसएव । किमन्येजीवाइत्यर्थः ॥ १५ ॥ द्वितीयाध्यायेप्रथमावल्ली ॥ २ ॥ १ ॥ पुरमेकादशद्वारमित्यस्यैकादशद्वारमिदंशरीराख्यंपुरमवक्रचेतसोऽजस्य ब्रह्मणएव । यस्येदंशरीरंतंपुरस्वामिनंपरमेश्वरंअनुष्ठायध्यात्वानशोचतीतिव्याख्यानमसत् । शरीरस्यजीवाभिमततयाजीवपु रत्वेनब्रह्मपुरत्वाभावात् । जीवब्रह्मैक्यस्यबाधितत्वात् । यस्येदंशरीरंतंपुरस्वामिनमित्यध्याहारप्रसंगाच्च । संभवत्येकवाक्यत्वे वाक्यभेदकल्पनायोगाच्चेतिभावेनतद्वाक्यमितिशब्दाध्याहारेणयथावद्व्याचष्टे ॥ इदमिति ॥ ननुभगवदधीनमित्यस्यार्थस्यश्रु तावदर्शनात्कथमेवंव्याख्यानमित्यतस्तत्प्रदर्शनपूर्वकमनुष्ठायेत्युक्तंविवृणोति ॥ अजस्येति ॥ तथाचाजस्येतिषष्ठ्यर्थएवभग

उप० ॥ यथोदकंदुर्गेवृष्टंपर्वतेषुविधावति । एवंधर्मान्पृथक्पश्यंस्तानेवानुविधावति ॥ १४ ॥ यथोदकंशुद्धेशुद्धमासिक्तंतादृगेवभवति । एवं मुनेर्विजानतआत्माभवतिगोतम ॥ १५ ॥ इतिद्वितीयाध्यायस्यप्रथमावल्ली ॥ २ ॥ १ ॥

भाष्यं० ॥ ओं । इदंपुरंभगवदधीनमित्यधिष्ठाय । अजस्येदंपुरमितिस्थितिंकृत्वा ।

वदधीनमित्यनेनवर्णितइतिभावः । स्थितिंकृत्वेत्यनेनानुष्ठायेत्यस्यध्यात्वेतिव्याख्यानमपदार्थत्वादसदित्युक्तंभवति । अविद्या कामकर्मादिबंधनैर्विमुक्तोभवति । विमुक्तश्चसन्विमुच्यतेपुनश्चशरीरंनगृह्णातीतिव्याख्यानमसत् । शरीराग्रहणस्यविमोचनप दार्थत्वाभावात् । अतःपूर्वंविमुक्तएवपश्चान्मुच्यतइतिव्याख्येयं । नन्वेतदप्ययुक्तं । संसारदशायांमुक्तत्वाभावात् । मुक्तस्यमो चनासंभवाच्चेत्यतःप्रमाणेनतद्यथावद्व्याचष्टे ॥ विमुक्तइति ॥ पूर्वंमुक्तेः । मुख्यतइत्युक्तंविवृणोति । दुःखेति ॥ १ ॥ हंस इतिमंत्रंविप्रतिपत्तिनिरासायप्रमाणेनव्याचष्टे ॥ नित्यमिति ॥ आधिक्यार्थकानुस्वारार्थोनित्यमिति । हेत्यस्यार्थोहीनइति । ओहाक्त्यागइतिधातोः । अखिलैर्दोषैरित्यस्ययोग्यतयासंबंधः । सइत्यस्यार्थःसाररूपइति । एतेनहंतिगच्छतीतिहंसइतिव्या ख्यानंप्रमाणविरुद्धत्वादपास्तं । दिव्यादित्यात्मनासीदतीतिशुचिषदितिव्याख्याननिरासायाह ॥ वायुस्थइति ॥ शुचिर्वायुस्त त्रसीदतीतिशुचिषत् । वसुर्वाय्वात्मनांतरिक्षेसीदतीत्यंतरिक्षसदितिव्याख्याननिरासायाह ॥ वरसुरिति ॥ उत्तमसुखरूपइ त्यर्थः । स्वित्यानंदःसमुद्दिष्टइत्युक्तेः । वशब्दोवरत्ववाची । होताग्निरितिव्याख्यानमसदितिभावेनाह ॥ होतेति ॥ सर्वेंद्रिय विषयहोतृत्वादित्यर्थः । वेद्यांसीदतीतिवेदिषदितिपदार्थमभिप्रेत्यतात्पर्यमाह ॥ वेद्यामिति ॥ अतिथिःसोमःसन्द्रोणकलशे सीदतीतिदुरोणसदितिव्याख्याननिरासायअतिथिशब्दार्थतावदाह ॥ अत्यन्नइति ॥ अतिशयितान्नइत्यर्थः । चशब्दएवार्थः ।

भाष्यं० ॥ विमुक्तोनिरभीमानात्पूर्वमेवापरोक्षवित् । मुख्यतोमुच्यतेपश्चादुःखाद्याभासहानतइतिचानित्यंहीनोखिलैर्दोषैस्साररूपोयतोहरिः । हंसइत्युच्यतेतस्माद्वायुस्थश्शुचिषत्स्मृतः । वरसुर्वसुरित्युक्तस्सएवाप्यंतरिक्षगः । होतासर्वेंद्रियादिस्थोवेद्यांपूज्यश्चवेदिषत् । अत्यन्नश्चातिथिःप्रोक्तो

कथमस्माच्छब्दादयमर्थोलभ्यतइत्यतस्थशब्दार्थमाह ॥ यस्मादिति ॥ उच्यते अन्नंथमितिच्छंदोगश्रुताविति शेषः । अतिशब्दश्चातिशयार्थकःप्रसिद्धएवेतिभावः । इदानींदुरोणसदित्यस्यार्थमाह ॥ सइति ॥ द्रोणकलशेस्थितइतिशेषः । स्थितइत्यस्य सप्तम्यंततयात्रापिसंबंधोवा । द्रोणेस्थितंदुरोणं । तच्चयोग्यतयासोमएवतत्रसीदतीतिदुरोणसदित्यर्थः । नृषद्वरसदित्यस्यार्थमाह ॥ नृष्विति ॥ वरेष्वित्यनुवादेनदेवेष्वितिव्याख्यानं । अपिशब्दात्स्थितइत्यनुकर्षः । तुशब्दोनरापेक्षयाविशेषद्योतकः । ऋतसदित्यस्यार्थः ऋतरूपइति । याथार्थ्यनियमादित्यर्थः । स्थितइत्यनुवर्तते । व्योमसदित्यस्यार्थमाह ॥ व्योमाख्येति ॥ प्रकृतौव्योमशब्दंनिर्वक्ति ॥ व्योतामिति ॥ अब्जागोजाऋतजाअद्रिजाइत्यनेनब्रह्मणःशंखशुक्तिमकरादिसर्वात्मकत्वमुच्यतइतिव्याख्याननिरासायअब्जागोजाऋतजाअद्रिजाइत्यभेदोक्तौनिमित्तमाह ॥ अब्जेति ॥ अब्जाश्शंखादयः गोजाःव्रीहियवादयः अद्रिजानद्यादयः आस्तेयतइतिशेषः । अब्जादिकःअब्जाइत्यादिनामकः । शुचिषदित्यादिनासर्वत्रावस्थितभगवत्स्वरूपकथनादत्रापितत्तत्स्थितत्वेनैवतदभेदोक्तिरितिव्याख्येयमितिभावेनैवमित्युक्तं । ऋतजाइत्यस्यार्थमाह ॥ तथैवेति ॥ ऋतेषुमुक्तेषुनियामकतयाजातइतिऋतजाइतिशेषः । अर्थविशेषकथनायैवक्रमोल्लंघनं । कथंमुक्तानांऋतत्वमित्यतआह ॥ गताइति॥ ऋगताविति धातोरित्यर्थः । विष्णुमित्यस्ययोग्यतयासंबंधः । अब्जादिरूपेणसर्वात्मापिसन्नृतमवितथस्वभावइतिव्याख्याननिरा

भाष्यं० ॥ यस्मादन्नंथमुच्यते । सद्रोणकलशेसोमेस्थितउक्तोदुरोणसत् । नृषुस्थितश्चदेवेषुवरेष्वपिसएवतु । ऋतरूपेतथावेदेव्योमाख्यप्रकृतावपि । व्योतंजगदिदंयस्यांसाव्योमश्रीरुदाहृता । अब्जगोजाद्रिजेष्वेवमास्तेसोब्जादिकस्ततः । तथैवर्तेषुमुक्तेषुगतास्तेविष्णुमित्यृताः ।

सायऋतमित्यस्यार्थमाह ॥ वेदैरिति ॥ ऋतशब्दोवेदवाचीत्युक्तं । वेदाभेदस्यबाधितत्वात् वेदैःप्रोक्तइत्युक्तं । वाच्यवाचकयोरभेदव्यपदेशस्यअयंवैलोकःप्रथमामहानाम्नीत्यादौदृष्टत्वात् । अब्जाइत्यादिवत्वेदस्थत्वात्वेदाभेदोक्तिरित्यंगीकारेऋतसदित्यनेनपुनरुक्त्यापातः । देवताधर्मादिनिरासायमुख्यतयेत्युक्तं । एवशब्देनपरोक्तार्थव्यावृत्तिः । चशब्दःपूर्वोक्तविशेषणसमुच्चायकः । बृहत्महत् सर्वोपादानत्वादितिव्याख्याननिरासायाह ॥ बृहदिति ॥ बृहच्चेतिचशब्दान्वयः । पूर्णगुणत्वादेवेत्येवशब्दान्वयः । तेनपरोक्तहेतुनिरासः । नन्वादित्यपरएवायंमंत्रः । असौवैदूरोहोयोसौतपतीत्युक्त्वाहंसःशुचिषदित्येषवैहंसः शुचिषदित्यादिश्रुतावुक्तत्वात् । हंसइतिहंसाःसूर्यस्यरश्मयइत्युक्तत्वाच्चेतिचेन्न । आदित्यांतर्गतभगवत्परत्वेनाविरोधात् । नप्राणेनेत्यस्यप्राणेनापानेनचक्षुरादिनावामर्त्योनजीवति । अतस्तदितरेणजीवोजीवति । यस्मिन्जीवेएतावुपाश्रितावितिव्याख्यानमसत् । प्राणापानादिवत्जीवस्यापिजीवनहेतुत्वाभावात् । यथाश्रुतोपपत्तौचक्षुराद्युपलक्षणायोगाच्च । अतोत्रप्राणापानात्मकमुख्यवायोरेवजीवनहेतुत्वंनिषिध्यविष्णोरेवतद्धेतुत्वमुच्यते । नन्वेतदप्ययुक्तं । मुख्यप्राणस्यजीवनहेतुत्वस्य यत्प्राप्तिर्यत्परित्यागउत्पत्तिर्मरणंतथेत्यादिप्रमाणसिद्धत्वादित्यतस्तद्व्याचष्टे ॥ नकेवलमिति ॥ केवलैवशब्दाभ्यामन्यनिरपेक्षतामाह । तथाचश्रुतौस्वातंत्र्येणजीवनहेतुत्वंनिषिध्यतइतिभावः । तर्हिकीदृशश्चेतनविधारकइतिभावेनपृच्छति ॥ किंत्विति ॥ तदुत्तरत्वेनय

भाष्यं० ॥ वेदैर्मुख्यतयाप्रोक्तऋतमित्येवचोच्यते । बृहत्पूर्णगुणत्वाच्चसएवपुरुषोत्तमः । नकेवलंप्राणएवचेतनानांविधारकः । किंतु

स्मिन्नेतावुपाश्रिताविति वाक्यतात्पर्यमाह ॥ विष्णुमिति ॥ यस्मिन्नेतावित्येतत् इतरेणजीवंतीत्यत्रहेतुरितिभावेनइतरेणत्वितिवाक्यंतात्पर्यतोव्याचष्टे ॥ अतइति ॥ अग्निर्यथैकएवप्रकाशात्मासन् भुवनमिमंलोकं प्रविष्टोरूपंरूपंप्रति दार्वादिदाह्यभेदं प्रति प्रतिरूप स्तत्र स्वयंप्रतिरूपवान् दाह्यभेदैर्बभूव । तथासर्वभूतांतरात्माएकएवदार्वादिष्विवसर्वदेहंप्रतिप्रविष्टत्वात्प्रतिरूपो बभूव । बहिश्चस्वेनाविकृतेनरूपेणाकाशवत् । तथान्योदृष्टांतोवायुर्यथैकइत्यादि । प्राणात्मनादेहेष्वनुप्रविष्टः । रूपंरूपंप्रतिरूपे त्यादिसमानमित्यस्मिन्मंत्रद्वयेआत्मैकत्वमुच्यतइत्यसत् । यदेवेहतदमुत्रेत्यादिनाबहुशस्तस्योक्तत्वेनपुनरुक्त्यापातात् । नचानेकतार्किकबुद्धिविचालितांतःकरणानांप्रमाणोपपन्नमप्यात्मैकत्वविज्ञानंअसकृदुच्यमानमपिऋजुबुद्धीनांचेतसिनाधीयतइतितत्प्रतिपादनेआदरवतीश्रुतिःपुनःपुनराहेतियुक्तं । आत्मैकत्वस्याप्रामाणिकत्वात् । नतावत्तत्रप्रत्यक्षं । चेष्टालिंगेनपरात्मसिद्धौतातोभेदस्यैवस्वस्मिन्ग्रहणेनतदेकत्वग्राहिप्रत्यक्षाभावात् । विमतानिशरीराणिदेवदत्तस्यैवभोगायतनानिशरीरत्वादित्यनुमानं । विमतानिकलत्राणिदेवदत्तस्यैवभोगायतनानिकलत्रत्वादित्युपहासास्पदाभाससमानयोगक्षेमत्वादुपेक्ष्यं । आगमाश्चान्यथाव्याख्याताइतिभावेनाग्निर्यथैकइतिमंत्रद्वयंप्रमाणेनैवान्यथाव्याचष्टे ॥ अग्निरिति ॥ अग्निर्देवतारूपः । लोकेष्वित्यनेनभुवनमिति जात्येकवचनमित्युक्तंभवति । तेनभुवनमिमंलोकमितिव्याख्यानमपास्तं । एकइत्यस्यसावधारणत्वमभिप्रेत्यान्योनविद्यतइत्या

वेदेशी०
भाष्यार्थः
२ । २

भाष्यं० ॥ विष्णुंसमाश्रित्यप्राणोजीवान्बिभर्त्ययं । अतोमुख्याश्रयोविष्णुश्चेतनानांस्वतंत्रतः । अग्निर्यथैकोलोकेषुप्रविष्टोन्योनविद्यते । पाकादिकर्ता

॥ ४२ ॥

हापाकादिकर्तेतिशेषोक्तिः।अनेनाग्निर्यथैकोभुवनंप्रविष्टइत्येतद्व्याख्यातं।पूर्वोक्ताग्निरेवबभूवेत्यत्रकर्तेतिप्रतीतिंनिवारयन् रूपंरूपमित्येतद्व्याचष्टे ॥ अथापीति ॥ प्रतिरूपकाः प्रतिबिंबभूताः । श्रुतावेकवचनप्रयोगोजात्यभिप्रायेणेतिबहुवचनप्रयोगः । वायुर्यथैकइतिदृष्टांतवाक्यंव्याचष्टे ॥ एवमिति ॥ एवंशब्दोदृष्टांतांतरत्वज्ञापकः । यथेत्यनुवर्तते । अपिशब्दो लोकेषुप्रविष्टइत्यस्यानुकर्षणार्थः । वायुरेकएवेतिशेषः । नन्वचेतनवायुरेवनास्ति। प्रमाणाभावादित्यतउक्तं। स्पर्शगम्यइति।एतच्छंकापरिहारार्थमेवप्राक्एतेप्रत्यक्षसिद्धाइत्युक्तं । स्पर्शगुणानुमेयइत्यर्थः । त्वगिंद्रियव्यापारानंतरमुपलभ्यमानः स्पर्शःक्वचिदाश्रितोगुणत्वात् रूपवदित्यनुमानात् सामान्यतःस्पर्शाश्रयद्रव्यसिद्धौ नतत्पृथिव्यादित्रयं रूपरहितत्वात् नाप्याकाशादिकं तस्यास्पर्शवत्त्वादिति यद्रूपरहितंस्पर्शवद्द्रव्यंसिध्यति सएववायुरितिभावः । ननुकुतएवंवायोःस्पर्शगुणानुमेयत्वं । बाह्यप्रत्यक्षत्वंकिंनस्यादितिचेत् न । अरूपिद्रव्यत्वेनबाह्यप्रत्यक्षागोचरत्वस्यास्थितत्वात् । नचानुमितस्यवायोःप्रतिवादिनानंगीकृतत्वेनाश्रयासिद्धिः । अध्यक्षस्यपक्षीकारेधर्मिग्राहकमानविरोधइतिवाच्यं । वायोरेवात्रपक्षत्वेनानुमितत्वादेःपक्षतावच्छेदकत्वेनानुपादानात् । सचास्माकमनुमानेन परस्यप्रत्यक्षेणसिद्धइत्यदोषः । नचपंचीकरणपक्षेऽसिद्धिः । प्रत्यक्षरूपरहितद्रव्यत्वस्यहेत्वर्थत्वात् । तथाचश्रुतिः । यदन्यद्वायोश्चांतरिक्षाच्चैतत्सदितिवायुरंतरिक्षंचासदितिसत्त्वासत्त्वव्यपदेशस्यप्रत्यक्षाप्रत्यक्ष

तै० श्री० ९२

भाष्यं ॥ अथाप्यस्यदेवस्यप्रतिरूपकाः। रूपंरूपंप्रतिह्येतेसंत्यचेतनवह्नयः। एवंदेवोवायुरपिधारकोन्योनविद्यते । रूपंरूपंतथाप्यस्यप्रत्यभूत्प्रतिरूपकः । अचेतनस्स्पर्शगम्योयोयं ।

निमित्तकत्वात् । तथाचोक्तंसुधायां । प्रत्यक्षाप्रत्यक्षपंचमहाभूतपरत्वादिति । मूर्त्तत्वामूर्त्तत्वंचेदमेव । अन्यथापंचानामपिपरिच्छिन्नपरिमाणत्वेनविभागानुपपत्तेः । तथाचस्मृतिः । आकाशवायूत्वव्यक्तेइतरेंडेप्रकाशिताः । तथात्वाद्बाह्यभूतानामंडस्थानांचसागतिरिति । किंचभूतमप्यसितंदिव्यदृष्टिगोचरमेवत्वित्यनुव्याख्यानेभूताकाशस्याप्रत्यक्षत्वोक्तिरपिवायोरप्रत्यक्षत्वसूचिका । द्वयोरेककोटित्वेनव्यवहारात् । उक्तंचमात्स्ये । आकाशवायूत्वव्यक्तेइतरेंडेप्रकाशिताः । तथात्वाद्बाह्यभूतानामंडस्थानांचसागतिरिति । अतएवपद्धतौवायुस्पर्शोपित्वचोविषयइतिवायुस्पर्शस्यैवत्वगिंद्रियविषयत्वमुक्तं । नवायोः । एतेनवायोःप्रत्यक्षत्वंवदंतोनिरस्ताः । तथाहि । नवायोःप्रत्यक्षत्वंवक्तुंयुक्तं । तत्प्रमाणाभावात् । नतावत्प्रत्यक्षं । वायुर्वातीतिज्ञानस्यवायुगोचरत्वेपितत्प्रत्यक्षत्वागोचरत्वात् । नचतस्यैवसाक्षात्काररूपत्वेनतद्विषयत्वेनैववायोःप्रत्यक्षत्वसिद्धिः । तस्यसाक्षात्कारत्वेविवादात् । नचेयंप्रतीतिस्त्वगिंद्रियजन्या । तद्व्यापारान्वयव्यतिरेकानुविधायित्वादितितत्सिद्धिरितिवाच्यं । त्वगिंद्रियव्यापारस्यस्पर्शग्रहोपक्षीणत्वेनानन्यथासिद्धान्वयव्यतिरेकयोरभावात् । साधारणयोस्तुव्यभिचारित्वात् । वायुंस्पृशामीत्यनुभवोस्तीतिचेत् । न । पुष्पाणिजिघ्रामीत्यनुभववदुपपत्तेः । नचैवंघटोपिस्पार्शनोनस्यादितिवाच्यं । तस्यवक्ष्यमाणनियामकविशिष्टतयास्पार्शनत्वकल्पनात् । अत्रतुतदभावात् । नाप्यनुमानं । वायुःप्रत्यक्षःप्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वस्योपाधित्वात् । अतएवमहत्त्वेसत्युद्भूतस्पर्शवत्त्वादित्यपास्तं । परैरुद्भूतत्वानंगीकारेणवाद्यसिद्धेश्च । नचोद्भूतपदंप्रत्यक्षपरं । महत्त्वविशेषणवैयर्थ्यात् । तत्त्यागेपूर्वाभेदात् । ऊष्मणिव्यभिचाराच्च । नचतस्यपक्षसमत्वान्नव्यभिचारः । ऊष्मवत्परंब्रह्मयन्नजिघ्रंति

नपश्यंतिनशृण्वंतिनविजानंतीतिश्रुत्याब्रह्मणोप्रत्यक्षत्वेऊष्मणोदृष्टांतत्वकथनेनचतदप्रत्यक्षत्वस्यसुदृढनिश्चितत्वात् । प्रत्यक्षशब्दाश्रयस्याप्याकाशस्याप्रत्यक्षत्ववत्प्रत्यक्षस्पर्शाश्रयस्यापिवायोःअप्रत्यक्षत्वोपपत्त्याऽप्रयोजकत्वात् । वायुःस्पार्शनःउद्भूतरूपानधिकरणत्वेसत्युद्भूतस्पर्शाधिकरणत्वात्घटवदित्यपिन । परमाण्वादौव्यभिचारात् । नचोद्भूतपदंप्रत्यक्षपरं । उक्तन्यायेनाप्रयोजकत्वात् । द्रव्यत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकचाक्षुषत्वस्योपाधित्वाच्च । ननुद्रव्यस्पार्शनत्वेनचाक्षुषत्वंप्रयोजकं । किंतुमहत्त्वेसत्युद्भूतस्पर्शवत्त्वमेव । अतःकथंनवायुःप्रत्यक्षइतिचेत् । न । परमाणुष्वपिमहत्त्वसद्भावस्यान्यत्रोपपादितत्वेनतेषामपिस्पार्शनत्वप्रसंगात् । त्वन्मतेपि(त्रुटेः)त्र्यणुकस्यमहत्त्वेसत्युद्भूतस्पर्शवत्त्वांगीकारेणस्पार्शनत्वप्रसंगाच्च । नहिजालसूर्यमरीचिस्थमतिसूक्ष्मतममुपलभ्यमानंवस्तु त्वचाकेनचित्गृह्यते । गृह्यतएव । विविच्यतुनगृह्यतेसूक्ष्मत्वात्इतिवदन्देवानांप्रियोसावुपेक्षणीयः । अनुभवविरोधात् । महत्त्वविशेषसमानाधिकरणोद्भूतस्पर्शवत्त्वंप्रयोजकमितिचेन्न । ऊष्मणोवायूपनीतशीतोष्णद्रव्यस्यापिस्पार्शनत्वापातात् । नचतत्रानुमतिः । उदाहृतश्रुतिविरोधात् । तत्संख्यापरिमाणसंयोगविभागकर्मणांस्पार्शनत्वापाताच्च । योग्यव्यक्तिवृत्तित्वेनतेषांयोग्यत्वात् । नह्यूष्मादिजातीयेक्वचिद्घटादाविवकरपरामर्शेकदापिकेनापिसंख्यागृह्यते । ननुद्रव्यस्पार्शनत्वेचाक्षुषत्वमपिनप्रयोजकं । आलोकादीनामपिस्पार्शनत्वापातादितिचेन्न । विषमव्याप्तस्याप्युपाधित्वात् । केचित्तु महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वंबाह्यद्रव्यप्रत्यक्षत्वेतंत्रमितिनवायुःप्रत्यक्षइत्याहुः । तन्न । वर्णद्रव्यत्वस्यान्यत्रव्यवस्थापितत्वेनतत्रोक्तप्रयोजकाभावात् । अन्येतुद्रव्यस्पार्शनएवेदंप्रयोजकमितिवायुर्नस्पार्शनइत्याहुः । तदपिन । तमसआलो

कस्यनयनगतपित्तद्रव्यस्यचस्पार्शनत्वप्रसंगात् । वस्तुतस्तु । श्रोत्रभिन्नबाह्येंद्रियजन्यास्मदादिद्रव्यप्रत्यक्षत्वेमहत्वविशेषसमानाधिकरणोद्भूतरूपवत्त्वंप्रयोजकमितिवायुर्नप्रत्यक्षः । एकेतुमहत्त्वविशेषसमानाधिकरणोद्भूतरूपस्पर्शवत्त्वंद्रव्यस्पार्शनत्वे प्रयोजकं । एकैकस्यव्यभिचारात् । विनिगमनाविरहेणोभयोरपिप्रयोजकत्वात् । अतएवघटादिःस्पार्शनः । अतएवोक्तंसुधायां । द्रव्यस्यहिअस्मदादिप्रत्यक्षत्वंउद्भूतरूपस्पर्शवत्त्वेनव्याप्तमिति । एवंचवायुर्नप्रत्यक्षइत्याहुः । एवंमंत्रद्वयगतंदृष्टांतवाक्यंव्याख्यायेदानींएकस्तथासर्वभूतांतरात्मेतिदार्ष्टांतिकवाक्यंव्याचष्टे ॥एवमिति॥ जनार्दनइतिविशेष्याध्याहारः । एकइत्यस्यसावधारणत्वमभिप्रेत्याह । नान्यइति । सर्वभूतान्तरात्मेत्यस्यार्थःसर्वेति । एकएवसर्वजीवांतरस्थितइत्यस्यार्थलब्धमर्थमाह॥ स्वतंत्रइति ॥ बाह्याश्चतेततइत्यत्रहेतुकथनार्थमेतत् । रूपंरूपमित्येतदपेक्षिताध्याहारेणव्याचष्टे ॥ रूपंरूपमिति ॥ प्रतिरूपइत्यस्यार्थःप्रतिबिंबाइति । बभूवुरितिवक्ष्यमाणमत्रापिसंबध्यते । एकवचनप्रयोगादेकस्यैवप्रतिबिंबत्वमुच्यतइतिशंकापरिहारायबहुवचनप्रयोगः । चेतनाअस्यजनार्दनस्यरूपंरूपंप्रतिप्रतिबिंबाबभूवुरित्यन्वयः । ननुचेतनानांभगवत्प्रतिबिंबत्वेबिंबप्रतिबिंबयोरैक्यात्तयोरभेदस्यादित्याशंकापरिहारायश्रुतौबहिश्चेत्युक्तमितिभावेनतद्व्याचष्टे ॥ बाह्याश्चेति ॥ ततोजनार्दनात् । ननुचेतनाभगवतोबाह्याइत्ययुक्तं । भगवतोविभुत्वेनचेतनानांतदनधिष्ठितप्रदेशवृत्तित्वासंभवादित्यतोबाह्याइत्युक्तंविवृणोति ॥ नास्येति ॥ ननुप्रतिरूपोबभूवेतिलिट्प्रयोगात्प्रतिबिंबत्वस्यकादाचित्कत्वमुच्यतइतिप्रतीयते । विचित्रानंतजीवानांचकथमविचि

भाष्यं ॥ एवंजनार्दनः । एकस्स्वतंत्रोनान्योस्तिसर्वजीवांतरस्थितः । रूपंरूपंप्रतिह्यस्यप्रतिबिंबाश्चचेतनाः । बाह्याश्चतेततोनास्यस्वरूपंतेकथंचन ।

त्रैकभगवत्प्रतिबिंबत्वमित्यतआह ॥ अनादीति ॥ चशब्दोऽपिशब्दार्थः । अनंतंअनंतप्रकारंकंसुखंयेषांतेअनंतकाः । विचित्रस्वभावाअनंताअपिते चेतना अविचित्रस्यैकस्यैवभगवतोऽनाद्यनंतप्रतिबिंबाबभूवुरित्येतच्छ्रुत्यादिप्रसिद्धमितिहिशब्दार्थः । सूर्यकांतगतसूर्यप्रतिबिंबस्याग्निजनकत्वेपिजलगतस्यतदभावदर्शनात्बिंबैक्येपिप्रतिबिंबभेदस्तदवैचित्र्येपितद्वैचित्र्यमुपपन्नमितिभावः । सूर्योयथेतिमंत्रस्यसूर्यःसकललोकस्यचक्षुषि पुरीषाद्यशुचिप्रकाशनेनचक्षुषउपकारंकुर्वन्नपि तद्दर्शिनःसर्वलोकस्य चाक्षुषैरशुच्यादिदर्शननिमित्तैराध्यात्मिकैर्दोषैर्बाह्यैश्चाशुच्यादिसंसर्गदोषैश्चनलिप्यतेइतिव्याख्यानमसत् । सूर्यस्यपुरीषाद्यशुचिप्रकाशनेनचाक्षुषदोषलेपप्रसक्तेरेवाभावेनतन्निषेधायोगात् । अन्यथादीपप्रभादेरपिजडस्यतत्प्रसक्तिःस्यात् । सर्वस्यापिदोषस्यांतरत्वेनबाह्यत्वायोगाच्च । नचदोषनिमित्तस्यबाह्यत्वेनदोषेबाह्यत्वोपचारः । क्लिष्टत्वात् । आध्यात्मिकैर्दोषैरित्यश्रुतकल्पनापाताच्चेतिभावेनतद्दृष्टांतवाक्यंव्याख्यातुंतदुपयुक्तंतावदाह ॥ सूर्यइति ॥ अस्य सूर्यस्य प्रतिबिंबोबाह्यकंचक्षुरित्यन्वयः । किंतइत्यतोदृष्टांतवाक्यंव्याचष्टे ॥ बाह्येति ॥ अनेनबाह्यदोषैरित्यत्रबुद्ध्याविवेकेनबाह्यत्वंचक्षुषोविशेषणमित्युक्तंभवति । नचाकाशेपरिवर्तमानस्यसूर्यस्यकथमांतरचक्षुष्ट्वं । सूर्यप्रतिबिंबभूतबाह्यचक्षुश्चकिमित्यतआह ॥ अंतश्चक्षुरिति ॥ चक्षुरभिमानिसूर्याख्यदेवतेत्यर्थः । एकस्तथेतिदार्ष्टांतिकवाक्यंव्याचष्टे ॥ एवमिति ॥ बाह्योत्यंतभिन्नः । तत्रहेतुः स्वतंत्रत्वादिति । भू

भाष्यं ॥ अनादिप्रतिबिंबाश्चबभूवुस्तेह्यनंतकाः । सूर्योयथांतरंचक्षुःप्रतिबिंबोस्यबाह्यकं । बाह्यचक्षुर्गतैर्दोषैरंतश्चक्षुर्नलिप्यते । अंतश्चक्षुर्देवतातुबाह्यंचक्षुरचेतनं । एवंबाह्यस्स्वतंत्रत्वाज्जीवेभ्यःपुरुषोत्तमः । अस्वतंत्रस्यजीवस्यदुःखैर्नैवहिलिप्यते ।

तांतरात्मत्वोक्त्यालब्धमेतत् । जीवेषुव्यभिचारशंकापरिहारायास्वतंत्रस्येतिजीवविशेषणं । दुःखेनेतिएकवचनप्रयोगोजात्यभिप्रायेणैव नत्वेकत्वाभिप्रायेणेतिबहुवचनप्रयोगः । ननुचेतनत्वात्विष्णोरपिजीववत् दुःखलेपःकिंनस्यात् । नहिचेतनत्वाविशेषेपिविष्णोःदुःखालेपेविशेषहेतुरस्तीत्यतआह ॥ चेतनाभासकइति ॥ अनेनचेतनश्चेतनानामित्यस्यतात्पर्यमुक्तंभवति । चेतनत्वंनदुःखलेपप्रयोजकं। किंतुचेतनाभासकत्वमेव । हरिस्तुपरमचेतनइतिनदुःखलेपइतिभावः। हरेःपरमचेतनत्वेहेतुमाह ॥ स्वतंत्रत्वादिति ॥ परमचेतनत्वेपिदोषलेपःकिंनस्यादित्यतआह ॥स्वतंत्रोहीति॥ परमचेतनःस्वतंत्रएव । स्वतंत्रस्यनैवदोषलेपः । अन्यथास्वातंत्र्यभंगादितिभावः । दुःखेप्रकृतेपिदोषेणेतिवदताश्रुतौदुःखपदमज्ञानाद्युपलक्षणमित्युक्तंभवति । एकस्तथासर्वभूतांतरात्मारूपंरूपंप्रतिरूपोबहिश्चेत्यस्यपरोक्तार्थे नप्रमादेनापिमतिःकर्तव्येतिभावेनप्रमाणेनव्याकृतमपितद्वाक्यंस्ववचनेनस्पष्टयति ॥ सइति ॥ सइत्यध्याहारः । सर्ववाक्यंसावधारणमितिन्यायेनैकएवेत्युक्तं । प्रकृतपरमात्मनएवोत्तरत्रकर्तृत्वेनान्वयइतिभ्रांतिनिवारणाय रूपंरूपमित्येतद्योजयति ॥ तस्येति ॥ जीवइतिकर्त्रध्याहारः । जीवःप्रतिरूपाख्योबभूवेतिसंबंधः । अनेनदृष्टांतवाक्याद्बभूवेतिपदमनुवर्तनीयमित्युक्तंभवति । बहिश्चेत्येतदवधिप्रदर्शनेनव्याचष्टे ॥ बहिश्चेति ॥ कथं सर्वगतस्यात्मनोबहिर्जीवइत्यतस्तद्विवृणोति ॥ नितरामिति ॥ भेदाभेदव्यावृत्त्यर्थंनितरामिति । अनेनबहिःशब्दोभिन्नार्थ

भाष्यं ॥ चेतनाभासकोजीवःपरमश्चेतनोहरिः । स्वतंत्रत्वात्स्वतंत्रोहिनैवदोषेणलिप्यते । इतिकौर्मे । सएकएवसर्वभूतांतरात्मा । तस्यरूपं रूपंप्रतिरूपाख्योजीवोबभूव । बहिश्चासौपरमात्मनोनितरांभिन्नः । परतंत्रत्वात् ।

श्चशब्दएवार्थइत्युक्तंभवति । तत्रहेतुःपरतंत्रत्वादिति । अनादिप्रतिबिंबाश्चेत्युक्तमयुक्तं । तथासतिबभूवेतिभूतार्थकलिट्प्रत्यायानुपपत्तेरित्यतस्तत्रप्रयोगंदर्शयति ॥ आत्मैवेति ॥ यथात्मसत्तायाःसार्वकालिकत्वेनासीदितिप्रयोगःसार्वकालिकोव्याख्येयस्तथात्रापीतिभावः । यथोक्तंप्रयोगएककालीनःसर्वकालेनुषज्यते । ददर्शविष्णुरित्यादौनित्यचिद्रूपतोहरेरिति । तमात्मस्थंयेनुपश्यंतीत्यस्य तमात्मस्थं स्वशरीरहृदयाकाशेबुद्धौचैतन्याकारेणाभिव्यक्तमितिव्याख्यानमसदितिभावेनप्रमाणेनैवव्याचष्टे ॥ आत्मनिस्थमिति ॥ परोक्तएवार्थःकिंनस्यादित्यतआह ॥ जीवैक्येनेति ॥ तदेतदितिमन्यंतेनिर्देश्यंपरमंसुखमित्यत्रज्ञानिसुखमेवोच्यते । परमंसुखमितिसुखश्रुतेः । नचासौविष्णावपिसावकाशा । तेषांसुखंशाश्वतमितिज्ञानिसुखस्यैवप्रकृतत्वेनतस्यैवतदेतदितिपरामर्शात् । नचभगवतोपिप्रकृतत्वात्तत्परामर्शोयमस्त्वितिवाच्यं । तस्यनपुंसकसुखशब्देनाप्रकृतस्यतदित्यादिपरामर्शायोगादित्यतःतद्व्याचष्टे ॥ एतदेवेति ॥ एवकारेणज्ञानिसुखव्यवच्छेदः । तथाचतदेतदितिनपुंसकशब्देनैकंरूपमितिप्राक्प्रकृतभगवद्रूपंपरामृश्यतइतिनानुपपत्तिरितिभावः । ननुकिंदूरस्थभगवद्रूपपरामर्शग्रहणेन । समीपस्थज्ञानिसुखपरामर्शएवायमितिकिंनस्यादितिचेन्न । सुखस्यपरमत्वविशेषणात्ज्ञानिसुखस्यचपरमत्वायोगादितिभावेनाह ॥ ज्ञानिसुखमिति ॥ भगवत्सुखविप्रुण्मात्रमित्यर्थः । अनेनतदेतदित्यस्ययदात्मस्वरूपंसुखमनिर्देश्यं परममप्राकृतं वाङ्मनसयोरगोचरमपि तत् ब्रह्मण

भाष्यं ॥ आत्मैवेदमग्रआसीदित्यादिवदनादित्वापेक्षया । आत्मनिस्थंहरिंजानन्मुच्यतेनात्रसंशयः । जीवैक्येनतुतंध्यायंस्तमस्यंधेपतेद्ध्रुवमितिच । एतदेवभगवद्रूपंपरमंसुखं । ज्ञानिसुखंतुतद्विप्रुण्मात्रं ।

एतत् प्रत्यक्षमेवेतिमन्यंतइतिव्याख्यानंचापास्तं । परमात्मस्वरूपसुखस्यप्रत्यक्षत्वायोगात् । जीवब्रह्माभेदस्तुबाधितइत्युक्तं । नन्वेतदित्यस्यानुवादतयाव्याख्यानेतच्छब्दोव्यर्थःस्यादितिचेन्न । रूपंरूपंप्रतिरूपोबभूवेतिदूरे । एकंरूपमितिसंनिधानेचभगवद्रूपस्यप्रकृतत्वेनतथैवपरामर्शार्थत्वात् । तदित्यस्यापिततत्वार्थकत्वेनपरमसुखत्वादिवत्विधेयत्वाद्वा । नचैवंवाक्यभेदप्रसंगः । अवांतरवाक्यभेदस्यादोषत्वात् । महावाक्यभेदस्याभावात् । अन्यथासत्यंज्ञानमनंतंब्रह्मेत्यत्रकागतिः । अस्तुवात्वदुक्तरीत्याएतदित्यस्यविधेयत्वं । तथापियद्ब्रह्मानिर्देश्यंसुखमितिवदंति । तदेतत् प्रकृतपरमात्मनोरूपमितिवाक्ययोजनोपपत्तिः । उक्तंचन्यायविवरणे । यद्ब्रह्मानिर्देश्यंसुखमितिवदंतितदेतत्स्वरूपमितिमन्यंतइति । विष्णोरेवपरमंसुखं ज्ञानिसुखंतुतद्बिंदुट्क मित्यत्रप्रमाणमाह ॥ **ब्रह्मादीनामिति** ॥ चशब्दोपिशब्दार्थतयाकैमुत्यसूचकः । विष्णुसुखस्य विप्रुट्कमितिशेषः । ब्रह्मादीनांविष्णुसुखैकदेशसुखवत्त्वेतदभेदःस्यादित्यतआह ॥ **प्रतिबिंबइति** ॥ किमुभातिनभातिवेत्येतत्प्रश्नवाक्यंकृत्वातत्रोत्तरमिदं भातिनभातिचेतिव्याचक्षते । तदसत् । उत्तरवाक्यस्याश्रुतस्यैवकल्प्यत्वात् । नचकिमुशब्दपरित्यागेनतदेवोत्तरमितिवाच्यं । आवृत्तिप्रसंगात् । मन्यंतइतिभानस्यैवोक्तत्वेनकिमुभातिनभातिवेतिप्रश्नस्यैवायोगाच्च । भातिनभातीतिपरिहारस्यव्याहतत्वाच्च । तस्मात्किमुभातीतिप्रश्ने नभातिवेतिपरिहारइत्याश्रयणीयं । नन्वेतदप्ययुक्तं । मन्यंतइतिभानस्यैवोक्तत्वेनप्रश्नोत्तरयोरनुपपत्तेरित्यतआह ॥ **सम्यग्भातीति** ॥ श्रुत्यनुसारादत्रापिकिमुशब्दोयोज्यः । सम्यक् साकल्येन । किमुसम्यग्भातीति

भाष्यं ॥ ब्रह्मादीनांचमुक्तानांसुखंविष्णुसुखस्यतु । प्रतिबिंबस्तुविप्रुट्कोविष्णोरेवपरंसुखं । सम्यग्भातिनभातीतिजानीयांतत्कथंन्वहं ।

प्रश्ने नभातीत्युत्तरमितियोज्यं । अतएवोक्तं तत्वप्रकाशिकायां नभातीत्युक्ताज्ञेयत्वंचेति । इतिशब्दःश्रुत्यनुसाराद्वाशब्दार्थो वा । अव्ययानामनेकार्थत्वात् । तत् ज्ञानिसुखं कथं केनप्रकारेणविजानीयामितिव्याख्यानमसत् । यमस्यज्ञानितयातत्सुखस्यप्रत्यक्षत्वेनतज्ज्ञानप्रार्थनायोगात् । तच्छब्देनाव्यवहितपरमसुखभगवद्रूपपरामर्शोपपत्तौव्यवहितज्ञानिसुखग्रहणायोगाच्च । ननुतच्छब्देनभगवद्रूपपरामर्शेपिकथंविजानीयामितिनोपपद्यते । यमस्यभगवज्ज्ञानित्वात् । अन्यथातदुपदेशासंभवात् । नच कथंसाकल्येनजानीयामित्यर्थः । अयोग्यप्रार्थनाप्रसंगादित्यतआह ॥ **जानीयामिति** ॥ कथमित्याक्षेपे । नकथमपीत्यर्थः । मन्यंतइतिज्ञानोक्तौतत्रभगवत्प्रसादएवमुख्यहेतुर्नान्यइतियमःस्वानुभवेनसमर्थयत्यनेनेतिनासंगतिरितिभावः । तच्छब्दार्थोऽनिर्देश्यंपरमंसुखमिति । दिव्यमितितल्लब्धार्थोक्तिः ॥ **द्वितीयाध्यायेद्वितीयावल्ली** ॥ २ ॥ २ ॥ पुरमेकादशद्वारं । चक्षुषी श्रोत्रेनासिकेमुखंचेतिसप्तशीर्षण्यानि नाभिरासनंगुह्यंचेतित्रीणि शिरस्येकमितिएकादशद्वारमिदं पुरं शरीरमजस्यजननादिरहितस्यावक्रचेतसोऋजुज्ञानिनोभगवतअधीनमित्य(धि)नुष्ठाय स्थितिंकृत्वानशोचति । शरीराभिमानकृतोहिशोकः । शरीरस्यभगवदधीनत्वस्थितिकरणेतदभिमानाभावान्नशोकइतिभावः । एवंनिरभिमानात्पूर्वमेवविमुक्तोऽपरोक्षज्ञानीपश्चाद्विशेषेणमुच्यते । पुनर्भगवत्स्वरूपमाह । एतदिति॥१॥नित्यंदोषैर्हीनत्वात्हं । साररूपत्वात्सः । हंचासौसश्चेतिहंसः । शुचौवायौसीदतीतिशु

भाष्यं ॥ तत्प्रसादमृतेदिव्यमनिर्देश्यंपरंसुखमितिचमहावाराहे ॥ काठकभाष्येद्वितीयाध्यायस्यद्वितीयावल्ली ॥ २ ॥ २ ॥
उप ॥ पुरमेकादशद्वारमजस्यावक्रचेतसः । अ(धि)नुष्ठायनशोचतिविमुक्तश्चविमुच्यते । एतद्वैतत् ॥ १ ॥

चिषत् । वरसुखरूपत्वाद्वरसुः। अंतरिक्षेसीदतीतिअंतरिक्षसत् ।सर्वेंद्रियादिस्थःसन्निंद्रियविषयादिहोतृत्वाद्धोता । वेद्यांपूज्यतयासीदतीतिवेदिषत् । अतिशयितं थ मन्न मस्यास्तीत्यतिथिः।द्रोणकलशेस्थितःसोमोदुरोणशब्देनोच्यते । तत्रसीदतीतिदुरोणसत् । नृषु स्थितइतिनृषत् । वरेषुदेवेषुसीदतीतिवरसत्।ऋतेवेदेसीदतीतिऋतसत् ।व्योमाख्यप्रकृतौसीदतीतिव्योमसत् । अब्जाःअब्जेषुस्थितः । बहुवचनंबहुरूपत्वाभिप्रायेण । गोजाःपृथिवीजन्येषुस्थितः।विष्णुंप्रतिगतत्वात्ऋताःमुक्ताःतेषुनियामकतयाजातत्वाद्दतजाः । अद्रिजेषुस्थितःअद्रिजाः । वेदैर्मुख्यतःप्रोक्तत्वाद्दतं । पूर्णगुणत्वाद्बृहत् ॥ २ ॥ किंच यःप्राणरूपंवायुंमुख्यप्राणस्वरूपमूर्ध्वमुन्नयति । अपानंमुख्यवायुरूपमेवप्रत्यगस्यतिअधःक्षिपति । मध्ये हृदयस्थेतिशेषः । आसीनं वामनंवामंसौंदर्यतत्प्रधानत्वास्त्रियो वामशब्दशब्दिताः । तन्नेतावामनस्तं विश्वेसर्वेदेवाउपासते ॥ ३ ॥ कांश्चिद्गुणानुक्त्वातूष्णींस्थितंयमंपुनर्विशेषविवित्सयायेयंप्रेतइत्यनेनपृष्टमेवपृच्छतिनचिकेताः ॥ अस्येति ॥ शरीरस्थस्यस्थूलशरीरस्थस्यातोविस्रंसमानस्यस्थूलशरीरंत्यजतोदेहिनःसूक्ष्मशरीरवतोदेहात्सूक्ष्मदेहाद्विशेषेणमुच्यमानस्यमुक्तस्यात्रमुक्तौनियामकतयायत्परिशिष्यतेतत्किंकिंलक्षणकं।पुनर्विशेषतोब्रूहीत्यर्थः । उत्तरमाह ॥ एतद्वैतदिति ॥ ४ ॥ सकलजीवनहेतुप्राणापानप्रेरकत्वंभगवतःकथमित्यतस्तयोरपिनजीवनहेतुत्वमित्याह ॥ नप्रा

उप ॥ हंसश्शुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतंबृहत् ॥ २ ॥ ऊर्ध्वं प्राणमुन्नयत्यपानंप्रत्यगस्यति । मध्येवामनमासीनंविश्वेदेवाउपासते ॥ ३ ॥ अस्यविस्रंसमानस्यशरीरस्थस्यदेहिनः । देहाद्विमुच्यमानस्यकिमत्रपरिशिष्यते । एतद्वैतत् ॥ ४ ॥

णेनेति ॥ तर्हिकेनजीवतीत्यतआह ॥ इतरेणेति ॥ प्राणापानाभ्यांसकलजीवजडेभ्योवेतरेणभगवतैवजीवंतिसर्वेजीवाः । प्राणापानयोर्जीवनहेतुत्वाभावेप्रमाणांतरविरोधःस्यादित्यतआह ॥ यस्मिन्निति ॥ जीवनहेतूइतिशेषः । ततश्चस्वातंत्र्येणजीवनहेतुत्वंप्राक्निषिद्धमितिभावः । यद्वानप्राणेनेत्यत्रस्वातंत्र्येणेतिशेषः । इतरेणेत्वित्यत्रहेतुमाह ॥ यस्मिन्निति ॥५॥ पुनरपिभगवत्स्वरूपंवक्ष्यामीतिप्रतिजानीतेयमः ॥ हंतेति ॥ हंतेत्यास्वादने । अहंतेतुभ्यंइदंगुह्यंगोप्यंसनातनंब्रह्मप्रवक्ष्यामि । कथमात्मापरमात्माम्रियतइतिमरणंम्रियमाणंजीवंप्राप्ययथात्मानियामकोभवतितथाप्रवक्ष्यामीत्यर्थः ॥ ६ ॥ एतदेवाह ॥ योनिमिति ॥ अन्येकेचित्देहिनोमृताःसंतःशरीरत्वायशरीरवत्त्वायमनुष्यादियोनिंप्रपद्यंते । तन्नियामकतयाभगवानपियोनिंप्रपद्यतइतिभावः । अन्येकेचित्स्थाणुंअनुसंयंति । तन्नियामकतयाभगवानपि । केषांचित्योनिप्राप्तिःकेषांचित्स्थाणुप्राप्तिरितिकुतइत्यतआह ॥ यथेति ॥ तत्तज्ज्ञानकर्मानुसारेणतत्तत्प्राप्तिरितिभावः ॥ ७ ॥ म्रियमाणजीवनियामकस्यशोकमरणादिकंनशंकनीयमितिभावेनतस्यमाहात्म्यमाह ॥ यइति॥ यःपुरुषःपूर्णषड्गुणःपुरिशयोवा एषुजीवेषु लयादौसुप्तेषुसत्सु तदाकामंकामंस्वेच्छानुसारेण रथपथादीन् निर्ममाणोजागर्ति तदेवशुक्रंशोकरहितं नत्वन्यत् तदेवब्रह्मपूर्णगुणं तदेवामृतंनित्यमुक्तमुच्यतेश्रुत्यादौ ।

उप ॥ नप्राणेननापानेनमर्त्योजीवतिकश्चन । इतरेणतुजीवंतियस्मिन्नेतावुपाश्रितौ॥ ५ ॥ हंततइदंप्रवक्ष्यामिगुह्यंब्रह्मसनातनं । यथामरणं प्राप्यात्माभवतिगौतम ॥ ६ ॥ योनिमन्येप्रपद्यंतेशरीरत्वायदेहिनः । स्थाणुमन्येनुसंयंतियथाकर्मयथाश्रुतं ॥ ७ ॥ यएषुसुप्तेषुजागर्तिकामंकामंपुरुषोनिर्ममाणः । तदेवशुक्रंतद्ब्रह्मतदेवामृतमुच्यते ।

तस्मिन्सर्वलोकाआश्रिताः । तद्ब्रह्मकोपिनात्येति । यद्वाइतरेणतुजीवंतीत्यत्रब्रह्मणःसर्वजीवेभ्योभेदउक्तः तमेवजीवेश्वरभेदं ज्ञापयितुंतदुभयस्वरूपंवक्ष्यामीतिप्रतिजानीते ॥ हंतेति ॥ अहंतेतुभ्यंइदंगुह्यंसनातनंब्रह्मप्रवक्ष्यामि । आत्माजीवोमरणंप्राप्य यथाभवतितच्चवक्ष्यामि । जीवब्रह्मणोर्भेदज्ञापनायेत्यर्थः । तत्रयःकर्मफलभोक्तासजीवइत्याह ॥ योनिमिति ॥ नहिजीवस्य योन्यादिगमनंब्रह्मप्राप्नोति । अतस्तयोर्भेदइतिभावः । पुनरपिजीवेश्वरस्वरूपमाह ॥ यइति ॥ अनेनसुप्तिमान्जीवः । यस्ते षुसुप्तेषुजागर्तिंसविष्णुरितितयोर्भेदःस्पष्टमुक्तः । शुक्रं शोकरहितं । शुक्रंतच्छोकराहित्यादितिवचनात् । जीवस्तुशोकयुक्तः । तदे वब्रह्मपूर्णनजीवः । तदेवनित्यमुक्तंजीवस्त्वनेवंविधः । तस्मिन्सर्वेलोकाआश्रिताः नहिजीवेआश्रिताः । तदेवकोपिनात्येति । जीवंतुब्रह्मैवात्येति । अतस्तयोर्भेदःसिद्धइतिभावः । पुनरपिप्रतिजानीते । एतद्वैतदिति॥८॥तमेवजीवेश्वरभेदंसदृष्टांतमाहउत्तर मंत्रद्वयेन ॥ अग्निरिति ॥ यथायद्यपिअग्निर्देवतारूपएकएवभुवनंलोकंप्रविष्टःसन्पाकादिकर्तानान्योस्ति । तथाप्यस्याग्नेर्देव स्यरूपंरूपंप्रत्यचेतनोग्निःप्रतिरूपःप्रतिबिंबोबभूव । तथासएकएवसर्वभूतानांजीवानामंतरात्मातन्नियामकः तथापितस्यरूपंरूपं प्रतिजीवःप्रतिबिंबोवभूव । नचबिंबप्रतिबिंबत्वोक्त्याऽभेदः । बहिश्चासौ परमात्मनःनितरांभिन्नइतियावत् । परतंत्रत्वा

उप ॥ तस्मिँल्लोकाश्रिश्रितास्सर्वेतदुनात्येतिकश्चन । एतद्वैतत् ॥ ८ ॥ अग्निर्यथैकोभुवनंप्रविष्टोरूपंरूपंप्रतिरूपोबभूव । एकस्तथासर्वभूतांत रात्मारूपंरूपंप्रतिरूपोबहिश्च ॥ ९ ॥

दितिभावः ॥ ९ ॥ यथायद्यपिवायुर्देवतारूपएकएवभुवनंप्रविष्टःसन्धारकोनान्योस्ति । तथाप्यस्यवायोर्देवस्यरूपंरूपंप्रति अचेतनोवायुःप्रतिरूपोबभूव । इतरत्समानं ॥ १० ॥ ननुभूतांतरात्मेतिसर्वजीवांतरत्वमुक्तं । तथासतिजीववत्दुःखंस्यादित्यत आह ॥ सूर्यइति ॥ यथासूर्यःसर्वलोकस्यांतश्चक्षुरपि चक्षुरभिमानिदेवतापीतियावत् । चाक्षुषैर्बाह्यदोषैरचेतनरूपबाह्यचक्षुर्ग तैर्दोषैर्नलिप्यते । तथासएकएवसर्वभूतांतरात्मापिलोकस्यदुःखेननलिप्यते । ननुसर्वजीवात्मकत्वेचकथंदुःखेनालेपइत्यतउक्तं ॥ बाह्यइति ॥ जीवेभ्योभिन्नइत्यर्थः । स्वतंत्रत्वादितिभावः ॥ ११ ॥ ननुभूतांतरात्माभूतदुःखेननलिप्यतइतिकथं । अन्य थाजीवस्यापितदभावप्रसंगात् । नहिदह्यमानगेहांतर्गतयोरन्यतरस्यैवदाहइतियुक्तमिति । अतोजीवापेक्षयेश्वरस्यसामर्थ्यवैशे ष्येणाग्निस्तंभनवतोदाहाभाववत्दुःखालेपोपपत्तिरितिभावेनेश्वरसामर्थ्यमाह ॥ एकइत्यादिना ॥ यःसर्वभूतान्तरात्माएकःस माभ्यधिकरहितः सर्वमस्यवशेवर्ततइतिवशी । एकंस्वात्मरूपंबहुधाकरोति । नियम्यानंत्यात् । तमात्मनितिष्ठतीतिआत्मस्थंभग वंतं येधीराअनुपश्यंति तेषामेवशाश्वतंनित्यमभिव्यक्तंसुखं नेतरेषां ॥ १२ ॥ किंचयोनित्यानांनित्यःपरमनित्यः । अनित्यत्वा दिचतुर्विधनाशरहितइतियावत् । नित्यानांनित्यत्वप्रदोवा । चेतनानांचेतनःपरमचेतनः । चेतनानांचेतनत्वप्रदोवा । यश्चस्वयमेक एवबहूनांपुरुषाणांकामान्काम्यान्विदधाति तमात्मस्थंयेनुपश्यंतिधीरास्तेषामेव शाश्वतीपुनरावृत्तिशून्या शांतिर्मोक्षोनेतरेषां ।

उप ॥ वायुर्यथैकोभुवनंप्रविष्टोरूपंरूपंप्रतिरूपोबभूव । एकस्तथासर्वभूतांतरात्मारूपंरूपंप्रतिरूपोबहिश्च ॥ १० ॥ सूर्योयथासर्वलोकस्यच क्षुर्नलिप्यतेचाक्षुषैर्बाह्यदोषैः । एकस्तथासर्वभूतांतरात्मानलिप्यतेलोकदुःखेनबाह्यः ॥ ११ ॥ एकोवशीसर्वभूतांतरात्माएकंरूपंबहुधायःकरोति । तमात्मस्थंयेनुपश्यंतिधीरास्तेषांसुखंशाश्वतंनेतरेषां ॥ १२ ॥ नित्योनित्यानांचेतनश्चेतनानामेकोबहूनांयोविदधातिकामान् ।

मोक्षःशांतिश्चशरणंनिर्वाणंचाभिधीयतइतिब्राह्मे ॥ १३ ॥ एवंयज्ज्ञानाच्छाश्वतसुखादिरूपोमोक्षस्तस्यकथंदुःखलेपःस्यादि त्युक्तं । इदानींपरमसुखरूपत्वाच्चनतत्प्राप्तिरितिभावेनप्रकृतभगवत्स्वरूपमेवाह ॥ तदिति ॥ तद्रूपंरूपमित्यत्रप्रकृतं एतत्एकं रूपमितिप्रकृतं भगवद्रूपमनिर्देश्यंसाकल्येननिर्देष्टुमशक्यं परमंसुखमितिमन्यंतेज्ञानिनः । तज्ज्ञानेचभगवत्प्रसादएवमुख्यहेतु रितिस्वानुभवेनसमर्थयतेयमः ॥ कथमिति ॥ अहं तदनिर्देश्यंपरमंसुखंभगवद्रूपंतत्प्रसादमृतेइदानींकथंविजानीयां नकथम पि । अतोभगवत्प्रसादएवतत्रहेतुरितिभावः । भगवत्प्रसादादपिकिंसाकल्येनतज्ज्ञानंभवतीतिनचिकेताःपृच्छति ॥ किमुभा तीति ॥ किंसम्यगितिशेषः । उत्तरमाह नभातिवेति । सम्यक्नभात्येवेत्यर्थः ॥ १४ ॥ तत्कुतइत्यतस्तस्यसूर्याद्यप्रकाश्यत्वा दित्याह ॥ नतत्रेति ॥ तत्र तत् । भाति भासयते । चंद्रतारकमितिद्वंद्वैकवद्भावः । नतद्भासयतेसूर्योनशशांकोनपावकइति स्मृतिः । नकेवलंसूर्यादीनांभगवत्स्वरूपप्रकाशकत्वाभावः । किंतुघटादिप्रकाशनेपिनस्वातंत्र्यमित्याह ॥ तमेवेति ॥ सर्वं सूर्यादितेजो भांतं प्रकाशयंतंतमेव भगवंतमनुभाति प्रकाशते । सूर्यादिप्रकाशोपिभगवदधीनइतिभावः । तथाहिस्मृतिः । यदा दित्यगतंतेजोजगद्भासयतइत्यादिका । तर्हिकस्यप्रकाशेनेदंसर्वंजगत्प्रकाशतइत्यतआह ॥ तस्येति ॥ १५ ॥ इतिद्वितीया

उप ॥ तमात्मस्थंयेनुपश्यंतिधीरास्तेषांशांतिश्शाश्वतीनेतरेषां ॥ १३ ॥ तदेतदितिमन्यंतेऽनिर्देश्यंपरमंसुखं । कथंनुतद्विजानीयांकिमुभाति नभातिवा ॥ १४ ॥ नतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निः । तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभाति ॥ १५ ॥ इति द्वितीयावल्ली ॥ २ ॥ २ ॥

ध्यायस्यद्वितीयावल्ली ॥ २ ॥ २ ॥ पुनरपिभगवन्माहात्म्यमाह ऊर्ध्वमूलइत्यादिना । तदन्यथाप्रतीतिनिरासायप्रमाणेनैव व्याचक्षाणस्तावदूर्ध्वमूलइत्येतद्व्याचष्टे ॥ सर्वोच्चइति ॥ ऊर्ध्वशब्दार्थः सर्वोच्चइति । उच्चऊर्ध्वउच्यते । सर्वेत्यस्ययोग्यत यासंबंधः । वृक्षमूलवन्मूलत्वेन्याश्रयत्वशंकास्यादित्यतो भूमिवदित्युक्तं । एषोश्वत्थइतिप्रसिद्धाश्वत्थउच्यतइतिप्रतीतिनिरा साय जगदाख्यस्येत्युक्तं । अर्वाक्शाखइत्येतद्व्याचष्टे ॥ शाखाइति ॥ यदिभूमिरिवविष्णुर्मूलंतर्हिवृक्षमूलंकिमित्यतआह ॥ वृक्षमूलमिति ॥ अनेनोर्ध्वमूलइत्येतत्प्रकारांतरेणव्याख्यातं । ननुवृक्षमात्रसाम्यमभिदधताश्वत्थत्वंकथमस्योच्यतइत्य तआह ॥ सइति ॥ आशुशब्दोपपदात्वागतिगंधनयोरित्यस्मात्कः । उपपदोकारलोपआकारस्यह्रस्वत्वंछांदसमितिभावः । अस्तुहरिरश्वनामकःकिंततइत्यतआह ॥ तद्व्यासत्वादिति ॥ अश्वोसिंस्तिष्ठतीत्यश्वत्थइत्यर्थः ॥ तदन्नत्वादिति ॥ अश्व स्थमन्नमश्वत्थं । अन्नंथमितिश्रुतेः । लिंगव्यत्यासःछांदसः । जगत्स्वरूपस्यैवानादिनि त्यत्वमुच्यतइतिप्रतीतिनिरासायसना तनपदंव्याचष्टे ॥ प्रवाहतइति ॥ तुशब्दएवार्थः । अश्वत्थत्वसमुच्चयार्थश्चशब्दः । नित्यत्वसमुच्चयार्थोवा । ननुमुख्यतएवा नादिनित्यत्वंकिंनस्यादित्याशंकांपरिहर्तुंतदेवामृतमुच्यतइतिवाक्यंव्याचष्टे ॥ मुख्यतइति ॥ उच्यतइतिशेषः । श्रुतावुच्यत इत्युक्तत्वात् । तुशब्दोवधारणार्थः । हरिरेवेतिसंबंधः । अन्यस्याप्यमृतत्वात्तदेवामृतमुच्यतइतिकथमुक्तमित्यतोमुख्यतइति

भाष्यं ॥ ओं । सर्वोच्चोभगवान्विष्णुर्मूलंभूमिवदस्यतु । जगदाख्यस्यवृक्षस्यशाखादेवास्ततोवमाः । वृक्षमूलंरमादेवीसोश्वआशुगतेर्हरिः । तद्व्याप्तत्वात्तदन्नत्वादश्वत्थोयंप्रकीर्तितः । प्रवाहतस्त्वनादिश्चमुख्यतस्त्वमृतोहरिः ।

शेषोक्तिः । ननुहरिरेवमुख्यतोऽमृतइत्युक्तत्वेपितस्यमुख्यामृतत्वंकुतः । नह्युक्तमस्तीतिनियमोस्तीत्यतआह ॥ मुख्येति ॥ यतोमुख्यतोहरिरेवामृतउच्यतेश्रुत्यादावतःसएकएवमुख्यामृतइतिव्याख्येयं । उक्तमस्तीतिनियमाभावेपिश्रुत्याद्युक्तमस्तीति नियमोस्तीतिभावःकिंततइत्यतआह ॥ जगदिति ॥ यतःसएकएवमुख्यामृतस्ततोजगत्प्रवाहतएवनित्यं । न मुख्यतः । अ वधारणविरोधादित्यर्थः । यदिदंकिंचज्जगत्सर्वंप्राणएजतिनिःसृतमितिवाक्येमुख्यप्राणस्यसर्वजगच्चेष्टकत्वादिकमुच्यतइत्यसत् । अस्यपितृसौमनस्यादित्रयाणामेवप्रश्नेतदनुपन्यासेनमुख्यप्राणकथनस्यासंगतत्वात् । अतएवमहद्भयमित्युत्तरवाक्येवज्रशब्दा दुद्यतत्वलिंगाच्चेंद्रायुधमेवोच्यतेइत्यप्ययुक्तमितिभावेनतद्वाक्यद्वयंव्याचष्टे ॥ प्राणाख्यइति ॥ निमित्तसप्तमीयं । तुशब्दो वधारणार्थः । नतुमुख्यप्राणइत्यर्थः । चशब्दोप्यवधारणार्थः । निःसृतंचेतिवाचशब्दसंबंधः । अस्मादितिश्रुतौशेषोक्तिः । व ज्रवद्भयदमित्यनेनवज्रशब्दोगौण्यावृत्त्याविष्णावपिसावकाशइत्युक्तंभवति । अतएवश्रुतौमहद्भयमित्यनेनवज्रशब्दप्रवृत्तिनि मित्तगुणयोगोदर्शितः । सूत्रभाष्येतुवर्जनाद्वज्रमुच्यतइतिवज्रशब्दोयौगिकइत्युक्तं । स्वधर्मस्येत्यादिशेषोक्तिः । चशब्देनोद्य मित्वेनोद्यतंचेतिग्राह्यं । भयदमित्यस्ययेविदुरमृतास्तेभवंतीतिश्रुत्यासंबंधः । अनेनप्रसिद्धवज्रज्ञानान्मोक्षायोगेननतत्परत्वमु पपन्नमित्युक्तंभवति । यद्वावज्रवद्भयदमित्यनेनश्रुतौमहद्भयमित्युक्तभयप्रदत्वेवज्रमुद्यतमितिलुप्तोपमोच्यतइतिव्याख्यातमि तिप्रतिभाति । अस्मिन्पक्षेवज्रमुद्यतमित्येतत्प्रसिद्धवज्रपरमेव । तथापिवाक्यस्यभगवत्परत्वाविरोधात् । यद्यपितत्वप्रकाशि

भाष्यं ॥ मुख्यामृतस्सएवैकोजगन्नित्यंप्रवाहतः । प्राणाख्येतुहरौसर्वमेजत्यस्मात्तुनिस्सृतं । वज्रवद्भयदंचैवस्वधर्मस्यातिलंघने ।

कायांकंपनादितिसूत्रभाष्याद्यनुरोधेनयदिदंकिंचेत्यादिअमृतास्तेभवतीत्यंतमेकवाक्यंकृत्वाव्याख्यातं । तथापिव्याख्यानांतर मेतदित्यविरोधः । यथादर्शेतथात्मनीत्येतदन्यथाप्रतीतेःकिंचिदध्याहारेणव्याचष्टे ॥ जीवइति॥आत्मनीस्यस्यार्थो जीवइति। स्थितोभगवानितिशेषोक्तिः । सम्यक्दृश्यतइतिसंबंधः । अनेनश्रुतौपरिदृश्यतइत्यस्यैवपूर्वत्रापिसंबंधइत्युक्तंभवति । अनुपलं भबाधपरिहारायज्ञानदृष्टिभिरित्युक्तं । ऋषिभिरित्यर्थः । ऋषयोंतःप्रकाशाइतिश्रुतेः । मुखवदित्युक्त्याश्रुतौमुखमितिशेषइति सूचितं । यथास्वप्नेतथापितृलोकेइत्यस्यतात्पर्यमाह ॥ नतथेति ॥ अतएवयथास्वप्नेइतिदृष्टांतः । स्वाप्नपदार्थस्यादर्शस्थमुख वत्स्पष्टमप्रतिभानादितिभावः । नतथासम्यक्दृश्यतइत्यनेनश्रुतौदृश्यतइत्यस्यैवात्रसंबंधइतिसूचितं । यथाप्सुपरीवदृश्यतइत्ये तव्याचष्टे ॥ ततइति ॥ अनेनइवशब्दोल्पार्थइत्युक्तंभवति । अतएवाप्स्वितिदृष्टांतः । वारिस्थप्रतिबिंबस्यस्वाप्नपदार्थापेक्षया स्पष्टत्वात् । आदर्शमुखापेक्षयाचास्पष्टत्वात् । गंधर्वलोकेस्थितइतिशेषोक्तिः । उत्तमगंधर्वापेक्षयैतत् । तेनपित्रपेक्षयागंधर्वा णांनीचत्वोक्त्यानविरोधः । छायातपयोरितितयोरेवोपादानाभिप्रायंवदंस्तद्वाक्यंव्याचष्टे ॥ नात्यातपइति ॥ अत्यातपेवस्तु स्पष्टंनदृश्यते । तेनदृष्टिप्रतिहतेः । नाप्यतिच्छायायां । विषयसंस्कारकालोकाभावात् । किंतुयथैवाहनिच्छायातपयोःस्पष्टंद श्यतइत्यर्थः । नन्विंद्रियेभ्यःपराह्यर्थाइत्यादिनादेवतातारतम्यपुरःसरंभगवत्सर्वोत्तमत्वस्योक्तत्वात्पुनरींद्रियेभ्यःपरंमनइत्यादि

भाष्यं ॥ जीवेस्थितस्तुभगवान्दृश्यतेज्ञानदृष्टिभिः । आदर्शेमुखवत्सम्यङ्नतथापितृलोकगः । ततःकिंचित्स्पष्टतयागांधर्वेदृश्यतेहरिः । नात्यातपेनच्छायायांयथैवाहनिदृश्यते । स्पष्टंतथात्रह्मलोकेदृश्यतेपुरुषोत्तमइतिच ।

किमर्थमुच्यतइत्यतआह ॥ पुनरिति ॥ ज्ञानपूर्वकं ज्ञापनपूर्वकं । ज्ञाने ज्ञापने । सर्वव्यक्तिष्वभिव्यक्त्यैतात्पर्याधिक्यवित्तये । पुनर्वचनमुद्दिष्टंशतशोथपृथक्पृथगितिवचनात्पुनर्वचनंमहातात्पर्यज्ञापकमितिभावः । स्यादेतत् । यदिसर्ववेदवाक्यानांदेवतातारतम्यज्ञापनपूर्वंभगवतःसर्वोत्तमत्वज्ञापनेमहातात्पर्यमित्येतदेवस्यात् । तदेवकुतइत्यतस्तत्रप्रमाणमाह ॥ तारतम्येति ॥ नसंदृशेतिष्ठतिरूपमस्येतिभगवद्रूपस्येंद्रियागोचरत्वमुच्यते । तदयुक्तं । मत्स्यादेश्चक्षुरादिगोचरत्वादित्यतस्तदभिप्रायंप्रमाणेनाह ॥ प्रादुर्भावानिति ॥ तर्हिचक्षुरादिजन्यमत्स्याद्यवतारज्ञानेनैवमोक्षोपपत्तौहृदेत्युक्तभक्त्यादिवैयर्थ्यस्यात् । नचनावतारज्ञानंमोक्षसाधनं किंतुस्वहृदिस्थस्यवा व्याप्तस्यवा भगवतोज्ञानमेवेतियुक्तं । दृष्ट्यैवह्यवताराणांमुच्यंतेकेचिदंजसेत्युक्तेरवतारज्ञानेनापिकेषांचिन्मोक्षसद्भावादित्यतआह ॥ प्रादुर्भावानपीति ॥ योगीत्यधिकारिविशेषपरं । ज्ञानदृष्ट्याहृद्युपासनेनेत्यर्थः । हृद्युपासाजन्यापरोक्षज्ञानेनेतिवार्थः । यदापश्यतिविषयीकरोतीतिव्याख्येयं । उक्तंच येषांबहिरुपासनेनमोक्षःतेषामपिहृद्युपासनंकिंचित्कार्यमेवेति । अनेनहृदामनीषेत्यादेस्तात्पर्यमुक्तं । यथाचैतत्तथावक्ष्यते । एवकारव्यावर्त्यमाह ॥ नेति ॥ इंद्रियैर्दृष्टैःप्रादुर्भावैःक्वापिनमुच्यतइत्यर्थः । दृष्टेरितिपाठेइंद्रियैर्यादृष्टिर्जायतेतस्याःसकाशान्नमुच्यतइत्यर्थः । योगोहिप्रभवा

भाष्यं ॥ पुनरिंद्रियेभ्यःपरंमनइत्यादिदेवतातारतम्यज्ञानपूर्वकंभगवतस्सर्वोत्तमत्वज्ञानएवसर्ववाक्यानांमहातात्पर्यमितिज्ञापयितुं । तारतम्यपरिज्ञानपूर्वकंसर्वतोहरेः । आधिक्येसर्ववाक्यानांतात्पर्यमहदिष्यतइतिच । प्रादुर्भावानृतेविष्णुमिंद्रियैर्नैवपश्यति । प्रादुर्भावानपियदाज्ञानदृष्ट्यैवपश्यति । तदेवमुच्यतेयोगीन(दृष्टे)दृष्टैरिंद्रियैःक्वचिदितिच ।

प्ययाविितिसामानाधिकरण्येनोत्पत्तिविनाशावेवयोगइतिप्रतीयते तदसत् । प्रपंचनिष्ठोत्पत्तिविनाशयोःमुमुक्षुनिष्ठयोगरूपत्वासंभवात् । नचानेनयोगउत्पत्तिविनाशधर्मकइत्युच्यतइतिवाच्यं । प्रभवाप्ययशब्दस्यतद्वृतिलक्षणाप्रसंगात् । अनुपयुक्तत्वेनावक्तव्यत्वाच्चेत्यतस्तद्व्याचष्टे ॥ प्रभवाप्ययाविति ॥ प्रतियोगेद्वितीयेतिभावः । ननुप्रपंचनिष्ठप्रभवाप्ययौप्रतिकथमिंद्रियधारणारूपोयोगः । भगवंतंप्रत्येवतस्यकर्तव्यत्वादित्यतआह ॥ भगवतइति ॥ अस्तित्वस्यसर्वसाधारणत्वादस्तीत्येवोपलब्धव्यइतिकथमुच्यते । नचदेहाद्यतिरिक्तआत्मास्तिनवेतिपृष्टत्वेनतन्निरासायात्मादेहाद्यतिरिक्तोस्तीत्येवोपलब्धव्यइत्युच्यतइतिवाच्यं । तृतीयप्रश्नस्योक्तरीत्याभगवन्मात्रपरत्वेनमरणानंतरंजीवोस्तिनवेत्येवंपरत्वाभावात् । देहाद्यतिरिक्तइत्यश्रुतकल्पनापाताच्चेतिभावेनप्रमाणेनैवव्याचष्टे ॥ अधिकइति ॥ अकारआधिक्यवाची । अस्तीत्येतत्सत्तायुक्तवस्तुवाचीतिभावः । चशब्दोयस्मादित्यर्थे । यस्मादेवमस्तीतिनामकस्तस्मात् । ननुकिमर्थमस्तीत्येवोपलब्धव्यइत्यतःएवंभगवतःसर्वाधिक्यज्ञानवतएवभवद्याथात्म्यज्ञानसंभवात् । अन्यस्यतदभावादित्याह ॥ अनाधिक्यमिति ॥ जानतांसकाशात् । तेनास्तीतिब्रुवतोन्यत्रेत्येतद्व्याख्यातं । तत्वभावेनचोभयोरित्येतदन्वयाप्रतीतिनिरासायव्याचष्टे ॥ प्रकृतेरिति ॥ प्रकृतेःपुरुषाणांचेत्यनेनोभयोरित्येत

भाष्यं ॥ प्रभवाप्ययौप्रतिहियोगः । भगवतस्सकाशात्प्रभवाप्ययौ । अधिकस्ततोयंभगवांत्सर्वस्मादपिकेशवः । अस्तीतिनामकस्तस्माज्ज्ञातव्यस्सतथैवच । अनाधिक्यंजानतांतुकथंसउपलभ्यते । प्रकृतेःपुरुषाणांचतत्त्वंभावयतिस्फुटं ।

त्प्रकृतिपुरुषयोरितिव्याख्यातं । तत्वंयाथात्म्यं भावयति उत्पादयति । ननुयदितत्वभावोविष्णुस्तदातत्वभावेनास्तीत्येवोपलब्धव्यइतिकथं । विष्णोःसर्वसाधारण्येनसर्वेषामपिसदाधिक्यज्ञानप्रसंगादित्यतस्तदभिप्रायमाह ॥ तत्प्रसादादिति ॥ तुशब्दोवधारणार्थः । तेनचशब्दोव्याख्यातः । प्रसादश्चनसर्वसाधारणइतिभावः । अस्तीत्येवोपलब्धस्येत्येतद्व्याचष्टे ॥ प्रसादश्चेति ॥ तथाविदोभगवदाधिक्यविदः । ननुपूर्वंप्रसादोभगवदाधिक्यज्ञानसाधनमित्युक्तं । इदानींज्ञानंप्रसादसाधनमित्युच्यते । अतोन्योन्याश्रयइत्यतोव्यक्तिभेदान्नान्योन्याश्रयइतिभावेनाह ॥ अनादीति ॥ पुनःपुनर्वृद्धिमेति प्रसादद्वारा । नन्वनादिकालादारभ्येतिकिमर्थवक्तव्यं । पूर्वमाधिक्यज्ञानरहितस्यापिभगवत्प्रसादात्पश्चात्तज्ज्ञानंभवतीत्येवकिंनस्यादित्यतआह ॥ येषामिति ॥ पश्चाज्जायमानंप्रतिभगवत्प्रसादोहेतुः । सचभगवदाधिक्यज्ञानसाध्यइतिपूर्वमपितत्सद्भावोपेक्षितः । एवंतदपिज्ञानंभगवत्प्रसादसाध्यमित्यनादित्वमाश्रयणीयमितिभावः । ननुकेषांचिद्योग्यानांपूर्वंभगवदाधिक्यज्ञानानुपलंभेपिपश्चात्तद्दर्शनात्कथमेतदित्यतआह ॥ अभिभूतमिति ॥ अभिभवकृतोनुपलंभइतिभावः । यदासर्वेप्रमुच्यंतेकामाइत्यत्रसर्वकामत्यागउच्यतइतिप्रतीतिनिरासायमंत्रंप्रमाणेनैवव्याचष्टे ॥ अंतःकरणेति ॥ अतएवश्रुतौहृदिस्थिताइतिविशेषणं । अन्यथातद्व्यर्थस्यादिति

भाष्यं ॥ तत्वभावस्ततोविष्णुस्तत्प्रसादाच्चुतस्यहि । आधिक्यंज्ञायतेसत्तःप्रसादश्चतथाविदः । अनादिकालादाधिक्यंसर्वस्माज्जानतोहरेः । पुनःपुनर्वृद्धिमेतितज्ज्ञानंहिभवेभवे । येषामाधिक्यविज्ञानंनैवपूर्वंहरेर्भवेत् । तेषांपश्चाच्चनैवस्यादभिभूतंतुतत्पुनः । व्यंजकाव्यक्तिमभ्येतितस्मात्तज्ज्ञानमुत्तममितिच । अंतःकरणकामानांत्यागोव्यक्तिश्चिदात्मनां ।

भावः । ननुसर्वात्मनाकामत्यागएवश्रुत्यर्थःकिंनस्यात् । विशेषणस्यस्वरूपकथनपरत्वोपपत्तेरित्यतआह ॥ व्यक्तिरिति ॥ चिदात्मनांत्वित्यन्वयः । मुक्तौचिदात्मककामव्यक्तिसद्भावात्सर्वकामत्यागस्यश्रुत्यर्थत्वेबाधःस्यादित्युक्तएवश्रुत्यर्थइतिभावः । अथमर्त्योमृतोभवतीत्येतद्व्याचष्टे ॥ तदेति ॥ अथशब्दार्थस्तदेति । अमृतोभवतीत्यस्यार्थोमृतिंनैवाभियास्यतीति । यदासर्वेप्रभिद्यंतइतिमंत्रंव्याचष्टे ॥ मिथ्याज्ञानेति ॥ अनुशासनं वेदांतोपदेशः एतावत् एतावन्मात्रं । नत्वधिकमस्तीत्याशंकनीयमितिव्याख्यानमसत् । वेदांतोपदेशस्यैतावन्मात्रत्वेइतरवेदांतप्रवृत्तिवैयर्थ्यादितिभावेनैतावदनुशासनमित्येतद्व्याचष्टे ॥ तदर्थमिति ॥ मिथ्याज्ञानग्रंथिनिरासार्थंअनुशासनं । निष्कामकर्मश्रवणमननानिदिध्यासनकर्तव्यताप्रतिपादकंशास्त्रमित्यर्थः । यदुक्तंतृतीयप्रश्नपरिहारौभगवद्विषयाविति तदयुक्तं । तंस्वादितिउपसंहारवाक्येतंस्वात् आत्मीयाच्छरीरात्प्रवृहेत् पृथक्कुर्यादित्युक्त्वेनपूर्वमपिदेहभिन्नात्मस्वरूपमेवप्रश्नपरिहारविषयइत्यंगीकारौचित्यादित्यतस्तत्प्रमाणेनैवव्याख्यातुंतावच्छरीरशब्दार्थमाह ॥ शरीरभूतइति ॥ विष्णोर्भिन्नदेहाभावात्विष्णुभिन्नोजीवःकथंशरीरभूतइत्यतउक्तं ॥ तद्वशगइति ॥ यद्वाविष्णोरभिमानाभावात्कथंतच्छरीरभूतोजीवइत्यतउक्तं । तद्वशगइति । प्रसिद्धशरीरवत्तद्वशगत्वादधिष्ठानत्वगुणयोगेनैवजीवःशरीरशब्दोक्तइतिभावः । एवंशरीरशब्दार्थमुक्त्वातद्वाक्यतात्पर्यमाह ॥ विजानीयादिति ॥ ततोजीवात् । कथमिदंतात्पर्य

भाष्यं ॥ कामानांतुतदामुक्तौमृतिंनैवाभियास्यति । मिथ्याज्ञानग्रंथिभिस्तुनितरांमुच्यतेयदा । तदामृतत्वमेवैतितदर्थंचानुशासनं । शरीरभूतोविष्णोस्तुजीवस्तद्वशगोयतः । अधिष्ठितश्चतेनैवविजानीयात्पृथक्कृतः ।

मनेनलब्धमित्यतस्तद्व्याचष्टे॥स्वाख्यादिति॥प्रवृहेदित्यस्य पृथक्करणार्थत्वादनादितःपृथग्भूतस्येदानीं पृथक्करणायोगात्पृथक्वि
जानीयादितितात्पर्यमुक्तमितिभावः । जीवस्यभगवदधिष्ठितत्वतद्वशत्वाभ्यांभगवच्छरीरत्वेश्रुतिंचाह॥यस्येति॥यआत्मनितिष्ठ
न्नितिपूर्ववाक्यमप्युदाहर्तव्यं । आत्मा जीवः । एषतआत्मांतर्याम्यमृतइत्युत्तरेणान्वयः । तंस्वाच्छरीरात्प्रवृहेदित्यत्रजीवाद्भ
गवतएवभेदोभिधीयतइत्यत्रयुक्तिंचाह ॥ जनानामिति ॥ पूर्ववाक्येजनानांहृदयेसन्निविष्टइतिजनशब्दवाच्यजीवेभ्यस्तद्धृ
दयसंनिविष्टस्यभगवतएवभेदस्योक्तत्वादत्रापिजीवात्पृथग्घरिरित्येवोच्यते । नतुप्रसिद्धशरीराज्जीवःपृथगितिसिद्धमितिभावः ।
ननुजनानांहृदयेसन्निविष्टइत्युक्तत्वेपिकथंजीवाद्भगवतोभेदसिद्धिः। जीवस्यापिहृदयसंनिविष्टत्वोपपत्तेरितिचेन्न।जनानांहृदयेसन्नि
विष्टइतिहिजीवस्वरूपभूतहृदयस्थत्वमुच्यते । जनशब्दःस्वतोजीवेकचिद्देहेचवर्ततइतिवचनेनजनशब्दस्यजीवदेहोभयपरत्वात्।
नचतज्जीवस्योपपद्यते । जीवस्यदेहहृदयस्थत्वेपिस्वहृदिस्थत्वाभावात् । नन्वेवंतर्हिअंगुष्ठमात्रत्वोक्तिविरोधःस्यात् । नहिजीव
हृद्गतस्यांगुष्ठमात्रत्वंयुज्यते । जीवस्यैवाणुत्वेनांगुष्ठपरिमाणकत्वाभावादितिचेन्न। स्यादेवं।यद्यत्रजीवहृद्गतस्यदेहांगुष्ठपरिमाणकत्व
मुच्यते। नचैवं । किंतुजीवांगुष्ठपरिमाणकत्वमेवातोनविरोधइतिभावेनतत्रप्रमाणमाह॥देहेति॥ देहेहृदीतिसंबंधः।जीवस्यहृदीत्य
न्वयः । नन्वस्त्वस्मिन्वाक्येभगवतएवभेदोभिधीयतइति । किंतुस्वाच्छरीरादित्युक्तसंसारिशरीरादेव । नतुजीवादितिकिंन

भाष्यं ॥ स्वाख्याच्छरीराज्जीवात्तुप्रवृहेद्विष्णुमव्ययमितिच । यस्यात्माशरीरं । यआत्मानमंतरोयमयतीतिच । जनानांहृदयइत्युक्तत्वाच्च
जीवात्पृथग्घरिरितिसिद्धं । देहांगुष्ठमितोदेहेजीवांगुष्ठमितोहृदि । जीवस्यसतुविज्ञेयोजीवाद्भेदेनमुक्तयइतिच ।

स्यात् । शरीरशब्दस्यशरीरेमुख्यत्वात् जीवेगौणत्वात् । नहिमुख्येसंभवत्यमुख्यार्थांगीकारेकारणमस्तीत्यतआह ॥ संसारी
ति ॥ सत्यंशरीरशब्दःशरीरेमुख्यइति । तथाप्यत्रतदनंगीकारोयुक्तः । संसारिशरीरेणभगवतोऽभेदस्यकेनापिवादिनानंगीकृ
तत्वेनतद्भेदप्रतिपादनस्याप्रसक्तप्रतिषेधत्वापातात् । अतोमुख्यार्थग्रहणेबाधकसद्भावादमुख्यार्थांगीकारोयुक्तइतिभावः । ननु
वादिनानंगीकृतोपिभगवतःसंसारिशरीराभेदोलोकसिद्धोभवत्येव । तथाहि । जीवेतावद्भगवदसाधारणधर्मस्यस्वातंत्र्यादेरध्या
सोस्ति । एवंचभगवतःसंसारिशरीराभेदोलोकभ्रांतिसिद्धस्तंस्वाच्छरीरादितिश्रुत्यानिषिध्यतइतिकिंनस्यादित्यतआह ॥ नचे
ति ॥ भगवतःसंसारिशरीराभेदइतिशेषः । कुतइत्यतआह ॥ जनानामिति ॥ सत्यमस्तिभगवतःसंसारिशरीराभेदोलोक
सिद्धः । तथापिनासावत्रनिषिध्यते । जनानांहृदयइतिपूर्ववाक्यएवभगवतोजीवदेहहृद्गतत्वोक्त्यासंसारिशरीरभेदस्योक्तत्वेनत
न्निषेधस्यजातत्वात् । अत्रापितन्निषेधेपुनरुक्त्यापातादितिभावः । अभ्युपेत्यचेदमुदितं । जीवेभगवद्धर्मस्वातंत्र्याद्यध्याससद्भा
वेपिशरीराभेदाध्यासाभावस्यान्यत्रोक्तत्वेनभगवतिसंसारिशरीराभेदस्यलोकसिद्धत्वाभावादितिमंतव्यं । भगवतःसंसारिशरीरा
भेदोवादिनानंगीकृतोपिलोकसिद्धोनिषिध्यतइतिकिंनस्यादित्यतआह ॥ नचेति ॥ भगवतोजीवाद्भेदेजनानांहृदयेसंनिविष्टइ
त्युक्तामुपपत्तिंस्फुटयति । जनानामिति । जनानांहृदयेनिविष्टइतिषष्ठ्यानिविष्टस्यभगवतोजीवाद्भेदप्रतीतेरित्यर्थइत्यप्याहुः ।
ननुमास्तुतंस्वादित्यत्रभगवतःसंसारिशरीराद्भेदउच्यतइति । तथापिजीवस्यैवशरीराद्भेदउच्यतइतिकिंनस्यात् । जीवेश्वरशरी

भाष्यं ॥ संसारिशरीरेणाभेदोवादिनाकेनापिनांगीकृतः । नचलोकसिद्धः । जनानामितिभेदात् ।

राभेदस्यचार्वाकादिभिरंगीकारात् । एवंचशरीरशब्दमुख्यार्थात्यागोपीतिचेन्न । तंस्वादितिशब्देनपूर्वार्धप्रकृतस्यैवपरामर्शात् । नचपूर्वार्धप्रकृतोजीवः । तत्रांगुष्ठमात्रइत्यंगुष्ठमात्रत्वोक्तेः । नचजीवेतद्युक्तं । तस्यअणुपरिमाणत्वेनदेहांगुष्ठमितत्वस्यस्वांगुष्ठमितत्वस्यचासंभवादितिभावेनाह ॥ नजीवइति ॥ सर्वगतस्यापिविष्णोरंगुष्ठमात्रत्वंहृद्यपेक्षयातुमनुष्याधिकारत्वादितिसूत्रकृतोपपादितमनुसंधेयं । तंस्वाच्छरीरादितिवाक्यव्याख्यानमुपसंहरति ॥ अतइति ॥ उक्तरीत्यार्थांतरस्यासंभवादित्यर्थः । तंस्वाच्छरीरादित्यत्रेतिशेषः । इदानीमशेषोपनिषदर्थमुपसंहरति ॥ अतःसर्वोत्तमइति ॥ प्रागुक्तगुणजातस्यसर्वोत्तमत्वंविनाऽसंभवादितिभावः ॥ इतिद्वितीयाध्यायेतृतीयावल्ली ॥ २ ॥ ३ ॥ एषजगद्वृक्षऊर्ध्वमूलः ऊर्ध्वःसर्वोच्चोविष्णुर्मूलंभूमिवत्यस्यसऊर्ध्वमूलः । ऊर्ध्वा ब्रह्मादिसर्वोच्चारमा मूलंवृक्षमूलवत्यस्यसऊर्ध्वमूलः । अर्वाक्शाखः अर्वाक्ततोवमादेवाः शाखायस्यसोर्वाक्शाखः । अश्वत्थः आशुगमनादश्वनामकोहरिस्तद्व्याप्तत्वात्तदन्नत्वाद्वाश्वत्थः । सनातनः प्रवाहतोऽनादिनित्यः । जगन्मूलभूतभगवन्माहात्म्यमेवाह ॥ तदेवेति ॥ व्याख्यातं । एतद्वैतत् ॥ १ ॥ यदिदंकिंचतत्सर्वंजगत्प्राणाख्येहरौ एजतिकंपते । तस्मादेवनिःसृतं । एतत्ब्रह्मोद्यतंवज्रं तदुपपादनायोक्तंमहद्भयमिति उद्यतवज्रवन्महाभयप्रदं । स्वधर्मातिलं

भाष्यं ॥ नजीवोंगुष्ठमात्रः । अतोविष्णोर्जीवाद्भेदउक्तः । अतस्सर्वोत्तमोविष्णुरितिसिद्धं ॥ २ ॥ ३ ॥

उप० ॥ ऊर्ध्वमूलोऽर्वाक्शाखएषोश्वत्थस्सनातनः । तदेवशुक्रंतद्ब्रह्मतदेवामृतमुच्यते । तस्मिँल्लोकाश्रितास्सर्वेतदुनात्येतिकश्चन । एतद्वैतत् ॥ १ ॥ यदिदंकिंचजगत्सर्वंप्राणएजतिनिस्सृतं । महद्भयंवज्रमुद्यतंयएतद्विदुरमृतास्तेभवंति ॥ २ ॥

घनइतिशेषः । येविदुस्तेमुक्ताभवंति ॥२॥ भयप्रदत्वमेवदर्शयति ॥ भयादिति॥ इंद्रश्चवर्षति । वायुश्चपवते ॥३॥ एतद्भगवद्भेदनंमनुष्यजन्मप्राप्तावेवसंपादनीयमन्यत्रालाभादितिभावेनतस्यफलमाह ॥ इहचेदिति ॥ यदीहमनुष्यजन्मनिशरीरस्यविस्रसोविस्रंसनात्प्राक् बोद्धुंभगवत्तत्वादिकंज्ञातुमशकत्समर्थोजात स्तर्हिस्वर्गेषुस्वरूपभूतरमणज्ञानात्मकेषुवैकुंठानंतासनश्वेतद्वीपेषुशरीरत्वाय चिन्मयशरीरत्वायकल्पतेसमर्थोभवति । अतःशरीरपातात्पूर्वमेवभगवज्ज्ञानाययत्नःकार्यइतिभावः ॥ ४ ॥ बोद्धुमित्युक्तोबोधोनसर्वेषामेकप्रकारइतिभावेनाह ॥ यथेति ॥ परिदृश्यतइतिवक्ष्यमाणमत्रापिसंबध्यते । यथाऽऽदर्शेमुखंपरिदृश्यतेसम्यक्दृश्यते तथात्मनिस्थितोभगवान्ज्ञानदृष्टिभिर्ऋषिभिःपरिदृश्यतेसम्यक्दृश्यतइत्यर्थः । यथास्वप्नेस्वप्नावस्थायांस्थितःपदार्थोदृश्यतेतथापितृलोकेस्थितोभगवान्दृश्यते । पूर्वंपरिदृश्यतइत्यस्याकर्षणमत्रतुदृश्यतइत्यस्यैव । तेनऋषिज्ञानात्पितृज्ञानस्यासम्यक्त्वंलभ्यते । अतएवयथास्वप्नइतिदृष्टांतोक्तिः । स्वाप्नपदार्थस्यादर्शस्थमुखवत्स्पष्टत्वाभावात् । यथाप्सुस्थितःपदार्थःपरीवदृश्यतेस्वाप्नपदार्थात्किंचित्स्पष्टतयादृश्यते तथागंधर्वलोकेस्थितोभगवान्परीवदृश्यते । ततःकिंचित्स्पष्टतयादृश्यते । छायातपयोरिव नात्यातपेनच्छायायां किंत्वहनिच्छायातपयोर्विद्यमानंवस्तुयथास्पष्टंदृश्यतेतथाब्रह्मलोकेस्थितःपुरुषोत्तमोदृश्य

उप ॥ महद्भयंवज्रमुद्यतंयएतद्विदुरमृतास्तेभवंति ॥ २ ॥ भयादस्याग्निस्तपतिभयात्तपतिसूर्यः । भयादिंद्रश्चवायुश्चमृत्युर्धावतिपंचमः ॥ ३ ॥ इहचेदशकद्बोद्धुंप्राक्शरीरस्यविस्रसः । ततस्स्वर्गेषुलोकेषुशरीरत्वायकल्पते ॥ ४ ॥ यथाऽऽदर्शेतथात्मनियथास्वप्नेतथापितृलोके । यथाऽप्सुपरीवदृश्यतेतथागंधर्वलोके । छायातपयोरिवब्रह्मलोके ॥ ५ ॥

ते ॥ ५ ॥ नकेवलंभगवज्ज्ञानमेवमोक्षहेतुरपितुदेवतातारतम्यादिज्ञानमपीत्याह ॥ इंद्रियाणामिति ॥ पृथक्उत्पद्यमानानां विलक्षणतयोत्पद्यमानानांपृथक्व्यापारोत्पादकानांवा । इंद्रियाणामिंद्रियदेवानां । प्रागुक्तोपलक्षणमेतत् । पृथग्भावमन्योन्य विलक्षणत्वं तारतम्यमितियावत् । यत्यावुदयास्तमयौउत्पत्तिविनाशौतौचमत्त्वाधीरोनशोचति ॥ ६ ॥ ननुकथमिंद्रियादिदेवतातारतम्यादिज्ञानाच्छोकत्यागस्तस्याभगवज्ज्ञानत्वादित्यतस्तदेवविशदयति ॥ इंद्रियेभ्यइति ॥ इंद्रियेभ्यइत्यनंतरं परा ह्यर्थाअर्थेभ्यइतिग्राह्यं । सत्त्वंबुद्धिः । अधिअधिकः ॥ ७ ॥ पुरुषएवेत्यन्वयः । अलिंगोऽनुमापकरहितःजडशरीररहितोवा । किंततइत्यतआह ॥ तंज्ञात्वेति ॥ मुच्यतेसंसारात् । अमृतत्वंस्वरूपाविर्भावरूपंमोक्षं । तारतम्यांतर्गतत्वेनभगवज्ज्ञानमेव शोकत्यागहेतुरितिप्राग्विवक्षितं । अतोनदोषइतिभावः । एवमुदयास्तमयकर्तृत्वेनभगवज्ज्ञानमेवविवक्षितमित्यपिद्रष्टव्यं ॥८॥ तंज्ञात्वेत्युक्तभगवज्ज्ञानंनचक्षुरादिनानायासेनभवति । किंतुश्रवणाद्युपोद्बलितमनसैवेत्याह ॥ नेति ॥ अस्यभगवतोरूपंमत्स्याद्यवतारातिरिक्तमंतर्याम्यादिरूपंसंदृशेसम्यग्दर्शनायनतिष्ठति । अनायासेनदर्शनगोचरोनभवतीत्यर्थः । कुतः कोपिएनंभगवं

वेदेशी० खंडार्थः २ । ३

उप ॥ इंद्रियाणांपृथग्भावमुदयास्तमयौचयत् । पृथगुत्पद्यमानानांमत्त्वाधीरोनशोचति ॥ ६ ॥ इंद्रियेभ्यःपरंमनोमनसस्सत्त्वमुत्तमं । सत्वादधिमहानात्मामहतोव्यक्तमुत्तमं ॥ ७ ॥ अव्यक्तात्पुरुषःपुरुषोव्यापकोऽलिंगएवच । तंज्ञात्वामुच्यतेजंतुरमृतत्वंचगच्छति ॥ ८ ॥ नसंदृशेतिष्ठतिरूपमस्यनचक्षुषापश्यतिकश्चिदेनं ।

॥ ५५ ॥

तंचक्षुषानपश्यति । उपलक्षणमेतत् । कथंतर्हितज्ज्ञानमित्यतआह ॥ हृदेति ॥ हृदास्नेहेन स्नेहयुक्तेन मनीषामनीषया श्रवणादिजनितज्ञानेन तत्सहकृतेन मनसाअभिक्लृप्तोविषयीकृतोध्यातःसंदृशेतिष्ठतीत्यर्थः । एवंज्ञानफलमाह ॥ यएनमिति ॥ नचावतारोपासकानांभक्त्यादिवैयर्थ्यं । यतोस्यरूपंरामकृष्णाद्यवताररूपंसंदृशेनतिष्ठति । अनायासेनमोक्षहेतुसाक्षात्कारविषयोनभवति । कुतःकोपिएनंमोक्षार्थंचक्षुषानपश्यति । किंतुहृदामनीषामनसाभिक्लृप्तःसंदृशेतिष्ठतीत्यपिख्याख्येयं ॥ ९ ॥ हृदामनीषामनसाभिक्लृप्तइत्युक्तभक्त्यादावप्रमत्तेनभवितव्यमितिभावेनाप्रमत्तःकदाभवेदित्याकांक्षायामिंद्रियनियमनावस्थायामेवेत्याह ॥ यदेति ॥ यदाज्ञाननिज्ञानसाधनानिपंचेंद्रियाणिचक्षुरादीनिमनसासहावतिष्ठंते । नविषयाभिद्रवणंकुर्वंति । बुद्धिश्च नस्वविषयेविचेष्टते । अप्रमत्तस्तदाभवतीतियोज्यं । इंद्रियधारणांस्तौति ॥ तामिति ॥ तामिंद्रियधारणांपरमगतिसाधनत्वात्परमांगतिमाहुः ॥ १० ॥ ननुयोगस्यैवपरमगतित्वोक्तेःकथमेतदित्यतआह ॥ तांयोगमिति ॥ इंद्रियधारणारूपोपियोगःकमुद्दिश्यकर्तव्यइत्यतआह ॥ योगइति ॥ भगवतःसकाशाज्जगतःप्रभवाप्ययौप्रतियोगःजगत्प्रभवाप्ययकर्तारंभगवंतंप्रतियोगःकर्तव्यइत्येतत्प्रसिद्धमितिभावः ॥ ११ ॥ नचक्षुषापश्यतीत्युक्तमुपलक्षणमितिभावेनाह ॥ नैवेति ॥ प्राप्तुंज्ञातुं । तर्हिकथं

उप ॥ हृदामनीषामनसाभिक्लृप्तोयएनंविदुरमृतास्तेभवंति ॥ ९ ॥ यदापंचावतिष्ठंतेज्ञानानिमनसासह । बुद्धिश्चनविचेष्टतितामाहुःपरमां गतिं ॥ १० ॥ तांयोगमितिमन्यंतेस्थिरामिंद्रियधारणां । अप्रमत्तस्तदाभवतियोगोहिप्रभवाप्ययौ ॥ ११ ॥ नैववाचानमनसाप्राप्तुंशक्योन चक्षुषा ।

तज्ज्ञानंभवतीत्यतःसद्गुरूपदेशेनैवेतिभावेनव्यतिरेकमाह ॥ अस्तीति ॥ भगवानस्तिसतोधिकत्वादस्तिनामकइतिब्रुवतोगुरो रन्यत्रान्येषां भगवदनाधिक्यंजानतांसकाशात्कथंतद्ब्रह्मोपलभ्यते । नकथमपि । भगवदाधिक्यंजानतएवगुरोरुपदेशेनब्रह्म ज्ञानं । नतदनाधिक्यंजानतइतिभावः । यद्वावागादिनाकुतोनप्राप्तुंशक्योभगवानित्यतोभगवदनाधिक्यज्ञानित्वादितिभावेना ह ॥ अस्तीति ॥ अन्यत्रेत्येतत्नञर्थकंव्यत्यासेनयोज्यं । तेननास्तीतिब्रुवतइतिलभ्यते । भगवान्सतःसर्वस्मात्अधिकोनभ वतीतिज्ञानपुरस्सरंब्रुवतः । कर्तरिषष्ठी । कथंतदुपलभ्यते नकथमपीत्यर्थः ॥ १२ ॥ यतएवमनाधिक्यंजानतांभगवज्ज्ञानाभा वः. अतोभगवानस्तीत्येव सतःसर्वस्मादधिकइत्येवोपलब्धव्यः । साचोपलब्धिर्भगवत्प्रसादादेवेत्याह ॥ तत्त्वभावेनेति ॥ उभयोःप्रकृतिपुरुषयोस्तत्त्वंभावयतीतितत्वभावोविष्णुस्तेनतत्वभावेनप्रसन्नेनविष्णुनैवास्तीत्युपलभ्यतइतिशेषः । विष्णुप्रसाद साध्यभगवदाधिक्यज्ञानवतःफलमाह ॥ अस्तीति ॥ भगवानस्तीत्येवोपलब्धस्योपलब्धिमतस्तत्वभावोविष्णुर्विशेषतःप्रसी दति ॥ १३ ॥ भगवद्विशेषप्रसादेसतिकिंभवतीत्यतआह ॥ यदेति ॥ यदास्यज्ञानिनोभगवत्प्रसादाद्धृदिस्थिताअंतःकरणा श्रिताःकामास्तेसर्वेप्रमुच्यंते सवासनाउच्छिद्यंते अथतदामर्त्योमरणादिधर्मकोपिअमृतोभवति मृतिंनैवाभियास्यतीति । अत्र मुक्तौ ब्रह्मसमश्नुते ब्रह्मविषयदर्शनादिभोगान्करोतीत्यर्थः ॥ १४ ॥ हार्दसर्वकामत्यागोपितद्धेतुमिथ्याज्ञानग्रंथिप्रभेदएवभव

उप ॥ अस्तीतिब्रुवतोन्यत्रकथंतदुपलभ्यते ॥ १२ ॥ अस्तीत्येवोपलब्धव्यस्तत्वभावेनचोभयोः । अस्तीत्येवोपलब्धस्यतत्त्वभावःप्रसीदति ॥ १३ ॥ यदासर्वेप्रमुच्यंतेकामायेस्यहृदिस्थिताः । अथमर्त्योऽमृतोभवत्यत्रब्रह्मसमश्नुते ॥ १४ ॥

तीतिभावेनाह ॥ यदेति ॥ यद्वाभगवत्प्रसादेनापिकिंभवति । मोक्षइतिचेन्न । अनेकविषयकामानांप्रतिबंधकानांसत्त्वेनामृ तत्वायोगादित्यतआह ॥ यदेति ॥ अथापिमिथ्याज्ञानाश्रयाविद्याहंकारकर्मणांप्रतिबंधकानांसत्त्वात्कथंमोक्षइत्यतआह ॥ य देति ॥ इहशरीरेवर्तमानाःहृदयस्यहृदयनस्यहृत्स्थस्यमिथ्याज्ञानस्यग्रंथयःआश्रयाःकारणीभूताइतियावत् । अविद्याहंकारक र्माणियदाप्रभिद्यंतेनितरांभिद्यंते । अथतदैवमर्त्योऽमृतोभवति । मोक्षमेवस्तौति ॥ एतावदिति ॥ एतदर्थमेवसर्ववेदानुशा सनंप्रवृत्तं । तेषांदुःखप्रहाणायश्रुतिरेषाप्रवर्ततइत्युक्तेरितिभावः ॥ १५ ॥ अमृतत्वप्राप्तिस्तुब्रह्मनाड्योत्क्रमणएवभवतिनान्य थेत्याह ॥ शतमिति ॥ शतंचैकाचहृदयस्यनाड्यःसंति । तासांमध्येएकाप्रधानानाडीहृदयमारभ्यमूर्धानमभिनिःसृता । त यानाड्याऊर्ध्वमायन्नमृतत्वंमोक्षमेति । अन्यानाड्योविष्वगुत्क्रमणे तादर्थ्यसप्तमी लोकांतरगमनार्थंभवंतीत्यर्थः ॥ १६ ॥ सर्व थाजीवेश्वरभेदज्ञानमेवमोक्षसाधनमितिभावेनाह ॥ अंगुष्ठमात्रइति ॥ अंगुष्ठमात्रोजीवांगुष्ठमितोदेहांगुष्ठमितोवाजनानांहृ दयेजीवस्वरूपहृदये बाह्यहृदयेवा सदासंनिविष्टोयोंतरात्मा । तंविष्णुं स्वात् स्वाख्यात् शरीरात्भगवद्भशत्वादिना शरीररूपा ज्जीवात् धैर्येण प्रमाणाभासाचलितबुद्ध्याप्रवृहेत्पृथक्जानीयात् । किमिवेत्युच्यते । बाह्यान्मुंजादंतस्थामैषीकामिवेति । कुतो

उप ॥ यदासर्वेप्रभिद्यंतेहृदयस्येहग्रंथयः । अथमर्त्योऽमृतोभवतिएतावदनुशासनं ॥ १५ ॥ शतंचैकाचहृदयस्यनाड्यस्तासांमूर्धानमभिनि स्सृतैका । तयोर्ध्वमायन्नमृतत्वमेतिविष्वगन्याउत्क्रमणेभवंति ॥ १६ ॥ अंगुष्ठमात्रःपुरुषोंतरात्मासदाजनानांहृदयेसन्निविष्टः । तंस्वाच्छरीरात्प्र वृहेन्मुंजादिवेषीकांधैर्येण ।

यंजीवाज्ज्ञेदेनज्ञेयइत्यतोविरुद्धधर्माधिकरणत्वादितिभावेनोपसंहरति ॥ **तमिति** ॥ अध्यायांतेद्विरुक्तिःस्याद्वेदेवावैदिकेपिवा । विचारोयत्रसज्येतपूर्वोक्तस्यावधारणइतिवचनात् सर्वाध्यायार्थावधारणार्थाध्यायांतेद्विरुक्तिः ॥१७॥ एवंमृत्युप्रोक्तांविद्यांप्राप्तव तानचिकेतसाविद्याफलंलब्धमित्याहवेदपुरुषः ॥ **मृत्युप्रोक्तामिति** ॥ नाचिकेतो नचिकेताएवनाचिकेतोमृत्युप्रोक्तामेतांवि द्यां । कृत्स्नमिंद्रियधारणादिरूपयोगविधिंचलब्ध्वाब्रह्मप्राप्तो विरजोनिर्दुष्टोविमृत्युरभवत् । एवमन्यस्यापितन्निष्ठस्यतत्फलम तिदिशति ॥ **अन्योपीति** ॥ अन्योप्यधिकारी । अध्यात्मं अधिकात्मभगवत्स्वरूपमेवमेव पूर्वोक्तप्रकारेणैववित्सोपिब्रह्मप्रा प्तोविरजोविमृत्युर्भविष्यतीत्यर्थः ॥ १८ ॥ एवंयत्प्रसादात्यत्प्रीत्यैचेदंभाष्यमुपक्रम्यसमापितवांस्तमेवभगवंतमंतेपिस्तुतिन तिभ्यांप्रीणयतिभगवानाचार्यः ॥ **नमइति** ॥ प्रभविष्णवे प्रभवनशीलायेत्यशेषमतिमंगलं ॥ १ ॥ गुरुस्थानंदतीर्थार्यहृत्पंकज गतोहरिः । निर्दोषगुणसंपूर्णःप्रीयतामिंदिरापतिः । प्रीतस्सभगवान्विष्णुर्यद्दद्यात्फलमुत्तमं । तत्सर्वंगुरवेदद्यान्नमह्यंकिंचिदप्यृ तं ॥ २ ॥ ३ ॥ **इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितस्यकाठकोपनिषद्भाष्यस्यटीकायांश्रीमद्वेदव्यास तीर्थपूज्यपादशिष्यवेदेशभिक्षुविरचितायांपदार्थकौमुद्यांद्वितीयोध्यायः ॥ २ ॥**

उप ॥ तंविद्याच्छुक्रममृतंतंविद्याच्छुक्रममृतमिति ॥ १७ ॥ मृत्युप्रोक्तांनाचिकेतोथलब्ध्वाविद्यामेतांयोगविधिंचकृत्स्नं । ब्रह्मप्राप्तोविरजोभू द्विमृत्युरन्योप्येवंयोविदध्यात्ममेव ॥ १८ ॥ द्वितीयाध्यायस्यतृतीयावल्ली ॥ २ ॥ ३ ॥ इतिश्रीकाठकोपनिषत्संपूर्णा ॥

भाष्यं ॥ नमोभगवतेतस्मैविष्णवेप्रभविष्णवे । यस्याहमाप्तआप्तेभ्योयोमआप्ततमस्सदा ॥ १ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचि तेश्रीकाठकोपनिषद्भाष्येद्वितीयोध्यायः ॥ २ ॥

अयं ग्रंथः कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागर-
मुद्रणालये मुद्रयित्वा प्रकाशितः. शके १८२७, सन १९०५.

॥ काठकवेदेशीयटीकासंपूर्णा ॥

॥ काठकव्यासतीर्थीयटीकाप्रारंभः ॥

श्रीमद्भनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ हरिः ॐ ॥ यत्पदंमुनिभिर्ध्यातंवेदांतश्रांतमानसैः । वंदेतंपरमात्मानंविष्णुंश्रीमध्ववल्लभं ॥ १ ॥ योदेवःपरमत्वेनसर्वदेवैरुपास्यते । हृदयेवामनाख्यंतंवंदेश्रीमध्ववल्लभं ॥ २ ॥ इहामुत्रभोगविरक्तस्यशमदमादिमतोमुमुक्षोरधिकारिणोऽनिष्टनिवृत्तीष्टावाप्तिसाधनप्रतिपादिकांकाठकोपनिषदंयथावद्व्याचिख्यासुर्भगवानानंदतीर्थमुनिरादौमंगलाचरणंचिकीर्षितपरिसमाप्त्यादिकारणमित्याशयवांस्तदुक्तगुणवत्तयाभगवंतंस्तुवन्प्रणमति ॥ नमइति ॥ सर्वतःपरमत्वंइंद्रियेभ्यःपराइत्यारभ्याव्यक्तात्पुरुषःपरइत्यंतेनोक्तं । अंगुष्ठमात्रःपुरुषोमध्यआत्मनितिष्ठतीत्यत्रसर्वप्राणिहृदिस्थितत्वं मध्येवामनमासीनमितिवामनत्वंचोक्तं । भक्त्याद्याधिक्यद्योतकेननमनाभ्यासेनतद्युक्तमेवमंगलाचरणंचिकीर्षितसमाप्त्यादिकारणमितिसूचयति । यमादेर्ऋषित्वावगमाच्छंदसोक्षरगणनयावगतिसंभवान्नतदुक्तिः । नकेवलंब्रह्मविद्यामोक्षैकफला किंतुपुष्पनिभस्वर्गफलापिभवतीत्याशयवाञ्श्रोतुःश्रद्धाजननायब्रह्मविद्यामाख्यायिकयाहवेदपुरुषः ॥ उशन्नित्यादिकया॥ उशन्स्वर्गादीच्छन् ॥ १ ॥ पीतमेवोदकंयाभिर्नतुपातव्यमस्ति । जग्धमेवतृणंनतुजग्धव्यमस्ति दुह्यतइतिदोहःक्षीरं दुग्धएवदोहोनतुदोग्धव्यमस्तियासांतास्तथोक्ताः । नविद्यतेनंदःसुखंयेषुतेअनंदाः तान्सगच्छतितादददितिमन्वानःसपितरमुवाच । द्वितीयंतृतीयं द्विवारंत्रिवारंचोवाच ॥ ३ ॥ मृत्यवेत्वाददानीतिम्रियस्वेतिशशप्तश्चाह ॥ बहूनामित्यादि ॥ बहूनांमृतानांमध्येहंप्रथमोयममेमि तदायमस्यमयाकर्तव्यंकिमासीद्यत्करिष्यतीत्यादियोजना ॥ ४ ॥ विद्यमानस्यैवमरणस्यदत्तत्वान्नतत्रममक्लेशइत्याह ॥ अनुपश्येति ॥ पूर्वेयथामृतास्तदनुपश्य तथापरेभविष्यंतीतिप्रतिपश्य । देहिनोमरणंनियतमित्युक्तमर्थंद

ष्टांतेनाह ॥ सस्यमिति ॥ समृतोयमसदनंगतः ॥ ५ ॥ तदायमोलोकांतरादागतः । आगतंयमंभार्योवाचेतिवैश्वानरइत्यस्य प्राग्ग्राह्यं । अतिथिर्ब्राह्मणोवैश्वानरःसन्गृहान्प्रविशतीतियोजना । एतांश्रुत्वाद्युक्तां ॥ ६ ॥ अतिथिपूजाऽकरणेनिष्टमाह ॥ आशेति॥ आशाप्राप्तेच्छा । अप्राप्तेच्छाप्रतीक्षा । संगतंसुहृत्संगतिं॥७॥ भार्योक्तोयमोर्घ्यादिपूजांकृत्वावक्ति॥तिस्रइति ॥ तस्मात्प्रति तस्यप्रतीकारायत्रीन्वरान्वृणीष्व ॥ ८ ॥ वरान्वृणोति ॥ शांतेत्यादिना ॥ मदनिष्टेशांतसंकल्पःमाभिमांप्रतिवीतमन्युरपगतकोपः । त्वत्प्रसृष्टंत्वयाप्रेषितं प्रतीतःप्रत्यभिज्ञावान् । यथेतिसर्वत्रानुवर्तनीयं ॥ ९ ॥ प्रत्यभिज्ञापूर्वंतंवरंददाति ॥ यथेति ॥ पुरस्ताद्रामांतरादागतेत्वयियथाप्रतीतोभवतितथामत्प्रसृष्टःमयाप्रेरितः। उद्दालकस्यापत्यमौद्दालकिः । अरुणायाअपत्यमारुणिः । प्रतीतोभवति ॥ १०॥ स्वर्ग्याग्निस्वरूपज्ञानलक्षणंद्वितीयंवरंयाचितुंहेतुतयातत्फलस्वर्गस्वरूपंनिरूपयति ॥ स्वर्गइति ॥११॥ स्वर्ग्यंस्वर्गसाधनंअध्येषिजानासि । ज्योतिष्टोमादावप्रवृत्तस्यरोचकफलंस्वर्गःप्रधानफलंतुमोक्षइत्याशयवानाह ॥ स्वर्गेति॥ एतद्द्वितीयेनवरेणवृणेद्वितीयंवरंवृणे ॥१२॥स्वर्गलोकाअमृतत्वंभजंतइतिज्योतिष्टोममात्रान्मोक्षःप्रतीयते सातमेवंविद्वानित्यादिश्रुतिविरुद्धा अतस्तत्प्रमाणेनघटयन्नाह ॥ अग्नाविति ॥ सत्वमग्निमित्यत्रस्वर्ग्याग्निज्ञानमात्रस्ययाचितत्वात्प्रतेब्रवीमीत्यादौतावन्मात्रस्यैवज्ञापितत्वाच्चकथमेवंव्याख्येत्याशंकामग्नाविति्रमाणेननिवृत्तामपिदार्ढ्यायनिवारयन्आदितएवप्रमाणेनव्याचष्टे ॥इच्छन्निति॥ तेईदृश्योगावोनदातव्याः । सर्वस्वदक्षिणाप्रज्ञापिमांदत्वापूरयितव्येतिबालःपुत्रस्तमुवाचेतियोजना । तमग्निंतस्मैउवाच । कथंभूतमग्निं अनंतलोकाप्तिमित्यादियोजना । तत्प्रसिद्धाग्न्यादिमात्रपरत्वप्रतीतिंनिवारयन्व्याचष्टे ॥ अथ्य

त्वादिति ॥ अनंतस्यलोकःआप्यतेयेन अनंतलोकआप्यतेयेनेतिचसोनंतलोकाप्तिरितिद्वावप्यर्थौवितितत्पदंव्याचष्टे ॥ लोकइति ॥ इष्टकासंख्यापरिमाणयोर्वक्तव्यत्वात्तयोश्चयावतीर्वायथावेत्युक्त्वाद्याइतिव्यर्थमित्यतस्तद्व्याचष्टे॥ याइति ॥ तेनोक्तेष्टकादेवताका इष्टकासंख्याचकेत्यतआह॥इष्टकेति ॥ प्रत्यवदत्अनूदितवान्॥१४॥अस्यतुष्टोमृत्युःपुनराह यदाहतत्तुष्ट्यवसरएवाह ।नतुकालांतरइत्याह॥ तमब्रवीदिति ॥ अयमग्निस्तवनाम्नैवभवितेतिवरमदात्॥१५॥स्वयंयमस्तथाप्रायुङ्क्तेत्याह ॥ त्रिनाचिकेतइति॥ नचिकेतसोयंनाचिकेतः। त्रिवारंनाचिकेतोयस्यासौत्रिनाचिकेतः । त्रिभिरेत्यसंधिमित्येतदनुवदन्नप्रतीतेर्व्याचष्टे॥त्रिभिरिति॥ वेदाविरुद्धत्वंचकेनप्रकारेणेत्यतस्तात्पर्यार्थमाह॥वेदेति ॥यजनाध्ययनदानाख्यत्रिकर्मकृदित्यन्यथाप्रतीतिनिरासायअनुवदन्व्याचष्टे ॥ त्रिकर्मकृदिति ॥ कुतोत्रयज्ञादयोर्थइत्यतस्तेषामावश्यकत्वेनोक्तत्वादित्याह ॥यज्ञेति॥ यजनादेरपिषट्कर्मत्वेनावश्यकतयोक्तत्वात्कथमेवमित्यतोयजनादेर्यज्ञादिष्वंतर्भावादितिद्रष्टव्यमित्यर्थः । त्रिकर्मकृत्त्वमात्रेणजन्ममृत्यूतरतिकिमित्यतस्त्रिभिरेत्यसंधिमित्युक्तवेदोक्तभगवत्तत्वादिकंजानंश्चेत्याह ॥ब्रह्मजज्ञमिति॥ निचाय्यविचार्यइमांवक्ष्यमाणां योविद्वानेतत्त्रयंविदित्वा एवंज्ञातप्रकारेणचिनुतेसइत्यादियोजना । तत्रत्रयमित्येतदप्रतीतेर्व्याचष्टे ॥ त्रयमिति ॥ सिंहावलोकनन्यायेनब्रह्मजज्ञपदमप्रतीतेर्व्याचष्टे ॥ ब्रह्मेति ॥ नन्वेवंतर्हिअनेकरूपपदमप्रतीयमानार्थमुर्वरितमित्यतस्तद्व्याचष्टे ॥ अनेकरूपामिति ॥ भवत्वेवंव्याख्या यदिबहुरूपशब्दस्यसुवर्णवाचित्वंसिध्येत् । तदेवकुतइत्यतोभिधानेनसमर्थयते ॥ बहुरूपमिति॥ अस्त्वनेकरूपासुवर्णमयीति । अत्रसेतिकुतइत्यतआह ॥ यमइति ॥ सत्वमग्निंस्वर्ग्यमितिस्वर्ग्यमग्निंनचिकेतइतिपृष्टमुक्तंचअ

ग्निगहरिस्वरूपमितिव्याख्यानरूपागमैःसिद्धमेव । आंतरोपपत्तिभिश्चतत्साधयतिलोकादिरित्यादिना । लोकादिरित्यादिविशेषणैश्च विशेषणानामन्यत्रासंभवात् पृष्ठोग्निरुक्तश्चभगवानेवेत्यर्थः । इतोपिनाग्निमात्रंपृष्टमुक्तंचेत्याह ॥ स्तोममहदिति ॥ उक्तरत्रपरामर्शाच्च । उरुगायनान्नोभगवतिप्रसिद्धौखलुप्रश्नपरिहारयोर्भगवत्परत्वमित्यतआह ॥ भगवतइति ॥ हिशब्देन श्रीर्यत्रारूपिण्युरुगायपादयोःकरोतिमानंबहुधाविभूतिभिरिति विचक्रमाणस्त्रेधोरुगायइतिस्मृतिश्रुतिभिःप्रसिद्धिंस्फुटयति । प्रकृतमर्थलिंगांतरेणचसमर्थयते ॥ गुहानिहितत्वंचेति ॥ विद्धित्वमेतंनिहितंगुहायामित्युक्तं गुहानिहितत्वंचतस्यैवभगवतएव । तस्याःशिखायामध्येपरमात्माव्यवस्थितइत्यादौ अत्रचमध्येवामनमासीनमित्यादौविशेषतःप्रसिद्धमित्यतोप्यग्निगहरिस्वरूपमेव पृष्टमुक्तंचेत्यर्थः । अनंतलोकाप्तित्वादिविशेषणानामन्यत्रापिघटमानत्वेकथंप्रश्नपरिहारयोर्विष्णुस्वरूपविषयत्वनिश्चयइत्यतोमैवमग्निपरिज्ञानादनंतलोकाप्तिश्रवणादित्याशयवांस्तस्याग्नावसंभवंसमर्थयितुंप्रतिजानीते ॥ नचाग्नीति ॥ कुतोग्निपरिज्ञानादेरनंतलोकास्त्यभावोवगतइत्यतआह ॥ तद्वाइति ॥ जुहोतिददाति । बहूनिवर्षसहस्राणितपस्तप्यतेतत्सर्वमंतवदेवांतवत्फलं भवतीतियोजना । ननुस्वर्गोबहुकालीनत्वादनंतइत्युच्यते तस्तत्प्रापकोग्निरप्यनंतलोकाप्तिरित्युच्यतेतःकात्रायुक्तिरित्यतआह ॥ नचेति ॥ बाधकाभावेनमुख्यार्थेसति युक्तेसति । प्रीत्यास्वदत्तंवरमवधारयति ॥ एतमिति ॥ तवैवनाम्नाप्रवक्ष्यंतिजनाः । तृतीयंवरंवरयते ॥ येयमिति ॥ प्रेतेमनुष्येप्रेरकोस्तीत्येके नायमस्तीतिचैके अतोविप्रतिपत्तेर्ममविचिकित्सासंशयोजायतइतिविचिकित्सा या यद्विषया एतदेतस्यस्वरूपं त्वयानुशिष्टोहंविद्यामितियोजना । तद्वाक्यंविदुषांविप्रतिपत्तिरितिप्रतीतिं

निवारयन्योजयति ॥ प्रेतइति ॥ मरणानंतरमपिजीवोस्तीत्येके तदनंतरंनास्तीतिचैके अतोममैवंविचिकित्साजाता एतद्विद्यामितिकेषांचिद्व्याख्या तांदूषयति ॥ अस्येति ॥ यन्नियामकंपृष्टंतदेतद्वैइतियोजना । ननुनात्रवाक्येमोक्षःप्रतीयते येनमोक्षेनियामकोस्तिकिं अस्तिनियामकइतिप्रश्नपरिहारौप्रतीमइत्यतोज्ञापकयुक्तिमाह ॥ देहादिति ॥ ननुमरणंमानुप्राक्षीरितिवचनान्मरणानंतरमपिजीवोस्तिकिमितिपृष्टमित्यवगम्यतइत्यतोयुक्तिःसावकाशेत्यतआह ॥ मुक्तेरपीति ॥ ननुदेहाद्विमुच्यमानस्येत्यस्यस्थूलदेहपरित्यागएवार्थःकिंनस्यादित्यतोविस्रंसमानस्येत्यनेनपुनरुक्तिप्रसंगान्नैषोर्थइत्याह ॥ स्थूलेति ॥ द्वितीयप्रश्नस्येवतृतीयप्रश्नस्यापिईश्वरपरत्वे अक्लेशेनाग्निस्थपरमात्मस्वरूपमुक्त्वामामोपरोत्सीरितिसंक्लिश्यशतायुषइत्यादिप्रलोभेनसर्ववेदाइत्याद्युक्तिरयुक्ता द्वयोरपिप्रश्नयोरेकविषयत्वादित्यतोद्वयोरपीश्वरविषयत्वेपिसंक्लिश्योक्तिंघटयति ॥ अग्निस्थमित्यादिना॥ जीवांतःस्थितत्वंचनाकाशस्येवेत्युक्तंनियामकमिति । तथाइंद्रियेभ्यःपराइत्यादिनोक्तान्सर्वोत्तमत्वादिगुणान्अविज्ञायवर्तमानस्यमुक्तनियामकत्वसर्वोत्तमत्वादिगुणज्ञानान्मोक्षसिद्धेः द्वितीयप्रश्नपरिहारावयुक्तावितिशंकांप्रयोजनकथनेनवारयति ॥ तथापीति ॥ ईश्वरविषयएवतृतीयोपिप्रश्नइत्यत्रज्ञापकांतरंचाह ॥ स्थाणुमिति ॥ ननुमुक्तजीवविषयश्चेत्प्रश्नःकृतस्तर्हिमुक्तानांयोन्यादिप्राप्त्यभावाद्योनिमन्यइत्याद्युक्त्वायएषुसुप्तेषुजागर्तीत्यत्रतन्नियामकत्वोक्तिर्विरुद्धेत्यतोविरोधंप्रश्नविवक्षोक्त्यापरिहरति ॥ मृतेति ॥ येयंप्रेतइत्यत्रमृतमुक्तस्थितोभयरूपोभगवान्विवक्षितः । तत्रमृतनियामकत्वमत्रोच्यतइत्येतस्मान्नविरोधइत्यर्थः । यएषुसुप्तेष्वित्यत्रजाग्रद्वर्ततेब्रह्मेत्युक्तं तत्कुतइत्यतःसमाख्यांतत्रपठति ॥ गुह्यमिति ॥ तृतीयप्रश्नविषयस्यातिदुर्ज्ञेय

त्वमाह ॥ देवैरिति ॥ विचिकित्सितंसंदिग्धं । तत्राणुःसूक्ष्मःएषधर्मइत्युक्तिःकथं भगवत्स्वरूपस्यप्रकृतत्वादित्यतस्तद्घटयन्नाह ॥ धारकत्वादिति ॥ एतस्यवरस्यतुल्योन्योवरोनास्ति । अस्यवक्ताचत्वादृगन्योनलभ्योतःत्वंब्रूहीतियोजना ॥ २१ ॥ नानाप्रलोभैरलुब्धएवास्यांविद्यायामधिकारीतिभावेनयमोगुह्यंवरंयाचमानंप्रलोभयति ॥ शतायुषइत्यादिना ॥ हस्तिहिरण्यं हस्तिनोहिरण्यंचद्वंद्वैकवद्भावः । यावज्जीवितुमिच्छसितावतीःशरदोजीव ॥ २२ ॥ त्वदीयंवरमेतत्तुल्यंयदिमन्यसेतर्होत दृणीष्व । नोचेदन्यच्चवित्तंवृणीष्व । चिरजीविकांक्षेत्रंचवृणीष्व । एधि एधस्व । शास्वेतियावत् ॥ २३ ॥ कामानांमध्येकामभाजंकरोमीत्युक्तमेवविशदमाह ॥ येयइति ॥ छंदतइच्छानुसारतः । इमारूपादिगुणवतीःलोकस्थाइतिवा । परिचारयस्व सेव्योभव ॥ २४ ॥ एवंप्रलोभितोनचिकेताःशतायुषइत्यादेरुत्तरमाह ॥ श्वइति ॥ अंतक मर्त्यस्ययदेतत्यएतेपुत्रादयः ते श्वोऽभावाःश्वोसंतः । स्वरक्षणप्रयासेनसर्वेंद्रियाणांतेजश्चजरयंति । स्वयंचजीवेत्यस्योत्तरमाह ॥ अपीति ॥ सर्वमपीत्यपिशब्दसंबंधः । इमारामाइत्यस्योत्तरमाह ॥ तवैवेति ॥ २५ ॥ वृणीष्ववित्तमित्यस्यउत्तरमाह ॥ नवित्तेनेति ॥ देवेदृष्टेपृथग्वित्तायुःप्रार्थनंनकार्यमेव तयोरनुषंगसिद्धत्वात्इत्याह ॥ लप्स्यामहइति ॥ आयुषःस्वयमीश्वरत्वाच्चनतत्पृथग्वरणीयमित्याह ॥ जीविष्यामइति ॥ २६ ॥ अजीर्यतामृतानांदेवानांसकाशमेत्यमर्त्योजीर्यन्क्वाधस्थोपकृष्टश्चक्वेतिलप्स्यामहइत्यादिविवृण्वतोक्तं । दीर्घजीवनस्योक्तदुःखहेतुत्वाच्चनैतद्वरणीयमित्याह ॥ अभिध्यायन्निति ॥ निवृत्तान्वर्णरतिप्रमोदान् ॥ २७ ॥ इदं प्रेतेमनुष्येप्रेरकोस्तीतिनास्तीत्युक्तप्रकारेणयस्मिन्विचिकित्संतिसंदिग्धाभवंति । वरोवरविषयःगूढंगूढत्वं । मर

णस्या(नुपक्रां)प्रकृतत्वात्मरणंमानुप्राक्षीरित्युक्तिःकथमित्यतस्तद्घटयन्नाह ॥ मरणइति ॥ अप्रतीतेःसांपरायशब्दार्थमाह ॥ सांपरायइति ॥ सांपरायशब्दस्यश्रेयोवाचित्वात्कथंमुक्त्यर्थोव्याख्यातइत्यतउक्तं ॥ महतीति ॥ महत्त्वविशेषणान्मुक्त्यर्थोव्याख्यातइत्यर्थः ॥ २८ ॥ इतिश्रीमत्काठकव्यासतीर्थीयेप्रथमाध्यायस्यप्रथमावल्ली ॥१॥१॥ दीयमानमपिपुत्रादिकंप्रेयोपरनामानंपरित्यज्यश्रेयोपरनाम्नींब्रह्मविद्यामभ्यर्थयमानंप्रशंसितुंश्रेयसःप्रेयसःसकाशात्कोविशेषः येनतदभ्यर्थयमानःप्रशस्यतइत्यतःश्रेयसोमोचकत्वात्प्रेयसोबंधकत्वात्इत्याह ॥ अन्यदित्यादिना ॥ इवशब्देनजानतांश्रेयःप्रेयसोरेकत्वंसूचयतिअन्यत्वमेवदर्शयति । तेउभेनानार्थेभिन्नप्रयोजनेइति । सिनीतःबध्नीतः । षिञ्बंधनइतिधातोः । प्रेयएवबंधकत्वेननिरूपितं अर्थादिति ॥ १ ॥ तयोरित्युक्तप्रकारेणश्रेयसःसाधुहेतुत्वात्प्रेयसोबंधकत्वाद्धीरोविवेकतःश्रेयोवृणीयादित्याह ॥ श्रेयश्चेति ॥ मनुष्यंआइतःएतःमनुष्यंबंधकत्वेनप्राप्यतिष्ठतः । धीरस्तौसंपरीत्यज्ञात्वाविविनक्तिविवेचयति । विवेकंकृत्वाधीरःप्रेयसःप्रेयोभितोवज्ञायश्रेयोवृणीते । प्रेयएवदर्शयितुमुक्तंयोगक्षेमान्कुशलानिति ॥ २ ॥ यत्प्रशंसार्थश्रेयःप्रेयसोःस्वरूपंनिरूपितं तमिदानींप्रशंसति ॥ सत्वमिति ॥ मयाप्रलोभितोपित्वंकामानांदोषानभिध्यायन्वित्तमयींसुवर्णमयीं । तस्यारम्यत्वाभावान्नावाप्तइत्यतउक्तंयस्यामिति ॥ ३ ॥ योगक्षेमानितिसत्वंप्रियानितिचप्रेयसःस्वरूपंनिरूपितं । सांप्रतमुभयस्वरूपंस्पष्टंनिरूपयति ॥ दूरमिति ॥ विपरीतेविरुद्धेइत्युक्तंविरुद्धत्वमेवविवरीतुमुक्तंविषूचीविरुद्धगतिहेतूइति । लोलुपंतोलोलुपयंतःप्रलोभयंतीतियावत् ॥ ४ ॥ श्रेयःकामःश्रेयानितिभावेनप्रेयःकामान्निंदयति ॥ अविद्यायामिति ॥ स्वयंधीराःआत्मानंस्वयमेवधीरान्वदंतः दं

द्रम्यमाणावक्रगतयः ॥ ५ ॥ नित्यंमोक्षाख्यंपुरुषार्थश्रेयोविहायकस्मादनित्यकामकामाइत्यतःश्रेयःसाधनादर्शनादित्याह ॥ न सांपरायइति ॥ सांपरायःश्रेयःसाधनंभगवान् । तस्यकुतोनप्रतिभातीत्यतआह ॥ प्रमाद्यंतमिति ॥ तंप्रमादमेवदर्शयति ॥ अयमिति ॥ ६ ॥ नकेवलंप्रमादात्सांपरायप्रतिभानाभावः । कारणांतरंचाह ॥ श्रवणायापीति ॥ यःसांपरायःश्रवणा यापिबहुभिर्नलभ्यः । शृण्वंतोपिबहवोयंनविद्युरतोपिनसांपरायःप्रतिभातीत्यर्थः । श्रवणायकस्मान्नलभ्यइत्यतस्तद्विषयशास्त्र व्याख्यातुःश्रोतुश्चदुर्लभत्वादित्याह ॥ आश्चर्यइति ॥ कुशलोवक्ताआश्चर्योदुर्लभः । कुशलानुशिष्टोस्यव्याख्यातुर्लब्धाज्ञाता श्रोताचाश्चर्यइतियोजना ॥ ७ ॥ ननूपनिषदादिभिर्ब्रह्मकेचनजानंत्येवातःकथंवक्तादुर्लभइत्यतःतेसम्यग्ज्ञानरहिताइत्याह ॥ ननरेणेति ॥ अज्ञानिनाऽवरःप्रोक्तएष सुज्ञेयोनभवतीत्यर्थः । कस्मान्नरेणावरत्वेनोच्यतेइत्यतउक्तंबहुधेति । अष्टगुणकत्वा दिरूपेणबहुधाचिंत्यमानत्वात् । अद्वैतिनाप्रोक्तेज्ञानमेवनजायतइत्याह ॥ अनन्येति ॥ अत्रब्रह्मणि अनन्यप्रोक्तेगतिर्ज्ञानंना स्ति । व्याख्यातुरभावात् माभूदागमेनतज्ज्ञानं । प्रत्यक्षतर्काभ्यांभविष्यतीत्यतआह ॥ अणीयानिति ॥ अणुप्रमाणादणुप रिमाणतोणीयानतिसूक्ष्मं महत्त्वेपिअतींद्रियं अतःप्रत्यक्षंनभवति । अतर्क्यंचब्रह्म पक्षीकर्तुमशक्यत्वात् । क्षित्यादिपक्षीकरणे कार्यत्वादिहेतोःसत्प्रतिपक्षत्वात् ॥ ८ ॥ नतर्हिब्रह्मज्ञानोपायइत्यतोतर्क्यमित्युक्तंविवृण्वन्नुपायमाह ॥ नैषेति ॥ आपनेयासं पादयितुंशक्या । अन्येनभेदज्ञानिना । सत्यधृतिरचाल्यधैर्यवान् ॥ ९ ॥ अहंत्वयापृष्टंजानामि । कथमित्यतआह ॥ शेवधि रिति ॥ अनित्यंशेवधिरिति । भक्तिपूर्वकमग्निश्चितः ॥ १० ॥ नकेवलमहंब्रह्मजानामीति । किंतुमत्प्रसादात्त्वमपिजानासीत्या

ह ॥ कामस्येति ॥ जगतःप्रतिष्ठांक्रतोरानंत्यमिति अनंतलोकावाप्तिमथोप्रतिष्ठामित्युक्तस्यानुवादः । अभयस्यपारमिति स्वर्ग लोकाअमृतत्वंभजंतइत्युक्तस्य । स्तोममहदिति ब्रह्मजज्ञमित्युक्तस्य । प्रतिष्ठांमुक्ताश्रयं ॥ ११ ॥ नकेवलंत्वं अन्योपितंदृष्ट्वाह र्षशोकौजहातीत्याह ॥ तमिति ॥ अध्यात्मयोगोध्यानयोगः । मत्त्वाज्ञात्वा ॥ १२ ॥ ज्ञानंचकेनभवतीतिजिज्ञासायामाह ॥ एतदिति ॥ ब्रह्मलब्ध्वावर्तमानंनचिकेतसंप्रतिसद्मवैकुंठद्वारंविवृतंमन्ये ॥ १३ ॥ अलंप्रशंसया तत्त्वंब्रूहीत्याह ॥अन्यत्रेति॥ धर्मादेरन्यत्रतद्बहिर्भूतंतद्रहितंयत्तत्पृष्टंपश्यसि तच्च । कृताकृतादित्युक्तंविशदयितुमुक्तंभूताच्चभव्याच्चान्यत्रविलक्षणमिति ॥ १४ ॥ पृष्टंब्रह्मस्वरूपंनिरूपयितुंप्रतिजानीते ॥ सर्वेइति ॥ सर्वाणितपांसिचयत्प्रतिवदंति ॥ १५ ॥ ब्रह्मस्वरूपंनिरूपयंस्त ज्ज्ञातुःफलमाह ॥ एतदित्यादिना ॥ एतत्त्वयापृष्टंब्रह्मैवपरमक्षरं । एतच्छ्रेष्ठमालंबनमाश्रयं परंविलक्षणं ॥ १६ ॥ १७ ॥ ननुब्रह्मलोकंप्राप्तोपिकदाचिज्जन्मादिमांश्चेत्तर्हिनतदतिशयितंफलमित्यतआह ॥ नजायतइति ॥ कुतोनजायतइत्यतोबिंबस्य जननादिरहितत्वादित्युक्तं नायंकुतश्चिदिति । बंधदशायामपिनजायतेजीवः । किमुतदपगमइत्युक्तंनबभूवकश्चिदितिहेतुमु क्त्वानिगमयति ॥ अजोनित्यइति ॥ १८ ॥ ननुकथंजीवोदेहेहन्यमानेपिनहन्यतइति यज्ञदत्तस्याहंहंता तेनाहंहतःइतितत्प्र तीतिसिद्धत्वाद्धननस्येत्यतस्तौभ्रांताविति्याह ॥ हंतेति ॥ हंताआत्मानंहंतुंहंतारंमन्यतेचेत्हतश्चात्मानमनेनाहंहतइतिमन्यते चेत् । तावुभौनविजानीतइत्यादियोजना ॥ १९ ॥ उपदेशप्रकारमेवाह ॥ अणोरणीयानिति ॥ एतदालंबनंज्ञात्वेत्युक्तब्रह्म ज्ञानस्यप्रथमभाविसाधनमाह ॥ तमिति ॥ २० ॥ पुनश्चमहिमानमेवाह ॥ आसीनइत्यादिना ॥ मदश्नामदश्नयस्माद्भव

तोसौमदामदः । तंमदामदं ॥ २१ ॥ अनवस्थेषुनश्वरेषु ॥ २२ ॥ श्रवणादिनातज्ज्ञानोत्पत्तेस्तत्प्रसादात्तमक्रतुःपश्यतीत्युक्तिः कथमित्यतआह ॥ नायमात्मेति ॥ २३ ॥ तत्प्रसादात्तज्ज्ञानंचेत्श्रवणादिवैयर्थ्यमित्यतआह ॥ नाविरतइति ॥ अशां तोभगवन्निष्ठारहितः । असमाहितोस्थिरमनाः ॥ २४ ॥ पुनश्चमहिमानमेवाह ॥ यस्येत्यादिना ॥ उपसेचनंशाकं उपरिसेच नंघृतंवा । इत्था एवंगुणविशिष्टत्वेन । यत्रसप्रतितिष्ठतितच्चकोवेदेति ॥ २५ ॥ अथभाष्यार्थः ॥ शृंकाशब्दार्थमाह ॥ शृं कामिति ॥ कंठभूषामितियावत् । अनन्यप्रोक्तेगुरुणाविनाआत्मनैवदृष्टेसतिशास्त्रेगतिर्नास्तीतिअन्यथाप्रतीतेस्तद्व्याचष्टे ॥ अन्यइति ॥ तथाकस्मान्नस्यादित्यतआह ॥ प्रोक्तेति ॥ समाख्ययाचस्वव्याख्यांसमर्थयते ॥ जीवानामिति ॥ जानाम्य हंशेवधिरित्यनित्यमित्यन्यथाप्रतीतेर्व्याचष्टे ॥ आख्यमिति ॥ अनित्यैर्द्रव्यैरित्येतदध्रुवैरितिप्रतीतेर्व्याचष्टे ॥ नित्यमिति ॥ नित्यंसर्वदाआख्योविषयोयेषांतान्यनित्यानितैर्नित्यमाख्यविष्णुविषयैरित्यर्थः । द्रव्याणिकानीत्यतआह ॥ द्रव्यैरिति ॥ अ नित्यैरितिपदंप्रकारांतरेणव्याकुर्वन्वाक्ययंयोजयति ॥ आख्येति ॥ आख्योनित्योविषयोयेषांतान्यनित्यानितैरनित्यैः । स्वपद मेवविवरीतुमुक्तंविष्णवाख्यनित्यविषयैरिति । अध्रुवैरनित्यैःपुरुषैःतद्भुवंनप्राप्यतेहीतिप्रतीयते । तदस्मदादिभिरध्रुवैःप्राप्यत्वा द्ब्रह्मणोऽयुक्तमतोंतरितंयत्पदं । नविद्यतेध्रुवोयेषांतेऽध्रुवास्तैरध्रुवैरितिविग्रहमभिप्रेयंस्तात्पर्येणव्याचष्टे ॥ ध्रुवइति ॥ अप्रती तेःक्रतोरानंत्यपदंव्याचष्टे ॥ क्रतोरिति ॥ अप्रतीतेःस्तोममहदितिपदंतात्पर्यपूर्वंव्याचष्टे ॥ स्तोमैरिति ॥ नित्यंउरुभिर्मुमु क्षुभिर्गीयतइतिउरुगायः । क्रतोरित्यादेःप्रकृतोपयोगंदर्शयतिइत्युक्त्वादिति । नन्वेतानिविशेषणानिजीवेपिघटंते तस्यब्रह्मा

त्मकत्वादित्यतस्तयोर्भेदंसमर्थयते ॥ शरइत्यादिना ॥ जीवाभेदःजीवस्यपरमात्मनाअभेदः । तृतीयप्रश्नस्येश्वरविषयत्वंज्ञा पकांतरेणसमर्थयते ॥ नाचिकेतमिति ॥ द्वितीयप्रश्नेनाचिकेताग्निस्थितोभगवान्पृष्टइतिसमर्थितं । अत्रापिनाचिकेतंशकेमसी त्युक्त्वान्नाचिकेताग्निस्थितोभगवान्पृष्टःसएवोच्यतइतिसिद्धमित्यर्थः । कामस्याप्तिमित्यस्यजगतःप्रतिष्ठामित्यनेनसामानाधिक रण्यप्रतीतिंनिवारयन्नन्वयंदर्शयति ॥ उरुगायमिति ॥ तृतीयप्रश्नस्येश्वरविषयत्वेसर्वथाअपरिहार्यामुपपत्तिमाह ॥ नचेति ॥ येनतद्विषयःस्यात्प्रश्नइतिवाक्यशेषः । अतिविपिनेस्थितमित्यन्यथाप्रतीतिंनिवारयन्व्याचष्टे ॥ गह्वरइति ॥ मुक्तस्यसंसार्य गम्यत्वाद्गह्वरत्वं । प्रवृह्यप्रपूर्येत्यन्यथाप्रतीतिंनिवारयन्व्याचष्टे ॥ प्रवृह्येति ॥ गह्वरेष्ठमित्यादेरुक्तोर्थःकुतइत्यतस्तंसमर्थय न्जीवाब्भेदेनेश्वरज्ञानीमोदनीयंलब्ध्वामोदतेइत्युक्तमोदनीयस्वरूपंचनिरूपयन्प्रमाणांतरंपठति ॥ मुक्तेति ॥ एतद्ध्येवाक्षर मित्यादितत्तेपदंसंग्रहेणब्रवीम्योमित्येतदित्युक्तभगवद्वाचकप्रणवमाहात्म्यमुच्यतइत्यन्यथाप्रतीतिंनिवारयन्व्याचष्टे ॥ एतद्ध्ये वेति ॥ नजायतेम्रियतेवाविपश्चिदित्येतद्व्याचष्टे ॥ देहेति ॥ नेत्युत्तरत्रापिसंबध्यते । नकुतश्चिदित्येतत्प्रकृतेहेतुत्वाप्रतीते र्व्याचष्टे ॥ नकुतश्चिदिति ॥ भावाभावौजनिमृती । नबभूवकश्चिदित्येतत्प्रकृतेहेत्वंतरार्थत्वाप्रतीतेर्व्याचष्टे ॥यस्मादिति ॥ अजोनित्यइतिनिगमनवाक्यंव्याचष्टे ॥ अतइति ॥ अतःस्वरूपेणजननाभावात् अजोनित्यश्च । शाश्वतोयंपुराणइत्येतदप्र तीतेर्व्याचष्टे ॥ अविकारश्चेति ॥ नायंकुतश्चिन्नबभूवकश्चिदितिवाक्यद्वयंप्रमाणवचनेपिप्रकृतहेत्वर्थतयास्फुटमप्रतीतेःस्ववचनेनस्पष्टंव्याचष्टे ॥ अयमित्यादिना ॥ उभौतौनविजानीतइत्येतद्युक्तेरनुक्त्वाद्युक्तिपूर्वंव्याचष्टे ॥ जीवस्यापीति ॥ अ

पिशब्देनेश्वरंसमुच्चिनोति । स्वतःस्वरूपेण अणोरणीयानित्यस्यप्रकृतजीवपरत्वप्रतीतिंनिवारयतेश्वरस्याप्रकृतत्वशंकानिवारिता । आत्मास्यजंतोर्निहितोगुहायामित्येतद्व्याचष्टे ॥ एवमिति ॥ एवमुक्तप्रकारेणनित्यस्येति । अक्रतुःक्रतूपलक्षितकर्मरहितःतंपश्यतीतिप्रतीतिंनिवारयन्व्याचष्टे ॥ अइति ॥ एवंतर्हिकथंक्रतोःकर्मात्मकत्वात्तेनतंपश्यतीत्यतआह ॥तन्निश्चयइति॥ तन्निश्चयःसम्यक्तत्परोक्षज्ञानं । आत्मनःस्वस्यमहिमानंपश्यतीत्यन्यथाप्रतीतिंनिवारयन्व्याचष्टे ॥ आत्मनइति ॥ आत्मनःसकाशान्महिमानंमहामानं । उक्तमर्थंद्रढीकुर्वन्नात्मनोजीवाद्विष्णुःकस्मान्महिमेत्युक्तइतिशंकांचपरिहरति ॥ जीवादिति ॥ विरोधादासीनत्वंतत्वं । दूरव्रजनंतुभ्रांतमित्यन्यथाप्रतीतिंनिवारयंस्तद्घटकमाह ॥ ऐश्वर्यादिति ॥ युज्यतइतिशेषः । आसीनस्यदूरव्रजनंव्याहतेरयुक्तमित्यतोघटकमुक्तं । तत्कुतइत्यतस्तत्प्रमाणंपठति ॥ आसीनइति ॥ प्रथमाध्यायस्यद्वितीयावल्ली ॥ १ ॥ २ ॥ अध्यात्मयोगेनेतिभगवतोध्यानमुक्तं । सकुत्रध्येयइत्यतआह ॥ ऋतमिति ॥ सुकृतस्यपुण्यस्यकार्येशरीरे । पंचाग्नयोदेवयजनादयोयेषांतेतथोक्ताः । भगवद्ध्यानस्याहत्यसाधनंकिमित्यतोभगवंतंस्तुवन्तद्धक्तुंशक्तुमइत्याह ॥ यःसेतुरिति ॥ सेतुत्वादिगुणकंध्यातुंसाधनंवक्तुंशक्तुमइत्यर्थः । अभ्यर्हितंप्रत्याहारंनिरूपयति ॥ आत्मानमित्यादिना ॥ प्रग्रहंदाम । अश्वादीनांग्रामादीनिवतेषुतेषांगोचरान्विषयानाहुः । आत्माआत्मानं । संत्वात्मादयोरथ्यादिरूपाः । तथाचकिमित्यतआह ॥ यइति ॥ विज्ञानवान्बुद्धियुतः । ध्यानस्यप्रत्याहारोभ्यर्हितंसाधनंकुतइत्यतस्तद्रहितस्यतद्वतश्चक्रमेणानर्थफलेआह ॥ यस्त्विवत्यादिना ॥ सतुतत्पदमितितच्छब्देनोक्तं किमित्यतआह ॥ विज्ञानेति ॥ भगवद्ध्यानंचतारतम्यांतर्गतत्वेनकार्यमित्याह ॥

इंद्रियेभ्यइत्यादिना ॥ सर्वगःकश्चिदस्तिचेत्कस्मात्सनदृश्यतइत्यतआह ॥ एषइति ॥ नदृश्यतेचेदलंतद्दर्शनार्थप्रयासेनेत्यतआह ॥ दृश्यतइति ॥ इंद्रियादिभ्योर्थादयउत्तमत्वेनध्येयाइत्युक्तं । नकेवलमुत्तमत्वेन । किंतुपूर्वपूर्वेषांउत्तरोत्तरनियतत्वंचध्येयमित्याह ॥ यच्छेदिति ॥ इंद्रियाणिवाचिनियच्छेत् वाचंमनसि मनश्चज्ञानेबुद्धौ शांतेअतिशयितसुखरूपे । वेदपुरुषःस्वयंसाधूनांहितमुपदिशति ॥ उत्तिष्ठतेति ॥ किमर्थबोधःसंपादनीयःसंसृतिनिवृत्त्यर्थमितिचेन्न । तस्याःकारणांतरेणानायासेननिवृत्तौप्रयाससाध्यबोधवैयर्थ्यादित्यतआह ॥ क्षुरस्येति ॥ संसृतिःक्षुरस्यधारेवनिशिता । निशितत्वमेवविवरीतुमुक्तंदुरत्ययेति । तन्निवर्तकंपथश्चार्चिरादिमार्गाद्गम्यंदुर्गमितिकवयोवदंति । दुर्गमत्वंब्रह्मणःकथमित्यतःशब्दाद्यनात्मकत्वेनश्रोत्राद्यविषयत्वादित्याह ॥ अशब्दमिति ॥ संसारनिवृत्तिसाधनंतज्ज्ञानंकेनसाधनीयमित्यतआह ॥ अनादीति ॥ श्रोत्राद्यगोचरमपिमहतःपरत्वादिरूपेणशास्त्रतोनिचाय्यज्ञात्वामृत्युमुखात्प्रमुच्यते । अत्राध्यायस्यसमाप्तत्वादुक्तविद्यांश्रुत्वावक्तुःफलमाह ॥ नाचिकेतमिति ॥ स्थानविशेषेकालविशेषेवास्तोत्रवदेतद्विद्यापठितुरानंत्यंकिलफलं । किमुश्रुत्वाव्याख्यातुरुक्तंफलमित्याह ॥ यइति ॥ ऋतंपिबंतावित्येतत्कैश्चिद्बुद्धिजीवपरत्वेनअन्यैर्जीवेश्वरविषयत्वेनव्याख्यातं । तन्न । सुखभोक्तृत्वानुपपत्तेः । सुखस्यैवभोक्तृत्वानुपपत्तेश्चेत्याशयवान्यथावद्व्याचष्टे ॥ आत्मेति ॥ आत्मादेहहृदयेस्थितः । अंतरात्माजीवहृदयेस्थितः । आब्रह्मःअर्द्धःपरेभ्योप्यर्धःपरार्धःतस्मिन्परेभ्योप्यृद्धरूपकेपरमेगुहांप्रविष्टेवायौविभुर्विष्णुःसएकएवात्मांतरात्मेतिद्विधास्थितः । असौ भुज्यंतइतिभोगाःविषयाः शुभानेवभोगान्पिबत्यनुभवति । ऋतंपिबंतावुभावपिपरमात्मानौचेत्कथंछायातपत्वमित्यत

स्तव्याचष्टे ॥ छायेति ॥ यःसेतुरीजानानामित्येतव्याचष्टे ॥ मर्यादेति ॥ इंद्रियेभ्यःपराइत्यादिवाक्यंप्रसिद्धेंद्रियपरत्वप्रती
तिंनिवारयन्व्याचष्टे ॥ देवेभ्यइति ॥ केतेइंद्रियदेवाइतिजिज्ञासायामाह ॥ सोमेति ॥ श्रोत्रत्वक्चक्षूरसनघ्राणवाग्घस्तपा
दपायूपस्थानामिंद्रियाणांक्रमात्सोमादयोदेवाईशाइत्यर्थः । अर्थदेवताआह ॥ सुपर्णीति ॥ ननुरूपादयःपंचार्थाःसौपर्ण्याद्या
स्तुतिस्रः । अतःकथंतासामर्थविभागइत्यतउक्तं द्विद्व्येकेदेवताइति । द्वौचद्वौचएकश्चद्विद्व्येकेतेषांदेवताःद्विद्व्येकदेवताः । सु
पर्णीवारुण्यौद्वयोर्द्वयोरभिमानिन्यौउमात्वेकस्येत्यर्थः । काष्ठाअवसानं परागतिःपरमप्राप्यं । पुरुषान्नपरमित्यादेस्तात्पर्यार्थमा
ह ॥ नैवेति ॥ यच्छेदित्यादिव्याचष्टे ॥ तस्मादिति ॥ तस्मादुक्तप्रकारेणतारतम्यभावात्इति । वागात्मिकाःवागभिमानि
नीः । इंद्रियाणिवाचिनियच्छेदित्यादौग्राह्यं । इंद्रियादीनामर्थादिषुनियमनंनामकिमित्यतआह ॥ तद्वशत्वेनेति ॥ नापरोनिय
मनरूपः । प्रसिद्धनियमनार्थत्वेबाधकमाह ॥ कुतइति ॥ अनाद्यनंतमव्यक्तात्परमितिवक्तव्येमहतःपरमित्युक्तेःकारणमाह ॥
स्वेति ॥ प्रथमाध्यायस्यतृतीयावल्ली ॥ ३ ॥ प्रथमाध्यायःसंपूर्णः ॥ १ ॥ ॥ पुनरपिब्रह्मविद्यांवक्तुमध्यायांतरत्वेनाधि
कारार्थदुःसंपाद्यमपिवैराग्यमवश्यंसंपाद्यमित्याह ॥ परांचीति ॥ खानींद्रियाणि । आत्मनोंतर्नपश्यति । प्रत्यक्अंतः । विष
यव्यावृत्तचक्षुरादिमान्नसर्वथामुमुक्षुर्विषयादिप्रमादीस्यादितिभावेनपूर्वश्लोकोक्तमेवविशदमाह ॥ पराचइति ॥ बालाइवबालाः
अविवेकिनः । पाशंजनिमृती । अमृतत्वंमोक्षं । अविलंबेनतत्वंनिरूपयेतिपुनःपृच्छति ॥येनेति॥ येनैवैतेनसंसारेरूपादीन्विजा
नाति । तदेतदत्रमोक्षेपिनियामकंपरिशिष्यतेकिमितिप्रश्नवाक्यार्थः । यदेतन्नियामकंमोक्षेपिपरिशिष्यतेकिमितिपृष्टं तदेतन्मो

क्षेपिपरिशिष्यतेवैइतिपरिहारमाह ॥ एतद्वैतदिति ॥ नियामकंविस्तार्यब्रूहीत्याकांक्षायांस्वप्नांतमित्यादिनानियामकंब्रह्मविस्त
रेणाह । स्वप्नांतमित्यतःपूर्वंहंततइदंप्रवक्ष्यामिगुह्यंब्रह्मसनातनमितिप्रतिज्ञावाक्यंद्रष्टव्यं । स्वप्नांतंस्वप्नाख्यमंतं । स्वप्नसुषुप्ती
इतियावत् । मध्वदंदेहेस्थित्वासारभोक्तारं । जीवमंतिकात्जीवस्यसमीपे । ततआत्मनोज्ञातत्वात् स्वात्मानंगोप्तुंनेच्छति । अ
रण्योर्गुरुशिष्ययोः । अदनादग्निः । जातंवेत्तीतिजातवेदाःभगवान्निहितः । सृष्टिप्रलययोःसूर्योयतउदेति । अस्तमदर्शनंचयत्र
गच्छतितंदेवाअर्पिताःप्राप्ताः । गुहांप्रविश्यतिष्ठंतीमित्यत्रब्रह्मादिभूतनियामकत्वेनात्मानंभूतेभिर्भूतैःसहव्यजायतजनयामासे
त्युक्तं । तत्रमूलरूपादवताररूपाणांभेदोनास्तीत्याह ॥ यदेवेहेति ॥ उक्तंभेदाभावंभेददर्शिनोभेदाभेददर्शिनश्चानर्थोक्त्यास
मर्थयते ॥ मृत्योरिति ॥ करचरणाद्यवयवादिभेदोपिनास्तीत्याह ॥ मनसेति ॥ इदंतेषांभेदराहित्यंमनसैवाप्तव्यं । गुणानां
भगवताभेदाभावंभेददर्शिनोभेदाभेददर्शिनश्चानर्थोक्त्यासमर्थयते ॥ मृत्योरिति ॥ गुहास्थितिप्रकारमेवविवृण्वन्गुणांतरमा
ह ॥ अंगुष्ठेति ॥ उक्तमनुवदन्गुणांतरमाह ॥ अंगुष्ठेति ॥ श्वोपिसउ सएवनित्यइत्यर्थः । भगवद्गुणानांभगवताभेदाभेद
दर्शिनोनर्थमाह ॥ यथोदकमिति ॥ मुक्तस्येश्वरोनियामकइत्ययुक्तं तस्यब्रह्मणिप्रवेशेनऐक्यात्इत्यतःकैमुत्यमाह ॥ यथोद
कंशुद्धइति ॥ अथभाष्यार्थः ॥ केवलनिर्माणार्थप्रतीतिंनिवारयन्व्यतृणादित्येतद्धातुव्याख्यानेनव्याचष्टे ॥ तृण्वंति ॥
तृणुधातुःकात्करणेकुत्सितकरणेवर्ततेइतिधातुःधातुव्याख्यानमित्यर्थः । हंततइदंप्रवक्ष्यामीत्येतत्पूर्वत्रसंबध्यतइत्याशयवान्
आत्माजीवोमरणंप्राप्ययथायद्भवतितद्ब्रह्मेत्यन्यथाप्रतीतिंनिवारयन्व्याचष्टे ॥ इदमिति ॥ जीवस्यमरणानंतरंयद्भवतितच्च व

क्ष्यामीति किमर्थमपृष्टार्थप्रतिज्ञाक्रियतइत्यतआह ॥ जीवइति ॥ मुमुक्षोर्जीवेश्वरवैलक्षण्यज्ञानमावश्यकं । तज्ज्ञापनायापृष्टार्थप्रतिज्ञाकृतेत्यर्थः । जीवेश्वरभेदज्ञापनायप्रतिज्ञाचेदुत्तरत्रतयोर्वैधर्म्योक्तिःस्यादितिवदतःतटस्थस्योक्तंवैधर्म्यमित्याह ॥ य इति ॥ यःकर्मफलभोक्तेतियोनिमन्येप्रपद्यंतइत्यस्यार्थः । यएषुसुप्तेष्वित्यस्यार्थः । यःप्रलयादिष्विति । आत्मामरणंप्राप्ययथायद्भवतितद्ब्रह्मेतिकस्मान्नस्यादित्यतआह ॥ नहीति ॥ ननुजीवेश्वरभेदज्ञापनंचकिमर्थं । येनतत्प्रतिज्ञासार्थकेत्यतआह ॥ जीवादिति ॥ त्वयायथावद्ब्रह्मज्ञातव्यमित्यादावुपस्कर्तव्यं । अतःप्रतिज्ञासार्थकेतिवाक्यशेषः । आत्मानंजीवमितिसामानाधिकरण्यप्रतीत्याजीवस्यात्माभेदःप्रतीयते । सप्रकृतप्रतिज्ञाविरुद्धोतस्तांनिवारयन्जीवमितिद्वितीयांषष्ठ्यर्थत्वेनव्याकुर्वन्तस्यान्वयंचदर्शयति ॥ जीवस्येति ॥ जीवमिति द्वितीयायाःषष्ठ्यर्थत्वानंगीकारेबाधकमाह ॥ नहीति ॥ हीतिसूचितामुपपत्तिंस्फोरयन्नाह ॥ वस्त्वंतरस्येति ॥ यःपूर्वमितिवाक्यंदुर्गमार्थत्वाद्व्याचष्टे ॥ अन्नामभ्यइति ॥ गुहांप्रविश्येतिवाक्यंयोजनाप्रतीतेर्व्याचष्टे ॥ स्वात्मानमिति ॥ कस्मादपिपूर्वमजातंपूर्वाजातमितिसूचितमर्थंस्ववाक्येनविशदयतियथेत्यादिना । यथेंद्रादिजनकस्यकश्यपस्यनतेभ्यउत्तमत्वंनतथाविष्णोर्ब्रह्मणः । तस्यपूर्वाजाततज्जनकत्वादुत्तमत्वमेवेतिभावार्थः । अजायतेत्यस्यस्वयमुत्पन्नइत्यर्थत्वात्कथंजनयामासेतिणिजर्थतयाव्याख्येयेत्यतःप्रयोगदर्शनेनोपपादयति ॥ अजायतेति ॥ याप्राणेनेत्येतत्स्त्रीलिंगात्प्रसिद्धेश्चकश्यपभार्यादितिपरत्वप्रतीतेःप्रमाणमुदाहृत्यस्ववाक्येनव्याचष्टे ॥ अदनादिति ॥ उत्तमोदेवताभ्यश्चेतिव्याख्यातमपिदेवतामयीतिपदंदेवतात्मिकेतिप्रतीतिंनिवारयन्व्याचष्टे ॥ देवतेति ॥ याप्राणेनेतिव्याख्यातमपिप्राणेनप्रा

णरूपेणसंविशंतीत्यन्यथाप्रतीतिंनिवारयन्व्याचष्टे ॥ प्राणेनेति ॥ गुहांप्रविश्यतिष्ठंतीमित्यादिविशेष्याप्रतीतेर्व्याचष्टे ॥ गुहामिति ॥ अरण्योर्निहितइतिवाक्यंप्रसिद्धाग्निपरत्वप्रतीतिंनिवारयन्व्याचष्टे ॥ सर्वज्ञइति ॥ सर्वज्ञइतिजातवेदाइत्यस्यार्थः । जागृवद्भिरित्येतस्यप्रतिपदंजानद्भिरिति । गुरुशिष्ययोररणीत्वंकथमित्यतस्तद्युत्पाद्यदर्शयति ॥ अर्यतइति ॥ अर्यतेज्ञायतेणःसुखरूपोभगवानाभ्यांगुरुशिष्याभ्यामित्यरणीगुरुशिष्यावित्यर्थः । यदेवेहेत्येतद्यदस्मिंश्छरीरेचैतन्यंतदेवामुत्रपरदेहेपीतिअन्यथाप्रतीतिंनिवारयन्व्याचष्टे ॥ यइत्यादिना ॥ मृत्योःसमृत्युमित्यादिपुनःपुनर्जायतेम्रियतेचेतिप्रतीतिंनिवारयन्व्याचष्टे ॥ गुणतइति ॥ अनेननेहनानेतिव्याख्यातंभवति । इवशब्दार्थमाहात्यल्पमपीति । इवशब्दस्यार्थांतरमाह ॥ भेदाभेदेति ॥ अत्रभगवति तद्रूपेषुच । करचरणाद्यवयवादीनांभेदभेददर्शिनोनर्थकथनं मृत्योःसमृत्युंगच्छतीति तद्व्याचष्टे ॥ तथैवेति ॥ इवशब्दोल्पार्थोभेदाभेदार्थश्चव्याख्यातः । तत्कुतइत्यतःप्रमाणमुदाहृत्यसमर्थयते ॥ भवेदिति ॥ यइहनानेवपश्यति नेहनानास्तिकिंचन एवंधर्मान्पृथक्पश्यन्नितित्रयाणांवाक्यानामेकार्थत्वप्रतीतिनिरासायाह ॥ प्रथममिति ॥ भेदाभेदएवनिषिध्यतेनतुभेदःभगवद्धर्माणांभगवताभेददर्शनेनानर्थानुक्तेरित्याशंकांनिवर्तयितुमितिशेषः । यथोदकमितिवाक्यमन्वयाप्रतीतेर्व्याचष्टे ॥ पर्वतेष्विति ॥ शिखरेवृष्टमुदकंयथेतिपूरणीयं । एवं विष्णोर्धर्मान्ततःपृथक्पश्यन्तानेवपृथग्दृष्टांस्तानन्वेवानंतरमेवअधइतिचपूरणीयं । विजानतोमुनेरात्मास्वामीकइतिनज्ञायतेतोव्याकरोति ॥ विजानतइति ॥ अवधारणार्थव्यनक्तिनत्विति वायुःसर्वेषांज्ञानिनांस्वामीविमुक्तोपिसभगवत्साद्दश्यमेवयातीतिचकुतइत्यतआह ॥ सर्वेषामिति ॥ वायोर्भ

गवदैक्याभावेन्येषांभगवदैक्याभावःकस्मादित्यतःपरंपरयातदधीनप्रतिबिंबत्वादित्याह ॥ आभासाभासरूपाइति ॥ द्वि
तीयाध्यायस्यप्रथमावल्ली ॥ २ ॥ १ ॥ मुमुक्षुर्देहादिषुममत्वंजह्यात्तेषांभगवदधीनत्वादित्याह ॥ पुरमिति ॥ एकादश
द्वारंपुरमधिष्ठायनशोचतिचेदस्माकमपितदधिष्ठितत्वाच्छोकाभावःस्यादितिशंकानिरासायापेक्षितंप्रक्षिप्ययोजयति ॥ इदमि
ति ॥ ननुतत्रभगवद्वाचकपदाभावात्कथमेवंव्याख्येतिशंकांज्ञापकोक्त्यापरिहरन्अधिष्ठायेत्यस्यार्थमाहाजस्येति । स्थितिंनि
श्चयं । एवंनिश्चयेपिकथंशोकाभावइत्यतआह ॥ विमुक्तश्चविमुच्यतइति ॥ बंधस्यापरमार्थत्वात्पूर्वमपिविमुक्तएवविद्ययात
त्प्रतिभासनिवृत्तौविमुच्यतइतिप्रतीतिनिरासायतद्व्याचष्टे ॥ विमुक्तइति ॥ अपरोक्षविदेहादौनिरभिमानात्पूर्वमपिविमुक्तः
पश्चान्मुच्यतेइत्यादियोज्यं । हंसइत्यादिभगवन्महिमप्रतिपादकंदुर्गमार्थत्वाद्व्याचष्टे ॥ नित्यमित्यादिना ॥ अनेनजहातीतिहं
सएवसारत्वात्सइतिहंसइतिविग्रहःसूचितोभवति । शुचौसीदतीतिशुचिषत् । तस्यप्रतिपदंवायुस्थइति । वरसुःश्रेष्ठसुखः । जु
होतीतिहोता । वेद्यांमुख्यपूज्यःसन्तिष्ठतीतिवेदिषत् । अत्यन्नःअतिशयेनान्नवान् । प्रकृतिर्व्योमेतिकस्मादुक्तेत्यतउक्तं । व्यो
तमिति ॥ यस्मादस्यामिदंजगद्व्योतंतस्मात्साव्योमेतियोज्यं । तथैवऋतेषुमुक्तेषुजातेषुतज्ज्ञानादिष्वास्तेततऋतजाइतियोज्यं ।
मुक्ताःकेननिमित्तेनऋताइत्यतउक्तं । गताइति । अंगुष्ठमात्रःपुरुषःआत्मनिमध्येतिष्ठतीत्युक्तस्यव्यापारमाह ॥ ऊर्ध्वमिति ॥
अंगुष्ठमात्रःपुरुषोजीवइतिप्रतीतिनिरासायोक्तमीशानइत्यादिपूर्वत्रनिरासकांतरमाह ॥ मध्यइति ॥ कांश्चिद्भगवद्गुणानुक्त्वा
तूष्णींस्थितंपुनस्तद्गुणान्वक्तुंपृच्छति ॥ अस्येति ॥ विस्रंसमानस्यस्थूलदेहंपरित्यजतः । एतदेवंगुणकंतत्परिशिष्यतेवै । गुणान्

ब्रवीति । नप्राणेनेति । तत्रप्राणापानयोःसर्वथाजीवजीवनदत्वंनास्तीतिप्रतीयते । तत्प्रमाणविरुद्धं । अतस्तस्यतात्पर्यमाह
॥ नकेवलमिति ॥ आत्मामरणंप्राप्ययथाभवतीतिप्रतिज्ञातमाह ॥ योनिमिति ॥ शरीरत्वायशरीरवत्त्वाय । अंतस्थस्यप्रा
णादिनियंतृत्वमुक्तं । व्यापारांतरमाह ॥ यएष्विति ॥ कामंकामंस्वेच्छानुसारेणस्वाग्रपदार्थान्निर्मिमाणः । नप्राणेनेत्यत्रो
क्तंसर्वजीवनियंतृत्वंबुद्ध्यारोहार्थंदृष्टांताभ्यामाह ॥ अग्निरिति ॥ भुवनंप्रविष्टश्चेतनाग्निर्यथैकः यथाचतस्यरूपंरूपंप्रतिजडा
ग्निःप्रतिरूपोबभूव । भुवनंप्रविष्टश्चेतनवायुर्यथैकोयथाचाचेतनवायुस्तस्यरूपंरूपंप्रतिप्रतिरूपोबभूव । तथासर्वभूतांतरात्माएकः।
तथाजीवोपिअस्यांतरात्मनोरूपंरूपंप्रतिप्रतिरूपोबभूव । वाक्यद्वयमैक्यार्थत्वप्रतीतिंनिवारयन्व्याचष्टे ॥ अग्निरित्यादिना ॥
एतेबुद्धिस्थाःप्रसिद्धावा। स्पर्शगम्यःस्पर्शगुणानुमेयः।अरूपिद्रव्यत्वेनबाह्यप्रत्यक्षागोचरत्वस्यस्थितत्वात्।प्रतिबिंबोबिंबान्नभिद्यत
इतिकेचित् । तन्निरासायोक्तंबहिश्चेति । तद्व्याचष्टे ॥ बाह्याश्चतेततइति ॥ ननुविष्णोर्विभुत्वात्कथंजीवानांतद्बाह्यत्वमित्य
तस्तद्वाक्यंविशदयति ॥ नास्येति ॥ नन्वनादित्वाज्जीवस्यकथंप्रतिबिंबोवभूवेत्युक्तिरितिशंकांनिवारयन्एकवचनादेकत्वप्रती
तिंचनिवारयन्नाह ॥ अनादीति ॥ ननुक्लिश्यमानजगदंतर्गतत्वेभगवतःक्लेशःस्यादितिशंकांसूर्यदृष्टांतेनपरिहरति ॥ सूर्यो
यथेति ॥ तद्वाक्यंव्याचष्टे ॥ सूर्योयथेति ॥ लेपालेपयोर्हेतुत्वेनोभयचक्षुःस्वरूपंनिरूपितं । अंतश्चक्षुरिति । जीवदोषलेपा
भावेहेतुरुक्तः । एकोवशीति । तस्यार्थः स्वतंत्रत्वादिति । नन्वेकस्यकथंबहुजीवेषुस्थित्वानियामकत्वमित्यतःस्वयमपिबहुरू
पोभवतीत्याह ॥ एकंरूपमिति ॥ भगवतोजीवदोषलेपाभावेहेत्वंतरमाह ॥ तमिति ॥ येआत्मस्थंतंपश्यंतिषांसतेवैदोषवि

धूननेनशाश्वतंसुखंकिल । तस्यकथंदोषलेपइत्यर्थः । दोषलेपाभावेएकोवशीत्युक्तंस्वातंत्र्यहेतुंसमर्थयते ॥ **नित्योनित्यानामिति** ॥ तद्व्याचष्टे ॥ **चेतनेति** ॥ परमचेतनत्वात्स्वतंत्रःस्वतंत्रत्वाद्धिदोषेणनैवलिप्यतइत्यर्थः । एकएवसर्वभूतांतरात्मारूपंरूपंप्रतिशरीरंप्रतिरूपाख्योजीवोबभूवेतिअन्यथाप्रतीतिंप्रमाणेननिवारितामपिकर्हिचिदत्रनप्रमाद्येदित्याशयवान्निवारयन्स्ववाक्येनापितद्व्याकरोति ॥ **सएकएवेति** ॥ बहिरित्यस्यप्रतिपदंभिन्नइति । भेदाभेदौचनिवारयितुमुक्तं । नितरामिति । जीवः परमात्मनोभिन्नइतिकुतइत्यतउक्तंपरतंत्रत्वादिति । प्रतिरूपोबभूवेत्येतदनादितःप्रतिबिंबाबभूवुरितिव्याख्यातं । तत्प्रयोगेणापिसमर्थयते ॥ **आत्मेति** ॥ इदमग्रेअस्यजगतोग्रेप्रलयकाले । आत्मैवासीदभूदित्यादिवदनादित्वापेक्षयाप्रतिरूपोबभूवेतिप्रयोगइत्यर्थः । सर्वभूतांतरात्मैवप्रतिशरीरंप्रतिरूपोबभूवेत्यर्थःकिंनस्यादित्यतोव्याख्यातंप्रमाणंबाधकं । बाधकांतरमप्याह ॥ **आत्मनीति** ॥ तदेतदित्यादिनापिभगवन्महिमानमाह । एतदेवमितिनिर्देष्टुमशक्यमनिर्देश्यं । तत्रतदेतदितितेषांसुखंशाश्वतमितिप्रकृतज्ञानिसुखंपरामृश्यतइत्यन्यथाप्रतीतिंनिवारयन्व्याचष्टे ॥ **एतदिति** ॥ एतदेवतमात्मस्थमितिप्रकृतंभगवद्रूपमेव । ज्ञानिसुखमेवपरामृश्यतइतिकुतोनस्यात् । नस्यात् । परमत्वविशेषणात् । तस्यचैतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंतीत्यादिनाजीवसुखेऽयोगादित्याह ॥ **ज्ञानीति** ॥ विष्णोरेवसुखंपरमंज्ञानिसुखंतुविप्रुट्कमिति कुतइत्यतआह ॥ **ब्रह्मादीनामिति** ॥ कथंनुतद्विजानीयांकेनोपायेनविजानीयामित्यन्यथाप्रतीतिंनिवारयन्व्याचष्टे ॥ **सम्यगिति** ॥ तदनिर्देश्यंपरमंसुखंतत्प्रसादमृतेसम्यक्भातिनभातिवेत्यस्यनिश्चयंकथंन्वहंविजानीयांनकेनापीत्यर्थः ॥ **द्वितीया**

व्यासती० ॥ २।२ ॥ ॥ ११ ॥

ध्यायस्यद्वितीयावल्ली ॥ २।२ ॥ अतृप्तत्वाद्भूयोपिभगवतोन्यानपिजगदाश्रयत्वादीन्गुणानाह ॥ **ऊर्ध्वमूलइति** ॥ तदर्थाप्रतीतेर्व्याचष्टे ॥ **सर्वोचइत्यादिना** ॥ भूमिवद्भूमिर्यथावृक्षस्याश्रयःतथाजगतोभगवानपिमूलाश्रयः । जगद्वृक्षोश्वत्थइतिकस्मादुक्तइत्यतआह ॥ **सोश्वइति**॥ अश्वःअस्मिंस्तिष्ठतीतिअश्वत्थःअश्वस्थमन्नमश्वत्थइत्यर्थद्वयमभिप्रेत्योक्तं। तद्व्याप्तत्वात्तदन्नत्वादिति।व्यक्तितएवानादिनित्यत्वप्रतीतिंनिवारयन्सनातनपदंव्याचष्टे ॥ **प्रवाहतइति**॥ चशब्दान्नित्यइत्यपिग्राह्यं । व्यक्तितएवसनातनत्वंकुतोनस्यादित्यतआह ॥ **मुख्यतइति**॥ मुख्यतस्त्वमृतोहरिरित्यनेनतदेवामृतमितिव्याख्यातंभवति । उक्तमेववधारयितुमाह ॥ **मुख्यामृतइत्यादिना** ॥ जगतोमुख्यामृतत्वेश्रुत्यादौसएवैकोमुख्यामृतइत्युक्तेर्जगत्प्रवाहतएवनित्यमित्यर्थः । यदिदंकिंचेत्यत्रतत्प्रसिद्धप्राणवज्ज्ञार्थत्वप्रतीतेर्व्याचष्टे॥ **प्राणाख्यइति** ॥ निमित्तसप्तमीयं । प्राणान्निमित्तादेजतिचेष्टतइत्यर्थः । उद्यतवज्रत्वंवज्रयप्रदत्वंकुतइत्यतआह ॥ **भयादिति** ॥ इंद्रादयोवर्षादिस्वकार्येधावंतिबाल्येऽविलंबेनज्ञानमापादितवंतंनचिकेतसंदृष्ट्वाविस्मितोन्योप्येवमेवकुर्यादित्याशयवांस्तथाकर्तुःफलमाह ॥ **इहचेदिति** ॥ विस्रसःविस्रंसनात्शरीरस्यपतनात्प्रागित्यर्थः। स्वर्गेवैकुंठादिषुचिन्मयशरीरित्वायप्रकृतोबोधोपदेशःपुरुषापेक्षयानेकप्रकारइत्याह ॥**यथादर्शइत्यादिना**॥ परीवसम्यगिव । सम्यगर्थाप्रतीतेस्तद्वाक्यजातंव्याचष्टे॥ **जीवेस्थितइत्यादिना**॥ पितृलोकगोपियथास्वप्नेतथादृश्यते । किंबोद्धुमशक्चेत्तत्रस्वर्गलोकेमहीयतइत्यतोबोद्धव्यमाह॥ **इंद्रियाणामित्यादिना**॥इंद्रियाणांपृथक्भावंवैचित्र्यंतारतम्यमित्यर्थः । उदयास्तमयौ उत्पत्तिविनाशौ। पृथगुत्पद्यमानानांसत्तादिज्ञात्वा।ननुकथमिंद्रियादीनांपृथग्भावादिज्ञानाच्छोकत्यागः तस्याभगवज्ज्ञा

नत्वादित्यतस्तद्वाक्याभिप्रायंविशदमाह ॥ इंद्रियेभ्यइत्यादिना ॥ सत्वंबुद्धिः । अलिंगःप्राकृतभौतिकशरीररहितः । इंद्रियादितारतम्यज्ञानपूर्वकंजगदुत्पत्तिनाशादिकर्तृत्वेनतंज्ञात्वामुच्यतेतोनोक्तदोषः । नन्विंद्रियेभ्यःपराह्यर्थाइत्यादिनातारतम्यपूर्वंभगवदाधिक्यस्यज्ञापितत्वात्गुहांप्रविश्यतिष्ठंतींयोभूतेभिर्व्यजायतेत्यादिनाजगत्सृष्ट्यादेर्भगवदधीनत्वस्यचज्ञापितत्वात्पुनरिंद्रियेभ्यःपरंमनइत्यादिनाभगवदाधिक्यज्ञापनंव्यर्थमितिशंकामभ्यासस्यप्रयोजनोक्त्यावारयति ॥ पुनरिति ॥ ज्ञानपूर्वंज्ञापनपूर्वं । ज्ञानेज्ञापने । तारतम्यज्ञापनपूर्वकंभगवतःसर्वाधिक्यज्ञापनेसर्वागमानांतात्पर्यमित्यस्यप्रमितत्वेभवेदिदंतात्पर्यकल्पनं तदेवकुतइत्यत स्तत्रप्रमाणमाह ॥ तारतम्येति ॥ तंज्ञात्वामुच्यतइत्युक्तंमोक्षसाधनंभगवज्ज्ञानंनचक्षुरादिनाऽनायाससाध्यं । किंतुश्रवणाद्युपोद्बलितमनसैवेत्याह ॥ नसंदृशइति ॥ संदृशेसम्यग्ज्ञानायास्यरूपंनतिष्ठति । तदेवविशदयति ॥ नचक्षुषेति ॥ अन्यैरपींद्रियैरेनंनगोचरयतीतिशेषः । चक्षुराद्यगोचरश्चेत्कस्यगोचरइत्यतआह ॥ हृदेति ॥ हृदाभक्तियुक्तेनमनसा । मनीषामनीषया । ज्ञानरूपोवाभगवानभिव्यक्तोविषयीकृतोभवतीत्यर्थः । चक्षुराद्यगोचरंभगवद्रूपमित्ययुक्तं । मत्स्यादेश्चक्षुरादिगोचरत्वादित्यतस्तद्व्याचष्टे ॥ प्रादुर्भावानिति ॥ ननुमाभून्मलरूपज्ञानं । चक्षुरादिजन्यावतारज्ञानेनमुक्तिर्भविष्यति । तथाचश्रवणादिवैयर्थ्यमित्यतआह ॥ प्रादुर्भावानपीति ॥ इंद्रियैर्दृष्ट्वेतिशेषः । हृदामनीषामनसाहरिंपश्यतीत्युक्तं । तत्राभ्यर्हितंसाधनंकिमित्यतःप्रत्याहारसिद्धंधारणादिरूपंध्यानमेवेत्याह ॥ यदेति ॥ ज्ञानानिज्ञानकारणानि । परमांगतिंपरमज्ञानसाधनं । ननुकथंधारणायाःपरमगतिसाधनत्वं । ध्यानसमाधिलक्षणयोगस्यैवतत्वादित्यतःस्थिरधारणायाःततोतिविशेषाभावादित्याह ॥ तामिति ॥ अनतिवि

शेषत्वमेवविशदमाहाप्रमत्तइति । योगस्यविषयमाह ॥ योगइति ॥ योगःप्रभवाप्ययौहिइतिसामानाधिकरण्यप्रतीतिमपेक्षित प्रक्षेपेणवारयति ॥ प्रभवेति ॥ ननुजगतःप्रभवाप्ययध्यानंकथंयोगः । तस्येश्वरासंबंधित्वादितिशंकामपेक्षितपूरणेनवारयति ॥ भगवतइति ॥ सकाशाद्भवंताविति पूरणीयं । प्रतिहियोगइतिपूर्वेणसंबंधः । नचक्षुषापश्यतीत्युपलक्षणत्वेनोक्तंविशदयति ॥ नैववाचेति ॥ तर्हिकेनोपलभ्यतेतदित्यतोव्यतिरेकेणाहास्तीति । अस्तीतिब्रुवतोगुरोरन्यत्र तेनविनेत्यर्थः । गुरूपलभ्योपिभगवान्प्रसन्नेनस्वेनैवेत्याहास्तीत्येवेति । उभयोस्तत्वभावेनतत्वभावनकर्त्राप्रसन्नेनभगवतेतियावत् । अस्तीत्येवोपलब्धव्योज्ञातव्यः । परमात्माअस्तीत्यनेनसन्मात्रमित्येवबोद्धव्यइत्यन्यथाप्रतीतिंनिवारयन्नस्तीत्यादिव्याचष्टे ॥ अधिकइत्यादिना ॥ अनाधिक्यंजानतांसकाशात् । ननुतत्प्रसादादेवाधिक्यज्ञानं प्रसादश्चाधिक्यज्ञानादित्यन्योन्याश्रयतेत्यतोव्यक्तिभेदान्नदोष इत्याहानादीति । नन्वनादिकालादाधिक्यंजानतस्तज्ज्ञानंभवेभवेपुनर्वृद्धिमेतीत्ययुक्तं । अनादितस्तद्रहितानामपिपश्चाज्जायमानत्वादित्यतआह ॥ येषामिति ॥ ननुकथमेतत् । अस्मासुपश्चाद्भाविनस्तज्ज्ञानस्यानुभवसिद्धत्वादित्यतआहाभिभूतमिति । नन्वाधिक्यज्ञानाद्भवन्भगवत्प्रसादोनफलं । किंतुफलहेतुरतस्तत्फलंकिमित्यतोमोक्षइत्याह ॥ यदेति ॥ तत्सर्वकामप्रहाणप्रतीतिंनिवारयन्व्याचष्टे ॥ अंतःकरणेति ॥ हार्दकामत्यागश्चकदाभवतीत्याकांक्षायांतत्कारणाविद्याहंकारकर्मणांहृदयग्रंथीनांयदाप्रहाणिर्भवतितदेत्याह ॥ यदेति ॥ तद्व्याचष्टे ॥ मिथ्येति ॥ अनुशासनं निष्कामकर्मश्रवणमननध्यानकर्तव्यता प्रतिपादकंशास्त्रं । एवंमोक्षबोधिकांब्रह्मविद्यांनिरूप्यज्ञानिनश्चरमदेहान्निष्क्रमणेअवश्यंपूर्वंध्येयंमार्गमाह ॥ शतमित्यादिना ॥

अनन्यप्रोक्तेगतिरत्रनास्तीत्यादौनिरूपितंभेदज्ञानमेवापवर्गसाधनमित्याहांगुष्ठेति । तंजीवंदेहाद्भेदेनविजानीयादित्यन्यथाप्रतीतिंनिवारयन्व्याचष्टे ॥ **शरीरभूतइति** ॥ जीवस्यशरीरतयाभगवदधिष्ठितत्वंतद्वशत्वंचकुतः येनतयोर्भेदंप्रतीमइत्यतआह ॥ **यस्येति** ॥ नन्वथापिशरीराज्जीवस्यैवभेदउच्यते नजीवाद्भगवतस्तज्ज्ञापकाभावादित्यतआह ॥ **जनानामिति** ॥ चशब्देनयस्यात्माशरीरमित्युक्तंबाह्यंचज्ञापकंसमुच्चिनोति । नन्वत्रजीवस्यैवशरीराद्भेदउच्यते । भगवतोंगुष्ठमात्रत्वाभावादित्यतआह ॥ **देहेति** ॥ अस्त्वत्रोच्यमानोभगवान् । तस्यशरीरादेवभेदोत्रोच्यतेइत्यतआह ॥ **संसारीति** ॥ अभेदोभगवतइतिशेषः । येनसंसारिशरीराद्भगवतोभेदउच्येतेतिवाक्यशेषः । सत्यंभगवतःसंसारिशरीरादभेदःकेनापिवादिनानांगीकृतइति लोकसिद्धोऽभेदःस्वाच्छरीरादितिनिषिध्यतइत्यतआह ॥ **नचेति** ॥ भगवतःसंसारिशरीराभेदइतिशेषः । भगवतोजीवाद्भेदेजनानांहृदयेनिविष्टइत्युक्तामुपपत्तिंस्फुटयति ॥ **जनानामिति** ॥ जनानांहृदयेनिविष्टइतिषष्ठ्यानिविष्टस्यभगवतोजीवाद्भेदप्रतीतेरित्यर्थः । इतोप्यत्रजीवोदेहात्पृथगुच्यतइतिनेत्याह ॥ **नजीवइति** ॥ वालाग्रशतभागस्यशतधाभेदितस्यच । भागोजीव इतिज्ञेयःसचानंत्यायकल्पतेइतिश्रुतेर्नजीवोंगुष्ठमात्रः । अवांतरप्रमेयमुपसंहरति ॥ **अतइति** ॥ अतोजनानांहृदयइत्याद्युक्तोपपत्तेः । उक्तःअंगुष्ठमात्रःपुरुषोंतरात्मेत्यत्र । मुमुक्षुश्चेद्भगवतउक्तान्शोकरहितत्वाद्यभावगुणान्मुक्तामुक्तप्रेरकत्वादिभावगुणांश्चजानीयादित्युक्तमर्थमुपलक्षणत्वेनावधारयन्नुपसंहरति ॥ **तंविद्यादिति** ॥ आदरार्थोभ्यासः । एवंवेदपुरुषोनचिकेतसे मृत्युप्रोक्तांब्रह्मविद्यामनूद्यतन्निष्ठावतस्तस्यफलमाह ॥ **मृत्युप्रोक्तामिति** ॥ एवमन्यस्यापितन्निष्ठस्यतत्फलमतिदिशति

॥ **अन्योपीति** ॥ अन्योप्यध्यात्मवित्सोप्येवमेवेतियोज्यं । उपनिषत्प्रतिपादितमर्थमुपसंहरति ॥ **अतःसर्वोत्तमइति** ॥ अतःप्राधान्येनाग्निष्टोमपूज्यत्वात्मुक्तामुक्तनियामकत्वाज्जगत्सृष्ट्यादिकर्तृत्वात्शोकादिसकलदोषराहित्यात्विष्णुरेवसर्वोत्तमइतिसिद्धमित्यर्थः । मंगलावसानस्यप्रचयादिहेतुत्वादवसानेपितदाचरणीयमितिद्योतयन्यत्प्रसादात्यत्प्रीत्यैभाष्यमुपक्रम्यसमापितवान्तमेवांतेप्युपश्लोकयन्प्रणमति ॥ **नमइति** ॥ प्रभविष्णवेप्रभवनशीलायेत्यशेषमतिमंगलं ॥ **इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितस्यकाठकोपनिषद्भाष्यस्यटीकाजयतीर्थपूज्यचरणशिष्यव्यासतीर्थविरचितासंपूर्णा** ॥

अयं ग्रंथः कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागर-
मुद्रणालये मुद्रयित्वा प्रकाशितः. शके १८२७, सन १९०५.

॥ काठकव्यासतीर्थीयटीकासंपूर्णा ॥

॥ ऐतरेयताम्रपर्णीयप्रारंभः ॥

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ श्रीमदानंदतीर्थार्यहृदयामलमंदिरं ॥ जानकीजानि मानंदसांद्रंवंदेनिरंतरं ॥ १ ॥ श्रीपद्मनाभतीर्थादीन्वंदेविज्ञानवारिधीन् ॥ टीकाकृतश्चविश्वेशतीर्थान्वेदांतकोविदान् ॥ २ ॥ नारायणाचार्यमुखेंदुबिंबाद्गलत्सुतत्वामृतपानतृप्तं ॥ श्रीविट्ठलार्याभिधभूसुरेंद्रंपरंगुरुंमेपितरंनमामि ॥ ३ ॥ श्रीमदानंदतीर्थार्यशास्त्रांभोधिंविमथ्ययः । ददौज्ञानामृतंमह्यंतंतीर्थार्यंगुरुंभजे ॥ ४ ॥ श्रीसत्यनूल्लाभिधपूर्णवारिधेर्जातःसुविद्योरुकलाभिपूर्णः । तापंहरन्नोऽमृतवीक्षणेनश्रीसत्यपूर्णेंदुरहोविराजते ॥ ५ ॥ महैतरेयभाष्यस्यगुरूक्तार्थोनुवर्ण्यते । टीकाऽस्पष्टःसंग्रहेणकृपांकुर्वंतुसज्जनाः ॥ ६ ॥ अथभगवान्सर्वज्ञमुनिरेषपंथाइत्यादावधिकृतंविशिष्टमिष्टंनारायणंग्रंथादावुपश्लोकयन्शरणंप्रार्थयते ॥ नारायणमिति ॥ अहंनारायणंसाक्षात्प्रत्यक्षतःशरणमियां नत्वन्यइवपारोक्ष्येणेत्यन्वयः । इतरपरित्यागेनशरणप्रासौवैशिष्ट्यमिष्टत्वंचनिमित्तमितिभावेन साक्षात्प्राणस्यमुख्यप्राणस्याधीश्वरंरमेशमितिचोक्तं । प्राणाधीश्वरत्वमात्रेणतस्यवैशिष्ट्यं कुतइत्यतःसर्वेत्यादिप्राणविशेषणं । ननुप्राणोह्यनन्येश्वरःप्रसिद्धःतत्कथंनारायणस्तदीशइत्यतश्चोक्तं साक्षात्प्राणस्याधीश्वरमिति । नारायणोहिसाक्षादव्यवधानेनप्राणस्येश्वरः तदन्यस्तस्येश्वरोनास्ति । तदभिप्रायेणानन्येश्वरत्ववचनं । अनन्येश्वरताप्राणेतदन्येश्वरवर्जनादितिवचनादितिभावः । रमायाईश[illegible]र्थावान्नानुपपत्तिः । तदनेनप्राणांतरंगत्वस्यसर्वेष्टदातृरमेशत्वस्यचो

भा० । श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ नारायणंनिखिलपूर्णगुणैकदेहंसर्वज्ञमच्युतमपेतसमस्तदोषं ॥ प्राणस्यसर्ववित्परमेश्वरस्यसाक्षादधीश्वरमियांशरणंरमेशं ॥ १ ॥

क्त्या प्राणावतारस्यस्वस्यपरमेष्टोरमापतिरितिसूचितं । प्राणस्यसर्वोत्तमत्वं भगवतस्तदुत्तमत्वंच ताअहिंसंताहमुक्थमस्म्यहमु क्थमस्मीत्यादावुक्तं । रमेशत्वंचानकाममारइत्यादौज्ञेयं । वैशिष्ट्योपपादनायनिखिलपूर्णगुणैकदेहमपेतसमस्तदोषमितिविशेष णद्वयं । केतेगुणाइत्यतउपलक्षणत्वेनोक्तं सर्वज्ञमिति [redacted]षाभावविवरणार्थमच्युतमिति ॥ अनित्यत्वंदेहहानिरित्युक्तरीत्याचतु र्विधनाशरहितमित्यर्थः । इदंचविशेषणद्वयंउपलक्षणत्वेनैतद्ब्रह्मैतत्सत्यमित्यत्रोक्तं । ब्रह्मायंगुणपूर्णत्वात्सत्यंसाधुस्वरूपतइति वक्ष्यमाणत्वात् । सार्वज्ञ मेतत्कर्मेतिकर्मशब्दार्थांतर्गतं । कर्तृत्वात्कर्ममातृतःइतिवक्ष्यमाणत्वात् । अच्युतत्वमपिसत्यशब्दा र्थः । सदातनंसत्यमितिनित्यमेवोच्यतइतिवचनात् । च्युतेरसाधुत्वेनसत्यंसाधुस्वरूपतइतितदभावरूपाच्युतत्वस्यसत्यशब्दार्थ तयाभाषितत्वाच्च । अपेतसमस्तदोषमित्यस्यापेतःसमस्तानांदोषःसंसारलक्षणोयस्मादित्यर्थांगीकारे पंथाइत्येतदप्युक्तताप्पर्यं । नित्यंस्वप्राप्तिहेतुत्वात्पंथाइतिवक्ष्यमाणत्वात् । उत्तरभाष्येब्रह्मपंथाःसत्यंकर्मेतिनारायणस्यवासुदेवाद्याःक्रमेणचतस्रोमूर्तयइ तिवक्ष्यमाणत्वात्तदनुसारेणमूलरूपिनारायणप्रशंसनायनारायणमितिविशेष्यंनिरदिक्षत् । वासुदेवादिरूपाभिप्रायेणनिखिले त्यादिविशेषणानिचेतिसर्वमवदातं ॥ ऋष्याद्यज्ञानेऽनर्थोक्तेर्महिदासऋषिर्देवतेतिचवक्ष्यति । महिदासश्चननारायणादन्यः ये नास्याउपनिषदोब्रह्मविद्यात्वंस्यादितिभावेनाह ॥ प्रादुर्बभूवेति ॥ अब्जजसुतस्य सकाशात् । ननुनायंमहिदासोनारायणः ।

॥ १ ॥

भा० । प्रादुर्बभूवभगवांस्तपसेतरायानारायणोब्जजसुतस्यविशालनाम्नः ॥

महिनांपूज्यानांब्रह्मादीनांदासइतितन्नामनिर्वचनादित्यतःसोपोद्घातंतन्नामान्यथानिर्वक्ति ॥ तस्मिन्निति ॥ तस्मिन्नध्वरंगतेप्र विष्टेनिश्चेतनः तत्प्रभयाधर्षितत्वात्कर्तव्यज्ञानहीनः नित्यंतद्रूपपरिचयवत्त्वाच्चित्तक्षोभरहितःपद्मभवस्तमस्तौत् । अतएव भग वत्प्रसादादेव । तदभावेवयंतवदासाःस्मइतिस्वात्मसमर्पणेपिसामर्थ्याभावादितिभावः । यद्वा यतएवंदासत्वमापुरितिपौराणि कीकथा अतोमहिनोदासायस्येतिविग्रहमाश्रित्यमहतांसुराणांतद्दासत्वतएवसमहिदासइतिप्रसिद्धः । नतुमहिनांदासइतितत्पुरु षाश्रयेणतस्यतद्दासत्वादित्यर्थः । ऋषिर्देवतेआह ॥ शृण्वत्स्विति ॥ तेषुब्रह्मादिषुशृण्वत्सूपश्रोतृषुसत्सुदिव्यां मुख्यतोदेवा धिकारिकां । इतरापुत्रेणोपदिष्टत्वात्तत्प्रतिपादकत्वाच्चैतरेयीमित्युक्तार्थप्रमापनायविशेषणं । ब्रह्माप्यवांतरऋषिरितिभावेनोक्तं ॥ सेति ॥ चतुराननास्यादुपदिष्टासाबह्वृचैःपठितेतियोज्यं । विष्णो र्महिदासादिरूपिणः । आहंमांदेवेभ्योवेद३०मदेवान्वेदे त्यादौतदवगमात् । ननुतर्हिमहतीभूतिर्लक्ष्मीर्यस्यांप्रतिपाद्यतेसामहाभूतिरित्यन्यत्रप्रसिद्धसंज्ञैवास्याःश्रुतेर्लक्ष्मीपरत्वमवगम यति तत्कथंविष्णुप्रतिपादकत्वमित्यतआह ॥ महाभूतिश्रुतिरिति ॥ महतीभूतिरैश्वर्यरूपोहरिर्यस्यांसामहाभूतिरितिव्युत्प त्त्याश्रयणेनयतोमहाभूतिर्हरिरत्रकथितोतएवैषामहाभूतिश्रुतिसंज्ञिताऽतोनविरोधइत्यर्थः । ग्रंथांतरसाधारण्यव्यवच्छेदायोक्तं

भा० । तस्मिन्गतेध्वरमभूत्सुरविप्रसंघोनिश्चेतनस्तद्दु[redacted]भवोमुमस्तौत् ॥ तेनस्तुतःसभगवान्गिरिशेंद्रमुख्यान्सर्वानबोधयदजेनसहै वतेऽथ ॥ दासत्वमापुरतएवमहत्सुराणांदासत्वतःसमहिदासइतिप्रसिद्धः ॥ शृण्वत्सुतेषुभगवानवदद्रमायैदिव्यांश्रुतिंसपरमोतिमुदैतरेयीं ॥ साबह्वृचैःप्रपठिताचतुराननास्याद्यस्यांरहस्यमुदितंपरमंहिविष्णोः ॥ महाभूतिश्रुतिःसैषामहाभूतिर्यतोहरिः ॥

॥ विशेषेणेति ॥ लक्ष्मीप्राणादेरप्यत्रप्रतिपादनात्कथमेतदित्यतश्चोक्तं ॥ विशेषेणमुख्यतइति ॥ कथनप्रकारमाह ॥ सर्वज्ञइति ॥ प्रथमवाक्येएतत्कर्मेत्यनेनसर्वज्ञः । सत्यमित्यनेनशाश्वतः ब्रह्मेत्यनेनप्रभुःपूर्णश्चकथितः । भूबहौ बहुःपूर्णता यामितिधातोरितिज्ञेयं ॥ ७ ॥ जीवमोक्षार्थंप्रवृत्तैषैतत्रयीश्रुतिः । मोक्षस्यभगवत्प्रसादसाध्यत्वाज्ज्ञानंविनात्यर्थप्रसादाभा वात्तस्यचतदुपासासाध्यत्वाद्ब्रह्मज्ञानायादौतदुपासांविधत्ते ॥ एषपंथाइति ॥ तत्रैषइतिपरामर्शविषयोनप्रतीयतेप्रसिद्धपथा द्यैक्यंचप्रतीयतेऽतोयथावद्व्याचष्टे भगवानाचार्यः ॥ एषएवेति ॥ महान्ततेपूज्यत्वेनप्रकृतएवेत्यर्थः ॥ तस्मान्नप्रमाद्येदित्यस्य तंनविस्मरेदितिव्याख्यानं क्वापिकदाचिदपि संततानुस्मरणलक्षणंध्यानंकुर्यादितियावत् । श्रवणमननयोरप्युपलक्षणमेतत् । प्रयोजनाभावान्नजिज्ञासाकार्येत्यतएषपंथाइत्युक्तं । तस्यार्थःपुरुषोत्तमएवनित्यंनियमेनसायुज्यादिरूपस्वप्राप्तिहेतुत्वाज्जीवानां स्वरूपानंदाविर्भावप्राप्तिहेतुत्वाद्वापंथाइत्युच्यतइत्यर्थः । तथाचस्वप्राप्तिलक्षणमोक्षस्यतत्प्रसादंविनाऽयोगात्तदर्थंतज्ज्ञानायत ज्जिज्ञासाकार्येतिभावः । ननुकर्मणाऽन्यत्रमोक्षश्रवणात्तत्प्रसादवैयर्थ्यमित्यतएतदेवकर्मेत्युक्तं तद्व्याचष्टे ॥ कर्तृत्वादिति ॥

भा० । विशेषेणात्रकथितःसर्वज्ञःशाश्वतःप्रभुरित्यृक्संहितायां ॥

उप० । हरिःॐ ॥ एषपंथा ।

भा० । एषएवसदापंथाभगवान्पुरुषोत्तमः । नित्यंस्वप्राप्तिहेतुत्वात्कर्तृत्वात्कर्ममातृतः ॥ ब्रह्मैषगुणपूर्णत्वात्सत्यंसाधुस्वरूपतः ॥ का पितंविस्मरेन्नैवत्यक्त्वातंनेतरंत्रजेत् ॥

॥ २ ॥

कर्तृत्वान्मातृत्वात्सर्वज्ञत्वाच्चसएवकर्मेत्यर्थः । कर्मणामोक्षइत्यस्यापिसर्वजगज्जन्मादिकारणेनसर्वयोग्यताभिज्ञेनभगवतैवमोक्ष इत्यर्थइतिभावः । जीवव्यतिरिक्तेश्वराभावात्तस्यचाहमितिनित्यसिद्धत्वान्नजिज्ञास्यत्वमित्यतोजिज्ञास्यजीवत्वव्यावर्तकंलक्षण मुक्तं ॥ एतद्ब्रह्मैतत्सत्यमिति ॥ तद्व्याचष्टे ॥ ब्रह्मेति ॥ जिज्ञास्यंखलुनिर्दोषमनंतगुणंविवक्षितं नतस्यसदोषाल्पगुणजी वाभेदोवक्तुंयुक्तइतिभावः । गुणपूर्णत्वसंभावनायजगज्जन्मादिकारणत्वलक्षणमुक्तं ॥ कर्मेति ॥ कर्तृत्वाल्लयकर्तृत्वाच्चकर्म । मानंज्ञानंलयश्चेतिवचनात्भाष्येमातृत्वादित्यस्यलयहेतुत्वादित्यर्थः । ननुतस्यैवजिज्ञास्यत्वेदेवतांतरोपासाविधिवैयर्थ्यमित्यत उक्तं तन्नातीयादिति ॥ तद्व्याचष्टे ॥ त्यक्त्वेति ॥ तत्परिवारतामृतेनेतरंस्मरेदित्यर्थः । सर्वोत्तमत्वेनतदुपासनंकृत्वैवतत्परि वारत्वेनदेवताःस्मर्तव्यास्तदतिक्रमेणनस्मर्तव्याइत्युक्तार्थेतात्पर्यद्योतनाय पुराकल्पउक्तो नह्यत्यायन्पूर्वइति ॥ अतिक्रमवतां विपरीतफलोक्तिपूर्वंनिंदार्थवादउक्तो येऽत्यायंस्तेहपराबभूवुरिति ॥ अत्रानतिक्रमिणांफलाद्यनुक्त्यान्यूनतेत्यतः तेहपराबभूवु रित्यस्मात्तेहबभूवुरित्यंशमाकृष्य नह्यत्यायन्पूर्वइत्येतद्व्याचष्टे ॥ पूर्वइति ॥ पूर्वेब्रह्माद्यास्तंनात्यायन् नतत्यजुस्तेनबभूवुः सं सारान्मुक्ताबभूवुः । पूर्वाश्रीश्चतदत्यागात्तस्यभगवतःअत्यागात् । वायुजनकदिङ्नामकबाहुमत्वाद्युपासनान्नित्यमुक्ता पूर्णगु णत्वोपासनाद्गुणाधिकाच बभूवेत्यर्थः । सोहंवायुंदिशांवत्संवेदमापुत्ररोदंरुदमित्यादिश्रुतेरितिभावः । उपनिषत्स्वोक्तार्थप्रमा

उप० । एतत्कर्मैतद्ब्रह्मैतत्सत्यं । तस्मान्नप्रमाद्येत्तन्नातीयान्नह्यत्यायन्पूर्वेयेऽत्यायंस्तेहपराबभूवुः । पूर्वेनैनंतत्यजुर्हिब्रह्माद्यास्तेनसंसृतेः ॥ मुक्ताःश्रीश्चतदत्यागान्नित्यमुक्तागुणाधिका ॥

णमाह ॥ तदुक्तमिति ॥ तत्भगवदतिक्रमवतांपराभवस्तदनतिक्रमवतांविभवइत्येतदृषिणाहयग्रीवेणोक्तमित्यर्थः॥अयंमंत्रा
र्थः ॥ हप्रसिद्धास्तिस्रःप्रजाः अत्यायमत्ययंभगवदतिक्रममीयुःप्राप्ताइतिप्रसिद्धं । तेनचस्वरूपात्यायं स्वरूपनाशमीयुः । तमः
प्राप्ताइतियावत् । अन्यास्तिस्रःप्रजाः अर्कमर्कनामकमग्र्यंतर्गतंभगवंतं । यद्बृहत्तेजसाबृंहणाद्बृहन्नामकमादित्यांतर्गतंभुवनेष्वं
तस्तस्थौतद्रूपं । यःपवमानोहरितोदिशआविवेशतदंतर्गतंरूपंवाऽभितस्तत्तद्योग्यसाधनैर्निविविशेनिविविशिरे । इरयोरइतिसू
त्रेणेरइत्यस्यरेभावः । मनसाप्रविष्टाउपासितवंतः । उपासनयाचनितरांभगवल्लोकंविविशिरेमुक्ताइतियावत् । प्रजाःहतिस्रइत्यु
क्तास्तिस्रःप्रजाःकाइत्यतस्तदनूद्यश्रुतिरेवव्याचष्टे ॥ यावैताइमाइति ॥ वैलौकिकतयाप्रसिद्धायास्ताइमास्तिस्रःप्रजाःअत्या
यमीयुरित्युक्तास्तानीमानिवयांसि वंगावगधाः ईरपादाश्चेतियोजना । वयांसीत्यादिपदत्रयंव्याचष्टे ॥ विहायसीति ॥ छां
दोग्यभाष्ये वयांसिव्ययनात्प्रोक्तावीत्याकाशस्तथोच्यतइत्युक्ते विंश्वश्चुषिव्योन्निहरेपरमात्मनिपक्षिणीतिनानार्थरत्नमालायांचो
क्तेर्विंशब्दस्तावदाकाशवाची । तस्मिन्नयनात्सदासंचारात्पिशाचा वयांसि । वंवर्तितमन्यैरुत्पादितंगंज्ञानंयेषांतेवंगानराः । अ

उप० । तदुक्तमृषिणा प्रजाहतिस्रोअत्यायमीयुर्न्यन्याअर्कमभितोविविश्रे ॥ बृहद्भतस्थौभुवनेष्वंतःपवमानोहरितआविवेशेति । प्रजाः
तिस्रोअत्यायमीयुरिति यावैताइमाःप्रजास्तिस्रोअत्यायमायंस्तानीमानि वयांसि वंगावगधाश्चे रपादा न्यन्याअर्कमभितोविविश्रइति ।

भा० । विहायस्ययनात्प्रोक्तावयांसीतिपिशाचका: ॥ वर्तितज्ञानतोवंगानरास्तैरवनंसदा ॥ अन्नरूपैर्गृध्नवोहिवंगावगधनामका: ॥ राक्ष
सा असुराईरपादाइतिसमीरिताः ॥ धर्मोज्ञानंचवैराग्यमैश्वर्यंचतुरात्मकः ॥

न्नरूपैस्तैरवनंस्वरक्षणंगृध्नंत्यपेक्षंतइतिराक्षसाः वंगावगधनामकाः । वृतुवर्तनेगम्लृगतौअवरक्षणेगृधुअभिकांक्षायामितिहिधात
वः । नन्वसुराणांवाय्वंशत्वाभावात्कथमीरपादत्वमित्यतउक्तंधर्मइति । वायुर्देवो धर्मोज्ञानंवैराग्यंऐश्वर्यंचेतिचतुरात्मकश्चतुर्गु
णाभिमानी । अत्रगुणचतुष्टये । प्रजाहतिस्रोत्यायमीयुरित्यस्यार्थस्तेत्रयइति । येऽत्यायन्नित्यस्यार्थः पराभूताइति । उपनिषदि
येऽत्यायन्नित्यनुवादस्यप्राप्तिपूर्वकत्वात्प्रजाहतिस्रोत्यायमीयुरितिमंत्रानुसारेणयेऽत्यायन्नित्यतःपूर्वंतिस्रःप्रजाअत्यायमीयुरित्य
ध्याहर्तव्यमितिसूचनायमंत्रपादव्याख्यानानंतरंयेत्यायन्नित्युपनिषदंशोव्याख्यातोबोध्यः । द्वितीयपादेपितिस्रःप्रजाइत्यनुवर्त
नीयमितिभावेनानूद्यव्याचष्टे ॥ ताइमाइति ॥ तास्तिस्रइमास्तद्विलक्षणाःप्रजाइत्यर्थः । अर्कमित्यनूद्येममेवाग्निमितिव्या
ख्यानं । तृतीयपादेभुवनेष्वंतःस्थितंबृहत्किमित्यतस्तदनूद्यश्रुतिर्व्याचष्टे ॥ अदउएवेति ॥ असावादित्यआदित्यनामातदं
तर्गतः उएव उच्चोविष्णुरेव । भुवनेष्वंतर्विद्यमानमदोबृहदित्यर्थः । चतुर्थपादमनूद्यपवमानहरिच्छब्दयोरर्थमाह ॥ वायुरेवे
ति ॥ ताइमाःप्रजाअर्कमभितोनिविष्टाइत्यत्रतिसृणामपिप्रजानामर्कनामकाश्र्याविष्टत्वंप्रतीयते । तदयुक्तंप्रमाणविरोधात् ।
असावादित्यइत्यादावुपासकानुक्तिश्चेत्याशंक्यमूलेऽर्कमित्यनूद्याग्निमितिव्याख्यानं । असावादित्यइत्यनंतरंयस्तमितिशेषः ।

भा० । वायुर्देवोत्रासुराणामैश्वर्यगुणएवहि ॥ ईरपादास्ततःप्रोक्ता स्तेत्रयोविष्णुमत्यजन् ॥ पराभूतास्ततस्तेतुतमस्यंधेनिपातिताः ॥

उप० । ताइमाःप्रजाअर्कमभितोनिविष्टाइममेवाग्निं बृहद्भतस्थौभुवनेष्वंतरित्यदउएवबृहद्भुवनेष्वंतरसावादित्यः पवमानोहरितआविवेशे
तिवायुरेवपवमानोदिशोहरितआविष्टः ॥ १ ॥

दिशोहरितआविष्टइत्यनंतरंचयस्तमितिशेषः । तथाचताइमाःप्रजाःमनुष्योत्तमाऋषयोदेवाःक्रमेणार्कमग्निं योसावादित्यस्तं यो वायुर्हरितआविष्टस्तं चाभितःनिविष्टाइत्यर्थ(इत्य)मभिप्रेत्यव्याचष्टे॥ देवाश्चेति ॥ तिसृणामपित्रिस्थानस्थभगवदाश्रयत्वप्रतीतेरुक्तंविवृणोति ॥ अग्निस्थमित्यादिना ॥ अर्चतेःकृदाधारार्चिकलिभ्यःकइत्युणादिसूत्रेणकप्रत्ययेबाहुलकात्कस्येत्संज्ञाभावेचार्कशब्दोनिष्पन्नः । जनैरितियोग्यतयासंबध्यतइतिभावेनार्कशब्दंव्याचष्टे ॥ आजनैरिति ॥ पूज्यत्वंचसर्वसाधारणमित्यत आसम्यक्प्राधान्येनार्चितत्वादित्युक्तं ॥ यद्वाआङीषदर्थे । अल्पैर्जनैर्मानुषैरित्यर्थः । अभितइत्युक्तंमानुषाणांसाधनमाह ॥ अग्नाविति ॥ नन्वग्नौकर्माणिकृत्वैवेत्ययुक्तं । यतीनांमुक्त्यभावप्रसंगात् । यत्याश्रमस्याग्निपूजादिकर्मत्यागरूपत्वादित्यतआह ॥ कर्मभिरिति ॥ होमादिकर्मत्यागलक्षणोयत्याश्रमोपिप्राक्कर्मभिःशुद्धांतःकरणानामेवनान्यथाऽतोनोक्तविरोधइत्यर्थः । अदउएव बृहदित्यस्यविवरणं ॥ आश्रिताइति ॥ ऋषयःसूर्यगंविष्णुंआश्रिताःअसौसूर्यगतोविष्णुस्तेजसाबृंहणाद्बृहदित्युक्तः । सर्ववस्तूनांआदानादादित्यइत्यप्युक्तइतियोजना । अभितइत्युक्तमृषीणांसाधनमाह ॥ स्वाध्यायेनेति ॥ वा

भा० । देवाश्चऋषयोमर्त्यसत्तमाइतिचत्रयः । आश्रिताविष्णुमेवैकंत्रिस्थानस्थितमच्युतं । अग्निस्थमाश्रितामर्त्याविष्णुमर्कोभिधंपरं । आजनैरर्चितत्वात्सह्यर्कइत्युच्यतेहरिः ॥ अग्नौकर्माणिकृत्वैवमानुषामुक्तिभागिनः ॥ कर्मभिःशुद्धसत्वानांकर्मत्यागोपिनान्यथा ॥ आश्रिताः सूर्यगंविष्णुमृषयोबृहदित्यसौ ॥ तेजसाबृंहणादुक्तोविष्णुरादित्यइत्यपि ॥ आदानात्सर्ववस्तूनांस्वाध्यायेनामुमाश्रिताः ॥ मुच्यंतेऋषयोनित्यंनान्यथातुकथंचन ॥

युरेवपवमानइत्यस्यविवरणं ॥ वायुस्थमिति ॥ देवानांकर्मस्वाध्यायभक्त्याद्यखिलसाधनवत्त्वस्यप्रसिद्धत्वादत्रतदनुक्तिः । ननुमनुष्यैर्गायत्र्यादिस्वाध्यायेनसूर्यगतस्य ऋषिभिःकर्मभिरभ्यंतर्गतस्यो भाभ्यांभक्तिपूर्ववायवंतर्गतस्याश्रितत्वाद्विशिष्योक्तिरयुक्तेत्यतआह ॥ आश्रितइति ॥ सर्वैःअधिकारिभिःसर्वैःसाधनैःसर्वत्राद्यादौ ॥ १ ॥ पूर्वखंडेब्रह्मपदेनगुणपूर्णत्वं तन्नातीयादितिसर्वोत्तमत्वंचोक्तं । तत्संभावनायकर्मपदेनजगत्कारणत्वंतद्भोक्तृत्वंचोक्तं । तत्प्रमाणसूचनपूर्वमधिदैवमध्यात्मंचोपपाद्यते ॥ उक्थमुक्थमित्यादिना ॥ यच्चवैप्रसिद्धाःदेवाद्याःप्रजाःउक्थमुक्थमितिवदंति तदुक्थमिदंवक्ष्यमाणमेव नतुबृहतीसहस्रं । तस्यतत्प्रतिपादकत्वेनतन्नामवाच्यत्वेपि प्रवृत्तिनिमित्तस्यजगदुत्थापकत्वस्याभावात् । नापिवायुरुक्थं तस्यपारतंत्र्येणस्वावरोत्थापकत्वेनसर्वोत्थापकत्वाभावादितिभावः । इदंकिं इयंपृथिव्येव । अस्यांपृथिव्यांस्थितंतन्नामकंभगवद्रूपमेव । नपृथिव्यपिधराग्राह्या तस्यामुख्यतःपृथिवीपदप्रवृत्तिनिमित्ताभावादितिभावेनचैवकारप्रयोगः।तस्यमुख्योत्थापकत्वेशक्तत्वात्। पृथिवीस्थितस्योक्थत्वंकुतइत्यतउक्तमितइति ॥ यत्किंचेदमंकुरादीतःपृथिवीस्थाद्भुत्तिष्ठति । नप्रसिद्धपृथिव्येवोक्थं तस्यागरुडवाहनत्वाभावादितिभावेनवाहनमुच्यते ॥ तस्याग्निरर्कइति ॥ भोग्यमुच्यतेऽन्नमशीतयइति ॥ प्रसिद्धान्नस्यभ

भा० । वायुस्थमाश्रितादेवाःपवमानाभिधंहरिं ॥ संसारात्पावयित्वायन्महानंदेमिनोत्ययं ॥ पवमानस्ततोविष्णुर्व्याप्तःसर्वासुदिक्षुच ॥ आश्रितोभगवान्सर्वैःसर्वत्रापिविशेषतः ॥ आश्रयात्पृथगुक्तोयंनित्यानंदोरमापतिः ॥ १ ॥

उप० । उक्थमुक्थमितिवैप्रजावदंतितदिदमेवोक्थमियमेवपृथिवी इतोहीदंसर्वमुत्तिष्ठतियदिदंकिंच तस्याग्निरर्कोन्नमशीतयो

गवत्तर्पकत्वमपिभगवत्सन्निधानादितिभावेनोक्तमन्नेनहीति ॥ हियस्मादन्नेनान्नगतेनान्ननान्नाभोज्यभूतेननिमित्तेन भगवा निदंसर्वमश्नुते तस्माद्भगवत्सन्निधानादेवान्नमशीतयइव बृहतीसहस्रप्रतिपाद्यस्योक्थनामकस्यतर्पकं । अधिदैवेप्युक्थनामकं रूपांतरमुच्यते ॥ अंतरिक्षमेवेति ॥ अत्राप्येवकारस्यांतरिक्षगतं प्राधान्येनतन्नामकमित्यर्थः । एवमुत्तरत्राप्यंतरिक्षमंतरिक्ष गतंतन्नामकंभगवंतंअनु तत्प्रेरणयापक्षिणःपतंति नरादयश्चतत्प्रेरणयैवाश्वादीन्धावयंति । तस्यवायुरर्कइत्यादिपूर्ववदवतार्य व्याख्येयं । द्युस्थस्योक्थत्वमुपपाद्यते ॥ अमुतइति ॥ अमुतोद्युस्थाद्वृष्टिप्रदानाद्धीदंसस्याद्युत्तिष्ठतितस्मादुक्थमित्यर्थः । इत्यधिदैवमुक्थनामकरूपाण्युक्तानि । अथाध्यात्मं । अध्यात्मेदेहेपुरुषनामाहरिरेवोक्थं । नमुख्यप्राणः । नापिजीवः । कुत इत्यतउच्यते ॥ अयमेवेति ॥ अयंपुरुषएवमहान्सर्वोत्तमः । कुतःप्रजापतिःप्रजानांपतिर्जन्मादिकर्तृत्वात् । पित्रादिशरीरां तर्गततयाप्रजोत्पादकत्वादुक्थत्वंसंभवतीतिभावः ॥ नन्वहमुत्थापकइतिपित्रादिभिरनुभूयमानत्वात्कथंभगवतस्तदित्यतउक्तं ॥ अयमेवेति ॥ महान्प्रजापतिरयमेवाहंउक्थमस्मीतिविद्यामनुभवतीतिविद्यान्नजीवइत्यर्थः । इदमुक्तंभवति । नजीवस्याबा धितोत्थापकत्वानुभवः तथासतितदनुव्यवसायप्रसंगात् । अहमुक्थमितिविद्यानुव्यवसायश्चभगवतएव । जीवस्याहमुक्थमि

उप० । ऽन्नेनहीदंसर्वमश्नुतें तरिक्षमेवोक्थमंतरिक्षंवाअनुपतंत्यंतरिक्षमनुधावयंतितस्यवायुरर्कोन्नमशीतयोन्नेनहीदंसर्वमश्नुते ऽसावेवद्यौ रुक्थममुतःप्रदानाद्धीदंसर्वमुत्तिष्ठतियदिदंकिंच तस्मासावादित्योर्कोन्नमशीतयोन्नेनहीदंसर्वमश्नुतइत्यधिदैवत मथाध्यात्मंपुरुषएवोक्थमयमे वमहान्प्रजापतिरहमुक्थमस्मीतिविद्यात्

त्यनुभवानुव्यवसायेपिनविद्यानुव्यवसायः । अनुभवस्याप्रमात्वात्ततस्तस्यैवोक्थत्वमिति ॥ कैमुत्येनतस्योक्थत्वमुच्यते ॥ तस्यमुखमेवेति ॥ अंगभूतंमुखमेव किम्वंगीत्येवकारार्थः । अधिदैवमध्यात्मंचोक्थत्वंसमानमित्युच्यते ॥ यथापृथिवीति ॥ एवमुत्तरत्रनासिकाप्रसंगाद्विद्यांतरमुच्यते ॥ तदेतदिति ॥ नासिकायैनासिकायां । नेत्रयोर्मध्येयदेतत्किंचिद्विनतंस्थानंतत्त त्रएतत्प्रसिद्धं ब्रध्नस्यसूर्यस्य विष्टपंलोकोस्तीत्यर्थः । अध्यात्ममधिदैवंचान्नांतर्गतस्यतन्नाम्नोभगवतोन्नत्वमेकप्रकारमित्यु च्यते ॥ समानमशीतयइति ॥ अध्यात्ममधिदैवंचाशीतयइवान्नमन्ननामकंतदंतर्गतंरूपंसमानमेकप्रकारमेवेत्यर्थः । अन्न शब्दनिर्वचनपूर्वकंसाम्यमेवोपपाद्यते ॥ अन्नेनहीति ॥ सर्वाणिभूतान्यन्नेनसमनंतिचेष्टंते । तथाचआनयतीत्यन्नमितिनिरु क्तंभवति । प्रकारांतरेणनिर्वचनपूर्वकंसाम्यमुच्यते ॥ अन्नेनेमंलोकमिति ॥ अन्नेनदीयमानान्नांतर्गतरूपेणाध्यात्मगतदेव ताहरितुष्टिद्वाराजन्मांतरेइममन्नपानादिमन्मनुष्यलोकंजयति । तथापुरोडाशसोमाद्यन्नांतर्गतरूपेणदेवतातुष्टिद्वारामुंदेवलो कंचजयतिप्राप्नोतीत्यर्थः । एतेनाद्यतेमनुष्यदेवलोकप्रापकतयोपजीव्यतइत्यन्नमितिनिरुक्तंभवति । एवमुपपाद्यउपसंहियते ॥ तस्मादिति ॥ प्राक्पृथिवीगतस्यप्रसिद्धान्नभोक्तृत्वंतद्वततन्नामकस्वभोक्तृत्वंचोक्तं । एवंद्युस्थस्यापि । अधुनातदनुवादपूर्वकं

उप० । तस्यमुखमेवोक्थंयथापृथिवीतथातस्यवागर्कोन्नमशीतयोन्नेनहीदंसर्वमश्नुते नासिकेएवोक्थंयथांतरिक्षंतथातस्यप्राणोर्कोन्नमशीतयोन्ने नहीदंसर्वमश्नुते तदेतद्ब्रध्नस्यविष्टपंयदेतन्नासिकायैविनतमिवललाटमेवोक्थंयथाद्यौस्तथातस्यचक्षुरर्कोन्नमशीतयोन्नेनहीदंसर्वमश्नुते समानमशी तयोध्यात्मंचाधिदैवतंचान्नमेवा न्नेनहीमानिसर्वाणिभूतानिसमनंती२३अन्नेनेमंलोकंजयत्यन्नेनामुंतस्मात्समानमशीतयोध्यात्मंचाधिदैवतंचान्नमेव

नकेवलमेतावत् किंतुपृथिवीस्थस्यद्युलोकस्थभगवदभिन्नत्वंतदत्तृत्वंच । द्युस्थस्यापिपृथिवीस्थान्नत्वंतदत्तृत्वंचास्तीत्युच्यते ॥ तदिदमिति ॥ इयमेवपृथिवी । अस्यांपृथिव्यांविद्यमानंयद्भगवतस्त्रीरूपंतदिदंअन्नमन्नादंच अद्यमत्तृच । अद्यत्वस्योपपाद नमितोहीति । यत्किंचिदिदंसर्वंधान्यादि इतःपृथिवीतउत्तिष्ठतीतिप्रसिद्धं । तथान्नस्रष्टृत्वादतएव तत्सृष्ट्वातदेवानुप्राविशत् पृथिव्याओषधयः ओषधीभ्योन्नमित्युक्तरीत्या स्वसृष्टान्नेऽन्ननामकरूपेणप्रविष्टत्वात् अन्नस्रष्टृतयोपजीव्यत्वादुपजीव्यत्वल क्षणाद्यत्वस्यान्नशब्दप्रवृत्तिनिमित्तत्वात्पृथिव्याअन्नत्वमितिभावः । पृथिवीलोकात्प्रेत्यगच्छमानस्यद्युस्थभगवद्भोग्यत्वात् तदं तर्यामिणश्चतथात्वात्पृथिव्याअन्नत्वमित्युच्यते ॥ यद्धेति ॥ इदंपृथिव्यांविद्यमानंयत्किंचनमनुष्यादि प्रेता३इ प्रेत्येव गच्छत्येव । तत्सर्वमसौद्युलोकस्थोत्तीत्येतत्तावत्प्रसिद्धं । अत्तृत्वस्योपपादनंयदुकिंचेति । उएव अतोद्युलोकाद्यत्किंचभुवंप्रैति तत्सर्वमियंपृथि वीगतःस्त्रीरूपोहरिरेवात्तिसेयंपृथिवीगतास्त्रीमूर्तिरिति । अनेनप्रकारेणासम्यगाद्यात्रीच द्युस्थस्यभोग्यातदत्रीचेतियावत् । नचाद्यात्तृरूपयोर्भेदोस्तीत्युच्यते ॥ अत्ताहवेति ॥ अत्तैवभगवानासम्यगाद्योभवतिनानयोर्भेदइतिहवाप्रसिद्धं । यद्वासर्वात्तै वभगवान्सर्वैरुपजीव्यत्वादाद्योभवति । भगवतःसर्वभोक्तृत्वंसर्वोपजीव्यत्वंचनित्यमेकप्रकारमेव । नतुकेनापिबलवत्पुरुषेण विघटयितुंशक्यमित्युच्यते ॥ नतस्येति ॥ अयंपुरुषोयथासर्वलोकान्नाद्यात् यद्वासर्वलोकाएनंनाद्युर्नोपजीवेयुस्तथाकर्तुंकश्चन

उप० । तदिदमन्नमन्नादमियमेवपृथिवीतोहीदंसर्वमुत्तिष्ठतियदिदंकिंच यद्वकिंचेदंप्रेता३इतदसौसर्वमत्तियदुकिंचातःप्रैती३तदियंसर्व मत्ति सेयमित्याद्यात्र्यत्ताहवाआद्योभवति । नतस्येशेऽयंनाद्याद्यद्वैनंनाद्युः ॥ २ ॥

नेशेनेष्टइति ॥ २ ॥ अब्रह्मविद्यात्वप्रतीतेःखंडंप्रमाणेनैवव्याचष्टे ॥ उत्थापनादित्यादिना ॥ उत्थापनात्सर्जनात् उक्थप दार्थमाह ॥ उत्थापनात्सृष्टिकर्तृत्वादिति ॥ तदुक्थमियमेवपृथिवीत्यस्यार्थः सएवेति ॥ प्रथितःप्रथिमातोविस्तारतः पृथुत्वादितियावत् । अध्यात्ममित्यस्यार्थः अध्यात्मेचेति ॥ आत्मानमधिकृत्यभोगसाधनत्वेनवर्तमानेशरीरेचासौपुरुषा ख्योजनार्दनःवासुदेवःप्रद्युम्नोनारायणोनिविष्टः । प्रकृतौमहतःस्रष्टापरमःपुरुषोमतः । तदेववासुदेवाख्यमितिवासुदेवे प्रद्यु म्नःपुरुषेत्युक्तःपूरयेत्सजगद्यतइति प्रद्युम्ने नारायणाख्यःपुरुषइतिनारायणे पुरुषपदप्रयोगात् । कुतःपुरुषाख्यः पूर्षुदेहेषुस्थि तत्वात्पुरुषएवोक्थमितिजीवस्योक्थत्वमुक्त्वातस्योक्थत्वोपपादनायप्रजापत्यैक्यमुच्यतइतिप्रतीतिंवारयितुंपुरुषपदार्थमुक्त्वात स्यगुणसमर्पणायायमेवेत्युच्यतइतिभावेनव्याचष्टे ॥ समहानिति ॥ सजनार्दनएवेत्यन्वयः । अहमुक्थमस्मीतिविद्यादित्य स्यार्थः । अहमुक्थमिति । विद्यामत्त्यनुभवतीतिविद्यात् । तस्यमुखमेवोक्थंनासिकेएवोक्थंललाटमेवोक्थमित्यस्यार्थः पृथ गिति ॥ अंगानिचांगान्येव । यथापृथिवीतथा यथांतरिक्षंतथा यथाद्यौस्तथेत्यत्रभगवदंगानामुत्थापकत्वंनौपचारिकं किंतुपृ थिव्यादिवन्मुख्यमित्युत्थापकत्वंदृढीकृतं तत्कथमित्यतउक्तं ॥ अग्नीति ॥ नेत्रमित्यनेनमूलस्थललाटशब्देनतत्सन्निहितंनेत्र

भा० । उत्थापनादुक्थनामासएवपृथिवीस्थितः । प्रथितःपृथिवीनामासोंतरिक्षाभिधोत्रगः । अंतरीक्ष्योयतोद्युस्थोद्युनामातिप्रकाशनात् । अध्यात्मेचनिविष्टोसौपुरुषाख्योजनार्दनः । पूर्षुस्थितत्वात्समहान्प्रजानांपतिरेवच । अहमुक्थमितिह्येतांविद्यामनुभवत्यसौ । पृथक्पृथक्चत स्यांगान्युक्थानिजगदीशितुः । अग्निवातदिनेशानामुत्थानानिपृथक्पृथक् । वदनंनासिकानेत्रमित्येतानिपरात्मनः ।

मुपलक्ष्यतइतिव्याख्यातंभवति । अन्नमशीतयइत्यत्रलुप्तोपमाप्रसिद्धमन्नंतस्यहरेरशीतयइवतर्पकंभोग्यमित्यर्थमभिप्रेत्यव्याचष्टे ॥ तृचेति ॥ तिसृणांऋचांसमाहारःतृचंतृचस्याशीतिस्तृचाशीतिस्तद्रूपेणविभिन्नस्यशस्त्रस्यशंसनस्यान्नत्वहेतुतस्तर्पकत्वात्प्रसिद्धान्नंतृचाशीतिवद्विष्णोरन्नमित्युक्तंस्यादित्यर्थः । एवंलुप्तोपमात्वेनव्याख्यायसामानाधिकरण्येनापिव्याचष्टे ॥ अन्नाभिमानीति ॥ आद्यश्चोयस्मादित्यर्थे । यस्मादन्नाभिमानीदेवःसोमएवतृचाशीत्याश्चदेवताभिमान्यतश्चान्नमशीतयइतीरिताइत्यर्थः । तथाचतस्यपृथिव्यादिस्थस्यभगवतःअन्नंभोग्यान्नाभिमानीअशीतयअशीत्यभिमानीसोमएवातःसोपिभोग्यइत्यर्थउक्तोभवति । तृचानामशीतेरेकत्वविवक्षयातृचाशीत्याइत्येकवचनं । ऋचांत्र्यशीतिविवक्षयाशीतयइतिबहुवचनमनुसंधेयं । नन्वधिदैवंभगवद्रूपाणांरूपरसगंधादिप्रसिद्धान्नभोगःपंचभिरिंद्रियैरुपपद्यते । अध्यात्मंवाक्प्राणचक्षुर्गतानांभगवद्वागादीनांतुकथमित्यतआह ॥ तद्भोग्यमिति ॥ तत्प्रसिद्धमन्नंहरेर्मुखस्यादनाख्यक्रियाविषयतया नासायाघ्राणाख्यभोगविषयतया चक्षुषोदृष्टिलक्षणभोगविषयताभोग्यंश्रुतमित्यर्थः । तस्याग्निरर्कइत्यादौविवक्षितमर्कशब्दार्थमाह ॥ अरणामिति ॥ अर्कशब्दप्रकृतिऋधात्वर्थरूपमरणंयस्माद्गमनं ऋगताविति धातोः । तस्मादसाधारण्येनव्यपदेशाभवंतीतिन्यायेनशीघ्रगतित्वाच्छ्येनए

भा० । तृचाशीतिविभिन्नस्यशस्त्रस्यान्नत्वहेतुत । विष्णोस्तृचाशीतिवत्स्यात्प्रसिद्धान्नमितिस्फुटं । अन्नाभिमानिदेवश्चतृचाशीत्याश्चदेवता । सोमएवततश्चान्नमशीतयइतीरिताः । अदनाघ्राणदृष्ट्याख्यभोगत्रयविभागतः । मुखनासाचक्षुषांतद्भोग्यमन्नंहरेःश्रुतं । अरणंगमनं यस्मादर्कःशीघ्रगतित्वतः ।

वार्कः । ऋगताविति धातोःकन्प्रत्ययेगुणेचार्कशब्दोनिष्पन्नइतिभावः । अस्तुश्येनोर्कःकिमत्रवाहनतयासएवग्राह्यइत्यतआह ॥ तदाकारेति ॥ श्येनाकारा षष्ट्युत्तरशतत्रयेष्टकासंनिवेशलक्षणाचितिरत्रार्कपदोदितेत्यर्थः । ननुभगवद्वाहनेवक्तव्येचित्तेरुक्तिर्नसंगतेत्यतउक्तं ॥ सुपर्णप्रतिमेति ॥ सुपर्णाभिमन्यमानेत्यर्थः । तथाचार्कशब्दश्चित्यभिमानिसुपर्णपरइतिभावः । तस्यार्कइत्यस्यार्थमाह ॥ यस्मादिति ॥ यस्माद्धरिःश्येनाकारचित्यंतर्गतसुपर्णारूढःतस्मात्सासुपर्णाधिष्ठिताचितिस्तस्यार्कइतिप्रोच्यतइत्यर्थः । अग्निरर्कोवायुरर्कआदित्योर्कोवागर्कःप्राणोर्कश्चक्षुरर्कइतिषण्णामर्थमाह ॥ योसाविति ॥ तेऽग्न्यादयः । तस्याग्निरर्कइत्यादिविशिष्टवाक्यार्थमाह ॥ तेष्विति ॥ अग्न्यादिष्वित्यर्थः । एतेनतस्याग्निरर्कइत्यादिवाक्यषट्कस्याग्निरग्न्यधिष्ठितोर्कःश्येनाकारचितिप्रतिमकोगरुडस्तस्यवाहनभूतइत्यादिरर्थउक्तोभवति । पृथक्पृथक्चतस्यांगानीत्युक्तंविवृणोति ॥ व्याप्तत्वादिति ॥ मुखेआस्ये । मुखमेवोक्थमित्यादेः स्थूलदेहेभगवतोव्याप्तत्वात्स्थूलदेहवागिंद्रियगोलकेआस्येस्थितंभगवदास्यमुक्थमित्याद्यर्थमभिधायजीवचैतन्यस्यवागिंद्रियगोलकेविद्यमानंविष्णोर्वागिंद्रियगोलकमुक्थं घ्राणगोलकेनासिकायांवि

भा० । श्येनएवतदाकाराचितिरर्कपदोदिता । सुपर्णप्रतिमासायत्तदारूढोजनार्दनः । यस्मात्तस्यार्कइतिसाप्रोच्यतेवैदिकैःपदैः । योसौचितिगतोवींद्रःसोग्निवातरविष्वपि । तथावाक्प्राणचक्षुष्षुतस्मात्तेर्काःप्रकीर्तिताः । तेषुस्थितेसुपर्णेचरूपभेदैःपृथक्पृथक् । स्थितोविष्णुस्तदर्कास्ते तस्मादेवप्रकीर्तिताः । व्याप्तत्वाज्जीवदेहेषुमुखेविष्णोर्मुखंस्मृतं । नासयोर्नासिकेविष्णोरक्ष्णोरेवतदक्षिणी ।

द्यमानंभगवतोनासिकाख्यंगोलकमुक्थं । चक्षुर्गोलकेअक्षणिविद्यमानंचक्षुर्गोलकमुक्थमित्यर्थांतरमाह ॥ जीववागिति ॥ अत्रवागादिशब्देनगोलकमुच्यते । नचजीवचैतन्यस्यभगवतश्चेंद्रियातिरिक्तगोलकाभावइतिवाच्यं । लोकसिद्धस्यगोलकेंद्रियभेदस्यविशेषशक्त्यंगीकारेबाधकाभावात् । अतएवविष्णोश्चक्षुर्निमीलने । निमीलिताक्षेषुसुरेषुविष्णुना । आसमंतान्निमीलिताक्षमभवदित्यादावक्ष्युन्मीलननिमीलनादिगोलकक्रियाविशेषप्रतिपादनंसंगच्छतइतिबोध्यं । ततोजीवेव्याप्तत्वादेववागादीनिचभगवतोरूपाणीत्याह ॥ विष्णोरिति ॥ पृथिव्यादिस्थस्याग्न्याद्यधिष्ठानांतरस्थसुपर्णाधिष्ठितत्ववद्देहजीववागादिगोलकगतस्यभगवद्वागादेर्देहजीववागादींद्रियाधिष्ठितसुपर्णवाहनत्वंविवक्षित्वा मुखमेवोक्थंवागर्कः । नासिकेएवोक्थंप्राणोर्कः । ललाटमक्षिण्युक्थंचक्षुरर्कइतिगोलकाभिप्रायेणोक्थानिनिरूप्येंद्रियाभिप्रायेणवाहननिरूपणंकृतमितिभावेनाह ॥ जीववागादिसंस्थंचसुपर्णमधिसंस्थिताइति ॥ जीववागादिगोलकगताभार्गवादयोजीववागादींद्रियगतसुपर्णारूढाः चशब्दाद्देहवागादिगोलकगताभार्गवादयोपितत्तदिंद्रियगतसुपर्णारूढाइतिगम्यते । ननुयदिभार्गवादीनामेववागादित्वंतर्हिकथंतस्यमुखमेवोक्थमित्यादिनापुरुषस्यभार्गवादेश्चांगांगीभावः । तद्रूपाणामभेदादिंद्रार्जुनादाविवविशेषाभावाच्चेत्यतआह॥अविशेषोपीति॥ भगवान्यद्यप्येकएव इंद्रार्जुनादिवद्विशेषरहितश्च तथापिपूर्णाचिंत्यैश्वर्यरूपत्वादंगांगित्वेनां गांगिभावेन स्वानंदानुभवेस्थि ॥ ८ ॥

भा० । जीववाक्प्राणचक्षुष्पुतद्वागाद्यास्ततस्थिताः । विष्णोर्वाग्भार्गवोरामःघ्राणोस्यनरकेसरी । चक्षुस्तुकपिलोविष्णुरग्न्यादीनांचकारणं । जीववागादिसंस्थंचसुपर्णमधिसंस्थिताः । अविशेषोपिभगवान्पूर्णैश्वर्यस्वरूपतः । अंगांगित्वेनैकएवस्वानंदानुभवेस्थितः ।

तःस्वतएवस्वरूपभूतानंदानुभववान्भवति रमतइतियावत् । यदिभार्गवादीनांपुरुषांगत्वंतर्ह्यंगितयाप्रतिभासोनस्यादित्यत आह ॥ सएवेति ॥ अंगतयास्थितएवभगवान्आत्मानंव्यूह्यवाह्यवाहकरूपेणविभज्यपृथग्रूपइवस्थितइत्यर्थः । भोग्यत्ववद्वाहनत्वंचहरेरेवमुख्यमितिभावेनाप्याह ॥ सएवेति ॥ सपृथिव्यादिस्थितएवात्मानंव्यूह्यवाह्यवाहकरूपेणविभज्यपृथग्रूपइवपृथग्भूतइवस्थितइत्यर्थः । अस्यैवविवरणंसुपर्णनामेति । पृथिव्यादिस्थितोभगवान्वासुदेवएवसुपर्णनामासुपर्णेचव्यवस्थितः । अग्न्यादिषुचतन्नामास्थितइत्यर्थः । अन्नेनहीदंसर्वमश्नुतइत्येतद्व्याचष्टेऽन्ननामेति ॥ अन्ननामासहरिरेवान्नआस्थितइतियोज्यं । यद्वाअन्नेनहीमानिसर्वाणिभूतानीत्येतद्व्याचष्टे ॥ अन्ननामासएवान्नेचेष्टयन्सर्वमास्थितइति ॥ अन्नेनेमंलोकंजयत्यन्नेनामुमित्यस्यार्थोऽन्नेस्थितइति ॥ अंतरिक्षंवेत्यादेरर्थस्तस्यांतरिक्षगस्यैवेति ॥ तदेतद्ब्रध्नस्येत्येतद्व्याचष्टे ॥ परस्येति ॥ परस्यपूर्णस्यबृहत्परंब्रह्मधीयतेनिधीयतेऽत्रेतिव्युत्पत्त्याब्रध्नःसूर्यइतिभावः । यद्वाबंधबंधनइतिधातोःब्रधीत्यादेशे नकूप्रत्ययेच ब्रध्नशब्दोनिष्पन्नः । बंधेर्ब्रधिबुधीचेत्युणादिस्मरणात् । तथाचविष्णुरत्रबध्यतेसंबध्यतइतिसूर्योब्रध्नः तस्यतात्पर्यंपरस्येत्या

भा० । सएवव्यूह्यचात्मानंपृथग्रूपइवस्थितः । सुपर्णनामाभगवान्सुपर्णेचव्यवस्थितः । अग्न्यादिषुचतन्नामावासुदेवःससंस्थितः । अन्ननामासएवान्नेचेष्टयन्सर्वमास्थितः । अन्नेस्थितःसएवेशोह्यन्नदातृगतिप्रदः । तस्यांतरिक्षगस्यैवनियमादनुपक्षिणः । पतंतिधावयंत्यश्वान्नरादींश्चनरादयः । परस्यविष्णोर्धामत्वात्सूर्योब्रध्नइतीरितः । निहितश्चैवतल्लोकोनासिकायांनतस्थले ।

दि ॥ यदुकिंचातइत्यस्यार्थः पृथिव्यामिति ॥ यद्वकिंचेत्यस्यार्थः तथेति ॥ सेयमित्याद्यात्रीत्येतत्सेयंभगवन्मूर्तिरि
तिपूर्वोक्तप्रकारेणस्वयंभोग्यत्वादाद्यास्वभोक्तृत्वादत्रीत्यर्थतयाव्याचष्टे ॥ भोग्यत्वादिति ॥ परःपूर्णोविष्णुर्भोग्यत्वादासम्य
गाद्यइत्युक्तःस्वात्रीचेत्येवमाद्यात्तृरूपवानितियोजना । अत्ताहवाआद्योभवतीत्यस्यार्थः । आद्यात्तृरूपवानेकएवपरोविष्णुरिति
तदेववाक्यंप्रकारांतरेणव्याचष्टे ॥ अत्तेति ॥ अन्येषामत्तान्यैरुपजीव्यत्वादाद्योभवतीतियोजना । नतस्येशेऽयमित्यस्यार्थो
नोपजीव्यइति ॥ २ ॥ प्रकृतस्यपुरुषनामकस्यवासुदेवाद्यात्मकस्यहरेर्महान्प्रजापतिरित्युक्तंप्रजापतित्वंप्रजापतित्वोपपादनपू
र्वंस्वसृष्टदेवादिपुरुषाधिष्ठितत्वंचोच्यते ॥ अथातइति ॥ अथाधिकारसंपत्त्यनंतर मतःमोक्षाख्यप्रयोजनस्यसत्वात्तस्यचाका
रवाच्यात्प्रसन्नाद्भगवतःसाध्यत्वात्प्रसादस्यचभगवज्ज्ञानसाध्यत्वात्तदर्थंरेतसः भगवद्रेतसःसंबंधिनीदेवादिप्रजासृष्टिर्ज्ञातव्या
ऽतःसोच्यते ॥ यद्वा । अथानंतरंअतोवासुदेवरूपाद्भवंतीरेतःसंबंधिनीसृष्टिरुच्यतइत्यर्थः । अत्रदेवाःप्रजापतेःब्रह्मणःपुत्रा
इत्यन्यथाप्रतीतेर्व्याचष्टे ॥ सएषइति ॥ यःपूर्वखंडेऽयमेवमहान्प्रजापतिरितीरितः सएषभगवान्विष्णुरेवप्रजाकामोहवैप्र
जापतिःसमिथुनमुत्पादयत्तेरयिंचप्राणंचेत्येतौमेबहुधाःप्रजाःकरिष्यतइत्यादिश्रुतिषु प्रजापतिरितीरितइत्यर्थः । देवाइंद्राद्याइ

भा० । पृथिव्यांसंस्थितोविष्णुःस्त्रीरूपेणद्युलोकतः । पतितंसर्वमेवात्तितथादिविचसंस्थितः । इतोगतंसर्वमत्तिद्युनामाभगवान्परः । भो
ग्यत्वादाद्यइत्युक्तएवमाद्यात्तृरूपवान् । एकएवपरोविष्णुरत्तान्यैरुपजीव्यतः । आद्योभवतिचान्येषांनोपजीव्योभवेद्यथा । हरिःससर्वजीवानां
नभुज्यंतेयथामुना । सर्वेलोकास्तथाकर्तुनैवेष्टेकश्चनकचित् ॥ २ ॥ सएषभगवान्विष्णुःप्रजापतिरितीरितः ॥

तिप्रतीतिवारणायव्याचष्टे ॥ तस्मादिति ॥ जाताइत्यनेनरेतःशब्दस्यतत्परिणतशरीरभाजइत्यर्थउक्तोभवति । देवपदस्यकु
तोब्रह्मादिसर्वदेवपरत्वमित्यतस्तज्ज्ञापकतयादेवानांरेतइत्युत्तरवाक्यंव्याचष्टे ॥ तेभ्यइति ॥ वृष्टिश्चब्रह्मादिभ्यएवजायतेन
तुपर्जन्यादिभ्यःकतिपयेभ्यः । अतोदेवपदेनब्रह्मादीनामेवग्रहणंयुक्तमितिभावः । अत्रवृष्ट्यादिपदेनभूतंभूताभिमानीचेतिन्या
येनाभिमन्यमानाभिमानितद्देहादेर्ग्रहणं । तेषांरेतस्त्वंनाम यथायोग्यंतत्कार्यत्वं । अन्नस्यरेतोरेतइत्यत्रप्रसिद्धंरेतःअन्नविकार
त्वेनतत्कार्यमितिभावेनव्याचष्टे ॥ अन्नाच्चेति ॥ जायतइत्युपस्कार्यं । प्रजानांरेतोहृदयमितिहृदयशब्देनप्रसिद्धहृदयप्रतीतेः
व्याचष्टे ॥ संकल्पइति ॥ इत्थंकरिष्यइतिमनोवृत्तिविशेषंप्रतिप्रजानांकर्तृत्वाद्धृदयाभिधःसंकल्पःप्रजाभ्योजायतइत्यर्थः ।
ननुमनसइंद्रियस्यकथंसंकल्पलक्षणवृत्तिकार्यत्वमित्यतोहृदयस्यरेतोमनइत्येतद्व्याचष्टे ॥ तस्माद्विकल्पाख्यंमनइति ॥ इत्थं
करिष्यइतिसंकल्परूपमनोवृत्तिजननानंतरंहीदंनैवंकरिष्यइतिवृत्तेरुदयादितिभावः । मनसोरेतोवागित्यत्रवागिंद्रियप्रतीतेर्व्या

भा० । तस्माज्जाताःसर्वदेवाब्रह्माद्यास्तेभ्यएवच । वृष्टिःसंजायतेतस्माःसर्वाओषधयोभवन् । ओषधीभ्योन्नमन्नाच्चरेतोरेतसएवच ।
सर्वाःप्रजाःप्रजायंतेसंकल्पोहृदयाभिधः । प्रजाभ्योजायते

उप० । अथातोरेतसःसृष्टिःप्रजापतेरेतोदेवादेवानांरेतोवर्षंवर्षस्यरेतओषधयओषधीनांरेतोन्नमन्नस्यरेतोरेतोरेतसोरेतःप्रजाःप्रजानांरेतोहृ
दयंहृदयस्यरेतोमनो

भा० । तस्माद्विकल्पाख्यंमनस्तथा ।

चष्टे ॥ विकल्पादिति ॥ संकल्पादपिवाग्वृत्तिरूपाजायते । तथापिविकल्पाद्वाक्प्रचारोजायते । तदेवोपपादयति॥वाचेति॥ विकल्परूपमनसानामादिवेदनाद्वाचा वाक्प्रचारोजायतइत्यर्थः । यथावाचानिशादिशेत्युदाहरणाद्वाचेतिप्रथमा । यद्वावाचः कर्मेत्येतत्सोपपत्तिकंव्याचष्टे ॥ वाचेति ॥ वाचाउपदेष्टुर्वाक्प्रचारेणोपदेश्यदेवतानामादिवेदनादेवतानामकर्मक्रमादिवेदना त्तस्याःकर्मसंजायतइत्यर्थः । तदिदंकर्मकृतमित्यत्रतदिदंप्राजापत्यादिकंकर्मकृतमित्यन्यथाप्रतीतेर्व्याचष्टे ॥ कर्मणश्चजगत्पु नरिति ॥ सर्वंजगत्पुनःपुनःकर्मणैवजायतइत्यर्थः ॥ नन्वचेतनस्यकर्मणःकथंसर्वजगत्कारणत्वं तदभिमानिजीवस्यकर्मपदेन विवक्षायांचतस्यैवादृष्टद्वाराकारणत्वमापन्नंनेश्वरस्येत्यतउक्तमयंपुरुषइति ॥ अत्रायमितिपरामर्शविषयंदर्शयन्व्याचष्टे ॥ क र्माभिमानीति ॥ जीवकर्मणःप्रकृतत्वेनममेदंकर्माहंकर्तेतितदभिमंताजीवोपिप्रकृतइतिपरामृश्यतइत्यर्थः । ब्रह्मावासत्वंसर्व साधारणमित्यतउक्तंभाष्ये ॥ विशेषादिति ॥ तथाचजीवस्यकर्माभिमानित्वात्तद्गतस्यपरब्रह्मणस्तन्नियामकत्वात्जीवेस्थित्वा तेनकर्मकारयित्वातंनिमित्तीकृत्यभगवानेवसृजतीत्यर्थइतिभावः । ननुप्रयोजनाभावान्नभगवतःसृष्टिकारणत्वमित्यतआनंदोद्रे कादेवसृष्टौप्रवृत्तिरित्युच्यते । सइरामयइति । तद्व्याचष्टे ॥ सइति ॥ अयंपुरुषोयस्यब्रह्मणोलोकःसब्रह्मपदोक्तोहरिरिच्छानं

भा० । विकल्पाद्वाक्प्रचारश्चवाचानामादिवेदनात् । कर्मसंजायतेतस्मात्कर्मणश्चजगत्पुनः ॥ कर्माभिमान्ययंजीवःपरस्यब्रह्मणोहरेः । आवासस्थानमुद्दिष्टोविशेषात्सइरामयः ।

उप० । मनसोरेतोवाग्वाचोरेतःकर्मतदिदंकर्मकृतमयंपुरुषोब्रह्मणोलोकःसइरामयोयद्धीरामयास्तस्माद्धिरण्मयो

॥ १० ॥

दप्रभूतत्वादिच्छानुसार्यानंदपूर्णत्वादिरामयइत्यर्थः । सइरामयइतिपुल्लिंगेनपरामर्शार्थमेवपरस्यब्रह्मणोहरेरित्युक्तं । शब्दतो जीवस्यप्राधान्येनप्रकृतत्वेपिअर्थतःप्राधान्यात्तत्परामर्शइतिसूचयितुंपरस्येत्युक्तं । कथमस्यशब्दलब्धत्वमित्यतोमयटःप्राचुर्या र्थत्वप्रसिद्धेरित्येतद्व्याचष्टे ॥ इच्छेति ॥ इशब्दइच्छावाचीतदनुरूपारतिःसुखमेवेरेतिप्रकीर्तितमित्यर्थः । अस्यस्वेच्छयापूर्णा नंदत्वेज्ञापकमुच्यते ॥ यद्धीति ॥ यद्यस्मादिरामयाः स्वातंत्र्येणपूर्णसुखस्तस्मादेवहिरण्मयोऽन्यथातन्नस्यादित्यर्थः । तद्व्या चष्टे ॥ इच्छानंदप्रभूतत्वादिति ॥ सभगवानिच्छानुसार्यानंदपूर्णत्वादेवइरामयइत्यन्वयः ॥ हिरण्मयपदार्थमाह ॥ हिरु गिति ॥ यतःबाह्याल्लौकिकानंदाद्धिरुक्पृथक्विलक्षणं सुखंहिरण्यंस्यात्यस्माच्चाधिकार्थेप्राचुर्यार्थेउपलक्षणमेतत्तादात्म्यार्थेच मयट् । तत्तस्माद्बाह्यानंदात्पृथगधिकानंदरूपतोहिरण्यमयइतिशेषः । सएवहिरण्यमयएवहिरण्मयःइतियोजना । णशब्दवत् ण्यशब्दस्यापिनिर्वृतिवाचकत्वादितिभावः । भगवतःस्वेच्छानुसारेणपूर्णसुखत्वाभावेतत्सुखस्यपरायत्तत्वेनबाह्यानंदवैलक्षण्यं नस्यादितिभावः । एवमानंदोद्रेकादेवजगत्स्रष्टृत्वमुक्त्वातज्ज्ञानिनःफलमुच्यते ॥हिरण्मयोहवेति॥ यद्वाकैमुत्येनहरेर्विलक्ष णानंदत्वमुच्यते ॥ हिरण्मयोहवेति ॥ यद्वापूर्णानंदत्वेनस्वप्रयोजनाभावेपि श्रवणस्मरणार्हाणिकरिष्यन्निितिकेचन । सोयं

भा० । इच्छानुरूपंतुसुखमिरेत्येवप्रकीर्तितं । इच्छानंदप्रभूतत्वात्सएवचहिरण्मयः । हिरुक्सुखंहिरण्यंस्याद्बाह्यानंदात्पृथग्यतः । अ धिकार्थेमयड्यस्मादधिकानंदरूपतः ।

उप० । हिरण्मयोहवाअमुष्मिँल्लोकेसंभवति

विहारइहमेतनुभृत्स्वभावसंभूतयेभवतीत्युक्तदिशातज्ज्ञानिनांपरमानंदावाप्तिहेतुत्वात्सृष्टिर्नव्यर्थेतिभावेनोच्यते ॥ हिरण्मय इति ॥ यएवंवेदसहिरण्मयःसंभवतिहवाइत्यन्वयमभिप्रेत्यव्याचष्टे ॥ उत्सृज्येति ॥ एवमुक्तरीत्यापूर्णानंदत्वात्स्वप्रयोजनाभावेप्यानंदोद्रेकादेवसर्वलोककारणंजानन्कर्मजंरूपमुत्सृज्यनिजानंदरूपकोभवतीत्यर्थः । तत्रमुक्तप्रत्यक्षंप्रमाणमुच्यते ॥ हिरण्मयःसर्वेभ्यइति ॥ यएवंवेदसोमुष्मिन्लोकेहिरण्मयःसर्वैर्भूतैर्दृदृशेदृश्यतइत्यर्थमभिप्रेत्यव्याचष्टे ॥ तल्लोकइति ॥ मुक्तस्यसंसारिभिरवलोक्यत्वात्कथमेतदित्यतउक्तं ॥ मुक्तैरिति ॥ यद्वाउक्तविधयाजगत्कारणत्वहेतुःफलंवक्तुंजीवस्यस्वरूपमुच्यते ॥ सइरामयइति ॥ योयंपुरुषोब्रह्मणोलोकोविशेषेणभगवत्प्रतिमाभूतस्तत्प्रतिबिंबःसइरामयइत्यर्थस्तद्व्याचष्टे ॥ सइरामयइत्यादिना ॥ इच्छानुरूपं भगवदिच्छानुरूपं तदनुसारिस्वेच्छानुरूपंवा । कामेनमेकामआगात् संकल्पादेवचतच्छ्रुतेरित्यादेः । भवत्वेवमिच्छानुसार्यानंदरूपत्वं ततश्चकिमित्यतउक्तं ॥ यद्धीति ॥ तद्व्याचष्टे ॥ इच्छानंदस्वरूपत्वादित्यादिना ॥ एवंजीवस्ययोग्यतामुपपाद्याथातोरेतसःसृष्टिरित्यारभ्योक्तसृष्टिकर्तृत्वज्ञानिनःफलमुच्यते ॥ हिरण्मयोहवेति ॥ यएवंवेदसहिरण्मयोऽमुष्मिन्लोकेसंभवतिव्यज्यतइत्यर्थस्तद्व्याचष्टे ॥ उत्सृज्येति ॥ ३ ॥ ब्रह्मपदेनप्रकृतस्यवासुदेवस्यपुरुष एवोक्थमयमेवमहान्प्रजापतिरित्यध्यात्मंपुरुषनामकत्वमुक्थत्वंप्रजापतित्वंचोक्तंप्रजापतित्वमतीतखंडेउपपादितमधुनाध्यात्मे

भा० । उत्सृज्यकर्मजंरूपंनिजानंदैकरूपकः । एवंनारायणंजानन्सर्वलोकैककारणं । तल्लोकेदृश्यतेभूतैर्मुक्तैरानंदरूपकः ॥ ३ ॥
उप० । हिरण्मयःसर्वेभ्योभूतेभ्योदृदृशेयएवंवेद ॥ ३ ॥

निवेशप्रकारउक्थत्वंचप्रपंचेनोच्यते ॥ तंप्रपदाभ्यामित्यादिना ॥ तत्रतामेमंपुरुषमितिपरामर्शविषयाप्रतीतेर्व्याचष्टे ॥ तमिममिति ॥ प्रजापतेरेतोदेवाः अयंपुरुषोब्रह्मणोलोकः यएवंवेदेतिचपरमात्प्रथमजत्वेनतस्यमुख्यावासत्वेनमुख्यज्ञातृत्वेनचप्रस्तुतमित्यर्थः । यत्प्रपदाभ्यामित्यस्य ब्रह्मभगवान्वासुदेवःयद्यस्मात्प्रपदाभ्यामिमंपुरुषंचतुराननं प्रापद्यत तस्मात्प्रपदनादेवप्रपदेप्रपदनामकेजाते । यस्मात्प्रपदनामकेजाते तस्मात्प्रपदेइत्याचक्षतेविद्वांसइत्यर्थमभिप्रेत्याह ॥ यस्मादिति ॥ तस्मादित्यनूद्यार्थकथनं तस्मात्प्रपदनादिति ॥ तथाचेयंभाष्ययोजना । तस्मात्प्रपदनात्प्रपदंनाम यस्मात्प्रपदनामकंतस्मात्प्रपदंनामकीर्तितंविद्वद्भिरिति । ननुचतुर्मुखस्यपादतलोपरिभागेहरेःप्रविष्टत्वेनतस्यप्रपदसंज्ञकत्वेपिसर्वेषांनृणांपादोपरिभागे कथंप्रपदसंज्ञेत्यतश्चोक्तं ॥ तस्मात्प्रपदेइत्याचक्षतइति ॥ तस्माच्चतुर्मुखाख्यप्रकृतपुरुषाकारवत्वाद्देवानामन्येषांपादोपरितनभागौप्रपदेइत्याचक्षतेइत्यर्थमभिप्रेत्यव्याचष्टे ॥ चतुर्मुखेति ॥ चतुर्मुखाकारइवाकारवतामितिहेतुगर्भविशेषणं । चतुर्मुखाकारसदृशाकारवतांनृणांपादतलस्योपरिभागेप्रपदंइत्याख्यावर्ततइत्यर्थः । चतुर्मुखाकारसादृश्यात्प्रपदनामेत्येतद्व्यतिरेकमुखेनोच्यते ॥

उप० । तंप्रपदाभ्यांप्रापद्यतब्रह्मेमंपुरुषंयत्प्रपदाभ्यांप्रापद्यतब्रह्मेमंपुरुषंतस्मात्प्रपदेतस्मात्प्रपदेइत्याचक्षतेशफाःखुराइत्यन्येषांपशूनां । तदूर्ध्वमुदसर्पत्ताऊरूअभवतां

भा० । तमिमंप्रथमज्ञानिपुरुषंचतुराननं । वासुदेवाभिधंब्रह्मप्रापप्रपदयोःपुरा । यस्मात्प्रपेदेभगवान्प्रपदाच्चतुराननं । तस्मात्प्रपदनादेवप्रपदंनामकीर्तितं । चतुर्मुखाकारवतांनृणांपादतलोपरि । प्रपदाख्यावर्तते

शफाइति ॥ इतिशब्दआद्यर्थे । तस्मादित्यनुवर्तते । तस्मान्नृणांपादोपरिभागेप्रपदशब्दस्यचतुर्मुखप्रपदसादृश्यनिमित्तकत्वा देवान्यत्रतदभावेनान्येषांनृभ्योन्येषांपशूनामश्वादीनांतदन्येषांपक्षिप्रभृतीनांपादतलोपरितनभागेशफाःखुराइत्याद्याख्यावर्तते नतुप्रपदाख्येत्यर्थमभिप्रेत्यतात्पर्यतोव्याचष्टे ॥ अतोनतुपश्वादिनामिति ॥ अतःप्रवृत्तिनिमित्ताभावादेवपश्वादीनांपादत लोपरिक्वचिदपिप्रपदाख्यानास्तीत्यर्थः । ऊरुइत्यत्र ऊउरुइत्यक्षरविभागः । उर्वतिशयेनऊऊर्ध्वगमनात्तावंगविशेषौऊरूइत्यर्थ मभिप्रेत्यव्याचष्टे ॥ ऊरूर्ध्वगमनादिति ॥ उरुगृणीहीत्यब्रवीत्तदुदरमभवदित्यस्यसाकांक्षत्वादध्याहारपूर्वंव्याचष्टे ॥ किं चिदूर्ध्वमिति ॥ उरुसम्यग्गृणीहिस्तुहीत्यस्यव्याख्यानमुरुगरणंकुर्विति । गरणंनिगरणंउच्चारणंस्तुतिं । गॄनिगरणइतिहिप ठंति । यद्वागृणीहीत्यस्यगॄनिगरणइतिधातोर्निगरणमभ्यवहारंकुर्वित्यर्थइतिभावः । अत्रस्थितोभवेत्यप्याहेतियोज्यं । आज्ञा नुसारेणकृतवान्वायुरित्याह ॥ उर्वेवेति ॥ तदुदरमभवदित्यस्यार्थमाह ॥ यत्रस्थितइति ॥ यत्रस्थितोवायुरुर्वेवगरणंचक्रेत त्स्थानमुदरंनामेतियोज्यं । यद्वावायुनासहकेशवोयत्रस्थितस्तत्स्थानमितियोज्यं । अनेनोर्वर्थकोच्छब्दोपपदात्गॄनिगरणइति धातोरच्प्रत्ययेसार्वधातुकार्धधातुकयोरितिगुणेगलोपेचउत्उच्चैःसम्यग्गीर्यतेवायुनाहरिरत्रेतिवा वायुर्गिरत्यत्रेतिवोदरशब्दो

भा० । ऽतोनतुपश्वादिनांक्वचित् । अयादूर्ध्वंततोविष्णुःप्रपदादूरुमत्रच । स्थितऊरूचतावास्तामूरूर्ध्वगमनाद्धरेः । किंचिदूर्ध्वंततो गत्वावायुनासहकेशवः । वायुमाहोरुगरणंकुर्वत्रस्थितइत्यपि । उर्वेवगरणंचक्रेवायुर्यत्रस्थितःसदा । तत्स्थानमुदरंनामपुनराहजनार्दनः । उरुस्थानं निवासंमेकुरुविस्तारसंयुतं । तथाकरोत्सवायुश्चतदुरोभूदुरुत्वतः ।

निष्पन्नइत्युक्तंभवति । यद्यप्युदिदृणातेरजलौपूर्वपदांतलोपश्चेत्युणादिसूत्रे दृणातेर्ग्रहणंकृतं । तथापिबाहुलकाद्गृणातेर्गशब्दलोपः पूर्वपदांतलोपाभावश्चग्राह्यः । यद्वाधातूनामनेकार्थत्वाद्दृधातेरेवगिरणार्थत्वमभिप्रेत्यैवमुक्तमितिध्येयं । उर्वित्यनूद्यव्याख्यानं विस्तारसंयुतमिति । तदुरोभवदित्यनंतरंअध्याहार्यमाह ॥ उरोमध्यइति ॥ स्थानद्वयेविशिष्योपास्यंब्रह्मेत्यत्राचारःप्रमाणमु च्यते ॥ उदरमिति ॥ ननुभिन्नस्थानगतयोरुभयोरेकब्रह्मत्वायोगादन्यतरोपासकानामब्रह्मवित्त्वंस्यादित्यतउक्तं ॥ ब्रह्माहै वत३यिति ॥ अत्रोपासकास्तेऋषयोब्रह्मैवेत्यन्यथाप्रतीतेर्व्याचष्टे ॥ उदरस्थमिति ॥ तइतिनपुल्लिंगप्रथमाबहुवचनं किंतुन पुंसकंप्रथमाद्विवचनं । तथाचोदरस्थंहृद्गतंचेत्येते तेउभेएकंतत्परंब्रह्मैवेतिहप्रसिद्धंइत्यर्थइतिभावः । उभेएकमित्युक्त्याद्विवच नमत्रव्यवहारमात्रमितिदर्शयितुंताईइत्युक्तमितिवक्ष्यमाणंसूचयति । परंब्रह्मेत्युक्त्याब्रह्माहेतिदैर्घ्यमपिपरब्रह्मत्वविवक्षयेतिव क्ष्यमाणंसूचयति । ऊर्ध्वंत्वेवेतितुशब्दोविशेषद्योतकः । तंविशेषमाह ॥ वायुनासहदैवतैरिति ॥ यच्छिरोश्रयतेत्यस्य यद्य

भा० । उरोमध्येचहृदयंतत्रावासोहरेःसदा । सूक्ष्मदृष्टियुतायेतुमुनयःशार्कराक्ष्यकाः । उदरंतेपरंब्रह्मवासुदेवमुपासते । हृत्स्थमेवपरं विष्णुंध्यायंत्यारुणयःसदा । उदरस्थंचहृद्गंच

उप० । उरुगृणीहीत्यब्रवीत्तदुदरमभवदुर्वेवमेकुर्वित्यब्रवीत्तदुरोभवदुदरंब्रह्मेतिशार्कराक्ष्याउपासतेहृदयंब्रह्मेत्यारुणयो

भा० । तेउभेब्रह्मतत्परं । एकमेवयतस्तस्मादुभयेह्यपितद्विदः । ततऊर्ध्वंगतोविष्णुर्वायुनासहदैवतैः ।

स्माच्छिरोश्रयततत्तस्मात्तच्छिरःसंज्ञकमभवत् । ब्रह्मणःश्रयणेनमूर्ध्नःशिरःसंज्ञकत्वंकुतइत्यतउक्तं । तच्छिरसइति । यच्छिरो श्रयतेत्यनुवर्तनीयं । ब्रह्मशिरोश्रयतइतियत्श्रयणंतदेवशिरसःसंबंधिशिरोनिष्ठंशिरस्त्वंशिरःशब्दप्रवृत्तिनिमित्तमित्यर्थः । ता एताइत्यस्य ताःप्रसिद्धाःशीर्ष्णिस्थिताःश्रयंतइतिश्रियःश्रीशब्दवाच्याःचक्षुःश्रोत्रंमनोवाक्प्राणइत्येता उपलक्षणमेतदन्येदेवा श्चशीर्षन् शीर्ष्णि । तत्परंब्रह्माश्रिताःउपासितवंतइत्यर्थमभिप्रेत्यव्याचष्टे ॥ तत्रप्राणात्मनेति ॥ तत्रशीर्ष्णि वायुःप्राणात्म नाप्राणाभिमानित्वेनतन्नामकत्वेनवर्ततइतिश्रुतौकीर्तितः । मनोरूपेणतदभिमानित्वेनशंकरःकीर्तितः । शेषादयश्चमनांस्येवकी र्तिताः । पृथक्पृथक्इत्यस्यविवरणं ॥ अहंभावेत्यादि ॥ चंद्रःश्रोत्रंकीर्तितोऽग्निर्वाक्कीर्तितः सर्वप्राणिषुतत्रशिरसितेदेवा स्तदन्येचोपासतइतियोजना । एवंब्रह्मणोवासुदेवस्यपुरुषत्वमुपपाद्योक्थत्वंकैमुत्येनोच्यते ताअहिंसंतेत्यादिना ॥ ताअब्रुवन्

भा० । स्थितोमूर्धनिदेवेशःश्रितोसाविततच्छिरः । तत्रप्राणात्मनावायुर्मनोरूपेणशंकरः । शेषःसुपर्णइंद्रश्चमनांस्येवपृथक्पृथक् । अहं भावमनोरुद्रःशेषोसौपांचरात्रकं । वैदिकंगरुडश्चेंद्रोयज्ञादिविषयंमनः । श्रोत्रंचंद्रोरविश्चक्षुर्वागग्निःपरिकीर्तितः । एतेदेवास्तदन्येचसर्वप्राणिषुसं स्थिताः । उपासतेमहाविष्णुंपरमात्मानमच्युतं । वाचाहिंसामकुर्वंस्तेविनिंदंतपरस्परं ।

उप० । ब्रह्माहैवत३ईऊर्ध्वंत्वेवोदसर्पत्तच्छिरोश्रयततयच्छिरोश्रयततच्छिरोभवत्तच्छिरसःशिरस्त्वंताएताःशीर्षच्छ्रियःश्रिताश्चक्षुःश्रोत्रंम नोवाक्प्राणःश्रयंतेस्मिंच्छ्रियोयएवमेतच्छिरसःशिरस्त्वंवेदताअहिंसंताह ॥ १३ ॥

हंतास्मादित्यस्यास्मात्प्रकृताद्भगवतस्तदाज्ञयेत्यर्थमाह ॥ तेविष्णोराज्ञयावोचन्निति ॥ अस्माच्छरीरादित्यस्याप्यन्वयमाह ॥ देहादब्जभवस्यास्मादिति ॥ सर्वत्राश्नन्पिबन्आस्तेवेत्यशनापिपासाभिमानिमुख्यप्राणव्यापारसद्भावेनाशनापिपासयो रेवानुवृत्तिंसूचयति । मीलितइवेत्यस्य सर्वेंद्रियनिमीलनवानिवसर्वव्यापारोपरमवानिवेत्यर्थः । अशारीतींतच्छरीरमभवदित्य त्र अशारिइतींतदितिपदच्छेदः । ईइतिप्लुतंबिंदुश्चावधारणार्थइतिज्ञेयं । अशारीतियदशीर्यतविनाशोन्मुखमभवदितियत्तदेव शरीरस्यसंबंधिशरीरत्वंशरीरशब्दप्रवृत्तिनिमित्तंतस्मात्तच्छरीरं शरीरशब्दवाच्यमभवदितियोज्यं । यएवंवेदास्यद्विषन्द्वेषी भ्रातृव्योभ्रातृवत्सहस्थितः पाप्मापापपुरुषः शीर्यतेनश्यतितमसिपतति । नकेवलमामुष्मिकहानिः किंतुअस्यद्विषन्पाप्मभ्रा तृव्यःपराभवतिचेतियोज्यं । यद्वापरास्यद्विषन्नित्यस्ययएवंवेदपूर्वोक्तंजानतःशत्रुःपापपुरुषोनश्यतीत्युक्तंफलंवेद तस्यापिद्विष न्पाप्मापराभवति किमुसाक्षाज्ज्ञानिनइतियोजना । केशवब्रह्माणौप्राणकलहंकुर्तोननिवारयामासतुरित्यतआह ॥ उदासीनव दिति ॥ प्राणादिदेवेषूदासीनवत्नतूदासीनौ। लोकस्यतेषांबलस्यपरीक्षयाज्ञापनार्थंतूष्णींभूतत्वादित्यर्थः। यद्वातयोःशरीरेसत्वा त्कथंपतनमभूदित्यतउक्तं । उदासीनवदिति ॥ लौकिकोदासीनवच्छरीरप्रेरणेनिर्व्यापारावास्तामित्यर्थः । प्राणोत्क्रमणेशरीर

भा० । तेविष्णोराज्ञयावोचन्नुत्क्रामामपृथक्पृथक् । देहादब्जभवस्यास्माद्यस्मिन्नुत्क्रांतएवहि । शरीरंपद्यतेश्रेयान्सनइत्यवधार्यतां । ततः क्रमेणचाग्र्याद्यानिष्क्रांतास्तेषुसर्वेशः । निष्क्रांतेषुनवैपातःशरीरस्याभवत्कचित् । वायावुत्क्रांतएवैतच्छरीरमपतत्क्षितौ । उदासीनवदास्तांतौके शवश्चाब्जसंभवः । तेषांबलपरीक्षार्थंवाय्वादीनांचसर्वशः ।

पातेनस्वपराभवस्ययादृच्छिकत्वशंकयापुनस्ताअहिंसंतेत्युच्यते ॥ ताअहिंसंतेति ॥ पुनःशब्दोवाक्प्राविशदित्यादावपिसंबध्यतइत्यभिप्रेत्यव्याचष्टे ॥ पुनस्तइति ॥ निर्गमापेक्षयापुनःशब्दः । अशयदेवेत्येवकारार्थोनोत्थानमिति ॥ ननुप्राणप्रवेशानंतरमुत्थानमपिनप्राणप्रवेशप्रयुक्तं । किंतुदेवतांतरप्रवेशप्रयुक्तमेवकिंनस्यादित्यतस्तत्प्राणेप्रपन्नइतिवाक्याभिप्रायमाह ॥ वायाविति ॥ वायौप्रविष्टेकायस्योत्थानंतदैवासीन्नतुदेवतांतरप्रवेशे अतोयद्विलंबात्कार्याभावः तदेवकारणंनान्यदितिभावः । तदैवचेतिचशब्दस्य नकेवलंवायूत्क्रमणेपतनं प्रविष्टेउत्थानंचेत्यर्थः । तदुक्थमभवत् ॥ तत्तस्मा दन्यासाध्योउत्थापनकर्तृत्वा त्प्राणउक्थमुच्चैःस्थितमभवत् । तत्तस्मादुच्चैःस्थितत्वात्प्राणएवैतदुक्थमुक्थनामकमभवत् । अतःप्राणउक्थइतिविद्यात् उपासीत । तंदेवास्त्वमुक्थमुच्चोसि । किमिदमुच्चत्वमित्यतोगुणाधिक्यमेवोच्चत्वमितिभावेनोक्तं त्वमिदमिति ॥ इदंप्रमितंस

भा० । पुनस्तेप्राविशंत्सर्वेवह्निसूर्यौशशीशिवः । नोत्थानमभवत्तेषुप्रविष्टेष्वपिसर्वशः ।

उप० । मुक्थमस्म्यहमुक्थमस्मीतिताअब्रुवन्हंतास्माच्छरीरादुत्क्रामाम । तद्यस्मिन्नउत्क्रांतइदंशरीरंपत्स्यतितदुक्थंभविष्यतीतिवागुदक्रामदवदन्नश्नन्पिबन्नास्तैव । चक्षुरुदक्रामदपश्यन्नश्नन्पिबन्नास्तैव श्रोत्रमुदक्रामदशृण्वन्नश्नन्पिबन्नास्तैव मनउदक्रामन्मीलितइवाश्नन्पिबन्नास्तैव प्राणउदक्रामत्तत्प्राणउत्क्रांतेऽपद्यत ॥ १४ ॥

भा० । वायौप्रविष्टेतूत्थानंकायस्यासीत्तदैवच ।

र्वपूर्णमसीत्यर्थः । अस्यसर्वस्यत्वंप्रभुरसीतिवा । तववयंदासाःस्मः । त्वमस्माकंपतिरसीतिअब्रुवन्नित्यर्थः । तदेतत्प्रमेयंऋषिणाप्युक्तं । त्वयेदिंद्रयुजावयंप्रतिब्रवीमहिस्पृधः ॥ त्वमस्माकंतवस्मसीति ॥ हेइंद्र परमैश्वर्योपेतवायो । युजा द्वासुपर्णासयुजेतिश्रुतेर्नियामकतयाऽस्मत्संगतेनत्वयाइत् त्वयैव त्वद्बलेनैव । स्पृधः स्पर्धावन्तोवयं । प्रतिब्रवीमहि प्रत्युत्तरंदास्यामः । त्वमस्माकंपतिरसि तववयंभृत्याःस्मेत्यर्थः । स्मेतिवक्तव्येस्मसीतिवचनमुक्तार्थाधिक्यसूचनाय । नकिर्माकिःस्मसीत्यादिप्रोक्ताधिक्यविवक्षयेतिवचनात् । इदंतोमसीतिवचनाच्छांदसंरूपं । तदुक्थमभवत्तदेतदुक्थंप्राणएवेत्यनयोःपौनरुक्त्यंपरिहरन्व्याचष्टे ॥ उच्चैरिति ॥ ततः उत्थापकत्वादुच्चैःस्थितः । उच्चैःस्थितत्वादुक्थनामकोभूदितियोज्यं । त्वमिदंसर्वमसीत्यस्यार्थः । ततोजगतःप्रभुरिति । प्रकारांतरेणव्याचष्टे ॥ उच्चत्वंचेति ॥ तववयंस्मइत्यादेरर्थोभृत्याइति ॥ त्वयेदिंद्रयुजावयमि

भा० । उच्चैःस्थितत्वादुक्थोभूद्वायुरेवततःप्रभुः ।

उप० । तदशीर्यताशारीर्तीँ३तच्छरीरमभवत्तच्छरीरस्यशरीरत्वं । शीर्यतेहवाअस्यद्विषन्पाप्माभ्रातृव्यःपरास्यद्विषन्पाप्माभ्रातृव्योभवतियएवंवेदताअहिंसंतैवाहमुक्थमस्म्यहमुक्थमस्मीतिताअब्रुवन्हंतेदंपुनःशरीरंप्रविशामतद्यस्मिन्नःप्रपन्नइदंशरीरमुत्थास्यतितदुक्थंभविष्यतीति । वाक्प्राविशदशयदेव चक्षुःप्राविशदशयदेव श्रोत्रंप्राविशदशयदेव मनःप्राविशदशयदेव प्राणःप्राविशत्तत्प्राणेप्रपन्नउदतिष्ठत्तदुक्थमभवत्तदेतदुक्थंप्राणएव

भा० । उच्चत्वंचगुणाधिक्यंत्वमुच्चोसीतितेब्रवन् । भृत्यावयंतवैवस्मस्त्वमस्माकंपतिःसदा ।

तिमंत्रेपूर्वशेषार्थमाह ॥ स्पर्धामहइति ॥ ४ ॥ आद्यखंडेवासुदेवाद्यात्मकस्यनारायणस्यगुणपूर्णत्वेनसर्वोत्तमत्वे प्रमाणजिज्ञासायां द्वितीयेउक्थशब्दंप्रमाणयित्वा किमिदमुक्थत्वमित्यतोऽधिदैवमध्यात्मंचपृथिव्यादिलोकद्वारावागादींद्रियद्वाराचसर्जकत्वमुक्थत्वमितितदुपपादनंकृतं तृतीयेचसाक्षादेवादिप्रजास्रष्टृत्वेनोक्थत्वंनिरुक्तं चतुर्थेचवासुदेवस्याध्यात्मंशरीरेंद्रियोत्थापकत्वाच्चोक्थत्वंबलज्यैष्ठ्योपपादनपूर्वकैमुत्येनोक्तं इहपंचमेखंडेवायोःसर्वदेवतागुरुत्वेनज्ञानोत्थापकत्वादुक्थत्वमुत्तमत्वंतदुपदेश्यत्वादिनाहरेरितिभावेनप्रकृतस्यनारायणस्यप्राणपरिवृतस्याधिदैवमध्यात्मंचमाहात्म्यमुच्यते ॥ तंदेवाइति ॥ देवास्तस्माद्वायोःपरंब्रह्मश्रुत्वातंवायुनोदितंनारायणाभिधंपरंब्रह्म तमुपदेशकंवायुंच शिष्यप्रशिष्यादिषुप्रकर्षेणानयंतनीतवंतउपदिदिशुः सनारायणोवायुश्च । उपदेशेनकर्णरंध्रद्वारेणांतःप्रणीतःप्रविष्टः प्रातायतैकेनरूपेणशरीरेप्रततोभवत् । प्रातायीतांप्रातायिइतिईइतिपदच्छेदः । ईयस्मात्इतिप्रागुक्तप्रकारेणप्रातायि तत्तस्मात्प्रततत्वात्तदेतद्रूपंप्रातःकालनियामकंप्रातर्नामकमभवत् समागात् जीवचितारूपांतरेणअंगारवह्निवत्संगतोभवत् । समागादिति जीवचितासंगतोभूदितियत्तस्मात्संगतत्वात्तदेवरूपंसायंकालनियामकंसायंनामकमभवत् अहरेवअहर्नियामकमेववायुर्नारायणश्चपुनरध्यात्मंप्राणनामकरात्रिनियामकश्चअध्यात्मम

भा० । स्पर्धामहेत्वद्वलेनत्वयानान्येनकेनचित् । इत्यूचुर्वींद्रशेषेशशक्रचंद्रादिकाःपृथक् । वायुःससंस्तुतस्तैश्चप्रसन्नोभूद्दिवौकसां ॥ ४ ॥

उप० । प्राणउक्थमित्येवविद्यात्तंदेवाअब्रुवंस्त्वमुक्थमसित्वमिदंसर्वमसितववयंस्मस्त्वमस्माकमसीति तदप्येतदृषिणोक्तंत्वमस्माकंतवस्मसीति ॥ ४ ॥ तंदेवाःप्राणयंतसप्रणीतःप्रातायतप्रातायीतीँ३तत्प्रातरभवत्समागादितीँ३तत्सायमभवदहरेवप्राणोरात्रिरपानो.

पाननामा । तमिमंनारायणंवायुंच । अधिदैवंउपासका अश्यादयोदेवाअध्यात्ममपिवागादिरूपेणोपासतइतिभावेनोच्यते ॥ वागग्निरित्यादिना ॥ तदेतद्व्याचष्टे ॥ तस्माच्छ्रुत्वेत्यादिना ॥ यशसादिक्षुयानाद्यज्ञोव्याप्तमित्युक्तप्रकारेणदिक्षुप्रततत्वात्तन्महिमोक्त्यातद्गुणोक्तिः । साक्षाद्गुरुणागुणोक्तिश्चयेयेगुणान्विजानंतीत्यन्वयः ॥ यज्ञादिसाधनइति ॥ अग्निरध्यात्मंवागाख्यसूर्योध्यात्मंचक्षुश्चंद्रोध्यात्मंयज्ञादिसाधनविषययेयन्मनस्तत्प्रकीर्तितः । इंद्रस्तुसाक्षाद्यज्ञादिविषयंमनइतिभेदइतिभावः । चंद्रोमित्रोयमश्चवरुणःकुबेरश्चदिगीश्वराः सर्वेध्यात्मंश्रोत्राभिमानिनइत्यन्वयः । काम्यशास्त्रमर्थोविषयोयस्यतत्काम्यशास्त्रार्थं । एवमुत्तरत्र । सएषप्रहितांसंयोगोध्यात्ममित्येतद्व्याचष्टे ॥ विष्णुनेति ॥ एतेनप्रहितामित्यस्यप्रहितानामित्यर्थं

उप० । वागग्निश्चक्षुरसावादित्यश्चंद्रमामनोदिशःश्रोत्रंसएषप्रहितांसंयोगोध्यात्ममिमादेवता

भा० । तस्माच्छ्रुत्वापरंब्रह्मदेवानारायणाभिधं । शिष्यप्रशिष्यादिषुचतेऽनयन्वायुनोदितं । वायुमप्यनयन्सर्वेयशसातद्गुणोक्तिः । ये येगुणान्विजानंतिवायोस्तानाविशन्मरुत् । तत्रतत्रप्रविष्टत्वात्प्रततोसौबभूवह । प्रततत्वात्प्रातरितितस्यनामाभवद्विभोः । संगतश्चाभवज्जीवचितारूपांतरेणसः । संगतत्वात्सायमितितद्रूपंनामतोभवत् । वायोस्तत्पुनरध्यात्मंप्राणापानाभिधंद्वयं । अध्यात्ममग्निर्वागाख्यश्चक्षुःसूर्यःप्रकीर्तितः । यज्ञादिसाधनेयत्तुमनश्चंद्रःप्रकीर्तितः । मित्रोयमश्चवरुणःकुबेरश्चदिगीश्वराः । श्रोत्राभिमानिनःसर्वेवैदिकश्रवणोचितं । श्रोत्रंचंद्रस्तथा स्मार्ततांत्रिकश्रवणोचितं । यमएवषडंगानांविषयश्रवणोचितं । श्रोत्रंतुवरुणःकाम्यशास्त्रार्थंमित्रएवच । श्रोत्रंयन्नीतिशास्त्रार्थंकुबेरश्चप्रकीर्तितः । विष्णुनाप्रहितानांहिसंयोगोध्यात्ममेषहि ।

उक्तः । हीत्यनेनसप्रसिद्धइतिव्याख्यातं । यदुक्तंपूर्वंदेवोपास्यत्वेनसर्वदेवाधिपतित्वं तत्सर्ववेदतात्पर्यगोचरत्वात्सिद्धमित्युच्यते ॥ इमादेवताइति ॥ अदउअदएवनारायणाख्यंब्रह्मैवाधिदैवतंदैवतोत्तमं । कुतः । आविः आसमंताद्विज्ञानरूपंपूर्णज्ञानस्वरूपमितियावत् । वीगतिव्याप्तिप्रजनकांत्यसनखादनेष्वितिधातोः । एवकारव्यावर्त्यमुक्तममीवागाद्यादेवताइति वागादीनिदेवतामात्राणीत्यर्थः । दीव्यतेरर्थस्यज्ञानस्यपूर्णत्वादित्येतत्प्रमेयंतैर्वेदैस्तात्पर्यादुक्तंभवतीत्यर्थमभिप्रेत्यव्याचष्टे ॥ शिवादीनामित्यादिनावेदैश्चेत्यंतेन ॥ इमादेवताइत्यत्रोक्तानामग्न्यादीनामेवनग्रहणं किंतुमनोभिमानित्वेनपूर्वखंडोक्तानांशिवादीनामपीतिभावेन मनोभिमानिनःसंगृह्णाति ॥ शिवादीनामिति ॥ तथापिब्रह्मवाय्वोर्देवतामात्रत्वंनलभ्यते वागग्निरित्यादौतदकथनादित्यतस्ताएताः शीर्षञ्श्रियःश्रिताइत्यत्रचक्षुरादिभिःसहप्राणस्यप्रकृतत्वाद्ब्रह्मेमंपुरुषमितिपुरुषपदेनब्रह्मणोपिप्रकृतत्वादिमाइतितयोरपिपरामर्शइतिभावेनाह ॥ एताःसर्वाइति ॥ अदउआविरित्येतद्व्याचष्टे ॥ सर्वेशइति ॥ सर्वेशः सर्वेभ्योदेवेभ्यः । आधिक्यादधिदैवमितियोजना । सर्वेषांवेदानांउक्तार्थेतात्पर्यमित्येतल्लिंगेनफलेनसमर्थ्यते ॥ एतद्धस्मेति ॥

भा० । शिवादीनांचसर्वेषांमनस्त्वंकथितंपुरा । एताःसर्वादेवताहिब्रह्मवायुसुपर्णकाः । शेषशंकरशक्राश्चचंद्रसूर्ययमाअपि । अग्निश्चमित्रावरुणौकुबेराद्याश्चसर्वशः । अधिदैवंसएवैकआधिक्यात्पुरुषोत्तमः । देवमात्रास्तदन्येतुसआविःपुरुषोत्तमः । पूर्णज्ञानस्वरूपत्वादेतावत्कथितंभवेत् ।

॥ १६ ॥

तदेतत्प्रमेयं विद्वान्हिरण्यदन्वैदनामाऋषिराहेत्यर्थः । तद्व्याचष्टे ॥ तज्जानन्निति ॥ किंमुनिनोक्तमित्येतदुच्यते ॥ नतस्येशेऽयमित्यादिनाएतद्धतदित्यंतेन ॥ विष्ण्वादयोदेवामह्यंमुक्तौफलंनदद्युरितियत्तस्यतथाकरणस्यायंदेवातिरिक्तःप्राकृतोजनः नेशेनेष्टे । कुतः । प्रहितांविष्णुनांतर्नियमनायाऽऽज्ञप्ताना मंतःप्रेरितानांवादेवानामहमध्यात्मं विभक्त्यर्थेव्ययीभावः । आत्मनिशरीरे निविष्टंसंयोगं नियम्यनियामकभावलक्षणं । भगवान्पूज्यःतेपूजकाइतिपूज्यपूजकभावलक्षणंवासंबंधंवेद । तस्मात्कश्चननेशे इत्येतद्धितेनमुनिनोक्तमित्यभिप्रेत्यव्याचष्टे ॥ भूतेष्वित्यादिनाएतद्धितेनकथितमित्यंतेन ॥ अदातुंअदापयितुं देवायथानदद्युस्तथाकर्तुमितियावत् । तदभीष्टफलविवरणं यथेष्टभुक्स्वेच्छाविहृतिरिति । कुतोनसमर्थाइत्यतःदेवताज्ञानित्वेनतत्प्रीतियुक्तत्वादित्याह ॥ मन्निषेधइति ॥ ननुदेवाएवफलंनदद्युरितिकिंनस्यादित्यतोवोक्तं ॥ प्रीताइति ॥ नकेवलंवैदएवात्राधिकारीफलभाक्किंत्वन्योपियोवेदतस्यापिमहत्फलंभवतीत्युच्यते ॥ तदनीशानानीति ॥ यएवमन्योपियोग्यो

भा० । तात्पर्यात्सर्ववेदैश्चतज्जानन्नवदन्मुनिः । हिरण्यदन्नामवैदोभूतेषुहिसुरानृते । मदभीष्टंममादातुंनैवेष्टेकश्चनांजसा । विष्णुनाप्रहितानांहिदेवानामहमुत्तमं । वेदसंयोगमध्यात्मंततोमुक्तौ

उप० । अदउआविरधिदैवतमित्येतत्तदुक्तंभवत्येतद्धस्मवैतद्विद्वानाहहिरण्यदन्वैदोनतस्येशेऽयंमह्यंनदद्युरितिप्रहितांवाअहमध्यात्मंसंयोगं निविष्टंवेदैतद्धतदनीशानानिहवाअस्मैभूतानिबलिंहरंतियएवंवेद

भा० । यथेष्टभुक् । स्यान्नैवात्रास्तिसंदेहःस्वेच्छाविहृतिरेवच । मन्निषेधे नशक्तोस्तिप्रीतादेवाहिमेसदा ।

वेदोपास्तेच तदनीशानानि तदीशानभिन्नानि तत्स्वामिभिन्नानिभूतान्यस्मैबलिंहरंतीत्यर्थमभिप्रेत्यव्याचष्टे ॥ **विष्णुप्रहिते** ति ॥ योमानुषोप्येवंनाममात्रज्ञानवान्भवति तदवराणिभूतान्यस्मैबलिंहरंत्येनंपूजयंतीत्यप्यर्थमाह ॥ **मानुषाइति** ॥ मुक्ति योग्यामानुषामुक्ताःसंतःइतियोजना । प्रकृतस्यनारायणस्यांतरंगंनामविशेषंतदर्थतयाधिदैवमध्यात्मंचोपास्यत्वंतस्यपरिवारदे वानांमिलित्वासत्यनामकत्वंचोच्यते ॥ **तदिति** ॥ अत्रतद्वक्ष्यमाणंदेवतात्रयंसत्यमित्यन्यथाप्रतीतेर्व्याचष्टे ॥ **सएषइति** ॥ **सर्वोत्तमत्वादिति** ॥ सच्छब्दउत्तमंब्रूयादितिवचनादितिभावः ॥ **पूर्णत्वादिति** ॥ तनुविस्तारइतिधातोःव्याख्यानात्तनो तेर्विस्तारार्थत्वादेशकालगुणैर्विस्तारएवपूर्तिरितिभावः ॥ **सर्वज्ञत्वादिति** ॥ यातेर्गत्यर्थत्वादितिभावः । सदितिप्राणइत्याद्य वतारयति ॥ **देवतात्रयमिति** ॥ विष्णोःसत्यनामकत्वमयुक्तंप्राणादीनांसत्यनामकत्वप्रसिद्धेरित्यतःविष्णोरन्यदेवावतारत्रयं

भा० । अधिदैवेनसहितांविष्णुनाप्रभविष्णुना । एतद्धितेनकथितंमुनिनातत्ववेदिना । विष्णुप्रहितदेवानांयोगमध्यात्ममंजसा । वेदतं चनियोक्तारमुपास्तेविष्णुमव्ययं । एतादृशोपासनायायोग्यःसन्सततंसुधीः । स्वस्वाम्यन्यानिभूतानिहरेयुर्बलिमस्यहि । मुक्तस्यवैष्णवेलोकेमुक्ता निचनसंशयः । इत्येतद्ध्यानयोग्याश्चमुनयोदेवतास्तथा । मानुषाज्ञानमात्रेणस्वावरैःपूज्यतामयुः । मुक्तामुक्तैर्मुक्तियोग्याइतिशास्त्रस्यनिर्णयः । सएषभगवान्विष्णुःसत्यमित्यभिधीयते । सर्वोत्तमत्वात्पूर्णत्वात्सर्वज्ञत्वात्तथैवच । देवतात्रयमन्यच्चपृथक्सत्यमितीर्यते ।

उप० । तत्सत्यंसदितिप्राणस्तीत्यन्नंयमित्यसावादित्यस्तदेतत्त्रिवृत्त्रिवृदिवचैचक्षुःशुक्लंकृष्णंकनीनिकेतिसयदिहवाअपिमृषावदतिसत्यंहैवा स्योदितंभवतियएवमेतत्सत्यस्यसत्यत्वंवेद ॥ ५ ॥

चपृथगेकैकावयवप्रतिपाद्यंसंमिलित्वासत्यंनतुविष्णोरिवविशिष्टनामवाच्यत्वमेकैकस्येत्युत्तरवाक्येनोच्यतइत्यर्थः । अवतारितं व्याचष्टे ॥ **शेषेति** ॥ यद्यपिब्रह्मणःशेषादुत्तमत्वं वायोर्जीवेषुमध्येपूर्णत्वंचास्ति तथापिनामवागादितारतम्यस्यप्राणावसानत्व प्रसिद्धेर्वाग्व्यपेक्षयाब्रह्मणःपदप्रयुक्तेषदाधिक्यसद्भावात्तद्विवक्षयैवमुक्तं । अन्नाभिमानित्वेनसर्वैरुपजीव्यत्वादन्नशब्दवाच्यत्व मुक्त्वा प्रकारांतरेणाह॥ **अतीति** ॥ वेदैरतिनादादतिशयेनस्तूयमानत्वात् अतिनुस्तूयतइत्यन्नं । णुस्तुताविधातोरित्युक्तं भवति । तदेतत्त्रिवृदित्यस्य तद्देवतात्रयं त्रित्वेनवृतंमिलितमेवसत्यमित्यर्थमाह ॥ **देवतात्रयमिति** ॥ तदेतद्देवतात्रयंत्रिस्था नंवृणोतीतित्रिवृत् । स्थानत्रयमेवोच्यते ॥ **त्रिवृदिवेति** ॥ चक्षुः शुक्लंकृष्णंकनीनकेतिरूपेणत्रिवृदिव त्रिवृदेवप्रसिद्धमित्यर्थ मभिप्रेत्यव्याचष्टे ॥ **शुक्लेति** ॥ यएवमुक्तप्रकारेणसत्यस्यनारायणस्यदेवतात्रयस्यचसत्यत्वंसत्यशब्दार्थत्वंवेद सयदिहवामृषा वदति अस्योदितंवचनमपिसत्यमेवभवति । हेत्ययुक्तं असत्यवचनस्यसत्यत्वस्यव्याहतेरित्यतस्तात्पर्यमाह ॥ **नैवासत्येनेति**॥ **वेदेत्यस्याध्यानायप्रयोजनाभावादित्युक्तन्यायेनोपासनापर्यंतंधावनमभिप्रेत्यतदधिकारिकथनपूर्वकमर्थमुक्त्वायथाश्रुतार्थमप्य**

भा० । शेषवींद्रशिवादिभ्यउत्तमत्वात्सदैवहि । वायुःसदितिसंप्रोक्तोजीवेषुतुसुपूर्णतः । तीतित्रह्मासमुद्दिष्टःसएवान्नाभिमानवान् । अ न्नंप्रजापतिरितिश्रुतिरन्याह्यभाषत । अतिनादात्सदावेदैरप्यन्नंसचतुर्मुखः । यमित्यादित्यउद्दिष्टोयमयेद्यत्प्रकाशनात् । देवतात्रयमेतत्तुसहितंस त्यमुच्यते । शुक्लकृष्णकनीनासुचक्षुषोप्येतआस्थिताः । एवंसत्यपदार्थंहिविज्ञायोपास्तआदरात् । योग्यस्तस्याउपासायानैवासत्येनदुष्यति । देव तामुनयश्चैवयोग्याअस्याअपिस्फुटं ।

वेदोपास्तेच तदनीशानानि तदीशानभिन्नानि तत्स्व॥मा॥भिन्नानिभूतान्यस्मैबलिंहरंतीत्यर्थमभिप्रेत्यव्याचष्टे ॥ विष्णुप्रहिते ति ॥ योमानुषोप्येवंनाममात्रज्ञानवान्भवति तदवराणिभूतान्यस्मैबलिंहरंत्येनंपूजयंतीत्यप्यर्थमाह ॥ मानुषाइति ॥ मुक्ति योग्यामानुषामुक्ताःसंतःइतियोजना । प्रकृतस्यनारायणस्यांतरंगंनामविशेषंतदर्थतयाधिदैवमध्यात्मंचोपास्यत्वंतस्यपरिवारदे वानांमिलित्वासत्यनामकत्वंचोच्यते ॥ तदिति ॥ अत्रतद्वक्ष्यमाणंदेवतात्रयंसत्यमित्यन्यथाप्रतीतेर्व्याचष्टे ॥ सएषइति ॥ सर्वोत्तमत्वादिति ॥ सच्छब्दउत्तमंब्रूयादितिवचनादितिभावः ॥ पूर्णत्वादिति ॥ तनुविस्तारइतिधातोःव्याख्यानात्तनो तेर्विस्तारार्थत्वाद्देशकालगुणैर्विस्तारएवपूर्तिरितिभावः ॥ सर्वज्ञत्वादिति ॥ यातेर्गत्यर्थत्वादितिभावः । सदितिप्राणइत्याद्य वतारयति ॥ देवतात्रयमिति ॥ विष्णोःसत्यनामकत्वमयुक्तंप्राणादीनांसत्यनामकत्वप्रसिद्धेरित्यतःविष्णोरन्यदेवावतारत्रयं

भा० । अधिदैवेनसहिताविष्णुनाप्रभविष्णुना । एतद्धितेनकथितंमुनिनातत्ववेदिना । विष्णुप्रहितदेवानांयोगमध्यात्ममंजसा । वेदतं चनियोक्तारमुपास्तेविष्णुमव्ययं । एतादृशोपासनायायोग्यःसन्सततंसुधीः । स्वस्वाम्यन्यानिभूतानिहरेयुर्बलिमस्यहि । मुक्तस्यवैष्णवेलोकेमुक्ता निचनसंशयः । इत्येतद्ध्यानयोग्याश्चमुनयोदेवतास्तथा । मानुषाज्ञानमात्रेणस्वावरैःपूज्यतामयुः । मुक्तामुक्तैर्मुक्तियोग्याइतिशास्त्रस्यनिर्णयः । सएषभगवान्विष्णुःसत्यमित्यभिधीयते । सर्वोत्तमत्वात्पूर्णत्वात्सर्वज्ञत्वात्तथैवच । देवतात्रयमन्यच्चपृथक्सत्यमितीर्यते ।

उप० । तत्सत्यंसदितिप्राणस्तीत्यन्नंयमित्यसावादित्यस्तदेतत्त्रिवृत्त्रिवृदिववैचक्षुःशुक्लंकृष्णंकनीनिकेतिसयदिहवाअपिमृषावदतिसत्यंहैवा स्योदितंभवतियएवमेतत्सत्यस्यसत्यत्वंवेद ॥ ५ ॥

चपृथगेकैकावयवप्रतिपाद्यंसंमिलित्वासत्यंनतुविष्णोरिवविशिष्टनामवाच्यत्वमेकैकस्येत्युत्तरवाक्येनोच्यतइत्यर्थः । अवतारितं व्याचष्टे ॥ शेषेति ॥ यद्यपिब्रह्मणःशेषादुत्तमत्वं वायोर्जीवेषुमध्येपूर्णत्वंचास्ति तथापिनामवागादितारतम्यस्यप्राणावसानत्व प्रसिद्धेर्वाय्वपेक्षयाब्रह्मणःपदप्रयुक्तेषदाधिक्यसद्भावात्तद्विवक्षयैवमुक्तं । अन्नाभिमानित्वेनसर्वैरुपजीव्यत्वादन्नशब्दवाच्यत्व मुक्त्वा प्रकारांतरेणाह॥ अतीति ॥ वेदैरतिनादादतिशयेनस्तूयमानत्वात् अतिनुस्तूयतइत्यन्नं । णुस्तुताविति धातोरित्युक्तं भवति । तदेतत्त्रिवृदित्यस्य तद्देवतात्रयं त्रित्वेनवृतंमिलितमेवसत्यमित्यर्थमाह ॥ देवतात्रयमिति ॥ तदेतद्देवतात्रयंत्रिस्था नंवृणोतीतित्रिवृत् । स्थानत्रयमेवोच्यते ॥ त्रिवृदिवेति ॥ चक्षुः शुक्लंकृष्णंकनीनकेतिरूपेणत्रिवृदिव त्रिवृदेवप्रसिद्धमित्यर्थ मभिप्रेत्यव्याचष्टे ॥ शुक्लेति ॥ यएवमुक्तप्रकारेणसत्यस्यनारायणस्यदेवतात्रयस्यचसत्यत्वंसत्यशब्दार्थत्वंवेद सयदिहवामृषा वदति अस्योदितंवचनमपिसत्यमेवभवति । हेत्ययुक्तं असत्यवचनस्यसत्यत्वस्यव्याहतेरित्यतस्तात्पर्यमाह ॥ नैवासत्येनेति॥ वेदेत्यस्याध्यानायप्रयोजनाभावादित्युक्तन्यायेनोपासनापर्यंतंधावनमभिप्रेत्यतदधिकारिकथनपूर्वकमर्थमुक्त्वायथाश्रुतार्थमप्य

भा० । शेषवींद्रशिवादिभ्यउत्तमत्वात्सदैवहि । वायुःसदितिसंप्रोक्तोजीवेषुतुसुपूर्णतः । तीतिब्रह्मासमुद्दिष्टःसएवान्नाभिमानवान् । अ न्नंप्रजापतिरितिश्रुतिरन्याह्यभाषत । अतिनादात्सदावेदैरप्यन्नंसचतुर्मुखः । यमित्यादित्यउद्दिष्टोयमयेद्यत्प्रकाशनात् । देवतात्रयमेतत्तुसहितंस त्यमुच्यते । शुक्लकृष्णकनीनासुचक्षुषोप्येतआस्थिताः । एवंसत्यपदार्थंहिविज्ञायोपास्तआदरात् । योग्यस्तस्याउपासायानैवासत्येनदुष्यति । देव तामुनयश्चैवयोग्याअस्याअपिस्फुटं ।

धिकारिकथनपूर्वमाह ॥ **मानुषाणामिति** ॥ दोषोसत्यवचनेन ॥ ५ ॥ सएषप्रहितांसंयोगोध्यात्ममिति नारायणाज्ञयादेवा अध्यात्मंतत्वनियामकाइत्युक्तं । साचाज्ञाश्रुतिस्मृतीममैवाज्ञेतिवचनाद्वेदरूपेतिभावेनतंप्रकारंविवरितुमुच्यते ॥ **तस्यवाक्तं तिरित्यादिना** ॥ नामभिर्ब्रह्मादिप्रातिस्विकनामभिर्विप्रक्षत्रियादिसामान्यनामभिश्च सर्वंब्रह्मादिकंब्राह्मणादिकंच सितंबद्धं । कथंनाम्नांबंधकत्वमित्यतउच्यते । सर्वंहीदं नामनीति । इदंसर्वंनाम्निप्रतिपाद्यतयावर्ततेहियस्मात्तस्मान्नामभिःसितमित्यर्थः ॥ नामकरणकर्तोच्यते ॥ **सर्ववाचेति** ॥ एतद्विद्योपासकस्यफलमुच्यते ॥ **वहंतिहवेति** ॥ एनमुपासकंप्रति दैवतैःसहाखिला निभूतानिबलिंवहंति । कुतः । एवमुपासकंप्रतिबलिप्रदानंकार्यमितिविधिबंधसद्भावादितिभावेनोक्तं । तंतिसंबद्धाइति । य द्वापंचभूतानितदभिमानिनोदेवाअश्वरूपेण तंतिसंबद्धा रज्जुसंबद्धारथेस्थितमेनंवहंतीत्यर्थः । अत्रतस्यवाक्तंतिरितितच्छब्दे नसत्यत्वंवेदेत्युपासकःप्रकृतः देवतात्रयंचप्रकृतंपरामृश्यतइत्यन्यथाप्रतीतेर्व्याचष्टे ॥ **तस्यनारायणस्यैवेति** ॥ नामभिः

भा० । मानुषाणांज्ञानमात्राद्दोषोनातितरांभवेत् ॥ ५ ॥

उप० । तस्यवाक्तंतिर्नामानिदामानितदस्येदंवाचातंत्यानामभिर्दामभिःसर्वंसितं सर्वंहीदंनामनीँ३सर्ववाचाभिवदतिवहंतिहवाएनं तंतिसंबद्धा यएवंवेद तस्योष्णिग्लोमानित्वग्गायत्रीत्रिष्टुप्मांसमनुष्टुप्स्नावान्यस्थिजगतीपंक्तिर्मज्जाप्राणोबृहतीसछंदोभिश्छन्नोयच्छंदोभिश्छंन्न स्तस्माच्छंदांसीत्याचक्षते

भा० । तस्यनारायणस्यैवसर्ववेदात्मिकाहिवाक् ।

सर्वंसितंसर्वंहीदंनामनीतिसर्वेषांवैदिकनामवत्त्वंवक्ष्यमाणमयुक्तमस्मदादीनांतदभावादित्यतोनामानिदामानीत्येतद्विवृणोति ॥ नामब्रह्मादिकंतुयत् विप्रक्षत्रियवैश्यादिरूपंचेति ॥ सर्वेषांपृथग्वैदिकनामाभावेपि विप्रादिब्रह्मचर्यादिसामान्यनामस द्भावान्नदोषइतिभावः ॥ वायुविषयतयापि तस्यवाक्तंतिरित्यादिव्याचष्टे ॥ **तथैवेति** ॥ तस्यनारायणस्यैवेत्यवधारणंतुपूर्वप्र कृतसत्यवेदिव्युदासायादित्यव्युदासायवा ब्रह्मादिनामघटितसर्ववेदविवक्षयावायुमपिव्यावर्तयितुंचेत्यविरोधः । वेदैर्जगद्बंध कत्वलक्षणंमहिमानमुक्त्वा तदाश्रयत्वमुच्यते ॥ **तस्योष्णिगित्यादिना** ॥ अत्रोष्णिगादीनांलोमाद्यैक्यंप्रतीयतेतदयुक्तं । प्र माणविरोधात्सच्छंदोभिःछन्नइतिवाक्यशेषविरोधाच्चेत्यतो लोमानीत्यादिप्रथमायाःसप्तम्यर्थत्वमुपेत्यतस्येत्येतद्विष्णुवायुविष यतयाव्याचष्टे ॥ **विष्णोरिति** ॥ उष्णिगादीनांलोमादिष्वाश्रितत्वेछंदःशब्दएवप्रमाणमित्यभिप्रायेणनिरुच्यते ॥ **सच्छंदो भिरिति** ॥ नन्वेतदयुक्तं । लोमादीनांअवयवानांछंदआश्रयत्वमुक्त्वा सच्छंदोभिःछन्नइतिविष्णोर्वायोश्चतदाश्रयत्वकथनस्य

भा० । तंतिरूपाजगद्बंधेनाब्रह्मादिकंतु(च)यत् । विप्रक्षत्रियवैश्यादिरूपंचाखिलमेवतु । दामतेनैवबध्नातिसकलंजगदच्युतः । सर्वेहि नामवंतोत्रसर्वेवेदोदिताअपि । वेदात्मिक्यायतोवाचाविष्णुर्वदतिसोखिलं । यएतद्विष्णुवाचैवबद्धंनामाख्यदामभिः । ज्ञात्वाजगदुपास्तेतुयो ग्यःसंस्तदुपासने । तंप्रत्येवाखिलान्येवभूतानिसहदैवतैः । बलिंहरंतिपंचाथभूतान्येनंवहंतिच । योग्यश्चास्यउपासायायोग्योब्रह्मपदस्यः । भूत युक्तेरथेतस्मात्सतिष्ठतिसुरार्चितः । मुक्तःसंश्चतदन्येषांज्ञानमात्राद्विमुक्तिगैः । स्थावरैःसेव्यतेवस्थात्कैश्चिदेवकचित्कचित । तथैववायुनाबद्धंजगदे तत्ततोवरं । सुपर्णशेषगिरिशशक्रसूर्याद्यमंजसा । विष्णोर्वायोश्चलोमादौछंदांस्येवाश्रितानिच ।

विरुद्धत्वान्नचावयवावयविनोरभेदोमंतव्यः । लोमाद्यवयवानांप्राकृतत्वात् । विष्णोरप्राकृतत्वेपिवायोस्तदभावादित्यतआह ॥ विष्णोरिति ॥ ततश्चकिंतत्राह ॥ लोमेति ॥ लोमेत्यादिग्रहणं प्राणेत्यंतस्य । आदिपदेनमध्यस्थानांत्वगादीनांग्रहणं । तथाचचिदात्मनिआकेशादानखाग्राच्चैतन्यरूपेहरौ मुक्तवायौचलोमप्राणाद्यवयवैःभेदोनास्तीत्यर्थः । यद्वाननुलोमादीनांपरस्परंभिन्नत्वात्कथंएकवस्त्वभेदस्तेषामित्यतआह ॥ लोमेति ॥ लोमप्राणादीनांपरस्परंभेदश्चचैतन्यैकरसेनैवेत्यर्थः । अस्त्वेवं ततश्चकिमित्यतआह ॥ छन्नइति ॥ एवंचावयवानांपरस्परमंगिनाचभेदाभावेसति केशवःवायुश्चछंदोभिःछन्नइत्युपपद्यतइत्यर्थः । ननुमुक्तवायुलोमादेश्चिदात्मकत्वेनवाव्यभेदेपिकिंसंसारिलोमादेरागतमितिचेत् । मुक्तौचैतन्यात्मकलोमादिभावेतस्य संसारेप्यवस्थानमंगीकार्यंस्वरूपस्यागंतुकत्वायोगात्तथाचसंसारेप्राकृतलोमादिसंवलितस्वरूपभूतलोमादेःछंदआश्रयत्वेऽवयवावयव्यभेदेनवायोरेवतदुक्तंभवतीत्यविरोधइत्याशयात् । एतेनैतदपिनिरस्तं । मुक्तवायुलोमादेःछंदआश्रयत्वंजगद्व्यापारसूत्रविरुद्धमिति ॥ अस्यग्रंथस्यलोमादेश्चैतन्यात्मकस्यमुक्तौसत्वात्संसारेपितदस्तित्वस्यचछंदआश्रयत्वेसच्छंदोभिःछन्नइत्युपपन्नमित्यत्रैवतात्पर्यांगीकारेणमुक्तौछंदआश्रयत्वमस्तीत्यत्रतात्पर्यात् । भवतुवामुक्तलोमादेःछंदआश्रयत्वंनचजगद्व्यापारसूत्रविरोधः। वेदानभिमानित्वेपिमुक्तस्वावरकर्तृकऋक्पोषादिनियामकतयातदाश्रयत्वोपपत्तेः ॥ छंदोभिमानिदेवानांमुक्त्यनंतरंतदाश्रयत्व

भा० । विष्णोर्विमुक्तवायोश्चलोमाद्यंतुचिदात्मकं । लोमप्राणादिभेदश्चनैवकश्चिच्चिदात्मनि । छन्नश्छंदोभिरेवंसकेशवस्तेनचाभिधा । छंदांसीत्येवतेषांहि

॥ १९ ॥

विवक्षयाप्येतद्वचनोपपत्तेः । तस्योष्णिगित्यादिविद्यावेत्तुःफलमुच्यते ॥ छादयंतिहवेति ॥ यएवमुक्तप्रकारेणछंदांसिभगवदंगाश्रितत्वात्तन्नामकानीतिछंदसांछंदस्त्वंछंदःशब्दवाच्यत्वंवेद सयदियस्यांकस्यांचित्दिशिवस्तुंकामयते तर्हितस्यांदिशिवसंतमेनंपापात्कर्मणःछादयंतिगोपायंतीत्यर्थः ॥ यद्वायस्यांकस्यांचिद्दिशिस्थित्वायदभीष्टंवित्तादिकंज्ञानादिकंवाकामयतेतत्प्रतिबंधकात्पापात्कर्मणइतियोज्यं । तद्व्याचष्टे ॥ यएवंविदिति ॥ एनमित्यध्याहार्यं । ननुछादयंतिहवेत्युक्तार्थेमंत्रोदाहरणमसंगतं मंत्रेविष्णोर्गोपकत्वोक्तेरत्रपुनःछंदसांतदुक्तेरित्यतःकैमुत्यलब्धार्थेमंत्रोदाहरणमितिभावेनाह ॥ किमुकेशवइति ॥ यदाछंदोभिमानिनोगोपायंति किमुवक्तव्यंतदाश्रयतयाप्राधान्येनोपासितोहरिरितीतिभावः । तद्विद्योपासकानाह ॥ योग्याइति ॥ कैमुत्यलब्धार्थेप्रमाणमितिसमाहितं प्रकारांतरेणसमाधत्ते ॥ छंदस्विति ॥ तथाच छादयंतिहवाएनंछंदांसीत्यस्यछंदोगतानितन्नामकानिभगवद्रूपाणिछादयंतीत्यर्थस्तथाचसाक्षादुक्तार्थएवमंत्रोदाहरणमितिभावः । उपनिषदुक्तार्थेप्रमाणमुच्यते ॥ तदुक्तमिति ॥ छंदःस्थितस्तन्नामाविष्णुर्वायुश्चतद्विदंगोपायतीतियदुक्तं तदृषिणा अपश्यंगोपामनिपद्यमानमाच

उप० । छादयंतिहवाएनंछंदांसिपापात्कर्मणोयस्यांकस्यांचिद्दिशिकामयतेयएवमेतच्छंदसांछंदस्त्वंवेद

भा० । यएवंविदुपासकः । निवारयंतिपापेभ्यःछंदांसिकिमुकेशवः । योग्याअस्याश्चविद्यायाभृग्वाद्यादेवतास्तथा । छंदःसुसंस्थितोविष्णुर्गोपायत्येवतद्विदं ।

उप० । तदुक्तमृषिणाऽपश्यंगोपामित्येषवैगोपाएषहीदंसर्वंगोपायत्यनिपद्यमानमिति

पराचपथिभिश्चरंतं । ससध्रीचीःसविषूचीर्वसानआवरीवर्तिभुवनेष्वंतरितिमंत्रद्रष्टाप्युक्तमित्यर्थः । अहंगोपांस्त्वोपासकस्यानिष्टपरिहारकत्वेनेष्टप्रापकत्वेनचगोप्तारंसर्वगोप्तारंवा गुपूरक्षणे आकारप्रत्ययोगुणश्च । छंदस्सुसंस्थितंवायुंतदंतर्गतंविष्णुंचापश्यं । ननुयस्यांकस्यांचित्दिशिसंस्थितोयउपासकस्तद्गोप्तृत्वंयुक्तंसर्वदिग्गतत्वंसर्वगोपकत्वंचतयोःकथंइत्यतउक्त मनिपद्यमानमाचपराचेति । अनिपद्यमानं कदाचिदेकत्रातिष्ठंतं । आसमंताच्चपराचपंचभूतेभ्योबहिश्चपथिभिर्मार्गविशेषैश्चरंतमित्यर्थः । विष्णुवाय्वोःसर्वदिक्ष्वपिरूपविशेषेणस्थितत्वाच्चसर्वगोप्तृत्वंयुज्यतइत्युक्तं । ससध्रीचीरिति ॥ द्वितीयासप्तम्यर्थे । सध्रीचीनास्ववक्रासु पूर्वादिदिक्षुविषूचीनासुकोणदिक्षु वसानोवर्ततेइत्यर्थः । लोकापेक्षिताभीष्टपरिज्ञानंचतस्यकथमित्यतोलोकसाक्षितया सर्वभूतांतश्चारित्वादितिभावेनोक्तं आवरीवर्तीति ॥ सइत्येकमंत्रान्वेति । भुवनेषुलोकेषु तदंतःस्थप्राणिषुआसमंताद्वरीवर्त्यतिशयेनलोकसाक्षितयावर्तते चरतीतियावत् । खंडशोनुवादपूर्वंमंत्रार्थउच्यते ॥ अपश्यंगोपामित्येषवाइत्यादिना ॥ अपश्यंगोपामित्यत्रोक्तोगोपाएषवै । वायुस्तदंतस्थोहरिश्च नान्यः । कुतः हियस्मात्एषइदंसर्वंगोपायति नान्यइवाल्पमत असाधारण्येनव्यपदेशाभवंतीतिन्यायेनैषएवगोपाइत्यर्थः । अनिपद्यमानमित्यस्यनितरामतिष्ठंतमित्यर्थमभिप्रेत्योक्तं । नह्येषकदा

उप० । नह्येषकदाचनसंविशत्याचपराचपथिभिश्चरंतमित्याचह्येषपराचपथिभिश्चरतिससध्रीचीःसविषूचीर्वसानइतिसध्रीचीश्चह्येषविषूचीश्चवस्तइमाएवदिशआवरीवर्तिभुवनेष्वंतरित्येषह्यंतर्भुवनेष्वावरीवर्त्य

भा० । मंत्रोप्यर्थमिमंप्राहापश्यंगोपामितिस्मह ।

चनेति ॥ आचेत्यस्यासम्यक्पराग्बहिश्चरंतंपूर्वोक्तादनिपद्यमानादन्यंचापश्यमित्यर्थप्रतीतेरुक्तं आचह्येषइति ॥ एषएवाचपराचपथिभिश्चरतीत्यर्थः । ससध्रीचीःसविषूचीरित्यत्रसइतिद्विरुक्तिर्व्यर्थेत्यतएकएवतच्छब्दोत्रान्वेतीत्यभिप्रेत्यव्याक्रियते ॥ सध्रीचीश्चेति ॥ वसानइत्यस्यविशेषणत्वेवसानःसभुवनेष्वंतरावरीवर्तीत्येकवाक्यत्वेनपुनःसइतिव्यर्थमित्यतोवसानइतिकारकक्रियेतिभावेनोक्तं ॥ वस्तइति ॥ सध्रीचीरित्याद्यनुवादेनेमाएवदिशइतिविशेष्यमुक्तं । आवरीवर्तीत्यत्रैकःसइत्यन्वेतीतिभावेनोक्त मेषहीति ॥ एषवैगोपाइत्यत्रैतच्छब्दपरामृष्टमाह ॥ एषगोप्तृहीति ॥ ननुप्राक्छंदस्सुस्थितमित्युक्तमधुनावायुस्थइत्युच्यतेऽतोविरोधइत्यतआह ॥ छंदस्विति ॥ नह्येषकदाचनेत्यस्यार्थोवायुश्चेति ॥ अनिपद्यमानत्वेआचपराचेतिहेतुरुच्यतइतिभावेनाह ॥ वायुर्हीति ॥ हियस्मात्तस्मादितिपूर्वेणान्वयः । संचारप्रयोजनमुक्तं सदासर्वेति । तर्हीश्वरसाम्यमित्यतउक्तं चोदितइति । एवमवतार्यव्याचष्टे ॥ आसमंतादिति ॥ सध्रीचीश्चेत्यादिद्वितीयांसप्तम्यर्थतयाव्याचष्टे ॥ सध्रीचीनास्विति ॥ समीचीनास्ववक्रास्वितियावत् । विषूचीषुवक्रासु अतएवकोणदिक्षु । भुवनेष्वित्यस्यतत्स्थेषुसर्वभूतेष्वित्य

भा० । एषगोप्तृहिसर्वस्यवायुस्थःपुरुषोत्तमः । छंदःसुसंस्थितोवायुर्वायौचसजनार्दनः । वायुश्चवायुसंस्थश्चकदाचिन्नैवतिष्ठतः । वायुर्हिनित्यसंचारीसदासर्वप्रवृत्तिमान् । चोदितःकेशवेनैवतत्स्थेनामितशक्तिना । आसमंतात्पराक्चापिपंचभूतेभ्यईश्वरः । वायुस्तत्स्थोहरिश्चैवचरत्यमितपौरुषः । सध्रीचीनासुपूर्वादिदिक्ष्वेतौचतसृष्वपि । नित्यदावसतःकोणदिक्ष्वथासुविषूचिषु । अंतश्चसर्वलोकेषुचरतोलोकसाक्षिणौ । हस्तयोरेतयोरेवनित्याक्षीणंवसुस्थितं । तद्ध्यसह्यंबलंवायोरनंतंकिमुतद्धरेः । वायोराधारभूतस्यताभ्यांहिकृतुनामकाः । आवृताःसर्वजीवाहि

र्थमाह अंतश्चेति ॥ छादयंतीतिफलवाक्येपापात्कर्मणंएनंछादयंति गोपायतिगोपायंतिपापंकर्मास्यपरिहरंतीत्युक्तं कथंपरिह रंतीत्यतउपासकान्स्वोदरेसंस्थाप्यपापाभिमानिनोयथानस्पृशंतितथाआच्छादयंतीत्यपिविवक्षितं । तत्रमंत्रांतरमुदाहृत्यव्याक्रि यते ॥ अथोइति ॥ उक्तार्थेप्रमाणांतरमुच्यतइत्यर्थः । तदेकदेशेनपठति ॥ आवृतासइति ॥ अप्रक्षितंवसुबिभर्षिहस्तयो रषाड्हंसहस्तन्विश्रुतोदधे । आवृतासोवतासोनकर्तृभिस्तनूषुतेकृतवइंद्रभूरयइतिसमग्रमंत्रस्यायमर्थः । हेइंद्रपरमेश्वरवायोविष्णो अप्रक्षितंप्रकर्षेणाक्षीणंनित्याक्षीणंवसुबाह्यंस्वर्णाद्यां तरंज्ञानाख्यंदातुंहस्तयोर्बिभर्षि । तथाचेष्टदानेनगोपायसीतिभावः । यद्वा ज्ञानाख्यंवसुत्वद्धस्तयोःवर्तते त्वमक्षितावबोधइतियावत् । बलवद्भिस्तदपहरणेकथंदास्यतीत्यतउक्तं मषाड्हमिति ॥ असह्यंस होबलं तन्वितनौ दधेदधासि । अत्रप्रमाणंश्रुतइति ॥ वसुपूर्णकरमित्यादौवसुधारकत्वेन बलित्थेत्यादौज्ञानबलपूर्णत्वेन प्र सिद्धइत्यर्थः । यद्वावायुरितिश्रुतःप्रसिद्धः बशब्दस्यबलार्थत्वादयतेर्गत्यर्थत्वादितिभावः । छादयंतीति यत्स्वोदरेनिवेश्यजी वाच्छादकत्वमुक्तं साक्षात्तत्रप्रमाणंआवृतासइति । हेइंद्रतेतवतनुषुकर्तृत्वाद्ज्ञानरूपत्वाद्वाक्रतुनामकाःक्रतुशब्दस्यप्रज्ञानामसु पाठात् भूरयोनंताजीवाः कर्तृभिर्जगत्कारणैर्महदादिदेवैरावृतारक्षितास्तिष्ठंति । तत्रदृष्टांतः । कर्तृभिःस्वेष्टकर्तृभिःवित्तवद्भिर्वि त्तवंतोहिस्वेष्टंकुर्वंति । अवतासोन अवटाइव । सावण्यार्टकारस्यतकारः । कनकावटाइवकनकविशिष्टगर्तविशेषाइव । गर्ता वटौभुविश्वभ्रइत्यमरोक्तेः । एतन्मंत्रतात्पर्यमुच्यते ॥ सर्वंहीदमिति ॥ इदंसर्वंजीवजातंप्राणेनवायुनाकेशवेनचावृतं । ननु

॥ २१ ॥

उप० । अथोआवृतासोवतासोनकर्तृभिरितिसर्वंहीदंप्राणेनावृतं

वायुनावैगौतमसूत्रेणायंचलोकःपरश्चेति वायोःसर्वाधारत्वंश्रूयते । आकाशएवतदोतंचप्रोतंचेतिचित्प्रकृतेः कथंविष्णोस्तदित्य तउच्यते ॥ सोयमिति ॥ सोयंवायुराकाशश्चित्प्रकृतिश्च प्राणेनप्रकर्षेणनियामकेनबृहत्यापूर्णेनकेशवेन विष्टब्धोधृतइत्यर्थः । यद्वाप्राणकेशवयोःसर्वाधारत्वंसदृष्टांतमुच्यते ॥ सोयमिति ॥ प्रसिद्धोयमाकाशःप्राणेनबृहत्याप्रकर्षेणनियामकेनपूर्णेनवि ष्णुनावायुनाचविष्टब्धोधृतोभवति । यथातदयमाकाशःसोयमाकाशःप्राणेनबृहत्याविष्टब्ध एवमापिपीलिकाभ्यःपिपीलिकाप र्यंतंविद्यमानानिसर्वाणिभूतानिप्राणेनबृहत्याविष्णुनावायुनाचविष्टब्धानिधृतानिइतिविद्यादित्यर्थः । अप्रक्षितमितिमंत्रस्यप्रसि द्धेंद्रपरत्वप्रतीतेःव्याचष्टे ॥ हस्तयोरिति ॥ प्रेत्युपसर्गार्थोनित्येति । तद्धसह्यमित्यत्रहीतिश्रुतइत्यस्यार्थः । ननुबलदेवत्वा द्वायोःबलमनंतंभवतुकथंहरेरित्यतआह ॥ किम्विति ॥ तनूषुतेकृतवइत्यस्यार्थस्ताभ्यामिति ॥ कर्तृभिरावृतासोनेतिदृष्टांतवि वेचनपूर्वंदार्ष्टांतिकंविवृणोति ॥ यथैवेत्यादिना ॥ यथैवचित्तवद्भिःकनकावटाःकनकनिक्षेपगर्तविशेषः पाषाणफलकादिनाच्छा द्यंते तथाताभ्यांकर्तृभ्यांमहदाद्यैःकरणैश्चेतनाआवृताःसंतएतयोःदेहेतिष्ठंतीत्यर्थः । क्रतवइत्यस्यचेतनाइतिव्याख्यानं कर्तृभि रित्यस्यदार्ष्टांतिकेर्थेमहदाद्यैरिति ॥ सर्वंहीदंप्राणेनावृतमित्युपक्रमवाक्यस्यैवंसर्वाणिभूतानीत्युपसंहारवाक्यस्यचार्थः ॥ विष्ट

उप० । सोयमाकाशःप्राणेनबृहत्याविष्टब्धस्तद्यथायमाकाशःप्राणेनबृहत्याविष्टब्धएवंसर्वाणिभूतान्यापिपीलिकाभ्यःप्राणेनबृहत्याविष्टब्धा नीत्येवविद्यात् ॥ ६ ॥

भा० । यथैवकनकावटाः । आच्छाद्यंतेवित्तवद्भिस्ताभ्यामेवचचेतना । आवृतामहदाद्यास्तुदेहेतिष्ठंतिचैतयोः । विष्टब्धाश्चैवसर्वेपि

ब्धाश्चैवसर्वेपिजीवाइति ॥ ताभ्यामितिवर्तते । सोयमाकाशःप्राणेनबृहत्याविष्टब्धइत्येतद्व्याचष्टे ॥ आकाशएवेति ॥ प्र सिद्धएवाकाशइत्यर्थः । ताभ्यांविष्टब्धइत्यन्वेति । सोयमाकाशइत्यस्यसवायुरयमाकाशश्चेत्यर्थांतरमाह ॥ सवायुरिति ॥ बृहत्प्राणशब्दंनिर्वक्ति ॥ बृहत्त्वादिति ॥ तर्हितयोःसाम्यमित्यतआह ॥ विशेषेणबृहदिति ॥ विशेषेणप्राणइत्यपियोज्यं । तत्र प्राणकेशवयोर्मध्ये ॥ ६ ॥ पूर्वसछंदोभिःछन्नइत्यत्रलोमाद्यवयवैस्तस्यभेदोनास्ति तेषामपिभगवल्लक्षणलक्षितत्वादितिसू चितं । तत्प्रकटयितुंप्रकृतनारायणांगानांवैभवमुच्यतेइतिसंगतिःखंडएवव्यक्ता । अथाधिकारसंपत्त्यनंतरं संपन्नाधिकारवताम तःप्रयोजनस्यसत्वा दस्यपुरुषस्यनारायणस्यांगानांविभूतयोविभवाउच्यंतइतिशेषः । वाचा आस्येन । अस्यांपृथिव्यांएनाओ षधीःस्वदयत्यास्वादनार्हाःकरोतिपचतीतियावत् । इदमाहरतेदमाहरतेतिवदतिच।अतएवेदमाहरतेदमाहरतेति वचःश्रूयतेऋषि भिरितिशेषः । अथातइतिसूचितेअधिकारफलेउच्येते ॥ यावदन्विति॥योधिकारीपृथिव्यादिपदयोग्यतालक्षणोपासनाधिका रवानेवंवेदो पासनापूर्वंअपरोक्षतोवेदास्यान्वेनमनुपृथिव्यग्निश्चवर्तते । मुक्तभूम्यग्निसमन्वितोभवतीतियावत् । यद्वापृथिवी

भा० । जीवाआकाशएवच । सवायुःप्रकृतिश्चैवविष्टब्धौकेशवेनहि । बृहत्त्वाद्बृहतीत्येवतयोर्नामप्रकीर्तितं । वायुकेशवयोःप्राणनामसर्व प्रणायनात् । विशेषेबृहत्प्राणोभगवांस्तत्रकेशवः । इतिविद्यात् ॥ ६ ॥

उप० । अथातोविभूतयोस्यपुरुषस्यतस्यवाचासृष्टौपृथिवीचाग्निश्चास्यामोषधयोजायंतेग्निरेनाःस्वदयतीदमाहरतेदमाहरतेत्येवमेतौवाचंपि तरंपरिचरतःपृथिवीचाग्निश्चयावदनुपृथिवीयावदन्वग्नि

॥ २२ ॥

ञ्जगदेकदेशत्वेनेतिभावेनोच्यते ॥ अयंपितेति ॥ ततश्चकिमित्यतःपितृत्वात्तन्नामपुत्राणांभवतीतिवक्तुंतदुपपादनाय यःपु त्रःसपितृनामवान्इतिव्याप्तिरुच्यते ॥ यत्रहेति ॥ पुत्रस्ययत्रकच यत्किंचिन्नामभवतितत्पितुर्भवति । यदैवंपुत्रनामापिराजा जयीत्यादिवत्पुत्रस्वामित्वेनपितुर्भवतितदाकिमुवक्तव्यं यत्रवायद्वानामपितुर्भवतितत्पुत्रस्यभवतीति । तन्नामपुरस्कारेणपुत्र स्यप्रसिद्धिभाक्त्वादितिहेतोः । तदुक्तंतस्योक्तंभावेक्तः भगवन्नाम । इत्येतदापइत्येतत् । तेषांब्रह्मादीनांउक्तंनामभवतीत्यर्थः । तदिदमापएवेतिमदाख्यंब्रह्मपूर्णवस्तु आसम्यग्गुणैःपूर्णत्वादापइत्युच्यतेतन्मोचकत्वाच्चात्यंतरंगत्वेनस्वनामतेषांदत्तवानितश्चे तिभावेनतदुपपादनपूर्वंपूर्णत्वमपिसोपपत्तिकमुच्यते एतद्धस्मेत्यादिनासमग्रखंडेन ॥ एतत्पूर्णत्वात्स्वस्यान्नामकत्वंतत्पु त्रत्वादन्येषांतन्नामकत्वमितिविद्वान्महिदासएवैतद्वक्ष्यमाणतयाबुद्धिस्थंस्वानुभवसिद्धंनियामकत्वादिकमप्याह ॥ किमिति ॥ आहंमामित्यत्र आअहमितिपदच्छेदः । ओमदित्यत्रापि आउमदितिपदानि । पिपीलिकामारभ्यदेवेभ्यआपर्यंतं । आव्या तं मामहमावेदसम्यग्वेद । देवानपिमत्आ स्वस्वोत्तमक्रमेणमत्पर्यंतमाव्याप्तानावेद उ एव वेदैवमयिदेवाआश्रितास्तेषुचा हंनियामकइतियावत् । एतदेव इतोमत्तःप्रदानाःप्रकृष्टपदादिप्रदानवंतः संतानादिप्रदानवंतो ज्ञानकर्मबलादिगुणप्रदान

उप० । मयंपितैतेपुत्रायत्रहकचपुत्रस्यतत्पितुर्यत्रवापितुस्तद्वापुत्रस्येत्येतत्तदुक्तंभवत्येतद्धस्मवैतद्विद्वानाहमहिदासऐतरेयआहंमांदेवेभ्योवे दओमदेवान्वेदेतःप्रदानाह्येतइतस्संभृताइति

वंतश्चेतोमत्तएवसंभृताःसम्यग्जीवधारणवंतःपूर्णामुक्ताआहेत्यन्वयः । किंचसएषसर्वभूतानांनिगरणात्संहरणाद्गिरिः चष्टइति चक्षुः श्रोतृत्वाच्छ्रोत्रं मंतृत्वान्मनः प्रणेतृत्वात्प्राणः उपलक्षणमेतत् । एवंसर्वगुणपूर्णश्च तमेवंगुणपूर्णत्वादखिलस्यगरणाच्च ब्रह्मगिरिरित्याचक्षते । यएवंसर्वगुणपूर्णत्वात्सर्वसंहर्तृत्वाच्चब्रह्मगिरिशब्दवाच्यंवेद सद्विषंतंज्ञानभक्त्यादिस्वयोग्यगुणपूर्तिप्रतिबंधकंभ्रातृव्यंभ्रातृवत्सहस्थितंपाप्मानंपापपुरुषंकलयादिदैत्यंगिरतिनाशयति । कलिर्ममाराशुसुवाङ्मयैःशरैः । निकृत्तशीर्षोभगवन्मुखेरितैरितितात्पर्यनिर्णयोक्तरीत्यैवमुपासकस्यद्वेषीकल्यादिदैत्योरूपविशेषेणनश्यतीतिज्ञेयं । नकेवलमेतावत्किंत्वस्यैवमुपासकस्यद्विषन्द्वेष्टाभ्रातृव्यः भ्रातायथैकगेहेवर्तते यथाचयमलभ्रातैकस्मिन्मातृदेहेवर्तते तथैकदेहस्थःपाप्मापराभवति तमःप्राप्तिलक्षणंपराभवंप्राप्नोति । पराचीनमवमंतमो भवतिप्राप्नोतीतिवा भवतेःप्राप्त्यर्थकत्वात् । ब्रह्मज्ञानिद्वेषिणोनिरयेपराभवोज्ञानिनस्तुपरमानंदप्राप्तिरित्यस्यसंभावनाय भगवतोद्वेषिनिरासकत्वादिमहिमांतरमुच्यते ॥ सएषइति ॥ सएषभगवान्सर्वस्यायोग्यजनस्यासनात्तमसिक्षेपणादसुःज्ञानिनांप्रकृष्टंसुखंयस्मात्सप्राणः । परमानंदप्रापकइतियावत् । स्वस्यानंदाभावेकथंतद्दानमित्यतश्चोक्तं ॥ प्राणइति ॥ प्रकृष्टंणंसुखंयस्यस्वरूपंसप्राणइत्यर्थः । निरयपरमानंदयोःसाधनमुच्यते ॥ सएषभूतिश्चेति ॥ सएषभगवान्भक्तानांज्ञानैश्वर्यादिभूतिप्रदत्वात्तद्रूपत्वाच्चभूतिनामा अभक्तानामज्ञानाद्यभूतिप्रदत्वादभूति

उप० । सएषगिरिश्चक्षुःश्रोत्रंमनोवाक्प्राण स्तंब्रह्मगिरिरित्याचक्षतेगिरतिहवैद्विषंतंपाप्मानंभ्रातृव्यंपरास्यद्विषन्पाप्माभ्रातृव्योभवति यएवंवेद । सएषोसुःसएषप्राणःसएषभूतिश्चाभूतिश्च

नामा । कुतइदवषम्यामित्यतउक्तंभूतिरिति । वाय्वादयोदेवास्तंभूतिःसुखज्ञानादिगुणप्रदश्चेत्युपासांचक्रिरेतस्माच्चतेऽखिलाःसुखसज्ज्ञानपूर्वसद्गुणैःयुताबभूवुः । देवानांतथोपासकत्वेउदाहरणमुक्तं ॥ तस्माद्धेति ॥ तस्मादेवकारणादेतर्हीदानीमपिदेवोत्तमःसुप्तःसुप्तस्थोवायुस्तंभूर्भूरित्येवभूतिप्रदोभूतिरूपइत्येवप्रश्वसिति श्वासरूपेणशंसति । यद्यदाचरतिश्रेष्ठइतिन्यायेनान्येपितथोपासतइतिभावः । एवंदेवतोपासनंतद्भूतिकारणमित्युक्त्वा तद्विपरीतोपासनमसुराणांफलवैपरीत्येकारणमित्युच्यते ॥ अभूतिरिति ॥ असुरास्त्वभूतिर्भूत्यकारकःअभूतिरूपश्चेत्युपासांचक्रिरेतस्मात्तेपराबभूवुःज्ञानैश्वर्यादिहीनाः पराभूतास्तमस्यंधेचपेतुः । यएवंवेदसआत्मनापरमात्मप्रसादेनभवति । ज्ञानैश्वर्यादिसंपन्नोभवति । अस्यद्वेष्टाभ्रातृव्यःपाप्माचपराभवतीत्यर्थः । इतःसंभृताएषगिरिरिति जीवनहेतुत्वंमोक्षहेतुत्वंसंहारकत्वंचोक्तं । तदुपपादयितुमुच्यते ॥ सएषमृत्युश्चेति ॥ सएषवायुनासहितोविष्णुरेवमृत्युर्मारकोऽमृतं मोक्षप्रदश्च संसारेमुक्तौचमृतिविरुद्धजीवनप्रदोवा । तदेतत्प्रमेयमृषिणोक्तं । अपागर्वागंचतीत्यपाङ्अपानः प्रागूर्ध्वमंचतीतिप्राङ् प्राणश्चवायुः स्वधया आनंदरूपिणाहरिणागृभीतोनुगृहीतः । हृग्रहोर्भःछंदसीतिवचनात् । अपागर्वाक्पायूपस्थरूपाधःस्थाने प्राक्चक्षुःश्रोत्रमुखनासिकारूपोर्ध्वस्थानेचेतिजीवनहेतुः प्रवर्तकइतिया

उप० । तंभूतिरितिदेवाउपासांचक्रिरेतेबभूवुस्तस्माद्धाप्येतर्हिसुप्तोभूर्भूरित्येवप्रश्वसित्यभूतिरित्यसुरास्तेहपराबभूवुर्भवत्यात्मनापरास्यद्विषन्पाप्माभ्रातृव्योभवति यएवंवेदसएषमृत्युश्चैवामृतंचतदुक्तमृषिणाऽपाङ्पाङेति

वत् । ननुमर्त्यैःशरीरैःसहस्थितस्यवायोर्मरणावश्यंभावेनकथमन्यत्रमृतिजीवनहेतुत्वमित्यतउक्तं अमर्त्यइति ॥ स्वधयागृही तइत्यनुवर्तते मर्त्येनमर्त्यैर्नाशशिरस्कैर्देहैःसयोनिःसहस्थितोपिभगवदनुगृहीतत्वात् अमर्त्यएव देहाभिमानाभावेनतत्कृतोत्पत्ति मृतिविक्रियाशून्यत्वादज्ञानलोपाभावाच्चेतिभावः । कैमुत्येनवायोरमृतत्वमुच्यते ॥ ताश्चश्वंतेति ॥ तौवायुतद्देहौशश्वंतौश श्वद्विद्यमानौ । देहानांशश्वद्विद्यमानत्वंमोक्षपर्यंतमेवनतुनिरवधिकमितिभावेनोक्तंविषूचीनेत्यादि । विष्वगंचतइतिविषूची विषूचीनौहरिपंचभूतलक्षणनानागम्याविंतियावत् । किंचवियंताविंयंतौविरुद्धगमनौ । ऊर्ध्वगमनंवायोःशरीराणामधःक्षिप्तौ पातइतिभावः । तत्रज्ञापकमुक्तंन्यन्यमिति । अन्यंशरीरंनिचिक्युर्ददृशुरन्यंवायुंनददृशुरित्यर्थः । प्रथमपादमनूद्यतात्पर्यमु च्यते ॥ अपानेनेति ॥ स्वधयेत्यध्याहार्यं । अपानेनेति सहयोगेतृतीया हिशब्दोयस्मादित्यर्थे । यस्मादपानेनसहप्राणःस्व धयापरमात्मनायतो नियत स्तस्मान्नपराग्भवति शरीरान्निर्गच्छति जीवनकरएववर्ततइतियावत् । द्वितीयपादमनूद्यस्व धयेत्यन्वेतिजात्येकवचनमितिभावेनार्थउच्यते ॥ एतेनहीति ॥ इदंसर्वंदेहजातमेतेनभगवदनुग्रहेणामर्त्येनवायुनासयोनिस हस्थितं तस्यैवविवरणं मर्त्यानिहीति ॥ ताश्चशंतेत्यर्धमनूद्यान्यंनिचिक्युरित्यस्यार्थउच्यते ॥ निचिन्वंतिहैवेति ॥ अस्यो पयोगउच्यतेअमृतैवैषादेवतेति । यदादेहाअपिशाश्वतास्तदैषादेवताअमृतेति किमुवाच्यमित्यर्थः । सएषमृत्युश्चैवामृतंचेत्या

उप० । स्वधयागृभीतइत्यपानेनह्ययंयतःप्राणोनपराङ्भवत्यमर्त्योमर्त्येनासयोनिरित्येतेनहीदंसर्वंसयोनिमर्त्यानिहीमानिशरीराणीं३अमृतै षादेवेताताश्चश्वंताविषूचीनाविंयंतान्यन्यंचिक्युर्ननिचिक्युरन्यमिति निचिन्वंतिहैवेमानिशरीराणीं३

देःफलमुच्यते ॥ अमृतइति ॥ यएवंभगवत्प्रसादेनामृतत्वादिगुणयुक्तंवायुंवेदसोमृतोमुक्तःसन्नमुष्मिन्लोकेविष्णुलोकेसंभ वतिवसति । मुक्तेभ्यःसर्वेभ्योभूतेभ्योमुक्तएवददृशे दृश्यतइति ॥ ८ ॥ आपाइत्यापइत्यनयोःपौनरुक्त्यप्रतीतेःसाध्याहारंम श्नपरिहारविषयतयाव्याचष्टे ॥ आपइत्येवदेवानामिति ॥ तदिदंब्रह्मापएवेतिप्रकृताद्भिर्ब्रह्मणोऽभेदप्रतीतेर्व्याचष्टे ॥ इद मिति ॥ इदंवैमूलमित्यादेरर्थस्तन्मूलमिति । अयंपितेतिपुनरुक्तमित्यतस्तद्व्याकुर्वन्नुपयोगमाह ॥ पितेति ॥ इदंवैमूलमित्यु स्तंमूलत्वंचनवृक्षमूलवज्जगदेकदेशत्वेनेतिभावेनायंपितेत्यादिप्रवृत्तमितिभावः । वृक्षमूलवत्किंनस्यादित्यतआह ॥ स्वतंत्रत्वा दिति ॥ इत्येतत्तदुक्तंभवतीत्येतद्व्याचष्टे ॥ पितृत्वादिति ॥ एतेनेतिशब्दउक्तपितृत्वहेतुपरामर्शकः । तदुक्तं तस्यहरेर्नाम इत्येतदापइत्येतत्तेषांदेवानामुक्तंनामभवेदिति व्याख्यातंभवति । यत्रवापितुस्तद्वापुत्रस्येत्युक्तव्याप्तेरुदाहरणमाह ॥ यथेति ॥

उप० । अमृतैवैषादेवतामृतोहवाअमुष्मिँल्लोकेसंभवत्यमृतःसर्वेभ्योभूतेभ्योदृश्येयएवंवेदयएवंवेद ॥ ८ ॥ इत्यैतरेयोपनिषत्सुद्विती

यारण्यकेप्रथमोध्यायः ॥

भा० । आपइत्येवदेवानांब्रह्मादीनांकथंभवेत् । नामेत्यपृच्छल्लक्ष्मीस्तंमहिदासजनार्दनं । आपइत्येवनामैषांभवतीत्याहसप्रभुः । इदंमदा त्म्यंयद्ब्रह्मापइत्यभिधीयते । आपूर्णत्वाद्गुणैःसर्वैस्तन्मूलमखिलस्यच । तूलभूतंतदन्यत्तुपिताह्येषजनार्दनः । पुत्राब्रह्मादयःसर्वेनैवायंवृक्षमूलव स्वतंत्रत्वाज्जगन्नाथःपितृत्वात्परमेशितुः । तन्नामापइतिह्येतद्ब्रह्मरुद्रादिनांभवेत् । यथायदवइत्येवरघवःकुरवस्तथा ।

कैमुत्यन्यायसूचकस्य यत्रहकचपुत्रस्येत्यस्याप्युदाहरणमाह ॥ पुत्रनामेति ॥ तत्तंत्रत्वादित्यनेनतदधीनत्वादर्थवदितिन्यायं सूचयति । पुत्रस्यपितृनामवत्त्वेलोकेव्यवहारसांकर्यस्यात् । तथादेवानामपिअन्नामकत्वेतत्स्यादित्यतआह ॥ तथापीति ॥ व्यवहारव्यवस्थितिर्नामव्यवस्थितिः । प्रवृत्तिनिमित्तंयत्रमुख्यंतत्रतस्यबहुव्यवहारोन्यत्राल्पइतिप्रकरणपर्यालोचनयापिमुख्यत्वाद्यनुसंधाननेननामव्यवस्थेतिभावः । यद्वादेवानामन्नामकत्वेब्रह्मरुद्रादिनामपर्यायत्वंस्यादित्यतआह ॥ तथापीति ॥ ब्रह्मादिनान्नांतत्तन्मात्रवर्तित्वेनासाधारण्येनमुख्यत्वं समुदायनान्नस्त्वमुख्यत्वमितिव्यवहाराणांनान्नामपर्यायतयाव्यवस्थितिरिति । उक्तमेवविवृणोति ॥ आपइत्येवेति ॥ अन्यानि ब्रह्मेत्यादीनि । पृथग्देवेभ्यः । नन्वन्नान्नइवब्रह्मादिनान्नामपिभगवन्नामत्वात्सर्वेष्वपिदेवेषुतत्प्रयोगप्रसंगस्तथाचव्यवहारसांकर्यस्यादित्यतआह ॥ तथापीति ॥ यन्नामयस्यविशेषतोदत्तंतत्तत्रमुख्यमितिमुख्ययावृत्त्येत्यर्थः । तद्विवृणोति ॥ आपइत्येवदेवानामिति ॥ ननुदेवानांपितृनामकत्वेनारायणादिनामवत्त्वमपित्यादित्यतआह ॥ नारायणादीति ॥ इत्येतद्धस्मवैतद्विद्वानित्येतद्व्याचष्टे ॥ एवंसभगवानिति ॥ आहंमांदेवेभ्यइत्यत्र आअहमितिविभज्यआइत्यस्यार्थत्रयमाह ॥ देवपर्यंतमिति ॥ देवेभ्यःआ पर्यंतं आव्याप्ति । मावेदसम्यक्सदावेदेत्यर्थः ।

भा० । पुत्रनामपितुश्चस्यात्तत्तंत्रत्वात्सुतस्यहि । यथापितामहाद्योश्चपितरोनामकीर्तिताः । तथापिमुख्ययावृत्त्या व्यवहारव्यवस्थितिः । आपइत्येवदेवानांसर्वेषांप्रददौहरिः । स्वकीयमेवमन्यानिपृथक्पृथगदात्प्रभुः । नारायणादिनामानिददौनान्यस्यकेशवः । एवंसभगवान्विष्णुमहिदासाभिधःप्रभः । जानन्नित्योदितज्ञानादाहदेवीमिदंवचः । देवपर्यंतमाव्याप्तिंवेदाहंममसर्वदा । मत्पर्यंतंतथाव्याप्तिंदेवानामपिसर्वशः ।

तात्पर्यमाह ॥ मयिदेवाइति ॥ इतःप्रदानाइत्येतद्व्याचष्टे ॥ मयैतानीति ॥ कैमुत्यपरत्वेनप्रकारांतरेणव्याचष्टे ॥ सत्ताद्याअपीति ॥ सत्ताद्याः स्वरूपसत्तातद्विषयप्रतीतिप्रवृत्तयोपि मदाज्ञया पदानिमयाप्रदत्तानीतिकिमुवाच्यमित्यर्थः । सत्ताद्याअपिमदाज्ञयाज्ञानकर्मबलेहाद्यामद्दत्ताइतिकिंवदइतियोज्यं । ईहेच्छाज्ञानभक्त्यादिविषयिणी । इतःसंभृताइत्यस्यार्थः ॥ संभृताइति ॥ सएषगिरिरित्यादिव्याचष्टे ॥ सएषइति ॥ गरणदर्शनश्रोतृत्वादिकंसर्वसाधारणमित्यतःसर्वभूतानांगरणात्सर्वभूतानांदर्शनात्सर्वश्रोतृत्वतइत्यादि । तंब्रह्मगिरिरित्येतद्व्याचष्टे ॥ तमेनमिति ॥ गिरतिहवाइत्यादिफलवाक्यंव्याचष्टे ॥ यएवमिति ॥ जगन्मूलत्व तत्संहारकत्वादेःप्रकृतत्वात्तल्लब्धार्थपरामर्शायशाश्वतमित्युक्तं । निरयगो नित्यनिरयगः । सएषोसुरित्यादिव्याचष्टे ॥ असनादित्यादिना ॥ असनान्निरसनात्संहरणात्तमसिक्षेपणाद्वा । असुक्षेपणइतिधातोः । सर्वस्ययोग्यस्यप्रकृष्टमानंदंरूपयतिनिरूपयतीतिप्रकृष्टानंदरूपत्वात्प्राणइत्यर्थः । प्रकृष्टानंदस्वरूपत्वादितिवा । ज्ञानैश्वर्यादिभूतिदइत्युप

भा० । मयिदेवास्तेषुचाहमितिविद्धिवरानने । मयैतानिप्रदत्तानिपदानिब्रह्मपूर्वकाः । अधितिष्ठंतिसत्ताद्याअप्येतेषांमदाज्ञया । ज्ञानकर्मबलेहाद्यामद्दत्ताइतिकिंवदे । संभृतामत्तएवैतेसएषभगवान्गिरिः । गरणात्सर्वभूतानांचक्षुर्नामास्यदर्शनात् । सर्वश्रोतृत्वतःश्रोत्रंमनोमंतृत्वहेतुतः । प्राणनामाप्रणेतृत्वात्तमेनंगुणपूर्तितः । गरणाच्चाखिलस्यास्यप्राहुर्ब्रह्मगिरिंप्रभुं । यएवंवेदतंविष्णुमापरोक्ष्येणशाश्वतं । गिरत्येवाखिलं पापंभ्रातृवत्सहसंस्थितं । पराभवतिपाप्मास्यद्वेष्टानिरयगःसदा । असनाद्भगवान्सोसुःसर्वस्यापिजनार्दनः । प्रकृष्टानंदरूपत्वात्प्राणइत्यभिधीयते । सएषभूतिनामापिज्ञानैश्वर्यादिभूतिदः ।

लक्षणं भूतिरूपइतिचग्राह्यं । भूतिदंभूतिरूपिणमितिवक्ष्यमाणत्वात् । तंभूतिरितिदेवाइत्युपलक्षणं । सएषप्राणइत्युक्तरीत्यासु खप्रदस्तत्पूर्णश्चेतिचोपासांचक्रिरेइत्यर्थमभिप्रेत्यव्याचष्टे ॥ सुखज्ञानादीति ॥ तस्माद्धाप्येतर्हीत्यत्रश्रूयमाणंतस्मादितिपदं देहलीदीपन्यायेनोभयत्रान्वेतीतिभावेनपूर्वसंबंधितयाव्याचष्टे ॥ तस्माच्चतेखिलाइति ॥ ननुदेवानांभूतिरित्युपासकत्वेकथं सुप्तस्यभूर्भूरितिश्वासकर्तृत्वंज्ञापकमित्यतस्तस्माद्धाप्येतर्हीतिवाक्यंव्याचष्टे ॥ देवानामिति ॥ तस्मादेवेत्यत्राप्यन्वेति । ननु तथापिभूतिरित्युपासकत्वेभूरितिशंसनंकथंज्ञापकमित्यतउक्तंभूःशब्दार्थइति । भूतिरित्येवभूःशब्दस्यार्थइत्यर्थः । अभूरित्यसुरा इत्येतद्व्याचष्टे ॥ वैपरीत्येनेति ॥ किंतद्देवतोपासनावैपरीत्यमसुरोपासायामित्यतःअभूतिरित्यस्यार्थमाह ॥ अभूतिकारक इति ॥ भूत्यकारकइत्यर्थः । विष्णुःस्वोपासकानामभूतिमेवकरोतीतिवा ॥ अर्थांतरमाह ॥ ऐश्वर्यादीति ॥ पराबभूवुरित्य स्यप्रतिपदंतस्मात्पराभूताइति । तद्द्वेधाविवृणोति ॥ ज्ञानेति ॥ यएवंवेदसभवत्यात्मनेतिफलवाक्यंव्याचष्टे ॥ यएवमिति ॥ भावाभावमिति ॥ देवानांभावमैश्वर्यादिशुभं दैत्यानामभावमशुभं सद्भाववाचकाःशब्दाःसर्वेतेशुभवाचकाइतिवचनात् ।

भा० । अज्ञानादिप्रदातृत्वात्सएवाभूतिनामकः । सुखज्ञानादिगुणदंपूर्णसर्वगुणैःप्रभुं । उपासतेतंवाय्वाद्यादेवास्तस्माच्चतेखिलाः । बभू वुःसुखसज्ज्ञानपूर्वैःसर्वगुणैर्युताः । देवानामपिसर्वेषांप्रधानोद्यापिमारुतः । स्थित्वासुप्तेषुविष्णुंतंभूर्भूरित्येवशंसति । भूःशब्दार्थोभूतिरितिवै परीत्येनचासुराः । अभूतिकारकोस्माकमैश्वर्यादिगुणोज्झितः । इत्येवोपासतेतस्मात्पराभूताश्चसर्वशः । ज्ञानैश्वर्यादिभिर्हीनाःपेतुरंधंतमस्यथ । यएवंवेदतंविष्णुंभूतिदंभूतिरूपिणं । भावाभावंचदेवानांदैत्यानांचैवमेवतु ।

आत्मनापरमात्मनाप्रसन्नेनेतिधर्मिप्राधान्यविवक्षयाक्तमितिभावेनधर्मप्राधान्यविवक्षयापरात्मनःप्रसादादित्युक्तं । आत्मनेत्य स्यपाप्मेत्युत्तरेणाप्यन्वयः । तद्व्याचष्टे ॥ तस्यपरात्मनःप्रसादात्तस्यपाप्माचेति ॥ सएषमृत्युश्चैवामृतंचेत्यत्रैषउपासको देहतोमृत्युग्रस्तःस्वरूपतस्त्वमृतइत्यन्यथाप्रतीतेर्व्याचष्टे ॥ सएषभगवानिति ॥ अमृतमित्यस्यमृतिविरुद्धजीवनकरइत्यर्थां तरमाह ॥ सएवेति ॥ मंत्रेणैकार्थत्वसिद्धयेजीवनप्रदत्वंमृत्युत्वंचोपपादयति ॥ यदापानेनेत्यादिना ॥ नकेवलंलिंगभंग लक्षणमुक्तिप्रदः किंतुमुक्तौजीवनप्रदश्चेतिभावेनामृतमित्येतद्व्याचष्टे ॥ मुक्तानामपीति ॥ नकेवलंसंसारिणांमुक्तानामपी तिवा । प्राणादेवेत्येवकारेणतत्वदेवानांनियामकत्वमात्रंजीवनंतुप्राणादेवेतिद्योतयति । तत्र मुक्तावपि जनार्दनःप्राणाधारः प्राणस्यप्राणधारकोजीवनकरइतियावत् । अपाङ्प्राङेतीतिमंत्रपादंव्याचष्टे ॥ अर्वागिति ॥ तत्रापाङ्प्राङित्यस्यार्थःअर्वाक् प्राक्चेति । सार्वकालिकोलडितिभावेनसदागच्छेदित्युक्तं । अपाङ्अपानःप्राङ्प्राणइत्यर्थांतरमभिप्रेत्यतयोःप्रतिपदंवायुरिति । स्वधयागृभीतइत्यस्यार्थः आनंदरूपिणेति । अपानेनह्ययंयतःप्राणोनपराग्भवतीत्यस्यार्थमाह ॥ प्राणोपानेनेति ॥ एतेनापा

भा० । ज्ञानैश्वर्यादिभिःसोपिभवेत्तस्यपरात्मनः । प्रसादात्तस्यपाप्माचपराभवतिसर्वशः । सएषभगवान्विष्णुर्मृत्युदोमोक्षदस्तथा । सए वजीवनकरोयदापानेनसंयुतं । प्राणंनियमयत्यस्मिञ्छरीरेपुरुषोत्तमः । शरीराद्बहिरेतौतुयदानिःसारयत्यजः । तदामृत्युप्रदश्चायंमुक्तानामपिजी वनं । प्राणादेवहितत्रापिप्राणाधारोजनार्दनः । अर्वाक्प्राक्चसदागच्छेत्वायुरानंदरूपिणा । अनेनैवगृहीतोहिप्राणोपानेनसंयुतः । अनेनह रिणायस्मान्नियतोनपराग्भवेत् ।

नेनेतिसहयोगेतृतीया । स्वधयेत्यनुवृत्तस्ययतइत्यनेनसंबंधः । तस्यचनियतइत्यर्थः । हिशब्दस्ययस्मादित्यर्थइत्युक्तंभवति । अमर्त्योमर्त्येनासयोनिरित्यादिव्याचष्टे ॥ अमर्त्यइति ॥ देहैःसहस्थितोपिवायुस्तत्प्रसादेनाभिमानशून्यत्वादमर्त्यइत्यर्थः । अनेनमंत्रेणस्वधयागृभीतइत्येतदमर्त्योमर्तेनेत्यत्रापिसंबध्यतइतिभावेनोपनिषद्येतेनहीत्युक्तमित्युक्तंभवति । ताशश्वंतेत्येतद्व्याख्यारमृतत्वेकैमुत्यन्यायपरमितिभावेनव्याचष्टे ॥ अनित्याअपीति ॥ तर्हिमोक्षायोगइत्यतोविषूचीनेत्यादिलब्धंसमाधानमाह ॥ आविमोक्षतइति ॥ प्रलयेऽभावात्कथमेतदित्यतउक्तं ॥ स्थूलसूक्ष्मेति ॥ विषूचीनेत्येतद्व्याचष्टे ॥ नानेति ॥ नानागम्यावित्यर्थः । तद्विवृणोति ॥ वायुरिति ॥ पंचत्वंपंचभूतलक्षणकारणात्मकत्वं । ननुतद्देहस्यसत्वगुणकार्यत्वात्कथंभौतिकत्वमितिचेत् । भौतिकेनतुसत्वेनगूढंब्रह्मणआंडजमितितृतीयस्कंधतात्पर्योक्तरीत्या अद्भ्यःसंभूतःपृथिव्यैरसाच्चेत्यादिश्रुत्युक्तरीत्याचांडजरूपविवक्षयैवमुक्तिसंभवात् । बहिर्गतरूपाणांशरीरस्यतुकथमित्यतःप्रकारांतरमाह ॥ जडमिति ॥ अतएवस्थूलसूक्ष्मविभागेनेत्यस्यस्थूलमंडजंसूक्ष्ममहदाद्यंतर्गतमित्यर्थः । सूक्ष्माणिमहदादीनिस्थूलान्यंडादिकानिचेत्यादेः । यद्वा ततोमहत्तत्वतनूर्विरिंचःस्थूलात्मनैवाजनीत्युक्तरीत्यास्थूलात्मनासृष्टंमहदाद्यंतर्गतंस्थूलंसूक्ष्मतयासृष्टंसूत्रपुरुषादिनामकंसूक्ष्ममित्यर्थः ।

भा० । अमर्त्यस्तत्प्रसादेनवायुर्देहैःसहस्थितः । अनित्याअपिदेहास्तेशश्वत्संत्याविमोक्षतः । स्थूलसूक्ष्मविभागेनकिमुवायुर्जगत्प्रभुः । नानागतीतुतावेतौवायुःप्राप्नोतिकेशवं । शरीरंतुविनष्टंस्यात्पंचत्वमुपगच्छति । जडंतज्जडतामेतिचेतनावायुदेवता । चेतनेशंहरिंयाति

यद्वा स्थूलंबाह्यं सूक्ष्मंलिंगशरीरमितिज्ञेयं । वियंतेत्येतद्व्याचष्टे ॥ विरुद्धेति ॥ ननुत्रुट्स्तुग्रासभूतस्तुदेहस्तत्रलयंव्रजेदितिवचनात्कथमधःक्षितौदेहस्यपातइतिचेन्न । क्षितिशब्देनस्वनाशस्थानस्योर्ध्वगमनशब्देनतत्तदधस्त्यागस्यविवक्षितत्वात् । क्षिनिवासगत्योरितिधातोः । न्याअन्यमित्येतद्व्याचष्टे ॥ दृश्यतइति ॥ एतेनानित्याअपिदेहास्तइत्यारभ्य दृश्यतेतच्छरीरंचेत्यंतमुक्तंप्रमेयंसर्वजीवसाधारणं ताशश्वंतेतिवायोःविशेषउच्यतइतिनिरस्तं । वायोःसूक्ष्मदृष्टरूपाणांतत्वाभिमानिरूपाणामंडांतर्जातमूलरूपाणांचाप्रलयमवस्थानांगीकारादितरदेवादिरूपाणांअंडांतःब्रह्मकश्यपादिसृष्टानांदैनंदिनप्रलयादौविनाशांगीकारात् । प्रतिदिनंरोचनाद्यात्मनाजननेपिनतेषांनाशः । किंतुदैनंदिनप्रलयेपिसत्यादौपृथगवस्थानंवा ब्रह्मसृष्टमनूनांभगवत्सृष्टैकीभाववत्मूलरूपेणसंश्लेषोवेत्युपपत्तेः । अतएवमहाप्रलयएवतच्छरीराणांतस्यचनानागतित्वविरुद्धगतित्वाद्यभ्युपगमेनतद्विषयेपीतरवैलक्षण्यमितिज्ञेयं । यद्वा सएषमृत्युश्चैवामृतंचेत्यत्र शरीराद्बहिरेतौतुयदानिःसारयत्यजः ॥ तदामृत्युप्रदश्चायमितिसर्वजीवशरीरेभ्योनिर्गमनमुक्तंतेनजीववत्तस्यापिमर्त्यत्वमितिशंकानिवारणायामर्त्योमर्त्येनेत्यादिमंत्रशेषप्रवृत्तिः । तद्विवरणमेतेनहीदमिति । व्याख्यान ममर्त्यस्तत्प्रसादेनेत्यादि । अनंतैर्जीवदेहैःसहस्थितोपिभगवत्प्रसादेनामर्त्यएवतन्नाशेनविक्रियाशून्यत्वादितिभावः । वायोरमृतत्वंकैमुत्येनोच्यते ॥ ताशश्वंतेति ॥ तद्व्याख्यानमनित्याअपीति । यदाशरीराणांप्रवाहतोनित्यत्वंतदाजगत्प्रभुस्तन्नियामकोवायुर्नित्यइतिकिमुवक्तव्यं । अनित्यत्वेशरीरप्रवाहनिर्वाहकत्वायोगादितिभावः । मृत्युश्चै

भा० । विरुद्धगमनौचतौ । ऊर्ध्वगच्छतिदेवःसदेहोधःपततिक्षितौ । दृश्यतेतच्छरीरंचाप्यदृश्यावायुदेवता ।

वामृतंचेत्यत्रप्राणिशरीरेभ्यःप्राणापानाख्यरूपद्वयस्यनिःसरणमुक्तं । तत्रप्रमाणं विषूचीनेत्यादि ॥ तद्व्याख्यानं नानागती इत्यादि ॥ शरीरं प्राणिदेहः । पंचत्वमित्यस्यविवरणं जडमित्यादि ॥ अमृतोहवाइत्यादिफलवाक्यंविवृणोति ॥ यएव मित्यादिना ॥ एषपंथाइत्यादिवाक्यं ब्रह्मजिज्ञास्यं तस्यनिर्दोषगुणपूर्णत्वेनविषयत्वात् । स्वप्राप्तिहेतुतयाप्रयोजकत्वादित्ये वंपरतयाप्रमाणेनव्याख्यातं । अधुनाप्रकारांतरेणानुपपत्तिपरिहारकतयास्ववाक्येनव्याक्रियते । तथाहि यदुक्तंनारायणस्यज गज्जन्मादिकारणत्वंमुखानंतगुणपूर्णत्वं । तदयुक्तं । वासुदेवस्यमोचकत्वात्संकर्षणस्यसंहारकत्वात्प्रद्युम्नस्यस्रष्टृत्वादनिरुद्धस्य स्थापकत्वादित्यतस्तदेववाक्यंनारायणस्यवासुदेवाद्यैक्यपरतयाव्याचष्टे ॥ ब्रह्मपंथाइति ॥ प्रकृतस्यब्रह्मशब्दवाच्यतयाऽनं तगुणपूर्णस्यनारायणस्यवासुदेवाद्याश्चतस्रोमूर्तयःब्रह्मपंथाइत्यस्मिन्निर्देशक्रमेणोक्ताइत्यर्थः । वानात्सूतेर्देवनाद्वासुदेवइत्याद्यु क्तगुणपूर्णत्वाद्ब्रह्मवासुदेवः । शरीरेभ्यःसम्यक्कर्षणेनग्रलयेस्वोदरप्राप्तिहेतुत्वात्पंथाःसंकर्षणः । प्रकृष्टतयाद्युतिमेयत्वंहिप्रद्युम्न पदप्रवृत्तिनिमित्तं । सत्वेनप्रकृष्टतयावगम्यतइतिसत्यं यातेरवगत्यर्थत्वात्प्रद्युम्नइत्येकोर्थः । प्रकर्षेणसृष्ट्याजगतोद्योतकःप्र द्युम्नः । सद्भावंयापयतीतिसत्यमितिवाएकोर्थः । अन्नपानादिकर्तृत्वाद्रक्षणायप्राप्तोपद्रवज्ञातृत्वात्तल्लयकर्तृत्वाच्चानिरुद्धःकर्म कर्तृत्वात्कर्ममातृतइतिह्युक्तं । मानंज्ञानंलयश्चेतिवचनाच्च । प्राप्तविरोधपरिहारेणस्थापकोह्यनिरुद्धइतिभावः । तथाचमूले ए

भा० । यएवंवेदतंवायुममृतंसर्वनायकं । पूर्णानंदेनहरिणागृहीतंतद्वशंसदा । समुक्तोलोकमाप्नोतिविष्णोर्मुक्तैश्चदृश्यतेइतिच । ब्रह्म । पंथां । सत्यं । कर्मेतितस्यनारायणस्यवासुदेवाद्याःक्रमेणचतस्रोमूर्तयः ।

षनारायणएवपंथाःसंकर्षणः । एतन्नारायणाख्यंपरंब्रह्मैवकर्मानिरुद्धइत्यादियोजना । तथाचवासुदेवादीनांतदत्यंताभिन्नत्वा न्नोक्तविरोधइतिमूलार्थइतिज्ञेयं । यद्वाननूपक्रमेनारायणस्यजिज्ञास्यतयाप्रस्तुतस्यखंडत्रयेप्रतिपादनादतएवभाष्योदाहृतप्रमा णेतृतीयखंडांते एवंनारायणंजानन्सर्वलोकैककारणमित्युक्तत्वात्पंचमेच । तस्माच्छ्रुत्वापरंब्रह्मदेवानारायणाभिधमितिप्रमा णानुसारेणतंदेवाःप्राणयंतेतिप्रकृतनारायणपरामर्शात् । षष्ठेचतस्यनारायणस्यैवसर्ववेदात्मिकाहिवागितिप्रमाणानुसारेण तस्य वाक्तंतिरितिनारायणपरामर्शात्कथंमध्येचतुर्थखंडेतंप्रपदाभ्यांप्रापद्यतब्रह्मेमंपुरुषमित्यत्र तमिमंप्रथमज्ञानिपुरुषंचतुराननं । वा सुदेवात्मकंब्रह्मेतिप्रमाणानुसारेणवासुदेवस्यप्रतिपाद्यत्वमुपक्रमेप्रस्तुतत्वात्कथंचोत्तरत्रप्रज्ञामयोमृतमयोदेवतामयइत्यादावनि रुद्धादिरूपाणांप्रसक्तिरित्यतआह ॥ ब्रह्मपंथाइति ॥ एषपंथाइत्युपक्रमेब्रह्मपंथाइत्यादिपदैर्नारायणस्यवासुदेवाद्याश्चतस्रोमू र्तयःप्रस्तुताअतःसंगतिवशात्तासामपिनिरूपणंयुक्तमेवेतिभावः । द्वितीयखंडे नासिकायैविनतमिवेत्येतन्निहितश्चैवतल्लोकोना सिकायांनतस्थलइतिव्याख्यातं । तदविस्पष्टं । नासिकारंध्रसमीपेनतस्थलाभावादिवेतिचनव्याख्यातमतःस्ववचनेनविवृणोति ॥ नासिकायामिति ॥ उपमार्थेतथाल्पत्वेपीवशब्दःप्रयुज्यतइतिवचनात्किंचिन्नतमित्युक्तं । अध्यात्मंनासिकायांयन्नेत्रयोर्मध्ये किंचिन्नतंस्थानं तदधिदैवंद्युलोकेयत्सूर्यलोकस्यस्थानंतद्वदाचरितंसूर्यलोकस्थानीयंतत्प्रतिनिधिंविद्यात् । अत्रापिसूर्यलोकोनि हितइतियावत् । ननुयथापृथिवीतथेत्यादौतथेतिव्यर्थं । यथामहानसइत्यादिवद्यथापृथिवीत्येतावतापूर्णत्वादित्यतआह ॥ त

भा० । नासिकायांयन्नेत्रयोर्मध्येविनतमिवकिंचिन्नतस्थानंतत्सूर्यलोकस्थानीयंविद्यात् ।

थेतिनिर्णयइति ॥ यथेत्युक्त्यैवलोकप्रयोगमहिम्नातथेत्यर्थस्यसिद्धत्वेपिसिद्धेसत्यारंभोनियमार्थइतिन्यायेनपुनःस्पष्टोक्तिर्यथा पृथिवीतथैवनात्रसंशयःइतिनिर्णयज्ञापिकेत्यर्थः । तृतीयखंडे सइरामयइतिवाक्यं सइरामयः । इच्छानंदप्रभूतत्वादितिव्याख्यातं इरामयाइतिदीर्घस्यकागतिरित्यतआह ॥ इरामयाइतिदैर्घ्यमवधारणार्थमिति ॥ सएवेरामयइतिवा सइरामय एवेतिवावधारणार्थइत्यर्थः । दैर्घ्यस्यावधारणार्थत्वेऽभिधानमाह ॥ दैर्घ्यमिति ॥ प्रकृतेदैर्घ्य मापाइत्यादौप्लुतं वंगावगधाइत्यादौबिंदु रन्यत्रहिंकारइतियोज्यं । चतुर्थेखंडेब्रह्माहैवत३ईइत्यत्र । ताः ई इतिपदच्छेदप्रतीतेरनूद्यविवक्षितंपदंदर्शयति ॥ ब्रह्माहैवेति ॥ ननुतत्औइतिस्थितेत्यदाद्यत्वेपररूपत्वेचनपुंसकाच्चेतिशीभावेत ई इतिस्थितेअवधारणार्थेप्लुतेत३ ई इतिस्थितेगुणेतेइतिरूपंसिद्ध्यतीतिवस्तुगतिः । त ई । इतिस्वरयोर्विभागेनोक्तौकिंकारणमित्यतःक्रमेणोदाहरणपूर्वंविभागप्रयोजनमाह ॥ देशतइति ॥ उदरदेशेवर्तते हृदयदेशेवर्ततेइतिदेशतः । रामस्त्रेतायांकृष्णोद्वापरइतिकालतः । व्यासःजटाकमंडल्वादिमान् कृष्णश्चक्रशंखादिमानितिविशेषणपदार्थात् । ज्ञानार्थंव्यासः शत्रुसंहारार्थंकृष्णइत्यर्थात्प्रयोजनात् । रामोमहाबलो भार्गवोल्पबलइतिबलतः । गुणतस्तदतिरिक्तगुणतः । स्वरूपतोमत्स्याद्याकारतः । परिमाणतोवायत्रभेदोनास्ति । इंद्रार्जुना

भा० । तथेतिनिर्णयः । ईरामयाइतिदैर्घ्यमवधारणार्थं । दैर्घ्यंप्लुतंचहिंकारोबिंदुरप्यवधारणइतिशब्दनिर्णये । ब्रह्माहैवता३ईते । देशतःकालतोर्थाच्चबलतोगुणतस्तथा । स्वरूपतोपिनैवस्याद्भेदोत्यल्पोपियत्रहि । केवलैश्वर्ययोगेनयत्रसंख्याद्विवद्भवेत् । स्वरस्पर्शविभागेनतत्रोक्तिः स्याद्विभक्तिषु ।

दिष्विवात्यल्पोभेदोविशेषोपिनास्ति । किंतुकेवलैश्वर्याख्येनयोगेनघटकेनयत्रसंख्याद्विवत्द्वयोरिवतत्रतस्येवेतिसप्तम्यर्थेवतिः वस्तुतोभिन्नयोर्द्वयोरिवभवेत् । तत्रविषयेविभक्तिषुस्वरस्पर्शविभागेन क्वचित्स्वरयोः क्वचित्स्पर्शयोः क्वचित्स्वरस्पर्शयोर्विभागेनासंहिततयोक्तिःस्यादित्यर्थः । केवलैश्वर्ययोगेनयत्रद्वित्वादिसंख्याभवेदितिसामान्येनोक्तंतस्योदाहरणमाह ॥ अचिंत्यादिति ॥ एतद्यथास्पष्टंतथोच्यते विष्णुरेकोभेदरहितोप्यचिंत्यादैश्वर्यादेवबहुरूपवान्आत्मानंप्रकाशयेदित्यर्थः । यद्वास्वार्थेणिच् प्रकाशतइत्यर्थः । तथैश्वर्यादितिक्वचित्पाठः । तत्राचिंत्यैश्वर्यादेवविष्णुरेकोपिबहुरूपवान्तथाभिन्नमिवस्वात्मानंप्रकाशयेदिति योज्यं । ननुयत्तुयुक्त्याविरुध्येततदीशकृतमेवहीत्युक्तत्वात् कोत्रयुक्तिविरोधोयेनाचिंत्यत्वसमाधानमभेदेपींद्रार्जुनयोरिवविशेषसंभवादित्यतआह ॥ यतइति ॥ यतोविष्णुःसर्वत्ररूपादिष्विंद्रार्जुनादिवद्विशेषरहितः । ततोचिंत्यैश्वर्यादेवबहुरूपवानिति योज्यं । सर्वत्रेत्युक्तमेवविशदयति ॥ नविशेषइति ॥ नैश्वर्यइत्यादौविशेषइत्यनुवर्तते । इंद्रार्जुनयोरभेदेपि सर्वेगुणाआवृतामानुषत्वइत्युक्तरीत्यास्त्येवैश्वर्यादौविशेषः । अंशिनोशेषसंधानमत्यल्पस्यापिविद्यते । भुविजातेनचांशेनसुखदुःखादितद्वतं ॥ अनुभूयतेविशेषस्तुकश्चिदीशकृतोभवेत् ॥ इत्युक्तरीत्यानुसंधानादावस्त्येवविशेषो नात्रतथेत्याशयेनप्रमाणोदाहरणस्योपयोगमाह ॥ इत्यादिशब्दनिर्णयइति ॥ अत्यभिन्ने विशेषरहितेपिवस्तुनि द्विवचनंव्यवहारमात्रंनतुतंतुपटावित्यत्रेवभे

भा० । अचिंत्यात्तुतथैश्वर्यादेकोपिबहुरूपवान् । प्रकाशयेद्यतोविष्णुःसर्वत्राप्यविशेषवान् । नविशेषोहिरूपाणांमत्स्यादीनांकथंचन । नैश्वर्येनबलेचैवनानंदादिगुणेष्वपीत्यादिशब्दनिर्णयवचनात्द्विवचनमत्रव्यवहारमात्रमितितईइत्युक्तं ।

दज्ञापकं । नापींद्रार्जुनावित्यत्रेवविशेषज्ञापकं किंत्वचिंत्यैश्वर्यघटितद्वित्वसंख्यामात्रपरमितिदर्शयितुंब्रह्मैवेत्यभेदेसिद्धेपित ई
इतिविभागेनोक्तमित्यर्थः । ननुब्रह्माहैवेतिसंहिताकालेदैर्घ्यश्रवणात्कथंतेउभेब्रह्मतत्परमितिह्रस्वांतपदमुपात्तं । कथंवातत्परत्वे
नविशेषितमित्यतआह ॥ संहितायामिति ॥ पंचमखंडे । अदउआविरधिदैवतमित्येत दधिदैवंसएवैकइतिव्याख्यातंतत्प
दानुकरणेनस्पष्टंव्याचष्टे ॥ अदउएवेति ॥ उइत्यनूद्यैवेतिव्याख्यानं । ननुहिरण्यगर्भोधिदैवंदेवःसंकर्षणोपिवेतिगीताभा
ष्योदाहृतगीताकल्पेहिरण्यगर्भादेरप्यधिदैवत्वोक्तेःकथमवधारणमित्यतआह ॥ स्थानांतरइति ॥ कर्मदेवादीत्यादिपदेनस्वा
वरदेवग्रहणं । षष्ठेखंडेतस्योष्णिगित्यादिवाक्येलोमादिपदंविष्णोर्वायोश्चलोमादाविसप्तम्यर्थतयाव्याख्यातं । तद्व्याकरणेन
समर्थयते ॥ तस्योष्णिगिति ॥ उष्णिग्लोमानीतिसामानाधिकरण्येनैक्यमेवकिंनस्यादित्यतआह ॥ सछंदोभिरिति ॥
प्रयोगेणापिप्रथमायाःसप्तम्यर्थत्वंसमर्थयते ॥ ब्राह्मणइति ॥ आदिपदेनाग्निर्मुखं ब्रह्माशिरः पृथिव्येवपादौ द्यौरेवशिरः उर
एववेदिः लोमानिबर्हिः सत्राणिशरीरसंधिस्त्वंसर्वंयज्ञक्रतुरिष्टिबंधनइत्यादिकंगृह्यते । ननूक्तोदाहरणमपिसंदिग्धमेवेत्यतःपुरा

भा० । संहितायांयत्रदैर्घ्यपदेयत्रनविद्यते । उक्तार्थस्यमहाधिक्यंश्रुतेस्तत्रविवक्षितमित्यतोब्रह्माहेतिदैर्घ्यमपिपरब्रह्मत्वविवक्षया । अदउ
एवनारायणाख्यमधिदैवतमन्यानिदैवतमात्राणि । स्थानांतरेऽन्येषामप्यधिदैवतत्वकथनंकर्मजदेवाद्यपेक्षया । मुख्याधिदैवतंनारायणएव ।
तस्योष्णिग्लोमानीत्यादि । लोमसूष्णिगित्याद्यर्थे । सप्तसुप्रथमेति । सछंदोभिश्छन्नइतिवाक्यशेषात् । ब्राह्मणोस्यमुखमासीदित्यादिवच्च ।

णवचनेनसर्वत्रप्रथमायाःसप्तम्यर्थत्वमाह ॥ अंगेष्विति ॥ सप्तमखंडे चंद्रमाअस्मैपूर्वपक्षापरपक्षान्विचिनोतिपुण्यायकर्मण
इत्यादावस्यपुण्यकर्मसिद्धयेइत्यन्यथाप्रतीतेर्व्याचष्टे ॥ अस्मैपुण्यायेति ॥ जीवानांकर्मकर्तुंचेत्पितरंपरिचरतइतिकथमुक्तमि
त्यतउक्तं । एतमुद्दिश्येति । भगवंतमुद्दिश्यदर्शपूर्णमासादिपुण्यकर्मजीवैःकारयितुंपूर्वपक्षापरपक्षान्विचिनोतीतिभावः । चं
द्रस्यस्वपितृश्रोत्रपरिचर्यात्कथमनेनलब्धेत्यतआह ॥ तैरिति ॥ तैर्यजमानैस्तुतिव्याख्याध्ययनादिकर्माणिकृतानिस्वश्रोत्रेण
शृणोतिभगवानित्यर्थः । पुण्यायकर्मणइत्यत्रपुण्यकर्मशब्देनस्तुत्यादिकमपिविवक्षितमितिभावः । यद्वादिग्भ्योविशृणोतीत्येत
व्याचष्टे ॥ तैरिति ॥ दिग्देवैरित्यर्थः । प्रकारांतरेणव्याचष्टे ॥ दिग्भ्यइति ॥ दिग्भ्योन्यःप्रेर्यएवसन्भगवत्स्तुत्यादिकर्मा
णिशृणोतीत्यर्थः । यद्वाभगवान्शृणोतीत्युक्तंभगवतोन्योजीवोपिदिग्भ्यस्तदनुग्रहाच्छृणोतीत्यर्थः । ननुजीवानांशब्दभोगस्य
दिगनुग्रहसाध्यत्वेपिभगवत्परिचारकत्वंकथंतासामित्यतआह ॥ अन्येषामिति ॥ अन्येषांजीवानांश्रोत्रेंद्रियेणशब्दश्रवणे
नजायमानं भोगं भोग्यंसुखंतत्सदृशंपरमसुखमितियावत् भगवान् तच्छ्रोत्राधिष्ठितेनस्वश्रोत्रेणशब्दश्रवणेनानुभवतीत्यर्थः ॥
यद्वा श्रवणजंश्रोत्रदेशे अभिव्यक्तंभोग्यंशब्दंतदधिष्ठितेनस्वश्रोत्रेणभुङ्क्तइत्यर्थः । ननुदिग्देवानामेवश्रोत्राभिमानित्वाज्जीवश्रो

भा० । अंगेषुयस्यछंदांसिदेवालोकामखाअपि । तद्वशानियतानित्यंनमस्तस्मैपरात्मनइतिचस्कांदे । अस्मैपुण्यायकर्मणइतिएतमुद्दि
श्यजीवानांपुण्यकर्मकर्तुं । तैर्हिस्तुत्यादिकर्माणिकृतानिश्रोत्रेणशृणोतिभगवान् । दिग्भ्योप्यन्यएवविशृणोतिजीवः । अन्येषांजीवानांश्रवणजंभो
गंस्वश्रोत्रेणदिग्भिरननुगृहीतेनैवभगवान्भुंक्ते ।

त्रस्यनभगवदनुग्राह्यत्वंसंभवति तदधिष्ठितभगवच्छ्रोत्रस्यापितदनुग्राह्यत्वेपरिचारकत्वायोगइत्यतउक्तंदिग्भिरननुगृहीतेनेति ॥ केवलंसेवारूपेणश्रोत्राश्रितत्वात्परिचारकत्वंनत्वनुग्राहकत्वमितिभावः । एतेनदिग्भ्योविवर्जितेनतदनुग्रहरहितेनजीवश्रोत्राधिष्ठितेनस्वश्रोत्रेणशब्दश्रवणजंभोग्यंस्वरूपसुखंचभगवान्भुङ्क्ते इत्यर्थांतरमुक्तंभवति । तस्यवाचासृष्टावित्यादौप्रकृतस्वजीवस्यवाचेत्याद्यर्थप्रतीतिःप्रमाणेननिरस्ता । प्रमाणाभावेनापिनिराचष्टे ॥ नचेति ॥ पूरुषसूक्तमंत्रसमाख्ययापितस्यपरमपुरुषस्यविष्णोर्वाचेत्यर्थोंगीकर्तव्यइत्याह ॥ मुखादिति ॥ ननुपुरुषसूक्तेपद्भ्यांभूमिरजायतेत्युक्त्वाद्वाचासृष्टौ पृथिवीचाग्निश्चेत्यादेःकथंतत्समाख्यारूपमित्यतआह ॥ सृष्टिभेदादिति ॥ भगवतःसकाशात्सर्वेषांसृष्टिरित्यत्रसमाख्यात्वंमध्येयदन्यथावचनं तत्सृष्टिभेदादुपपद्यतइत्यर्थः । ननुतृतीयखंडे ऽयंपुरुषोब्रह्मणोलोकइत्यत्रायमितिविशेषणात्पुरुषोजीवोभ्युपगतः । प्रकृतेचास्यपुरुषस्येतिविशेषणात्पुरुषोजीवोंगीकार्यस्तस्यपृथिव्यादिकारणत्वमप्रामाणिकंप्रमाणविरुद्धंचेदौपचारिकंकारणत्वंकल्प्यतांतस्यजीवस्यवाचास्येनान्नभोगजनकादृष्टेनपृथिवीचाग्निश्चसृष्टावित्यभ्युपगमेबाधकाभावादित्यतआह ॥ नचेति ॥ भगवदास्यादिकमेवसाक्षात्पृथिव्यादिकारणमित्यंगीकारेविरोधेऽन्नभोजनकादृष्टस्यान्नहेतुत्वंतदर्थंतंडुलगर्भरंधनार्थमग्र्यपेक्षा तंदुलार्थमो

भा० । नचजीववागादिनापृथिव्यग्र्यादिकंसृष्टमित्यत्रकिंचिन्मानमस्ति । मुखादिंद्रश्चाग्निश्चेत्यादिनाभगवतःसकाशाद्धिसर्वेषांसृष्टिःप्रसिद्धा । सृष्टिभेदादन्यथावचनं.। नचमुख्यकारणांगीकारेऽविरोधेऔपचारिकंकारणमंगीकर्तुयुक्तं ।

षधिपृथिव्यपेक्षेतिपृथिव्यादिकंप्रतिवाचोऽदृष्टद्वारौपचारिकंकारणत्वंवक्तुंयुक्तमित्यर्थः । अतिप्रसंगंस्पष्टयति ॥ नहीति ॥ यद्युक्तपरंपरयाजीवास्यादेरग्र्यादिकारणत्वं तर्हिचंडालस्ययत्किंचित्कृष्यादिकंप्रतिकारणत्वात्ब्राह्मणस्यकृषिमूलकान्नविकारेतःपरिणतदेहलाभेनतस्यचंडालःपितेतिनिर्देशःस्यादित्यर्थः ॥ ननूक्तपरंपरयामानुषाणांनोपचारेणकारणत्वं किंतुसाक्षान्मानुषाणांयद्देवजनकादृष्टंतस्मादेवोत्पत्तिःकिंनस्यादित्यतआह ॥ मानुषाणामिति ॥ प्रत्युतदेवानांकर्मणैवैतेजायंतेसर्वमानुषाइतियोज्यं । ननुमानुषकर्मैवमानुषोत्पादकं किंदेवकर्मणेत्यतउक्तं ॥ दैवतैरिति ॥ ननुजीवादृष्टैरेववर्षेणोषध्यादिदेवाजायंतइतिप्रसिद्धं तत्कथंमानुषकर्मनदेवोत्पत्तिकारणमित्युच्यतइत्यतउक्तंदैवतैरिति । अन्नादिप्रापकाणांनरादृष्टानांतदभिमानिदैवतैरुपकारःफलपर्यवसानलक्षणःक्रियते । नतुदेवाएवादृष्टेनोत्पद्यतइत्यर्थः । कुतोनोत्पद्यंतइत्यतस्तत्रहेतुकथनपूर्वंनिगमयति ॥ प्रधानत्वादिति ॥ अष्टमेस्मिन्खंडे आहमहिदासऐतरेयइत्यादिनामहिदासवचनंसंमतित्वेनोदाह्रियते इत्यन्यथाप्रतीतेराह ॥ आहेति ॥ सन्निहितस्याहंमांदेवेभ्योवेदेत्यादिसन्निहितस्यैव । अत्रोदाहरणमाह ॥ यथेंद्रमिति ॥ इंद्रंकुत्सोवृत्रहणंशचीपतिंकाटेनिबाह्वृषिरह्वऊतयइतिवाक्यं सर्वस्यतत्पूर्वोत्तरसंदर्भस्ययथाकुत्सवाक्यत्वज्ञापकंतथेत्यर्थः । आदिपदेन आत्वाकण्वा

भा० । अतिप्रसंगात् । नहियत्किंचित्कारणत्वमस्तीत्येतावताब्राह्मणस्यचंडालःपितेत्युच्यते । पितृत्वंचात्रोक्तंवाचंपितरमित्यादिना । मानुषाणांतुयत्कर्मनदेवोत्पत्तिकारणं । दैवतैरुपकारस्तुक्रियतेनरकर्मणां । देवानांकर्मणैवैतेजायंतेसर्वमानुषाः । प्रधानत्वान्नदेवानांनृकर्मोत्पत्तिकारणमितिचब्रह्मांडे । आहमहिदासऐतरेयइतितुसर्वस्यवचनस्यतदीयत्वज्ञापनार्थंनतुसन्निहितस्यैव । यथेंद्रंकुत्समित्यादि ।

अहूषतेत्यादेर्ग्रहणं । काटेकाटसंघाते कामक्रोधादिशत्रुसंघाते । निबाह्वःनितरांबाढः । कुत्सऋषिरूतयेरक्षार्थं । वृत्रहणंशची पतिमिंद्रमह्वदाह्वयामासेत्यर्थः । प्रसिद्धमुदाहरणांतरमाह ॥ यथाचेति ॥ ब्रह्ममीमांसायाःबादरायणोपज्ञत्वस्यप्रसिद्धत्वात्त त्रबादरायणग्रहणंयथासर्वस्यतद्वाक्यत्वद्योतकंतथेत्यर्थः ॥ ७ ॥ इतिश्रीमद्विट्ठलाचार्यपुत्रेणश्रीमत्तीर्थाचार्यचरणसेवि नाश्रीनिवासेनविरचितायांश्रीमन्महैतरेयभाष्यार्थरत्नमालायांद्वितीयप्रघट्टकेप्रथमोऽध्यायः समाप्तः ॥२॥ १॥

उपक्रमे एतद्ब्रह्मेत्यत्रैतदितिप्रकृतस्यनारायणस्य तत्परमांतरंगस्यवायोश्च गुणपूर्णत्वंसमन्वयमुखेनोच्यतेस्मिन्नध्याये । एषप्रा णपरिवृतोनारायणः इमंलोकंब्रह्मादिशरीरं पुरुषरूपेणांतर्यामिरूपेणाभ्यार्चत्प्रविवेश । एषकःयोभ्यार्चत्इत्यतउच्यते ॥ यएषइति ॥ यएषआदित्येस्थित्वातपति सप्राणोनारायणोवावसतदभ्यार्चदित्यर्थः । आदित्येस्थित्वातपन्नारायणःकथं । प्र सिद्धेःसूर्यएवेत्यतउच्यते ॥ प्राणइति ॥ यएषआदित्येस्थित्वातपतिसएषप्राणोनारायणएवेतिप्रसिद्धं प्रसिद्धसूर्यस्यतापनश क्त्यभावादितिभावः । वक्ष्यतिचाचार्यः । नप्रसिद्धसूर्यस्येयंतापनशक्तिरितिज्ञापयितुंप्राणोह्येषयएषतपतीत्युक्तमिति । शत

भा० । यथाचपूर्वंतुबादरायणोहेतुव्यपदेशादिति ॥ ८ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेश्रीमन्महैतरेयभाष्येद्वितीयप्रघ ट्टकेप्रथमोध्यायः ॥ २ ॥ १ ॥ ७ ॥

उप० । एषइमंलोकमभ्यार्चत्पुरुषरूपेणयएषतपतिप्राणोवावतदभ्यार्चत्प्राणोह्येषयएषतपति

र्चिनाम्निधात्वर्थमुक्त्वापदार्थउच्यते ॥ तमिति ॥ तंब्रह्मादिशरीरंशतंवर्षाण्यभ्यार्चत् । तत्रज्ञापकं ॥ तस्मादिति ॥ तस्मा देवहेतोःपुरुषायुषःशतंवर्षाणिभवंति अन्यथातन्नस्यादित्यर्थः ॥ यद्यस्माच्छतंवर्षाण्यभ्यार्चत्तस्मात्तानिरूपाणिशतर्चिनोनाम्ना भवन् । तस्मात्तन्नामकत्वादेवशतर्चिनइत्याचक्षतेविद्वांसः । ननुमधुछंदःप्रभृतयोपिशतर्चिनःप्रसिद्धाइत्यतउक्त मेतमेवेति । प्रवृत्तिनिमित्तमुख्याश्रयतयासंतमेवाचक्षतेमुख्यतः । ऋषींस्तूपचारतइतिभावः । सभगवान्यदिदंकिंचजगद्वर्तते इदंसर्वंम ध्यतःतन्मध्येस्थित्वाआत्मनउदरेस्थापयित्वाचदधे । तस्मान्माध्यमाइत्यादिपूर्ववत् ॥ प्रकर्षेणनेतृत्वात्प्राणस्थःप्राणनामागृत्सः गृह्णातिसारमितिव्युत्पत्तेः । अपनेतृत्वादपानस्थोपाननामामदःसुखरूपत्वान्मलाद्यपकर्षणेनसुखहेतुत्वाच्च । सयद्यस्मात्प्राणरू पेणगृत्सोपानरूपेणमदश्चतस्माद्गृत्सश्चासौमदश्चेतिगृत्समदनामेत्यर्थः । तस्ययत्किंचतदिदंविश्वंमित्रमासीत् योग्यानांमित्रत्वं स्फुटं अयोग्यानामपिभगवदपकारकरणसामर्थ्याभावान्मित्रत्वं । तत्संहार्यत्वेनेष्टत्वाद्वा । तंदेवाअब्रुवन्नित्यत्रदेवानांमध्येवाम

उप० । तंशतंवर्षाण्यभ्यार्चत्तस्माच्छतंवर्षाणिपुरुषायुषोभवंतितंयच्छतंवर्षाण्यभ्यार्चत्तस्माच्छतर्चिनस्तस्माच्छतर्चिनइत्याचक्षतएतमेव संतंसइदंसर्वंमध्यतोदधेयदिदंकिंचसयदिदंसर्वंमध्यतोदधेयदिदंकिंचतस्मान्माध्यमास्तस्मान्माध्यमाइत्याचक्षतएतमेवसंतंप्राणोवैगृत्सोपानोमदः सयत्प्राणोगृत्सोपानोमदस्तस्माद्गृत्समदइत्याचक्षतएतमेवसंतंतस्येदंविश्वंमित्रमासीद्यदिदंकिंचतद्यदस्येदंविश्वंमित्रमासीद्यदिदंकिंचतस्माद्विश्वामित्र स्तस्माद्विश्वामित्रइत्याचक्षतएतमेवसंतंतंदेवाअब्रुवन्नयंवैनःसर्वेषांवामइतितंयद्देवाअब्रुन्नयंवैनःसर्वेषांवाम

त्वाद्वामदेवइतिनिर्वचनंलब्धंज्ञेयं । अत्रयइतिबहुवचनमपिबहुरूपापेक्षयेतिज्ञेयं । एषइमंलोकमित्यत्रैषइतिप्रकृतःप्राणापानात्मकोवायुरितिप्रतीयते प्राधान्येनप्रकृतत्वात्तत्सहितनारायणपरामर्शेपिएषनारायणःपुरुषरूपेणमानुषादिभावेनेमंलोकंशरीरमभ्यार्चदित्यन्यथाप्रतीतेर्व्याचष्टे ॥ एषनारायणइति ॥ अंतर्यामिणिपुरुषशब्दंनिर्वक्ति ॥ पुरुशेतइति ॥ प्रयोगंचाह ॥ प्रसिद्धत्वाच्चेति ॥ नन्वादित्यएवप्राणइतिश्रुतेःयएषतपतिसूर्याख्यःप्राणःसतदभ्यार्चदितिउत्तरवाक्येश्रवणात्कथमेषनारायणइतिव्याख्यानमित्यतस्तद्व्याचष्टे ॥ यएषइति ॥ सूर्यमंडलेस्थित्वातपन्नारायणःकुतइत्यतउपनिषदिहिशब्देनश्रुतिप्रसिद्धिरुक्ता ताएवश्रुतीरुदाहरति ॥ यआदित्यइति ॥ ननुपठितबृहदारण्यश्रुतौआदित्यमंडलस्थत्वेनश्रूयमाणःशिवादिःकिंनस्यात् । शिवस्याप्यष्टमूर्तित्वेनसूर्येप्रोक्तत्वादादित्यमंडलस्थत्वस्यसिद्धत्वादित्यतआह ॥ यएषइति ॥ समाख्याश्रुत्यंतरे यएषोंतरादित्येहिरण्मयःपुरुषोदृश्यतेइत्यादित्येहिरण्मयःपुरुषोवर्ततेइतिविष्णोरुक्तत्वात्तत्समाख्यया यआदित्येतिष्ठन्नित्यत्रनशिवा

ताम्रपर्णी. २।२।१ ॥ ३६ ॥

उप० । इतितस्माद्वामदेवस्तस्माद्वामदेवइत्याचक्षतएतमेवसंतंसइदंसर्वंपाप्मनोत्रायतयदिदंकिंचसयदिदंसर्वंपाप्मनोत्रायतयदिदंकिंचतस्मादत्रयस्तस्मादत्रयइत्याचक्षतएतमेवसंतं ॥ १ ॥

भा० । एषनारायणोदेवोवायुनासहैवेमंलोकमभ्यार्चत् । ब्रह्मादिशरीरेषुप्रविवेश । पुरुषइत्यंतर्यामिरूपस्याख्या । पुरिशेतइति । प्रसिद्धत्वाच्चपंचरात्रेषु । यएषसूर्यमंडलेस्थित्वातपतिभगवान्सनारायणः । यआदित्येतिष्ठन्नादित्यादंतरोयमादित्योनवेदेत्यादिश्रुतिभ्यः । यएषोंतरादित्येहिरण्मयःपुरुषोदृश्यत

दयउच्यंतेइत्यर्थः । तत्रापिशिवादयःकिंनस्युरित्यतउक्तं इत्युक्त्वेति ॥ इत्युक्त्वातस्ययथाकप्यासंपुंडरीकंएवमक्षिणीइत्युक्तत्वान्नशिवादयस्तत्रोच्यंतेइत्यर्थः । पुंडरीकाक्षत्वोक्तिमात्रेणशिवादिव्यावृत्तिःकुतइत्यतआह ॥ शिवोहीति ॥ उपलक्षणमेतत्सूर्यश्चेत्यपिग्राह्यं । विरूपाक्षःशिवःसूर्यःसुराचार्योविनायकः । पुंडरीकेक्षणोविष्णुःसहस्राक्षःसुराधिपइतिवक्ष्यमाणत्वादितिभावः । यआदित्येतिष्ठन्इत्यत्रनसूर्योमंडलस्थत्वेनोच्यतेइत्यत्रज्ञापकांतरमंतरंगमाह ॥ यमादित्यइति ॥ विष्ण्वादित्ययोरैक्यात्विष्णुरेवायंनादित्यइत्युक्तिःकथमित्यतआह ॥ भेदव्यपदेशादिति ॥ अंतरादित्येमनसाचरंतंदेवानांहृदयंब्रह्मान्वविंददित्यादिभेदव्यपदेशात्प्रसिद्धादित्यादन्यएवविष्णुरितिसूत्रार्थः । इतश्चनैक्यमित्याह ॥ वृत्रमित्यादिना ॥ हेइंद्रपरमेश्वर । भगवन् । शवसासुखेनानायासेन । वृत्रमहिंचयद्यस्मादवधीः आत्इत् अस्मादेवहेतोः । दृशेदर्शनायसूर्यंदिवि आरोहयइत्यत्र आ आरोहयइतिपदपाठः । सम्यङ्न्यदधाः । यद्येनसूर्यस्यदिव्यारोहणेनसूर्यस्यहरितःदिशःपतंतीःपुरःसतीःपुरोभागेवर्तमानानिर्दिष्टावाउपराउपरिभागेवर्तमानारुचःएतसेज्ञानाय । कः अकः अकरोः । अत्रकइत्येवपदपाठः । नकेवलंदिव्यारोहणेनप्रजानांज्ञानंलभ्यते । किंतुकर्मापीत्युच्यते ॥ सीदन्निति ॥ इंद्रस्यजठरेसीदन्वर्तमानःत्वंयतः

भा० । इत्युक्त्वातस्ययथाकप्यासंपुंडरीकमेवमक्षिणीइत्युक्तत्वान्नशिवादयः । शिवोहिविरूपाक्षः । प्रसिद्धश्चपुंडरीकाक्षइतिभगवान्नारायणः । यमादित्योनवेदेत्युक्तत्वान्नादित्यः । ॐभेदव्यपदेशाच्चान्यइतिभगवद्वचनं । वृत्रंयदिंद्रशवसावधीरहिमादित्सूर्यंदिव्यारोहयोदृशे । यत्सूर्यस्यहरितःपतंतीःपुरःसतीरुपराएतसेकः । सीदन्निंद्रस्यजठरेकनिक्रदन्नृभिर्यतःसूर्यमारोहयोदिवि । चंद्रमामनसोजातश्चक्षोःसूर्योअजायत ।

सूर्यदिव्यारोहयःअतोनृभिःकनिक्रदत्कमाण्यकारयः । हेजनासोजनाःयःसूर्यजजान यउषसंचजनयामास योपांनेता सइंद्रःपरमेश्वरोनारायणइत्यर्थः । यो जनानांप्रसवीताप्रसविता । अलंनवःअर्णवः । अरंअलंणंसुखंवंज्ञानंयस्यसइतिवा । सूर्यस्यकेतुराश्रयः । केतयतीतिकेतुर्ज्ञानप्रदोवा । उद्वेति उदेतिवै । येनभगवताआवृतंबहिर्व्याप्तंखंचदिवंमहींचादित्योयेनयत्प्रेरणयातेजसातपति । तपसंतापे । भ्राजसादीप्त्यातपतिप्रकाशयति । नन्वत्रयेनेतियच्छब्देनप्रकृतोविष्णुरितिकुतःइत्यतोवाक्यशेषमुदाहरति ॥ यमंतःसमुद्रइति ॥ यमंतःसमुद्रेकवयोज्ञानिनोप्यवयंतीषदेवजानंति । यस्मिंस्तदक्षरेपरमेपरमाक्षरेप्रजाआश्रिताइतिसमुद्रांतस्थत्वलिंगस्याक्षरश्रुतेश्चवाक्यशेषेसत्वाद्येनादित्यइत्यत्रापियच्छब्देनसएवोच्यतइतिभावः । विद्युद्वृष्टिश्चंद्रमाआदित्योग्निरित्येताःपंचदेवताः तंपरितअनुसृत्यतत्संकल्पानुसारेण । परिम्रियंतइत्यादौसर्वत्रसूर्यस्यद्युस्थत्वे स्वरुचाज्ञानकर्मप्रदत्वे उत्पत्तौ तापकत्वे प्रकाशकत्वे मरणेच पराधीनत्वावगतेश्चान्यएवतस्माद्विष्णुरित्यर्थः । सूर्यमंडलस्थत्वंनारायणस्यस्मृत्यापिसाधयति ॥ ध्येयइति ॥ यएषतपतीत्यत्रोक्तादित्यमंडलस्थत्वेप्रमाणमभिधाय तत्रस्थित्वातापकत्वेचप्रमाणमाह ॥

भा० । यःसूर्ययउषसंजजानयोअपांनेतासजनासइंद्रः । उद्वेतिप्रसवीताजनानांमहान्केतुरर्णवःसूर्यस्य । येनावृतंखंचदिवंमहींचयेनादित्यस्तपतितेजसाभ्राजसाच । यमंतःसमुद्रेकवयोवयंतियदक्षरेपरमेप्रजाः । तमेताःपंचदेवताःपरिम्रियंतेविद्युद्वृष्टिश्चंद्रमाआदित्योग्निरित्यादौसूर्यस्यसर्वत्रपराधीनत्वावगतेश्च । ध्येयःसदासवितृमंडलमध्यवर्तीनारायणःसरसिजासनसन्निविष्टः । केयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रइतिनारसिंहपुराणे ।

तापनीति ॥ यद्वायेनादित्यस्तपतितेजसाभ्राजसाचेत्युक्तेर्थेस्मृतिमप्याह ॥ तापनीति ॥ मामकंमदीयंमदधीनंच । ननुसूर्यइवयद्ययंपराधीनस्तदातपतीत्युक्तं । तापनादितस्मिन्नेवमुख्यमिति । सएवादित्यस्थोनविष्णुरित्यतआह ॥ नचेति ॥ कुत्रचिदुत्पत्त्यादिविषये । ननुतस्योत्पत्तिश्रुतिरेवान्याधीनत्वंवक्तीतिचेत् । अत्रवक्तव्यं । किंवसुदेवादौकृष्णाद्यात्मनोत्पत्तिवचनमन्याधीनत्वेप्रमाणं उतवासुदेवाद्यात्मनाआदिसर्गेउत्पत्तिवचनं उतमूलरूपनारायणस्यैव । आद्यंपक्षद्वयंनिराकरोति ॥ उत्पत्तिरिति ॥ उत्पत्तिः कृष्णाद्यात्मनोत्पत्तिवचनंप्रादुर्भावापेक्षया । प्रत्यक्षत्वंहरेर्जन्मेतिवचनाज्जनप्रत्यक्षगोचरत्वापेक्षया । वासुदेवादिरूपेणोत्पत्तिवचनंतुदीपादीपांतरवन्मूलरूपात्पूर्णस्यैवविश्लेषापेक्षयेत्यर्थः । तृतीयंदूषयति ॥ एकइति ॥ नारायणस्यमहाप्रलयेऽवस्थानश्रुतेरुत्पत्तिरेवनश्रुतिषूक्ता । किंचान्यनिषेधपूर्वंतस्यैवावस्थानोक्तेर्नब्रह्मादिभ्यःउत्पत्तिःसंभावनीयेत्यर्थः । कैमुत्येन विष्णोरन्याधीनत्वंनास्ति प्रत्युतसर्वस्यतदधीनत्वमित्याह ॥ यंकामयइति ॥ इत्यादीत्यविभक्तिकोनिर्देशः । इत्यादिनातस्याअपिभगवदधीनत्वमुक्तमितिशेषः । ममयोनिरित्यादेरयमर्थः । ममयोनिःकारणभूतःसमुद्रेतरप्सुवर्ततेनाराय

भा० । तापनीपाचिकाचैवशोषणीचप्रकाशनी । नैवराजन्नवेःशक्तिःशक्तिर्नारायणस्यहीतिपाद्मे । यदादित्यगतंतेजोजगद्भासयतेखिलं । यच्चंद्रमसियच्चाग्नौतत्तेजोविद्धिमामकमितिच । नचविष्णोरन्याधीनत्वंश्रुतिषूक्तंकुत्रचित् । उत्पत्तिस्तुप्रादुर्भावापेक्षया । एकोनारायणआसीन्नब्रह्मानचशंकरइतिमहाप्रलयेतस्यैवावस्थानश्रुतेः । यंकामयेतंतमुग्रंकृणोमितंब्रह्माणंतमृषिंतंसुमेधामित्यादिब्रह्मशिवादीनांदेव्यधीनपदप्राप्तिमुक्त्वातस्याअपिभगवदधीनत्वं । ममयोनिरप्स्वंतःसमुद्रे । ततोविष्ठेभुवनानिविश्वा । परोदिवापरएनापृथिव्येत्याह ।

णइत्यर्थः । ततोभगवत्प्रसादाद्विश्वाभुवनानिवितिष्ठेऽधितिष्ठामि । उतामूंद्यांचवर्ष्मणोपस्पृशामि । अमूंद्यामपिवर्ष्मणादेहेन बलेनवोपस्पृशामि । अहमेववातइवप्रवाम्यारभमाणाभुवनानिविश्वा । अहमेवविश्वाभुवनान्यारभमाणाकुर्वती वातइवप्रवामिव्याम्रोमि मत्कारणंपरमात्मादिवःपरःएनापृथिव्याअस्याःपृथिव्याश्चपरःश्रीभूनामकमद्रूपद्वयापेक्षयापरः । अहंतुमहिनाम हिम्नैतावतीकेवलंब्रह्मादिभ्यउत्तमत्वात्परिमितासंबभूवेत्यर्थस्तत्वप्रदीपोक्तोवगंतव्यः । प्रसिद्धद्यावापृथिवीपरत्वस्यरमायाअपि सत्वात् सृष्टिसंहारकत्वेनप्रसिद्धयोर्ब्रह्मरुद्रयोरपिसृष्टिसंहारकर्तृत्वादेव्याः नतदुत्तमस्यहरेरन्येभ्यःसृष्ट्यादीतिभावेनाह ॥ अहमिति ॥ अहंअशरवेहिंसकाय ब्रह्मद्विषेब्रह्मणःपंचममुखच्छेत्रे । ब्रह्मद्विषेब्रह्मद्विषांशरवेहिंसकायेतिवा रुद्रायहंतवाऽहं तुमेव नतुभीषयितुं । प्रलयेदुर्गारूपेणधनुरातनोमिविस्तारयामि । अहमस्यजगतःपितरंब्रह्माणं मूर्धन्मूर्धनिसकलजीवोत्तमत्वे नसुवे अजनयं । ममयोनिरप्स्वितिवाक्यशेषःपूर्वव्याख्यातः । विष्णोरेवसाक्षात्पदप्रापकत्वश्रवणाच्चनतस्यान्याधीनत्वमित्याह ॥ अस्येति ॥ भक्ताभीष्टसेचकस्यसमर्थस्यवा एषस्यआसमंतादिच्छारूपस्य इषुइच्छायामितिधातोः । सत्यकामस्येतियावत् । आसमंतादीशस्येतिवा । देवस्यद्योतनादिमतः । अस्यविष्णोर्हविर्भिःप्रभृथेप्रभरणेपूजनेकृतेसति वयाःवयबंधने अहंकाराभिमानित्वेनबंधकोरुद्रः । यद्वाकालाभिमानीरुद्रः । रुद्रियंमहित्वंरौद्रंपदंविदेहि विविदेलब्धवान्हि । हेअश्विनौयुवामपीरावद्वर्तिः

भा० । अहंरुद्रायधनुरातनोमिब्रह्मद्विषेशरवेहंतवाउ । अहंसुवेपितरमस्यमूर्धन्नितिब्रह्मरुद्रयोर्देव्याःसकाशात्सृष्टिसंहारौचोक्तौ । अस्यदेवस्यमीढुषोवयाविष्णोरेषस्यप्रभृथेहविर्भिः । विदेहिरुद्रोरुद्रियंमहित्वंयासिष्टंवर्तिरश्विनाविरावदित्यादिनाविष्णोःप्रसादादेवशिवादीनांपदप्राप्तिकथनाच्च ।

अन्नवद्वर्तनंसमस्तभोगवत्पदं यासिष्टंअयाशीष्टं लब्धवंतौस्थइत्यर्थः । यएषतपतिप्राणोवावेतिवाक्यं यएषसूर्यमंडलेस्थित्वातपतिसभगवान्नारायणइतिव्याख्यातं । तत्रप्राणशब्दस्यनारायणपरत्वंकुतइत्याशंक्यतस्यसर्वोत्तमत्वेनान्याधीनत्वाभावेप्राणशब्दवाच्यत्वेचप्रमाणमाह ॥ तमेताइति ॥ तंगोवत्सरूपंवायुमेतावक्ष्यमाणाअक्षितयःअक्षीणज्ञानमनसः सदाशिवपुरःसराःसप्तदेवाःउपतिष्ठंतेउपासते । अक्षन्नक्षणि तद्याः यास्तालोहिन्यइमाउपलभ्यमाना राजयोरेखास्ताभिरधिष्ठानभूताभिस्तत्रस्थइतियावत् । रुद्रएनमन्वायत्त उपास्ते । याअक्षन्नापस्ताभिःपर्जन्यः याकनीनिका तयादित्यः । यत्कृष्णंतेनाग्निः यच्छुक्लंतेनेंद्रोऽधरयैनंवर्तिन्यापृथिव्यन्वायत्त द्यौरुत्तरयेतिवाक्येन शिवादिसर्वदेवोपास्यतयोक्तस्यायंवावशिशुर्योयंमध्यमःप्राणइतिचमध्यमप्राणशब्दोक्तस्यवायोःप्राणःस्थूणेतिप्राणशब्दोक्तोनारायणआश्रयउक्तइत्यर्थः । उपसंहरति । तस्मादुक्तप्रमाणसमुदायादिति ॥ एकोनारायणइत्यादिनासर्वोत्तमः शाखांतरेआदित्यस्थस्यपुंडरीकाक्षत्वसमुद्रांतस्थत्वादिलिंगेनसवितृमंडलमध्यवर्ती नारायणइतिस्मृत्याचभगवान्नारायणः । प्राणःस्थूणेतिप्रयोगात्प्राणशब्दोदितः । यएषआदित्ये सवितृमंडलमध्यवर्तीत्यादिनादित्यमंडलस्थः । येनादित्यस्तपति । तापनीपाचिकाचैवेत्यादिनातापनपाचनादिकर्ता आदिशब्देनशिवादिर्नादित्यस्थइत्ये

भा० । तमेताःसप्ताक्षितयउपतिष्ठंतेतद्याइमाअक्षंल्लोहिन्योराजयस्ताभिरेनंरुद्रोन्वायत्तइत्यादिनाशिवादिसर्वदेवोपास्यस्यवायोरयंवावशिशुर्योयंमध्यमःप्राणइतिमध्यमप्राणशब्दोक्तस्यप्राणःस्थूणेतिप्राणशब्दोदितोनारायणआश्रयउक्तः । तस्मात्सर्वोत्तमोभगवान्नारायणःप्राणशब्दोदितआदित्यमंडलस्थस्तपतीत्यादिसिद्धं ।

तत्सिद्धमित्यर्थः । सर्वजीवानांतारतम्यमुक्त्वाविष्णोःसर्वाधिक्यकथनान्नतस्यान्याधीनत्वमितिभावेनाह ॥ क्षितिपाइति ॥ देवादेवगंधर्वाः । कर्मदेवाबल्याद्याः । तात्विकास्तत्वाभिमानिनोऽग्न्यादयः बलज्ञानसुखादिभिर्विष्णुभक्त्यादिभिर्विष्णुभक्तिरे वादिर्येषांतैर्वैराग्यशमदमादिभिरित्येवंसाध्यसाधनभूतैःसर्वैर्गुणैर्मुक्तौशतगुणाःक्रमाधिकाउक्ताइत्यन्वयः । अत्रज्ञानेशताधि क्यमौत्सर्गिकं । उमायावदनंतांशानित्युक्तरीत्याऽनंताधिक्यंचद्रष्टव्यं । तस्माद्वायोरमाकोटिगुणाधिका ॥ नभेदइति ॥ शे षशिवयोर्भेदोविशेषोनास्ति पदैक्यादितिभावः ॥ कामःशक्रसमइति ॥ प्रायःसमइतिभावः । प्रायइंद्रवत्कामइतिवचनात् । नित्यंप्रतिबिंबाइत्यन्वयः । तंयच्छतंवर्षाण्यभ्यार्चत्तस्माच्छतार्चिनइत्यसंगतं । प्रवेश्यस्यप्रवेष्टुरप्येकत्वेनबहुवचनायोगादित्यत आह ॥ सपुरुषेष्विति ॥ एवंचतमितिनजात्येकवचनं । प्रवेष्टुरेकत्वेपिबहुरूपत्वाद्बहुवचनमित्यर्थः । एतमेवेत्येतावतापूर्ण त्वात्संतमितिव्यर्थमित्यतोव्याचष्टे ॥ एतमेवेति ॥ संतमितिनस्वरूपसत्वमुच्यते येनवैयर्थ्यंकिंतुस्वतंत्रपुष्कलप्रवृत्तिनिमि

भा० । क्षितिपामनुष्यगंधर्वादेवाश्चपितरश्चिराः । आजानजाःकर्मदेवास्तात्विकादक्षएवच । शक्रश्चोमाचरुद्रश्चभारतीवायुरेवच । मु क्तावुक्ताःशतगुणबलज्ञानसुखादिभिः । विष्णुभक्त्यादिभिश्चैवगुणैःसर्वैःक्रमाधिकाः । तस्माद्रमाततोविष्णुरनंतगुणतोधिकः । नित्यमुक्तःस्वतं त्रश्चनचान्यस्तादृशःक्वचित् । कुतएवाधिकोन्यःस्याद्यन्मुक्ताअपितद्वशाः । रमापितद्वशानित्यंसनान्यस्यवशेप्रभुः । नभेदःशेषशिवयोःसुपर्णःशे षसंमितः । कामःशक्रसमोनित्यंप्रतिबिंबाश्चतेक्रमादितिचमहासंहितायां । सपुरुषेषुशतंवर्षगतइतिशतार्चिनामा । बहुरूपत्वाद्बहुवचनं । एतमेव तथासंतंमुख्यतआचक्षतेऋषींस्तूपचारतः ।

त्ताधिकरणतयासंतं मुख्यतआचक्षते । ऋषींस्तूपचारतःवचनवृत्तावेवन्यूनवृत्त्याचक्षतइत्यर्थः । सइदंसर्वमध्यतोदधेइत्यस्य र्थद्वयमाह ॥ आत्मनइति ॥ प्राणोवैगृत्सइत्यादिव्याचष्टे ॥ प्राणस्थइति ॥ सर्वेषांवामइत्यत्रवामपदार्थमाह ॥वामइति॥ भद्रःसुंदरः । वामंसौंदर्यभामंतेजइत्यन्यत्रोक्तत्वात् ॥ १ ॥ ७ ॥ एषउएवबिभ्रद्वाजः । उउच्च एषएवबिभ्रद्वाजोभरद्वाजः । तदुपपाद्यते ॥ प्रजाइति ॥ अयंवैनइति ॥ नियमनायांतर्वसतामुत्तमानांसर्वेषांनोऽयंवैवसिष्ठःवसतामुत्तमत्वप्रदइत्यर्थः । वसिनांनिवसतामतिशयितोवसिष्ठः । अतिशायनेइष्ठन्प्रत्ययविधानात् ॥ यदिदंसर्वमिति ॥ सयद्यस्माद्यदिदंकिंचवर्ततेत दिदंसर्वमभिप्रागात्प्राप्नोत् । प्रागायदितिवा । तस्मात्प्रगाथाइतियोज्यं । गाङ्गतौ गागानइतिधातोरुषिकुषिगार्तिभ्यस्थन्निति थन्प्रत्ययइतिभावः । अभ्यपवयत पावयामास । इदंप्रमाणप्रसिद्धंसन्निहितंवा । सर्वपूर्णवस्तुसन्नहंयच्चक्षुद्रंअल्पंप्राणिजातं ।

भा० । आत्मनउदरेधृतवान्मध्येस्थित्वाधृतवांश्च । प्राणस्थःप्राणनामासावपानेऽपाननामकः । नेतृत्वाच्चापनेतृत्वाद्भगवान्पुरुषोत्तमइ तिच । वामोभद्रः ॥ १ ॥ ७ ॥

उप० । एषउएवबिभ्रद्वाजः । प्रजावैवाजस्ताएषबिभर्तियद्बिभर्तितस्माद्भरद्वाजस्तस्माद्भरद्वाजइत्याचक्षतएतमेवसंतं । तंदेवाअब्रवन्नयंवै नःसर्वेषांवसिष्ठइतितंयदेवाअब्रुवन्नयंवैनःसर्वेषांवसिष्ठइतितस्माद्वसिष्ठस्तस्माद्वसिष्ठइत्याचक्षतएतमेवसंतं । सइदंसर्वमभिप्रागाद्यदिदंकिंचसय दिदंसर्वमभिप्रागाद्यदिदंकिंचतस्मात्प्रगाथास्तस्मात्प्रगाथाइत्याचक्षतएतमेवसंतं । सइदंसर्वमभ्यपवयतयदिदंकिंचसयदिदंसर्वमभ्यपवयतयदिदं किंचतस्मात्पावमान्यस्तस्मात्पावमान्यइत्याचक्षतएतमेवसंतं ।

यच्चमहत्प्राणिजातमिदमस्मिन्नसानिप्रविशामि । प्रविश्यचक्षुद्रमणुरूपोमहत् महारूपश्चासानिभवानीतिसोब्रवीत् । तस्मात्क्षु द्रोमहांश्चासानीत्युक्त्वात्तेरूपसंघाः । क्षुद्रसूक्तामहासूक्ताश्चनाम्नाऽभवन्निति योजना । तद्विष्णवाख्यंब्रह्मसूक्तंसूक्तानिसुष्ठुवच नान्यादिभागवतादीनिअवोचतकृतवत् । यद्वासूक्तानिसहस्रशीर्षेत्यादीन्यवोचतप्रथमंव्यक्तीचकारेतियत्तस्मात्तत्सूक्तंनाम्नाऽ भवत् । यद्वा तद्ब्रह्मतत्स्वात्मानंअवोचतेतियत्तस्मात्तत्सूक्तंसुष्ठूक्तं । बतेत्यास्वादने असामर्थ्यात्स्वस्यसम्यग्वक्तान्योनास्तिस्व स्यवक्तास्वयमेवाहोपरिपूर्णपरंब्रह्मेति । इतियस्मात्स्वात्मनैवसुष्ठूक्तंतस्मात्सूक्तनामकमभवत् । तस्मात्सूक्तमित्याचक्षतइतियो ज्यं । पुनरुक्तिस्तस्मादेवेत्यवधारणायेतिज्ञेयं । एषवाऋगृङ्नामेतिप्रतिज्ञा । कुतःएषह्येभ्यःसर्वेभ्योभूतेभ्यःप्राणिभ्योर्चत । मरणकालेगच्छति । हि प्रसिद्धं । सयदेभ्यःसर्वेभ्योभूतेभ्योऽर्चततस्मादृगृङ्नामा । तस्मादृगित्याचक्षतइत्यर्थः । एवमुत्त रत्र । अर्धेभ्यःस्थानेभ्यःशरीरेभ्यः । पादि अपादि पदुगतौ पुनःशरीरसंप्राप्तौप्रविवेश । प्रवेशस्यसर्वसाधारणत्वादसाधार ण्यद्योतनायसर्वाणिभूतानीत्युक्त मेवंपूर्वमपिद्रष्टव्यं । अधिकंक्षरतिदिशतीत्यक्षरं । दानस्याधिक्यंचबहुविषयत्वेनेतिभावेनै

उप० । सोब्रवीदहमिदंसर्वमसानियच्चक्षुद्रंयच्चमहदितितेक्षुद्रसूक्ताश्चाभवन्महासूक्ताश्चतस्मात्क्षुद्रसूक्तास्तस्मात्क्षुद्रसूक्ताइत्याचक्षतएतमे वसंतं सूक्तंबतावोचतेतितत्सूक्तमभवत्तस्मात्सूक्तंतस्मात्सूक्तमित्याचक्षतएतमेवसंतं एषवाऋगेषह्येभ्यःसर्वेभ्योभूतेभ्योर्चतसयदेभ्यःसर्वेभ्यो भूतेभ्योर्चततस्मादृक्तस्मादृगित्याचक्षतएतमेवसंत मेषवाअर्धर्चएषह्येभ्यःसर्वेभ्योर्धेभ्योर्चतसयदेभ्यःसर्वेभ्योर्धेभ्योर्चततस्मादर्धर्चस्तस्मादर्ध र्चइत्याचक्षतएतमेवसंतं एषवैपदमेषहीमानिसर्वाणिभूतानिपादिसयदिमानिसर्वाणिभूतानिपादितस्मात्पदंतस्मात्पदमित्याचक्षतएतमेवसंतं ॥ ४० ॥

षह्येभ्यःसर्वेभ्योभूतेभ्यःक्षरतीतिक्षरणंविशेषितं । प्रकारांतरेणनिरुच्यते ॥ नचैनमिति ॥ एनंभगवंतमतिक्रम्यनक्षरंति अ स्मादधिकंकेपिनददति यदतिक्रम्यनक्षरंति तदक्षरमितिभावः । नकेवलंऋषिवेदनामान्येवभगवद्वाचकानि । किंतुदेवतापर त्वेनप्रसिद्धास्ताएताःसर्वाऋचःसर्वेवेदाःसर्वेघोषाःएकैवव्याहृतिः । एकमेकप्रकारमेवव्याहरणंनाम किंविषयकमिदंनाम प्राणे भगवद्विषयएव । ऋचस्तुविशेषतःप्राणेविषयएवेतिविद्यादिति । नःसर्वेषांमतेऽयंवसिष्ठस्तेनैकीभूतइत्यन्यथाप्रतीतेर्व्याचष्टे ॥ वसिष्ठइति ॥ अतिशयार्थेइष्ठन्प्रत्ययइतिभावः । तथाचदेवानांदेवत्वप्रदोदेवइतिवद्वसतामुत्तमानांदेवानांनःवसतामुत्तमः वसतामुत्तमत्वप्रदइत्यर्थइत्युक्तंभवति । अभ्यपवयतेत्यस्यवायुरूपेणवातीत्यन्यथाप्रतीतेर्व्याचष्टे ॥ पावयामासेति ॥ पूञ् पवनइतिधातोरितिभावः । सूक्तंबतावोचतेतितत्सूक्तमभवदित्यत्रसइतिप्रकृतोविष्णुस्तत्सूक्तमित्यवोचततदुच्यमानंशब्दतत्वं सूक्तनामकमभवदित्यन्यथाप्रतीतेर्व्याचष्टे ॥ तद्विष्णवाख्यमिति ॥ सूक्तानिसुष्ठुवचनानिआदिभागवतादीनि अपौरुषेयसू क्तानीतिवा एतेनसुष्ठूक्तानिवचनानियेनेतिव्युत्पत्तिर्दर्शिताभवति । खेदार्थप्रतीतेर्बतेत्येतद्व्याचष्टे ॥ बतेति ॥ अहो अनंता वेदाः पौरुषेयाणिचानेनप्रतिक्षणमुद्गीर्यंतइत्यास्वादनइत्यर्थः । वैकुंठस्याखिलावेदाउद्गीर्यंतेऽनिशंयतइतिवचनात् । प्रकारांतरे

उप० । एषवाअक्षरमेषह्येभ्यःसर्वेभ्योभूतेभ्यःक्षरतिनचैनमतिक्षरंतिसयदेभ्यःसर्वेभ्योभूतेभ्यःक्षरतिनचैनमतिक्षरंतितस्मादक्षरंतस्माद क्षरमित्याचक्षतएतमेवसंतं तावाएताःसर्वाऋचःसर्वेवेदाःसर्वेघोषाएकैवव्याहृतिःप्राणएवप्राणऋचइत्येववविद्यात् ॥ २ ॥

भा० । वसिष्ठोवसतामुत्तमः । अभ्यपवयतपावयामाससंसारात् । तद्विष्णवाख्यंब्रह्मसूक्तान्यवोचतेतिसूक्तनामकमभवत् । बतेत्यास्वादने ।

णसूक्तंबतावोचतेत्यस्यार्थमाह ॥ स्वात्मनैवेति ॥ मूलार्थस्तुप्रागुक्तः । अस्मिन्पक्षेआस्वादनप्रकारोप्युक्तः । यच्चक्षुद्रंयच्चमहदिदंसर्वंजगदहंभवानीत्यन्यथाप्रतीतेर्व्याचष्टे ॥ इदमिति ॥ सर्वसन्निहितंप्रमाणप्रमितंवा सर्वंपूर्णंवस्तुसन्नप्यहमिदमस्मिन्नल्पप्राणिषुमहाप्राणिषुचप्रविश्येत्यनेनयच्चक्षुद्रंयच्चमहत्इदमस्मिन्नसानिभवानिप्रविशामीत्यर्थउक्तोभवति । प्रविश्यचसूक्ष्मरूपोमहारूपश्चेत्यनेनक्षुद्रंमहच्चासानीत्यस्यार्थांतरमुक्तंभवति । तेक्षुद्रसूक्ताश्चाभवन्महासूक्ताश्चतस्मादित्येतद्व्याचष्टे ॥तस्मादिति॥ क्षुद्रमसानीत्येतत्सूक्ष्मरूपोभवानीतिव्याख्यातं । तत्कुतः । क्षुद्रशब्दस्यसामर्थ्याल्पत्वमेवार्थःकिंनस्यादित्याशंक्यतथात्वे सर्वंपूर्णःसन्नहं क्षुद्रःसामर्थ्येनाल्पोभवानीतिव्याहतंस्यादितिभावेनाह ॥ सूक्ष्मरूपत्वादेवेति ॥ सूक्तनामसमन्वयानंतरंतद्विशेषक्षुद्रसूक्तमहासूक्तनामसमन्वयोवाच्यः । सामान्यज्ञानपूर्वकत्वाद्विशेषज्ञानस्येतिभावेनभाष्येसूक्तंबतावोचतेतिप्रथमंव्याख्यायसोब्रवीदहमिदंसर्वमसानीत्यादिपश्चाद्व्याख्यातं । एषवाऋगित्यत्रसर्वेभ्योभूतेभ्यआकाशादिभ्यइत्यन्यथाप्रतीतेर्व्याचष्टे ॥ एभ्यइति ॥ ननुप्राणिभ्यःकथंगमनमित्यतआह ॥ गच्छतिहीति ॥ तत्रैषहीति हिशब्दसूचितंप्रमाणमाह ॥ ब्रह्मणेति ॥

भा० । स्वात्मनैवस्वयंसुष्ठूक्तमितिवा । इदंसर्वंपरिपूर्णंसन्नहमल्पप्राणिषुप्रविश्यसूक्ष्मरूपोमहाप्राणिषुमहारूपश्चासानीतिसभगवानब्रवीत् । तस्मात्क्षुद्रोसानीत्युक्तत्वात्क्षुद्रसूक्तास्तेक्षुद्रप्राणिषुस्थिताभगवद्रूपसंघाः । महानसानीत्युक्तत्वान्महासूक्तामहाप्राणिषुस्थिताः । सूक्ष्मरूपत्वादेवक्षुद्रनामभगवतः । नतुसामर्थ्याल्पत्वात् । नहिसामर्थ्यादिगुणेषुकश्चिद्विशेषोभगवद्रूपेषु । एभ्यःप्राणिभ्योगतवानित्यृक् । गच्छतिहिमरणकाले । ब्रह्मणासंपरित्यक्तोमृतइत्युच्यतेबुधैरितिहिभारते ।

ननुद्वासुपर्णासयुजासखायेतिश्रुतेःकथंजीवस्यब्रह्मपरित्यागइत्यतआह ॥ म्रियमाणमिति ॥ प्रतिमरणंविष्ण्वादीनांभागतोगमनेकालक्रमेणसर्वस्यापिगमनंकिमित्यतआह ॥ गतैरिति ॥ भोग्यलोकंमानुषलोकंस्वर्गलोकंच । पुनःशरीरसंप्राप्तौतमेवानुविशंतिचेतिग्रंथांतरोक्तेर्भोग्यलोकशब्देनमानुषदेहएवविवक्षितइतिचेन्न । स्वर्गभोग्यस्यस्वप्नतुल्यत्वायोगात् । तस्यापितत्रोपलक्षणीयत्वात् । म्रियमाणस्यभागतोदेवतात्यागइत्यत्रज्ञापकमाह ॥ तस्मादिति ॥ वासुदेवादीनांभागतोगमनादेवांतरामध्येमरणानंतरंभोग्यलोकपर्यंतंस्वप्नवत्स्वप्नावस्थायामिवभोगइत्यर्थः । तिर्यक्त्वेनरकेचस्वप्नवदस्पष्टतयादर्शनेपिदुःखातिशयउपपद्यतएवेतिज्ञेयं । गतैर्भागैरपिपुनर्विशेयुरित्यनेनैषवैपदमित्याद्यपिव्याख्यातंभवति । ऋक्शब्दप्रकृतिऋधातोर्व्याख्यानस्थार्चतेश्चैकार्थ्यसिद्धयेतद्व्याख्यानंपठति ॥ अर्चेति ॥ सर्वेभ्योर्धेभ्योभागेभ्यइत्यन्यथाप्रतीतेर्व्याचष्टे ॥ सर्वेभ्यइति ॥ सह्वाय । स्थःपितुरर्धमेयायेत्यादावर्धशब्दस्यस्थानेप्रयोगादितिभावः । यदिप्राणिनएवस्थानानितर्हिभूतेभ्यइत्यनेनपौनरुक्त्यमित्यतउक्तंशरीरेभ्यइति । तेषांजीवाश्रयत्वाच्चस्थानशब्दवाच्यत्वमितिभावः । तथाचप्राग्जीवेभ्योभागतोगमनमृक्शब्दप्रवृत्तिनिमित्ततयोक्तं । अत्रतुशरीरेभ्योगमनमर्धर्चशब्दप्रवृत्तिनिमित्ततयोच्यतइत्यपौनरुक्त्यं । एषह्येभ्यःसर्वेभ्योभूतेभ्यःक्षरतीत्यनेनलब्ध

भा० । म्रियमाणमिमंजीवंवासुदेवादिदेवताः । त्यक्त्वाभागेनगच्छंतिभागतोनुव्रजंतितं । गतैर्भागैरपिपुनर्विशेयुर्भोगसिद्धये । भोग्यलोकमनुप्राप्तंतस्मात्स्वप्नवदंतरेतिच । अर्चगतिपूजनयोःऋगताविति धातोः । सर्वेभ्योर्धेभ्यःस्थानेभ्यःशरीरेभ्योगतवानित्यर्धर्चः । सर्वाणिभूतान्यपादि । पदगतौ । तस्मात्पदंनाम ।

मक्षरशब्दनिर्वचनंदर्शयति ॥ अधिकमिति ॥ सर्वेभ्योभूतेभ्यःक्षरणंबहुविषयत्वादधिकंक्षरणमितिभावः । क्षरणपदस्यार्थं ज्ञापकंचाह ॥ क्षरणमिति ॥ तावाएताइतिवाशब्दोप्यर्थः । किम्वितिकैमुत्यद्योतकश्च । ऋचोपिकिम्वितिसंबध्यतइतिभावे नव्याचष्टे ॥ एवमिति ॥ यदैवमुक्तप्रकारेणऋषिषुशब्देषुसूक्तादिषुव्यवह्रियमाणानिसर्वाणिनामानिविष्णोरेव तदादेवताना मान्यपिविष्णोरितिकिम्वितियोजना । ऋक्शब्देनतद्गतदेवतानामानिगृह्यंते । सर्वेवेदाइतिऋचामपिप्राप्तत्वात्प्राणऋचइतिवि शिष्यऋचांभगवत्परत्वस्यवक्ष्यमाणत्वाच्चेतिभावः । कैमुत्यबीजमाह ॥ योदेवानामिति ॥ यदैवंविष्णुपरत्वेनातिप्रसि द्धिशून्यानिऋष्यादिनामानिभगवत्पराणि तदाइत्यादिबहुश्रुतिभ्योभगवत्परतयाऽवगतानिदेवतानामानिभगवत्पराणीतिकि मुवाच्यमितिकैमुत्यमितिभावः । सर्वेवेदाइत्यतःपरंचाप्यर्थः । किम्वित्यर्थकश्च वाशब्दोयोज्यइतिभावेनतत्समुच्चयपूर्वमाह ॥ नकेवलमिति ॥ नकेवलंऋष्यादिनामभगवतः किंतुसर्वेवेदाअपितस्यैवनामइत्येतत्किमुवक्तव्यमित्यर्थः । अग्निमीळइत्यादौ अग्न्यादिनाम्नांइंद्रंकुत्सइत्यादौकुत्सादिनाम्नांऋचांत्वइत्यादौऋगादिनाम्नांभगवत्परत्वेसंसर्गबोधकवाक्यसमुदायरूपवेदचतुष्ट

भा० । अधिकंक्षरतीत्यक्षरं । क्षरणंनामसंततदानं । क्षरविनाशसंततदानयोरितिधातोः । एवमृषिषुशब्देषुचव्यवह्रियमाणानिसर्वाणि नामानिविष्णोरेवमुख्यतःकिमुदेवतानामानि । योदेवानांनामधाएकएवतंसंप्रश्नंभुवनायंत्यन्या । इंद्रंमित्रंवरुणमग्निमाहुरथोदिव्यःससुपर्णोगरु त्मान् । यमिंद्रमाहुर्वरुणंयमाहुर्यंमित्रमाहुर्यमुसत्यमाहुः । नामानिसर्वाणियमाविशंतितंवैविष्णुंपरममुदाहरंतीत्यादिश्रुतिभ्यः । नकेवलमृष्यादी नांनामभगवतःसर्वेवेदाअपितस्यैवनामानिकिमुत

यस्यभगवत्परत्वंसुलभमितिभावः । सर्वेघोषाइत्यतःपरंचाप्यर्थकस्यकिम्वर्थकस्यवाशब्दस्यसंबंधंमत्वाव्याचष्टे ॥ वेदाःसमुद्र मेघेत्यादि ॥ किम्वित्येतद्देहलीदीपन्यायेनास्मिन्नपिवाक्येसंबध्यते । तस्यसर्वेघोषाअपितस्यैवनामानीत्यतःपरंसंबंधः । वेदाइत्य तःपरंतस्यैवनामेत्यनुवर्तमानस्यसंबंधस्तथाचयदैवंवेदास्तस्यैवनामानितदासमुद्रमेघवृक्षपतनभेरीताडनदधिमथनगोधादिघोषा अपितस्यैवनामानीतिकिम्वितियोजना । यदाश्रुतिलिंगादिभिरन्यत्रप्रसिद्धानांवेदानांभगवत्परत्वंतदाकिमुवाच्यमन्यत्रप्र सिद्धिरहिताघोषाइति । वेदानामन्यत्रप्रसिद्धित्याजनस्यभगवत्प्रसिद्धिसंपादनस्यचकार्यत्वात् । घोषेषुभगवत्परत्वस्यैवकल्प्य त्वादितिभावः । यद्वायदासमुद्रादिघोषाःध्वन्यात्मकाअपिवक्ष्यमाणप्रकारेणतस्यनामान्येवयथायोग्यंयोजनीयानितदाकिमुस र्वेवेदाअपीतियोजना । इत्यादयःसर्वघोषाइतिवक्ष्यमाणत्वात् । ऋगादयःसर्वेभूरित्येकैवव्याहृतिरितिऋगादीनांव्याहृत्यैक्यप्र तीतेर्व्याचष्टे ॥ एकमेवेति ॥ व्याहरणंचनाभिलपनमेकत्वंचनैक्यमितिभावेनस्वपदंविवृणोति ॥ एकप्रकारमिति ॥ नाम्ना मेकप्रकारत्वंकिंस्वप्रतिपाद्यवस्तूनामभेदेनेत्यतआह ॥ निर्दोषेति ॥ प्राणएवमुख्यवायुरेवेत्यन्यथाप्रतीतेःसप्तमीविभक्तिरियं भगवत्परेत्याह ॥ प्राणेनारायणइति ॥ सप्तम्याअनेकार्थत्वाद्विवक्षितमर्थमाह ॥ नारायणविषयएवेति ॥ विषयसप्तमी त्वेज्ञापकमाह ॥ व्यवहारइति ॥ नामेत्यर्थः । शब्दस्यसविषयत्वादितिभावः । सर्वाऋचइत्युक्तत्वेनपुनःप्राणऋचइतिकिम

भा० । वेदाः समुद्रमेघवृक्षपतनभेरीताडनादिसर्वघोषाअपितस्यैवनामानियथायोग्यंयोजनीयानि । एकमेवव्याहरणं । एकप्रकारमे वनाम । निर्दोषगुणपूर्तिवाचकत्वादेकप्रकारता । प्राणेनारायणएव । नारायणविषयएवव्यवहारः ।

र्थमित्यतआह ॥ ऋचस्त्विति ॥ यदुक्तंसमुद्रमेघघोषादीनांभगवन्नामत्वंतदयुक्तं । तेषाध्वन्यात्मकत्वेनवाचकत्वायोगादित्या शंकांप्रमाणेनपरिहरन्यथायोग्यंयोजनाप्रकारंलेशेनाह ॥ उक्तंचेति ॥ अब्धिःस्वघोषव्यंग्येनहुंकारेणसहतमुच्चरन्निति यावत् । विष्णोःसर्वाभिभवशक्ततांवक्ति । कथं । यतोहुंकारःपरेषामभिभवसंपादकशक्तिवाचकः । अतएवशक्ताःस्वेषांपराभवशक्तिरस्ती तिज्ञापयितुंहुंकुर्वतीतिभावः । एतेनवाचकवर्णव्यंजकत्वेनसमुद्रादिघोषाणामुपचाराद्वाचकत्वोक्तिरित्युक्तंभवति । ननुनदीस मुद्रघोषाश्चनादत्वाच्छ्रैष्ठ्यवाचकाइतिकर्मनिर्णये समुद्रघोषस्यनादव्यंजकत्वेनश्रैष्ठ्यवाचकत्वमुक्तमतोविरोधइतिचेन्न । ग्रंथ द्वयानुसारेणहुंकारनादोभयव्यंजकत्वोपपत्तेः । यद्वानदीघोषविवक्षयानादत्वादित्युक्तं । समुद्रघोषविवक्षयाहुंकारत्वाच्चेतिच शब्दार्थोबोध्यः । मेघेषुसंस्थितोवायुःबलवन्नादसंयुक्तः । नादोनामवर्णोमंत्रशास्त्रेप्रसिद्धः । तत्संयुक्तस्तत्समुच्चरन्तद्व्यंजकध्व निंकुर्वन्ॐमितिस्वरतेमेघध्वनिव्यंग्योंकारंसमुच्चरतिइत्यर्थः । ॐकारस्याधिकोच्चत्वमर्थउद्दिष्टः बलीनादश्चोक्तार्थाधिक्यमे वप्रवदति । अनुदात्तस्वरूपत्वात् अनुदात्तव्यंजकत्वात् । ईशितुः सर्वेष्टदानशक्तस्य । स्वरितात्मकाः स्वरितस्वरव्यंजकाः ।

भा० । ऋचस्तुविशेषतइंद्रादिनामवतोविष्णोर्गुणानल्पज्ञानामपिप्रकाशयंतीतिप्राणेनारायणएवेतिविद्यात् । उक्तंचबृहत्संहितायां । हुं कारेणसहैवाब्धिःसर्वाभिभवशक्ततां । विष्णोर्वक्तियतोहुंचपराभिभववाचकः । ओमितिस्वरतेनित्यंवायुर्मेघेषुसंस्थितः । बलवन्नादसंयुक्तोह्यधि कोच्चत्वमस्यतु । ॐकारस्यार्थउद्दिष्टउक्तार्थाधिक्यमेवच । नादोबलीप्रवदतितथाभेरीध्वनिःप्रभोः । अनुदात्तस्वरूपत्वादौदार्यवदतीशितुः । तद पेक्षयान्यनीचत्वंघंटाद्याःस्वरितात्मकाः ।

उच्चस्थितिं उच्चतयोत्तमत्वेनावस्थानं । स्वर्णचुंचुरपभ्रष्टयानागसरःतत्प्रभृतीनांस्वरव्यंग्यः । श्वासादिप्रचयात्मकः । श्वासा दीनांप्रचय उपर्युपरितीव्रसंयोगंविहायप्रशिथिलतयासंयोगःसमस्थितिस्तदात्मकस्तद्व्यंग्योमंद्रस्वरोपिविष्णोःकेनाप्यचाल्यांसदै कप्रकारतांवदतीत्यर्थः । इत्यादयइत्यादिपदेनदधिमंथनवृक्षपतनादिघोषागृह्यंते । तेचांतर्नादव्यंजकत्वेनयदाविष्णोर्भीषकत्वा दिगुणोन्नतिंवदंति । तदावेदाद्याः वेदाः पौरुषेयग्रंथा मार्जारादयभिधाश्चवाक्यपदसमन्वयेनविष्णोर्गुणोन्नतिंवदंतीतिकिमुवा च्यमित्यर्थः । यद्वा सर्वेवेदाअपितस्यैवनामकिमुसमुद्रघोषेत्यादिस्ववचनानुसारेणयदावेदाद्यामार्जारादयभिधाश्चान्यत्रप्रसिद्धा विष्णोरेवगुणोन्नतिंवदंति तदाकिम्वित्यादयःसर्वेघोषाअन्यत्रप्रसिद्धिरहिताविष्णोर्गुणोन्नतिंवदंतीतिवक्तव्यमितियोज्यं । एवं सत्युपनिषदिसर्वेवेदाःसर्वेघोषाःइतिपाठक्रमोप्यनुसृतोभवति । ध्वन्यात्मकत्वेनावाचकानामपिघोषाणांवाचकवर्णादिव्यंजक त्वेनोपचरितंवाचकत्वमित्येतच्चकर्मनिर्णये तट्टीकायांचव्यक्तं । तथाचतद्वाक्यं । गर्गरगोधापिंगादीनांघोषाअपिनादमात्रव्यं जकत्वेनभगवद्वाचकाएवेत्याह ॥ अवस्वरतीत्यादिना ॥ दध्नोमंथनघोषश्चाप्यंतर्नादस्वरूपतः । भीषकत्वंहरेर्ब्रूयादंतर्नादो हिभीषणे । नदीसमुद्रघोषाश्चनादत्वाच्छ्रैष्ठ्यवाचकाः इत्यादि टीकावाक्यानिच । ननुवर्णाएववाचकाःनघोषाः । तेतुवर्णव्यं

भा० । उच्चस्थितिमुदात्तस्तुस्वर्णचंच्वादिकःस्वरः । विष्णोर्वक्तितथामंद्रःश्वासादिःप्रचयात्मकः । एकप्रकारतांविष्णोःसदाचाल्यांवदत्य पि । इत्यादयःसर्वघोषाविष्णोरेवगुणोन्नतिं । वदंतिकिमुवेदाद्यामार्जारादयभिधास्तथा । मारयित्वाप्रभक्ष्यैवजरयत्यखिलंजगत् । तेनमार्जारउ द्दिष्टोमोषणान्मूषकोहरिः ।

जकाएवतत्कथमुच्यतेघोषाएववाचकाइति । नचमंतव्यं वाचकवर्णव्यंजकत्वेनोपचारादियमुक्तिरिति । गर्गरादिघोषाणामका रादिव्यंजकत्वस्याप्यभावादित्यतउक्तं ॥ नादेति ॥ नादोनामवर्णोमंत्रशास्त्रेप्रसिद्धः । अंतर्नादोपिनादस्यैवविशेषः । तत्स्व रूपत्वात्तद्व्यंजकत्वान्नादव्यंजकत्वादिति । मारयतिजरयतिचेतिमार्जारः । मारणमात्रेणकथंजारणमित्यतःप्रभक्ष्येतितात्पर्य मुक्तं । मोषणात्स्तैन्यात् भक्तानांपापहरणादितियावत् । वलनात्संवरणात् । वलसंवरणइतिधातोः । तारणात्संसारात् । न नुकिंसर्वाभेदेनसर्वनामत्वमित्यतआह ॥ सर्वनामेति ॥ सर्वनामापिब्रह्मादिभ्यःसदाव्यतिरिक्तइत्यन्वयः । तत्रश्रीव्यतिरि क्तत्वेनंतत्वंहेतुः । तस्यास्त्रिविधानंत्याभावात् । जीवेभ्योव्यतिरिक्तत्वे सदाभिव्यक्तसांद्रानंदैकस्वरूपत्वंच । जडव्यतिरि क्तत्वे सर्वज्ञत्वंच । उक्तगुणसाधनायसर्वशक्तिरिति । भगवतएवसर्वनामवत्त्वेकर्मदेवतादिलोकव्यवहारलोपःस्यादित्यतआह ॥ तस्यैवेति ॥ एषनारायणोदेवोवायुनासहेमंलोकमभ्यार्चदितिव्याख्यानघटनायैषइममित्यारभ्यतावाएताइत्यंतं वायावपि योजयति ॥ तथैवेति ॥ तर्हिनारायणएवेत्यवधारणंकथमित्यतआह ॥ नतावदिति ॥ मुख्यवृत्त्यपेक्षयावधारणमितिभावः । ननुप्राणेतावतीमुख्यवृत्तिर्नचेत्प्राणेवायावेवविषयेऋगाद्याइत्यवधारणंकथमित्यतआह ॥ मुख्यतइति ॥ अन्यव्यपेक्षयामारु

भा० । वर्षणाद्वर्षउद्दिष्टोबलनाद्बल्लिनामकः । तारणात्तृणनामासावित्याद्येकोभिधीयते । सर्वनामापिभगवान्सर्वशक्तिश्चसर्ववित् । ब्रह्म रुद्रादिजीवेभ्योजडेभ्यःश्रियएवतु । व्यतिरिक्तःसदानंतसांद्रानंदैकरूपकः । तस्यैवमुख्यनामानिसमाकृष्येतरेष्वपि । उपचारात्प्रवर्तंतेव्यवहार प्रसिद्धये । तथैवसर्वनामानिप्रवर्तंतेचमारुते । नतावन्मुख्यवृत्त्यैवमुख्यतोन्यव्यपेक्षया । मुख्यतःसर्वनामातुविष्णुरेकोनचापरः ।

तेमुख्यतःसर्वनामानिप्रवर्तंतइत्यर्थः । तदपेक्षयावायावेवेत्यवधारणमितिभावः । ननुयएषतपतिप्राणोवावतदभ्यार्चदित्येतद्व्या ख्यावसरेप्राणःस्थूणेतिप्रयोगदर्शनेनप्राणशब्दस्यनारायणपरत्वंनिर्धारितं । सर्वेषामपिशब्दानांमुख्यतोभगवत्परत्वंचप्रमापि तं । सूत्रितंचप्राणस्तथानुगमादिति । तत्कथमेतत्प्रकरणस्थंसर्वशब्दांतर्गतंप्राणनामवायुपरंस्यादित्यतआह ॥ मुख्यतइति ॥ यद्यपिमुख्यतःसर्वनामाविष्णुर्नापरःतस्मात्प्राणादिशब्दाश्चविष्णावेवमुख्यतइतिहिप्रसिद्धं । तथाप्यन्यव्यपेक्षयाप्राणादिशब्दा नांवायावपिमुख्यवृत्तिर्विधीयतेस्तीत्युच्यतइत्यर्थः । ननुप्राणशब्दस्यवायुपरत्वमत्रनसंभवति । यएषतपतीतिप्राणस्यसूर्यमं डलेस्थित्वातापकत्वोक्तेर्विष्णोरेवादित्यमंडलेतापकत्वस्यनिर्धारितत्वादित्यतआह ॥ वायुश्चेति ॥ आज्ञयैव नतुस्वातंत्र्येण । वायोःशक्त्यासूर्योपितपतिकिमुवायुः । स्वातंत्र्येणसूर्यस्थत्वादिकंप्राक्साधितमितिभावः । विष्णुवाय्वोःशक्त्यासूर्यस्यतापकत्वं नस्वयंतापनशक्तिरित्यत्रज्ञापकमाह ॥ नेति ॥ नप्रसिद्धसूर्यस्येयंमुख्यातापनशक्तिरितिज्ञापयितुं यएषतपति सएषप्राणइति प्रसिद्धमित्युक्तमित्यर्थः । सूर्यस्यप्राणाधीनत्वेश्रुत्यंतरंचपठति ॥ प्राणादिति ॥ ननुप्राणाद्वेतिप्राणपदेनविष्णुरेवकिंनस्यादि त्यतआह ॥ प्राणशब्दश्चेति ॥ यद्वाएषइममित्यादिकंवायोरपिसर्वनामत्वपरमिति तथैवसर्वनामानिप्रवर्तंतेचमारुतइतिप्रमा

भा० । तस्मात्प्राणादिशब्दाश्चविष्णावेवहिमुख्यतः । अन्यव्यपेक्षयावायौमुख्यवृत्तिर्विधीयते । वायुश्चसूर्यसंस्थःसंस्तपत्येतज्जगत्रयं । आज्ञयैवहरेर्वायोःशक्त्यासूर्यस्तपत्ययमित्यादिच । नप्रसिद्धसूर्यस्येयंतापनशक्तिरितिज्ञापयितुंप्राणोह्येषयएषतपतीत्युक्तं । प्राणाद्वाएषउदेतिप्राणे स्तमेतीतिचश्रुतिः ।

णेनव्याख्यातं । तत्रतावाएताइत्युपसंहारवाक्यमपिज्ञापकं । तत्रत्यप्राणशब्दस्यवायावपिवृत्तेरितिभावेनाह ॥ प्राणशब्दश्चेति ॥ यतइत्यादौयोज्यं । प्राणशब्दस्योभयपरत्वेप्रमाणमुदाहरति ॥ प्राणस्येति ॥ तत्रापिविष्णौमुख्यत्वंज्ञापकोक्त्यानिर्धारयति ॥ अयंवावेति ॥ यद्वा प्राणस्यप्राणइत्यत्रप्राणस्यप्राणताप्रदइत्यर्थः । तत्रोत्तमःप्राणोविष्णुरितिकुतइत्यतआह ॥ अयंवावेति ॥ मध्यमःप्राणइत्युक्त्याप्राणत्रयंप्रतीतं । तत्प्रमाणेनविविच्यदर्शयति ॥ द्वाविति ॥ देवेषुमध्येद्वावात्मशब्दवाच्यौ । द्वौप्राणशब्दवाच्यौ । द्वौचेतनशब्दवाच्यौ । कौतौ । वायुर्नारायणश्चतौ । कुतः । यतोऽज्ञानाभिभवास्पृष्टौ । अज्ञानास्पर्शाच्चेतनोत्तमेषुदेवेष्वपिमुख्यचेतनत्वं । अभिभवशून्यत्वादात्मपदोदितमुख्यस्वामित्वं । अज्ञानाभिभवाभ्यामस्पृष्टत्वादेवमुख्यतःप्राणत्वं प्रकर्षेणनियामकत्वं । मुख्यत्वंचनिर्धारणाल्लभ्यतइतिज्ञेयं । तदन्येतेसर्वेदेवाःयस्मादज्ञानाभिभवस्पृष्टास्तस्मादधमाश्चेतनाः अधमाःप्राणाः अधमाआत्मानःश्रुता इतियोजना । तर्हिवायुनारायणयोःसाम्यमित्यतआह ॥ मध्यमइति ॥ मध्यमो मध्यमःप्राणो मध्यमश्चेतनो मध्यमआत्मा । एवमुत्तमइत्यत्रापि । ततश्चकिमित्यतआह ॥ सर्वेति ॥ तस्मा

भा० । प्राणशब्दश्चमुख्यतोविष्णौप्रवर्तमानोपिवायावपिवर्तते । अतःसर्ववेदाद्यभिधेयत्ववायोरप्यस्ति । प्राणस्यप्राणइतिश्रुतेरुभयोरपि प्राणशब्दःप्रसिद्धएव । अयंवावशिशुर्योयंमध्यमःप्राणइतिवायोर्विशेषणादुत्तमःप्राणोविष्णुरितिचसिद्धं । द्वावात्मानौहिदेवेषुद्वौप्राणौद्वौचचेतनौ । अज्ञानाभिभवास्पृष्टौवायुर्नारायणश्चतौ । तदन्येचेतनाःसर्वेप्राणाश्चात्मानएवच । अज्ञानाभिभवस्पृष्टास्तस्मात्तेह्यधमाःश्रताः । मध्यमोवायरेवैकउत्तमःकेवलोहरिः । सर्वशब्दोदितौतस्मादेतौद्वावेवनापरः ।

त्सर्वस्वामित्वात्सर्वनियामकत्वाच्चचेतनाचेतनपरसर्वशब्दोदितौतदधीनत्वादर्थवदितिसूत्रात् परमचेतनत्वाच्चेतनवाचिसर्वशब्दोदितावित्यर्थः । यद्वातस्मात्प्राणशब्दवाच्यत्वादित्यर्थः । प्राणशब्दस्यतदुभयपरत्वेतावाएताइतिवाक्येनसर्वशब्दवाच्यत्वसिद्धेरितिभावः । तर्ह्यन्येषामनभिधेयत्वंस्यादित्यतआह ॥ अन्येचैवेति ॥ तर्हिश्रियोपिमितशब्दवाच्यत्वंप्राप्तमतआह ॥ श्रीरिति ॥ विष्णुवदखिलवेदोक्तातोविष्णुग्रहणेनसापिगृहीतेतिभावः । एतेनसरस्वत्यपिवायुवदितिसिद्धं । तर्हितयोःसाम्यमित्यतआह ॥ विष्णुवन्नतुमुख्यतइति ॥ संख्यातोर्थतश्चविष्णुवन्नतुमुख्यतोखिलवेदोक्ता नारायणादिशब्दवाच्यत्वस्याभावात् । तद्वत्प्रवृत्तिनिमित्तपौष्कल्याभावेनलक्ष्म्यादिशब्दमुख्यार्थत्वाभावाच्चेति । नन्वेवंयदि श्रीवाय्वोरनंतशब्दवाच्यत्वंतर्हिग्रंथांतरेमितशब्दवाच्यत्वोक्तिःकथमित्यतआह ॥ तस्मादिति ॥ तौश्रीवायूअमितनामानावपितस्मादेवविष्णुवदखिलनाममुख्यार्थत्वाभावादेवमितनामवत् मितनामभिर्देवैःतुल्यंग्रंथांतरेउच्यते । तेनतुल्यंक्रियाचेद्वतिरितिसूत्रात् । विष्णुस्तुमुख्योक्ते र्निःशेषैःशब्दैःमुख्यतयोक्तेरमिताभिधइत्यर्थः । एषइमंलोकमभ्यार्चदित्यारभ्यतावाएताइत्यंतोक्तस्यसर्वशब्दसमन्वयस्यप्रकृतोपयोगंप्रमाणशेषेणाह ॥ अनंतेति ॥ तथाचैतद्ब्रह्मैतत्सत्यमित्युपक्रमोक्तं निर्दोषगुणपूर्णत्वंयुक्तमितिमूलाभिप्रायइतिभावः ॥ २ ॥ विश्वामित्रं० ननुसमन्वयमुखेनगुणपूर्णत्वमुपपाद्योपसंहृतं । किमधुना

भा० । अन्येचैवमितैःशब्दैरुच्यंतेनामितैःकचित् । श्रीरप्यखिलशब्दोक्ताविष्णुवन्नतुमुख्यतः । तस्मादमितनामानावपितौमितनामवत् । श्रीश्चवायुश्चविष्णुस्तुमुख्योक्तेरमिताभिधः । अनंतनामकत्वाच्चसोनंतगुणईरितः । पृथङ्नामानियस्मात्तद्गुणानेवप्रचक्षतइत्यादित्रह्मांडे ॥ २ ॥

ऽसंगताख्यायिकोच्यतइत्यतःसंगतिमाह ॥ अन्यदेवतेति ॥ प्राणऋचइत्येवविद्यादित्यत्रान्यदेवताविषयत्वेनप्रतीयमानाअपिसर्वाऋचोभगवद्विषयाएवमुख्यतस्तदनंतरंवायुविषयाश्चेति यत्सर्वासामृचांभगवद्विषयत्वंप्राणविषयत्वंचोक्तं तदर्शयति । युक्त्योपपादयतिविश्वामित्रंह्येतदहरित्यादिनेत्यन्वयः । कयायुक्त्यादर्शयतितदित्यतउक्तं ॥ तस्मादिति ॥ यस्माद्भगवद्वायुविषयास्तस्मादेवान्यदेवताविषयत्वेनप्रतीयमानमपिसर्वंबृहतीसहस्रंमुख्यतोनारायणस्यतदाज्ञयावायोश्चान्नंतर्पकमन्यथातन्नस्यात् । अन्यविषयस्यान्यतर्पकत्वायोगादितियुक्त्यादर्शयतीत्यर्थः । तर्पकत्वमसिद्धंकथंहेतूकृतमित्यतउक्तं । तस्मात्तच्छंसनेनेति ॥ तस्मादन्नं तस्मादेवतच्छंसनेनभगवान्वायुश्चातिप्रीयेतेअन्यथातन्नस्यादितियुक्त्यातर्पकत्वंचदर्शयतीत्यर्थः । यद्वायस्मात्तच्छंसनेनतौप्रतीयेतेतस्मान्नारायणस्यवायोश्चतदन्नंयस्मादन्नंतस्मादन्यदेवताविषयत्वेनप्रतीयमानाअपिऋचोमुख्यतोभगवद्विषयास्तदनंतरंवायुविषयाश्चेतिदर्शयतीतियोज्यं । अथवा । तावाएताःसर्वाऋचइत्यत्रसर्ववेदादिप्रतिपाद्यत्वमुक्तं । तत्रकैमुत्ययुक्तिपरत्वेनाख्यायिकोच्यतइत्यवतारयति ॥ अन्यदेवतेति ॥ वायुविषयाश्चेत्यनंतरंतदाकिंवाच्यंसर्ववेदादयोभगवद्विषयाइतीतिशेषः । तत्तच्छ्रुतिलिंगबलादन्यदेवताविषयत्वेनप्रतीयमानाअप्यृचोबृहतीसहस्रांतर्गताभगवद्विषयाएवमुख्यतःतदनंतरंवायुविषयाश्च । तदाकिमुवक्तव्यं सर्ववेदादयोभगवद्विषयाइतीतिदर्शयतीतियोजना । बृहतीसहस्रांतर्गतानामन्यदेवताविष

भा० । अन्यदेवताविषयत्वेनप्रतीयमानाअप्यृचोभगवद्विषयाएवमुख्यतः । तदनंतरंवायुविषयाश्च । तस्माद्बृहतीसहस्रंसर्वंमुख्यतोनारायणस्यान्नंतदाज्ञयावायोश्च । तस्मात्तच्छंसनेनभगवान्वायुश्चातिप्रीयेतेइतिदर्शयतिविश्वामित्रंह्येतदहःशंसिष्यंतमित्यादिना ।

यतयाप्रतीयमानानामृचांभगवत्परत्वेयुक्तिमाह ॥ तस्माद्बृहतीसहस्रमिति ॥ पूर्ववद्व्याख्येयं ॥ ७ ॥ खंडार्थः ॥ ७ ॥ यत्तदेतंमहाव्रतेकर्मणिनियुक्तं । अहार्यत्वादपरिहार्यत्वादवश्यंमहाव्रतेउच्चारणीयत्वादहर्नामकं । यद्वासुत्याहःसूच्चार्यत्वादहर्नामकं बृहतीसहस्रंशंसिष्यंतं प्रतिपाद्यविष्णुवायुदेवतानुस्मरणपूर्वंशंसितुंइच्छंतं विश्वामित्रंप्रतितदाभिमुख्येन । तंप्रतिवक्तुंवा । सविष्णुर्वायुश्चेंद्रेउपनिषसादाविष्टोभूत् । अथताभ्यामाविष्टःसइंद्रःविश्वामित्रंउपनिषसाद । शंसेत्यादरोपसत्तिपूर्वंनिषण्णउपविष्टोभूत् । सविश्वामित्रस्तवेदंस्तोष्यमाणंबृहतीसहस्रमन्नंभोग्यंतर्पकंखलुभूयादित्यभिव्याहृत्य प्रीत्याशासनावचनमुक्त्वाभिसम्यग्यज्ञांगत्वेनभक्तिपूर्वंशशंस । तेनशंसनेनेंद्रस्यप्रियं । धामोप प्रियस्यधाम्नोलोकस्यसमीपं तत्प्राप्तौसमीपसाधनंप्रसादमेयायप्राप । तत्कथमित्यतस्तद्वचनादित्युच्यते ॥ तमिंद्रइति ॥ हेऋषेत्वंमेप्रियंधामोपागाइत्युवाचेतिसंबंधः । अन्यच्चोवाचेत्युच्यते ॥ सइति ॥ ऋषेलोकप्रापकप्रसादंप्राप्तवान्सत्वंद्वितीयवारंशंसेतिचोवाचेत्यन्वयः । अत्रप्रियंधामपुरं । तृतीयवारं प्रियंधामांतःपुरं । हेऋषेत्वंमेप्रियंधामोप मदन्तःपुरप्राप्तिसाधनप्रसादमगाः । वरमभीष्टंपुनरपिददानीतींद्रउवाच । सएवंप्रलो

उप० । विश्वामित्रंह्येतदहःशंसिष्यंतमिंद्रउपनिषससादसहान्नमित्यभिव्याहृत्यबृहतीसहस्रंशशंसतेनेंद्रस्यप्रियंधामोपेयाय तमिंद्रउवाचऋषेप्रियंवैमेधामोपागाःसवाऋषेद्वितीयंशंसेति सहान्नमित्येवाभिव्याहृत्यबृहतीसहस्रंशशंसतेनेंद्रस्यप्रियंधामोपेयायतमिंद्रउवाचऋषेप्रियंवैमेधामोपागाःसवाऋषेतृतीयंशंसेतिसहान्नमित्येवाभिव्याहृत्यबृहतीसहस्रंशशंस । तेनेंद्रस्यप्रियंधामोपेयायतमिंद्रउवाचऋषेप्रियंवैमेधामोपागावरंतेददामीतिसहोवाचत्वामेवजानीयामिति

भितोपिविश्वामित्रःवरांतरमपृष्ट्वेंद्राविष्टंत्वामेव कोयं विष्णुश्चेत्कीदृशइतिजानीयामतोब्रूहीत्युवाचापृच्छत् । तंप्रतींद्रःकीदृशः इतिप्रश्नस्यतावदुत्तरमुवाचकिमिति ॥ ऋषेइंद्राविष्टोहमहेयत्वादहंनामा प्रकृष्टानंदरूपत्वात्प्राणनामा असनाच्छत्रूणांनिरस नान्मिनुतेःसर्वस्यज्ञातृत्वाज्ज्ञानरूपत्वाज्ज्ञापनाद्वास्मिनामा प्रत्यक्प्राणनामैव त्वयिस्थस्ततत्वाद्वेत्तृत्वाच्चत्वमितिनामा प्रत्यक् पराक्वर्तमानःप्राणनामैवंपरोक्षंसर्वभूतेषुस्थितःसर्वाणि सर्वगुणपूर्णत्वात्सर्वस्वामित्वाद्बहुरूपत्वाच्चसर्वाणीतिनामवान् देशतः कालतोगुणतश्चसर्वरूपेषुप्रभूतत्वात्पूर्णत्वाद्बहुरूपत्वाच्चभूतानीतिनामवान् प्राणनामाभगवानेवसन्निहितवस्तुषुस्थितएषइतिना मवान् आसमंतादीशत्वात्सर्वैश्वर्यस्वरूपत्वादितियावत् । यएषपरमैश्वर्ययुक्तःसएवसूर्यसंस्थःसन्लोकंतपति । अनीश्वरस्यत दयोगादितिभावः । ससूर्यांतर्गतएवाहमेतेनरश्म्यंतर्गतेनविष्ण्वाख्येनरूपेणसर्वादिशोविष्टोस्मि । अतःस्वस्यसर्वलोकतापक त्वंयुक्तं । एतेनसर्वत्रप्रवेशनाद्विष्णुनामाचेत्यप्युक्तंभवति । एवंपरमात्मनःसर्वनामकत्वमुक्त्वातत्रयुक्तिरुच्यते ॥ तस्येति ॥ तस्यसर्वनामवतोमेन्नमन्नाभिमानिनीश्रीरन्नंभोग्यंतर्पकंकुतः मित्रमतिप्रियं । तत्रज्ञापकंदक्षिणमिति ॥ दक्षणाभागेइनःपति र्यस्यतद्दक्षिणं । अतिप्रियत्वाभावेस्वार्धशरीरतयातस्याःस्थापनानुपपत्तेरितिभावः । अन्नाभिमानिनीश्रीरित्युक्तं । किंतदन्नमि त्यतउच्यते ॥ तदिति ॥ तच्छ्रियाभिमतमन्नंविश्वामित्रेणसंपादितत्वाद्वैश्वामित्रंबृहतीसहस्रमित्यर्थः । तथाचविष्ण्वादिसर्व

उप० । तमिंद्रउवाचप्राणोवाअहमस्म्यृषेप्राणस्त्वंप्राणस्सर्वाणिभूतानिप्राणोह्येषयएषतपतिसएतेनरूपेणसर्वादिशोविष्टोस्मितस्यमेन्नंमित्रंद क्षिणंतद्वैश्वामित्रमेषतपन्नेवास्मीतिहोवाच ॥ ३ ॥

नामवाच्यत्वादेवभगवतस्तद्व्याख्यानरूपंबृहतीसहस्रंभगवदंतरंगरमाभिमतंसत्तर्पकंजातमन्यथातन्नस्यादितिभावः । एतेनस हान्नमित्यभिव्याहृत्येत्येतदपिविवृतंभवति । इंद्राविष्टःकोयमितिप्रश्नस्योत्तरमुच्यते ॥ एषइति ॥ एषइंद्राविष्टोहमादित्यमं डलेस्थित्वातपन्विष्णुरस्मीतिस्वरूपप्रश्नस्योत्तरमुवाचेत्यर्थः । हेत्यादित्यमंडलस्थस्यनारायणत्वं विश्वामित्रस्यप्रसिद्धमितिसूच यति ॥ ३ ॥ अत्रविश्वामित्रस्यबृहतीसहस्रशंसनलिंगेनहोतृत्वमवगम्यते । अयंहोताचेत्केन्येऋत्विजः तच्छंसनंचमहाव्रते स र्वेपृष्टाम्पूर्यामे विश्वजित्यतिरात्रेचप्रसक्तमतस्तेषामत्रप्रकृतंकर्मकिमित्यतश्चतत्सर्वंविविच्याह ॥ वृत्रमित्यादिना ॥ तदन्ये ऋ ष्यादयः । अन्ये उक्तेभ्योन्ये उपऋत्विजइत्यर्थः । विश्वामित्रंह्येतदहःशंसिष्यंतमिंद्रउपनिषससादेत्यत्र एतदहःशंसिष्यंतमि तिपदतात्पर्यमाह ॥ बृहतीसहस्रमिति ॥ इंद्रउपनिषससादेतिसप्तम्यंतंपदमित्यभिप्रेत्यनिषससादेत्यत्र । नि । सः । ससा देति । पदविभागमभिप्रेत्यसइतिकर्तृपदंव्याचष्टे ॥ वायुनेति ॥ सइंद्रउपनिषसादेतिप्रथमांतंपदमभिप्रेत्यव्याचष्टे ॥ आवि ष्टइति ॥ उपनिषसादेत्यत्रोपेत्युपसर्गतात्पर्यमाह ॥ शंसेत्युक्त्वेति ॥ शंसेत्यादरपूर्वंनिषदनमेवोपनिषदनमितिभावः । स हान्नमित्यभिव्याहृत्येत्यस्यार्थः ॥ इदमन्नमिति ॥ इदमन्नंतवेत्यथेत्यन्वयः । इदंतवान्नमितिवचनानंतरमित्यर्थः । इतिवचन

भा० । वृत्रंहत्वापुरेंद्रस्तुमहेंद्रत्वाभिपत्तये । महाव्रतंकर्मचक्रेहौत्रंचक्रेत्रकौशिकः । भृगुरध्वर्युरभवद्ब्रह्मात्रह्माभवत्स्वयं । उद्गातावायुर भवत्स्वयंनारायणःप्रभुः । सादस्यमकरोत्तत्रतदन्येन्येपिचर्त्विजः । बृहतीसहस्रंशंसिष्यन्यदासस्मारकेशवं । वायुनासहदेवेशस्तदावासवमावि शत् । आविष्टोविष्णुनार्थेंद्रोवायुनासहकौशिकं । शंसेत्युक्त्वानिषण्णोभूदिदमन्नंतवेतिसः ।

मुक्त्वेतियावत् । अभिशशंसेत्यप्यन्वयमभिप्रेत्यतस्यार्थद्वयमुक्तं ॥ यज्ञागत्वेनभक्तितइति ॥ तेनेंद्रस्यप्रियंधामोपेयायेत्य स्यतात्पर्यमाह ॥ तच्छुत्वेति ॥ सवाक्ऋषेद्वितीयंशंसेत्येतद्व्याचष्टे ॥ द्वितीयवारमिति ॥ प्रीत्यैव बृहतीसहस्रेविश्वामित्रेच । सवाक्ऋषेतृतीयमित्येतद्व्याचष्टे ॥ अतिप्रियत्वादिति ॥ बृहतीसहस्रस्येतिशेषः । तृतीयवारंशंसेत्याहेत्यन्वयः । सहान्नमित्ये वाभिव्याहृत्येत्यस्यार्थः ॥ विष्णोरिति ॥ प्रकल्प्य वचनेन । वरंतेददामीत्यस्यतमिंद्रउवाचेत्यनेनान्वयमाह ॥ ततोतितु ष्टइति ॥ उत्तममित्यतःपरमितिशब्दोध्याहार्यः । प्रियंधामोपेयायेतित्रिवारंश्रुतधामशब्दार्थविवेचयति ॥ सप्रथमेत्विति ॥ अत्रसालोक्यादिशब्देनतत्साधनप्रसादोलक्ष्यते । सामीप्यंपुरवासलक्षणं । पुनरेवचसामीप्यमंतःपुरवासलक्षणं । सहोवाचेत्ये तद्व्याचष्टे ॥ इतीति ॥ विश्वामित्रस्यापरोक्षज्ञानित्वात्त्वामेवजानीयामितिज्ञानप्रार्थनमयुक्तं । सालोक्यादिरूपमोक्षस्यप्राप्त त्वादनर्थकंचेत्यतोव्याचष्टे ॥ सम्यगिति ॥ तमिंद्रउवाचेत्यस्यार्थस्तंप्राहेति ॥ ननुत्वामेवसम्यग्जानीयामितिप्रश्नेप्राणस्त्व मित्यादिनाविश्वामित्रादीनांप्राणाभेदोक्तिरसंगतास्यादित्यतः प्राणोवाहमस्मीत्यादिकंस्वप्रभृतीनांनाभेदपरं किंतुस्वस्यसर्वनाम

भा० । ऋक्सहस्रंशशंसाथयज्ञांगत्वेनभक्तितः । तच्छ्रुत्वातुष्टिमगमत्केशवोवायुसंयुतः । द्वितीयवारंशंसेतिप्राहतंचजनार्दनः । प्रीत्यैवश क्रमाविष्टोविश्वामित्रःशशंसतत् । अतिप्रियत्वाद्भगवान्पुनरप्याहकौशिकं । तृतीयंचशशंसासौविष्णोरन्नंप्रकल्प्यतु । ततोतितुष्टोभगवान्ददामि वरमित्यमुं । ऊचेसप्रथमेत्वेवनिजसालोक्यमीश्वरः । प्रादाद्वितीयेसामीप्यंतृतीयेपुनरेवच । वरंददामीत्युक्तःसमुनिःप्राहजनार्दनं । सम्यक्त्वा मेवजानीयामितिमोक्षेसुखोचतां । इच्छंस्तंप्राहभगवानिंद्रस्थोवायुसंयुतः ।

वत्त्वपरं । तथाज्ञानस्यैवसग्यज्ज्ञानत्वादितिभावेनोपदेष्टुर्भावमाह ॥ सर्वेति ॥ अहमेकएवसर्वनामास्मीतिममसर्वनामवत्त्वेन यज्ज्ञानंतदुत्तमंविश्वामित्रेणप्रार्थितंविशेषज्ञानमितिभावेनभगवांस्तंप्राहेत्यन्वयः । तदुपपादयति ॥ यस्मादिति ॥ यस्मात्तुमु ख्यतःसर्वनामवत्त्वएवतत्प्रवृत्तिनिमित्तसर्वगुणत्वंस्यात्तस्मा दितिज्ञानमुत्तममित्यन्वयः । ननुदुःखिबद्धावरादिनामवत्त्वेदोषाः स्युस्तदभावेसर्वनामत्वभंगइत्यतआह ॥ नहीति ॥ कर्हिचित्कान्यपिनामानिविष्णोर्दोषाभिधायीनिनभवंति । हि प्रसिद्धं । कुतःकर्हिचित्कुत्रापिरूपेविष्णोरदोषत्वाद्दोषाभावाद्योग्यताविरहादितिभावः । नकेवलंनामानिदोषाभिधायीनिनभवंति । किं तुसामान्यवचांस्यपिगुणदोषोदासीनधर्ममात्रप्रतिपादकान्यपिनभवंति । यद्वासाधारणगुणवाचीन्यपिनेत्यर्थः । तदुपपादनं सर्वोत्तमेति ॥ तर्हींश्वरेप्रयुक्तानांदुःख्यादिशब्दानांभावचेतनवस्त्वादिशब्दानांचप्रवृत्तिनिमित्तानर्पकत्वेनकेवलंसांकेतिकत्वं स्यादित्यतआह ॥ सर्वोत्तमगुणानेवेति ॥ सर्वोत्तमगुणात्मत्वादित्यनुवर्तते । योग्यतासद्भावादितियावत् । दुःख्यादिशब्द प्रवृत्तिनिमित्तानांनिरनिष्टोनिरवद्यइत्यादिश्रुत्याजीवेष्विवतत्राभावेप्यन्यगतदुःखादिकंप्रतिस्वतंत्रत्वात्स्वातंत्र्यस्यशब्दप्रवृत्तौमु ख्यकारणत्वात्तदधीनत्वादर्थवदितिन्यायेनदुःख्यादिशब्दानांतत्परत्वं भावादिशब्दानामप्यसाधारण्यव्यपदेशन्यायेनस्वातं त्र्येणभवति । सर्वंचेतयतेसर्वत्रवस्तइत्यादिरूपेणसर्वोत्तमगुणप्रतिपादकत्वमितिभावः । ननुत्वांजानीयामित्यस्यसम्यक्त्वामेव

भा० । सर्वनामाहमस्म्येकइतिज्ञानंममोत्तमं । यस्मात्सर्वगुणत्वंस्यात्सर्वनामत्वएवतु । नहिदोषाभिधायीनिविष्णोर्नामानिकर्हिचित् । अदोषत्वान्महाविष्णोर्नेसामान्यवचांस्यपि । सर्वोत्तमगुणात्मत्वात्सदानारायणस्यहि । सर्वोत्तमगुणानेवनामान्याचक्षतेहरेः ।

जानीयामित्यर्थोनयुक्तः । स्वयोग्ययावज्ज्ञानाभावेसालोक्यादिमोक्षानुपपत्तेरित्याशंकांपरिहरन्विशेषज्ञानार्थंप्रार्थनेनामकथनमयुक्तमितिशंकांपरिहरन्नुक्तंविवृणोति ॥ यावदिति ॥ प्राणनामतथान्याअभिधाश्चाहेत्युपपन्नमितिशेषः । प्राणपदंत्रिरावृत्तमेकमेवनामेतिद्योतनायप्राणनामेत्युक्तं । पूर्णानंदत्वस्यविशिष्यसर्वैरपिस्मर्तव्यत्वात्प्राधान्यविवक्षयापृथगुक्तमतएवोपनिषद्भ्यासइतिज्ञेयं । प्राणोवाअहमित्यादिव्याचष्टे ॥ प्रकृष्टेत्यादिना ॥ प्रकृष्टोणआनंदःप्रणः प्रणएवप्राणः प्रज्ञएवप्राज्ञइतियथा । यद्वाप्रकृष्टः आपूर्णोणआनंदःप्राणइतिव्याख्येयं । सर्वाणीत्यत्रसर्वप्रातिपदिकार्थमाह ॥ पूर्णत्वादिति ॥ बहुवचनस्यार्थः सर्वाणीति ॥ विशिष्टस्यार्थः सर्वरूपेषुपूर्तितइति ॥ सर्वाणीतियोज्यं । प्रभूतत्वात्पूर्णत्वाद्भूबहाविति धातोः । नित्याविर्भूतगुणत्वाद्वा । भवतेराविर्भावार्थत्वात् । प्रकर्षेणस्वातंत्र्येणसत्त्वाद्वाभूतनामा यतोबहुरूपोतःसभूतानीतिबहुवचनेनोक्तः । सर्वरूपेषुप्रभूतत्वाद्भूतानीतिविशिष्टशब्देनोक्तइतियोजना । सनातनइत्यनेनसर्वदासत्त्वाच्चभूतनामेतिव्याख्यातंभवति । आसमंतादीशएषइत्यभिप्रेत्योक्तं ॥ सर्वैश्वर्येति ॥ सर्वैश्वर्योपपादकंयएषतपतीत्येतद्व्याचष्टे ॥ सएवेति ॥ यएषसर्वेश्व

भा० । यावज्ज्ञानेनमोक्षःस्यात्तावज्ज्ञात्वापिकौशिकः । अधिकज्ञानलब्ध्यर्थंमोक्षेधिकसुखाप्तये । जानीयांत्वामितिप्राहतस्माआहसकेशवः । इंद्राविष्टःप्राणनामतथान्याश्चाभिधाःप्रभुः । प्रकृष्टानंदरूपत्वात्प्राणइत्यभिधीयते । अहेयत्वादहंनामास्म्यसनान्मनुतेरपि । ततोवेत्तीतिचत्वंसपूर्णत्वात्सर्वनामकः । सर्वाणिबहुरूपत्वात्सर्वरूपेषुपूर्तितः । प्रभूतत्वाद्भूतनामासर्वरूपप्रभूततः । बहुरूपःसभूतानीत्युक्तोविष्णुःसनातनः । सर्वैश्वर्यस्वरूपत्वादेषइत्यभिधीयते । सएवसूर्यसंस्थःसंश्लोकंतपतिकेशवः ।

रःसएवेतियोज्यं । सर्वनामत्वेयुक्तित्वेनतस्यमेन्नमित्येतद्व्याकुर्वन्तस्येतिपरामृष्टमाह ॥ सर्वेति ॥ अन्नंप्रसिद्धमित्यन्यथाप्रतीतेर्व्याचष्टे ॥ श्रीरेवान्नंनतुप्रसिद्धमिति ॥ तत्रहेतुःसाक्षान्मुख्यतइति । अन्नशब्दस्यतत्रमुख्यत्वादितिभावः । तदुपपादकमन्नाभिमानीति ॥ तथाचसमाकर्षन्यायेनाभिमानिनिशब्दोमुख्यइतिभावः । श्रीशब्दस्यभारत्यादौप्रयोगात्तद्वारणायप्रमदोत्तमासाक्षाच्छ्रीरिति ॥ नन्वन्यासामप्यन्नाभिमानित्वादुक्तन्यायेनतासामपिप्राप्तिरित्यतउक्तं ॥ साक्षान्मुख्यततोऽन्नाभिमानिनीति ॥ तथाचमुख्येसंभवन्यायेननान्यासामत्रपरिग्रहइतिभावः । केनप्रवृत्तिनिमित्तेनसान्नमित्युच्यतइत्यतउक्तं ॥ भोग्यत्वात्सान्नमित्युच्यतइति ॥ सर्ववाअत्तीतितददितेरदितित्वमितिश्रुतेः सर्वंतस्यभोग्यंश्रियःकोविशेषइत्यतउक्तं ॥ सक्षादिति ॥ मुख्यतोभोग्यत्वादित्यर्थः । तत्रमित्रत्वंहेतुरित्याह ॥ भोग्यत्वान्मित्रमेवचेति ॥ भोग्यत्वादेवमित्रंचोच्यते । अन्यथातन्नस्यादतिप्रियस्यैवभोगसाधनत्वादितिभावः । ममदक्षिणंदक्षभागस्थितंइत्यन्यथाप्रतीतेर्व्याचष्टे ॥ दक्षेति ॥ कोयमिनइत्यतउक्तं । तस्याइति ॥ अर्धनारीरूपेषुदक्षभागस्थितइत्यर्थः । नन्वर्धनारीरूपेषुकुत्रचित्कदाचिद्वामभागेभगवतोवस्थानेतद्विवक्षयान्नंमेदक्षिणंदक्षभागस्थितमित्यर्थःसंभवत्येवेतिकिमर्थंदक्षेइनोयस्येतिविग्रहाश्रयणं आश्रयणेवादक्षेणमितिस्यान्नतु

भा० । सर्वनामवतस्तस्यममान्नंमित्रमुच्यते । अन्नाभिमानिनीसाक्षाच्छ्रीरेवप्रमदोत्तमा । सान्नमित्युच्यतेविष्णोर्भोग्यत्वान्मित्रमेवच । दक्षभागस्थितेनत्वाद्दक्षिणंनामसोच्यते । तस्याइनोहिविष्णुःसदक्षभागेस्थितःसदा ।

दक्षिणमित्यतउक्तं ॥ सदेति ॥ नियमेनसर्वदाचेत्यर्थः । एतद्विशेषसूचनायैवदक्षइनइतिस्थितेगुणेभवितव्येअकारलोपेनद
क्षिणमित्येवरूपंप्राप्तमितिभावः । ननुवाय्वादीनामपिस्वभार्याभिरेकीभावस्यवक्ष्यमाणत्वेनभारत्यादीनामपिदक्षभागस्थितेन
त्वात्किंविशिष्योच्यतेश्रीर्दक्षिणेतीत्यतोवोक्तं ॥ सदेति ॥ भारत्यादीनांदक्षिणत्वंनसार्वकालिकमतोविशिष्योच्यतइतिभावः।
ननुचश्रीरपिसदानदक्षिणामहाभारततात्पर्यनिर्णये यदातुसामेवामार्धरूपादक्षिणानामधेया । तदाप्यस्याउत्तमोहमित्युक्त्वा
दितिचेन्न । भावानवबोधात् । अत्रहिदक्षिणारूपाणामविच्छिन्नप्रवाहरूपेणसदासत्वमभिप्रेतंनतुएकैकरूपस्यैवसदादक्षिणात्वे
नावस्थानं येनविरोधःस्यादिति । तद्वैश्वामित्रमित्यत्रतत्प्रकृतंश्रीतत्वमित्यन्यथाप्रतीतेर्व्याचष्टे ॥ यस्येति ॥ तत्तदभिमतमि
तिपरामृष्टमन्नंचनप्रसिद्धान्नमितिभावेनाह ॥ तदिति ॥ तस्यवैश्वामित्रत्वंचनतत्कृतत्वं अपौरुषेयत्वा न्नापितत्प्रतिपादकत्वं
विष्णुपरत्वादित्यतउक्तं ॥ विश्वामित्रेणेति ॥ यएषतपतीतिसूर्यांतस्थतयातापकत्वैश्वर्यस्योक्तत्वादेषतपन्नेवेतिपुनरुक्तमि
त्यतआह ॥ इंद्रेति ॥ नन्विंद्राविष्टंसिद्धवत्कृत्यसम्यक्त्वामेवजानीयामितिमोक्षेसुखातिशयार्थविशेषज्ञानस्यप्रार्थितत्वात्को
यमितिशंकानवकाशः । तथाचापृष्टोत्तरत्वंस्यादित्यतआह ॥ त्वामिति ॥ हियस्मादभिप्रायद्वयमस्तितस्मादस्याभिप्रायद्वयं

भा० । यस्याभिमानिन्यन्नस्यलक्ष्मीःसादेवतोत्तमा । वैश्वामित्रंतदन्नंतुऋक्सहस्रात्मकंमतं । विश्वामित्रेणदृष्टत्वाद्वैश्वामित्रंतदीर्यते । इं
द्राविष्टःकोयमितिशंकांपरिहरन्हरिः । आदित्यसंस्थितोविष्णुस्तपन्नस्मीतिचोचिवान् । त्वांजानीयामितिप्रश्नंविश्वामित्रस्यकुर्वतः । अभिप्रायद्वयं
ह्यस्तिशक्राविष्टोनचापरः । हरेरितितुमेतर्कस्तेजोबाहुल्यतोजनि । तस्यतर्कस्यसत्यत्वंज्ञातव्यंप्रथमंमया ।

ज्ञात्वैवसर्वशंकांपरिहरतीतिहरिशब्दवाच्यःसनातनोविष्णुः । यद्वासनातनोनित्यः कालतः ततः विष्णुरंतर्बहिश्चव्यापको
हरिरभिप्रायद्वयस्यापिपरिहारंददावित्यन्वयः । अभिप्रायमस्यैवेत्युक्तमभिप्रायंविशिनष्टि ॥ शक्राविष्टइत्यादिना ॥ तेजो
बाहुल्यतःतेजोबाहुल्याख्येनलिंगेनशक्राविष्टोहरेरपरोनैवेतिमेतर्कोनुमितिरजनि । तस्यतर्कस्यसत्यत्वंप्रामाण्यंसंवादेनज्ञातव्यं ।
प्रमाणसंवादस्यदार्ढ्यहेतुत्वादितिप्रथममभिप्रायं यदिविष्णुःस्यात्प्रमाणसंप्लवेनविष्णुत्वव्यवस्थास्यात्तदाविशेषतोज्ञातव्यइति
द्वितीयमभिप्रायंचज्ञात्वेत्यन्वयः । केनकस्यपरिहारइत्यतआह ॥ प्राणइति ॥ विशेषज्ञानसिद्ध्यर्थंनामसंदर्भमुक्तवानित्युक्तं
तत्कथमित्यतआह ॥ विशेषज्ञानसिद्ध्यर्थंनाम्नामिति ॥ भारतादौपरमात्मनोविश्वंविष्णुरित्यादिनाम्नांविशेषज्ञानसिद्ध्य
र्थमेवोक्तिःप्रसिद्धेत्यर्थः । तपन्नेवास्मीत्युक्त्यानारायणाख्यधर्म्युपस्थितिःकथंस्यादित्यतआह ॥ तपंतमिति ॥ वेदेतिकथमव
गतमित्यतआह ॥ गायत्र्येति ॥ गायत्र्यास्वदृष्टया । ननुतत्वप्रकाशिकायां कस्त्वयीतिप्रश्नस्यप्राणोवाअहमितिपरिहारः की
दृशइत्यस्योत्तरतयोत्तरवाक्ययोजनेत्युक्त्वाद्विरोधः । किंचधर्मिप्रश्नस्यप्रथमप्राप्तत्वाद्धर्मप्रश्नस्यानंतरिकत्वादंतेधर्मिप्रश्नप्रति
हारकथनमयुक्तमितिचेन्न । प्राणोवाअहमित्यादिवाक्यंपदसमन्वयेनवाक्यसमन्वयेनचभगवत्परं । तत्रपदसमन्वयविवक्षयास्य

भा० । द्वितीयंयदिविष्णुःस्याज्ज्ञातव्योमेविशेषतः । इत्यभिप्रायमस्यैवज्ञात्वाविष्णुःसनातनः । अभिप्रायद्वयस्यापिपरिहारंहरिर्ददौ ।
प्राणोवाअहमित्यादि नामसंदर्भमुक्तवान् । विशेषज्ञानसिध्यर्थनाम्नामुक्तिःपरात्मनः । इंद्राविष्टःकोयमितिशंकानुत्त्यर्थमेवच । तपन्नेवास्मीत्य
वदत्तपंतंवेदसोपिहि । नारायणंसर्वगतंगायत्र्योपासकोहिसइतिब्रह्मांडे ।

ग्रंथस्यप्रवृत्तत्वात् । प्राणोहमित्यादिकंगुणसमर्पकं । एषतपन्नेवास्मीतिवाक्यंधर्मिप्रश्नोत्तरमितियुक्तं । सूत्रभाष्यटीकासुवाक्य समन्वयमंगीकृत्याविष्टः । कइतिप्रश्नोत्तरतयाप्राणोवा अहमित्यादिवाक्यंप्रवृत्तं । प्राणशब्दस्येशानःप्राणदःप्राणः प्राणस्यप्रा णः प्राणःस्थूणेत्यादौभगवन्नामतयाप्रसिद्धत्वात् । प्राणस्त्वमित्यादिवाक्यानितुत्वदादिसर्वजीवांतर्गतत्वादिमहामाहात्म्यप्रति पादकानीत्युक्तमतोनविरोधः । ननुतथापितत्रप्राणोवाअहमस्मीत्युपदेशस्यवामदेवोपदेशवदंतर्यामिविवक्षयेंद्रकर्तृकत्वंतत्रोक्तं अत्रतु अभिप्रायद्वयस्यापिपरिहारंहरिर्ददाविति भगवत्कर्तृकत्वमुच्यतेऽतोविरोधइतिचेन्न । इंद्राविष्टःकोयमितिपृष्टेइंद्रेणस्वां तर्यामीनारायणइति तत्स्थेनाहमेवेति युगपदुक्तिसंभवात् । यच्चकोयमितिप्रश्नस्यैषतपन्नेवेत्यंतेपरिहारकथनं तदपितेजोबाहु ल्यलिंगेनविष्णुत्वस्यावगतत्वाद्दार्ढ्यमात्रस्यापेक्षितत्वात्कीदृशइतिप्रश्नस्याज्ञातगुणविषयकत्वात्तत्परिहारेगौरवेणेतिज्ञेयं । किं चप्रश्नपरिहारौभगवद्विषयावित्यागमेनदर्शितं युक्त्याचोपपादयति ॥ उपनिषण्णमिति ॥ जानीयामितीत्यतःपरंवरप्रार्थना दितिशेषः । उपनिषण्णमिंद्रंदृष्ट्वापित्वामेवजानीयामितिज्ञानवरप्रार्थनात्प्रश्नस्येंद्रविषयत्वायोगादिंद्राविष्टोभगवानेवात्रत्वामित्यु देश्यतयोक्तइतिज्ञायते । किंचप्रश्नवाक्येऽस्यप्रसिद्धेंद्रस्यज्ञानार्थप्रार्थितत्वेइंद्रादेववरस्वीकारप्रसंगात्तस्यचवक्ष्यमाणरीत्यानिष्ट त्वादिंद्राविष्टोभगवानत्रप्रश्नवाक्येप्राणोवाअहमित्यादिपरिहारवाक्येचोक्तइतिज्ञायतइत्यर्थः । ननूपनिषण्णमिंद्रंपुरुषविशेषत्वे नजानातिनतुइंद्रत्वेनातस्त्वामेवेतिस्वरूपप्रश्नोयुज्यतइत्यतआह ॥ इंद्रमिति ॥ महाव्रतेयजमानमिंद्रंतुविशिष्येंद्रत्वेनेंद्रेणहौ

भा० । उपनिषण्णमिंद्रंदृष्ट्वापित्वामेवजानीयामितिवरस्वीकारादिंद्रादेवचेंद्राविष्टोभगवानत्रोक्तइतिज्ञायते । इंद्रंतुजानात्येवहिविश्वामित्रः ।

त्रेकर्मणिविनियुक्तोविश्वामित्रोजानात्येवेत्यर्थः । नन्विंद्रंप्रतीवभगवंतमपिप्रतित्वामेवजानीयामितिनवक्तुंशक्यते भगवत्स्वरू पस्यज्ञातत्वात्तस्यात्रेंद्रे आगत्यसन्निहितत्वस्यचज्ञातत्वात् । तस्यापरोक्षज्ञानित्वात्स्वरूपज्ञानसद्भावात् तेजोबाहुल्यलिंगेनात्रा गतत्वेस्थज्ञातत्वादित्यतआह ॥ भगवंतमपीति ॥ भगवंतंज्ञानातीतमागतंचजानात्येव । किंतुस्वरूपतएवजानाति नतुमु क्तावधिकसुखसंपादकगुणविशेषवत्तया । अतस्त्वामेवपूर्वावगतत्वामेवपुनर्जानीयामितिप्रश्नोयुज्यतइतिवैषम्यमितिभावः । न न्विंद्रस्वरूपज्ञानेपिविशेषज्ञानार्थप्रश्नःकिंनस्यादित्यतआह ॥ विशेषज्ञानेति ॥ नन्विंद्रस्यतापकत्वाख्यगुणविशेषप्रतिपादक त्वान्नव्यर्थमित्यतआह ॥ प्राणोह्येषइति ॥ ननूक्तमेवैषतपन्नेवेत्यवधार्यतइत्यतआह ॥ प्राणोह्येषइति ॥ नवमेखंडे प्रा णोह्येषयएषतपतीतिविष्णोस्तापकत्वस्योक्तत्वान्नेंद्रस्यतापनशक्तिरितिभावः । अस्मत्पक्षेतुतेजोबाहुल्यलिंगेनेंद्राविष्टोविष्णुरिति ज्ञातेपितदार्ढ्यायकोयमितिप्रश्नोत्तरत्वेनैषतपन्नेवास्मीतिसार्थकं । इंद्रस्यतुप्रत्यक्षसिद्धत्वेनकस्त्वमितिप्रश्नानवकाशादेषतपन्नेवेति व्यर्थमेवेतिभावः । यद्वाभगवंतमपिस्वरूपतआगतंजानात्येवेत्युक्तरीत्यावश्यमंगीकार्येणविशेषप्रश्नेनैवालं । किमितिस्वरूपप्रश्नो प्यनेनक्रियतेइतिनिर्बंधेनेत्यतआह ॥ विशेषेति ॥ विशेषज्ञानस्यैवप्रार्थनइत्यर्थः । शिष्टंपूर्ववदवतार्यव्याख्येयं । ननुतेजोबाहुल्य लिंगेनविष्णुत्वंज्ञायतएव । किंचसएतेनरूपेणेत्यत्र सइंद्राविष्टोहमेतेनाविष्टत्वाद्विष्ण्वाख्येनरूपेणसर्वादिशोविष्टोस्मीतींद्राविष्ट

भा० । भगवंतमपिस्वरूपतआगतंजानात्येव । विशेषज्ञानप्रार्थनेप्राणोवाअहमस्म्यृषइत्यादिकमेवपूर्यते । एषतपन्नेवास्मीतिव्यर्थं । प्रा णोह्येषयएषतपतीत्युक्तत्वात् ।

स्यविष्णुत्वंज्ञायते । विष्णुशब्दस्यस्वस्मिन्निर्वचनात् । किंचतस्यमेन्नंदक्षिणमित्यत्रापिइंद्राविष्टस्यदक्षिणामित्रत्वलिंगेनतद्विष्णुत्वंज्ञायतएवेति एषतपन्नेवेतिव्यर्थमित्याशंक्याह ॥ सएतेनेति ॥ अपियद्यपि सएतेनरूपेणसर्वादिशोविष्टोस्मीत्यनेन आदिपदेनतस्यमेन्नंमित्रंदक्षिणमित्यनेनपुनरपिपदेनतेजोबाहुल्यलिंगेनचेंद्राविष्टस्यविष्णुत्वंज्ञायते तथापिकिंचिदेव नतुस्पष्टं । एतेनविष्णवाख्येनरूपेणकरणेनसर्वादिशोविष्टोस्मीतितृतीयानिर्दिष्टस्यकरणत्वं प्रथमानिर्दिष्टस्यकर्तृत्वं अतस्तस्यविष्णवन्यत्व मितिशंकाभवति । तस्यमेन्नमित्यत्रचमेतस्यममकरणभूतस्यविष्णोरन्नंदक्षिणंमित्रमित्यर्थाभ्युपगमेतस्यमइत्यनयोर्वैयधिकरण्यं भिन्नविषयत्वमतस्तस्यविष्णवन्यत्वमितिशंकाभवत्यतःस्पष्टमाविष्टस्यविष्णुत्वंनज्ञायतइत्यर्थः । एवंतेजोबाहुल्यलिंगेनसएतेनरूपेणेत्युक्त्यादक्षिणामित्रत्वलिंगेनचविष्णुत्वावगतेरेषतपन्नेवास्मीत्यस्यास्मत्पक्षेपिवैयर्थ्यमित्याशंक्यसमाहितमुपसंहरति ॥ अत इति ॥ यतएवंविष्णुप्रापकाणांसावकाशत्वमतइंद्रशरीरमेवपश्यतस्तर्कमात्रतोभगवानितिकिंचिज्जानतःप्रमाणांतरसंवादमपेक्ष्य जानतःसएतेनेत्यादिनापिविष्णुत्वंकिंचिज्जानतःस्वरूपज्ञानेपि विष्णुविशेषगुणाज्ञानात्किंचिज्जानतोवाविश्वामित्रस्यपृथक्पृथक् भगवन्नामान्युक्त्वाऽहंविष्णुरित्येषतपन्नेवास्मीत्युवाचेतिज्ञायतइतियोजना । ननुयदुक्तमुपनिषण्णमिंद्रंदृष्ट्वेत्यत्रेंद्रस्यैवत्वामेव

भा० । सएतेनरूपेणसर्वादिशोविष्टोस्मीत्यादिनाथाविष्टस्यविष्णुत्वंकिंचिज्ज्ञायते । तथाप्येतेनेतितृतीयात्वात्करणत्वाशंकाभवति । तस्य मइतिवैयधिकरण्यमितिच । अतोभगवन्नामानिपृथगुक्त्वाऽहंविष्णुरित्येषतपन्नेवास्मीत्युवाच । इंद्रशरीरमेवपश्यतोविश्वामित्रस्यतर्कमात्रतोभ गवानितिकिंचिज्ज्ञानतइतिज्ञायते ।

जानीयामितिज्ञानार्थप्रार्थितत्वेइंद्रादेववरस्वीकारप्रसंगइति नेदमनिष्टं । प्राणोवाअहमित्यादिनेंद्रेणैववविश्वामित्रायात्मोपदेशांगीकारादित्यतआह ॥ नचेति ॥ विष्णोरपितत्तुल्यमित्यतस्तस्यसर्वशब्दवाच्यत्वस्यप्रमितत्वादित्याह ॥ अजस्येति ॥ कैमुत्यन्यायेनापींद्रस्यसर्वशब्दवाच्यत्वंप्रतिषेधति ॥ इंद्रेहीति ॥ तर्हींद्रशब्दस्यमुख्योर्थःकइत्यतआह ॥ इंद्रशब्दोपीति ॥ न केवलंयोगः रूढिरप्यस्तीत्याह ॥ यमिति ॥ इंद्रंमित्रंवरुणमित्यत्र योदिव्यःसुपर्णोगरुत्मान्तंइंद्रंमित्रंइत्याद्याहुरित्यर्थप्रतीते र्विष्णुपरत्वमस्याःश्रुतेःकुतइत्यतआह ॥ सप्तेति ॥ सप्त अर्द्धगर्भाइतिपदविभागः । अर्द्धमासमंताद्दद्धंब्रह्मांडं । तदेवगर्भेये षांतेतदावरणभूताः । सप्त महदहंकारपंचभूताभिमानिनोदेवाः भुवनस्यरेतोरतिप्रदस्य कारणभूतस्यवा विष्णोः प्रदिशाआज्ञया धारणादिविविधधर्मणिधर्मेषुतिष्ठंतीत्यर्थः । ननुसुपर्णादिशब्दश्रवणाद्विष्णुरेवतत्रप्रस्तुतइतिकथमित्यतआह ॥ नामानीति ॥ तथाच यंविष्णुमिंद्रंमित्रंवरुणमग्निमाहुःसएवसुपर्णादिशब्दवाच्यश्चेतितदर्थइतिभावः । ननुनामानिविश्वेत्यस्यलोके

भा० । नचेंद्रस्यप्राणशब्दःसर्वशब्दाभिधेयत्वंचविद्यते । अजस्यनाभावध्येकमर्पितमित्युक्तस्यपद्मनाभस्यहियोदेवानांनामधाएकएवेति सर्वदेवाभिधानत्वमुक्तं । इंद्रेहींद्रशब्दोपिनमुख्यतोवर्तते । परमैश्वर्याभावात् । इंद्रशब्दोपिविष्णावेववर्तते । सहिपरमेश्वरः । यमिंद्रमाहुर्वरुणं यमाहुर्यमित्रमाहुर्यमुसत्यमाहुः । इंद्रंमित्रंवरुणमग्निमाहुरथोदिव्यःससुपर्णोगरुत्मानित्यादिश्रुतेश्च । सप्तार्द्धगर्भाभुवनस्यरेतोविष्णोस्तिष्ठंतिप्रदिशाविधर्मणीत्यादिनाविष्णुरेवहितत्रप्रस्तुतः । नामानिविश्वाभिनसंतिलोकेयदाविरासीदनृतस्यसर्वे । नामानिसर्वाणियमाविशंतितंवैविष्णुंपरममुदाहरंतीतिचश्रुतिः ।

विश्वानिनामानिनसंति । विद्यमानान्यपि अभि मुख्यतोनसंतिकुतः । यद्यस्मादनृतस्य ऋतंब्रह्म पूर्वावगतवत्सदास्थितेस्तद्विरुद्धमनृतं तस्यजगतःसर्वप्रवृत्तिनिमित्तंयद्यस्मादुत्पन्नमितिनार्थः । किंतुपरमार्थपर्यालोचनायांयद्यस्मात्सर्वमनृतस्यानृतमाविरासीत्तस्माल्लोकेनामान्येवनसंतीत्यर्थः । अतोविष्णोरेवसर्वनामत्वेनतदुदाहरणंयुक्तं । नामानिसर्वाणियमाविशंतीत्यत्रापियंपरमंसर्वाणिनामानिआविशंति तंविष्णुशब्दवाच्यमप्युदाहरंतीत्येकस्यैवसर्वनामवत्त्वंविष्णुशब्दवाच्यत्वंचोच्यते नतुसर्वनामवाच्यानुवादेनविष्णुत्वंविधीयते । तथाचेंद्रंमित्रंवरुणमग्निमाहुरित्यत्रसुपर्णएवसर्वशब्दवाच्योस्तु । नचतत्रविष्णुप्रस्तुतिविरोधः उक्तरीत्यानामानीतिश्रुतौसर्वशब्दवाच्यस्यैवविष्णुनामवत्त्वस्याप्युक्तेरित्यतोनिरवकाशंप्रमाणमाह ॥ योदेवानामिति ॥ नामानिसर्वाणीत्यत्रसर्वनामवाच्यानुवादेनविष्णुत्वविधिरित्यस्माभिरुक्तं । भवतुवात्वदुक्तरीत्यातत्रसर्वनामवाच्यस्यैवविष्णुशब्दवाच्यत्वमप्युच्यतइति । तथापियोदेवानांनामधाएकएवेत्यवधारणादेकस्यैवविष्ण्वादिसर्वनामवत्त्वंनान्यस्य । सचैकोविष्णोरन्योनभवति पद्मनाभत्वालिंगादित्यर्थः । लिंगंचासाधारणमित्येवशब्दः । शब्दादेवप्रमितइतिवत् । एतेनाजस्यनाभावित्युक्तस्यपद्मनाभस्य योदेवानांनामधाएकएवेतिसर्वदेवाभिधानमुक्तमित्यादिनैतत्पुनरुक्तमितिनिरस्तं । ननुश्रियोवायोश्चसर्वनामत्वप्रसिद्धेःकथमेकएवेत्यवधारणमित्यतआह ॥ श्रियइति ॥ तथाचतयोरपिपूर्वप्रसिद्धवर्जसर्वनामविषयत्वेनप्रसिद्धिरुपपन्नेति

भा० । योदेवानांनामधाएकएवेत्यवधारणान्नान्यस्यसर्वनामत्वं । सचविष्णोर्नान्यः । पद्मनाभत्वादेव । श्रियोवायोरपिननारायणादिनामवत्त्वं ।

भावः । किंचयदिविष्ण्वादिनामधारकत्वंविष्ण्वन्यस्योच्यतेतर्हिसविष्णुसमोवास्यादधिकोवास्या न्नचैतत्संभवतीत्याह ॥ एकोवासुदेवइत्यादिनातदत्रोच्यतइत्यंतेन ॥ योदेवानामित्यत्रविष्ण्ववरस्यविष्ण्वादिसर्वदेवनामधारकत्वेनानुक्तावपितद्विष्णुसममधिकंवात्रसर्वदेवनामवत्त्वेनोच्यतइत्यपिनवक्तव्यं । कुतः । हियस्मादेकोवासुदेव एकोबारायणइतिचश्रुतिरस्त्यतोविष्णोःपरंतत्सदृशंवानास्त्यतस्तदत्रोच्यतइतिनवक्तव्यमिति । ननुदेवेषुवासुदेवनारायणशब्दितसगुणसमोनास्तीत्युच्यते परंब्रह्मत्वन्यदस्ति तदेव योदेवानामित्यत्रलक्षणयासर्वनामप्रतिपाद्यमुच्यतइत्यतउक्तं ॥ येनावृतमिति ॥ येननारायणेनावृतंखमावृतांदिवंमहींचयेनतत्प्रेरणयादित्यस्तेजसातपति । भ्राजसा दीप्त्या । चशब्दात्प्रकाशयति । यदक्षरेयस्मिन्नक्षरे नारायणस्य परब्रह्मत्वावधारणाच्चविष्णोःपरमुत्तमंनास्त्यतस्तद्विष्णोःपरंनिर्गुणंपरंब्रह्मात्र योदेवानामित्यत्रोच्यतेइत्यपिनवक्तव्यमित्यर्थः । ननुयदिविष्णोर्देवांतर्गतत्वंस्यात्तदायोदेवानामित्यस्यविष्ण्वादिदेवानामित्यर्थः । स्यात्तदेवकुतइत्याशंकांपरिहरन्समादिराहित्येश्रुत्यंतरमाह ॥ परोमात्रयेति ॥ अत्रदेवेतिसंबोधनादेवत्वमुक्तं । ननुनकिरिंद्रेत्यत्रसमाभ्यधिकराहित्योक्तावपितदधिको

भा० । एकोवासुदेवस्तत्सदृशपरौनस्तइतिहिश्रुतिः । एकोनारायणआसीत्तत्समोवाअधिकोवानास्तीतिच । येनावृतंखंचदिवंमहींचयेनादित्यस्तपतितेजसाभ्राजसाच । यमंतःसमुद्रेकवयोवयंतियदक्षरेपरमेप्रजाइत्युक्तस्यसमुद्रशायिनएवनारायणस्य तदेवर्ततदुसत्यमाहुस्तदेवब्रह्म परमंकवीनामितिपरब्रह्मत्वावधारणाच्चविष्णोःपरंसदृशंवानास्त्येव । अतस्तदत्रोच्यतइत्यपिनवक्तव्यं । परोमात्रयातन्वावृधाननतेमहित्वमन्वश्नुवंति । नतेविष्णोजायमानोनजातोदेवमहिम्नःपरमंतमापेत्यादेश्च । नकिरिंद्रत्वदुत्तरोनज्यायांअस्तिवृत्रहन् ।

विष्णुर्यथास्वीक्रियतेतथावासुदेवादुत्तमोपिकिंनस्यादित्यतआह ॥ नकिरिति ॥ अत्रनकिरित्युक्तार्थाधिक्यविवक्षया । नकिर्माकिःसमसीत्यादिप्रोक्ताधिक्यविवक्षयेत्यन्यत्रोक्तत्वात् । विष्णोर्देवांतर्गतत्वंसर्वोत्तमत्वंतस्यैवपरममहद्ब्रह्मत्वमित्यत्रभारतसंमतिमाह ॥ किमेकमिति ॥ इतोपिप्राणोवाअहमित्युपदेशस्यभगवद्विषयत्वमित्याह ॥ मेन्नमिति ॥ उपदिष्टंवस्तुविष्णुरितिज्ञायते । दक्षिणामित्रत्वंविष्णुलिंगंकुतइत्यतआह ॥ सहीति ॥ धन्यःसर्वोत्तमआश्चर्योसदृशः । ननुमेन्नंमित्रंदक्षिणमित्यत्रदक्षिणंसमीचीनमन्नंबृहतीसहस्रंमेमित्रमित्युच्यते । नतुतदभिमानिनीलक्ष्मीर्मित्रमित्यतआह ॥ नचेति ॥ अचेतनमात्रस्याभिमानिनंविहायकेवलमचेतनस्यबृहतीसहस्रस्य । कुतोनाचेतनस्यमित्रत्वमित्यतोमित्रशब्दंनिर्वक्ति ॥ मिनोतीति ॥ विजानातीत्युपलक्षणं । त्रायतेचेत्यपिग्राह्यं । प्रकृतेदेव्याभगवत्त्राणकर्तृत्वंनामबृहतीसहस्रप्रतिपाद्यरूपगुणादीनामयोग्यजनचित्ता

भा० । नकिरेवायथात्वमित्याद्यपिसर्वनामकत्वात्तस्यैव । किमेकंदैवतंलोकेकिंवाप्येकंपरायणमित्यादिप्रश्नस्यापि । परमंयोमहत्तेजःपरमंयोमहत्तपः । परमंयोमहद्ब्रह्मपरमंयःपरायणं । पवित्राणांपवित्रंयोमंगलानांचमंगलं । दैवतंदेवतानांचभूतानांयोव्ययःपिता । यतःसर्वाणिभूतानिभवंत्यादियुगागमे । यस्मिंश्चप्रलयंयांतिपुनरेवयुगक्षये । तस्यलोकप्रधानस्यजगन्नाथस्यभूपते । विष्णोर्नामसहस्रंमइत्येवभारतेपरिहाराच्च । मेन्नंदक्षिणमित्युक्त्वाच्चविष्णुरेवेतिज्ञायते । सहिविष्णुर्दक्षिणामित्रउक्तोहरिवंशेषुधन्याश्चर्याध्याये । दक्षिणाभिःसहैवैतन्मदधस्ताज्जगत्सदा । धन्याश्चर्योहमेवैकोमित्रंमेदक्षिणारमा । इत्यवादीद्धरिर्भूपाधन्योसीत्युदितोमयेतिनारदवचनं । नचबृहतीसहस्राभिमानिनींदेवींविनाचेतनमात्रस्यमुख्यमित्रत्वंयुज्यते । मिनोतित्रायतेचेतिमित्रमित्यभिधीयते । तस्माद्योयंविजानातिसमित्रंतस्यनान्यथेतिभारते ।

विषयीकरणेनगोपकत्वंविवक्षितं । नन्वस्त्वन्नपदेनतदभिमानिचेतनपरिग्रहः । रमेतिकुतइत्यतउक्तंदेवींविनाचेतनमात्रस्यब्रह्मादेरपिमुख्यमित्रत्वंनयुज्यतइति । बृहतीसहस्रंशंस । तेनेंद्रस्यप्रियंधामोपेयायेत्यत्रेंद्रस्योक्थायुत्वमुच्यतेततश्चनात्रेंद्रःप्रसिद्धःकिंतुविष्णुरेवेत्याह ॥ उक्थेति ॥ किमिदमुक्थायुत्वमित्यतउक्थपदार्थमाह ॥ बृहतीति ॥ नन्वाश्विनसहस्रमप्युक्थनामकमित्यतउक्तं ॥ मुख्यतइति ॥ बृहतीसहस्रमपिमहाव्रतनियुक्तमेवोक्थनामकं । नतुसर्वपृष्टास्तोर्यामविश्वजिदतिरात्रादिनियुक्तमितिभावेनोक्थायुपदार्थमाह ॥ महाव्रतेति ॥ ईयोज्ञेयःप्राप्यश्च । उक्थायुत्वविशेषितेंद्रस्यविष्णुत्वमागमेनोक्त्वा युक्त्याचोपपादयति ॥ विष्णुरिति ॥ हियस्माद्यज्ञेष्वन्यइंद्रः एकप्रकरणएवपृथगुच्यते तस्मादुक्थायुरिंद्रइतिविष्णुरुच्यते इत्यर्थः ॥ ननुविष्णोःप्राणादिशब्दवाच्यत्वेप्राग्यमिंद्रमितिश्रुत्युदाहरणमसंगतं । तत्रयंविष्णुमिंद्रस्वरूपमाहुरित्यादिनेंद्रादिभिरभेदस्यैवोक्तेरित्यतआह ॥ यमिंद्रमाहुरित्यादिना ॥ यमुसत्यमाहुरित्युक्त्वायोदेवानांदेवतमस्तस्मैत्वातेभ्यस्त्वेत्युत्तरवाक्येतस्मैदेवतमायतेभ्योदेवेभ्यइतिभेदस्यापिवचनात्पूर्ववाक्यंनाभेदविधिपरंव्याघातादतःशब्दवाच्यत्वपरमेवेतिज्ञायतइतिभावः । ननुयमुसत्यमाहुरितिवाक्यंननामविधिपरं सत्यनामकस्यकस्याप्यभावात् । किंतुब्रह्मैवसत्यमाहुरिंद्राद्यौपाधिकानामसत्य

भा० । उक्थायुत्वाच्चविष्णुरेवात्रोक्तइत्यवगम्यते । बृहतीसहस्रंह्युक्थनामकंमुख्यतः । महाव्रतनियुक्तंयदुक्थसहस्रंहरेःप्रियं । तदुक्थमितिसंप्रोक्तंतेनेयोविष्णुरेवहि । तस्मादुक्थायुरित्युक्तऐश्वर्यादिंद्रउच्यते । तस्मादुक्थायुरिंद्रेतिविष्णुर्यज्ञेषुचोच्यतइतिगारुडे । विष्णुर्ह्युक्थायुरिंद्रइत्युच्यते । यज्ञेष्वन्यइंद्रःपृथक्चोच्यते । यमिंद्रमाहुर्वरुणंयमाहुर्यमित्रमाहुर्यमुसत्यमाहुरित्युक्त्वातस्मैत्वातेभ्यस्त्वेतिभेदवचनाच्च ।

त्वेनतच्चैतन्यमात्रमेनमाहुरित्यर्थोंगीकार्यएवेत्यतआह ॥ सत्यइतीति ॥ सच्छब्दस्यप्राणनामत्वेकिंसत्यशब्दस्येत्यतआह ॥ सदेवेति ॥ सत्यता सत्यशब्दप्रवृत्तिनिमित्तं । सर्वतः सर्वदा । अनादिकालतःसर्वदोषहीनागुणाधिकाः । ऋजवइतिवच नात् । तेनेंद्रस्यप्रियंधामोपेयायेत्येतत्तच्छ्रुत्वातुष्टिमगमदितिव्याख्यातं । तत्कथंशब्दलब्धमित्यतआह ॥ प्रियधाम्नइति ॥ धामप्राप्तिरेवार्थःकिंनस्यादित्यतआह ॥ अन्यथेति ॥ प्रियंधामेयायेत्येतावतापूर्तेरितिभावः । नचोपसर्गस्यधात्वर्थव्यंजक त्वान्नवैयर्थ्यमितिवाच्यं । प्रययावित्यादिवत्तदर्थातिशायिकत्वाभावात् । नचोपयानंनामसम्यग्यानमितिवाच्यमपदार्थत्वात् । नचधात्वर्थएवोपसर्गार्थइतिवाच्यं । वैयर्थ्यानिस्तारात् । वक्ष्यतिच नचनिरर्थकत्वमुपसर्गस्यांगीकर्तुयुक्तं । नह्यार्षेषुवेदेषुव्या करणादिषुचोपसर्गाणांवैयर्थ्यमंगीकृतंकुत्रचिदिति । अर्थानुपपत्तिंचाह ॥ नचेति ॥ शंसनत्रयस्यफलभेदंप्रमाणेनाह ॥ बृहतीति ॥ सालोक्यं तत्कारणप्रसादं । एवमन्यत्र । अपव्याख्यांप्रत्याख्याति ॥ नचेति ॥ कस्यचित्प्राणस्येंद्रादिभिरैक्य मत्र प्राणोवाअहमस्मीत्यादावुच्यतइतिनमंतव्यमित्यर्थः । कुतोनमंतव्यमित्यतःप्राणस्यविष्णवन्यत्वस्येंद्रादिभिरभेदस्यचसूत्र

भा० । सत्यइतिवायुः । सदितिप्राणइतिश्रुतेः । सदेवसत्यमित्युक्तंसत्योवायुरुदाहृतः । साधुत्वंसत्यताप्रोक्तासाधुर्वायुर्हिसर्वतइतिशब्द निर्णये । प्रियधाम्नउपसमीपेगमनंनामतद्धामप्राप्तिकारणभगवत्प्रसादप्राप्तिः । अन्यथोपशब्दोव्यर्थःस्यात् । नचतदैवभगवतःप्रियंधामविश्वामि त्रेणप्राप्तं । बृहतीसहस्रेप्रथमेसालोक्यंप्रददौहरिः । द्वितीयेस्वपुरप्राप्तिंतृतीयेंतःपुरस्यच । तथास्वविषयंज्ञानंविश्वामित्रेददौप्रभुरितिचगारुडे । नचेंद्रादिभिरैक्यमत्रोच्यते ।

॥ ५५ ॥

कृतानिराकृतत्वादित्याह ॥ प्राणइत्यादिना ॥ इंद्रेणेत्यतःपरंप्राणतयेतिशेषः । कथंनिराकृतइत्यतोऽध्यात्मसंबंधभूमाह्यस्मि न्नितिसूत्रखंडार्थमाह ॥ अध्यात्मेति ॥ संबंधशब्दार्थआवेशइति । अध्यात्मशब्दार्थोविष्णोरिति । अस्मिन्नित्यस्यार्थ इंद्रइति । ननुसर्वेष्वंतर्यामित्वेनभगवत्संबंधोस्त्येव तत्किंविशिष्टस्योच्यतेइंद्रेसंबंधइतीत्याशंकापरिहारायसंबंधभूमेतिप्रवृत्तं भूमपदंव्याचष्टे ॥ अन्येष्विति ॥ अन्येष्वंतर्यामित्वेनैवसंबद्धोस्मिन्निंद्रेतुविशेषावेशइत्यर्थः । ननुमहाभारततात्पर्यनिर्णये । श्रीब्रह्मरुद्रशेषाश्चवींद्रेंद्रौकामएवच ॥ कामपुत्रोनिरुद्धश्चसूर्यश्चंद्रोबृहस्पतिरित्याद्युक्त्वा इत्याद्याविशेषावेशिनोहरेरितींद्राद न्येषामपिविशेषावेशोक्तेः किंविशिष्योच्यते इंद्रेतुविशेषावेशइतीत्यतआह ॥ तात्कालिकइति ॥ महाव्रतयज्ञकालेप्राप्तोविशे षावेशइत्यर्थः । अध्यात्मसंबंधशब्देनविष्णोरावेशःकथमुक्तइत्यतआह ॥ अधिकात्मनइति ॥ ननुनैवंसूत्रार्थः किंतुनप्राणः परमात्मा वक्तुःविश्वामित्रस्येंद्रेणप्राणतयात्मोपदेशादितिचेन्ना स्मिन्निंद्रेध्यात्मसंबंधभूमा परमात्मैक्यंविद्यतेतथाचेंद्रस्यप्राण शब्दवाच्यत्वेपरमात्मनस्तदविरुद्धमित्यर्थइत्यतआह ॥ नहीति ॥ नैक्यविवक्षयासिद्धांतांशप्रवृत्तिः तथात्वेसंबंधशब्दव्या

भा० । प्राणस्तथानुगमादितिचविष्णोरेवप्राणशब्दाभिधेयत्वमुक्त्वानवक्तुरात्मोपदेशादितिचेदध्यात्मसंबंधभूमाह्यस्मिन्नितिवक्तुर्बृहतीस हस्रंशंसितुर्विश्वामित्रस्येंद्रेणस्वात्मोपदेशःक्रियतइतिपक्षोनिराकृतोहिभगवतासूत्रेषु । अध्यात्मसंबंधशब्देनावेशोविष्णोरिंद्रेविवक्षितोभगवता । अन्येष्वंतर्यामिरूपेणसंबंधोस्त्येव । अस्मिन्निंद्रेतुविशेषावेशस्तात्कालिकः । अधिकात्मनःपरमात्मनःसंबंधोध्यात्मसंबंधः । नहिस्वात्मनास्वस्य संबंधोभवति ।

कोपादितिभावः । शंकते ॥ यदीति ॥ अध्यात्मसंबंधभूमेत्यत्राध्यात्ममात्रमध्यात्मभूयस्त्वमात्रंपरमात्मभूयस्त्वंतदैक्यमेववि
वक्षितंसंबंधशब्दस्तुऐक्यमपितात्पर्यलक्षणःस्वरूपसंबंधइतिवस्तुस्थितिकथनायेतियद्युच्यतइत्यर्थः । परिहरति ॥ तर्हीति ॥
तस्यसंबंधत्ववचनस्यनिष्प्रयोजनत्वादितिभावः । उपसंहरति ॥ तस्मादिति ॥ ऐक्यपरत्वेसंबंधशब्दव्याकोपात्वैयर्थ्याद्धें
द्रादिजीवेभ्योभेदएवात्रसूत्रेभगवतोविवक्षितइत्यर्थः । यद्वातदेवंसूत्रार्थस्यव्यवस्थितत्वादत्रश्रुतावींद्रादिजीवेभ्योभेदएवात्रसू
त्रेभगवतोविवक्षितइतिज्ञायतेतो नचेंद्रादिभिरैक्यमत्रोच्यतइत्युपपन्नमितिभाः । नन्वत्रयदिप्राणपदेनेंद्रेणापिविष्णुरेवस्वा
त्मादिसर्वगततयोच्यते नतुस्वात्माभेदेनेतिविवक्षितं तर्हिमयिप्राणइत्यादिप्रयोगःस्यान्नत्वहंप्राणइति । विष्णावहमित्यादिरू
पोपदेशायोगादित्याशंक्य सेयमाशंकासूत्रएवपरिहृतेतिभावेनानूद्यव्याचष्टे ॥ शास्त्रेति ॥ शास्तीतिशास्त्रमितिव्युत्पत्त्याशा
स्त्रस्यशास्तुरंतर्यामिणोविष्णोःसर्वशरीरेष्वेंद्रविश्वामित्रादिसर्वशरीरेषुस्थितत्वात्तद्दृष्ट्यातद्विवक्षयोपदेशः अहंत्वंसर्वाणिभूतानी
त्यहमादिसर्वनामोपदेशोयुज्यतइतिसर्वनामाभिधेयत्वंचोक्तमित्यर्थः । सूत्रभाष्ये शास्त्रशब्दस्यसंविच्छास्त्रंपरंपदमितिअंतर्या
मिणिप्रयोगदर्शनेनरूढिरुक्ता । अत्रतुयोगःतिविवेकः । अंतर्यामिण्यप्यहमादिपदप्रयोगादर्शनात्तदयोगइत्यतःसूत्रोक्तदृष्टांतं

भा० । यद्यध्यात्ममात्रमत्रोच्यतइतिविवक्षितं तर्ह्यध्यात्मभूमेत्येवस्यात्संबंधशब्दोव्यर्थः । तस्मादिंद्रादिजीवेभ्योविष्णोर्भेदएवात्रभगव
तोविवक्षितः । शास्त्रदृष्ट्यातूपदेशोवामदेववदितिशास्त्रंतर्यामिणोविष्णोःसर्वशरीरस्थितत्वात्सर्वनामाभिधेयत्वंचोक्तं ।



विवृणोति ॥ अहमिति ॥ यथांतर्यामिविवक्षयावामदेवोहंमन्वादिशब्दान्प्रयुक्तवांस्तथायमुपदेशोयुक्तइतिभावः । वामदेव
वचनमप्यभेदविवक्षयाकिंनस्यादितिचेदत्रवक्तव्यं । किंवामदेवेनविशिष्टेनमन्वादिभिर्विशिष्टैरैक्यमुच्यते उतोपाध्यविवक्षया
भागत्यागलक्षणयोपाधिविनिर्मुक्तशुद्धचैतन्यैक्यमुच्यते । आद्यंदूषयति ॥ नहीति ॥ तेषामभेदवादिनांपक्षेपिवामदेवोविशि
ष्टोमनुसूर्यादिर्नभवति नांगीक्रियतइत्यर्थः । द्वितीयंदूषयति ॥ सर्वेति ॥ उपाधिविनिर्मुक्तशुद्धचैतन्यविवक्षयाहंमनुरित्याद्यु
पदेशइतिचनसंभवति । कुतः हियस्मात्तेसर्वप्रवृत्तिहीनतांसर्वप्रवृत्तिराहित्यंमोक्षंवदंति । अविवक्षतोपाधिकशुद्धचैतन्यावस्थैव
मोक्षावस्थेतिचैतन्यैक्यविवक्षयास्यग्रंथस्यप्रवृत्तत्वेभूमिदानादिप्रवृत्त्युक्तिर्नस्यात् । अत्रचाहंभूमिमददामार्यायेत्यादिनाप्रवृत्ति
रेवोच्यते नतुनिवृत्तिरतोनचैतन्यैक्यविवक्षयायमुपदेशइतिभावः । ननुमाभूदैक्यविवक्षयायमुपदेशो नतावतांतर्यामिविव
क्षासिद्ध्यति । मन्वादिकर्मणोवामदेवेनकरणादहंमनुरित्यादिव्यपदेशोपपत्तेः । लोकेसमर्थेनामात्येनराजकर्मकरणेनराजाहमि
तिव्यपदेशदर्शनादित्यतआह ॥ नचेति ॥ नकेवलमैक्यंनयुज्यते किंतुवामेदेवेनमन्वादिकर्मक्रियतेतद्विवक्षयायंव्यपदेशइत्य
पिनयुक्तं । कुतःकदापिकालत्रयेपिवामदेवेनमन्वादिकर्मकरणाभावादित्यर्थः । आदिपदेनसूर्यादिग्रहणं । स्मृतिप्रणयनेनावबो
धकत्वंमनुकर्म सूरिनियामकत्वंसूर्यकर्म सूरयोहिसूर्योदयेऽध्यात्ममधिदैवंचतन्नियमितविहितमनुतिष्ठंति । आर्यायेंद्रायभूमि

भा० । अहंमनुरभवंसूर्यश्चेत्यादिवत् । नहिमनुसूर्यादिर्भवतिवामदेवस्तेषांपक्षेपि । सर्वप्रवृत्तिहीनतांहितेमोक्षंवदंति । अत्रचाहंभूमिम
ददामार्यायेत्यादिनाप्रवृत्तिरेवोच्यते । नचवामदेवेनमन्वादिकर्मक्रियतेकदापि ।

दानंचोपेंद्रकर्म एवमन्यदपिद्रष्टव्यं । तत्रोत्तरकालेवर्तमानकालेचतदभावेज्ञापकमाह ॥ अतीतार्थश्चेति ॥ अयमभवमिति व्यपदेशःअहंभूमिमददामित्यादिनाव्यपदेशाश्चातीतार्थादृश्यंतेऽतोनोत्तरवर्तमानकालयोरेतत्कर्मक्रियतइत्यर्थः । अतीतकाले तदभावमुपपादयति ॥ नहिपूर्वामिति ॥ कुतोनकृतानीत्यतआह ॥ भगवान्हीति ॥ यद्वाननुपरमात्मनापिभूमिदानस्मृति प्रणयनेनावबोधकत्व सूरिनियामकत्वादीनि कदापिनकृतानीतितुल्यं । तदपेक्षयार्यस्यैवाभावात् । स्मृतिप्रणयनादेर्मन्वादि निष्ठत्वेनप्रसिद्धत्वाच्चेत्यतआह ॥ भगवानिति ॥ वामनरूपीभगवान्विष्णुर्ह्यार्यायावतारविवक्षयाग्रजायेंद्राय त्रिपदयाच्ञा च्छलेनबलेरपहृत्यभूमिमददात्सएवोपेंद्रएवतत्तन्मन्वंतरेषुमन्वादिष्वंतर्यामित्वेनस्थित्वानामप्रवृत्तिनिमित्तानिसर्वाणिकर्माणिकुर्वन् अवबोधसूरिनियमनादिप्रवृत्तिनिमित्तैर्मनुसूर्यादिसर्वनामाभवत्यतोहंमनुरभवमित्याद्युपपन्नमित्यर्थः । तथाचभागवतेऽष्टमस्कंधेत्रयोदशाध्याये मनवोमनुपुत्राश्चमुनयश्चमहीपते ॥ इंद्राःसुरगणाश्चैवसर्वेपुरुषशासनाः ॥ यज्ञादयोयाःकथिताःपौरुष्यस्तनवोनृप ॥ मन्वादयोजगद्यात्रांनयंत्यभिप्रचोदिता इत्यादिनास्पष्टमुक्तमवगंतव्यं । ननुयदुक्तं नहिमनुसूर्यादिर्भवति वामदेवइति स्यादिदमपसिद्धांतदूषणंसत्योपाधिकृतसत्यभेदवादे तैर्मुक्तेःपूर्वंविशिष्टभेदस्यसत्यत्वांगीकाराद्येषांमुक्तेःपूर्वंसंसारेपिभेदोनास्तितेषांवैशिष्ट्यस्यापिमिथ्यात्वान्नैक्यंविरुध्यते । नह्यारोपितनैल्यवैशिष्ट्येपिगगनस्यनीरूपत्वंविरुध्यतइत्याशंक्यपरिह ॥ ५७ ॥

भा० । अतीतार्थश्चायंदृश्यतेभूमिमददामित्यादिना । नहिपूर्ववामदेवेनतानिकर्माणिकृतानि । भगवान्विष्णुर्हींद्रायभूमिमददात् । सएवचसर्वेष्वंतर्यामित्वेनस्थित्वानामप्रवृत्तिनिमि[illegible]नसर्वकर्माणिकुर्वन्नवबोधसूरिर्नियमनादिभिर्मनुसूर्यादिसर्वनामाभवति ।

रति ॥ यदीति ॥ मन्वादित्वस्यमन्व[illegible]शब्दप्रवृत्तिनिमित्तधर्मस्य । इत्यादिकं सूर्यश्चाहंकक्षीवानृषिरस्मिविप्रःअहंभूमिमददामित्यादिकं । सर्वमनर्थकं अर्थशून्यमप्रमाणमेवभवतीत्यर्थः । नचमनुरभवमित्यादेर्मिथ्यांशत्यागेनयत्सत्यंचैतन्यंतेनैकीभूतोभवमित्यर्थइतिवाच्यं । तदापिभूमिमददामित्यादिकमनर्थमेव । किंचचैतन्यैक्यस्यप्रागेवसिद्धत्वान्मनुरभवमित्यादिकंनिरर्थकमेवेति । यदुक्तं इंद्रादिजीवानांप्राणोवाअहमित्यादावीशैक्यमहंमनुरभवमितिजीवानांचपरस्परमैक्यमुच्यते । तन्नेदस्यासत्त्वादिति । तत्प्रमाणबाधितमितिभावेनतदुदाहरति ॥ जीवेश्वरेति ॥ चशब्दास्तथाशब्दश्चसमुच्चये । एवशब्दाःभेदाभेदव्यावृत्त्यर्थाः । सत्यत्वेहेतुर्नकदाचिदिति । निवर्त्योबाध्यः । कदाचिदित्यस्यविवरणंमुक्ताविति ॥ यद्वासत्योपाधिकृतसत्यभेदवादेमुक्तावुपाधिविनिर्गमेननिवर्त्यःअसत्यभेदवादेसंसारएवनब्रह्मज्ञानेनबाध्यतइतियोज्यं । तात्पर्यद्योतनायान्यथाज्ञानिनां फलमाह ॥ यएतदिति ॥ भेदादिप्रपंचासत्यत्वाभेदवादिनांनिंदार्थवादबलाच्चभेदएवतात्पर्यमागमस्येतिभावेनासत्यत्ववादानुवादपरंगीतावाक्यंपठति ॥ असत्यमिति ॥ अनीश्वरमित्यतःपरंअपरस्परसंभूतंकिमन्यत्कामहैतुकमितिवाक्यशेषोनुसंधे

भा० । यदिभेदस्यपूर्वमपिमिथ्यात्वमंगीक्रियतेतर्हिभूमिदानादिसर्वकर्मणांमन्वादित्वस्यापिमिथ्यात्वादहंमनुरभवमित्यादिकंसर्वमनर्थकमेवभवति । जीवेश्वरभिदाचैवजीवभेदःपरस्परं । जडेश्वरभिदाचैवजडभेदस्तथैवच । जडजीवभिदाचैवसत्योयंभेदपंचकः । नकदाचिन्निवर्त्योयंमुक्तौसंसारएवच । यएतदन्यथाब्रूयुस्तेहियांत्यधरंतमःइतिभविष्यत्पर्वणि । असत्यमप्रतिष्ठंतेजगदाहुरनीश्वरं ।

यः । अभेदवादानुसंवादपरंतत्पठति ॥ ईश्वरइति ॥ सुखीत्यतःपरमाढ्योभिजनवानित्यादिवाक्यशेषः । असत्यत्ववादिनां निंदापरंकामहैतुकमित्यतःपरंविद्यमानंवाक्यशेषंपठति ॥ एतामिति ॥ ईश्वराभेदवादिनांनिंदापरमीश्वरोहमित्यादिप्रकरणोपसंहारस्थंवाक्यशेषंपठति ॥ आसुरीमिति ॥ प्राणोवाअहमस्मीत्यादावहमस्म्यादिशब्दानामस्मच्छब्दार्थत्वमंगीकृत्यैक्यपरत्वेंतरंगंचबाधकमाह ॥ नचेति ॥ कुतइत्यतआह ॥ एषतपन्निति ॥ अहमस्म्यादिशब्दानामस्मच्छब्दार्थपरत्वेऋषेप्राणोहमस्मि त्वंचप्राणोसि सर्वाणिभूतान्यपिप्राणाभवंति यएषतपतिसूर्यः एषोपिप्राणोहीत्युक्तत्वात्स्वाभिन्नप्राणेनसूर्यस्याभेदोक्त्यासूर्यस्यापिस्वाभेदस्यलब्धत्वादेषतपन्नेवास्मीत्युपरितनवाक्यस्यवैयर्थ्यप्रसंगादित्यर्थः । ततश्चकिमित्यतआह ॥अतइति॥ प्रतीतार्थस्यानुपपन्नत्वादस्मदादेशतयालौकिकव्याकरणविहितमप्यहमितिपदंतस्मिन्नुपपदेउत्तमपुरुषाख्यातपदत्वेनविहितमस्मीतिपदं आदिपदेनयुष्मदादेशरूपतयोक्तंत्वमितिचपदमित्यादिकंगुणसमर्पणायभगवन्नामैवेत्यर्थः । प्राणोवाअहमित्यादैरैक्यपरत्वेप्रकृतासंगतिमप्याह ॥ नचेति ॥ अत्रग्रंथेप्राग्जीवेश्वरैक्यस्यवचनं कथनं । प्रस्तुतमुपक्रांतं नभवति । यत्साधनायविश्वामित्रंह्येतदित्याद्याख्यायिकयैक्यमुच्यतेतिभावः । तर्हिकिमत्रप्रकृतं । यत्रप्रमाणत्वेनेयमाख्यायिकोक्तेत्यतआह ॥

भा० । ईश्वरोहमहंभोगीसिद्धोहंबलवान्सुखी । एतांदृष्टिमवष्टभ्यनष्टात्मानोल्पबुद्धयः । आसुरींयोनिमापन्नामूढाजन्मनिजन्मनि । मामप्राप्यैवकौंतेयततोयांत्यधमांगतिमित्यादिच । नचप्राणोवाअहमस्म्यृषइत्यादावहमस्म्यादिशब्दोस्मच्छब्दार्थस्थः । एषतपन्नेवास्मीत्युपरितनस्य वैयर्थ्यात् । प्राणोह्येषयएषतपतीत्युक्तत्वात् । अतोहमस्मीत्यादिचभगवन्नामैव । नचजीवैक्यवचनमत्रप्रस्तुतं । ॥ ५८ ॥

तावाएताइति ॥ एवंस्वव्याख्यानेउपपत्तिमपव्याख्यानेऽनुपपत्तिंचोक्त्वोपसंहरति ॥ तस्मादिति ॥ अस्मद्व्याख्यानस्यप्रकृतसंगतत्वात् अन्यस्यासंगतत्वात्प्राणादिसर्वांतर्यामित्वात्तत्तत्पदप्रवृत्तिनिमित्तगुणाधिकरणत्वात्तत्संपादकसर्वशक्तित्वात्प्राणाहमादिसर्वनामत्वमेवात्रोच्यते । नतुसर्वस्वरूपत्वमित्यर्थः । ननुसर्वनामवाच्यत्वंप्रतिज्ञायसर्वाभेदोयुक्तित्वेनोच्यतइत्यस्त्येवसंगतिरितिशंकांभारतवाक्येनपरिहरति ॥ उक्तंचेति ॥ सर्वत्वं सर्वनामवाच्यत्वं । यद्वाननुजीवेश्वरभिदाचैवेत्यादिकंयथाभेदेप्रमाणमस्त्येवंसर्वंखल्विदंब्रह्म वासुदेवःसर्वमित्यादिरूपंविष्णोःसर्वात्मकत्वेप्रमाणमस्त्येवेत्यतस्तस्यगतिश्चभारतएवोक्तेत्याह ॥ उक्तंचेति ॥ सर्वत्वं सर्वात्मकत्वं । यदधीनायस्यसत्तातत्तदित्येवभण्यते इतिवचनादितिभावः । किंचैक्यपरत्वेनप्रतीयमानांश्रुतिमनूद्यश्रुत्यैवव्याख्यातत्वाच्चनैक्यपरंकिंचिद्वाक्यमित्याह ॥ पुरुषएवेति ॥ अतीतैष्यत्खंडांतेषुभेदस्यैवोक्तेश्चनात्रैक्यंविवक्षितमित्याह ॥ हिरण्मयइत्यादिना ॥ सांसारिकभेदपरमेतदितिनमंतव्यमितिभावेनोक्तं ॥ मुक्तानामपीति ॥

भा० । तावाएताःसर्वाऋचःसर्वेवेदाःसर्वेघोषाएकैवव्याहृतिःप्राणएवेतिसर्वनामाभिधेयत्वंभगवतउक्त्वातत्रैवप्रमाणत्वेनविश्वामित्रंह्येतदहरित्याद्याख्यायिकोक्ता । तस्मात्सर्वांतर्यामित्वात्सर्वगुणवत्त्वात्सर्वशक्तित्वाच्चसर्वनामवत्त्वमेवविष्णोरुच्यते नतुसर्वस्वरूपत्वं । उक्तंचभारते । स्रष्टृत्वाच्चैवपातृत्वान्नियमाच्चप्रकाशनात् । सर्वत्वमुक्तंविष्णोस्तुनतुसर्वस्वरूपतइति । पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यमितिपुरुषरूपेणैवेदंसर्वं व्याप्तंयद्भूतंयच्चभव्यं । आतृणादाकरीषात्सर्वंभगवानितिमिथ्यादृष्टिरेवेतिचश्रुतिः । हिरण्मयोहवाअमुष्मिंल्लोकेसंभवतिहिरण्मयःसर्वेभ्योभूतेभ्योदृश्येयएवंवेद । अमृतोहवाअमुष्मिंल्लोकेसंभवत्यमृतःसर्वेभ्योभूतेभ्योदृश्येयएवंवेदसएतेनप्रज्ञेनात्मनास्माल्लोकादुत्क्रम्यामुष्मिन्त्स्वर्गेलोकेसर्वान्कामानाप्त्वामृतःसमभवत्समभवदित्यादिनामुक्तानामपिभेदस्यैवोक्तेश्च ।

कथमनेनभेदलाभइत्यतआह ॥ नहीति ॥ ददृशइत्यस्यप्रतिपदंदृश्यतइति । भेदाभावेसर्वेभ्योभूतेभ्योदृश्यतइतिसर्वपदं ब
हुवचनं द्रष्टृदृश्यभावकथनंचायुक्तमित्यर्थः । ननुसर्वेभ्योभूतेभ्यइत्यस्यसर्वैरमुक्तैर्दृश्यतइत्यर्थः । तथाचामुक्तेभ्योमुक्तभेदस्या
नेनोक्तावपिनमुक्तानांभेददृढंप्रमाणमित्यतआह ॥ नचेति ॥ नप्रेत्यसंज्ञास्तीत्यादावमुक्तज्ञेयत्वाभावस्योक्तत्वादितिभावः ।
दृष्टाचतेभगवतानारदेनेतिगीताभाष्येसाधनविशेषेणनारदेनदृश्यत्वोक्तावपिसर्वैर्भूतैर्नदृश्यतइतिभावेनोक्तं ॥ सर्वैरिति ॥
कथंचित्सत्योपाधिकृतसत्यजीवभेदवादिभिर्मिथ्योपाधिकृतमिथ्याभेदवादिभिश्चबद्धमुक्तव्यवस्थांगीकारात्संसारिभिर्भूतैर्मुक्तो
दृश्यतइतिवक्तुंशक्यते । एकजीववादेतु सर्वेभ्योभूतेभ्यइत्येतत्सर्वथानुपपन्नमेव । तैरेकएवजीवःसंसरति मुच्यतेच अन्येतद
ज्ञानेनस्वरूपेणकल्पिताः तस्यतत्वज्ञानेनमुक्तौनकिंचिदवशिष्यतइत्यंगीकारेणामुक्तैर्भूतैर्मुक्तस्यदृश्यत्वायोगादित्यभिप्रेत्याह ॥
एकत्वेत्विति ॥ जीवैकत्वपक्षइत्यर्थः । व्यर्थं विरुद्धार्थं । अंगीकृत्यैवददृशइतिपूर्यतइत्युक्तं । वस्तुतस्तुतदपिनसंभवती
त्याह ॥ नचेति ॥ एकजीववादिनांपक्षेन्योनपश्यति । तन्मुक्तयवस्थायामन्याभावात् । नापिस्वयंस्वात्मानंपश्यति । कुतइ
त्यतआह ॥ कर्त्रीति ॥ ततश्चकिमित्यतआह ॥ अतइति ॥ मुक्तबाहुल्यस्यस्वज्ञेयत्वस्यचानंगीकारात्सर्वेभ्योभूतेभ्योनदृ
श्यतइत्यादिबहुश्रुतिभिर्विरोधएवेत्यर्थः । नन्वेकस्यांक्रियायांकर्तृकर्मणोरेकत्वंविरुद्धमितिसर्वैरंगीकार्यमेव । तत्किमितितेवदं

भा० । नहिभेदाभावेसर्वेभ्योभूतेभ्योदृश्यतइतियुज्यते । नचामुक्तैःसर्वैर्भूतैर्मुक्तोदृश्यते । एकत्वेतुददृशइत्येतावतापूर्यतेसर्वेभ्योभूतेभ्य
इतिव्यर्थं । नचतेषांपक्षेस्वयमपिस्वात्मानंपश्यति । कर्तृकर्मविरोधइतिहितेवदंति । अतःसर्वश्रुतिविरोधएवजीवेश्वरैक्यांगीकारे ।

तीत्युच्यतइत्यतआह ॥ नचेति ॥ विरोधोहिनियमेनसहानवस्थिततयादर्शनमानकोभवति नचात्रतादृशंप्रमाणमस्तीत्यर्थः ।
नकेवलंविरोधेप्रमाणाभावः किंत्वविरोधेप्रमाणमस्तीत्याह ॥ श्रुतीति ॥ तदात्मानमेवावेदहंब्रह्मास्मीत्यादिश्रुतिर्मामहंजाना
मीत्यनुभवः । स्वदर्शनादेरित्यादिपदेनमुच्यतेवत्सःस्वयमेवेत्यादेःस्वमोचनादेर्ग्रहणं । तथाचोक्तमनुव्याख्याने ॥ विरोधोह्य
विरोधश्चयतोदर्शनमानकौ ॥ अतोदृष्टेविरोधःकथमिति ॥ सएतेनप्राज्ञेनेत्यत्रकथंमुक्तानांभेदोक्तिरित्यतआह ॥ नचतेषांप
क्षइति ॥ तेषामभेदवादिनांपक्षेऽस्माल्लोकाच्छरीरादुत्क्रम्येत्युक्तस्यशरीरादुत्क्रांतस्यज्ञानिनःप्राज्ञेनसर्वज्ञेनपरमात्मना तदनु
ग्रहेण । सर्वकामावाप्तिर्नामांगीक्रियतेऽतोभेदपक्षएवेयंश्रुतिःसमंजसेतिभावः । उपसंहरति ॥ तस्मादिति ॥ तस्मात्प्राज्ञेना
त्मनेतिश्रुतिवचनादपितेवेदविरुद्धवादिनइत्यर्थः । यद्वाभेदमिथ्यात्वब्रह्मैक्याद्यंगीकारेदूषणांतरमाह ॥ तस्मादिति ॥ वे
दोक्तमिथ्यात्वांगीकारेमायिनोपिवेदविरुद्धवादिनोबौद्धाइत्यर्थः । तदुपपादयति ॥ नचेति ॥ ब्रह्मवादिनइतिशेषः । कुतइ
त्यतआह ॥ नहीति ॥ शून्यवादिनाशून्यस्य ब्रह्मवादिनाब्रह्मणोऽवाच्यत्वाद्यंगीकारात्सर्वावाच्यंसर्वाज्ञेयंशून्यंब्रह्मचेतिनक
श्चिद्विशेषइत्यर्थः । एतदुपपादनंच अवाच्यंसर्वशब्दैतल्लक्ष्यतेचाखिलैःपदैः ॥ अज्ञेयंज्ञानलभ्यंचेति शून्यत्वादिश्लोकोदाहर

भा० । नचकर्तृकर्मविरोधोनामास्तीत्यत्रकिंचिन्मानं । श्रुत्यनुभवसिद्धत्वाच्चस्वदर्शनादेः । नचतेषांपक्षेप्राज्ञेनसर्वज्ञेनपरमात्मनासर्वका
मावाप्तिर्नामांगीक्रियतेशरीरादुत्क्रांतस्यज्ञानिनः । तस्माद्वेदविरुद्धवादिनएवतेपि । नचशून्यवादिनःकश्चिद्विशेषोदृश्यते । नहिसर्वावाच्यंसर्वा
ज्ञेयंशून्यंचेतिकश्चिद्विशेषः ।

णपूर्णतत्वोद्योतेकृतंबोध्यं । नन्वस्तिब्रह्मेतिचेद्वेदेत्यादेरस्तित्वावगमाद्ब्रह्मणोनशून्यत्वापत्तिरितिचेदत्रवक्तव्यं । कथमेषाश्रुति ब्रह्मणोस्तित्वंबोधयति । वचनवृत्त्यालक्षणयावा । आद्यंदूषयति ॥ नहीति ॥ सर्वशब्दावाच्यंकेनापिप्रमाणेनाज्ञेयंब्रह्मेत्यंगी कृतं । कथमेवंसत्येषाश्रुतिर्ब्रह्मणोस्तित्वंवचनवृत्त्याबोधयति । तथाचश्रुत्याऽस्तित्वानवगमाद्ब्रह्मशून्यंचेतिनकश्चिद्विशेषइत्य र्थः । द्वितीयंदूषयति ॥ केनापीति ॥ ननुक्षीरमाधुर्यादयोरसविशेषाअवाच्याअपिलक्ष्यादृश्यंतइत्यतआह ॥ क्षीरेति ॥ तैरेव क्षीरमाधुर्यादिशब्दैरेव । यद्वाशास्त्रप्रसिद्धैर्नामविशेषैरित्यर्थः । किंतच्छास्त्रमित्यतस्तत्पठति ॥ विशदमिति ॥ शब्द निर्णयेसितस्येतिपाठः । सूदशास्त्रेगुडस्येतिपाठः । अतोनसुधाविरोधः । एवमागमाभावेनास्तित्वंब्रह्मणोनसंभवतीत्युक्तं । नि र्विशेषत्वयुक्तिविरोधाच्चनसंभवतीत्याह ॥ नचेति ॥ ब्रह्मणोस्तित्वंनाम सत्ता सामान्यंवा विधिमुखप्रत्ययवेद्यत्वंवा आरोपि तासत्वव्यावृत्तिर्वा नपक्षचतुष्टयमपिसंभवति । सर्वविशेषविनिर्मुक्तत्वांगीकारात् । स्वरूपसत्त्वंसर्वविशेषविनिर्मुक्तस्ययुज्यत इतिचेन्न । शून्यस्यापितदापत्तेः । असत्त्वव्यावृत्तेरपितेनाप्यंगीकारात् । तदुक्तं नास्यसत्त्वमसत्त्वंवानदोषोगुणएववेतीत्याश येनोपसंहरति ॥ अतइति ॥ ननुयदुक्तंनिर्विशेषत्वान्नसत्त्वमितितदयुक्तमप्रयोजकत्वात् । केवलोनिर्गुणश्च निष्कलंनिष्क्रि

भा० । केनापिशब्देनावाच्यस्यलक्षणायामपिप्रमाणंनास्ति । क्षीरमाधुर्यादयोपितैरेवशब्दैरुच्यंते । विशदंक्षीरमाधुर्यंस्थिरमाज्यस्यती क्ष्णकं । गुडस्यपनसादीनांनिर्हारीत्यभिधीयतइतिशब्दनिर्णये । नचसर्वगुणदोषक्रियाविनिर्मुक्तस्यास्तित्वमपिकुत्रचिद्दृष्टं । अतःशून्यवादिन एवतेपि ।

यंशांतमित्यादौगुणाद्यभावस्य अस्तिब्रह्मेतिचेद्वेदेत्यादिश्रुतिष्वस्तित्वस्य सत्तामात्रंनिर्विशेषंनिरीहमित्यादिस्मृतिषुचोभयस्यो क्तेरित्यतस्तत्प्राकृतगुणादिविशेषाभावपरं । काठकेसत्त्वव्याप्यत्वेनविशेषाभिधानादितिभावेनाह ॥ अस्तीत्येवेति ॥ ब्रह्मा स्तीत्युपलब्धस्योपलब्धिमतएव तत्वं प्रकृतिपुरुषाख्यं भावयत्युत्पादयतीतितत्वभावोविष्णुःप्रसीदतीत्यर्थः । आदिपदेनांगु ष्ठमात्रःपुरुषोंतरात्मासदाजनानांहृदयेसन्निविष्टः । तंविद्याच्छुक्रममृतमित्यादिवाक्यशेषग्रहणं । प्रसादोनामेच्छाविशेषोगुणां तरंवेतिसुधायामुक्तं ॥ इत्यादिकर्मणीति ॥ यस्यब्रह्मचक्षत्रमितिसर्वात्तृत्वं आदिपदेनऋतंपिबंताविवाक्यशेषोक्तकर्मफल भोगादिगृह्यते । इत्यादिगुणाः देवाश्रयत्वादिधर्माः । तत्रैव यस्यांकाठकश्रुतावस्तित्वमुक्तं तत्रैव । मुक्तानांतारतम्यस्योक्त त्वाद्भेदस्यासत्यत्वेतदयोगाद्भेदःसत्योंगीकार्यइत्याह ॥ अक्षण्वंतइति ॥ श्रुतिस्मृत्याव्याचष्टे ॥ श्रुत्वेत्यादिना ॥ अक्षण्वं तोक्षिमंतः । अनोनुडितिनुट् । अक्षिमत्त्वंकर्णवत्वंचसंसारिसाधारणमित्यतउक्तंश्रुत्वेति ॥ दर्शनाद्दर्शनफलंप्राप्तत्वादक्षण्वंत श्चशब्दात्प्राप्तसमस्तेंद्रियफलाइत्यर्थः । सखायःपरस्परंसखायोमुक्ताइत्यस्यतात्पर्यमुक्तास्तुयोगणाइति ॥ मनोजवेषु मनोजवः

भा० । अस्तीत्येवोपलब्धस्यतत्वभावःप्रसीदतीत्यादिनाप्रसादादिगुणाश्चभगवतोदृश्यंते । यस्यब्रह्मचक्षत्रंचोभेभवतओदनइत्यादिकर्मा णिच । यस्मिन्देवाःश्रिताःसर्वइत्यादिगुणाश्चतत्रैवोक्ताः । अक्षण्वंतःकर्णवंतःसखायोमनोजवेष्वसमाबभूवुः । आदन्नासउपकक्षासउत्वेहृदाइव स्नात्वाउत्वेदृदृश्रेइतिमुक्तानामपितारतम्यंचोक्तं । श्रुत्वाविष्णुंकर्णफलंप्राप्तत्वात्कर्णसंयुताः । अक्षण्वंतोदर्शनाच्चविष्णोर्मुक्तास्तुयेगणाः ।

प्रज्ञातिशयः । बहुवचनमाद्यर्थे । ज्ञानादिगुणेषुअसमास्तारतम्योपेताबभूवुरित्यस्यतात्पर्यंतारतम्यंचेति ॥ नकेवलंज्ञानादि गुणेषुकिंतुभगवत्सामीप्येचतारतम्यमादद्मासइत्यादिनोक्तमित्यप्याह ॥ तारतम्यंचेति ॥ तेषुकेचिदादद्मासः प्रमाणेद्वयसच् दद्मचूमात्रचइतिपाणिन्युक्तेःदद्मशब्दःप्रमाणवाची । तथाच आ बहु दद्मं प्रमाणं यस्यसआदद्मः क्षीराब्धिः । ततःअर्शआदि भ्योच्आज्ञसेरसुगित्यसुगागमश्च । ततश्चादद्मोबहुप्रमाणःक्षीराब्धिरेषामस्तीत्यादद्मासःक्षीरसागरगाइतियावदित्यर्थमभिप्रेत्योक्तं ॥ क्षीरसागरदद्माइति ॥ क्षीरसागरस्यदद्मंप्रमाणंयेषांतेक्षीरसागरदद्माःबहुप्रमाणक्षीराब्धिगाइतिभावः । तदुक्तंतत्व निर्णयटीकायां । आदद्माअर्शआदिभ्योच्बहुप्रमाणक्षीराब्धिमंतस्तत्क्रीडापराइति । यद्वाज्ञानपादीयसुधायां तत्रकेचिदाद द्मासः आस्यशब्दस्याभावः आस्यंपरिमाणमस्येत्यादद्ममृतं । तदेषामस्तिस्थानमित्यर्शआदिभ्योच् । आस्यपरिमाणेसुधानि धौविहरंतइतिदूरत्वमुच्यते । यद्वातरतमशब्दइवदद्मशब्दोप्यप्रत्ययोस्ति । ततआसम्यक्दद्मामद्माइत्युक्त्वात्तदनुसारेणक्षीर सागरदद्माइत्यस्यक्षीरसागरेदद्ममास्यप्रमाणममृतंयेषांतेक्षीरसागरदद्माइतिवा क्षीरसागरेदद्मामद्माइतिवार्थोबोध्यः । केचिदुप गताःकक्षंवनमुपकक्षाः । उशब्दएवार्थः । श्वेतद्वीपगतवनक्रीडारताएवेति मध्यमत्वमुच्यतइत्यर्थमभिप्रेत्योक्त मुपस्थिता इति॥ब्रह्मवनंब्रह्मवननामकं त्वे केचि त्स्नात्वाइवस्नाताइवामृतंपिबंतः । ह्रदाःऐराख्यामृतह्रदस्थाइतिसमीपगत्वमुच्यतइत्यर्थ

भा० । तारतम्यंचतेषांहिश्रुतावुदितमंजसा । क्षीरसागरदद्मास्तुकेचित्तिष्ठंतिमुक्तिगाः । उपस्थिताद्ब्रह्मवनंकेचिदश्वत्थमंडलं ।

मभिप्रेत्यव्याख्यातं ॥ ऐरेह्रदइति ॥ केचिदैरेह्रदेपिवर्ततइत्यर्थः । उक्तंचबृहद्भाष्ये । अमृतह्रदेचकेचिच्चपिबंति स्नातवत्सदे ति । उत्वेदद्दश्रइत्यस्य त्वेउ केचिद्देवाएवभगवंतंदद्दश्रेदद्दशिरइत्यस्यव्याख्यानं देवाएवेति ॥ देवाएवसदेत्यस्यव्यावर्त्यमाह ॥ सागरादीति ॥ ज्ञानपादीयसुधायांतत्वनिर्णयटीकायांचामृतह्रदेषुस्नाताह्रदाइवगंभीराइतिसङ्ग्यायरत्नावल्यनुसारेणस्ना त्वास्नातव्याह्रदाइवगंभीराःपरमेश्वरंददृशुरित्यर्थीतरमुक्तंज्ञेयं । यत्रब्रह्मेत्यादेरयमर्थः । एताऋचोमारुतप्रार्थनारूपाः । संसा रात्पावयित्वामहानंदेमिनोतिक्षिपतीतिपवमान इंदो इष्टप्रदानशीलवायो । ब्रह्मा मुक्तश्चतुर्मुखो । यत्र यस्मिन्लोके छंदस्यां छंदःसंबंधिनीं वाचं वेदवाचं । वदन् व्याकुर्वन् । ग्राव्णासुतेनसोमेन सोमे सौम्यस्वरूपेभगवद्विषये इष्ट्वाप्रसन्नेनतेनसोमेन विष्णुनास्वस्यानंदंव्यंजयन्मुक्तनिकरैःपूज्यते । तत्रस्थायेंद्रायविष्णवेमांपरिस्रव प्रापय । यत्रलोकेऽजस्रंसूर्यज्योतिर्यस्मिन् लोकेस्वरानंदरूपोविष्णुश्च हितं निहितः । अमृतेमुक्तिरुपेऽक्षितेनाशरहितेतस्मिन्लोके मांधेहि निधेहि । तस्मिन्नेवलोकेवर्त मानायेंद्रायेंदोपरिस्रव । यत्रलोकेवैवस्वतोराजायमोस्ति यत्रचदिवोवायुपल्याअवरोधनंपरिवारभूतादेवताश्चसंति । यत्रच

भा० । ऐरेह्रदेकेचिदपिदेवाएवसदाहरिं । नागभोगशयंमुक्तादद्दश्रेधिकमोदिनः। सागरादिस्थितांविष्णुंपश्यंतिकेचिदेवहीतिब्रह्मसारे। यत्रब्रह्मापवमानछंदस्यां३वाचंवदन् । ग्राव्णासोमेमहीयतेसोमेनानंदंजनयन्निंद्रायेंदोपरिस्रव । यत्रज्योतिरजस्रंयस्मिँलोकेस्वर्हितं । तस्मिन्मांधे हिपवमानामृतेलोकेअक्षितइंद्रायेंदोपरिस्रव । यत्रराजावैवस्वतोयत्रावरोधनंदिवः । यत्रामूर्यह्रतीरापस्तत्रमाममृतंकृधींद्रायेंदोपरिस्रव । यत्रानु कामंचरणंत्रिनाकेत्रिदिवेदिवः । लोकायत्रज्योतिष्मंतस्तत्रमाममृतंकृधींद्रायेंदोपरिस्रव ॥

यह्वतीःस्यंदमाना अमूरापोगंगाद्यब्देवताःसंति तत्रलोकेमाममृतंकृधि । त्रिनाके कंसुखमकंदुःखं नास्त्यकंदुःखंयत्रतन्नाकंपरमसुखसाधनंत्रिविधंचतन्नाकंचत्रिनाकंश्वेतद्वीपानंतासनवैकुंठाख्यंधामत्रयं तस्मिन्त्रिनाके त्रिदिवशब्दवाच्ये । यत्रलोकेदिवोवायुपद्व्याअन्येषांवाअनुकाममिच्छानुसारेणचारणमस्ति । कथंयत्रवायुपद्व्याज्योतिष्मंतोलोकाःपुराणिसंति तत्रमामृतं कृधि । यत्रलोकेविष्णोस्तत्परमंपदंस्वरूपंसुकृतकर्मभिर्देवैर्महीयतेपूज्यतेतत्रमाममृतंकृधि । यत्रलोके आनंदा विषयानभिव्यक्ता निरुपाधिकभगवद्भक्त्यादिव्यंग्याःसुखविशेषाः । मोदाःसजातीयभोगनिमित्तकाः । प्रमुदोविजातीयभोगविशेषनिमित्तकाः । मुदोविजातीयत्वेप्यल्पभोगनिमित्तकाः । आसतेतिष्ठंति । यत्रकामस्येच्छायाःकामाःकाम्यंतइतिविषयाःआप्ताःपर्याप्ताःतत्रमाममृतंकृधीत्यर्थः । एतेनभोगविशेषाल्पभोगजन्यसुखव्यतिरेकेणभोगजन्यसुखाभावान्मोदाइतिव्यर्थमितिनिरस्तं । सजातीयभोगाभिप्रायेणमोदाइत्युक्तेः । विजातीयेपिभोगबाहुल्याल्पताविवक्षयामुदःप्रमुदइत्युक्तेःसंभवात् । अतएव भाष्यांतेसुखमानंदइत्युक्तोमोदोभोगनिमित्तकः । प्रमोदस्तद्विशेषोत्थोमुन्नामात्यल्पभोगतइतिश्रौतपाठमतिक्रम्यप्रमुदइत्येतव्याख्यानानंतरंमुदइत्येतद्व्याख्यातंबोध्यं । उदाहृतानामृचांप्रकृतोपयोगमाह ॥ इत्यादिनेति ॥ आदिपदेनयत्रकामानिका

भा० । यत्रतत्परमंपदंविष्णोर्लोकेमहीयते । देवैःसुकृतकर्मभिस्तत्रमाममृतंकृधींद्रायेंदोपरिस्रव ॥ यत्रानंदाश्चमोदाश्चमुदःप्रमुदआसते । कामस्ययत्राप्ताःकामास्तत्रमाममृतंकृधींद्रायेंदोपरिस्रव । इत्यादिनात्रह्मसूर्ययमादीनां

माश्चयत्रब्रह्मस्यविष्टपं ॥ स्वधाचयत्रतृप्तिश्चतत्रमाममृतंकृधीत्यादेर्ग्रहणं ॥ सर्वदेवीनामिति ॥ देवैःसुकृतकर्मभिरित्युक्तेरितिभावः । सोमयागादिकमित्यादिपदेनमहीयतेसुकृतकर्मभिरित्युक्तंभगवदर्चनादिकंगृह्यते । एषुवाक्येषूक्तानांमुक्तत्वेज्ञापकमाह ॥ मुक्ताइति ॥ एवममृतश्रुत्यामुक्तत्वंप्रसाध्यलिंगेनापिसाधयति ॥ अमुक्तानामिति ॥ श्रुत्युक्तेमुक्तभोगादौसूत्रसंमतिमप्याह ॥ मुक्तइत्यादिना ॥ सतत्रपर्येतिजक्षन्क्रीडन्रममाणइत्यत्रमुक्तउच्यतेनतुक्रियाप्रतीत्यासंसारी । कुतः । अथयदेनंमुक्तोनुप्रविशतिमोदतेप्रमोदतइतिबृहच्छ्रुतौप्रतिज्ञानात् । मुक्तानांस्वसंकल्पादेवभोगसिद्धिः संकल्पादेवास्यपितरःसमुत्तिष्ठंतइतिश्रुतेः । सर्वान्कामानाप्त्वाऽमृतःसमभवदितिश्रुतौजगद्व्यापारवर्जं सर्वान्कामानाप्त्वेतिविवक्षितं । भोगमात्रस्यविशेषे सत्यपिमुक्तस्यसाम्यमेव नभोगविशेषस्तद्वृद्ध्यादौकारणं । कुतःअस्मिन्नर्थे । एतमानंदमयमात्मानमनुप्रविश्यनजायतेनम्रियतेनह्रसतेनवर्धतेयथाकामंरमतेयथाकाममुपरमतइतिलिंगसद्भावात् । भोगस्यभावाभावावुक्त्वापिवृद्ध्याद्यभावस्योक्तत्वात्तस्यतत्रलिंगत्वादितिभावः । नमुक्तस्यपुनरावृत्तिः । नचपुनरावर्ततइतिश्रुतेः सर्वान्कामानाप्त्वेतिश्रुतेश्च । नहिकश्चिच्छुभात्पुनरावृ

भा० । सर्वदेवानांदिवोदेव्याअवरोधभूतानांसर्वदेवीनांगंगाद्यब्देवतानांचवेदव्याख्यानंसोमयागादिकंकामचरणंचमुक्तानांभेदेनावस्थितानामुच्यते । मुक्ताश्चात्रोच्यंतइतिप्रतीयते । अमृतंकृधीतिवचनात् । अमुक्तानांस्वेस्वेलोकेवस्थानंहितेषां । मुक्तानांहिविष्णुलोकेवस्थानंदेवानांमुक्तःप्रतिज्ञानात् । संकल्पादेव(च)तच्छ्रुतेः । जगद्व्यापारवर्जं । भोगमात्रसाम्यलिंगाच्च । अनावृत्तिःशब्दादनावृत्तिःशब्दात् । इत्यादिमुक्तसूत्रेभ्यश्चमुक्तानांविष्णोर्भेदोभोगादिकंचसर्वंप्रतीयते ।

त्तिक ..... । मुक्त्वभगवत्प्रवेशनमादाक्तः । द्वितीयंभोगः । तृतीयेत्वैश्वर्यम यादोक्त्याभोगोभेदश्च । चतुर्थेआनंदमयात्मप्रवेशोक्त्याभेदोभोगश्च । पंचमेसर्वान्कामानाप्त्वेत्यपुनरावृत्तिर्भोगः । आदिश ब्देनप्रत्यक्षोपदेशादितिचेन्नाधिकारिकमंडलस्थोक्तेरित्यत्रतायोवेदसवेदब्रह्मसर्वेस्मैदेवाबलिमावहंतीतिमुक्तब्रह्मणःपूज्यत्वं । स्थितिमाहदर्शयतश्चैवंप्रत्यक्षानुमानेइत्यत्र दर्शन्नेवब्रह्मदर्शन्नेवात्मानंतस्यैवंदर्शयतोनापत्तिर्नेवविपत्तिः एतत्सामगायन्नास्तइति वृद्धिह्रासाभावोवेदव्याख्यानादिकंचोच्यतइतिगृह्यते ॥ इत्यादिसूत्रेभ्यश्चेति ॥ नकेवलंयत्रब्रह्मेत्यादिश्रुतिभ्यः । किंतुप ठितसूत्रेभ्यश्चमुक्तानांविष्णोर्भेदोभोगइत्येतत्प्रतीयते । आदिपदोपात्तेभ्यःप्रत्यक्षोपदेशादित्यादिसूत्रेभ्यश्चग्राव्णासोमेमहीयत इत्यादिनोक्तंब्रह्मणोऽन्यमुक्तैःपूज्यत्वंप्रतीयतइत्यर्थः । नन्वक्षण्वंतः यत्रब्रह्मात्रिनाकेत्रिदिवइत्यादिश्रुतेर्गौणमोक्षपरत्वेनोपच रितार्थत्वंकिंनस्यान्मोक्षेऽभिरुचिजननायकेवलमर्थवादत्वंवाकिंनस्यादित्यतआह ॥ नचेति ॥ निश्चितार्थस्यवेदस्य । कुतोन युज्यतइत्यतआह ॥ निर्णयेति ॥ येषांसूत्राणामुपक्रमादिनाश्रुत्यर्थनिर्णायकत्वात् नतन्निर्णीतार्थस्यौपचारिकत्वमित्यर्थः । सूत्रनिर्णीतार्थस्यापिवेदस्यौपचारिकत्वेबाधकमाह ॥ अतिप्रसंगश्चेति ॥ आदिपदेनरुच्यर्थमर्थवादत्वकल्पनइत्यर्थः । सूत्र निर्णीतार्थस्योपचरितार्थत्वे तदनन्यत्वमारंभणशब्दादिभ्यइत्यादिसूत्रनिर्णीतार्थस्य तत्सत्यंसआत्मातत्वमसिश्वेतकेतोइत्यादि

भा० । ग्राव्णासोमेमहीयतेइतिब्रह्मणोन्यमुक्तैःपूज्यत्वंचप्रतीयते । नचसूत्रेषुनिश्चितार्थस्यौपचारिकत्वंवक्तुंयुज्यते । निर्णयात्मकत्वात्तेषां । अतिप्रसंगश्चोपचारादिकल्पने ।

महावाक्यार्थस्याप्युपचरितत्वप्रसंगेनाभेदब्रह्मसत्यत्वयोरपिप्रहाणप्रसंगइत्यर्थः । ननुसूत्राणामपिनिर्णेयत्वात् कथंनिर्णायकत्व मित्यतआह ॥ ब्रह्मसूत्रेति ॥ नन्वभावंबादरिराहह्येवमित्यादिसूत्रैर्यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदित्यादिश्रुत्यवष्टंभे ननिर्गुणब्रह्मभावएवमोक्षोनतुश्वेतद्वीपादौशरीरेंद्रियादिवैशिष्ट्येनभूरिभोगइतिनिर्णीतत्वेनकथंतादृशवेदवाक्यानामुपचरितार्थ त्वकल्पनेनिर्णयात्मकसूत्रविरोधः । पठितसूत्राणामर्थांतरपरत्वादित्यतआह ॥ बहुनेति ॥ एषशास्त्रस्यनिर्णयइति ॥ ब्र ह्ममीमांसाशास्त्रेणक्रियमाणोमोक्षपरवाक्यार्थनिर्णयएषएवेत्यर्थः । किंचस्पष्टसूत्राणामर्थांतरंपरिकल्प्यपठितश्रुतीनामुपचरि तमोक्षपरत्वस्यार्थवादत्वस्यवाकल्पनंकिंस्वाचार्यवचनात्क्रियते । उतभोगादिशून्यनिर्गुणमोक्षसत्त्वेनिरवकाशप्रमाणबलात् । आद्यंदूषयति ॥ नचेति ॥ द्वितीयंदूषयति ॥ नचेति ॥ ननुसायुज्यलक्षणाप्रसिद्धोत्तमामुक्तिरेवनिर्गुणमुक्तिरित्यतआह ॥ भुंजतइति ॥ उक्तंचगीताभाष्ये सायुज्यंचग्रहवदिति । बाह्यभोगान्विष्ण्वानंदाद्यतिरिक्तान्भोग्यान् । बाह्यभोगेप्यवांत रभेदोमंतव्यइत्याह ॥ तारतम्येनेति ॥ उत्तमभोग्याःनावराणामित्यर्थः । अवरभोग्यभोगेपिविशेषमाह ॥ कांश्चनेति ॥

भा० । ब्रह्मसूत्रपदैश्चैवहेतुमद्भिर्विनिश्चितैरितिनिश्चितानिब्रह्मसूत्राणि । बहुनात्रकिमुक्तेनयावच्छ्वेतंनगच्छति । योगीतावन्नमुक्तःस्यादेष शास्त्रस्यनिर्णयइत्यादित्यपुराणे ॥ नचनिर्णायकानिभगवद्वाक्यान्यपहायमानुषवाक्यैरेवतेषामुपचारत्वादिकल्प्यं । नचभोगरहितामुक्तिर्नामा न्यास्तीत्यत्रकिंचिन्मानं । भुंजतेपुरुषंप्राप्ययथादेवग्रहादयः । तथामुक्तावुत्तमायांविष्णुमाविश्यभुंजते । विष्णोर्वशाश्चतेसर्वेसर्ववेदादुःखवर्जिताः । नतुविष्णुगुणान्सर्वेभुंजतेतेकदाचन ॥ बाह्यभोगान्भुंजतेचतारतम्येनकांश्चन । विष्णोर्देहाद्बहिश्चापिनिर्गच्छंतियथेष्टइतिस्कांदे ।

अवररूयादिभोगाभावादितिभावः । जनिमरणाभावलिंगेनपरममोक्षतयावगतेपि साधर्म्यमागताइतिभेदस्योक्त्वाऽभेदसत्यत्वं भोगादिकंसर्वयुज्यतइत्याह ॥ इदमिति ॥ खंडार्थमुपसंहरति ॥ तस्मादिति ॥ ११ ॥ बृहतीसहस्रंभगवत्तर्पकमितिपूर्वखंडेनिरूपितं । प्रसिद्धऋक्छाखायांबृहतीछंदोनिबद्धऋक्सहस्रादर्शनात्कथंतैःशंसनमित्यतस्तत्संपादनप्रकार स्तदभिमानिदेवताः प्रतिपाद्यरूपाणिचोच्यंते ॥ तद्वाइदमिति ॥ इदंबृहतीसहस्रंबृहतीछंदोनिबद्धाभिःसहस्रऋग्भिःशंसनीयमितिनियममपहाययैःकैश्चिच्छंदोभिर्निबद्धाभिःऋग्भिःशंसिताभिःषट्त्रिंशतमक्षराणांसहस्राणिभवंति । तद्वै तथाशंसनेवै । संपन्नंसंपादितंभवतीत्यर्थः । एवंबृहतीसहस्रसंपादनप्रकारमुक्त्वाभिमानिदेवतोच्यते ॥ तस्येति ॥ तस्यबृहतीसहस्रस्ययानिव्यंजनानि याव्यंजनाभिमानिदेवता तच्छरीरं सैवप्राणिनाशरीराभिमानिदेवतास्वायंभुवोमनुः । योघोषः येघोषाः स्वराः अज्वर्णाः । यस्तदभिमानीसआत्मासर्वजीवाभिमानीचतुर्मुखः । यद्वाघोषपदेनकादिवर्गपंचकेप्रथमद्वितीयाक्षराणिविहायान्येवर्णाः यरलवशब्दिताअंतस्थाः हकारश्चेत्येतेघोषनामकाः । तदुक्तंवेदशिक्षायां । प्रथमांश्चद्वितीयांश्चहित्वावर्ग्यांस्त्रयस्त्रयः । अंतस्थाश्चहकारश्चघोषवंतःप्रकीर्तिताइति । यऊष्माणः यःशषसहाभिमानी । सप्राणः प्राणवाय्वभिमानीमुख्यवायुः । एतद्विद्यायामधि

भा० । इदंज्ञानमुपाश्रित्यममसाधर्म्यमागताः । सर्गेपिनोपजायंतेप्रलयेनव्यथंतिचेतिभगवद्वचनं । तस्मान्मुक्तैरपीज्यमानःसर्वस्माद्भिन्नःसर्वोत्तमःसर्वनामासर्वशक्तिःसर्वगुणसंपूर्णोनारायणःसर्ववेदादिषूच्यतइतिसिद्धं ॥ ३ ॥

उप० । तद्वाइदंबृहतीसहस्रंसंपन्नंतस्ययानिव्यंजनानितच्छरीरंयोघोषःसआत्मायऊष्माणःसप्राण

कारिणःफलंचोच्यते ॥ एतदिति ॥ तदेतदभिमानिदेवता उपलक्षणमेतत् । प्रतिपाद्यंचविष्णुंविद्वान्वासिष्ठः वासिष्ठोवसतामुत्तमोबभूव । ततः प्रवृत्तिनिमित्तादेतन्नामधेयंलेभे । ज्ञानफलमुक्त्वाव्याख्यानफलमुच्यते ॥ एतदुहेति ॥ उ उच्चमेतदेवप्रमेयं । इंद्रोविश्वामित्रायप्रोवाच । अतिरहस्यमुपदिदेशेत्याश्चर्येहशब्दः । व्याख्यैकस्यापिमहाफलाकिमुशिष्यांतरस्येतिभावेनोच्यते ॥ एतदुहैवेंद्रोभरद्वाजायेति ॥ तस्मादेतद्विद्योपदेशबलादेवेंद्रस्तेनस्वावगतेनबंधुनाविष्णुनातत्प्रसादेनहविरादिस्वीकारायययज्ञेष्वाहूयते । एवंबृहतीसहस्रसंपादनप्रकार मभिमानिदेवताः प्रतिपाद्य मधिकारिणं फलं चोक्त्वाउपसंहियते ॥ तद्वाइदमिति ॥ इदंबृहतीसहस्रंतद्वै तथावै । यावतीभिःऋग्भिःशंसिताभिरित्युक्तसंपादनाप्रकारेणोक्ताभिमानिप्रतिपाद्याधिकारिकत्वेनचसंपादितंभवतीत्यर्थः । प्रतिपाद्यभगवद्रूपाणांस्पष्टमनुक्तत्वात्तदक्षरगतानि तत्प्रतिपाद्यानिच वक्तुमुच्यते ॥ तस्यवाएतस्येति ॥ तस्यतथाप्रागुक्तप्रकारेणबृहतीछंदोबद्धऋक्छंसनमेवकार्यमितिनियममपहाययेनकेनापिरूपेणस्वायंभुवाद्यभिमन्यमानव्यंजनादिरूपेणचसंपन्नस्यैतस्यबृहतीसहस्रस्यतदंतर्गतरूपसहस्रस्यचप्रत्यृचमक्षराणांतन्नामकानांतद्गतरूपाणांच षट्त्रिंशतंभवति । अक्षरगतानांषट्त्रिंशद्रूपाणांस्वरव्यंजनभेदेनप्रत्येकंषट्त्रिंशतंभवति । आहत्यबृहतीसहस्रगतानामक्षराणांच सहस्राणिषट्त्रिंशतंभवंति । तथाक्षराणांव्यंजनानांस्वराणांतद्गतरूपाणांचप्रत्येकंसहस्राणिषट्त्रिंशतंभवंति । एतेषांरूपाणा

उप० । एतद्धस्मवैतद्विद्वान्वसिष्ठोवसिष्ठोबभूवततएतन्नामधेयंलेभएतदुहैवेंद्रोविश्वामित्रायप्रोवाचैतदुहैवेंद्रोभरद्वाजायप्रोवाचतस्मात्सतेनबंधुनायज्ञेषुहूयतेतद्वाइदंबृहतीसहस्रंसंपन्नंतस्यवाएतस्यबृहतीसहस्रस्यसंपन्नस्यषट्त्रिंशतमक्षराणांसहस्राणिभवंति

मधिष्ठानातरमुच्यत ॥ तावंतीति ॥ शतसंवत्सरस्याह्नां । अत्राहःशब्दोदिनपरः । अहोरात्रात्मकदिनानांसहस्राणिचतावं तिभवंति । अह्नांरात्रीणांचपृथक्षट्त्रिंशत्सहस्राणिभवंतीतिचज्ञेयं । ततश्चकिमित्यतउच्यते ॥ व्यंजनैरिति ॥ व्यंजनगतै रूपैरात्रीराप्नोतिस्वरगतैरहान्याप्नोति व्यंजनस्वरगतान्येवराज्यहर्गतानीतियावत् । एवंबृहतीसहस्ररूपाण्यधिष्ठानांतराणिचो क्त्वोपसंहियते ॥ तद्वाइदमिति ॥ इदंबृहतीसहस्रंतद्गतंरूपजातंतद्वैतथावै अहोरात्राधिष्ठिततयासंपन्नमित्यर्थः । एवमुपास कस्यफलंचोच्यते ॥ तद्वाइदमिति ॥ इदंबृहतीसहस्रं तत्प्रतिपाद्यरूपजातंतद्वै तथावै । अहोरात्राधिष्ठिततयासंपन्नमुपासि तंचेत् तदाशतवर्षहरिध्यानफलसंपादकंभवतीत्यर्थः । किंतस्यफलमित्यतस्तत्प्रपंच्यते ॥ तस्यवाएतस्येति ॥ यएवंवेदेत्या दावनुकृष्यव्याख्येयं । यएवमुक्तरीत्याबृहतीसहस्रस्वरव्यंजनगतरूपाणामहोरात्राधिष्ठितत्ववेदसएवंविद्वांस्तस्यबृहतीसहस्रस्यै वंसंपन्नस्यज्ञातस्यशंसितस्यवापरस्तादनंतरमेवैवंज्ञानादनंतरमेवप्रज्ञादिमयःसंभूयदेवताअप्येतीत्यन्वयः । प्रकृष्टज्ञानरूपत्वात्प्र कर्षेणांतर्यामिरूपेणज्ञापकत्वाच्चानिरुद्धःप्रज्ञः । सर्वदेवताधिदेवतात्वात्सर्वोत्तमद्योतनादिगुणस्वरूपत्वाच्चप्रद्युम्नोदेवता । पूर्ण गुणत्वान्मुक्तिप्रदानेनजीवानांबृंहणाच्चवासुदेवोब्रह्म । अं अमितं ऋतं शास्त्रं स्वविषयेकरोतीतिवा नित्यत्वाद्वा संकर्षणो मृतं । प्रज्ञादिश्चतूरूपोभगवान्मयः प्रधानंस्वामीतिज्ञानंयस्यसप्रज्ञादिमयः । एवंपुनःविशेषज्ञानवान्भूत्वादेवताःक्रमेणमारु

उप० । तावंतिशतसंवत्सरस्याह्नांसहस्राणिभवंतिव्यंजनैरेवरात्रीरा(प्नोति)प्नुवंतिस्वरैरहानितद्वाइदंबृहतीसहस्रंसंपन्नंतस्यवाएतस्यबृहती सहस्रस्यसंपन्नस्यपरस्तात्प्रज्ञामयोदेवतामयोब्रह्ममयोऽमृतमयःसंभूयदेवता

तांता॰अपिशब्दात्केशवंचैतीत्यर्थः । प्राग्व्यंजनैरेवरात्रीराप्नोतिस्वरैरहानीतिबृहतीसहस्रस्वरव्यंजनगतानांभगवद्रूपाणामहोरा त्रगतत्वमुक्तं । नकेवलमेतावत्किंतु पुरुषोच्चार्यत्वात्तेषांस्वरव्यंजनगतानांद्वासप्ततिसहस्ररूपाणांपुरुषगतत्वंतदुपास्यत्वंसूर्यनि यमिताहोरात्रगतानांसूर्यगतत्वंतदुपास्यत्वंचोच्यते ॥ तद्योहमिति ॥ यो यानिबृहतीसहस्रगतानिस्वरव्यंजनभेदेनद्वासप्त तिसहस्ररूपाणि । तत् तानि पुरुषैरहेयत्वादहंनामकानिपुरुषगतानीत्यर्थः । सोसौ स तानि यान्यहोरात्रगतानितान्येवरूपा ण्यसौ सूर्ये तिष्ठंतीत्यर्थः । यद्वा तद्योहंसोसाविति विशिष्टंवाक्यं । तस्यायमर्थः । तत्तस्मात्स्वरव्यंजनगतानांपुरुषगतत्वात्स्व रव्यंजनगतानामेवप्रागुक्तरीत्याहोरात्रगतत्वादहोरात्रगतानामेवसूर्यगतत्वाद्योहंपुरुषैरहेयत्वादहंनामापुरुषांतर्गतोद्वासप्ततिसह स्ररूपीभगवान्संएवासौसूर्येपिस्थितइति । नकेवलंपुरुषेषुस्थितःपुरुषैरहेयःपुरुषाख्यउपास्यः । किंतुसूर्यस्थोपि भास्करादिभिरु पास्यइत्युच्यते ॥ योसौसोहमिति ॥ योसौसूर्यगतोविष्णुः सोहं सूर्यादिदेवैरहेयउपास्यएवेत्यर्थः । तदुक्तमृषिणा । तत्सू र्यांतर्गतस्यबृहतीसहस्रस्वरव्यंजनाहोरात्राद्यचेतनगतत्वंपुरुषादिचेतनगतत्वंचमंत्रद्रष्ट्रोक्तं । सूर्यः सूर्यांतर्गतोभगवान् जगतो जंगमस्यचेतनस्य । तस्थुषः स्थावरस्य । गमनाद्यभावसाम्यात्तस्थुषइत्यचेतनमुच्यते । तथाचतस्थुषः अचेतनस्य । आत्मा अंतर्यामीत्यर्थः । सूर्यांतर्गतस्यस्वांतर्यामित्वमवश्यंज्ञातव्यंमुमुक्षुणेत्युच्यते ॥ एतदिति ॥ एतत्सूर्यांतर्गतंनारायणाख्यंब्रह्मै

उप० । अप्येतियएवंवेदतद्योहंसोसौयोसौसोहंतदुक्तमृषिणासूर्यआत्माजगतस्तस्थुषश्चेतेतदुहैवोपेक्षेतोपेक्षेत ॥ ४ ॥ इत्यैतरेयोपनिष त्सुद्वितीयारण्यकेद्वितीयोध्यायः ॥ २ ॥ २ ॥

वाधिकारीजीवःस्वस्योपसमीपईक्षेतेत्यर्थः । अध्यायांतत्वाद्विरुक्तिः ॥ ७ ॥ अप्रतीतेस्तद्वाइदमित्येतद्व्याचष्टे ॥ यावतीभिरिति ॥ व्यंजनादीनांशरीराद्यभेदप्रतीतेःस्ववाक्येनयथावद्व्याख्यायप्रमाणमप्याह ॥ तत्रेत्यादिना ॥ वायुरिति ॥ प्राणवाय्वधिष्ठितइतिज्ञातव्यं । अभिमानिदेवताज्ञानमात्रेणवसिष्टोवसिष्ठोवभूवेतिप्रतीयते । यज्ञेषुहूयतइत्यत्रेंद्रएवयज्ञेषुआहुतियाहूयतइतिचान्यथाप्रतीतेर्यथावद्व्याकुर्वन्यऊष्माणःसप्राणइत्यनंतरमध्याहार्यमाह ॥ प्रतिपाद्यइति ॥ एतद्धस्मेत्यादिव्याचष्टे ॥ एतेषामिति ॥ विष्णुमुपास्यैव नतुदेवतोपासनामात्रेणवसिष्टोवसिष्ठोभूद्बसतामुत्तमः । ततश्चवसिष्ठनामाभूदित्यर्थः । ननुविष्णुमुपास्येतिकथंज्ञायतइत्यतः एतदुहैवेंद्रोविश्वामित्रायेत्यादिनावसिष्ठावगतविद्यामेवेंद्रोविश्वामित्रभरद्वाजाभ्यामुवाच तस्मादेतद्विद्याबलादेवतेनस्वविद्यावगतेनबंधुनाविष्णुनायज्ञेष्वाहूयतइत्युच्यमानत्वाद्वसिष्ठावगतविद्याविषयोपिसएवेत्याशयेनैतदुहैवेंद्रइत्यादिव्याचष्टे ॥ एताभिति ॥ विद्याधीशेनविद्याविषयतयातदधीशेनतत्फलप्रापकतयाबंधुनेत्यस्यतात्पर्यंविष्णुप्रसा

भा० । यावतीभिर्ऋग्भिःशंसिताभिःषट्त्रिंशत्सहस्राण्यक्षराणिभवंति । यस्मात्कस्मादपिछंदसस्तावत्यःशंसनीयास्तदासंपादितंबृहतीसहस्रंभवति । तत्रयाव्यंजनाभि(मानि)देवतासैवसर्वप्राणिनांशरीराभिमानिदेवतास्वायंभुवोमनुः । घोषाभिमानिदेवतासर्वजीवाभिमानीब्रह्मा । ऊष्माभिमानीवायुः । व्यंजनानांशरीरस्यचाभिमानीमनुःस्मृतः । घोषाणांसर्वजीवानामभिमानीचतुर्मुखः । ऊष्माभिमानीवायुश्चप्रतिपाद्योजनार्दनः । एतेषामधिपंविष्णुंबृहत्युक्थस्यदेवतां । उपास्यैववसिष्ठोभूद्वसिष्ठःशक्रएवच । एतांविद्यांकौशिकायभरद्वाजायचादरात् । एतद्विद्याबलेनैवविद्याधीशेनबंधुना । यज्ञेष्वाहूयतेनित्यमिंद्रोविष्णुप्रसादतः ।

दतइति ॥ बृहतीसहस्रस्यषट्त्रिंशतमक्षराणामित्येतद्व्याचष्टे ॥ षट्त्रिंशदिति ॥ बृहतीसहस्रस्यप्रत्यृचंविद्यमानोविष्णुरक्षरसमसंख्ययाषट्त्रिंशद्रूपवान्षट्त्रिंशदक्षरेषुस्थितःएकैकाक्षरगतोविष्णुःस्वरव्यंजनभेदेनद्विधाभूतःपृथक्षट्त्रिंशद्रूपवान्व्यंजनेषुषट्त्रिंशत्संख्याकेषु चशब्दात्स्वरेषुचस्थितइतियोजना । व्यंजनैरेवरात्रीराप्नोतीत्येतद्व्याचष्टे ॥ तान्येवेत्यादिना ॥ षट्त्रिंशतिसहस्राणीतिवक्ष्यमाणमत्रापियोज्यं । यानिव्यंजनगतानिषट्त्रिंशतिसहस्राणिविष्णुरूपाणितानिरात्रीणामधिदैवताः अधिदैवतानि । यानिस्वरगतानिषट्त्रिंशतिसहस्राणिहरेरूपाणितान्यह्नांदैवतानीतियोजना । कथंस्वरव्यंजनगतानांरूपाणांपृथक्षट्त्रिंशतिसहस्रत्वलाभः । केनचरूपेणतान्यभिव्यक्तानीत्यतःषट्त्रिंशद्रूपवानितिसंक्षेपेणोक्तस्यविवरणमेकैकंचेति । सहस्रंबृहतीसहस्रंगतंविष्णोस्तत्सहस्ररूपमेकैकंषट्त्रिंशतिधाव्यूह्यविभज्यस्वाधिष्ठानभूतऋगक्षरेषुस्थितं । एकैकमेकैकाक्षरगतंविष्णोस्तद्रूपं द्वेधाव्यूह्यविभज्यव्यंजनेषुस्वरेषुचस्थितमाहत्यषट्त्रिंशत्सहस्राक्षरगतंविष्णोस्तद्रूपजातंस्वरव्यंजनभेदेनपृथक्षट्त्रिंशतिसहस्रधाव्यूह्यव्यंजनेषु चशब्दात्स्वरेषुचस्थितं । तदुभयविधंविष्णोरूपंरात्रिषु चशब्दादहःसुचस्थितमितियोजना । तद्वाइदं बृहतीसहस्रंसंपन्नमित्येतद्व्याचष्टे ॥ परमात्मनइति ॥ तत्तस्यपरमात्मनोबृहतीसहस्रंबृहतीसहस्रगतंरूपसहस्रमिदमेवंद्वासप्ततिसहस्रतयाशतसंवत्सराहोरात्रगततयाचसंपन्नमित्यर्थउक्तोभवति । एवमुपसंहारपरतयाव्याख्यायफलकथनपरत्वेनव्याचष्टे ॥

भा० । षट्त्रिंशद्रूपवान्विष्णुर्व्यंजनेषुचसंस्थितः । तान्येवविष्णुरूपाणिरात्रीणामधिदैवताः(अपिदेवताः) । एकैकंचसहस्रंतद्व्यंजनेषुचरात्रिषु । रूपंविष्णोःस्थितंव्यूह्यषट्त्रिंशतिसहस्रधा । षट्त्रिंशतिसहस्राणिस्वरगाणिहरेरपि । तान्येवाह्नांदैवतानिरूपाणिपरमात्मनः ।

द्वासप्ततिसहस्राणिरूपाण्येवंरमापतेरित्यादिना ॥ बृहतीसहस्रवर्णानांदैवतानिरमापतेरुत्तमानिद्वासप्ततिसहस्राणिरूपाण्येवमुक्तरीत्याशताब्दानामहोरात्रदैवतानिध्यात्वाशतवर्षहरिध्यानफलमाप्नोति इतियोजना । तस्यवाएतस्यबृहतीसहस्रस्यसंपन्नस्यपरस्तादित्यादिव्याचष्टे ॥ एवंज्ञात्वेत्यादिनाअस्याःपरतएवचेत्यंतेन ॥ तत्रबृहतीसहस्रस्यसंपन्नस्यपरस्तात्प्रज्ञादिमयःसंभूयदेवताअप्येतीत्यस्याक्षरार्थः । संपादनाच्चविद्यायाअस्याःपरतएवच ॥ प्रज्ञादिमयएवंसभूत्वादेवान्क्रमेणच । एतिमारुतपर्यंतान्मारुतेनचकेशवमिति । देवताअपीत्यत्रापिशब्दार्थः केशवंचेति ॥ विद्यासंपादनंनामतच्छंसनमात्रंचेत्कथंकेशवांतप्राप्तिरित्यतःप्रवृत्तं ॥ यएवंवेदसएतस्यसंपन्नस्येति ॥ यएवंबृहतीसहस्रवर्णैर्द्वासप्ततिसहस्ररूपाण्युच्यंतेतान्येवाहोरात्राधिष्ठितानीत्यादिरूपेणवेद तस्यबृहतीसहस्रस्यैतस्यैवंसंपन्नस्यज्ञातस्यशंसितस्यपरस्तादित्यर्थमभिप्रेत्योक्तं ॥ एवंज्ञात्वेति ॥ संपाद्यशंसनंकृत्वा । अस्याःविद्यायाःशंसनात्परतइत्यन्वयः । प्रज्ञामयपदार्थमाह ॥ ज्ञानादिति ॥ प्रकृष्टज्ञानरूपकइतिहेतुगर्भविशेषणं । तथाच प्रकृष्टज्ञानरूपत्वात्प्रकृष्टज्ञानसंततेः । प्रकृष्टज्ञानस्यसम्यक्ततेरंतर्यामिरूपेणविस्तारकरणाच्चप्रज्ञोविष्णुःसएवमेमयइतिनारायणस्यज्ञानादेवोपासकःप्रज्ञामयउच्यतइतिशेषः । प्रज्ञामयोदेवतामयइत्यादौमयशब्दार्थमाह ॥ प्राधान्यमिति ॥

भा० । द्वासप्ततिसहस्राणिरूपाण्येवंरमापतेः । शताब्दानामहोरात्रदैवतान्युत्तमानिच । बृहतीसहस्रवर्णानामपिध्यात्वाखिलान्यपि । शतवर्षहरिध्यानफलमाप्नोतिपूरुषः । एवंज्ञात्वापिसंपाद्यबृहतीनांसहस्रकं । ज्ञानान्नारायणस्यैवप्रकृष्टज्ञानसंततेः । सएवमेमयोविष्णुःप्रकृष्टज्ञानरूपकः । प्राधान्यंमयशब्दोयंवक्तिविष्णोःसदैवहि ।

अयंप्रज्ञामयादिशब्दांतर्गतः । प्रज्ञामयशब्दार्थानुवादपूर्वंदेवतामयोब्रह्ममयोमृतंमयइतिपदानामप्यर्थमाह ॥ प्रधानइति ॥ देवशब्दःसर्वदेवतासाधारणोपिमुख्येप्रयुक्तश्चेत्सर्वदेवोत्तमत्वमेवप्रतिपादयतीतिभावेनतदर्थानुवादःकृतोधिदेवतेति ॥ प्रज्ञारूपोदेवतोत्तमःब्रह्मामृतंचहरिरस्योपासकस्ययस्मात्प्रधानस्तेनकारणेनायंब्रह्मादिमयउच्यतइत्यर्थः । प्रज्ञादिमयइतिवक्तव्येब्रह्मादिमयइतिकथमुक्तमितिचेत् । इत्थं । प्रज्ञादिशब्दैरनिरुद्धादिमूर्तयोविवक्षिताइतिवक्ष्यति । अनिरुद्धादिव्यूहेचवासुदेवांत्यगतः प्रज्ञादिमयइत्युक्तेऽमृतपदेनवासुदेवइतिप्रतीयते तथामाविज्ञायीतिभावेनोपांत्यब्रह्मपदस्यांतेनिवेशःकर्तव्यइतिदर्शयितुंव्युत्क्रमेणब्रह्मादिमयइत्युक्तं । देवताशब्दंप्रकारांतरेणनिर्वक्ति ॥ सर्वोत्तमेति ॥ सर्वोत्तमद्योतनादिगुणस्वरूपत्वादित्यर्थः । पूर्णगुणत्वाच्चेतिचशब्देनमुक्तिदानेनबृंहणादितिवक्ष्यमाणंसमुच्चीयते । अमृतंतथेतितथाशब्देनअमंकरोतियच्छास्त्रमितिवक्ष्यमाणंसमुच्चीयते । ननुप्रज्ञादिर्मयोयस्यसप्रज्ञादिमयइत्यर्थांगीकारेसंभूयेत्ययुक्तं । भगवत्प्रधानकत्वस्यनित्यसिद्धत्वादित्यतोज्ञानान्नारायणस्येत्येतद्विवृणोति ॥ एतादृशंचेति ॥ यएतादृशंविष्णुंप्रज्ञादिभिर्गुणैःस्वस्मात्प्रधानंवेत्ति परेभ्यश्चसदाधिकंवेत्ति

भा० । प्रधानोस्यहरिर्यस्मात्प्रज्ञारूपोधिदेवता । ब्रह्मामृतंचतेनायंब्रह्मादिमयउच्यते । सर्वोत्तमस्वरूपत्वाद्विष्णुरुक्तःसदेवता । ब्रह्मपूर्णगुणत्वाच्चनित्यत्वादमृतंतथा । एतादृशंचयोविष्णुंप्रधानंवेत्तिसर्वदा । प्रज्ञादिभिर्गुणैःस्वस्मात्परेभ्यश्चसदाधिकं । प्रज्ञादेवब्रह्मामृतमयःसपरिकीर्तितः । प्रज्ञादिमयएवंसभूत्वादेवान्क्रमेणच । एतिमारुतपर्यंतान्मारुतेनचकेशवं । संपादनाच्चविद्यायाअस्याःपरतएवच ।

सप्रज्ञादिमयःप्रकीर्तितइत्यर्थः । तद्योहमित्येतद्व्याचष्टे ॥ द्वासप्ततिसहस्राणीति ॥ स्वरव्यंजनभेदतोबृहतीसहस्रसंस्थानि रमापतेर्द्वासप्ततिसहस्ररूपाणितत्तान्येवाहं पुरुषस्थानीत्यर्थइतिभावः । बृहतीसहस्ररूपाणांपुरुषानुबंधेनिमित्तमाह ॥ यस्मादिति ॥ बृहतीसहस्रस्यव्याप्तत्वात्कथंपुरुषस्थितत्वमित्यतउक्तं ॥ तच्छंस्यमिति ॥ . तदुपपादनंनरंपुरुषमृतेनव्यज्यतइति ॥ तस्मात्तान्येवपुरुषस्थानीतियोजना । सोसावित्येतद्व्याचष्टे ॥ द्वासप्ततीति ॥ तान्यहर्निशासुविद्यमानानिद्वासप्ततिसहस्राणि विष्णुरूपाण्यसौ सूर्येपिस्थितानीत्यर्थइतिभावः । अहोरात्रगतस्यसूर्यानुबंधेहेतुमाह ॥ अहइति ॥ हियस्मादहोरात्रंसूर्यगतं सूर्यनियमितं तस्मात्सूर्येपीतियोज्यं । तद्योहंसोसावित्येतदेकवाक्यतयापिव्याचष्टे ॥ तस्मादिति ॥ यस्माद्बृहतीसहस्रगतमेवपुरुषगतमहोरात्रगतंचाहोरात्रगतमेवसूर्यगतंतस्माद्योयंजीवगतःसदाऽहेयत्वादहंनामासएवसाक्षादनुपचारेणासौसूर्यसंस्थोनारायणः । नतुसादृश्यादभेदोपचारइत्यर्थः । योसौसोहमित्येतद्व्याचष्टे ॥ योसाविति ॥ एतदुहैवोपेक्षेतेत्येतद्व्याचष्टे ॥ एवमिति ॥ एव मुक्तप्रकारेणएकएवेतिहेतोःसूर्यादिस्थितंनारायणंजीवसमीपगंईक्षेतेत्यर्थः । ननुबृहतीसहस्रस्यसंपन्नस्योपासित

भा० । द्वासप्ततिसहस्राणिरूपाणिहिरमापतेः । बृहतीसहस्रसंस्थानिस्वरव्यंजनभेदतः । तान्येवपुरुषस्थानियस्मात्पुरुषसंस्थितं । बृहतीसहस्रंतच्छंस्यंव्यज्यतेनह्यृतेनरं । द्वासप्ततिसहस्राणितान्येवाहर्निशासुच । विष्णुरूपाणिसूर्येपित्वहोरात्रंहिसूर्यगं । तस्माद्योयमहंनामासदाहेयत्वहेतुतः । सएवासौसूर्यसंस्थःसाक्षान्नारायणःप्रभुः । योसौसूर्यगतोविष्णुःसोहेयोभास्करादिभिः । एवंमनुष्यजीवेषुसूर्यादिषुचसंस्थितः । एक एवपरोविष्णुरितिजीवसमीपगं । ईक्षेन्नारायणंदेवंसर्वजीवेश्वरेश्वरमित्यैतरेयसंहितायां ।

स्यपरस्तादनंतरमितिनवक्तव्यं साधनानंतरंसाध्यस्यसिद्धत्वादित्यतआह ॥ संपन्नस्यपरस्तादनंतरमेवेति ॥ एवशब्दव्यावर्त्यंदर्शयति ॥ नपुनरिति ॥ विद्यांतरोपासकानांकदाचिद्विकर्मादिकरणेनशरीरांतरप्राप्त्योपासनाफलापरोक्षज्ञानप्रतिबंधेनोक्तफलविलंबोभवति । बृहतीसहस्रोपासकानांतुकर्मांतरस्यैवाकरणेनशरीरांतरारंभाभावात्संपादनानंतरमेवप्रज्ञामयइत्यादिविशेषज्ञानं ततश्चापरोक्षद्वारोक्तंफलमितिभावः । ननुप्रज्ञादिशब्दानांप्रकृष्टज्ञानादिगुणसमर्पकत्वेप्रज्ञादिगुणविशिष्टोभगवान्मेमयःप्रधानइतिज्ञानवान्भूत्वेत्येकोक्त्यैवसंभवात्पृथङ्मयशब्दोव्यर्थइत्यतआह ॥ प्रज्ञामयइति ॥ नकेवलंप्रज्ञादिशब्दोभगवतोविशिष्टज्ञानादिगुणसमर्पकःकिंत्वनिरुद्धादिरूपचतुष्टयपरश्चातस्तेषांपरस्परमेकप्रकारतयासर्वाधिक्यंज्ञातव्यमित्यभिप्रायेणपृथङ्मयशब्दइत्यर्थः । प्रज्ञादिशब्दानामनिरुद्धादिपरत्वंप्रज्ञादिशब्दानामर्थांतरकथनपूर्वंप्रमाणेनाह ॥ अंतर्यामीति ॥ प्रकर्षेणज्ञापयतीतिप्रज्ञइत्यर्थः । द्योतनाच्चेतिचशब्देनक्रीडादिगुणानांग्रहणं । पूर्वोक्ताधिदेवतात्वस्यग्रहणंवा । अममंमितंकृतंशास्त्रंस्वस्मिन्विषये स्वप्रतिपादकतयापुनःपुनःकरोतिनिर्मिमीतेव्याकरोतीतियत्तस्मात् । यद्वाअममंमितंशास्त्रंस्वविषयेकृतमवगतंकरोतियस्मात्तस्मादित्यर्थः । अधिकारिणांवेदादिसर्वशास्त्राणांस्वविषयतयाबुद्धिकर्षकःसंकर्षणइतियावत् । ऋतमितिनिष्ठा भूतेप्रतीयतेऽतःसदाऋतमवगतमितिप्रदर्शनायपुनःपुनरित्युक्तं । बृंहणाद्गुणैःपूरणात् । अंतर्यामिरूपेणज्ञाननिरोधपरि

भा० । संपन्नस्यपरस्तादेवानंतरमेव । नपुनःकर्मांतरेणशरीरारंभएवंविदोभवति । प्रज्ञामयोदेवतामयइत्यादिपृथक्पृथङ्मयशब्दोनिरुद्धादिचतुर्मूर्तीनामपिपरस्परसाम्येनसर्वजीवेभ्यआधिक्यंज्ञातव्यमितिदर्शयितुं । अंतर्यामिस्वरूपेणज्ञापयन्ननिरुद्धकः ।

हारकत्वादानेरुद्धः प्रकर्षणद्योतमानत्वात्प्रद्युम्नः सम्यक्पुनःपुनःस्वविषयेशास्त्राणांव्याख्यानेनकर्षकत्वात्स्वविषयताबुद्धिक र्षकत्वाद्वासंकर्षणः । वानेनस्वस्मिन्नवस्थापनेन मुक्तिदानेन देवयतिक्रीडादिगुणाकरान्करोति वानात्सूतेर्देवनादित्युक्तरीत्या सकलगुणप्रदत्वाद्वासुदेवइतिप्रज्ञादिशब्दानामनिरुद्धादिशब्दसमानार्थकत्वंबोध्यं । प्रज्ञादिमयएवंसभूत्वेत्युक्तप्रकारेण प्रज्ञा दिर्मेमयःप्रधानइतिज्ञानवान्भूत्वेत्येतावतापूर्णत्वात्समित्युपसर्गः किमर्थमित्यतःसंशब्दार्थकथनपूर्वं संभूयदेवताअप्येतीतिवा क्यार्थस्ववचनप्रमाणाभ्यांस्पष्टयति ॥ संभूयेत्यादिना ॥ युगपत्सर्वदेवताप्राप्तिप्रतीतेःक्रमेणेत्युक्तं । नितरामाधिक्यंपुनःपु नर्ज्ञायतइतियोज्यं । तद्योहमित्येतत्स्ववचनेनव्याचष्टे ॥ बृहतीति ॥ एतेनयोयानिबृहतीसहस्रस्थितानिविष्णुरूपाणितत्ता निपुरुषस्थितानिविष्णुरूपाणिपुरुषैरहेयत्वादहंनामकानीत्यर्थः । सोसावित्येतद्व्याचष्टे ॥ तान्येवेति ॥ यान्यहोरात्रगतानि तान्येवासौसूर्येस्थितानीत्यर्थः । तद्योहंसोसावित्येतदेकवाक्यतयापिव्याचष्टे ॥ बृहतीति ॥ यानिबृहतीसहस्रस्थितानिविष्णु

भा० । प्रज्ञेत्युक्तोद्योतनाच्चप्रद्युम्नोदेवतोदितः । अमंकरोतियच्छास्त्रमृतंस्वस्मिन्पुनःपुनः । संकर्षणोमृतंतस्माद्वासुदेवस्तुबृंहणात् । जी वानांमुक्तिदानेनब्रह्मेतिकथितःप्रभुः । एवमेकोपिभगवांश्चतुर्धासमुदीरितइत्यादिचातुरात्म्ये । संभूयेत्यत्रसमित्युपसर्गाद्बृहतीसहस्रसंपादनानंत रंभगवदाधिक्यंपुनराधिक्येनज्ञायतइत्युक्तंभवति । भगवदाधिक्यमधिकंज्ञात्वादेवताअपिक्रमेणप्राप्नोति । द्वासप्ततिसहस्राणांरूपाणांपर्युपासनात् । आधिक्यंज्ञायतेविष्णोर्नितरांहिपुनःपुनः । प्राप्नोतिदेवताश्चैवकेशवांताःक्रमेणतु । योग्याअस्याश्चविद्यायादेवाऋषयएवचेत्यादिसत्तत्वे । बृहती सहस्रस्थितानिविष्णु

रूपाणि पुरुषाणांतर्हंसकत्वात् तानिपुरुषेषुद्वासप्ततिसहस्रनाडीषुस्थितानि पुरुषैरहेयत्वादहंनामकानितान्येवासौसूर्येस्थितानि । उत्तरायणदक्षिणायनभेदेनभिन्नद्वासप्ततिसहस्रनाडीषुतावत्संख्याकसूर्यरश्मीनामाततत्वेनानुबंधात् । योसौसोहमित्येतद्व्या चष्टे ॥ यानीति ॥ एतदुहैवेत्येतद्व्याचष्टे ॥ एतदेवेति ॥ समीपे स्वांतर्गततया । अपव्याख्यामपाकरोति ॥ नात्रेति ॥ सचासौयश्चतद्योऽहंसप्रसिद्धोऽसौसूर्यएव । उपचारनिवृत्त्यर्थमुच्यतेयोसौसोहमिति । तदुक्तमृषिणा । सूर्योजगतस्तस्थुष श्चात्मास्वरूपमिति । एतदैक्यमेवोपेक्षेतेक्षेतजानीयादभ्यासस्तात्पर्यार्थः । इत्यभेदोत्रविवक्षितइतिनवाच्यमित्यर्थः । अत्रेश्वरः सूर्यः । अभेदश्चभागत्यागलक्षणया । तथाचेश्वरपदंशुद्धचैतन्यपरमिति । ब्रह्मैवेश्वरःकुतोनविवक्षितइत्यतआह ॥ उपेति ॥ उपसमीपेईक्षेते त्यतिसमीपेदर्शनवचनान्नात्रैतच्छब्देनजीवेश्वरैक्यंपरामृश्यते । नहिस्वरूपभूतमैक्यमुपसमीपईक्षणीयमतोना रायणाख्यंसूर्यस्थंब्रह्मैवैतच्छब्दपरामृष्टमितिभावः। ननूपेत्यस्योपसर्गमात्रत्वादुपेक्षेतेत्यस्येक्षेतेत्येवार्थः । उपसर्गाणामर्थांतराभा वादित्यतआह ॥ नचेति ॥ कुतोनयुक्तमितिचे त्किमुपसर्गाणामनर्थकत्वंनिगमनिरुक्तव्याकरणबलात्कल्प्यते । उतस्वाचार्य

भा० । रूपाणिपुरुषेस्थितानिपुरुषैरहेयत्वादहंनामकानितान्येवसूर्येस्थितानि यान्येवसूर्येस्थितानितान्यपिसूर्यादिभिरहेयत्वादहंनामका नि । एतदेवोक्तंनारायणाख्यंपरंब्रह्मैवसर्वदाउपसमीपईक्षेत । नात्रजीवेश्वराभेदोविवक्षितः । उपसमीपेईक्षेतेतिसमीपेदर्शनवचनात् । नचनिर र्थकत्वमुपसर्गस्यांगीकर्तुयुक्तं

वचनबलात् । आद्यंदूषयति ॥ नहीति ॥ निरर्थकत्वंस्मृतिविप्रतिषिद्धंचेत्याह ॥ उक्तंचेति ॥ उच्चाराद्यर्थमितिछंदोभंगभ येनश्लोकपूरणार्थमित्यर्थः । स्वरादिकंसर्वमहार्थमेवेत्यर्थः । अतिप्रसंगपराहतंचेत्याह ॥ सुकरंचेति ॥ उपेत्युपसर्गस्यनिरर्थ कत्वेईक्षेतेत्यादिपदानामपिनिरर्थकत्वंस्यादविशेषादित्यर्थः । नन्वीक्षदर्शनांकनयोरित्यादितद्व्याख्यापरवाक्यैरर्थवत्त्वंतेषामि त्यतआह ॥ यैश्चवाक्यैरिति ॥ द्वितीयंदूषयति ॥ नचमानुषेति ॥ ननूपसर्गाहिधातुलीनस्यार्थस्यव्यंजकानार्थांतरप्रतिपा दकाइतिहिभवद्भिरप्यंगीकृतं । ज्योतिश्चरणाभिधानात् नभावोनुपलब्धेः कृष्णासावर्णतश्चासीदुत्कृष्टत्वाच्चयोषितामित्यादौ तदवगमात् । सुधादौतथाव्याख्यातत्वात् । तथाचोपेत्युपसर्गोपीक्षणस्यसम्यक्त्वलक्षणार्थविशेषकएव । तथाचोपेक्षणंनामोप पन्नतयेक्षणंसम्यगीक्षणमेवपर्यवस्यति । तर्कतांडवोक्तरीत्योपसर्गस्यार्थांतरपरत्वेपिईक्षतिरीक्षणमाहोपसर्गउपपन्नत्वमतोनानर्थ क्यमितिचेन्न । तथात्वेप्रेक्षेत समीक्षेतेत्याद्युपसर्गप्रयोगःस्यान्नोपेति । तस्यसामीप्येशक्तत्वात् । तस्योपव्याख्यानमित्यादाव पितस्योंकारस्योपसमीपेशक्यतयाविद्यमानस्यार्थस्यव्याख्यानंक्रियते । नतुशक्यार्थव्यवहितस्यलाक्षणिकार्थस्येत्यर्थांगीकारात्।

भा० । नह्यार्षेषुवेदादिषुव्याकरणनिरुक्तादिषुचोपसर्गाणांवैयर्थ्यमंगीकृतंकुत्रचित् । उक्तंचभगवताव्यासेन । नानर्थकःस्वरोवापिवर्णो वाकुत्रचिद्भवेत् । पदंवाक्यंकुतश्चस्यान्नाल्पार्थमपिकुत्रचित् । उच्चाराद्यर्थमपिवानास्तिकिंचित्स्वरादिकं । महार्थमेवसर्वंहिवेदेवावैदिकेपिवेति । सुकरंचसर्वपदानामनर्थकत्वकल्पनं । यैश्चवाक्यैरर्थवत्त्वंप्रतीयतेतेषामप्यनर्थकत्वमेवस्याद्विशेषाभावात् । नचमानुषवाक्येनवेदपदानामानर्थ क्यंकल्प्यं ।

ऐक्येनेक्षणस्यानुपपन्नत्वेनसमीक्षणत्वाभावाच्चेतिभावः । एवमेतच्छब्देनैक्यपरामर्शेएतदुपेक्षेतेत्युपपदवैयर्थ्यमभिधाय तद्यो हमित्यत्रैक्यमेवनोक्तमतश्चतत्परामर्शोऽयुक्तइतिभावेनाह ॥ जीवेति ॥ जीवेश्वरैक्यस्यैतदर्थत्वांगीकारइत्यर्थः । ननुतद्योहं सोसावित्यत्रपुरुषानुवादेनतस्यसूर्येणैक्यमुच्यते । योसावित्यत्रसूर्यानुवादेनतस्यपुरुषेणैक्यमतोनवैयर्थ्यमित्यतआह ॥ नह्यस्ये ति ॥ यत्परिहारार्थंपुनर्वचनमितिशेषः । किंचास्यपुरुषस्यतेनाभेदस्तस्यसूर्यस्यानेनपुरुषेणाभेदइतिवाक्यार्थयोःपुरुषसूर्यधर्मिक योरभेदयोरभेदोवाभेदोवा । नाद्योवैयर्थ्यानिस्तारात् । द्वितीयेदोषमाह॥ अस्यतस्येति॥ अस्यसूर्येणाभेदस्तस्यपुरुषेणाभेदइ तिवाक्यार्थयोःपुरुषसूर्यधर्मिकयोरभेदयोर्भेदांगीकारेनायमभेदोमुख्यः । नहिपुरुषसूर्यधर्मिकयोरभेदयोर्भिन्नत्वेपुरुषसूर्ययोरभे दोमुख्यःस्वरूपतादात्म्यलक्षणोभवति । किंतुयदधीनायस्यसत्तातत्तदित्येवभण्यतइत्युक्तदिशाराजाराष्ट्रंराष्ट्रमेवराजेतिवत्स्व स्वामिनोरभेदोपचारोवा । चैत्रएवमैत्रोमैत्रएवचैत्रइतिवत्स्नेहविशेषेणमत्यैक्यंवेत्यर्थः । उपचरिताभेदपक्षेपिपुनर्वचनंव्यर्थमि त्यतआह ॥ तत्रहीति ॥ ननुतात्पर्यद्योतनायाभ्यासोयमतोनवैयर्थ्यमित्यतआह ॥ अभ्यासत्वइति ॥ द्विविधाप्रयुक्ताचे

भा० । जीवेश्वरैक्यांगीकारेयोहंसोसावित्येवपूर्यतेपुनर्योसौसोहमितिव्यर्थं । नह्यस्यतेनैक्येतस्यानेनभेदशंकाभवति । अस्यतस्येतिभेदां गीकारेनाभेदोमुख्यः । किंतुतदधीनत्वमेवान्यस्यभवति । स्नेहविशेषोवा । चैत्रोमैत्रोमैत्रश्चैत्रइतिवत् । तत्रह्युभयस्नेहापेक्षयापुनर्वचनंयुज्यते । अभ्यासत्वेह्येकप्रकारेणप्रयोगोदृष्टः । अत्रहिप्रयोगद्वैविध्यंदृश्यते । एकप्रकाराबहुशोवागभ्यासइतीरितः । अर्थांतरार्थाद्विविधाप्रयुक्तेतिहिनिर्ण यइतिगारुडे ।

दर्थांतरार्थाऽर्थांतरपरा । तद्योहमित्यहंशब्दस्यपुरुषैरहेयत्वार्थांगीकारेयोसौसोहमितिद्वितीयाहंशब्दस्यवैयर्थ्यमित्यतआह ॥ अहंशब्दस्येति ॥ अहंशब्दस्यभगवत्परत्वेवाक्यत्रयंपठति ॥ अःइतिब्रह्मेति ॥ अःइत्यकारेणब्रह्मोच्यते । तत्रब्रह्मण्यह मित्यपिनामवाचकतयागतमवगतं । अहमहंशब्दवाच्यमिमंभगवंतंनजानाति । वै । तस्यब्रह्मणउपनिषद्रहस्यंनाम । नवाअह मितिद्वितीयश्रुतौअहंशब्दोस्मच्छब्दादेशोजीवपरःकिंनस्यादित्यतआह ॥ अहमिति ॥ पुरुषव्यत्ययस्त्वगतिकागतिरिति भावः । ननुतस्योपनिषदितितृतीयश्रुतौतच्छब्देनजीवःपरामृश्यतइतिकिंनस्यादित्यतआह ॥ तस्येति ॥ योयंदक्षिणेक्षन्पुरुष स्तस्यभूरितिशिरःभुवइतिबाहूसुवरितिप्रतिष्ठेतस्योपनिषदहमित्यक्षिस्थतयाप्रकृतोभगवानेवपरामृश्यतइत्यर्थः । ननुदक्षिणेक्ष न्पुरुषइतिप्रक्रांतोपिपुरुषोजीवएवेतिचे त्सकिंयस्येदमक्षिसएवस्वाक्षिणिशिरोबाह्वादिमत्त्वेनोच्यते । उतान्यस्तदिंद्रियाद्यधि ष्ठातातत्वदेदादिर्जीवः । आद्येपिजीवरूपंशिरोबाह्वादिमत्तयाहृदिवर्ततइत्यंगीकृत्याक्षिण्यपिपृथक्शिरोबाह्वादिकमस्तीत्युच्यते। उताक्षिण्येववर्ततेहृदिनास्तीति । आद्यंदूषयति ॥ नहीति ॥ प्रमाणाभावादितिभावः । प्रमाणविरुद्धंचेत्याह ॥ हृदीति ॥ तस्यस्वरूपंशिरोबाह्वादियुक्तंविशिष्टंरूपंहृद्येवस्थितंहि हृदिह्येष आत्मेत्यादिश्रुतिप्रसिद्धमित्यर्थः । द्वितीयमपिदूषयति ॥ हृदी

भा० । अहंशब्दस्याहेयत्वांगीकारेनराहेयत्वंसुराहेयत्वंचोच्यतइतिनवैयर्थ्यं । अःइतिब्रह्मतत्रागतमहमितिनवाअहमिमंविजानातितस्यो पनिषदहमित्यादौविष्णोरेवाहेयत्वेनाहंनामकत्वप्रसिद्धेः । अहंशब्दस्यास्मच्छब्दार्थत्वेअहमिमंनजानातीतिनयुज्यते । तस्यभूरितिशिरोभुवइति बाहूइत्यादिनाक्षिसंस्थोभगवानेवह्यहंशब्दोदितः । नहि जीवस्याक्षिणिपृथक्शिरोबाह्वादिकंचिन्नते ।

ति ॥ हृदिस्थितमेवनाक्षिस्थितमित्यर्थः । ननुजीवस्यकथंअक्षिण्यपिशिरोबाह्वादिवैशिष्ट्येनावस्थानेप्रमाणाभावः । तत्रतत्रपरि ज्ञानान्यथानुपपत्तेरेवप्रमाणत्वात् । चक्षुरादिषुरूपाणिजाग्रत्कालेतयोःसदा ॥ बहूनिसंतितान्येवयदैकीभावमाप्नुयुः ॥ हृदय स्थेनरूपेणतदाजीवोनकिंचन ॥ जानातीतिविदुःप्राज्ञाइतिबृहद्भाष्योदाहृतप्रमाणसद्भावाच्चेत्यतआह ॥ हृदीति ॥ जागरिते पिहृद्येवशिरआद्यंगसाकल्येनस्थितंतस्यस्वरूपमक्ष्यादिष्वेंद्रियेषुतत्रतत्रपरिज्ञानायवक्ष्यमाणरीत्याप्रकाशतोंशतोवाविशेषतःस न्निहितंभवति । नतुशिरआद्यंगसाकल्येन । चक्षुरादिषुरूपाणीत्यत्रापिरूपपदेनविशेषसन्निधानमेवोक्तमितिभावः । अंगसाक ल्येनैकत्रावस्थानेपिसन्निधानमन्यत्रदृष्टांतेनाह ॥ दीपेति ॥ यथादीपाख्यंज्योतिःस्वरूपेणवर्त्त्यादिधिष्ठितमपिप्रकाशतोगृहंव्या प्यतिष्ठतितथेत्यर्थः । उपलक्षणमेतच्चंदनबिंदुवदित्यपिद्रष्टव्यं । यद्वानवयमेकदैवजागरितेहृद्यक्षिणिचपृथक्शिरोबाह्वाद्यंगसा कल्यमस्तीतिवदामः । किंतुसुप्तौजीवोंगसाकल्येनहृदिवर्तते । हृदिह्येषआत्मेतिवाक्यंतद्विषयं । जाग्रदवस्थायांहृदयंपरित्यज्य दक्षिणाक्षिप्रतिगच्छति स्वप्नेकंठदेशं । तदुक्तंहृदयस्थात्पराज्जीवोदूरस्थोजाग्रदेष्यति ॥ समीपस्थस्तथास्वप्नंस्वपित्यस्मिन्लयं व्रजन्निति ॥ तथाचजाग्रत्कालविवक्षयादक्षिणाक्षिस्थस्यांगसाकल्यान्मानमविरुद्धमित्यतआह ॥ हृदिस्थितमेवेति ॥ सर्वदा हृदिस्थितमेवतस्यस्वरूपंजागरितेऽपिपदेनस्वप्नसुषुप्त्युभयावस्थामूर्च्छासु अक्ष्यादिषु अक्षिकंठदेशहृदयेषुविशेषतःसन्निहितंभव ति दीपप्रकाशवत् । यथादीपाख्यंज्योतिःस्वरूपेणवर्त्यधिष्ठितंतत्प्रकाशस्तुगृहेसर्वत्रस्थितःसूक्ष्मवस्त्रेणरुद्धः । वस्त्रांतर्भागेबहु

भा० । हृदिस्थितमेवहितस्यस्वरूपं । जागरितेप्यक्ष्यादिषुविशेषसन्निहितंभवतिदीपप्रकाशवत् ।

लंसंनिहितस्तद्वद्बहिरल्पसन्निधियुक्तःघटादिनाप्रदीपावरणेतत्कलाविशेषोपिदीपदेशमेवगच्छति । तथाजीवःसर्वदास्थितःहृदये । जाग्रत्कालेतत्रतत्रपरिज्ञानायप्रकाशतः सूक्ष्मचिद्रूव्यरूपेणवा सर्वशरीरंव्याप्तः । दक्षिणाक्षिणितुकलाविशेषेणसंनिहितः । तथास्वप्नादावपिकंठदेशादौकलाविशेषेणसन्निहितःपुनरविद्यावृतःसुप्तौहृदयस्थेंगसाकल्ययुक्तेस्वस्मिन्नंतर्भावितकलाविशेषोवतिष्ठते । कलाविशेषविवक्षयैवहृदयस्थात्पराज्जीवइतिवचनमितिभावः । अंगसाकल्येनहृद्यवस्थानंचिद्गुणेनचंदनांशवत्सूक्ष्मांशैर्वावतस्यावस्थानमित्यत्रसूत्रसंमतिमाह ॥ अवस्थितीति ॥ ननुयदुक्तमविरोधश्चंदनवदिति तदयुक्तं । चंदनबिंदोर्घनीभूतांशिनैकदेशेऽवस्थानंसूक्ष्मांशैःपरितोवस्थानमित्यवस्थितौवैशेष्याद्व्युज्यतेसर्वशरीरव्याप्तिर्नैवंप्रकृतइतिचे ज्जीवस्यापिहृदिह्येषआत्मेतिप्रमाणबलाद्धृदिसमग्ररूपेणावस्थानाभ्युपगमादितिप्रथमसूत्रार्थः । यथाऽऽलोकस्यप्रकाशगुणेनव्याप्तिर्ज्योतीरूपेणाव्याप्तिरेवंचिद्गुणेनव्याप्तिर्जीवरूपेणाव्याप्तिरितिवेतिद्वितीयसूत्रार्थः । ननुतस्योपनिषदहमितिबृहदारण्यकेतच्छब्देनयोयंदक्षिणेक्षन्पुरुषइत्युक्तोक्षिस्थपुरुषःपरामृश्यते । सचपुरुषोयस्येदमक्षिसजीवोनभवति । नापिविष्णुःकिंतुजीवानामक्षिस्थःसूर्याख्योजीवविशेषएवेतिप्राक्शंकितद्वितीयविकल्पंदूषयन्प्रथमपक्षेदूषणांतरमाह ॥ आदित्येहिरण्मयइति ॥ इत्यादिकथनाच्चेति ॥ इत्यादिनाछांदोग्येसमाख्यानाच्चाक्षिसंस्थितोभगवानेवाहंशब्दोदितः । अयमत्रोत्तरक्रमः । योयंदक्षिणेक्षन्पुरुषइतिबृहदारण्य

भा० । अवस्थितिवैशेष्यादितिचेन्नाभ्युपगमाद्धृदिहि । गुणाद्वालोकवदितिचसूत्रात् । आदित्येहिरण्मयःपुरुषस्तस्ययथाकप्यासंपुंडरीकमेवमक्षिणीइत्यादि

केऽक्षिस्थपुरुषोविष्णुरेव । नसूर्यः नापिजीवः । यएषोंतरक्षिणिपुरुषोदृश्यतइतिछांदोग्यसमाख्यानात् । नचतत्रापिसूर्यादिजींवविशेषएवाक्षिस्थपुरुषइतिवाच्यं । तत्रादित्येहिरण्मयपुरुषमुक्त्वातस्यपुंडरीकाक्षत्वमभिधायानंतरमेवयएषोंतरक्षिणिपुरुषइत्युक्तस्याक्षिस्थितस्यापि तस्यैतस्यतदेतदेवरूपंयावमुष्यगेष्णौतौगेष्णौ यन्नामतन्नामेतिहिरण्मयत्व पुंडरीकाक्षत्वाद्यादित्यांतःस्थपुरुषलक्षणलक्षितत्वकथनात्तस्यचविष्णुलक्षणत्वादिति । छांदोग्येक्षिस्थपुरुषस्यजीवत्वव्यावर्तकंलिंगांतरमाह ॥ सएषएवैतस्मादिति ॥ किंचतद्योहमित्यत्राहंशब्दस्यास्मच्छब्दार्थत्वमंगीकृत्यतस्यसूर्याभेदेव्याख्यायमानेसूर्यआत्मेत्युदाहृतमंत्रविरोधस्तत्रसूर्यस्यजीवेभ्योभेदप्रतीतेरित्याह ॥ चक्षुरिति ॥ मित्रस्यवरुणस्याग्नेस्तदितरस्यजंगमस्यस्थावरस्यचचक्षुर्ज्ञानप्रदःआत्माचेत्यर्थः । सूर्यआत्मास्वरूपमितिकिंनस्यादित्यतआह ॥ यच्चेति ॥ हियस्मात्सर्वान्गुणानाप्नोति यस्मात्सर्वभृत्यतयाऽऽदत्तेस्वीकरोति यस्माच्चेहलोकेविद्यमानान्विषयानत्ति यस्माच्चास्यभावोज्ञानादिरूपोधर्मःसत्तावाइहकालेदेशेचसम्यकृततोविस्तृतः तस्मादात्मेतिभण्यतइतिपृथगन्वयः । नकेवलंतद्योहमित्यस्यैक्यपरत्वेतत्रोदाहृतमंत्रविरोधःपूर्ववाक्यविरोधश्च किंतुदेवता

भा० । सूर्येस्थितस्याविष्णोरूपमुक्त्वाक्षिस्थितस्यापितस्यैतस्यतदेवरूपमित्यादि(ति)कथनाच्च । सएषएवैतस्मादर्वाचोलोकास्तेषांचेष्टइत्यादिलोकाधिपत्यकथनाच्च । नहिकश्चिद्भिक्षुकःपातालाद्यधिपतिरित्यत्रकिंचिन्मानं । तस्माद्भगवानेवाहेयत्वादहंनामा । चक्षुर्मित्रस्यवरुणस्याग्नेः । जगतस्तस्थुषश्चात्मेत्यादिजीवेभ्योभेददर्शनाच्च । यच्चाप्नोतियदादत्तेयच्चात्तिविषयानिह । यच्चास्यसंततोभावस्तस्मादात्मेतिभण्यतइतिभारते ।

अप्येतीतिफलवाक्यविरोधश्च । तत्रदेवताप्राप्त्युक्तेरितिभावेनाप्येतीत्यस्योक्तंप्राप्त्यर्थत्वंसाधयति ॥ देवताअप्येतीति ॥ न न्वप्ययोलयःप्रसिद्धस्तत्कथमेतीतिप्राप्त्यर्थत्वमित्यतआह ॥ लयश्चेदिति ॥ दूषणांतरमाह ॥ नचेति ॥ ननुमयटस्तादात्म्ये पिस्मरणाद्ब्रह्ममयोब्रह्मीभूतइतिपूर्ववाक्यएवैक्योक्तेःकथंभेदस्यैवात्रप्रकृतत्वमित्यतआह ॥ मयट्शब्दस्येति ॥ तादात्म्यार्थी गीकारेचेतिग्राह्यं । ब्रह्मैक्यस्यानागंतुकत्वात्संभूयेत्येतन्नयुज्यतेदेवताअप्येतीतिचनयुज्यते । नहिब्रह्मीभूतस्यदेवताप्राप्तिस्तत्र लयोवायुज्यतइतिभावः । ननुमयापिब्रह्ममयोब्रह्मीभूतोहमित्युपासनावान्संभूयेतिव्याक्रियते । अतोब्रह्मीभावस्यनित्यसिद्ध त्वेपिनानुपपत्तिरित्यतआह ॥ उपासनायाइति ॥ ननुभेदोपासनायाःपूर्वसिद्धत्वेपितस्यसंपन्नस्यपरस्तात्प्रज्ञादिरूपब्रह्मैक्यो पासनावानहंसंभूयमुक्तोभवतीत्यर्थांगीकारेनविरोधः । मोक्षांतरंगैक्योपासनांप्रतिचित्तवृत्तिनिरोधार्थत्वेनभेदोपासनस्यावश्य कत्वादित्यतआह ॥ सर्वस्मादिति ॥ अभेदोपासनस्यतमःप्रापकतया भेदेनसर्वोत्कर्षोपासकस्यचमोक्षोक्तेर्नैवंश्रुत्यर्थोवर्ण नीयइतिभावः । खंडार्थमुपसंहरत्यतइति ॥ बृहतीसहस्रविद्योक्तोभेदोनमुमुक्षुणोपास्यः किंत्वेतत्प्रज्ञामयइत्यादिसन्निहितो

भा० । देवताअप्येतिप्राप्नोतीत्येवचार्थः । लयश्चेद्देवतास्वप्येतीतिस्यात् । नचविनाशःपुरुषार्थः । मयट्शब्दस्यभगवत्प्राधान्यार्थत्वानं गीकारेसंभूयदेवताअप्येतीतिस्यन्नयुज्यते । उपासनायास्तुसंपन्नस्यपरस्तादित्युक्तत्वात्पूर्वमेवसिद्धिः । सर्वस्माद्भिन्नमीशेशंजीवाभेदेनयःस्मरेत् । सयात्यंधंतमोघोरंनित्यातिशयदुःखदं । सर्वोत्तमंतुयोविष्णुंभिन्नंजानातिसर्वतः । नित्यानंदमसौयातिवासुदेवप्रसादतइतिचैतरेयसंहितायां । अतः

क्तमैक्यमेवोपेक्षेतोपासीतेतिसन्निधानोक्त्यैक्योपासनेतात्पर्यावधारणायाभ्यासइत्यपव्याख्यांप्रमाणेननिराचष्टे ॥ सर्वेति ॥ आअध्यायमूलतअध्यायमूलंप्रारभ्योक्तस्यसर्वस्य । नतुसन्निहितस्योक्तस्य । तथाचोक्तसर्वावधारणेऐक्यबाधान्नैक्यपरत्वमंति मस्यापीतिभावः ॥ इतिश्रीमद्विट्ठलाचार्यपुत्रेणश्रीनिवासेनरचितायांऐतरेयभाष्यार्थरत्नमालायांद्वितीयप्रघट्टकेद्वितीयोध्यायः ॥ २ ॥ हरिःॐ एषपंथाइत्यादौप्रकृतस्यनारायणस्य नारायणनारायणो नारायणवासुदेवः नारायणसंकर्षणः नारायणप्रद्युम्नः नारायणानिरुद्धःइतिपंचप्रभेदेन पंचधाप्रभिन्नबृहतीसहस्रादिस्थानगतत्वादिमाहात्म्यकथनपूर्वसर्वशब्दवाच्यत्वमेवप्रपंच्यते स्मिन्नध्याये ॥ योहवाइति ॥ योधिकार्यात्मानं नित्याततगुणं स्वयंचसनातनंपरमचेतनंनारायणमुक्तरीत्यानारायणादिरूपे णपंचविधं यस्मात्कारणाद्यस्मान्नारायणादिदंसर्वमुत्तिष्ठति तस्मादुक्थनामकं पंचविधेबृहतीसहस्राख्येउक्थेस्थितंवेद । ससंप्र तिवित्सम्यग्ज्ञाताहवाइत्यर्थः । पंचविधबृहतीसहस्रप्रतिपाद्यानांतद्गतानांपंचरूपाणांअधिष्ठानांतरंतत्तन्नामकत्वमुत्थापकत्वंचो च्यते ॥ पृथिवीति ॥ एषवाआत्माबृहत्यंतर्गतोनारायणएवपृथिवीवायुराकाशआपोज्योतींषीतिनामकनारायणादिरूपेणतदं

भा० । सर्वव्यतिरिक्तःसर्वोत्तमःसर्वगुणपरिपूर्णोनारायणइतिसिद्धं । सर्वप्रमाणसिद्धत्वंवक्तुमाध्यायमूलतः । अध्यायांतेद्विरुक्तिःस्यात्पू र्वोक्तस्यावधारणइतिशब्दनिर्णये ॥ ४ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेश्रीमन्महैतरेयभाष्येद्वितीयप्रघट्टकेद्वितीयो ध्यायः ॥ २ ॥ २ ॥

उप० । योहवाआत्मानंपंचविधमुक्थंवेदयस्मादिदंसर्वमुत्तिष्ठतिससंप्रतिवित्पृथिवीवायुराकाशआपोज्योतींषीत्येषवाआत्मोक्थं

तस्थःपंचविधंपंचविधउक्थनामकः । कुतः एतस्मात्पृथिव्यादिस्थाद्धियस्मादिदंसर्वमुत्तिष्ठतितस्मादित्यर्थः । नकेवलमुत्पाद कत्वादुक्थत्वंकिंत्विदंजगदेतमेवाप्येतिमुक्तौलयेचप्रविशति । नकेवलंमुक्तौलयेचोपजीव्यत्वं । किंत्वेतदेवसर्वेषांसदायनमा श्रयं प्रसिद्धमित्यर्थः । एतद्धेत्तुःफलमुच्यते ॥ अयनंहवैसमानानामिति ॥ यएवंवेदोपासनापूर्वमपरोक्षतोवेद ससमान जातीयानांमुक्तावयनमाश्रयोभविष्यतीत्यर्थः । एतेषांरूपाणांभोक्तृभोग्यभावोस्तीत्युच्यते ॥ तस्मिन्निति ॥ तस्मिन्रूपपंचके योन्नमन्नस्थितत्वात्तर्पकतयोपजीव्यत्वाच्चान्ननामकरूपद्वयं भोक्तृषुस्थित्वाभोक्तृशक्तिप्रदत्वात्स्वयंभोक्तृत्वाच्चान्नादनामकंरूपद्व यंचवेद । सोस्मिन्स्वसमानजातावान्नादोतिशयेनभोक्ताभवति । अस्यविष्णोःप्रसादतोऽस्यस्वजातिवर्गस्यान्नमद्यमुपजीव्यं त र्पकश्चभवतीत्यर्थः । किंतदन्नमन्नादंचेत्यतउच्यते ॥ आपश्चेति ॥ आपश्चपृथिवीचानिरुद्धनारायणावन्नमित्युच्येते । कुतः हियस्मात्प्रसिद्धान्नान्येतन्मयान्येताभ्यांव्याप्तान्यधिष्ठितानीतियावत् । यद्वैतयोरधीनानिएतन्नियमिततर्पकत्वशक्तियुक्तानी तियावत् । ज्योतिश्चवायुश्चप्रद्युम्नसंकर्षणावन्नादं । कुतो हियस्मादिदंसर्वंभोक्तृजातमेताभ्यांप्रद्युम्नसंकर्षणाभ्यां अधिष्ठातृ भ्यांभोक्तृशक्तिप्रदाभ्यांस्वयंचभोक्तृभ्यामन्नमत्तितस्मादित्यर्थः । आकाशोनभस्थितोवासुदेवआवपनं । अवकाशप्रदः । कथं

उप० । पंचविधमेतस्माद्धीदंसर्वमुत्तिष्ठत्येतमेवाप्येत्ययनंहवैसमानानांभवतियएवंवेदतस्मिन्योन्नंचान्नादंचवेदाहास्मिन्नन्नादोजायतेभवत्य स्यान्नमापश्चपृथिवीचान्नमेतन्मयानिह्यन्नानिभवंतिज्योतिश्चवायुश्चान्नादमेताभ्यांहीदंसर्वमन्नमत्त्यावपनमाकाशआकाशेहीदंसर्वंसमोप्यतआवपनं

॥ ७४ ॥

हियस्मादिदंसर्वंचेतनाचेतनात्मक माकाशेवासुदेवेतद्दत्तावकाशेओप्यतेसमाप्यतेस्थाप्यते । यएवंवेद ससमानानामावपनमव काशप्रदोभवति । नकेवलंभूतेषुस्थितानांभोक्तृभोग्यभावः किंतर्हिस्थावरजंगमात्मकसर्वप्रपंचगतानामपीत्युच्यते ॥ तस्मिन्नि ति ॥ व्याख्यातप्रायमेतत् । किंतदन्नमन्नादमित्यतउच्यते ॥ ॐषधीति ॥ ॐषधीषुस्थितस्तन्नामानारायणःवनस्पतिषुस्थि तस्तन्नामानिरुद्धश्चान्नंप्राणभृतःप्राणभृत्सुचेष्टावत्सुजंगमेषुव्यवस्थितौतन्नामानौसंकर्षणप्रद्युम्नावन्नादं । ॐषधिवनस्पतीनाम न्नत्वं प्राणभृतामन्नादत्वंचोपपाद्यते ॥ ॐषधिवनस्पतीनिति ॥ हियस्मादोषधिवनस्पतीन्तद्गतभगवन्नियमितान्प्राणभृतो जंगमजीवाअदंतिभक्षयंति । तद्गतभगवद्रूपमप्युपजीवंति । तस्यतत्रस्थित्वातर्पकत्वात् । ओषध्यादिस्थितंभगवद्रूपद्वयंचजंग मेषुस्थितंरूपद्वयमत्तितद्भोग्यंकरोति तस्मादित्यर्थः । जंगमेष्वपिपुरुषपश्वादिभेदभिन्नेषुस्थितानांभगवद्रूपाणांभोक्तृभोग्यभा वउच्यते ॥ तेषामिति ॥ तेषांजंगमानांमध्येयेउभयतोदंता अधरोत्तरदंतवंतः । पुरुषस्य पुरुषाकारस्यपुरुषनामकस्य क्षीरा ब्धिशयनस्यविष्णो रनुविधांसदृशाकारतांप्राप्तादेवगंधर्वमर्त्याद्यास्तेन्नादास्तेषुस्थितौपुरुषाकारौसंकर्षणप्रद्युम्नावन्नादौ स्वयं भोक्तारौ स्वसन्निधानात्स्वाधिष्ठानभूतानांदेवादीनांभोजकौच । पुरुषेभ्यइतरेतरएवपशवोगवाश्वादयः । यद्वादेवानामप्यात्म मखेपशुत्वात् मानुषादीनांपशुप्रायत्वात् तेभ्यइतरेपशवस्तदंतस्थौतदाकारौ । नारायणानिरुद्धावन्नं स्वयंभोग्यावखिलस्यतृ

उप० । हवैसमानानांभवतियएवंवेद तस्मिन्योन्नंचान्नादंचवेदाहास्मिन्नन्नादोजायतेभवत्यस्यान्नमोषधिवनस्पतयोन्नंप्राणभृतोन्नादमोष धिवनस्पतीन्हिप्राणभृतोदंतितेषांयउभयतोदंताःपुरुषस्यानुविधांविहितास्तेन्नादा

न्निप्रदौचेत्यर्थः । यद्यप्यश्वादीनामप्युभयतोदंतत्वमस्ति तथापिपुरुषेषूभयतोदंतनियमवत्पशुजातौनतन्नियमः गोगवयमहिषादावभावादेतद्विवक्षयायउभयतोदंताइत्युक्तमितिज्ञेयं । अधिष्ठानभूतानांदेवादीनामन्नादत्वमधिष्ठेयानांपशूनामन्नत्वमुपपाद्यते ॥ तस्मादिति ॥ तस्माद्भोक्तृभूतसंकर्षणप्रद्युम्नसन्निधानादेव तेनरादयइतरान्पशूनधिरुह्यचरंति । स्वातंत्र्याभावादिव शब्दः । संकर्षणप्रद्युम्नयोरन्नादत्वंनारायणानिरुद्धयोरन्नत्वंचोपपाद्यते ॥ तस्मादिति ॥ तस्मात्संकर्षणप्रद्युम्नयोरारोढृषुनरादिषुसन्निहितत्वादेव तेनरादयस्तदधिष्ठितौसंकर्षणप्रद्युम्नाविवियावत् । इतरान्पशून्तदंतर्गतौनारायणानिरुद्धौअधिरुह्यचरंतीव । अत्रभगवद्रूपाणांगुणवैशेष्याभावादिवशब्दः । प्रमाणप्रसिद्धंचैतदित्युच्यते ॥ अधीवेति ॥ अन्नेऽन्ननामकभगवद्रूपेन्नादनामकभगवद्रूपं अधीवभवतीत्यैतरेयसंहितादौहिप्रसिद्धंखल्वित्यर्थः । यएवंवेदससमानानांमध्येधीवचरतिवाहनमधिरुह्यचरतिहि । अस्वातंत्र्यादिवेति ॥ ७ ॥ योहवाआत्मानमित्यत्रशरीरोपादानत्वादात्मानंपंचविधंपृथिव्यादिभूतमंकुराद्युत्थापकत्वादुक्थंवेदेत्यन्यथाप्रतीयते । किंचात्मापंचविधइत्यनुक्तत्वात्पंचविधमात्मानंयोवेदेतिसिद्धवन्निर्देशोऽयुक्तः । तथावेदनमात्रमेवापेक्षितं । वस्तुतोनपंचविधत्वमितिचप्रतीयतेऽतआत्मापंचविधउक्थइतिवाक्यंभित्त्वात्मापंचविधइत्यंशंतावद्व्याचष्टे ॥ योसाविति ॥ तत्रात्मेत्यस्यप्रतिपदंनारायणइति । प्राङ्नारायणस्याप्रकृतत्वात्कथमनुवादइत्यतएषपंथाइतिप्रकृतत्वंदर्शयितुं

॥ ७५ ॥

उप० । अन्नमितरेपशवस्तस्मात्तइतरान्पशूनधीवचरंत्यधीवह्यन्नेन्नादोभवत्यधीवहसमानानांजायतेयएवंवेद ॥ १ ॥

भा० । ॐ ॥ योसौनारायणोदेवः

योसाविति । परमात्मापरमचेतनः सनातनोनित्यइत्यात्मशब्दस्यप्रवृत्तिनिमित्तद्वयंविशेषणरूपेणोक्त्वा निमित्तांतरमुक्तं ॥ नित्येति ॥ नित्यगुणत्वाद्व्याप्तगुणत्वाच्चेत्यर्थः । गुणानांनित्यत्वेपिगुणसंबंधःकादाचित्कइतिभ्रमंवारयितुंसदेत्युक्तं । नारायणादिरूपेण नारायणनारायणोनारायणसंकर्षणइत्यादिरूपेणेत्यर्थः । यस्मादिदंसर्वमुत्तिष्ठतितस्मादुक्थइत्यस्यार्थः ॥ सर्वस्येति ॥ पंचविधमुक्थमित्यस्यार्थांतरमाह ॥ बृहतीति ॥ हियस्मात्तच्छस्त्रंबृहतीसहस्रंपंचप्रभेदंतस्माद्बृहतीसहस्ररूपेतत्प्रभेदेसनारायणःपंचधास्थितइत्यन्वयः । केनप्रकारेणबृहतीसहस्रस्यपंचभेदत्वंतत्राह ॥ तृचेति ॥ यत्तृचाशीतित्रयं तिसृणांऋचांसमाहारस्तृचंतस्याशीतित्रयं यच्चतृचाशीत्यास्तृचाशीतित्रयस्यपूर्वमपरंचेतिभागद्वयमस्ति इति तेनप्रकारेण तच्छस्त्रं पंचात्मकमित्यर्थः । शस्त्रभागपंचकेनारायणादिमध्येकस्यकुत्रावस्थानं तृचाशीतीनामेकछंदोनिबद्धत्वेत्रैविध्यंकिंनिबंधनमित्यतआह ॥ प्रथमइत्यादिना ॥ पंचकात्पंचकस्य । नायंसंकर्षणःशेषइतिभावेनाह ॥ यस्येति ॥ यस्यभगवद्रूपस्यसंकर्षणस्यावेशबलेनैव

भा० । परमात्मासनातनः । नित्याततगुणत्वात्सआत्मेत्युक्तःसदाश्रुतौ । नारायणादिरूपेणपंचधावस्थितःसदा । सर्वस्योत्थापकत्वात्सउक्थमित्यभिधीयते । बृहतीसहस्ररूपेचसउक्थेपंचधास्थितः । पंचभेदंहितच्छस्त्रंतृचाशीतित्रयंचयत् । पूर्वापरंतृचाशीत्याइतिपंचात्मकंहितत् । प्रथमेपंचकाद्भागेस्थितोनारायणःस्वयं । ऋक्याशीतिकेपूर्वेगायत्रीछंदआत्मके । वासुदेवःस्थितोनित्यमृगशीतित्रयेतथा । द्वितीयेबृहतीछंदस्यसौसंकर्षणःस्थितः । यस्यावेशबलेनैव

जीवोपरःसंकर्षणः संकर्षणनामा । तत्रसंकर्षणपदप्रवृत्तिनिमित्तस्यभगवदायत्तत्वाच्छब्दस्यामुख्यत्वमित्याह ॥ तत्प्रसादेति ॥ योहवाआत्मानंपंचविधमुक्थंवेद ससंप्रतिविदितियथाश्रुतंवाक्यंव्याचष्टे ॥ एवमिति ॥ ७ ॥ अत्रैवंबृहतीसहस्रलाभप्रकारः ॥ गायत्रीतृचाशीतिःषट्युत्तरशतबृहत्योभवंति । बृहतीतृचाशीतिश्चत्वारिंशदधिकद्विशतबृहत्योभवंति । उष्णिक्तृचाशीतिस्तुषडशीत्युत्तरशतबृहत्योभवंति । गायत्रीचैकाभवति । आहत्यतृचाशीतित्रयस्यषडशीत्युत्तरपंचशतबृहत्योगायत्रीचैकाभवति । पूर्वमपरंचप्रत्येकंबृहतीशतद्वयंदशगायत्र्यः । पंचजगत्योवा । यद्वापूर्वमपरंचप्रत्येकंदशोत्तरत्रिशतगायत्र्यः पंचपंचाशदुत्तरशतजगत्योवाभवंतीतिज्ञेयं । ननुयस्मात्कस्मादपिछंदसइत्युक्तत्वात्कथमुक्तछंदस्त्रयनियमइतिचेन्न । तृचाशीतित्रयस्यछंदोविशेषनियमगर्भत्वेपिपूर्वोत्तरभागयोस्तदभावात् तृचाशीतित्रयस्याप्येकछंदोनियमनाभावाच्चाविरोधात् । पंचधाप्रभेदविवक्षायामुक्तछंदोनियमेपि तदविवक्षायांयस्मात्कस्मादपिछंदसइत्युक्तिसंभवाच्च । पृथिवीवायुरित्यादिव्याचष्टे ॥ तानीति ॥ ननुपृथिव्यादिशब्दानांप्रसिद्धिबलाद्भूतेषुमुख्यत्वात्तत्परित्यागेनकथंभगवत्परिग्रहइत्यतआह ॥ तदावेशादिति ॥ समाकर्ष

भा० । जीवःसंकर्षणोपरः । पृथिवींबिभर्तिसततंतत्प्रसादात्तवैभवः । तृतीयायांतृचाशीत्यामुष्णिक्छंदसिकेशवः । प्रद्युम्नरूपीसततं स्थितोयस्यैवसन्निधेः । उक्थस्यैवांत्यभागेतुसोनिरुद्धोहरिःस्थितः । कामपुत्रोनिरुद्धाख्यांयदावेशेनलब्धवान् । एवंपंचात्मकंविष्णुंबृहत्युक्थस्यदेवतां । योवेदसम्यग्वेत्तासतानिरूपाणिवैहरेः । स्थितानिपंचभूतेषुपृथिव्याद्यभिधानिच । तदावेशात्पृथिव्यादिनामभूतेषुपंचसु । ॥ ७६ ॥

न्यायेनेतिभावः । पृथिव्यादिशब्दान्नारायणादौनिर्वक्ति ॥ पृथुत्वादित्यादिना ॥ आपइतिबहुवचनार्थमाह ॥ बहुरूपइति ॥ आपइत्यस्यासमंतात्पालनादित्यर्थइतिभावेनोक्तंनित्यंपालनादिति ॥ ज्योतींषीतिबहुवचनार्थमाह ॥ बहुरूपःपृथक्पृथगिति ॥ बहुरूपःसन्पृथक्पृथक्ज्योतिषिस्थितइत्यर्थः । ननुसर्वेष्वपिरूपेषुपृथिव्यादिसर्वशब्दप्रवृत्तिनिमित्तसर्वगुणानांसद्भावादतएवतद्गुणानुसारेणसर्वक्रियाप्रवर्तकत्वा त्सर्वस्थानगतत्वाच्च कथंनामभेदइत्याशंक्यापाकरोति ॥ यद्यपीति ॥ यद्यप्यस्यहरेः सर्वाण्यपिरूपाण्यखिलैःशब्दप्रवृत्तिनिमित्तगुणैःपूर्णानिसर्वक्रियाप्रवर्तकानिच तथाप्येकैकरूपेषुसपृथग्गुणैःतत्तत्प्रवृत्त्युपयुक्तगुणैःपृथक्पृथक्स्थानेषुपृथग्विधान्व्यवहारान्प्रवृत्तिरूपान्लीलयाकरोतीव । तस्मात्सर्वत्रसर्वनाम्नोपिविष्णोःपृथग्व्यवहारार्थमुच्चारणार्थमुपासनार्थंचेत्युक्तदिशानामपृथगिवेर्यतइतियोजना । एतस्माद्धीदंसर्वमुत्तिष्ठति । एतमेवाप्येति । अयनंहवाइतिवाक्यत्रयंव्याचष्टे ॥ एतस्मादिति ॥ तथाचश्रुतिः । सन्मूलाःसोम्येमाःसर्वाःप्रजाःसदायतनाःसत्प्रतिष्ठाइति । एवमयनंहवाइत्यंश

भा० । पृथुत्वात्पृथिवीनामाभूमौनारायणःस्थितः । बलज्ञानस्वरूपत्वाद्वायुनामासएवच । वायौसंकर्षणोनित्यंस्थितआकाशनामकः । व्याप्तत्वाद्वासुदेवस्तुसदाकाशेस्थितःप्रभुः । अनिरुद्धस्तथैवाप्सुबहुरूपोव्यवस्थितः । अन्नामापालनान्नित्यंप्रद्युम्नोज्योतिषिस्थितः । ज्योतिर्नामाद्योतनाच्चबहुरूपःपृथक्पृथक् । यद्यप्यस्यहरेःसर्वरूपाण्यप्यखिलैर्गुणैः । पूर्णान्यथापिचैकैकरूपेषुसपृथग्गुणैः । व्यवहारान्पृथग्देवःकरोतीवहि लीलया । तस्मात्पृथगिवास्येतिनामविष्णोःपरात्मनः । सर्वत्रसर्वनाम्नोपिव्यवहारार्थमीर्यते । एतस्माद्धिहरेर्नित्यंजगदुत्तिष्ठतिप्रभोः । मुक्तौलयेचतंयातिसचसर्वाश्रयःप्रभुः ॥

स्यैतद्ब्रह्मायनंसर्वाश्रयमित्यर्थमुक्त्वा अयनंहवैसमानानामित्येकवाक्यतयाव्याचष्टे ॥ यएवमिति ॥ साम्येआश्रयत्वायोगइत्यतोजातीयत्वेनसाम्येप्याधिक्यंसंभवतीत्युक्तंलक्ष्यनिष्ठतयाह ॥ स्वजातीनामिति ॥ स्वजातीयानांमध्येयदुत्तमत्वाख्यंपदंतद्योग्याये ब्रह्मेंद्राद्याःसुराइत्यर्थः । तथाचोक्तं देवेषुवायुःपुरुषोत्तमादृते । देवानामस्मिवासवः । तस्मिन्योन्नंचान्नादंचेत्यारभ्यावपनंहवैसमानानांभवतीत्यंतानिवाक्यानिव्याचष्टे ॥ संकर्षणश्चेत्यादिना ॥ तस्मिन्योन्नंचान्नादंचेत्यत्रोक्तान्नादस्वरूपविवरणपरस्यज्योतिश्चवायुश्चान्नादमित्यादेरर्थउक्तः ॥ संकर्षणश्चेति ॥ योन्नंचेत्युक्तान्नस्वरूपविवरणपरस्यापश्चपृथिवीचान्नमित्यादेरर्थोनारायणेति ॥ यस्माद्भोग्यवस्तुषुसंस्थितौ सर्वलोकानांतर्पकौ । तस्माद्भोज्यांतर्गतत्वात्तर्पकत्वाच्चभोज्यावन्नमित्युच्येते । नतुचर्वणयोग्यत्वादित्यर्थः । आवपनमित्यस्यार्थोवकाशेति ॥ आवपनंहवैसमानानांभवतियएवंवेदेत्यत्रएवंवेदेतिवासुदेवोपासनानुवादांशंयोन्नंचान्नादंचवेदेतिचतूरूपोपासनांशंचैकोक्त्याव्याचष्टे ॥ एवंपंचेति ॥ आवपनंभवतीतिवासुदेवोपासनाफलांशंव्याचष्टे ॥ अवकाशप्रदइति ॥ अन्नादोजायतइतिसंकर्षणप्रद्युम्नोपासनाफलांशंव्याचष्टे ॥ भोक्तेति ॥ स्व

भा० । यएवंवेत्तितंविष्णुमुपास्तेचापरोक्षतः । समुक्तःसमजातीनामाश्रयश्चभविष्यति । स्वजातीनामुत्तमत्वपदयोग्याहियेसुराः । ब्रह्मेंद्राद्यास्तेहियोग्याःसाक्षादस्मिन्नुपासने । अन्येषांज्ञानमात्रेणयोग्यमाधिक्यमाप्यते । संकर्षणश्चप्रद्युम्नस्तत्रभोक्तृषुसंस्थितौ । भोक्तृशक्तिप्रदौनित्यं भोक्तारौचविशेषतः । नारायणानिरुद्धौतौभोग्यवस्तुषुसंस्थितौ । तर्पकौसर्वलोकानांतस्माद्भोग्यौनचवर्ण्यतः । अवकाशप्रदोनित्यंवासुदेवोनभःस्थितः । एवंपंचात्मकंविष्णुंयउपास्तेसदैवतु । अवकाशप्रदःसोपिस्वजातीनांभविष्यति । भोक्ताच

जातीयानामाधिक्येनस्वयंभोक्तेत्यर्थः । भवत्यस्यान्नमितिनारायणानिरुद्धोपासनाफलांशंव्याचष्टे ॥ आप्यायकइति ॥ एतेनयोन्नंवेद सोस्यविष्णोःप्रसादतोस्यस्वजातिवर्गस्यान्नमाप्यायकोभवतीत्यर्थउक्तोज्ञेयः । स्वजातीयपदयोग्याः स्वजातीयानामीशत्वमुत्तमत्वमेवपदंतद्योग्याइत्यर्थः । प्राणभृतोन्नादमित्यस्यार्थमाह ॥ संकर्षणश्चेति ॥ जंगमेषुभोक्तृषुव्यवस्थितावित्यर्धतःपरंभोक्तृशक्तिप्रदौनित्यभोक्तारौचविशेषतइतिशेषतयाद्रष्टव्यं । ओषधिवनस्पतयोन्नमित्यस्यार्थमाह ॥ नारायणेति ॥ स्थावरेषुभोग्येष्वंतर्गताविवियोज्यं । अत्रापितर्पकौसर्वजीवानामितिशेषोद्रष्टव्यः । आवपनमाकाशइत्यादिपूर्वग्रंथस्यमध्यगतत्वादेतच्छेषतयाप्यर्थमाह ॥ तत्रापीति ॥ एतेनावपनंहवैसमानानामित्यारभ्यौषधिवनस्पतयइत्येतत्पर्यंतस्यव्याख्यानमपिकृतंज्ञेयं । प्राणभृदादिशब्दान्प्रसिद्धार्थप्रतीतेर्व्याचष्टे ॥ प्राणानामित्यादिना ॥ ओषणाद्दहनात् । उषप्लुषदाहइतिधातुः । वननीयानांभजनीयानांपतित्वात् वनषणसंभक्ताविवितिधातुः । यद्योषधिवनस्पतिशब्दाभ्यांभगवान्गृह्यते कथंतर्हितस्यान्नत्वमद्यत्वायोगादित्यतआह ॥ अन्नइति ॥ उपजीव्यत्वमेवाद्यत्वमितिभावः । तेषांयउभयतोदंताइत्यत्रतेषांयेउभयतोदंतत्वेन

भा० । आप्यायकश्चैवतस्यविष्णोःप्रसादतः । ब्रह्मेंद्राद्याःस्वजातीशपदयोग्याअमुष्यच । योग्याउपासनस्यस्युस्तदन्येज्ञानमात्रके । संकर्षणश्चप्रद्युम्नोजंगमेषुव्यवस्थितौ । नारायणानिरुद्धौतुस्थावरांतर्गतौप्रभू । तत्राप्याकाशगोनित्यंवासुदेवोनिरंजनः । प्राणानांभरणान्नित्यंप्राणभृन्नामतद्धरेः । नह्यन्यःप्राणभर्तास्तितमृतेपुरुषोत्तमं । ओषणाच्चनिधानाच्चसएवौषधिनामकः । वननीयपतित्वाच्चसएवहिवनस्पतिः । अन्नेस्थित्वा तृप्तिदत्वंतस्याद्यत्वमपीष्यते ।

प्रसिद्धपुरुषसादृश्यंप्राप्ताव्याघ्रादयस्तेऽन्नादाः इतरेगोमहिषादयोन्नमित्यन्यथाप्रतीतेर्व्याचष्टे ॥ पुरुषस्येति ॥ पुरुषस्यानुविधांविहिताइत्येतद्भगवद्रूपेयोजयति ॥ पुरुषाकृतिरिति ॥ वृषभाश्वादिरूपेणवृषभाश्वाद्याकारेणान्यपशुषुस्थितावित्यर्थः । तस्मात्तइतरान्पशूनधीवचरंतीत्येतद्व्याचष्टे ॥ वाहनेति ॥ संकर्षणश्चप्रद्युम्नस्तेष्वारोढृषुसंस्थितस्तस्मात्तेनरादयइतरान्पशूनधीवचरंति वृषभाश्वादिवाहनानांमहिषादिचर्मविनिर्मितोपानहादीनामारोढारोभवंतीतिभावः । तस्मात्तइतरानितिवाक्यमधिष्ठितभगवद्रूपपरतयापियोजयति ॥ यतइति ॥ यतःसंकर्षणःप्रद्युम्नश्चतेष्वारोढृषुसंस्थितौततस्तयोःसंकर्षणप्रद्युम्नयोःसंचारस्तयोःपश्चाद्यधिष्ठितनारायणानिरुद्धयोरुपरीवभविष्यतीत्यर्थः । एतेनाधीवह्यन्नेऽन्नादोभविष्यतीतिवाक्यमपिव्याख्यातंभवति । आवपनमाकाशइत्येतदत्राप्याकृष्यव्याख्येयमित्याह ॥ आकाशगइति ॥ अधीवहिसमानानामितिफलवाक्यंव्याचष्टे ॥ वाहनेति ॥ एतेनसमानानांमध्येस्वयंवाहनमधिरुह्यचरतीतिमूलार्थइत्युक्तंभवति । वाहनादीत्यादिपदेनस्वजातीनामवकाशप्रदानशक्तियुक्तश्चेतिगृह्यते । तेनावपनंहवैसमानानामित्येतदत्रापिसंयोज्यमित्युक्तंभवति । योहवाआत्मानमित्युपक्रम्यको

भा० । पुरुषस्यहरेर्येतुसदाकारेणसंस्थिताः । देवगंधर्वमर्त्याद्यास्तेषुसंकर्षणोहरिः । प्रद्युम्नश्चस्थितोनित्यंपुरुषाकृतिरेवतु । तौभोक्तारौच भोग्यानांभोजकावखिलस्यच । नारायणानिरुद्धौतुतथान्यपशुषुस्थितौ । वृषभाश्वादिरूपेणतृप्तिदावखिलस्यच । वाहनोपानहादीनामारोढारोन रादयः । यतःसंकर्षणश्चैवप्रद्युम्नस्तेषुसंस्थितौ । ततस्तयोर्हिसंचारउपरीवभविष्यति । आकाशगोवासुदेवःपंचमोत्राप्युपास्यते । वाहनादियुतोमुक्तौभवेदेतदुपासकइत्यैतरेयसंहितायां ।

॥ ७८ ॥

यंपंचविधआत्मेत्यतःपृथिवीत्यादिनाभूतान्येवपंचविधात्मतयोच्यंतइत्यपव्याख्यानंव्याख्यानरूपप्रमाणेननिरस्तमप्यंतरंगबाधकेनापिनिराचष्टे ॥ आत्मशब्दादिति ॥ भूतमात्रंभूतान्येव । विष्णुस्तुनोच्यतइतिनवाच्यमित्यर्थः । नन्वात्मशब्दस्यशरीरपरत्वात्तदुपादानत्वेनभूतेष्वात्मशब्दोयुक्तएवेत्यतआह ॥ नचमुख्येति ॥ यद्वानभूतमात्रमुच्यतेकिंतुतदभिमानिनोपि । तेषुत्वात्मशब्दःसंभवतीत्यतआह ॥ नचमुख्येति ॥ ननुभूतपरत्वेआत्मश्रुतिविरोधवद्भगवत्परत्वेपृथिव्यादिश्रुतिविरोधइत्यतआह ॥ सर्वनामवत्त्वमिति ॥ श्रुत्यैव तावाएताःसर्वाऋचइत्युपनिषदैव । नामानिसर्वाणीत्यादिश्रुत्यावा । आवपनमाकाशइत्येतदवकाशप्रदइतिप्रमाणेनव्याख्यातं । तन्मूलभूतंधातुव्याख्यानंपठति ॥ वपेति ॥ तस्मिन्योन्नंचान्नादंचवेदेत्यस्यतस्मिन्भूतपंचकेयोन्नमन्नादंचवेद सोस्मिन्नेवभूतपंचकमध्ये पृथिवीलोकेन्नादोजायतइत्येतदपव्याख्यानमितिभावेनस्ववचनेनापिविवृणोति॥तस्मिन्निति॥विशेषेणेत्याङोर्थः॥ तस्मिन्नितितच्छब्दस्यरूपपंचकपरत्वं अस्मिन्नितीदंशब्दस्यस्वजातिपरत्वंचोक्तं । तदुपपादयति ॥ तस्मिन्वेदेति ॥ तस्मिन्वेदअस्मिन्नाजायतइतिपृथक्पृथगापश्चपृथिवीचान्नमितिप्रकरणेओषधिवनस्पतयोन्नमितिप्रकरणेचतस्मिंस्तस्मिन्नित्युपास्ययूथस्यपुनःपुनर्विशेषणादस्मिन्नाजायतेस्मिन्नाजायतइत्युपासकस्यापिपुनःपुनर्विशेषणात्तस्मि

भा० । आत्मशब्दाच्चनभूतमात्रमत्रोच्यते । नचमुख्यार्थपरित्यज्योपचारार्थांगीकर्तव्योविरोधाभावे । सर्वनामवत्त्वंचभगवतःश्रुत्यैवोपपादितंपूर्वत्र । वपनीरोमकरणावकाशप्रदानबीजवर्धनेष्वितिचधातुः । तस्मिन्पंचकेयोन्नमन्नादंचवेदसोस्मिन्स्वजातियूथेविशेषेणान्नादआजायतेह । तस्मिन्वेद अस्मिन्नाजायतइतिपृथक्पृथक्पुनःपुनर्विशेषणात्

न्नूपपंचकेस्मिन्स्वजातियूथइत्यर्थउपपद्यतइतिपूर्वेणान्वयः।अयंभावः।प्रथमप्रकरणेतस्मिन्नित्यस्यपृथिव्यादिशब्दितपंचविधात्म परामर्शकत्वमविवादं । यदितत्रभूतान्येवविवक्षितानि तर्हिद्वितीयप्रकरणेपितच्छब्देनभूतपंचकमेवपरामर्शविषयःस्यात् । ते षामेवपूर्वप्रकृतत्वात् । नचासौयुक्तस्तद्विवरणपरेणौषधिवनस्पतयोन्नमित्यादिनाविरोधात् । नारायणादिरूपपंचकपरामर्शकत्वे त्वधिष्ठानमात्रभेदेपिप्रकरणद्वयेप्येकविधमेवतदधिष्ठितंप्रधानपंचकंपरामृश्यतइत्यविरोधः । अस्मिन्नाजायतइत्यस्यापिप्रथम प्रकरणेस्वोपास्यभूतमध्यगतपृथिवीलोकेअन्नादेआजायते । द्वितीयप्रकरणेत्वस्मिन्स्वोपास्यप्राणिसमुदायेऽन्नादोजायतइतिव्या ख्यानमयुक्तं । प्रथमप्रकरणेऽस्मिन्नित्यनेनपरामृष्टस्यैवद्वितीयप्रकरणेपीदंशब्देनपरामर्ष्टुयुक्तत्वात् । प्राणिसमुदायपरामर्शायो गात् । स्वयूथपरामर्शेतुप्रकरणद्वयश्रुतेदंशब्दयोरेकविषयत्वलाभादिति । नन्वस्तुतर्हिद्वितीयप्रकरणेप्यस्मिन्नित्यस्यपृथिवीलो कइत्यर्थइत्यतोदूषणांतरमाह ॥ उपासकस्येति ॥ प्रकरणद्वयेपियोन्नमन्नादंचवेदाहास्मिन्नन्नादोजायतइत्युक्तस्योपासकस्या यनंहवैसमानानांभवत्यावपनंहवैसमानानांभवतीतिस्वजातिवाचकपदसमवधानात्पृथिवीपदस्यासन्निधानाच्चास्मिन्नित्यस्यस्वजा तावित्यर्थोज्ञायतइति । पुरुषस्यानुविधामित्येतत्पुरुषस्यहरेरितिव्याख्यातं । तदयुक्तं । हयाकारसादृश्यस्यपशुष्वपिसद्भावा द्धरेःसर्वाकारत्वेनपश्वाकारस्याप्युपपत्तेरित्यतःपुरुषपदेनपुरुषाकारस्तन्नामकोरूपविशेषोविवक्षितइतिप्रमाणेनाह ॥ क्षिराब्धी

भा० । उपासकस्यस्वजातिसन्निधानाच्चस्वजातावितिज्ञायते । क्षीराब्धिशयनंविष्णोरूपंयत्पुरुषाभिधं । संकर्षणश्चप्रद्युम्नस्तदाकारौनृषु स्थितौ । नारायणानिरुद्धौतुपश्वाकारौपशुस्थितावितिसत्तत्वे ।

ति ॥ इतरान्पशूनधीवचरंति अधीवह्यन्नेऽन्नादोभवतीत्यत्रचेवशब्दाभिप्रायमाह ॥ गुणेति ॥ गुणवैशेष्याभावाद्वाह्यवाहक भगवद्रूपाणां ॥ १ ॥ पूर्वखंडेअचेतनस्यभोग्यत्वंचेतनस्यभोक्तृत्वं तेष्वपिस्थावराणांभोग्यत्वंजंगमानांभोक्तृत्वं तेष्वपिपश्वादी नांभोग्यत्वंपुरुषाणांभोक्तृत्वमितिनिरूपितं । कुतइदंपदार्थतारतम्यमित्यतोभगवत्सन्निधानतारतम्यादितिभावेनायंखंडः । य आत्मानं परमात्मानं । तरां तारतम्येना विराविर्भूतंवेद सतस्यतदीयोभवति तदंतरंगप्रियोभवति । यद्वाऽऽविस्तरामित्यस्या विर्भावतारतम्येनेत्यर्थः । सन्निधानतारतम्यंप्रपंच्यते ॥ अश्नुतइति ॥ ओषधिवनस्पतयः स्थावराणि । यच्चकिंचित्प्राणभृच्च लनयुक्तंजंगमं । तत्सर्वंसनारायणो । भूयो भूयस्त्वेन शिलादिभ्योविशेषेणतेष्वाविर्भूतःसन्नश्नुतेप्राप्नोति । सन्निधानंतारतम्य ज्ञानंचभगवत्येवपूर्णं मन्येषुयथायोग्यमितिभावेनोच्यते ॥ सइति ॥ सनारायणएवसर्वभूतेषुतारतम्येनाविःसन्निहितंस्वात्मा नं तरां नितरां सम्यग्वेद नान्यइत्यर्थः । शिलादिभ्यःस्थावरजंगमेषुसन्निधानाधिक्येकार्यदर्शनंप्रमाणमुच्यते ॥ ओषधीति ॥ ओषधिवनस्पतिषुरसः क्षीरादिः । प्राणभृत्सुचित्तं स्मृतिकारणंवृत्तिविशेषो दृश्यते । तच्चसन्निधानविशेषादेवोपपद्यते । अन्य थातन्नस्यादितिभावः ॥ पश्वादिभ्यःपुरुषएवसआत्मा तरा मतिशयेनाविः सन्निहितः । कुतः । हियस्मात्पुरुषएव प्रज्ञानेन

भा० । गुणवैशेष्याभावेनवाहनादिषुचरणमात्रादधीवचरंतीत्यादाविवशब्दः ॥ १ ॥

उप० । तस्यायआत्मानमाविस्तरांवेदाश्नुतेहाविर्भूयओषधिवनस्पतयोयच्चकिंचप्राणभृत्सआत्मानमाविस्तरांवेदौषधिवनस्पतिषुहिरसोदृश्य तेचित्तंप्राणभृत्सुप्राणभृत्सुत्वेवाविस्तरामात्मातेषुहिरसोपिदृश्यतेनचित्तमितरेषुपुरुषेत्वेवाविस्तरामात्मासहिप्रज्ञानेन

संपन्नतमोतिशयेनसंपन्नः । कुतः । मनसाविज्ञातंवाचावदति । विज्ञातं पूर्वमनुभूतंपश्यतिप्रत्यभिजानाति । श्वस्तनं सर्वकालोपलक्षणं । एष्यत्कालंपूर्वकालंचवेद । लोकालोकौपुण्यपापसाध्यौस्वर्गनरकलक्षणौवेद । मर्त्येनशरीरेणामृतंमोक्षमीप्सतीच्छत्येवमेषपुरुषःप्रज्ञानेनसंपन्नतमः।अथतेभ्यइतरेषांपशूनामशनापिपासाविषयएवाभिविज्ञानं।एवशब्दव्यावर्त्यमुच्यते॥ नविज्ञातमित्यादिना॥तस्मात्तेपश्वादयोज्ञानेनैतावंतःपरिमिताभवंतीत्यर्थः।कुतइदंज्ञातिवैचित्र्यमित्यतउच्यते । यथाप्रज्ञमिति॥ पश्वादीनांयथाप्रज्ञंप्रज्ञानुसारेणसंभवाउत्पत्तयइत्यर्थः ॥७॥ ब्रह्मणएवनानाधिष्ठानेषूपाधिवशात्स्वरूपतारतम्यमुच्यते इत्यन्यथाप्रतीतेः खंडंप्रमाणेनव्याचष्टे॥आविर्भावमिति॥यआत्मानंतरांतारतम्येनाविर्भूतंवेदेत्यस्यतात्पर्यमाविर्भावमिति ॥ यइतिनिर्दिष्टएवतस्येतिषष्ठ्यंतेनोच्यतइत्यन्यथाप्रतीतिनिवारणायसइत्यध्याहारेणव्याचष्टे॥सतस्येति ॥नन्वज्ञान्यपितदीयएवकोविशेषोज्ञानिनइत्यतउक्तंविशेषेणेति ॥ तमेवविशेष्यंव्यनक्ति॥ प्रीतीति॥ ज्ञानिनिप्रीतिसंभवात्प्रीत्याख्यविशेषेणतदीयोभविष्यतीत्यर्थः । अश्नुतेहाविर्भूयइत्यादिव्याचष्टे ॥ स्थावरमिति ॥ शिलादिभ्योभूयस्त्वेनतेष्वाविर्भूतःस्थावरादिकमश्नुतइतियोजना । सआ

उप० । संपन्नतमोविज्ञातंवदतिविज्ञातंपश्यतिवेदश्वस्तनंवेदलोकालोकौमर्त्येनामृतमीप्सत्येवंसंपन्नोथेतरेषांपशूनामशनापिपासेएवाभिविज्ञानंनविज्ञातंवदंतिनविज्ञातंपश्यंतिनविदुःश्वस्तनंनलोकालोकौतएतावंतोभवंतियथाप्रज्ञंहिसंभवाः ॥ २ ॥

भा० । आविर्भावंतारतम्याद्योवेदपरमात्मनः । सतस्यैवविशेषेणप्रीतियोगाद्भविष्यति । स्थावरंजंगमंचैवभूयस्त्वेनाश्नुतेहरिः । आविर्भूतस्तेषुसदा

त्मानमाविस्तरामित्येतद्व्याचष्टे ॥ सम्यगिति ॥ तरामित्यस्यार्थःसम्यगिति ॥ तरामित्यस्यार्थोतरंतारतम्यादिति ॥ शिलादिभ्योतिशयेनस्थावरजंगमेषुसन्निधानाधिक्येज्ञापकमुक्तं ॥ ओषधिवनस्पतिषुहिरसोदृश्यतेचित्तंप्राणभृत्स्विति ॥ तद्व्याचष्टे ॥ विष्णोरित्यादिना ॥ यद्यस्माद्यादृशं । तादृक्तादृशं । तस्मात्तस्मादेव । नशिलाद्येषुरसश्चित्तंचदृश्यतइत्यर्थः । ननुशिलादावपिभारदार्ढ्यादिकमस्त्यतस्तत्रापिविशेषसन्निधानमंगीकार्यमित्यतआह ॥ सन्निधिरिति ॥ हियस्माच्छिलाद्येषु विष्णोर्यादृशी वृक्षादिषुतादृशीसन्निधिर्नास्ति । केवलंशिलादिषुशुष्कदार्वादिभ्योतिशयेनस्थितोविष्णुर्भारदार्ढ्यादिकारणं । चित्तादिकस्य चित्तरसयोः । वृक्षाद्याः वृक्षौषधिपश्वाद्याः । अपव्याख्यानंदूषयति ॥ विशेषइति ॥ ननुपूर्वपूर्वेभ्यउत्तरोत्तरंभगवतःसन्निधानतारतम्येनाधिष्ठानतारतम्यमेतद्ग्रंथार्थतयाभवद्भिर्व्याख्यातं । सन्निधानतारतम्यंनामाल्पपदार्थेष्वल्पगुणतयोत्तमेषुततोपिगुणाधिक्येनावस्थानमितिवाच्यं । तथाचनीचोच्चपदार्थेष्ववस्थितस्यस्वरूपतारतम्यंप्राप्तमेवेत्यतआह ॥ यत्रेति ॥ अस्माभिर्हिगुणपूर्णोहिसर्वत्रस्वयंविष्णुःसनातनइत्यंगीकृत्य यत्रपदार्थेविष्णुःस्वस्यगुणाधिक्यंदर्शयेत्तद्वस्तुवरमित्युच्य

भा० । सम्यक्स्वात्मानमेवच । तारतम्यात्सन्निहितंसर्वभूतेषुकेशवः । वेत्त्येकएवविष्णोर्यद्विशेषावेशनंसदा । जंगमेषुचवृक्षेषुनैवताद्दृशिलादिषु । तस्माद्वृक्षादिषुरसःचित्तंचलनवत्सुच । दृश्यतेनशिलाद्येषुसन्निधिर्नहिताद्दशी । शिलाद्येषुस्थितोविष्णुर्भारदार्ढ्यादिकारणं । नैवचित्तादिकस्यातोवृक्षाद्याउत्तमास्ततः । विशेषोयंपदार्थानांनतुविष्णोःकथंचन । यत्रविष्णुर्गुणाधिक्यंदर्शयेद्वस्तुतद्वरं । गुणपूर्णोहिसर्वत्रस्वयं विष्णुःसनातनः ।

ते । नतुविष्णोरेवगुणतारतम्यं । सन्निधानंहितत्प्रोक्तंसामर्थ्यव्यंजनंहरेरित्युक्तत्वादितिभावः । प्राणभृत्सुत्वेवाविस्तरामात्मा पुरुषेष्वाविस्तरामित्येतद्व्याचष्टे ॥ वृक्षेभ्यइति ॥ तस्ययआत्मानमित्यादिस्पष्टंस्ववचनेनव्याचष्टे ॥ यआत्मानमिति॥ प्राक् तरांतारतम्येनाविःसन्निहितमितिभिन्नपदतयाव्याख्यातमधुनाऽविस्तरामित्येकपदत्वेनव्याख्याति ॥ आविर्भावतारतम्ये नेति ॥ अश्नुतइत्याद्यपेक्षिताध्याहारेणव्याचष्टे ॥ ओषधीति ॥ सइत्यस्यार्थो भगवान्नारायणइति ॥ सइत्येतदात्मान मात्रिस्तरामित्युत्तरवाक्येनापिसंबध्यव्याचष्टे ॥ सएवेति ॥ प्राणभृच्छब्दःपश्वादिजंगमविषयतयाव्याख्यातः । तत्कथंशब्द लब्धमित्यतआह ॥ अनचेष्टायामिति ॥ यथाप्रज्ञमित्येतद्व्याचष्टे ॥ ज्ञानानुसारेणेति ॥ संभवाइत्यनूद्योत्पत्तयइतिव्या ख्या ॥ २ ॥ पूर्वखंडेसामर्थ्यव्यंजनापरपर्यायंसन्निधानंपुरुषेधिकमित्युक्तं । तदेवसामर्थ्याधिक्यंउपास्त्यर्थमुच्यतेस्मिन्खंडे ॥ सएषइति ॥ योस्मिन्पुरुषेपश्वादिभ्यआधिक्येनसन्निहितोभगवान्सएषपुरुषःसर्वेभ्योगुणतोरूपतश्चसमुद्रःसमुद्रिक्तः । तत

भा० । वृक्षेभ्योप्यधिकंविष्णुर्जंगमेषुप्रकाशितः । तेभ्योपिपुरुषेविष्णुर्गुणाधिक्यप्रकाशकइत्यादिच । यआत्मानंपरमात्मानमाविस्तरां आविर्भावतारतम्येनवेदसतस्यविष्णोरेव । सर्वेषांतदीयत्वेपिप्रियत्वात्तदीयत्वविशेषणं । ओषधिवनस्पतयोयच्चकिंचप्राणभृत्तत्सर्वंशिलादिभ्यो भूयस्त्वेनतेष्वाविर्भूतोश्नुतेभगवान् । सएवचनारायणःसम्यक्स्वात्मानमाविस्तरांवेद । अनचेष्टायामितिधातोश्चेष्टावत्त्वमेवप्राणभृत्त्वंपश्वादीनां। ज्ञानानुसारेणह्युत्पत्तयःसंभवाः ॥ २ ॥

उप० । सएषपुरुषःसमुद्रः

श्चकिमित्यतस्तथाजानीयादितिविधातुमाचारोवा कैमुत्ययुक्तिर्वाप्रमाणत्वेनोच्यते ॥ सर्वंलोकमिति ॥ सजीवोब्रह्मादिर्यद्य पियस्माद्भगवत्प्रसादात्सर्वंलोकमतिअतिशयेनाश्नुते प्राप्नोति तदाप्येनमात्मानंभगवंतमति सर्वोत्कृष्टत्वेन मन्यते । नकेवलंसं सारीब्रह्मादिरतिमन्यते किंतुमुक्तोपीत्युच्यते ॥ सर्वमिति ॥ सर्वंलोकं सर्वलोकानतीत्ययत्किंचिदलौकिकंमोक्षाख्यमश्नुते प्राप्नोति तदापितमेनं विष्णुं स्वात्मनःसर्वस्माच्चाधिकंमन्यतइत्यर्थः । यदैवंसर्वलोकाधिपत्यंमोक्षंचप्राप्तानामपिविष्णूत्कर्षज्ञा नंतदात्यल्पमंतरिक्षंप्राप्तानामहंभावेकारणाभावात्सिद्धमेवतथाज्ञानमित्युच्यते ॥ यद्यंतरिक्षमिति ॥ एवमाचारंकैमुत्यंचो क्त्वा येस्वर्गाद्याधिपत्यंप्राप्तानहुषप्रभृतयस्तेषामहमेवेश्वरइतिभावोस्ति । येचकर्मफलतयास्वर्गप्राप्तास्तेषांकेषांचित्क्रियाफलेस्वा तंत्र्यभावोस्तींद्रादीनांचमहैश्वर्यवशेनपारिजातहरणादावसुरावेशवशेनकृष्णोमदवमइतिभावोस्ति तानुपलक्षणीकृत्याहंभावप्र सक्तिमतांसर्वेषामपिभगवदुत्कर्षज्ञानंविधीयते ॥ यद्यमुमिति ॥ विष्णुर्यद्यमुंस्वर्गलोकंदेवलोकाधिपत्यंवा तद्योग्यस्याश्नुवी तप्रापयीत ददातितथाप्येनंभगवंतमतिमन्यैतैवाधिकंजानीयादेव । ननुस्वर्गभोगस्यबहुवेश्यादिपरिवारयुक्तत्वेनाशुचित्वादी श्वरेणप्रदत्तेपिकथंतत्परिगृह्णीयुरिंद्राद्याइत्यतश्चोक्तं ॥ यद्यमुमिति ॥ यदप्यमुंदेवलोकाधिपत्यंविष्णुर्ददातितदप्यश्नुवीतैवभुं जीतैवबहुवेश्यादियुक्तमितिबुद्ध्यातत्त्यागोनकार्यः । यद्वायःकश्चित्साधनानुष्ठातायद्यप्यमुंलोकं स्वर्गाद्यश्नुते प्राप्नोति तदाप्य श्नुवीतैव ईश्वरप्रसादादिदंप्राप्तमितिबुद्ध्याकेवलंभुंजीतैव । नफलेस्वातंत्र्यमतिंकुर्यात्किंत्वेनमेवाधिकंमन्येतेत्यर्थः । पुरुषेसन्नि

उप० । सर्वंलोकमतियद्धकिंचाश्नुतेऽत्येनंमन्यतेयद्यंतरिक्षंलोकमश्नुतेऽत्येनंमन्यतेयद्यमुंलोकमश्नुवीतात्त्येवैनंमन्येत

धानाधिक्यविवरणायोपक्रांतंरूपतःसमुद्रेकंतत्तच्छब्दप्रवृत्तिनिमित्तगुणोद्रेकंचोपपादयितुमुच्यते ॥ सएषपुरुषःपंचविधइ त्यादिना ॥ सएषपुरुषोहरिःपुरुषशरीरस्थपंचभूतेषुज्योतिरादिषुप्रद्युम्नादिरूपेणपंचविधःस्थितः । तस्यपुरुषस्ययदुष्णमुपल भ्यतेतज्ज्योतिरग्निभूतं तत्रज्योतिर्नामाप्रद्युम्नः । यानिखानिविवराणिसआकाशस्तत्राकाशनामावासुदेवः । यल्लोहितं रक्तं श्ले ष्मारेतस्ताआपः तास्वम्नामानिरुद्धः । यच्छरीरं परिदृश्यमानंस्थूलं सापृथिवी तत्रपृथिवीनामानारायणः । यःप्राणः श्वासो च्छ्वासादिलक्षणः सवायुस्तत्रवायुनामासंकर्षणः । सएषप्राणशब्दितोवायुःप्राणोपानोव्यानउदानःसमानइतिपंचविधः । वाय्वं तर्गतःसंकर्षणोप्यनिरुद्धादिरूपेणपंचविधःप्राणादिनामाप्राणादिषुवर्तते । वायौपंचभीरूपैःविशेषसन्निधानमुक्तं तत्रकोहेतुरि त्यत आकाशादिभूतेभ्यउत्तमत्वंहेतुरितिभावेनोत्तमत्वेज्ञापकमुच्यते ॥ ताइति ॥ ताअग्न्यादिस्वरूपाश्चक्षुःश्रोत्रंमनोवागित्ये तादेवताःप्राणापानयोर्निविष्टा आश्रिता । मुख्यप्राणस्यप्राणापानाख्यरूपद्वयेनविशेषप्रवृत्तिरितिभावेनद्वयोरुपादानं वस्तुत स्तुरूपपंचकेप्याश्रिताइतिबोध्यं । वायुरपिप्राणादिनामकेविष्णावाश्रितइतिचबोध्यं । ज्ञापकांतरमुच्यते ॥ प्राणस्येति ॥ प्राणस्यापायंशरीरादुत्क्रमणमनुसृत्यैतादेवताअपियंतिगच्छंति । वाक्चित्तादीनांसवृत्तिकानांवायुराश्रयः । तस्यनारायणआ

उप० । सएषपुरुषःपंचविधस्तस्ययदुष्णंतज्ज्योतिर्यानिखानिसआकाशोथयल्लोहितंश्लेष्मारेतस्ताआपोयच्छरीरंसापृथिवीयःप्राणःसवायुः सएषवायुःपंचविधःप्राणोपानोव्यानउदानःसमानस्ताएतादेवताःप्राणापानयोरेवनिविष्टाश्चक्षुःश्रोत्रंमनोवागितिप्राणस्यह्यन्वपायमेताअपियंति

श्रयइत्युक्तं । तत्रज्ञापकमुच्यते ॥ सएषवाचइति ॥ यद्यस्मान्नारायणोवायुद्वारावाक्चित्तादीनामाश्रयस्तस्माद्यद्यज्ञो यो यज्ञः । सएषवाचश्चित्तस्योपलक्षणमेतत्वाक्चित्तादिस्वरूपिणांदेवाना मुत्तरोत्तरिक्रमः क्रमयुक् । मनसावाग्रेसंकल्पयत्य थवाचाव्याहरतीत्युक्तदिशासंकल्पनव्याहरणादिक्रमिकवृत्तिभ्योजातः । सएषवाक्चित्तादींद्रियवृत्तिभ्योजातोयज्ञः । अग्नि होत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमइति पंचविधः । सएषयज्ञोयज्ञांतर्गतोभगवानपिपंचविधेग्निहोत्रादिकेतत्तन्नामा निरुद्धादिरूपेणपंचधावस्थितइत्यर्थः । वायुद्वारावाक्चित्तादिनियामकत्वादेवहरेस्तद्वृत्तिजन्येयज्ञेप्याश्रयतयापंचरूपेणावस्था नमितिभावः । नकेवलंयज्ञेपंचधावस्थानं । किंतुपंचविधयज्ञमध्येप्रधानेसोमेचेतिभावेनसोमस्यातिशयमुक्त्वातत्रपंचधावस्था नमुच्यते ॥ सएषयज्ञानामिति ॥ यत्सोमो यःसोमः । सएषयज्ञानांमध्येसंपन्नतमो तिशयेनगुणाढ्यः । यज्ञानामतिशये नसंपत्तिकारणंवा । एतस्मिन्सोमेएताःपंचविधाःशास्त्रतोधिगम्यते । कास्ताः सवनेभ्यः प्रातर्माध्यंदिनतृतीयसवनेभ्यः प्राग्य दंगंप्राच्यांगं सैकाविधा । त्रीणिचसवनानितिस्रोविधाः । सवनेभ्योयदूर्ध्वमुदीच्यांगं सापंचमीविधा । एतस्मिन्सोमएताभगव न्मूर्तयोनिरुद्धादिक्रमेणपंचधाधिगम्यंते । कथंयत्प्राक्सवनेभ्यःतत्रैकाविधाभगवन्मूर्तिरित्यादियोजना । अत्रसएषपुरुषोजी वःसमुद्रइवनकेनापिकामेनपूर्यते । कुतः । सर्वलोकमतिक्रम्ययत्किंचिदश्नुतेएनंविषयंचातिक्रम्यततोप्यतिशयितंमन्यतेइच्छ

उप० । सएषवाचश्चित्तस्योत्तरोत्तरिक्रमोयद्यज्ञःसएषयज्ञःपंचविधोग्निहोत्रंदर्शपूर्णमासौचातुर्मास्यानिपशुःसोमःसएषयज्ञानांसंपन्नतमोय त्सोमएतस्मिन्ह्येताःपंचविधाअधिगम्यंतेयत्प्राक्सवनेभ्यःसैकाविधात्रीणिसवनानियदूर्ध्वंसापंचमी ॥ ३ ॥

तीत्याद्यपव्याख्यानिरासाययथावद्व्याचष्टे ॥ योस्मिन्निति ॥ ननुयद्ययंपुरुषोविष्णुस्तर्हिसर्वलोकमतीत्यादौतस्यैवकर्तृत्वेनान्वयःस्यादित्यतआह ॥ सजीवइति ॥ सएषपुरुषःसमुद्रइत्यत्राधिष्ठितस्यपुरुषस्यसमुद्रत्वमुक्तं । सर्वलोकमित्यादौतदधिष्ठानभूतस्यजीवस्यपरामर्शेनकर्तृत्वेनान्वयइतिभावः । सर्वलोकमत्यश्नुतेयदत्येवैनंमन्यतइत्यंशस्यार्थमाह ॥ यद्यपीति ॥ यदित्यस्ययद्यपीत्यर्थः । यद्यस्माद्भगवत्प्रसादादित्यर्थांतरं । अत्यश्नुतइत्यस्याधिपइत्यर्थः । तदपीत्यतःपरंतदापिसर्वस्माच्चेत्यंतंयोज्यं। सर्वलोकमतियद्धकिंचाश्नुतइत्यादिविशिष्टवाक्यस्यार्थांतरमाह ॥ सर्वलोकानित्यादिना ॥ अधिकमेवेत्येवकारव्यावर्त्यमाह ॥ मुक्तोपीति ॥ मुक्ताधिक्येभगवतो यद्धकिंचेतिहशब्दसूचितंप्रमाणमाह ॥ कृष्णइति ॥ यद्यमुंलोकमित्यादिकंदेवताविषयतयाव्याकुर्वन्यद्यमुंलोकमश्नुवीतेत्यंशंतावद्व्याचष्टे ॥ यद्यपीति ॥ यदीत्यस्यप्रतिपदंयद्यपीति । यदपीत्यर्थः । अश्नुवीतेत्यस्यप्रापयतीत्यर्थमत्वोक्तंविष्णुर्ददातीति ॥ तदपीत्यध्याहारप्रदर्शनं । आश्नुवीतेत्यावृत्तस्यैवार्थः ॥ अश्नुवीतैवेति ॥ भुं

भा० । योस्मिन्पुरुषेपश्चादिभ्यआधिक्येनसन्निहितोभगवान्सएषपुरुषःसमुद्रः समुद्रिक्तोन्येभ्यः । सजीवोयद्यपिभगवत्प्रसादात्सर्वलोकाधिपोभवतिसर्वलोकानतीत्ययात्किंचिदलौकिकंमोक्षाख्यमप्यश्नतेतथापितमेनमात्मशब्देनप्रस्तुतंविष्णुमत्येवमन्यतेऽधिकमेवमन्यते । स्वात्मनःसर्वस्माच्चमुक्तोपिनतेनसाम्यंतद्भावंवामन्यते । कृष्णोमुक्तैरिज्यतेवीतमोहैः । मुक्तानांपरमागतिः । अमृतस्यैषसेतुरित्यादिवाक्याच्च । यद्यपि देवलोकाधिपत्यंतद्योग्यस्यविष्णुर्ददातीतदप्यश्नुवीतैव ।

जीतैवेत्यर्थः । एवकारव्यावर्त्यमाह ॥ बहुगणिकेति ॥ यद्यमुंलोकमश्नुवीतात्येवैनंमन्येतेतिसमग्रवाक्यंव्याचष्टे ॥ यद्यपीति ॥ अस्यांयोजनायामश्नुवीतैवबहुगणिकादिपरिवारयुक्तमशुचीदंपदमितिबुद्ध्यानापह्नुवीतेत्यंशंविहायभाष्यंयोज्यं । तथाहि यद्यपिदेवलोकाधिपत्यंतद्योग्यस्यविष्णुरश्नुवीत प्रापयीत ददाति । तदपि तथाप्येनंविष्णुमतिमन्येतैव । तस्यैवविवरणं ॥ सर्वथेति ॥ सर्वथा सर्वैर्गुणैः स्वतःसर्वस्माच्चाधिकमेवमन्येतेत्यर्थः । यद्यमुंलोकमित्येतदेववाक्यंयज्ञादिफलतयास्वर्गादिप्राप्तिविषयतयापिव्याचष्टे ॥ यद्यमुमिति ॥ सर्वथेतिवाक्यमत्रानुवर्तते । उपनिषदियद्यमुंलोकमित्यतःपरंअंतरिक्षंलोकमश्नुत इत्यतोश्नुतइत्यनुवर्ततइतिभावेनोक्तं ॥ अश्नुतेप्राप्नोतीति ॥ तथाचयोजना । यद्यमुंलोकमश्नुतेप्राप्नोति तर्ह्यश्नुवीतभुंजीतैव केवलं । नैतावताहंभावंकुर्यां त्किंतुसर्वथास्वतःसर्वस्माच्चाधिकमेवमन्येतेति । यदीमंलोकमश्नुतेऽत्येनंमन्यतइत्यनुक्तेःकारणमाह ॥ पृथिवीति ॥ प्रत्यक्षसिद्धत्वादनुभवसिद्धत्वात् । सर्वलोकमतियद्धकिंचेतिप्रथमवाक्यंमुक्तविषयतयापिव्याख्यातं । तत्रज्ञापकमाह ॥ अतिशब्दादिति ॥ सर्वलोकमतीतिसर्वलोकातिक्रमणवाचकातिशब्दाद्यद्धकिंचेत्यलौकिकत्ववाचकशब्दाच्चप्रथमवाक्योक्तोमोक्षइतिसिद्धमित्यर्थः । ननुद्वितीयवाक्येंतरिक्षगतोत्येनंमन्यतइतिप्रथमवाक्येपिसर्वलोकाधिपतिर्हिरण्य

भा० । बहुगणिकादिपरिवाररूपमशुचीदंपदमित्यादिबुद्ध्यानापह्नुवीत । एनंभगवंतमतिमन्येतैवसर्वथास्वतःसर्वस्माच्चाधिकमेवमन्येत । यद्यमुंलोकमश्नुते प्राप्नोति अश्नुवीत भुंजीत । पृथिवीलोकाधिपत्येपिविष्णोराधिक्यंसत्पुरुषोमन्यतइतिप्रत्यक्षसिद्धत्वान्नपृथगुक्तं । अतिशब्दाद्यद्धकिंचेतिप्रथमोक्तोमोक्षइतिसिद्धं ।

गर्भादिर्मुक्तोप्यत्येनंमन्यतइतिसिद्धवन्निर्देशःकृतः । यद्यमुंलोकमितितृतीयवाक्येतु अत्येवैनंमन्येत जानीयादितिसावधारण विधिरित्येवंप्रयोगद्वैविध्येकिंकारणमित्यतआह ॥ अंतरिक्षेति ॥ अंतरिक्षप्राप्तेरल्पत्वात्तद्वतानांविष्णुसमोहमित्यादिभावाप्रसक्तेः मोक्षेसर्वाज्ञानमिथ्याज्ञानविधूननावस्थायामपितादृशभावस्याप्रसक्तेश्चशब्दात्सत्यलोकाधिपतेर्हिरण्यगर्भस्यापिसर्वदोष विदूरस्यतादृशभावाप्रसक्तेः विष्णुःसर्वोत्तमइत्येवंज्ञानस्यस्वतःसिद्धत्वान्मन्यतइतिसिद्धवचनमेवकृतं । स्वर्गादिप्राप्तेस्तदाधि पत्यस्ययागादिफलतयातत्प्राप्तेश्चाधिकैश्वर्यरूपत्वाद्भगवत्समोवाभगवत्स्वरूपइतिवामंतुंप्राप्तिरस्तीत्यत्येवैनंमन्येतेतिसावधारण विधिरित्यर्थः । स्वर्गाधिपतयोहिरण्यकनहुषप्रभृतयस्तादृग्भावंकुर्वतीति । तत्प्रसंजकैश्वर्यवानतएवकदाचित्पारिजातहरणादा वसुरावेशेनेषत्प्रसक्तिमान्योपींद्रादिरेवंनमन्येतेतिविधिरितिभावः । अत्येनंमन्यतइत्यस्यप्राप्तंप्राप्तंलोकंअतिक्रम्यपुनरधिकमि च्छतीतियदपव्याख्यानंतदपाकरोति ॥ नचेति ॥ अन्यथा अवबोधएवकामश्चेत् । बाधकांतरमाह ॥ नचमन्यतइति ॥ द्विविधःप्रयोगः । सिद्धरूपोविधिरूपश्चनयुज्यते । किंतुमन्यतइत्येवस्यान्नतुमन्येतेति । इच्छायाअविधेयत्वादितिभावः ।

भा० । अंतरिक्षप्राप्तेरल्पत्वान्मोक्षेस्वतःसिद्धत्वाच्चातिमन्यतइतिसिद्धवचनमेवकृतं । स्वर्गादिप्राप्तेरधिकैश्वर्याद्भगवत्समोहंभगवत्स्वरूपइतिवामंतुंप्राप्तिरस्तीत्यत्येवैनंमन्येतेतिसावधारणविधिः । नचमन्यतइतिकाममात्रं । मनुअवबोधनइतिधातोः । नह्यवबोधएवकामः । अन्यथाराज्यंजानन्नपिराज्यकामइतिस्यात् । नचमन्यतेमन्येतेतिद्विविधःप्रयोगस्तस्मिन्पक्षेयुज्यते ।

मन्यतइत्यस्येच्छार्थत्वांगीकारेबाधकांतरमाह ॥ नचेति ॥ अश्नतो भोगाननुभवतः । तस्मा दपव्याख्यानस्यायुक्तत्वात् । चिं त्यइत्युपनिषदर्थइतिसिद्धमित्यर्थः । सएषपुरुषः पुरुषदेहः पंचविधइतिप्रतीतिनिरासायप्रमाणेनव्याचष्टे ॥पुरुषस्थेत्यादिना ॥ ज्योतिरादौ ज्योतिरादिषु सएषवायुःपंचविधइत्येतद्व्याचष्टे ॥ सएवेति ॥ प्राणादिरूपेवायावित्यन्वयः । ताएतादेवताइत्या द्यसंगतमित्याशंक्यवायोरन्यभूतेभ्यउत्तमत्वोपपादकत्वान्नासांगत्यं उत्तमत्वप्रतिपादनंचपृथिव्यादिभ्योविशेषेणवायौपंचरू पस्यस्थित्युपपादकमितिभावेनसंगतिंकरोति ॥ पंचरूपइत्यादिना ॥ यद्यपिज्योतिरादिभ्यइतिवक्तव्यं । यदुष्णंतज्योतिरि तिपूर्वत्र चक्षुःश्रोत्रमित्युत्तरत्रचश्रवणात्तथाप्याकाशाद्वायुरित्याकाशस्यकारणत्वश्रवणादुत्तमत्वंनभ्रमितव्यमितिभावेनखादि भ्यइत्युक्तं । ननुवायोर्भूतोत्तमत्वेयुक्त्योपपादनीयेचक्षुःश्रोत्रमितींद्रियाणांवाय्वाश्रितत्वकथनमसंगतमित्यतोव्याचष्टे ॥ अ तएव वायोउरुत्तमत्वादेवेति । यद्यपिज्योतिरादिस्वरूपाश्चक्षुराद्याइतिवक्तव्यं तथापिपृथिवीमयस्यमनसःसाक्षात्प्राणा वरशेषाद्यभिमतत्वात्पृथिव्यादिस्वरूपाइत्युक्तं । प्राणस्यह्यन्वपायमित्येतद्व्याचष्टे ॥ गच्छंतीति ॥ मनआदिस्वरूपंतदभिमा

भा० । नचसर्वलोकमतीत्याश्नतोमुक्तस्यमुक्तैरन्यत्रकामोविद्यते । सर्वलोकाधिकंचमुक्तिंविनानान्यत् । तस्मान्मुक्तैरमुक्तैरपिभगवान्सर्वो त्तमत्वेनचिंत्यइतिसिद्धं । पुरुषस्थपंचभूतेषुपंचरूपोहरिःस्थितः । प्रद्युम्नादिस्वरूपेणज्योतिरादौपृथक्पृथक् । सएवचपुनर्वायौपंचधावस्थितःप्रभुः । प्राणादिरूपेवसतिह्यनिरुद्धादिरूपवान् । अनिरुद्धश्चप्रद्युम्नस्तथासंकर्षणःप्रभुः । वासुदेवोनारायणःपंचरूपइतिक्रमात् । पंचरूपोपिभगवान्यस्मा द्वायौविशेषतः । स्थितस्तेनचखादिभ्योवायुरेवविशिष्यते । अतएवपृथिव्यादिस्वरूपामनआदयः । देवाःप्राणाश्रितानित्यंगच्छंतिप्राणमन्वपि ।

निनश्चाह ॥ [illegible] ॥ अन्नमयीहसोम्यमनइतिश्रुतःपृथिवीविकारान्नमयमित्यर्थः ॥ कुबेरश्चेति ॥ येदिशांदेवाःप्रसिद्धास्तेश्रोत्रदेवाइतियोज्यं ॥ वागबात्मिकेत्यन्वयः । ननुतेजोमयीवागितिश्रुतेःकथमबात्मकत्वमित्यतउक्तं ॥ किंचित्तेजोयुतावाक्चविशेषेणत्वबात्मिकेति ॥ अबात्मकत्वेज्ञापकमाह ॥ उपचीयतइति ॥ ततश्च अबात्मकत्वादेव । शुष्यति ह्रसति । ह्रासोपचययोर्ज्ञापकमाह ॥ तृषितस्येति ॥ वाक् वाग्व्यवहारः । पश्चादुदकपानेउच्चाप्रवर्ततइतिभावः । ततः अभिमन्यमानस्योभयप्रकृतिकत्वादेव । वाक् अग्निः । उमावैवाक्समुद्दिष्टेत्यादौवह्निरुमाचवाग्देवतेप्रकीर्तितेइत्यर्थः । चक्षुरादीनांसूर्याद्यभिमतत्वमुक्तं । श्रुत्यंतरेन्यथोक्तेर्गतिमाह ॥ चक्षुष्ट्वमिति ॥ चक्षुरभिमानित्वं सहोच्यते वागभिमानित्वेनेतिशेषः । वागभिमानित्वमविहायेतियावत् । चंद्रस्यमनोभिमानित्वेनसहश्रोत्रत्वं । स्वाहायामंत्राभिमानित्वेनवाक्त्वं । स्वाहातोमंत्रदेवतेत्युक्तेः । पर्जन्यस्येंद्रियगोलकाभिमानित्वेनसह लोकाभिमानीपर्जन्यइत्युक्तत्वात् । आस्थानं अधिष्ठानं । सएष

भा० । पृथिवीमयंमनस्तत्रशेषवींद्रशिवेंद्रकाः । कामानिरुद्धौदेवगुरुमनोदेवाःसचंद्रकाः । श्रोत्रमाकाशरूपंचामित्रधर्मजलाधिपाः । कुबेरश्चदिशांदेवाःश्रोत्रदेवाइतिश्रुताः । ज्योतीरूपंतथाचक्षुश्चक्षुर्देवोरविःस्मृतः । किंचित्तेजोयुतावाक्चविशेषेणत्ववात्मिका । उपचीयतेततःसाद्भिस्तदभावेचशुष्यति । तृषितस्यहि[illegible]वपूर्वंमंदाप्रवर्तते । वाग्देवतेततोवह्निरुमाचापिप्रकीर्तिते । चक्षुष्ट्वमग्नेःश्रोत्रत्वंचंद्रस्यापिसहोच्यते । स्वाहायाअपिवाक्त्वंचपर्जन्यस्यमनःस्थि[illegible] । द्वितीयमेतदास्थानंश्रुतिवाक्यप्रमाणतः ।

वाचाश्चतस्यत्यस्यसंगत्यप्रतीतेःध्वंसतिंकुर्वन्व्याचष्टे ॥ शेषेत्यादिना ॥ एतेनयद्यस्मादेतादेवताःप्राणापानयोर्निविष्टावाय्वाश्रयाः प्राणाद्यभिधोवायुश्चत[illegible]मकेहरौनिविष्टस्तस्माद्यद्यज्ञो योयज्ञः सएषवाचश्चित्तस्य वायुवशानांवागाद्यभिमानिदेवतानां उत्तरोत्तरिक्रमः क्रमवृत्तिभ्योजातः तस्मिन्यज्ञेऽनिरुद्धादिरूपेणावस्थितइति उपनिषदर्थउक्तोभवति । सएषयज्ञानां संपन्नतमोयःसोमइत्यादिव्याचष्टे ॥ पंचधेति ॥ पूर्वके प्राच्यांगे । परे उदीच्यांगे । एवंतारतम्यांतगत्वेनसर्वोत्तमत्वमभिधायमुमुक्षुणाऽयमुत्कर्षोज्ञेयः मुक्तैरपितथाज्ञानादितिभावेनाह ॥ तमेतमिति ॥ तमेतंपरममुक्तविधोत्कर्षवंतं । एतेनसएषपुरुषःसमुद्रइत्युत्कर्षंप्रतिज्ञाय कैमुत्यन्यायेनतज्ज्ञानं सर्वंलोकमतीत्यादिनाविधायोत्कर्षोपपादनं सएषपुरुषःपंचविधइत्यादिना खंडसमाप्तेःक्रियतइतिखंडाभिप्रायउक्तोभवति । बहुषुस्थलेषुपंचविधत्वोक्तेःप्रयोजनमाह ॥ पंचरूपेति ॥ सर्वत्रपंचरूपभगवद्ध्यानार्थमेवैतत्पंचविधत्वंसर्वत्राधिष्ठानेसर्वत्रबहुषुखंडेषूक्तमितियोज्यं ॥ ३ ॥ ७ ॥ पूर्वखंडेपुरुषांतर्गतस्यगुणतोरूपतश्चोद्रेकमुपपादयितुंतत्तन्नामतयाध्यात्मंभूतेषुवायुप्रभेदेषुप्राणेषुप्राणाधीनवाक्चित्तादिक्रमवृत्तिजातेषु अग्निहोत्रादियज्ञेषु सोमप्रभेदे

भा० । शेषवींद्रशिवादीनांमनआदिस्वरूपिणां । आश्रयोवायुरेवैकस्तस्यनारायणःस्वयं । तस्माद्वायुवशानांहिवाक्चित्तादिस्वरूपिणां । देवानांक्रमवृत्तिभ्योजातेयज्ञेपिकेशवः । अग्निहोत्रादिकेनित्यमनिरुद्धादिरूपकः । पंचधावस्थितःसोमेपंचरूपोव्यवस्थितः । सवनत्रयात्पूर्वकेच सवनत्रितयेपरे । अनिरुद्धादिरूपेणक्रमेणैवव्यवस्थितः । तमेतंपरमंविष्णुंमुक्तोप्यत्येवमन्यते । अधिकंह्येवतस्मात्तंमन्येतान्योपिसर्वदेत्यादिच । पंचरूपभगवद्ध्यानार्थमेवचैतत्पंचविधत्वंसर्वत्रोक्तं ॥ ३ ॥

षुच तत्तन्नामतयापंचविधत्वमुक्तं । अत्रतुपूर्वप्रकृतबृहतीसहस्रप्रतिपाद्यस्यप्रकृतयज्ञानुबंधमुक्त्वातस्यबहुधापांचविध्यमनंतरूपत्वंपूर्णगुणत्वंचोच्यते । तत्रश्रोतृणांबुभुत्साजननायवक्ष्यमाणविद्या फलेनप्रशस्यतेतावत् ॥ योहवाइति ॥ यो यज्ञेध्यूढं याज्यत्वाद्यज्ञत्वप्रदत्वाच्चयज्ञं यज्ञनामानं । अहन्यध्यूढमहार्यत्वादहस्त्वप्रदत्वाच्चाहर्नामानं देवेष्वध्यूढं द्योतनादिगुणवत्त्वाद्देवत्वप्रदत्वाच्चदेवनामानं । उपलक्षणमेतत् । वक्ष्यमाणस्तोमसामचितिछंदःशस्त्रेष्वध्यूढं तत्तन्नामकंचवेद स संप्रतिवित्सम्यग्ज्ञानीतिहवै श्रुत्यंतरप्रसिद्धमित्यर्थः । यज्ञादिषुयज्ञादिनामाकइत्यतउच्यते ॥ एषवाइति ॥ यदेतत्तत्तच्छब्दप्रवृत्तिनिमित्तगुणैःपूर्णत्वान्महत् उत्थापकत्वादुक्थं । यद्वामहदुक्थंबृहतीसहस्रप्रतिपाद्यंभगवद्रूपं । एषभगवान्वै यज्ञेष्वधिरूढोयज्ञनामेत्यादियोजना । यदेतन्महदुक्थं बृहतीसहस्रप्रतिपाद्यं यज्ञादावधिरूढं भगवद्रूपं तदेतदनिरुद्धादिरूपेणपंचविधंसत्स्तोमसामचितिछंदःशस्त्रेषुपंचसुक्रमाद्वर्ततइत्यर्थः । स्तोमेनिरुद्धः साम्निप्रद्युम्नः श्येनाकारचित्तौसंकर्षणः छंदःसुवासुदेवः शस्त्रे नारायणइतिभावः । किंचतदेतत्स्तोमादिगतंचानिरुद्धादिकंप्रत्येकंपंचविधं । कथंस्तोमगतस्यानिरुद्धस्यपांचविध्यमित्यतस्तोमस्यपंचविधत्वाच्चद्गतोऽनिरुद्धाऽनिरुद्धो निरुद्धप्रद्युम्नो निरुद्धसंकर्षणो निरुद्धवासुदेवो निरुद्धनारायण इतिपंचविधइत्युच्यते ॥ त्रिवृदित्यादिना ॥ त्रिवृदादिपंचभेदभिन्नऋक्समुदायरूपस्तोमतस्तोमेस्थितोनिरुद्धःस्तोमस्यपंचविधत्वात्पंचविधइत्य

उप० । योहवैयज्ञेयज्ञंवेदाहन्यहर्देवेषुदेवमध्यूहुंससंप्रतिविदेषवैयज्ञेयज्ञोहन्यहर्देवेषुदेवोध्यूहूोयदेतन्महदुक्थंतदेतत्पंचविधंत्रिवृत्पंचदशंसप्तदशमेकविंशंपंचविंशमितिस्तोमतोगायत्रंरथंतरंबृहद्भद्रंराजनमिति

॥ ८६ ॥

र्थः । सामतःसान्निस्थितःप्रद्युम्नःसान्नःपंचविधत्वात्प्रद्युम्नानिरुद्धःप्रद्युम्नप्रद्युम्नइत्यादिरूपेणपंचविधः । छंदस्तःछंदोगतोवासुदेवः छंदसांपंचविधत्वाद्वासुदेवप्रद्युम्नो वासुदेवसंकर्षणो वासुदेववासुदेव इत्यादिक्रमेणपंचविधः । श्येनाकारचित्यंतर्गतस्यसंकर्षणस्य संकर्षणानिरुद्धः संकर्षणप्रद्युम्नः संकर्षणसंकर्षणः संकर्षणवासुदेवः संकर्षणनारायणइति क्रमेणशिरआरभ्यमध्यदेहांतमवस्थानात् शिरइत्याद्याख्यानं नाम। यद्वा चितिगतस्येत्याख्यानं स्थाननिर्देशः । शस्त्रस्यपांचविध्यान्नारायणस्यानिरुद्धादिभेदेनपांचविध्यंवक्ष्यति । अत्रतावत्स्तोमसामेतिसामप्रसंगेप्रस्तावोद्गीथप्रतिहारोपद्रवनिधननामकसामभक्तिगतस्याप्यनिरुद्धादिरूपेणपंचविधत्वं प्रस्तावादिष्वेकैकत्रापिपृथक्पंचविधत्वमभिप्रेत्यतत्रयुक्तिरुच्यते ॥ पंचकृत्वइत्यादिना ॥ यद्यपिसामभक्तीनांप्रस्तावादीनांगायत्र्यादिसामसन्निधावेवाभिधानंयुक्तं । नतुशस्त्रसन्निधाने । तथापितानिदशेत्यत्रसामभक्तिप्रतिपाद्यानिपंचरूपाणिशस्त्रप्रतिपाद्यानिपंचरूपाणीतिसंभूयतानिरूपाणिदशेत्युक्तिसौकर्यायशस्त्रसन्निधानेऽभिधानंज्ञेयं । पंचरूपप्रकरणत्वेपिसामप्रसंगान्महदुक्थाक्षरगतरूपाणांसामस्तोभाक्षरप्रतिपाद्यत्वमुच्यते ॥ तदिति ॥ तत्त्र । सामसुस्तोभाक्षराणांसहस्रं बहुकोटयोभवंति । तथातन्महदुक्थप्रतिपाद्यंभगवत्प्रादुर्भावजातंस्तोभसहस्रनामकंभवति । स्तोभानांसहस्रंप्रतिपादकंयस्यतत्स्तोभसहस्रंतत्प्रतिपाद्यंचभवतीत्यर्थः । शस्त्रेपंचविधरूपव्युत्पादनार्थमुच्यते ॥ एवंह्येताइति ॥ बृहत्युक्थशस्त्रगताःपंचप्र

उप० । सामतोगायत्र्युष्णिग्बृहतीत्रिष्टुब्जगतीतिछंदस्तःशिरोदक्षिणःपक्षउत्तरःपक्षःपुच्छमात्मेत्याख्यानंपंचकृत्वःप्रस्तौतिपंचकृत्वउद्गायतिपंचकृत्वःप्रतिहरतिपंचकृत्वउपद्रवतिपंचकृत्वोनिधनमुपयंतितत्स्तोभसहस्रंभवत्येवंह्येताःपंचविधा

कारएवमनुशस्यंते । कथं । तृचाशीतिभ्योयत्प्राक् यःप्राक्तनोभागः सैकाविधा । तिस्रःतृचाशीतयस्तिस्रोविधाः । यदूर्ध्वं यस्ताभ्यउपरितनोभागः सापंचमीविधा । हियस्मात्तद्गताएताअनिरुद्धादिमूर्तयःशस्त्रभेदैरनुशस्यंतेस्तूयंतइत्यर्थः । यद्यपि प्रथमेपंचकाङ्गागेस्थितोनारायणःप्रभुरित्यादिनाप्राङ्नारायणादिक्रमेणशस्त्रेऽवस्थानमुक्तं । तथापिस्तोमसामादिपंचकविवक्षायामनिरुद्धादिक्रमेणशस्त्रगतोनारायणःस्वयंनारायणानिरुद्धोनारायणप्रद्युम्नइत्यादिक्रमेणपंचकस्यप्रथमभागादौवर्ततइत्यविरोधः । तदेतत्सहस्रमित्यादेरावत्त्यनुवृत्तिभ्यांबह्वर्थत्वेनदुरवबोधत्वात्प्रतिपत्तिसौकर्यायावतारपूर्वंभाष्यव्याख्यानदशायामेवतद्व्याख्यास्यामः । योहवेत्यादौबृहतीसहस्रस्यैवयज्ञादिष्वधिरूढत्वंतत्तन्नामकत्वमुच्यतइत्यन्यथाप्रतीतिनिरासायप्रमाणेनव्याचष्टे ॥ यज्ञेष्वित्यादिना ॥ यज्ञेष्वधिरूढं । याज्यत्वाद्यज्ञनामानं । पुरुषोत्तममित्यनेनपुरुषस्ययज्ञेनयज्ञमयजंतेतिपुरुषसूक्तेत्प्रसिद्धमितिहवेतिद्योतयतीत्युक्तंभवति । तुरप्यर्थे । तथा अहःस्वप्यधिरूढमहार्यत्वाद्धर्तुमशक्यत्वादेववाऽहर्नामानं । देवेष्वधिरूढंसर्वोत्तमत्वतः सर्वोत्तमत्वद्योतनादिगुणवत्त्वतोदेवंदेवनामानमित्यर्थः । हिशब्देनयजेर्हरतेर्दीव्यतेश्चोक्तार्थत्वेधातु

उप० । अनुशस्यंतेयत्प्राक्तृचाशीतिभ्यःसैकाविधातिस्रस्तृचाशीतयोयदूर्ध्वंसापंचमीतदेतत्सहस्रंतत्सर्वंतानिदशदशेतिवैसर्वमेतावतीहिसंख्यादशदशतस्तच्छतंदशशतानितत्सहस्रंतत्सर्वंतानित्रीणिछंदांसिभवंतित्रेधाविहितंवाइदमन्नमशनंपानंखादस्तदेतैराप्नोति ॥ ४ ॥

भा० । यज्ञेषुयज्ञनामानंयाज्यत्वात्पुरुषोत्तमं । अधिरूढंतथाहस्सुचाहर्नामानमेवतु । अहार्यत्वाद्धिदेवेषुदेवंसर्वोत्तमत्वतः ।

व्याख्यानप्रसिद्धिंसूचयति । एतदुपलक्षणं । वक्ष्यमाणस्तोमादिषुचयोवेदेत्याह ॥ एवंचेति ॥ एवमेवस्तोमादिषुसर्वेषुस्थितं स्तोमादिसर्वनामानमित्यन्वयः । हवाइत्यस्यार्थइतिश्रुतइति ॥ एषवैयज्ञेयज्ञइत्यादिव्याचष्टे ॥ यएषइति ॥ योसौहरिःसर्वोत्थापकत्वादुक्थनामापरिपूर्णत्वान्महांश्चसहस्रबृहतीस्थितत्वाच्चमहदुक्थनामा सएषःअहनिअह्नां । अहः अहस्त्वप्रदः सदेवेषु देवोदेवानां देवत्वप्रदः । देवाधिकोपीतियावदितियोजना । एतेनयज्ञेयज्ञइत्यादेर्यज्ञादावधिरूढोयज्ञादीनांयज्ञत्वादिप्रदइत्यर्थांतरमुक्तंभवति । यज्ञानांयज्ञइतिवद्देवानांदेवइत्यनुक्त्वादेवाधिकइत्यनेनदेवेषुमध्येदेवोदेवोत्तमइत्यप्यर्थांतरमुक्तंज्ञेयं । अतएवयज्ञइत्यादिवद्देवइत्येकवचनमप्रयुज्यदेवेष्वितिबहुवचनमितिभावः । यदेतन्महदुक्थंतदेतत्पंचविधमित्येतद्व्याचष्टे ॥ अनिरुद्धादीति ॥ बृहतीसहस्रगतोविष्णुःस्तोमादिषुपंचसुक्रमेणानिरुद्धादिरूपेणपंचविधःस्थितः । पृथक्पृथगित्येकैकंरूपमेकैकत्रेत्यर्थः । श्रुतौछंदसांपूर्वमुक्तत्वेप्यनिरुद्धादिरूपस्थितिक्रममपेक्ष्यव्युत्क्रमणोपादानं । तदेतत्पंचविधमितिप्रकारांतरेण व्याचष्टे ॥ एकैकमिति ॥ तत्स्तोमादिगतमनिरुद्धादिकमेकैकंरूपंपृथक्पृथक् प्रत्येकंप्रत्येकं अनिरुद्धादिपंचात्मकमित्यर्थः । अनेनपंचविधमपिप्रत्येकंपंचविधमितियोजितंभवति । पंचकृत्वःप्रस्तौतीतिवाक्यलब्धार्थमाह ॥ प्रस्तावादिष्विति ॥ प्रस्ता

भा० । एवंचसर्वनामानंसर्वेषुस्थितमच्युतं । स्तोमादिषुचयोवेदससम्यग्विदितिश्रुतः । यएषउक्थनामासौसर्वोत्थापनकोहरिः । महांश्चपरिपूर्णत्वात्सहस्रबृहतीस्थितः । अहरह्नांसयज्ञानांयज्ञोदेवाधिकोपिसः । अनिरुद्धादिरूपेणसविष्णुःपंचधास्थितः । स्तोमसामचितिछंदःशस्त्रेष्वपिपृथक्पृथक् । एकैकमेवतद्रूपमनिरुद्धादिपंचकं । प्रस्तावादिष्वपिविभुः

वादिषुपंचसुपंचरूपीक्रमेणतिष्ठतीत्यर्थः । प्रस्तावादिषुविद्यमानःपंचरूपीविष्णुःप्रत्येकंप्रत्येकंपंचधैवव्यवस्थितइत्यप्यर्थः । इदानीमुक्तार्थेहेतुपरतयापंचकृत्वइत्यादिव्याचष्टे ॥ प्रस्तावादीनिति ॥ तस्मादेव एकैकत्रपंचरूपावस्थानादेव । एकं निर्भेदमेव । पंचरूपोपेतंपृथक्पृथक्स्तोतुमेव । अन्यथासकृदनुष्ठानंस्यादितिभावः । तत्तत्र सामसु । स्तोभानांसहस्रं बहुकोटय आश्रिताभवंति । तद्भगवद्रूपजातंबृहतीसहस्रप्रतिपाद्यंस्तोभसहस्रप्रतिपाद्यंचभवतीतिमूलार्थमभिप्रेत्यव्याचष्टे ॥ तत्रेति ॥ नकेवलंबृहतीसहस्राणि किंतुतेस्तोभाअपिपृथक्पृथग्बहून्प्रादुर्भावान्प्रचक्षतइत्यर्थः । एवंह्येताइत्यादेरतिरोहितार्थत्वादव्याख्यानं । तत्स्तोभसहस्रमित्येतत्संगततयातदेतत्सहस्रमित्यादिव्याख्यातुंचेतिबोध्यं । ननुस्तोभानांमितत्वात्कथममितभगवद्रूपपरत्वमित्यतउच्यते ॥ तदेतत्सहस्रंतत्सर्वमिति ॥ तदेतत्सहस्रं स्तोभसहस्रप्रतिपाद्यंरूपजातं तत्सर्वं अनंतं । तदेतत्सहस्रं सएषस्तोभसहस्रलक्षणःशब्दोपि सर्वं अनंतः । जातिविवक्षयाबहुकोटित्वेप्यनंतेषुसामस्वनंतधावर्ततइत्यर्थः । तद्व्याचष्टे ॥ अनंतरूपइति ॥ एषशब्दः स्तोभलक्षणः । ननुबृहतीसहस्राक्षराणांतद्वाच्यरूपाणांचपरिमितत्वात्कथंतेषाममितस्तोभाक्षरप्रतिपाद्यत्वमित्यतश्चोक्तं ॥ तदेतत्सहस्रंतत्सहस्रंतत्सर्वमिति ॥ यत्तदेतत्सहस्रंसहस्रबृहतीप्रतिपाद्यंभगवद्रूपजातंतत्सर्वमनंतं । यत्तदेतत्सहस्रंतदपिसर्वमनंतमित्यर्थः । तदेतद्व्याचष्टे ॥ अनंतरूपइति ॥ बृहतीसहस्रस्यपरिमितत्वेप्यनंतेषुरूपेषु

भा० । पंचधैवव्यवस्थितः । प्रस्तावादीन्पंचकृत्वस्तस्मादेवप्रकुर्वते । पंचरूपंतमेवैकंस्तोतुमेवपृक्पृथक् । तत्रयेस्तोभशब्दाश्चसंस्थिताबहुकोटयः । पृथक्पृथक्तेपिविष्णोःप्रादुर्भावान्प्रचक्षते । अनंतरूपोहिहरिःशब्दोप्येषह्यनंतधा ।

॥ ८८ ॥

शक्तत्वादानंत्यमितिभावेनानंवधानंतप्रकारेणतेषुरूपेषुवर्ततइत्युक्तं । ननुयदुक्तंबृहतीसहस्रस्यानंतरूप्यप्रतिपादकत्वं तदेवकुतइत्यतस्तस्यसहस्रनामव्याख्यानरूपत्वात्सहस्राणाचनाम्नामनंतरूपप्रतिपादकत्वाद्बृहतीसहस्रमप्यनंतरूपाभिधायकमित्यभिप्रेत्य सहस्रनामव्याख्यानरूपत्वंतावदुच्यते ॥ तदेतत्सहस्रमिति ॥ यद्विष्णोःसहस्रनाम्नोर्थभूतंरूपसहस्रंतदेतत्सहस्रं बृहतीसहस्रं । वक्तीतिशेषः । तद्व्याचष्टे ॥ विष्णोरिति ॥ पृथक्पृथगित्येकैकाक्रमेकैकनामार्थंवक्तीत्यर्थः । नन्वेनंसहस्रनाम्नांबृहत्यृचांचव्याख्येयव्याख्यानभावेतत्प्रतिपाद्यानांमितत्वमेव सहस्रशब्दस्यपंचशतद्वयवाचित्वादित्यतउक्तंतत्सर्वमिति । तत्सहस्रमितिपदं सर्वममितंवक्तियतो तस्तत्सहस्रनामेत्यनेनोक्तंनामजातंसर्वमनंतमेवेत्यर्थमभिप्रेत्यव्याचष्टे ॥ सहस्रशब्द इति ॥ तर्हिपंचशतद्वयनामदृष्टिविरोधइत्यतश्चोक्तं ॥ तत्सर्वमिति ॥ तत्प्रसिद्धंनामसहस्रकं सर्वमनंतरूपजातंवक्तीत्यर्थमभिप्रेत्यव्याचष्टे ॥ अनंतनामवचनइत्यादिना ॥ इदं प्रसिद्धं नाम्नांसहस्रकं अनंततनुवाचकमित्यर्थः । तथाचनाम्नांपंचशतद्वयतयाप्रदर्शनेप्यनंतरूपेषुशक्तयाशक्तिविवक्षयानंतत्वंनविरुध्यतइतिभावः । नन्वनंतानांरूपाणामनंतानिपृथक्नामानिसंत्येव तत्किमनेनपंचशतद्वयेनानंतरूपप्रतिपादनाभिप्रायेणभारतेपृथक्कृत्यतद्युत्पादनेनेत्यतउक्तं ॥ अनंतनामेति ॥ अनंतानांनाम्नांवचने पठने धिकारिणामशक्तत्वादनंततनुवाचकमिदंनाम्नांसहस्रकंपृथक्कृत्यभारतेप्रोक्तमित्यर्थः । भवेदेवंयदि

भा० । विष्णोःसहस्रनाम्नस्तुयत्तद्रूपसहस्रकं । बृहतीसहस्रमेतच्चतद्वक्तिहिपृथक्पृथक् । सहस्रशब्दोप्यमितंयतोवक्त्यमितान्यतः । नामानिविष्णोरुच्यंतेसहस्रमितिचाख्यया । अनंतनामवचनेत्वशक्तत्वात्सहस्रकं । नाम्नांपृथगिदंप्रोक्तमनंततनुवाचकं ।

नाम्नांपंचशतद्वयस्यानंततनुवाचकत्वंस्यात्तदेवकुतइत्यतोनंतेमुख्यस्यसहस्रशब्दस्यात्रप्रयोगान्यथानुपपत्तेरेवेतिभावेनोक्तं ॥ तदेतत्सहस्रंतत्सर्वमिति ॥ तत्पंचशतद्वयात्मकंनामसहस्रं यतःसर्वमनंतानिरूपाणिवक्ति । तत्तस्मादेवहेतोरेतत्पंचशतद्वयंनामसहस्र ममितेमुख्येनसहस्रमितिशब्देनोच्यते । अन्यथातन्नस्यादितिभावः । तदेतद्व्याकरोति ॥ विष्णोरिति ॥ यतः सहस्रं सहस्रशब्दो मुख्यतोमितंवक्ति । अतःपंचशतद्वयेविष्णोरनंतरूपाणामुक्त्यैवसहस्रमित्याख्याऽऽसीदित्यंगीकर्तव्यमित्यर्थः । स्वरूपानंत्येबाधितेसत्यर्थानंत्येनैवतत्रानंत्येमुख्यतःसहस्रशब्दोनिर्वाह्यइतिभावः । नकेवलमनंतेरूढस्यसहस्रशब्दस्य नामसुप्रयोगान्यथानुपपत्त्यापंचशतद्वयस्यानंतरूपप्रतिपादकत्वं । किंतुनामसुप्रयुक्तः सहस्रशब्दएवप्रतिपाद्यानंत्यंसाक्षादाहेत्युच्यते ॥ तदेतत्सहस्रमिति ॥ तन्नामजात मेत देतैः प्रतिपाद्यभगवद्रूपैः सह प्रतिपादकतया सृतं स्थितमितिव्युत्पत्त्यासहस्रमित्युच्यतइत्यर्थः । तद्व्याचष्टे ॥ ब्रह्मेति ॥ परंब्रह्म यावद्रूपैर्विष्ठितंविशेषेणस्थितं । वाक् नामजातरूपाणितावती सामान्यतो विशेषतश्चतावद्रूपप्रतिपादिकेतिवेदप्रमाणतः अनंतरूपैःसहप्रतिपाद्यप्रतिपादकभावानुसारेणैवनामजातंसहस्रमित्युच्यतइत्यर्थः । ननुयावद्ब्रह्मविष्ठितंतावतीवागितिश्रुतिरन्यत्रब्रह्मयावद्देशकालव्यापि वेदवागपितावती । तावद्देशकालव्यापिनीतिव्याख्यातं । कथमेत त्सत्यं । व्याख्यानांतरत्वात् । यद्वा वाक्पदस्यवेदपरत्वंभवतु । यावद्ब्रह्मेत्यस्यब्रह्मयावद्रूपैःस्थितंवाग्वेदवागपि तावती तावद्रूपप्रदिपादिकाकेषांचिद्रूपाणांविशेषतोन्येषांवेदानुक्तमाहात्म्यस्यवेदेनैवगम्यत्वादित्युक्तरीत्यासामान्यतोवेदोक्तत्वात् ।

भा० । विष्णोरनंतरूपाणामुक्त्यापंचशतद्वये । आसीत्सहस्रमित्याख्यासहस्रंमुख्यतोमितं । ब्रह्मयावत्तावतीवागितिवेदप्रमाणतः ।

तथाच शास्त्रेषुभारतंसारंतत्रनामसहस्रकमित्युक्तरीत्याविश्वादिनाम्नांवेदोक्तानंतरूपप्रतिपादकत्वमनयाश्रुत्यालभ्यतइतिज्ञेयं । नन्वेवंचेद्विष्णुसहस्रनामप्रतिपाद्यंरूपसहस्रकमितिप्रसिद्धिविरोधइतिचेत्तत्रापिसहस्रशब्दस्यानंतेमुख्यत्वादितिपरिहारेसिद्धेपि सहस्रनामप्रतिपाद्येष्वनंतेषुरूपेषुसहस्रशब्दोनिरुच्यते ॥ तदेतत्सहस्रमिति ॥ तद्भगवद्रूपजातंसर्वमनंतमपि यस्मादेतदेतैर्नामभिर्वाच्यतयासहसृतं तत्तस्मात्सहस्रमुच्यतइत्यर्थमभिप्रेत्यव्याचष्टे ॥ नाम्नेति ॥ वाशब्दश्चशब्दार्थे । नतुपरिमितत्वादित्येवार्थः । अस्त्वेवंवैष्णवनामसहस्रस्यानंतरूपप्रतिपादकत्वं । ततश्चकिमित्यतउपसंहियते ॥ तदेतत्सहस्रमिति ॥ तद्बृहतीसहस्रमेतदेतस्मात्कारणादनंतरूपप्रतिपादकनामसहस्रव्याख्यानरूपत्वात्सर्वमनंतंभगवद्रूपंवक्तीत्यर्थमभिप्रेत्यव्याचष्टे ॥ बृहतीसहस्रंचैतस्मादिति ॥ अस्त्वेवंबृहतीसहस्रंसहस्रनामार्थरूपानंत्याभिधायकं । ततश्चकिमित्यतउच्यते ॥ तदेतदिति ॥ यस्मात्पृथक्पृथङ्नामार्थाएताऋचस्तत्तस्मादेतदिदंबृहतीसहस्रं तत्सर्वं तस्यहरेःसर्वं विश्वादिसर्वनामात्मकमित्युच्यते । व्याख्यानव्याख्येययोरभेदोपचारादितिभावेनैतदर्थमाह ॥ पृथगिति ॥ हि यस्मात् । अस्त्वेवंसर्वनामात्मकत्वंततःकिमित्यत उच्यते ॥ तत्सर्वमिति ॥ तस्मात्तेनबृहतीसहस्रशंसकेनामुनाधिकारिणा । तेनबृहतीसहस्राख्यशस्त्रेणकरणेन तत्सर्वं तस्य सर्वरूपजातमपिसंस्तुतंभवतीतिशेषः । तस्मादेवंज्ञात्वाबृहतीसहस्रंशंसनीयमित्युपनिषदर्थमभिप्रेत्यव्याचष्टे ॥सर्वरूपाणीति॥

भा० । सहैवानंतरूपैस्तुसरणेनसहस्रकं । नाम्नासहसृतेरेवरूपाणांवासहस्रता । बृहतीसहस्रंचैतस्माद्रूपानंताभिधायकं । पृथक्पृथग्धि नामार्थाऋचएताःप्रकीर्तिताः । सर्वनामात्मकंतस्माद्यक्सहस्रमिदंहरेः । सर्वरूपाण्यतोविष्णोःसंस्तुतान्यमुनैवहि ।

नकेवलंबृहतीसहस्राख्यशस्त्रस्ययत्प्राक्तृचाशीतिभ्यइत्युक्तरीत्याऽनिरुद्धादिपंचरूपप्रतिपादकत्व मपितु मत्स्यादिवामनांतपं चरूपाभिधायकत्वंच । बृहतीसहस्रक्रुगारूढतयागानकालेप्रस्तावादिसामभक्तीनांतदंतर्भावात् । भार्गवादिकल्क्यंतानांतत्प्रति पाद्यत्वंचेतिवक्तुंरूपसंख्यातावदुच्यते ॥ **तानिदशेति** ॥ तद्व्याचष्टे ॥ **मत्स्यइति** ॥ अस्त्वेवंरूपाणांदशकं । ततश्चकिमित्य तउच्यते ॥ **तानिदशेति** ॥ तानिपूर्वोक्तानिशस्त्रभागभूतानि तदारूढसामभक्तिभागभूतानिचमिलित्वादशेत्यर्थः । ततश्च किमित्यतउच्यते ॥ **तानिदशेति** ॥ तानिदशरूपाणि यानिदश शस्त्रतदारूढसामभक्त्याख्यानितानितत्प्रतिपाद्यानीत्यर्थः ॥ तदेतद्विवेकेनाह ॥ **पंचभेदेति** ॥ पूर्वपंचकं मत्स्यादिवामनांतं । अपरंपंचकं भार्गवादि । सामभक्तिपंचकस्यपंचप्रभेदशस्त्र स्यचनदशरूपाभिधायित्वेनाल्पार्थत्वं । दशरूपाणांसर्वरूपात्मकत्वादितिभावेनोच्यते ॥ **तानिदशतत्सर्वमिति** ॥ त त्तस्य तानि मत्स्यादिदशरूपाणि सर्वं सर्वरूपात्मकानि । मत्स्यमत्स्यः मत्स्यकूर्मः मत्स्यवराहः मत्स्यसिंहः मत्स्यवामन इत्यादिस्व व्यूहांतर्गतसर्वरूपात्मकानि । मत्स्यव्यासःमत्स्यहंसःमत्स्यवासुदेवइत्याद्यनंतरूपात्मकानिच । कूर्मादावप्येवंबोध्यमित्यर्थः । तद्व्याचष्टे ॥ **तानिरूपाणीति** ॥ ननुमत्स्यादिरूपाणामनंतरूपात्मकत्वेन मत्स्यादिनामदशकस्यतत्परत्वं । मत्स्यकूर्मोमत्स्य वराहइत्याद्यनंतनाम्नामेवतत्परत्वस्यवक्तव्यत्वादित्यतउच्यते ॥ **तानिदशतत्सर्वमिति** ॥ तत्तस्य तानि दशनामान्येव सर्वं

भा० । मत्स्यकूर्मक्रोडसिंहबटुभार्गवराघवाः । कृष्णबुद्धौचकल्कीतिरूपाणांदशकंहरेः । पंचभेदविभिन्नेनब्रूक्सहस्रेणशस्यते । रूपा णांपंचकंपूर्वमपरंपंचकंहरेः । प्रस्तावाद्यैरानिधनैःस्तूयतेसामभक्तिभिः । तानिरूपाण्यस्यदशसर्वरूपात्मकानिच ।

सर्वरूपाभिधायीनि इत्यर्थः ॥ तद्व्याचष्टे ॥ **दशनामानीति** ॥ दशैवनामानीत्यन्वयः । तत्तल्लक्षणानादशभिरेवनामभिर्व क्तुंशक्यत्वादितिभावः । ततश्चकिमित्यतउच्यते ॥ **तानिदशतत्सर्वमिति** ॥ तत्तस्मान्मत्स्यादिनामार्थानांरूपाणामनंतत्वा त्तद्व्याख्यानभूतानिसामभक्तीनांपंचकं शस्त्रपंचकंचेत्येतानि दश । तस्यविष्णोःसर्वं रूपजातं वक्तीतिशेषइत्यभिप्रेत्यव्याचष्टे ॥ **पंचकमिति** ॥ ननुयदुक्तंदशनाम्नामनंतरूपाभिधायकत्वंतदेवकुतइत्यतोऽनंतेमुख्यदशशब्दस्यनामसुप्रयोगान्यथानुपप त्तेरेवेतिवक्तुंदशशब्दस्यानंतार्थकत्वंतावदुच्यते ॥ **दशेतिवैसर्वमिति** ॥ दशेतिशब्देनसर्वमनंतमुच्यतइतिवै श्रुतिप्रसिद्धमि त्यर्थः । तद्व्याचष्टे ॥ **दशेतिसर्वनामेति** ॥ सर्वनाम सर्ववाचि । नकेवलमनंतेरूढदशशब्दस्यवक्ष्यमाणदिशानामसुप्रयोगा न्यथानुपपत्त्यापंचकद्वितयस्यानंतरूपप्रतिपादकत्वं किंतुदशशब्दस्ययोगार्थविचारेपितज्ज्ञायतइत्युच्यते ॥ **तानिदशदशे तिवैसर्वमिति** ॥ दशेतिददतिव्यक्तीकुर्वंतिशंरूपंसर्वंभगवद्रूपजातमितिहेतोस्तानिमत्स्यादिनामानिदशेतिवैप्रसिद्धानीत्यर्थः । तद्व्याचष्टे ॥ **शंरूपमिति** ॥ यद्यस्माच्छंरूपंसमस्तशोनंतसंख्याकंभगवंतंव्यक्त्यादद्यात् व्यक्तिरूपेणदद्यात् । प्रकृत्याचारु रितिवत् । तत्तस्मादमितनाम्नाममितार्थप्रतिपादकानांमत्स्यादिनाम्नांदशेत्याख्येत्यर्थः । नन्वेवंमत्स्यादिनाम्नामनंतरूपप्रतिपा दकत्वेमत्स्यादिनामप्रतिपाद्यानिदशरूपाणीतिप्रसिद्धिविरोधइतिचेत् । तत्रापिदशशब्दस्यानंतेरूढत्वादितिपरिहारेस्थितेपिदश

भा० । दशनामानिचास्यैवसर्वरूपाभिधान्यपि । पंचकंसामभक्तीनामृक्सहस्रंचतद्वयं । स्तावकंसर्वरूपाणामतएवरमापतेः । दशेतिस र्वनामैतत्प्रथितंमुख्यतःश्रुतौ । शंरूपंभगवंतंयद्दद्याद्व्यक्त्यासमस्तशः ।

शब्दस्यानंतेषुरूपेषुयोगश्चोच्यते ॥ तानिदशदशेतिवैसर्वमिति ॥ सर्वमनंतानितानिरूपाणिदशेतिददतिशंस्वोपासकानामिति हेतोर्दशेत्युक्तानीत्यर्थः । तद्व्याचष्टे ॥ तदाख्यारूपेषुशंददेरिति ॥ तदाख्या दशेत्याख्या । यत्प्राक्मत्स्यादिदशनान्नामनंतरूपप्रतिपादकत्वमन्यथानुपपत्त्यासाधयितुंतदुपपादकंदशपदस्यानंतरूढत्वमुक्तं तदिदानीमर्थापत्तिप्रमाणमुच्यते ॥ तानिदशदशेतिवैसर्वमिति ॥ यस्मात्तानिमत्स्यादिदशनामानिसर्वसर्वरूपाभिधायीन्यतएवानंतेरूढेनदशेतिशब्देनोच्यंते । अन्यथापंचकद्वितयेऽनंतेरूढदशशब्दप्रयोगासंभवात् । तथाचतदन्यथानुपपत्त्याऽर्थानंत्येनानंतार्थकदशशब्दवाच्यत्वंवक्तव्यमितिभावः ॥ तदेतद्व्याचष्टे ॥ सर्वनामार्थेति ॥ पंचकद्वितयस्यापिसर्वनामार्थभगवत्प्रतिपादकत्वादेवामितेरूढंदशेतिनामाभूदन्यथातन्नस्यादित्यर्थः । एवमर्थापत्त्या योगेनच दशनान्नामनंतरूपाभिधायकत्वमुक्त्वोपसंहृतं ॥ दशेतिवैसर्वमिति ॥ इत्युक्तप्रकारेणदशनामानिसर्वमखिलंवक्तीत्यर्थः । तद्व्याचष्टे ॥ तस्मादिति ॥ यद्वा अस्त्वेवंदशनान्नांसर्वरूपाभिधायकत्वं । ततश्चपंचभेदविभिन्नशस्त्रस्यतदारूढसामभक्तिपंचकस्यचकिमायातमित्यतःउपसंहियते ॥ दशेतिवैसर्वमिति ॥ यस्मादेवमनंतरूपप्रतिपादकानांमत्स्यादिनान्नांशस्त्रसामभक्तीनांचव्याख्यानव्याख्येयभावः इति तस्मात् दश शस्त्रपंचकंभक्तिपंचकंचेत्येतद्दश सर्वमखिलरूपस्तावकमित्यर्थः ॥ तद्व्याचष्टे ॥ तस्मादेतद्दशाखिलमिति ॥ एवंवैदिकप्रयोगावगतरूढ्या शंददातीतियोगेनच दशशब्दस्यसर्ववाचित्वमुक्तं । इदानींलोकरूढ्यादशशब्दस्यपंचकद्वितयपरत्वमंगीकृत्यापिसर्वोपस्थापकत्वमुच्यते ॥ एतावतीहिसंख्येति ॥ शतादिलक्षणासर्वापिसंख्यैतावती दशसंख्या

ताम्रपर्णी २।३।४ ॥ ९१ ॥

भा० । दशेत्यमितनान्नांतदाख्यारूपेषुशंददेः । सर्वनामार्थवचनात्पंचकद्वितयस्यच । अभूद्दशेतिवैनामतस्मादेतद्दशाखिलं । दशैवमूल

मूलिका तत्प्रभेदरूपाहियस्मात्तस्मादशेतिवैसर्वं सर्वाःसंख्यामूलभूतसंख्यावाचिदशशब्देनोच्यंतइत्यर्थः । कथंसासर्वमूलमित्यतउक्तं ॥ दशदशतइति ॥ दशदशतो दशगुणितदशत्वसंख्यातत्तत्प्रसिद्धंशतंभवति । दशगुणितशतानिप्रसिद्धंसहस्रं । तत्सहस्रंबहुधागुणितंसत्लक्षकोट्यादिसर्वसंख्यात्मकंभवतीत्यर्थः । तद्व्याचष्टे ॥ तस्मादिति ॥ यस्माद्दशैवमूलसंख्या शतादयश्चतद्भिभेदाः तस्मादेतदखिलंशतादिकंदशेत्यर्थः । अनेनैवसहस्रशब्दस्यामितवाचित्वमप्युपपादितंभवति । तदेतत्सहस्रं तानिदशेतिप्रकारद्वयार्थमुपसंहरति ॥ ऋक्सहस्रमिति ॥ तस्मादनंतरूपगुणशक्तिवाचकसहस्रनाममत्स्यादिनामव्याख्यानरूपत्वात् । सहस्रनान्नाममितनामार्थप्रतिपादकत्वादमितनामानमित्युक्तं । यदुक्तंबृहतीसहस्रस्यानंतरूपगुणादिविशिष्टभगवद्वाचित्वं तत्रकिंप्रमाणमित्यतः तस्यातिशयेनभगवत्तर्पकत्वयुक्तिः प्रमाणं । यद्यस्यातिशयेनस्तावकंतत्तस्यातिशयेनतर्पकमितिव्याप्तेरितिभावेनान्नमशीतयोन्नेनहीदंसर्वमश्नुतइत्युक्तमशीतीनामन्नत्वंस्मारणायपुनरुच्यते ॥ तानित्रीणिछंदांसिभवंतीति ॥ तानित्रीणि तृचाशीतित्रयात्मकंतच्छस्त्रं तानित्रीणिछंदांसि गायत्रीबृहत्युष्णिगितिछंदांसिभवंति । छंदस्त्रयबद्धंभवतीत्यर्थः । तद्व्याचष्टे ॥ छंदस्त्रयमिति ॥ अस्तुतृचाशीतित्रयस्यक्रमेणगायत्र्यादिछंदोबद्धत्वं । ततश्चकिमित्यतउक्तं त्रेधेति ॥ इदंतृचाशीतित्रयंविष्णोरन्नं कथं तच्चैतैः गायत्रीबृहत्युष्णिग्लक्षणछंदोबद्धैःस्वभागैःक्रमेणाशनमश्यं पानं पेयं खादः खाद्य

भा० । संख्याचतद्भिभेदाःशतादयः । ऋक्सहस्रमिदंतस्मादनंतगुणमच्युतं । अनंतशक्तिममितरूपनामानमेवच । वक्तिछंदस्त्रयंचात्र तृचाशीतित्रयात्मकं ।

मिति त्रेधाविहितंसत् तद्ब्रह्माप्नोति । तस्यतर्पकमितियावत् । जडविवक्षायामन्नपानभक्ष्यभोगजन्यानंदसजातीयानंदप्रयोजकत्वं अभिमानिविवक्षायांतदभिमानिदेवाःस्वयमशनादित्वंसाक्षात्प्राप्नुवंतीतिज्ञेयं । तदेतत्तात्पर्यतोव्याचष्टे ॥ अशनादित्रिकमिति ॥ खंडार्थमुपसंहरति ॥ सर्वेति ॥ नकेवलंगायत्र्यादिपंचछंदोभिधः । कित्वेवंसर्वछंदोभिधः । देवेषुदेवमध्यूह्यमित्युक्तदिशासर्वदेवाभिधः ॥ सर्वमुन्यभिधइति ॥ प्रकृतबृहतीसहस्रादिद्रष्टृऋष्यभिधइत्यर्थः । छंदोदेवताप्रसंगेमुनीनामप्युपलक्षणीयत्वात् । सर्ववस्त्वभिधोज्ञेयः । स्तोमसामचित्यादिसर्ववस्त्वभिधः । तथाप्रद्युम्नःपंचभूतेष्वित्यादिवक्ष्यमाणदिशासर्ववस्त्वभिधोज्ञेयः । कुतः । यस्माच्चत्तच्छब्दप्रवृत्तिनिमित्तानंतपूर्णगुणकस्तस्मादितियोजना । यद्वायस्मात्सर्वाभिधस्तस्मादनंतपूर्णगुणकोज्ञायते । शब्दानांयौगिकत्वा दतोनंतगुणोयच्छब्दायोगवृत्तयइतिसंग्रहभाष्योक्तेरितिज्ञेयं । एतद्विद्याधिकारिण आह ॥ मुख्यतइति ॥ त्रिवृदादिशब्दानांत्रिवृदादिगतेलाक्षणिकत्वेकेवलरूढत्वेवागुणपूर्त्यलाभान्निर्वक्ति ॥ त्रिविधइत्यादिना ॥ अध्यात्मादित्रयेत्रेधावर्ततइतित्रिवृदनिरुद्धः । यद्यपिप्रद्युम्नादीनामप्यध्यात्मादिभेदंवक्ष्यति तथापितेषांभूताद्येकदेशेध्यात्मादिभेदेनावस्थानमस्यतुसर्वत्रेतिभेदोबोध्यः॥ पंचदशात्मकइति ॥ अध्यात्मंशरीरेविद्यमानेषुपंचभूतेषु अधिभूतंपृथि

भा० । अशनादित्रिकंतच्चभूत्वाविष्णुमुपैतिच । सर्वछंदोभिधश्चैवसर्वदेवाभिधस्तथा । सर्वमुन्यभिधश्चैवसर्ववस्त्वभिधोहरिः । अनंतपूर्णगुणकस्तस्माज्ज्ञेयोरमापतिः । मुख्यतोस्यांचविद्यायांयोग्यएकश्चतुर्मुखः । एकदेशपरिज्ञानेत्वन्येयोग्याःशिवादयइतिच । त्रिविधोह्यनिरुद्धोसावध्यात्मादिविभेदतः । अतस्त्रिवृदितिप्रोक्तस्तथापंचदशात्मकः ।

व्यादौपंचीकरणप्रक्रिययाविद्यमानेषुपंचभूतेषु अधिदैवंदेवतालोकस्थशरीरेविद्यमानेषुपंचभूतेषुस्थितप्रद्युम्नःपंचदशात्मकइत्यर्थः । संकर्षणोलिंगसप्तदशस्थत्वाल्लिंगशरीरगतपंचभूतेषुदशेंद्रियेषुमनोबुद्ध्योश्चस्थितत्वात्तावान्सप्तदशश्रुतः । मनोबुद्ध्योरेकत्वविवक्षयालिंगस्यषोडशकलत्वमन्यत्रोक्तमित्यविरोधः । भूताभिमानिषुस्वलोकस्थदेवेषुचसप्तधातूनांसत्वादधिभूतादिगतत्वं बोध्यं । मनआदिचतुष्टये मनोबुद्ध्यहंकारचित्तेषु । गुणत्रयेप्रकृतावित्यष्टसु अध्यात्मादिविभेदतश्चतुर्विंशतिसंख्याकासुस्थितःप्रभुः मूलरूपेणसहपंचविंशात्मकइत्यर्थः । मनआद्यष्टकमध्यात्मंप्राणिदेहेप्रकृतिस्वात्मसंश्लिष्टान्गुणान्सत्वादिकानपीत्युक्तन्यायेनवर्तते । भूतेष्वपि व्याप्तंकार्येषुकारणमित्युक्तन्यायेनभूतानांपरंपरयागुणत्रयप्रकृतिकार्यत्वात् । प्राणाएवेदमग्रआसुस्तेभ्योभूतानिजज्ञिरेइत्युक्तदिशामनआदिकार्यत्वाच्चअधिदैवंदेवेषुमनआद्यष्टकंतुसिद्धं । यद्वाध्यात्मंप्राणिशरीरगेषुदेवेषु भूताभिमानिषु स्वलोकस्थेषुचदेवेष्वितिस्थानत्रयेपिदेवताविवक्षायांमनआद्यष्टकस्यावस्थानंसुकरमेव । बहुत्वेनप्राप्तभेदशंकांवारयति ॥ नारायणइति ॥ सनारायणएकोप्यचिंत्यस्वरूपत्वादेकोपिबहुधाभवतीत्यर्थः । रथारूढःदेहाख्यरथारूढः । द्रुवनतरणयोरितिधातुव्याख्यानेपिधातूनामनेकार्थत्वाद्रथारूढइत्युक्तं । यद्वारथेनतरतिप्लवतिगच्छति तरतिशत्रूनितिवा रथं

भा० । प्रद्युम्नःपंचभूतेषुह्यध्यात्मादिविभेदतः । लिंगसप्तदशस्थत्वात्तावान्संकर्षणःश्रुतः । सप्तधातुषुसंस्थःसन्ध्यात्मादिविभेदतः । एकविंशोवासुदेवोमनआदिचतुष्टये । गुणत्रयेचप्रकृतावध्यात्मादिविभेदतः । मूलरूपेणचसहपंचविंशात्मकःप्रभुः । नारायणस्त्वचिंत्यात्मासएकोपिह्यनंतधा । गायकानांत्राणतोसौगायत्रमनिरुद्धकः । प्रद्युम्नोहिरथारूढस्तेनचोक्तोरथंतरं ।

तरं इत्यस्यतात्पर्यंरथारूढइति । त्रिकाले त्रिसंध्याकाले सवनत्रयेवा भूतभविष्यद्वर्तमानकालइतिवाद्वेपदेरूपेयस्याःसाद्विपदा । यद्वाद्विरूपेणवर्ततइतिद्विपदा पदुगताविति धातोः । अंतर्बहिश्चतत्सर्वंव्याप्यनारायणस्थितः । द्विरूपोंतर्बहिर्यतइत्यादेरितिभावः । सर्वछंदोभिधाइमेभगवद्रूपसंघावनितातनवःप्रोक्ताइत्यर्थः । शिरोदक्षिणःपक्षइत्यादेरर्थः मध्यमित्यादि ॥ आत्मेत्यस्यार्थोमध्यमिति । प्रकर्षेणस्तूयतेऽवतिरक्षतिचेतिप्रस्तावइत्यभिप्रेत्योक्तः ॥ रक्षन्संस्तूयतेयतइति ॥ उद्गमयन् सृजन्गिरासर्ववागभिमानिन्यारमयागीयतइत्युद्गीथइत्यर्थमभिप्रेत्यव्याचष्टे ॥ सृजन्निति ॥ तत्र सृष्टिकालेजगतिवा । उत्पूर्वस्यगमेःसर्वशरीरान्निर्गमलक्षणसृष्टिपरत्वं वाग्गीरितिश्रुतेःसर्ववागात्मिकायातुश्रीरितिस्मृतेश्च गीत्यस्यगिरावागभिमानिन्या लक्ष्म्येत्यर्थकत्वं उत्पूर्वस्य गैशब्दे गागानइतिवाधातोःकर्मणिस्थक्प्रत्ययेगीथइत्यस्यगीयतइत्यर्थकत्वं । यद्वागीतशब्दएवायं ।

भा० । बृहद्रूपोबृहन्नामातथासंकर्षणःप्रभुः । भद्रंतुवासुदेवोसौभद्रमोक्षप्रदोयतः । नारायणोराजनंस्याद्राजयत्येषमोक्षिणः । गायत्रीत्व निरुद्धोसौत्रिकालेगीयतेयतः । उष्णिगुष्णस्वरूपत्वात्प्रद्युम्नोम्र्यादिसंस्थितः । स्त्रीरूपोबृहतीनामाबृहत्संकर्षणःप्रभुः । वासुदेवस्तथात्रिष्टुप्त्रिवेदैः स्तूयतेयतः । नारायणस्तुस्त्रीरूपोद्विधैवासौव्यवस्थितः । द्विपदेतिततोनामसर्वछंदोभिधाइमे । वनितातनवःप्रौक्तामध्यंनारायणःप्रभुः । वासुदेवोस्यपुछंचवामदक्षौचपक्षकौ । संकर्षणश्चप्रद्युम्नःक्रमादेवप्रकीर्तितौ । अनिरुद्धःशिरश्चैवतथैकोपिहिपंचधा । प्रस्तावनामानिरुद्धोरक्षन्संस्तूयतेयतः । सृजन्जगच्चरमयाप्रद्युम्नस्तत्रगीयते ।

॥ ९३ ॥

तकारस्यथकारइतिभावः । उत्पूर्वस्यगमेस्थन्प्रत्ययेउद्गमयतीत्युद्गीथइत्यर्थांतरमाह ॥ जगदुद्गमनेनेति ॥ प्रमाणेत्यक्त्वा त्स्तोमादिनामस्वयंनिर्वक्ति ॥ स्तूयमानत्वादिति ॥ समत्वा द्गुणैःसर्वभूतेषुसमत्वात् । समोहंसर्वभूतेषु नमेद्वेष्योस्तिनप्रियइत्युक्तरीत्यासमत्वाद्वा । छंद्यत्वादुत्तमाधिकारिणांस्वयमेवेष्टत्वात् । अन्येषांतत्प्रसादस्यापेक्षितत्वेनेष्टत्वात् । अकामितोवाग्गतिमेवदद्यादितिभारततात्पर्यवचनात् । चितिशस्त्रपदयोःखंडेऽभावान्नव्याख्यानंकृतं ॥ १६ ॥ बृहतीसहस्रशंसनंकर्तव्यमित्युक्तं । तत्रपूर्वपक्षप्रतिक्षेपपूर्वंद्रढयितुमयंखंडः ॥ तद्वाइति ॥ तदिदमुक्तप्रकारेणसंपन्नं संपादितं बृहतीसहस्रमेवसंपन्नं शंसनायोपपन्नंभवति । तत्तत्र । शंसकेषुमध्येकेनानाछंदसांसहस्रमेतच्छंसनीयंप्रतिजानते । किमन्यत्नानाछंदःप्रशंसनादन्यत्सत्प्रशस्तंकिं नकिमप्यतःप्रशस्तस्यान्यस्याभावादेतदेवप्रशंसनीयमितिप्रतिजानतइत्यर्थः । एकेवादिनःनानाछंदःशंसनादन्यत्सत्प्रशस्तंत्रिष्टुप्सहस्रंब्रूयामेतिप्रतिजानते । एकेजगतीसहस्रंशंसनीयंप्रतिजानते । एकेनुष्टुप्सहस्रंप्रशस्तंप्रतिजानते । तत्कथमित्यतस्तेस्वप्रतिज्ञातार्थेनुष्टुप्प्रशंसात्मिकांऋचंप्रमाणत्वेनोदाहरंतीत्युच्यते ॥ तदुक्तमृषिणेति ॥ तदनुष्टुभःप्रशस्तत्वं ऋषिणा

भा० । उद्गीथनामातेनासौजगदुद्गमनेनवा । संहारात्पतिहाराख्यस्तथासंकर्षणःप्रभुः । मोचयित्वासमीपंहिद्रावयेद्वासुदेवकः । तेनोपद्रवनामासौनिधीयंतेयतोखिलाः । मुक्तानारायणेदेवेतेनासौनिधनाभिधइत्यादिच ॥ स्तूयमानत्वात्स्तोमःसमत्वात्साम । छंद्यत्वाच्छंदः ॥ ४ ॥

उप० । तद्वाइदंबृहतीसहस्रंसंपन्नंतद्धैतदेकेनानाछंदसांसहस्रंप्रतिजानतेकिमन्यत्सदन्यद्ब्रूयामेतित्रिष्टुप्सहस्रमेकेजगतीसहस्रमेकेऽनुष्टुप्सहस्रमेकेतदुक्तमृषिणा

मंत्रद्रष्ट्रोक्तमंत्रउदाहियते ॥ अनुष्टुभमिति ॥ बीभत्सूनांसयुजंहंसमाहुरपांदिव्यानांसंख्येचरंतं । अनुष्टुभमनुचर्चूर्यमाणमिं द्रंनिचक्युःकवयोमनीषेतिसमग्रमंत्रस्यायमर्थः । कवयो दिव्यदृष्टिमंतोज्ञानिनः मनीषा मनीषया ज्ञानसामर्थ्येन बीभत्सूनां जगद्बिभर्तुमिच्छूनांदिव्यानामपा मब्देवानां सख्ये सख्यार्थं सयुजंचरंतं मेघचक्रेसहैवचरंतं हंसमाहुः हंसस्वरूपिणंविष्णुं वायुंचाहुः । नचतद्वचनंविप्रलंभवचनवदृष्टार्थविषयंविरिंचादिभ्योनृसिंहानुष्टुभमनुसम्यक्चर्चूर्यमाणमुच्चार्यमाणमर्थवत्तयाव्या चक्षाणंइंद्रंपरमेश्वरंहंसरूपिणंविष्णुं तथाशिवादिभ्योनुष्टुभमुच्चारयंतंव्याचक्षाणंवेंद्रंहंसरूपंवायुं मनीषयादिव्यदृष्ट्यादृशुश्चे ति । किमनेनमंत्रेणोक्तंभवतीत्यतउच्यते ॥ वाचीति ॥ वागाख्यायामनुष्टुभ्युभाभ्यामुच्चार्यमाणायांहिऐंद्रमिंद्रेणपरमेश्वरेण सहितंप्राणंऋषयोन्यचायन्ददृशुरितियत् तत्तस्मादेतदनुष्टुभाख्यछंदस्तेनविष्णुनातेभ्यउक्तंभवतीतिज्ञायते । तत्तस्मादेतदनु ष्टुप्छंदएवतत्प्रशस्तमितिएतत्प्रमेयंतेनमंत्रेणोक्तंभवतीत्यर्थः । फलाधिक्याच्चानुष्टुप्छंदःसहस्रमेवशंसनीयमित्युच्यते ॥ सहे ति ॥ योनुष्टुभांसहस्रंशंसीत स भवितोर्भवितुंमोक्षंगंतुमीश्वरःसमर्थः यशस्वीदिक्षुप्रसिद्धः कल्याणकीर्तिः शुभकीर्तिश्चभव ति । दिक्षुयानाद्यशोव्याप्तंकीर्तिःप्रत्यक्षतस्तुतिरितिवचनात् । आयुषःपुराप्रैतोः प्रैतुं मर्तुंचेश्वरः स्वछंदमृत्युश्चस्यादित्यैतरे यकः विष्णोरन्यऐतरेयआहस्मेत्यर्थः । एवंपूर्वपक्षान्प्रापय्यदूषणमुक्तंभगवतामहैतरेयेणेत्युच्यते ॥ इतिहस्मेति ॥ इत्यस्मि

उप० । ऽनुष्टुभमनुचर्चूर्यमाणमिंद्रंनिचिक्युःकवयोमनीषेतिवाचिवैतदैंद्रंप्राणंन्यचायन्नित्येतत्तदुक्तंभवतिसहेश्वरोयशस्वीकल्याणकीर्तिर्वितोरीश्वरोहतुपुरायुषःप्रैतोरितिहस्माह

न्ननुष्टुप्सहस्रपक्षेदूषणमाहऐतरेयइत्यर्थः । पक्षांतराणांपरिहारमनुक्त्वाकुतोत्रैवदूषणमुक्तंतेनेत्यतस्तेनैवस्वशिष्यंप्रतिपक्षांतरा ण्युपेक्ष्यानुष्टुप्सहस्रपक्षदूषणेकारणमुक्तमित्युच्यते ॥ इतिहस्मेति ॥ एष नानाछंदःप्रशंसादिपक्षः । अकृत्स्नः प्रकरणविक लत्वेनपरिहारायाप्यपूर्णः निर्दलतयोपेक्षणीयः । एषत्वदीयःपक्षःप्रमाणपूर्वकत्वात्कृत्स्नःपरिहारायपूर्णश्चेतिग्राह्यं । किंचैषत्वं ममात्मा अंतरंगप्रियशिष्य इतहस्म इत्यपि स्वशिष्यंप्रत्याहमहैतरेयइत्यर्थः । एवंपक्षांतराणांनिर्दलत्वंशिष्यपक्षस्यसदलत्व मुक्त्वादूषणमुच्यते ॥ अकृत्स्नइति ॥ यद्वाग्यानुष्टुबाख्यवागभिमानिन्युमा एषभगवतोकृत्स्नआत्मा असंपूर्णप्रतिमा त त्रज्ञापकमुच्यते ॥ अकृत्स्नइति ॥ कृत्स्नशब्दार्थप्रतिपादकब्रह्मशब्दावाच्यइत्यर्थः । संपूर्णप्रतिमात्वेवायोरिवब्रह्मशब्दवा च्यत्वप्रसंगादितिभावः । असंपूर्णत्वेयुक्तस्यंतरमुच्यते ॥ अभिहीति ॥ प्राणेन वायुना मनसा शिवेनाभि इस्यमानः अभि तोविषयेषुप्रेर्यमाणः अनुभवतिविषयान्वाचानानुभवति । वाङ्मंत्रेणविषयभोगोनभवतीत्यर्थः । अस्त्वेवमनुष्टुभोऽवरत्वं तत श्चकिमित्यतउच्यते ॥ बृहतीमित्यादिना ॥ बृहतीमभिसंपादयेत्कुतः । यद्यस्मादेषप्रकृतोवायुरेवबृहतीबृहत्यभिमानी । त स्माद्यद्बृहती यावृहती । साछंदसांमध्येबृहतीवरिष्ठा । वायुरपिकश्चिद्देवः तदभिमन्यमानकत्वमात्रेणकथंबृहत्यावरिष्ठत्वमि तिचेयद्बृहती योबृहत्यभिमानीवायु रेषवैदेवानांमध्येकृत्स्नः पूर्णः आत्मा विष्णुप्रतिमा । पूर्णत्वेज्ञापकमुक्तं ॥ कृत्स्नइति ॥ यस्मात्पूर्णत्वंतस्मादेवखलुकृत्स्नः कृत्स्नशब्दपर्यायब्रह्मशब्दवाच्यः । द्युभ्वाद्यायतनंस्वशब्दादितियथा । बृहत्यभिमानिनः

उप० । अकृत्स्नोह्येषआत्मायद्वागभिहिप्राणेनमनसेस्यमानोवाचानानुभवतिबृहतीमभिसंपादयेत्

पूर्णत्वेबृहतीशब्दोपिप्रमाणमुच्यते ॥ एषवाइति ॥ यद्यस्मात्कृत्स्नःमाहात्म्येनाधिकस्तस्मादेवबृहतीशब्दवाच्यइत्यर्थः । बृहत्याइतरछंदोभ्यआधिक्येज्ञापकमुच्यते ॥ एषवाइति ॥ यद्यस्मादेषः छंदोविशेषः कृत्स्नः बृहतीशब्दवाच्यपरिपूर्णवाच्वभिमतत्वेनमाहात्म्याधिक्योपेतः तस्मादेवबृहतीत्युच्यतइत्यर्थः । प्रकारांतरेणसदृष्टांतंबृहत्याउत्तमत्वमुच्यते ॥सइत्यादिना॥ सोयमात्मा मध्यदेहः । सर्वतःसर्वशरीरैः शरीरावयवैः । परिवृतः । ततश्चकिमित्यतउक्तं ॥ तद्यथेति ॥ अत्रतदित्येतत् मध्यंह्येषामित्यनेनसंबध्यते । यथायमात्मासर्वशरीरैःपरिवृतःएवमेवबृहतीसर्वतःछंदोभिःपरिवृता । मध्यदेहबृहत्योरितरांगछंदःपरिवृतत्वेज्ञापकमुच्यते ॥ मध्यमिति ॥ तत्तस्मादितरांगपरिवृतत्वादेवायमात्मैषामंगानांमध्यमित्युच्यते बृहत्येषांछंदसांमध्यमित्युच्यतइत्यर्थः । इतरछंदसांचतुर्मुखेतरांगसमुद्भूतत्वाद्बृहत्यास्तुमध्यदेहोत्पन्नत्वात्तृचाशीतित्रयेमध्येपठ्यमानत्वात् सप्तछंदोलक्षणवैष्णवप्रतिमायांमध्यांगत्वाच्चेत्येवंतत्परिवृतत्वादेवमध्यत्वव्यवहारइतिभावः । यदुक्तमनुष्टुप्छंसनेमोक्षादिफलसद्भावात्तच्छंसनंप्रशस्तमिति तन्न । ततोप्यधिकफलत्वाद्बृहतीशंसनस्येत्युच्यते ॥ सहेश्वरइत्यादिना ॥ नन्वेतत्फलमनुष्टुबुपासकस्यापिसममित्यतःपरंकृत्स्नोह्येषइत्याकृष्यव्याख्येयं । एष उपासकः । मुक्त्यादौकृत्स्नोगुणाधिकइतिहस्मम्महिदासः

उप० । एषवैकृत्स्नआत्मायद्बृहतीसोयमात्मासर्वतःशरीरैःपरिवृतस्तद्यथायमात्मासर्वतःशरीरैःपरिवृतएवमेवबृहतीसर्वतःछंदोभिःपरिवृतामध्यंह्येषामंगानामात्मामध्यंछंदसांबृहतीसहेश्वरोयशस्वीकल्याणकीर्तिर्भवितोरीश्वरोहतुपुरायुषःप्रैतोरितिहस्माह

॥ ९५ ॥

ग्राहेत्यर्थः । उपसंहियते ॥ कृत्स्नइति ॥ यद्बृहती याबृहती एष तदभिमानीवायु र्हि यस्मात्कृत्स्नआत्मा संपूर्णप्रतिमा एषछंदोविशेषोपिकृत्स्नआत्माभगवतोविशिष्टप्रतिमा । तस्माद्बृहतीमेवाभिसंपादयेदिति ॥ अत्रयत्तदिदंबृहतीसहस्रंसंपन्नंतदेकेनानाछंदसांसहस्रंप्रतिजानतइत्यन्यथाप्रतीतेतेर्व्याचष्टे ॥ तदिदमिति ॥ तदिदमित्यस्यतात्पर्यमुक्तप्रकारेणेति ॥ उक्तप्रकारेणसंपन्नंसंपादितंबृहतीसहस्रमेवशंसनायसंपन्नमुपपन्नंभवतीत्यर्थः । तदेके तत्रैके । एतदित्यस्यार्थः ॥ शंसितव्यमिति॥ ननुनानाछंदस्सुत्रिष्टुबादेरप्यनुप्रविष्टत्वादविरोधादेकइतिकिमर्थमित्यतोव्याचष्टे ॥ केचिदिति ॥ नानावादिषुप्रस्तुतेषुकैस्तदुक्तमितिप्रमाणमुच्यतइत्यतआह ॥ अनुष्टुबिति ॥ ननुऋचिअनुष्टुप्छंसनीयेत्यनुक्तत्वात्कथमुक्तार्थेप्रमाणमित्यतः अनुष्टुभःप्रशंसयातदुत्तमत्वंलभ्यते तेनचहेतुनातस्याएवयज्ञेशंसनीयत्वंलभ्यतदतिभावेनोक्तं ॥ अनुष्टुप्प्रशंसात्मिकामिति ॥ ऋचमादितएवव्याचष्टे ॥ बीभत्सूनामिति ॥ चर्चूर्यमाणमित्यत्रहलादिःशेषइतिविधेः चरफलोश्चेतिविहितनुगागमस्यचाभावःछांदसइत्यभिप्रेत्ययथाविधानमनुवदति ॥ चर्चूर्यमाणमिति ॥ क्रियासमभिहारेयङितिस्मरणादुक्तंपुनःपुनरिति । चरति

उप० । कृत्स्नोह्येषआत्मायद्बृहतीतस्माद्बृहतीमेवाभिसंपादयेत् ॥ ५ ॥

भा० । तदिदमुक्तप्रकारेणैवबृहतीसहस्रंसंपन्नंभवति । तदेकेनानाछंदसांसहस्रंशंसितव्यमेवबृहतीसहस्रसंपादनमविवक्षितमितिप्रतिजानते । केचित्त्रिष्टुप्सहस्रमेवशंसितव्यमिति । अनुष्टुप्सहस्रमेवेतिवदंतोनुष्टुप्प्रशंसात्मिकामृचंदर्शयंति । बीभत्सूनांजगद्भर्तुमिच्छूनां । अपांसयुजंसहैवचरंतंचाहुः । विष्णुंहंसस्वरूपिणंअनुष्टुभंचर्चूर्यमाणंपुनःपुन

रत्रोच्चारणार्थइत्यभिप्रेत्योक्तंवदंतमिति । उच्चरतीत्यादावुत्पूर्वस्यचरतेरनुवादार्थत्वदर्शनादितिभावः । इंद्रमित्यस्यार्थः ॥ पर मेश्वरमिति ॥ प्रमाणेनोत्तरार्धंविवृणोति ॥ मेघेति ॥ अपांसख्यार्थंचरंतमित्यस्यतात्पर्यमेघसंस्थमिति । वायुविषयतयाप्ये तद्व्याचष्टे ॥ एवमिति ॥ वाचिवैतदैंद्रंप्राणमित्यत्रेंद्रेणसहितंवायुमित्युक्त्याविष्णुमितिलभ्यतइतिभावेनव्याचष्टे ॥ वागा ख्यायामिति ॥ उच्चार्यमाणायांब्रह्मादीन्प्रतीतिशेषः । व्यचायन्निितियत्तत्तस्मादेतदनुष्टबाख्यछंदस्तेनविष्णुनातेभ्यउक्तंभव तीतिज्ञायतइत्यस्यतात्पर्यार्थोऽतइति । मुनिभिर्दृष्टत्वादित्यर्थः । यस्मादितरपरित्यागेनविष्णोःसकाशादनुष्टुबर्थंशृण्वंति तत्त स्मादेतच्छंदस्तदुत्तममित्येतत्प्रमेयंतेनमंत्रेणोक्तंभवतीत्यर्थांतरमाह ॥ अतोनुष्टुबिति ॥ एतच्छंदस्तदितितच्छब्देनप्राक्सदि तिप्रकृतमुत्तमत्वंपरामृश्यतइतिभावेनोक्तं ॥ वरेति ॥ सोनुष्टुपछंदसःकईश्वरोभवितुमीश्वरःसमर्थइत्यन्यथाप्रतीतेःप्रमाणेन व्याचष्टे ॥ अनुष्टुभामिति ॥ अतएवशंसनादेवभवितुमीश्वरःस्याद्भावश्चमोक्षइत्येवार्थोनान्यथार्थइत्यर्थः । दिक्षुयानाद्यशो

भा० । वंदंतंपरमेश्वरंददृशुश्च । मेघसंस्थंहंसरूपांविष्णुंपरमेश्वरं । विरिंचिशिवपूर्वेभ्योनृसिंहानुष्टुभंपरां । उच्चारयंतमर्थांश्चव्याचक्षाणं समंततः । ददृशुर्मुनयोदिव्याआचार्यब्रह्मशर्वयोः । एवंवायुंचददृशुस्तत्रहंसस्वरूपिणं । शिवादिभ्योव्याहरंतंतामेवानुष्टुभंपरामित्यादिच । वा गाख्यायामनुष्टुभ्युच्चार्यमाणायांहिमुनयोविष्णुंददृशुः । अतोब्रह्मादयोपिविष्णोःसकाशादनुष्टुबर्थंसर्वदाशृण्वंतीतिज्ञायते । अतोनुष्टुबेवछंदसांवरे तिचोक्तंभवति । अनुष्टुभांसहस्रंतुयःशंसीतातएवतु । भवितुंचेश्वरःसस्याद्भावोमुक्तिर्नचान्यथा ।

॥ ९६ ॥

व्याप्तंकीर्तिःप्रत्यक्षतस्तुतिरितिवचनंमनसिनिधायाह ॥ यशस्वीति ॥ आयुषःपुराप्रैतोरीश्वरइत्यस्यतात्पर्यं स्वछंदेति ॥ इतिहस्माहेत्येतद्व्याचष्टे ॥ इत्याहैतरेयकइति ॥ कःकुत्सने महिदासाद्भगवतोन्यस्तच्छिष्यइत्यर्थः । इतिहस्माह इतिपूर्व पक्षेदूषणमाह ॥ महैतरेयइति ॥ पक्षांतरमदूषयित्वाकिमितितत्पक्षोदूष्यतइतिशिष्यहार्दशंकापरि ारपरत्वेनापीतिहस्माह । कृत्स्नोह्येषइत्येतद्व्याचष्टे ॥ नानेति ॥ कृत्स्नइत्यध्याहारं एषत्वदीयःपक्षःकृत्स्नःपरिहारायपर्याप्तइत्यर्थमभिप्रेत्यतात्पर्यमाह ॥ त्वंत्विति ॥ एषत्वंममात्मेत्येतद्व्याचष्टे ॥ प्रियइति ॥ ममात्माभद्रसेनइत्यादावात्मशब्दस्यगौण्या प्रियपरत्वादितिभावः । अकृत्स्नोह्येषआत्मायद्वागित्यस्यार्थमाह ॥ उमेति ॥ अकृत्स्ना अपूर्णाप्रतिमा । तत्रज्ञापकपरतयाकृत्स्नेत्येतत्प्रकारांतरेणव्या चष्टे ॥ नैवब्रह्मेति ॥ अभिहिप्राणेनेत्यादिव्याचष्टे ॥ वायुनेति ॥ अभिसर्वतोविषयेष्वस्यमानःक्षिप्यमाणः । अनुभवेत् वि षयानितिशेषः । कुतोबृहतीमभिसंपादयेदित्यतःप्रवृत्तमेषवैयद्बृहतीत्यंशंतावद्व्याचष्टे ॥ अभिमानीति ॥ यद्यतः एषवायुरेव

भा० । यशस्वीसप्रसिद्धःस्याच्छुभकीर्तिश्चसर्वदा । स्वच्छंदमृत्युताचस्यात्तस्येत्याहैतरेयकः । महैतरेयोभगवांस्तन्नेत्याहरमापतिः । नाना छंदःप्रशंसादिप्रमाणरहितत्वतः । परिहारायचापूर्णमैतरेयमुनेशृणु । त्वंतुमंत्रमुदाहृत्ययस्मादेतदवोचथाः । तस्माद्वक्ष्याम्युत्तरंतेप्रियःशिष्योसि मेयतः । उमैववागितिप्रोक्तासानुष्टुबभिमानिनी । अकृत्स्नासाततोनैवब्रह्मेत्युक्ताकथंचन । वागिंद्रियाभिमानिन्यांनहिब्रह्मवचःक्वचित् । वायु नाप्राणरूपेणमनोरूपशिवेनच । अभ्यस्यमानोनुभवेत्पुमान्वाचातुनकचित् । अभिमानीबृहत्यास्तुवायुरेवयतःप्रभुः । तस्मादेषाछंदसांहिवरिष्ठा बृहतीस्मृता ।

बृहती बृहत्यभिमानी तस्माद्यद्बृहतीवरिष्टेत्यावर्त्ययोजनेतिभावः । यद्बृहतीयोबृहत्यभिमानीवायुरेषवैकृत्स्नआत्मेत्येतद्व्याचष्टे ॥ पूर्णइति ॥ कृत्स्नइत्येतत्तत्समानार्थब्रह्मशब्दवाच्यइत्येवंप्रकारांतरेणव्याचष्टे ॥ तस्मादिति ॥ वायोःपूर्णत्वे छंदसोपित दभिमन्यमानत्वादिनाधिक्येच बृहतीशब्दएवप्रमाणमित्युक्तंयद्यस्मात्कृत्स्नस्तस्माद्बृहतीति । तद्व्याचष्टे ॥ माहात्म्याधिक्य तइति ॥ वायोःछंदसश्चेतिशेषः । मध्यंह्येषामित्यत्रबृहत्यामध्यत्वंनामचतुर्मुखमध्योत्पन्नत्वं तृचाशीतित्रयमध्येपठ्यमानत्वं सप्तछंदोरूपवैष्णवप्रतिमायामध्यांगत्वमितित्रेधाव्याचष्टे ॥ अंगेभ्यइत्यादिना ॥ मध्ये तृचाशीतिमध्ये । ननुवाय्वभिमत त्वेनबृहत्याउत्तमत्वेमहालक्ष्म्यभिमतत्वेनगायत्र्याउत्तमत्वप्रसंगइत्यतआह ॥ गायत्रीति ॥ गायत्रीदेवतात्वं गायत्र्यभिमा निदेवतात्वं । बृहतीदेवता बृहतीलक्षणप्रतिमाधिष्ठात्री । तन्नियामिकादेवतेत्यर्थः । तथाचतदपिबृहत्येवाधिकेतिसैवशंसनीये तिभावः । ननुगायत्रीछंदसामहमित्यादौगायत्र्याःछंदःप्रवरत्वस्यस्पष्टमुक्तत्वाद्भगवतोबृहत्यधिष्ठातृत्वेलक्ष्म्यवरत्वप्रसंगः गाय त्रीचशंसनीयेत्यापन्नमित्यतआह ॥ आधिक्यमिति ॥ यत्र वाक्ये । तत्पुत्रो लक्ष्मीपुत्रः । नन्वस्यांविवक्षायांविष्णोर्गायत्र्य

भा० । पूर्णोहिवायुर्देवानांतस्माद्ब्रह्मेतिचोच्यते । माहात्म्याधिक्यतश्चैवबृहतीत्येवनामतत् । अंगेभ्यएवसंभूतान्यन्यछंदांसिचाब्जजात्। मध्यात्तुबृहतीजातातस्मात्सामध्यमुच्यते । पठ्यतेतेनमध्येसाछंदसांप्रवरासती । छंदांस्यन्यान्यंगवत्स्युर्मध्यवद्बृहतीपरा । सप्तछंदांसिचैवंहिप्र तिमावैष्णवीमता । गायत्रीदेवतात्वंचलक्ष्म्यायत्राभिधीयते । बृहतीदेवतातत्रभगवान्पुरुषोत्तमः । आधिक्यंछंदसांयत्रगायत्र्यास्तुविवक्षितं । तत्रतत्पुत्रकोवायुर्बृहतीदेवतामता ।

॥ ९७ ॥

वरत्वप्राप्त्यभावेपिबृहत्यपेक्षयागायत्र्याउत्तमत्वेनतस्याएवशंसनीयत्वप्रसंगइत्यतआह ॥ ऋचामिति ॥ तद्गायत्रीशंसनंनांगी कार्यं । कुतः । अत्रऋचामाधिक्ययोगार्थंगायत्रीसहस्रशंसनमकृत्वाबृहतीसहस्रशंसनेकृतेसपंचशतगायत्र्योभवंतीति तदाधि क्यघटनार्थमित्यर्थः । ननुयदिऋगाधिक्यलाभार्थंबृहतीसहस्रशंसनंस्यात्तर्हिजगत्यादिशंसनेबृहत्याअपिऋगाधिक्यलाभात्तत्क र्तव्यमित्यतआह ॥ प्रधानत्वादिति ॥ नकेवलमृगाधिक्यलाभायबृहतीशंसनंब्रूमःयेनजगतीशंसनप्रसंगः । किंतुमध्यदेहो त्पन्नत्वेनमध्येपठनीयत्वेनसप्तछंदोलक्षणप्रतिमायामध्यांगत्वेनावश्योपासनीयद्वासप्ततिसहस्राक्षरघटितत्वेनजीवोत्तमप्राणाभि मतत्वेनचप्रधानत्वादित्यर्थः । ननुबृहत्युपासकस्योक्तंसहेश्वरइत्यादिफलमनुष्टुबुपासकस्यापिसममितिकोविशेषइत्यतः प्रैतोरि त्यतःपरंकृत्स्नोह्येषइत्यस्यानुकर्षमभिप्रेत्यव्याचष्टे ॥ संपादनादिति ॥ एषकृत्स्नइत्यस्यार्थो गुणेति ॥ मुक्ताविति शेषः । इतिहस्माहेत्यस्यार्थः ॥ इतिप्राहेति ॥ किमन्यत्सदन्यद्रूपादित्येतद्व्याचष्टे ॥ इतोन्यदिति ॥ ऐंद्रंप्राणमित्यत्रेंद्रसंबंधिनःप्रा णस्यैकस्यैवन्यचाख्यन्नित्युक्तंदर्शनमित्यन्यथाप्रतीतेर्व्याचष्टे ॥ ऐंद्रमिति ॥ प्राणेनमनसेत्यत्रविशेषणविशेष्यभावप्रतीतेराह

भा० । ऋचामाधिक्ययोगार्थंनांगीकर्तव्यमत्रतत् । प्रधानत्वाद्बृहत्यास्तुजगत्याद्यंनयुज्यते । संपादनाद्बृहत्यास्तुमुक्तोभवितुमीश्वरः । स्यात्प्रसिद्धःसुकीर्तिश्चछंदोमृत्युर्गुणाधिकः । इतिप्राहस्वयंविष्णुर्महिदासाभिधःप्रभुरित्यादिच । इतोन्यत्सत्किमित्याहुर्नानाछंदस्त्ववादिनः । अ न्यत्सद्रूपमित्याहुस्त्रिष्टुब्वादिनएवते । ऐंद्रंप्राणंपरमेश्वरसहितंवायुं ।

॥ प्राणेनमनसाचेति ॥ अभीत्यस्यव्यवहितेनान्वयंदर्शयति ॥ अभिइत्यस्यमानइति ॥ तस्यप्रतिपदं अभ्यस्यमानइति । अकारस्थानेइकारप्रापकमाह ॥ तृतीयइति ॥ योवर्णोभवितव्यस्थानेप्राप्तस्यतृतीयोवर्णोतिशयार्थेभवतीतिसूत्रार्थः । अतिशयितेर्थेतृतीयवर्णस्यसूत्रप्राप्तिमुक्त्वाप्रयोगमप्याह ॥ मथनादिति ॥ यद्यपिहिसिहिंसायामितिधातोःसिंहशब्दोनिष्पन्नः सिंहोवर्णविपर्ययादित्यभियुक्तवचनात्सिंहइतिरूपंच । तथापिसिंहशब्दस्यभगवतिवृत्तौसहमर्षणइतिधात्वंतरजत्वंचोपेत्यसहनात्सिंहइत्युक्तं । हत्वी हत्वा । आकारस्यतृतीयईकारइतिभावः । अभ्यस्यमानइत्यस्यप्रकृतोपयुक्तमर्थमाह ॥ अभीति ॥ तृतीयवर्णप्राप्तिनिमित्तमतिशयंव्यनक्ति ॥ बहुशइति ॥ कृत्स्नआत्मेत्येतद्व्याचष्टे ॥ कृत्स्नइति ॥ उक्तार्थेप्रमाणमाह ॥ एकापीति ॥ यद्यस्मादन्यछंदोभिधाप्रतिमामध्यमैवस्यात्तत्तस्माद्बृहत्येकाप्रतिमापिबहुप्रतिमानांछंदसांसकाशाद्वरेत्यर्थः । यद्वा छंदसांमध्येबृहत्येकापिविष्णोःपराप्रतिमा । यत् याऽन्यछंदोभिधाप्रतिमा । तत् सा मध्यमैवेत्यर्थः । ननुब्रह्मादिभिरनुष्टुभः श्रूयमाणत्वात्तस्याउत्तमत्वमित्यनुष्टुभमनुचर्चूर्यमाणमितिप्रमाणोदाहरणपूर्वंशिष्येणशंकितस्यमहिदासेनकिमुक्तंभवति प्रमाणस्यचकिंतात्पर्यमुक्तंभवतीत्यतआह ॥ एवमिति ॥ ब्रह्मादिभिःश्रूयमाणानुष्टुबपि एवं अकृत्स्नोह्येषआत्मा कृत्स्नोह्येषआत्मे

भा० । प्राणेनमनसाच । अभिइस्यमानोऽभ्यस्यमनः । तृतीयोतिशयइतिसूत्रादकारस्येकारः । मथनान्मिथिलोजातःसहनात्सिंहउच्यते । हत्वीदस्यूनित्यादिवच्च । अभ्यस्यमानोभितःक्षिप्यमाणोविषयेषुबहुशः । कृत्स्नआत्माकृत्स्नप्रतिमाविष्णोः । एकापिप्रतिमाविष्णोर्बृहतीछंदसांवरा । अन्यछंदोभिधायत्स्यात्प्रतिमामध्यमैवतदितिच । एवंब्रह्मादिभिःश्रूयमाणानुष्टुबपि

त्यादिनामध्यंछंदसांबृहतीत्यंतेनोक्तप्रकारेण । बृहत्याअंगंस्वस्यावरदेवताभिमतत्वादितरांगोत्पन्नत्वाच्छंदःप्रतिमायाअंगरूपत्वाच्च बृहत्यास्तुवाय्वभिमतत्वादंगित्वाच्चतस्याएवाधिक्यमितिमहिदासेनसमाधानमुक्तंभवति । बृहत्याएवाधिक्यमितिमंत्रतात्पर्यंचोक्तंभवति । कथं । एवमुक्तप्रकारेणब्रह्मादिभिःश्रूयमाणमपिबृहत्याएवांगंतदाकिमुवक्तव्यंतदाधिक्यमितिकैमुत्यसूचकत्वादितिभावः ॥ १७ ॥ प्रागभिमान्याधिक्यादिनाबृहतीसहस्रस्यकर्तव्यत्वमुक्तं । तदेवयुक्त्यंतरेणप्रसाध्यतेऽस्मिन्खंडे ॥ तस्यबृहतीसहस्रस्यैतस्यैवंसंपन्नस्यसतएकादशानुष्टुभांशतानिभवंति । पंचविंशतिश्चानुष्टुभोभवंति । तत्तस्मादक्षराधिक्यादुक्तप्रकारेणसंपन्नंसंपादितमिदंबृहतीसहस्रमेवसंपन्नं वरं कथंबृहतीसंपादनेऽनुष्टुबाधिक्यमित्यतउक्त मात्तमिति ॥ भूयसाकनीयोल्पमात्तमंतर्भावितं । किंचयद्यनुष्टुप्सहस्रस्यैवशंसनीयत्वं तर्ह्यनुष्टुभोबृहतीसंपादनंकर्तव्यमितिश्रौतंवचनंनस्यात्तेनज्ञायते बृहतीसहस्रस्यैवशंसनीयत्वमितिभावेनोच्यते ॥ तदुक्तमिति ॥ यद्वातद्वै तथोक्तप्रकारेणानुष्टुभान्येनवाछंदसासंपन्नमिदंबृहतीसहस्रं पुनःपंचविंशोत्तरैकादशशतानुष्टुप्संपन्नंचेत्तदाविष्णोर्बृहतीप्राणाख्यमनुष्टुबुमाख्यंप्रतिमाद्वयंसंपादितंस्यात्तथाचवायोरपिबृहत्यनुष्टुबुमाख्यंप्रतिमाद्वयंसंपादितंस्याद्वायोरुमोत्पत्तिज्ञानंचसंपादितंस्यादतस्तथाशंसनीयमितितद्वाइदमित्यादेरर्थस्तत्रप्र

भा० । बृहत्याअंगमितिबृहत्याएवाधिक्यमुक्तंभवति ॥ ५ ॥

उप० । तद्वाइदंबृहतीसहस्रंसंपन्नंतस्यवाएतस्यबृहतीसहस्रस्यसंपन्नस्यैकादशानुष्टुभांशतानिभवंतिपंचविंशतिश्चानुष्टुभआत्तंवैभूयसाकनीयः

माणमुच्यते ॥ तदुक्तमिति ॥ वाचमष्टापदीमहंनवस्रक्तिमृतस्पृशं । इंद्रात्परितन्वंममे । इति मंत्रस्यायमर्थः । ऋतं शश्वदे कप्रकारं । नित्यमितियावत् । पूर्वावगतवत्सदा । स्थितेर्ब्रह्मर्तमित्युक्तमितिवचनात् । यद्वाऋतं यथार्थज्ञानस्वरूपं । ऋतंयथा र्थविज्ञानमितिवचनात् । तंभगवंतमृग्रूपेणस्पृशतिप्रतिपादयतीतिऋतस्पृश मष्टापदीमष्टचतुरक्षरां वाचमनुष्टुभं नवस्रक्तिं ऋ गंतराच्चतुरक्षरसंयोजनेननवधाविभक्तांबृहतींकुर्वन्अहमिंद्रादिंद्रस्यैंद्रस्यप्राणस्यचबृहत्याख्यांतन्वं प्रतिमांपरिममेनिर्मितवान् स्थापितवानस्मि । तथाचपुनर्नवस्रक्तिंबृहतीमष्टापदींवाचंकुर्वन्अहमिंद्राद्बृहतीप्रतिमाकवायुप्रतिमाकाद्विष्णोरैंद्रात्प्राणाच्चानु ष्टुब्भिमानिन्याउमायास्तन्वंशरीरंपरिममे शरीरलाभलक्षणोत्पत्तिंज्ञातवानस्मि । ततश्चोमायाअपिभगवत्प्रतिमात्वाद्भगवतो प्युमाख्यांतन्वंप्रतिमांपरिममे प्रतिष्ठितवानस्मि । वाचमष्टापदीमित्याद्यनूद्यव्याक्रियते ॥ वाचमित्यादिना ॥ अष्टौहिचतु रक्षराणिभवंत्यनुष्टुभइतिशेषः ॥ बृहतीति ॥ अनुष्टुप्चतुरक्षरसाहित्येनबृहतीसंपद्यमानानविभक्ताभवतीत्यर्थः॥सत्यमिति॥ वागनुष्टुबृचाऋग्रूपेणसत्यंनित्यं सनातनंसत्यमितिनित्यमित्युच्यतेबुधैरितिवचनात् । यथार्थज्ञानरूपंवाभगवंतंस्पृष्ट्वा विषयीकु र्वंतीतियावत् ॥ तद्यदैवैतदिति ॥ तदनुष्टुप्छंदोबद्धंऋग्जातंयदैवैतद्बृहतीसहस्रंसंपन्नंतदातस्मादेवहेतोरिंद्रस्यविष्णोरैंद्रस्यप्रा णस्यचबृहत्यैबृहत्याख्यांतन्वंप्रतिमांसंनिर्मिमीतेस्थापयतीत्यर्थः । तथातदनुष्टुभासंपन्नंबृहतीसहस्रंयद्यस्माद्यदानुष्टुप्संपन्नंभव

उप० । तदुक्तमृषिणावाचमष्टापदीमहमित्यष्टौहिचतुरक्षराणिभवंतिनवस्रक्तिमितिबृहतीसंपद्यमानानवस्रक्त्यृतस्पृशमितिसत्यंवैवागृचा स्पृष्टेंद्रात्परितन्वंममइतितद्यदैवैतद्बृहतीसहस्रमनुष्टुप्संपन्नंभवति

॥ ९९ ॥

ति तदातस्मादेवहेतोर्बृहत्यै बृहत्याः बृहतीप्रतिमाकादैंद्रात्प्राणात् । उपलक्षणमेतत् प्राणाधिष्ठितादिंद्राद्विष्णोश्चानुष्टुभमनुष्टु ब्देवतांवाचमुमांसन्निर्मिमीते ताभ्यामियमुत्पन्नेतिस्मरतीतियावत् । ततश्चविष्णोर्वायोश्चोमाख्यांतन्वंप्रतिमां संनिर्मिमीते प्र तिष्ठापयतीत्यर्थः । बृहतीसहस्रस्याकारव्याख्यानरूपत्वेनोत्पन्नत्वात्तच्छंसनमेववरमितिभावेनोच्यते ॥ सवाएषइत्यादिना॥ यदेतन्महदुक्थंबृहतीसहस्राख्यं सवाएषवाचो कारस्य परमोविकार उत्तमाव्याख्या । नन्वकारस्यकोतिशयस्तस्यव्याख्यानं चकियद्विधं यन्मध्येपरमविकारत्वमुक्थस्येत्यतउच्यते ॥ तदेतत्पंचविधमित्यादिना ॥ अकारोवैसर्वावागित्यंतेन ॥ तदेतदकारव्याख्यानमुक्थेनसहपंचविधं । कथं मितममितंस्वरःसत्यानृतेइति । मितादिकंविविच्योच्यते ॥ ऋगित्यादिना ॥ स्वरनियमवतीवागृक् । तद्रहितामिताक्षरावाग्गाथा । परस्परमसमानविषमसंख्याकाक्षराणिखंडवाक्यानिकुंब्याः । इतियत्रि विधंतन्मितं । यज्ञांगंवाक्ययंयजुः । वाक्यमात्रंनिगदः । स्तोभाक्षराणिवृथावाक् । तदेतदमितं । यत्सामाथोयःकश्चनगेष्णः गानंसस्वरः । ॐमितियदक्षरंतत्सत्यं । नेतियदक्षरंतदनृतं । ॐकारस्याकारव्याख्यानरूपत्वंप्रपंच्यते ॥ तदेतदिति ॥ य त्सत्यमकारस्यादौपठ्यमानत्वेनव्याख्येयाव्यभिचारित्वात्सत्यमोंकारस्तदेतत्वाचे ऽकारस्य पुष्पंफल मुकारादिविकारसहि तत्वात्पुष्पफलात्मकश्च । पुष्पफलयोर्वृक्षविस्ताररूपत्ववदकारव्याख्यानगर्भोंकारादिगर्भत्वात्पुष्पफलात्मकइतिभावः । ओंकार

उप० । तस्मात्तदैंद्रात्प्राणाद्बृहत्यैवाचमनुष्टुभंतन्वंसंनिर्मिमीतेसवाएषवाचःपरमोविकारोयदेतन्महदुक्थंतदेतत्पंचविधंमितममितंस्वरःस त्यानृतेइत्यृग्गाथाकुंब्यातन्मितंयजुर्निगदोवृथावाक्तदमितंसामाथोयःकश्चगेष्णःसस्वरओमितिसत्यंनेत्यनृतंतदेतत्पुष्पंफलंवाचो

स्यसत्यत्वमोमितिवक्तुर्महाफलेनसंभावकेनोच्यते ॥ सहेति ॥ योकारस्यवाचःपुष्पफलरूपंसत्यमोंकारंवदति सयशस्वीकल्याणकीर्तिर्भवितोर्भवितुंमोक्षंप्राप्तुमीश्वरश्चस्यात् । नन्वनृतस्यकथमकारव्याख्यानरूपत्वमित्यतउच्यते ॥ अथेति ॥ यद्यपियन्नेत्येतदनृतमसत्यं व्याख्येयाकारस्यनकारात्परंश्रवणेनायथास्थितं । अथ तथापि । एतद्वाचोकारस्यनिषेधार्थकस्यकिंचिन्मूलं तदेकदेशार्थप्रकटनात् । यद्वा वाचःसर्वासांवाचां मूलं किंचिन्मूलं निषेधवाच्यकारेणैकार्थत्वादित्यर्थः । नकारस्यनिषेधार्थकत्वं । नेति तद्वक्तुःफलनिषेधेन प्रत्युतविपरीतफलेनचसंभावकेनोपपाद्यते ॥ तद्यथेति ॥ वृक्षोमृदुपगमनेनाविर्मूलः प्रकटितमूलः । शुष्यति सशुष्कोवृक्षउद्वर्तते पतति । तन्निदर्शनंयथा । एवमेवानृतंवदन् । वाङ्मूलभूतमनृतंनकारंज्ञानादियोग्यायप्रकटयन्नौपदिशे तत्वं नदास्येऽन्नादिकमितिचवदन्नात्मानमाविर्मूलंकरोति स्वयोग्यताव्यंजनेनप्रकटितमूलंकरोति । सशुष्यति प्राग्विद्यमानधर्मज्ञानापनयेनगतसारोभवति । सउद्वर्तते नरकादिकंप्राप्नोति । तस्मादेवमनर्थप्राप्तेरनृतंनवदेन्नेतिनवदेत् । एतेनकारणेनदयेतदयांकुर्यादेव । नन्वेवंतर्हिनकारवचनस्यानर्थहेतुत्वादेतादृशमिदंकथंपुरुषार्थहेत्वकारव्याख्यानंस्यादित्यतोनेतिवचनंस्वस्यपूर्णत्वस्यापिकारणमित्यकारव्याख्यानंभवत्येवेतिवक्तुं यद्यनृतंनवदेत्तर्हिसर्वान्प्रतिनेत्यनुक्त्वाज्ञानादिकंदास्यइतिसर्वमोंकुर्यात्किमित्यतोनेत्युच्यते ॥ परागिति ॥ यदोमित्यक्षरमेतत्पराग्बहिर्मुखमयोग्येभ्यउदाहृतंचेद्रिक्तं स्वस्यरिक्त

उप० । यत्सत्यंसहेश्वरोयशस्वीकल्याणकीर्तिर्भवितोःपुष्पंहिफलंवाचःसत्यंवदत्यथैतन्मूलंवाचोयदनृतंतद्यथावृक्षआविर्मूलःशुष्यतिसउद्वर्ततएवमेवानृतंवदन्नाविर्मूलमात्मानंकरोतिसशुष्यतिसउद्वर्ततेतस्मादनृतंनवदेद्दयेत्तत्वेनेनपराग्वाएतद्रिक्तमक्षरंयदेतदोमिति

त्वकारणं । अयोग्येभ्योज्ञानमन्नादिकंवादास्यइतिवचनंनजन्मांतरेस्वस्यहान्यापादकं किंतुतदैवेत्युच्यते ॥ तद्यदिति ॥ यत्किंच यत्किंचित्तज्ज्ञानंद्रव्यादिकंवास्वकीयमयोग्येभ्यऽमित्याह ददामीतिब्रूयादत्रैव तदैव तदस्मैरिच्यतेऽस्मादपगच्छति । ज्ञानंक्षीयते । द्रव्यंचतेनदोषेणचोरादिभिरपहियतइतिभावः । यद्येवंप्रतिज्ञामात्रेणहानिस्तदाकिमुवाच्यंदानेनेत्युच्यते ॥ सयदिति ॥ सयदिसर्वं सर्वान्प्रति योग्यायोग्यसाधारण्येनस्वस्यविद्यमानंयत्किंचिदोंकुर्याद्दद्यात्तदात्मानंरिच्याद्रिक्तंकुर्यात्सकामेभ्यःस्वेष्टपुरुषार्थेभ्योनालंस्यात्समर्थोनस्याद्यस्मादेवमथ तस्मादयोग्येभ्योयन्नदास्येज्ञानादिकमितिवचनं तदभ्यात्मं आत्मनःप्रतिपूर्णं । स्वस्यपूर्णत्वकारणं । यथायोग्यायोग्यसाधारण्येननोंकुर्यात्तथानेतिचनब्रूयात्किंत्वयोग्यंप्रत्येवनेतिब्रूयात्योग्यं प्रतिनेतिनब्रूयादितिभावेनयोग्यंप्रतिनेतिवचनेपूर्वोक्तदोषादकीर्तिलक्षणंदोषांतरमुच्यते ॥ सयदिति ॥ सयदिसर्वंयोग्यायोग्यसाधारण्येनसर्वान्प्रतिनेतिब्रूयादस्यदुष्कीर्तिर्जायते । सापकीर्तिरेनंतत्रैव तदैव । हन्याद्धतप्रायंकुर्यात् । संभावितस्यचाकीर्तिर्मरणादतिरिच्यतइतिहिभगवद्वचनं । तस्मान्नेत्युक्तेरनर्थहेतुत्वात्पुरुषार्थहेतुत्वाच्चपुण्यकालेसत्पात्रेभ्योदद्यादेवपुण्येपिकालेऽपात्रेभ्योनदद्यात्तस्माल्लोकेविवेकीजनःसत्यानृतेमिथुनीकरोति । तयोर्मिथुनीकरणात्प्रकृष्टोजायते । सएषवाचःपरमोविकार

उप० । तद्यत्किंचोमित्याहात्रैवास्मैतद्रिच्यतेसयत्सर्वमोंकुर्याद्रिच्यादात्मानंसकामेभ्योनालंस्यादथैतत्पूर्णमभ्यात्मंयन्नेतिसयत्सर्वंनेतिब्रूयात्पापिकास्यकीर्तिर्जायेतसैनंतत्रैवहन्यात् तस्मात्कालएवदद्यात्कालेनदद्यात्तत्सत्यानृतेमिथुनीकरोतितयोर्मिथुनात्प्रजायते

इत्यादिवेत्तुःफलमुच्यते ॥ भूयानिति ॥ यस्यावाचः अकारस्यैव । बृहतीसहस्रलक्षणःशब्दसमूहोमुख्यामुख्यलक्षणोविकारः । योवैतांवाचमकारंवेदससंप्रतिवित्सम्यग्ज्ञानी भूयात्पूर्णोभवतीत्यर्थः । पंचविधशब्दराशेरकारव्याख्यानरूपत्वेश्रौतं लिंगमुच्यते ॥ अकारोहवेति ॥ अकारःसर्वावागितिहवैश्रुतिरस्ति । नचमुख्यतःसर्वाभिर्वाग्भिरकारस्यैक्यंयुक्तमतःसैषाकाराख्यावाक्स्पर्शोष्मभिर्व्याख्यानरूपैर्व्यज्यमाना व्यज्यमानार्था बह्वीपंचविधा नानारूपा वेदपंचरात्रादिविलक्षणरूपाचभवतीत्यंगीकार्यं । व्याख्यानव्याख्येययोरभेदोपचारात् । अतोयुक्तमकारविकारत्वंसर्ववाचामितिभावः । सर्वोत्तमाभ्यांवाणीप्राणाभ्यामभिमतत्वाच्चाकाशस्योत्तमत्वमितिभावेनोच्यते ॥ तस्यैयदुपांश्वित्यादिना ॥ तस्यै तस्याः । यदुपांशूच्चारणं स तस्याभिमानी प्राणः । यदुच्चैरुच्चारणंतत्तस्यस्थूलसूक्ष्मात्मकसर्वशरीराभिमानिनी । यदुपांश्वित्यत्रज्ञापकमुच्यते॥तस्मादिति॥ यस्मादुपांश्वभिमानिचेतनमशरीरंतस्मात्तदुपांशूच्चारणंतिरइवतिरोभूतमिव । अशरीराभिमतत्वेतिरोभूतत्वंकुतइत्यतउक्तं ॥ तिरइवह्यशरीरमिति ॥ अशरीरमप्रत्यक्षमिवेत्यर्थः । किमशरीरमित्यतउक्तमशरीरोहीति ॥ यदुच्चैस्तच्छरीरमित्यत्रज्ञापकमुच्यते ॥ अथेति ॥ यद्यस्मादुच्चैरुच्चारणस्यशरीरंभारत्यभिमानिनीतस्मादेवतदुच्चैरुच्चारणमाविः स्पष्टंज्ञायते । भारत्यभिमतत्वमात्रेणकथमाविर्भूतत्वमित्यतउक्तमाविर्हीति ॥ शरीराभिमानिनीभारतीप्राणापेक्षयाविराविर्भूताव्यक्ताखलु । अव्य

उप० । भूयान्भवतियोवैतांवाचंवेदयस्याएषविकारःससंप्रतिविदकारोवैसर्वावाक्सैषास्पर्शोष्मभिर्व्यज्यमानाबह्वीनानारूपाभवतितस्यैय दुपांशुसप्राणोथयदुच्चैस्तच्छरीरंतस्मात्तत्तिरइवतिरइवह्यशरीरमशरीरोहिप्राणोथयदुच्चैस्तच्छरीरंतस्मात्तदाविराविर्हिशरीरं ॥ ६ ॥ ॥ १०१ ॥

क्तस्वभावंस्वातंत्र्येणब्रह्म । तदव्यक्तमाहहीतिहिभगवद्वचनं । श्रीरप्यव्यक्तस्वभावा । तदुक्तंगीतातात्पर्ये । सूक्ष्मत्वादवितर्क्यत्वाद्गुणबाहुल्यतस्तथा । अनिर्देश्यौतथाव्यक्तावचिंत्यौश्रीश्चमाधवइति । इयांस्तुविशेषः । श्रीःपरतंत्रत्वाद्भगवदिंद्रियाभिव्यक्ता नत्वीश्वरवत्स्वेतरसमस्तेंद्रियागोचरत्वलक्षणमुख्याव्यक्तत्वयुता । प्राणस्तुस्वावरेंद्रियागोचरोपिरमातआधिक्येनस्वसमब्रह्मेंद्रियगोचरत्वादव्यक्तमिव नत्वव्यक्तस्वभावः । भारतीतुजीवेष्वपिब्रह्मवायुसरस्वत्याख्यत्रींद्रियगोचरत्वात्प्राणवन्मुख्याव्यक्तत्वाभावादाविर्हीत्युक्तेतिभावः ॥ ७ ॥ तस्यवाएतस्येत्येतद्बृहतीसहस्रशंसनस्यकर्तव्यत्वेहेतुत्वेनव्याचष्टे ॥ बृहतीति ॥ तद्वाइदमितिप्रथमवाक्यंसाध्यपरतयाव्याचष्टे ॥ अतइति ॥ तदित्यस्यतस्मादित्यर्थमभिप्रेत्यप्रतिपदमतइति । आधिक्यादनुष्टुबाधिक्यलाभात् । संपादनं शंसनं । आत्तंवेत्यस्यार्थः ॥ तस्यात्रैवेति ॥ यथानुष्टुभोबृहत्यामंतर्भावस्तथाबृहत्याअपिजगत्यादावंतर्भावात्तच्छंसनमेववरमित्यतोमूलोक्तंवरत्वंनाक्षराधिक्यमात्रंकिंत्वभिमान्याधिक्यमर्थाधिक्यादिकंचेत्याह ॥ जगतीति ॥ तदुक्तमृषिणा वाचमष्टापदीमित्येतद्बृहतीशंसनस्यवरत्वेयुक्त्यंतरपरत्वेनव्याचष्टे ॥ वाचमिति ॥ बृहतीसंपादनमेववरमित्यनुवर्तते । अनुष्टुप्सहस्रस्यैवशंसनीयत्वेताभिर्बृहतीसंपादनोक्तिवैयर्थ्यादितिभावः । यद्वानुष्टुप्सहस्रमात्रशंसनेउमालक्ष्मीरैकप्रतिमास्थापनं ताभिर्बृहतींसंपाद्यपुनर्बृहत्यानुष्टुप्त्वेनस्मरणेतूमावायुलक्षणप्रतिमाद्वयंस्थापनगुणलाभादेवमेववृहतीशंसनं

भा० । बृहतीसंपादनेनानुष्टुप्शंसनमात्रात्पंचविंशोत्तरशतानुष्टुबाधिक्यंचभवति । अतआधिक्याद्बृहतीसंपादनमेववरं । तस्यात्रैवांतर्भावात् । जगत्यादिकंत्वधिकत्वेपिबृहतीवन्माहात्म्याभावादेवोपेक्ष्यते ।

कार्यमिति तद्वाइदमित्यादिनोक्त्वा तदुक्तमृषिणेत्युक्तस्यार्थमाह ॥ वाचमिति ॥ अनुष्टुभइतिपंचमीषष्ठीच । अनुष्टुभःस काशाद्बृहत्याःसंपादनवचनात् अनुष्टुभांबृहत्यासंपादनवचनाच्चेत्यर्थः । अष्टौहिचतुरक्षराणीत्येतद्व्याचष्टे ॥ अष्टेति ॥ बृहती संपाद्यमानेत्यस्यार्थमाह ॥ तस्याएवेति ॥ सत्यंवैवागृचास्पृष्टेत्येतद्व्याचष्टे ॥ ऋचेति ॥. नेयंकरणेतृतीया किंत्वित्थंभूतलक्ष णइतिभावेनऋग्रूपेणेत्युक्तं । सत्यरूपं नित्यरूपं । निर्दोषज्ञानरूपंवा । सदेर्गत्यर्थत्वात् । तद्यदैवैतदित्यस्य तदनुष्टुब्यदैतद्बृह तीसहस्रंसंपन्नं तदैंद्रात्प्राणादैंद्रस्यप्राणस्य बृहत्यैव बृहत्याख्यां तन्वं संनिर्मिमीतइत्यर्थमभिप्रेत्यव्याचष्टे ॥ इंद्रस्येति ॥ एते नैंद्रात्प्राणादितिपंचमीषष्ठ्यर्थे बृहत्याइतिचतुर्थींद्वितीयार्थेइत्युक्तंभवति । मंत्रेष्टापदींनवस्रक्किंकुर्वन्नहमिंद्रादिंद्रस्यविष्णोस्तन्वं प्राणाख्यामतएवबृहतीसहस्राख्यांचतन्वंसनिर्मिमीतइत्यर्थस्यस्फुटत्वादुपनिषद्येवमर्थस्यानुक्तत्वेपिस्वयमाह ॥ सचवायुरि ति॥ तस्माद्बृहतीप्रतिमाकवायुप्रतिमाकत्वात् । अथतद्यदैतदित्यादेस्तदनुष्टुभासंपन्नमेतद्बृहतीसहस्रंयस्माद्यदापुनरनुष्टुप्संपन्नं भवतितदातस्मादेवहेतोर्बृहत्यैबृहतीप्रतिमाकादैंद्रात्प्राणादनुष्टुभंवाचमनुष्टुबभिमानिनीमाख्यांवाचंनिर्मिमीतइत्यर्थांतरमाह ॥

भा० । वाचमष्टापदीमहमित्यनुष्टुभोबृहतीसंपादनवचनाच्च । अष्टचतुरक्षराण्यनुष्टुप् । तस्याएवबृहतीसंपादनेनवस्रक्तयोभवंति ।ऋचा वागृग्रूपेणवागृतंस्पृष्टासत्यरूपंविष्णुंस्पृष्टाभवति । इंद्रस्यपरमेश्वरस्यविष्णोःसंबंधीनितरांप्रियत्वाद्यःप्राणदेवतावायुस्तस्यप्रतिमारूपमिदंबृहतीस हस्रं । सचवायुर्विष्णोर्मुख्यप्रतिमा ।

तस्मादित्यादिनैवंजानतइत्यंतेन ॥ तस्माद्यस्माद्वायोःप्रतिमारूपमिदंबृहतीसहस्रंतस्मादित्यर्थः । तस्यैवानुष्टुभएव । ननुबृ हतीरनुष्टुप्त्वेनशंसितुःकथमुमोत्पादकत्वंस्मृतंभवतीत्यतउक्तं ॥ एवमिति ॥ बृहतीदेवतावायुः अनुष्टुप्देवतोमेत्येवंजानत इत्यर्थः । वाचमित्यनुक्त्वातन्वमित्युक्तेरभिप्रायमाह ॥ ततश्चेति ॥ उमायाउत्पत्तेःसंस्मृतत्वादेव । वायोरुमोत्पत्तिज्ञानेवि ष्णुप्रतिमास्थापनंकथमित्यतउक्तमेतत्सर्वमिति ॥ वक्ष्यमाणंसर्वं । मंत्रेनवस्रक्किंबृहतीमष्टापदीमनुष्टुभंकुर्वन्नहंबृहतीप्रतिमा कात्प्राणाधिष्ठितादिंद्राद्विष्णोर्वाक्छब्दोदितोमाख्यांतन्वंसंनिर्मिमीतइत्यर्थस्यस्फुटत्वादुपनिषद्येवमर्थस्यानुक्तत्वेपिस्वयमर्थवक्तु माह ॥ विष्णुरेवेति ॥ प्राणस्यबृहत्याः प्राणाभिमन्यमानायाःबृहत्याः । यद्वाबृहत्याः बृहत्यभिमानिनःप्राणस्येत्यर्थः । वि ष्णोरधिष्ठातृत्वंनेतरेषामिवाभिमानित्वेनेतिभावेनोक्तं प्रतिमेति ॥ प्रतिमांप्रतिमांतःस्थांध्यायेत्तेजोमयीमित्याद्युक्तप्रकारेणबृह तीप्रतिमा तदंतःस्थाप्राणप्रतिमा तत्राधिष्ठितोवासुदेवइतिभावः । अस्त्वेवं ततश्चकिमित्यतोयदानवस्रक्त्यष्टापदीभवति तदें द्रात्परितन्वमित्येतद्योजयति ॥ तस्मादिति ॥ विष्णोर्बृहत्यधिष्ठातृत्वादित्यर्थः । तस्मादेव विष्णोरेव । ननुमंत्रेऽहंवाचंतन्वं

भा० । तस्माद्विष्णोरेवप्रतिमाबृहतीसहस्रं । तस्मात्तस्यैवबृहतीसहस्रत्वेनसंपन्नस्यपंचविंशोत्तरैकादशशतानुष्टुप्त्वेनसंपादनेबृहतीदैवतप्रा णरूपाद्वायोरनुष्टुब्देवतायावाग्रूपायाउमायाउत्पत्तिःसंस्मृताभवत्येवंजानतः । ततश्चोमायाअपिभगवत्प्रतिमात्वाद्विष्णुप्रतिमास्थापकएवभवत्येत त्सर्वंसम्यग्ध्यायन्। विष्णुरेवबृहत्याःप्राणस्याधिष्ठातृदेवता। प्रतिमाधिष्ठितदेवतावत् । तस्माद्बृहत्याःसकाशादनुष्टुप्संपादनेतस्यैवविष्णोःप्रतिमांतरं

परिममेनिर्मितवानस्मीतिमंत्रद्रष्ट्रोक्तत्वात्कथंप्रतिमांतरंतस्मादेवनिर्मितमितिव्याक्रियतइत्यतआह ॥ अतएवेति ॥ अतएव निर्माणस्यभगवत्कर्तृत्वादेवेत्यर्थः । अन्यथेंद्रस्येत्येवावक्ष्यदितिभावः । अहंनिर्ममइत्युक्तिस्तु भगवतोमाख्याप्रतिमानिर्मितेति ज्ञानमादाय प्रतिमास्थापनफलमादायवोपपन्नेतिज्ञेयं । ननुभवत्वनुष्टुब्देवतायाउमायाःनिर्माणंभगवता उपासकस्यतदयोगात् । अभिमन्यमानानुष्टुप्संपादनंतुबृहत्याएवानुष्टुब्त्वेनपर्यवसानात्तयैववा तथास्मर्त्रावायुज्यते । तथाचेंद्रादितिपंचम्ययुक्तेत्यतआह ॥ बृहतीस्थेति ॥ नतुबृहतीशक्त्यापुंशक्त्यावेत्येवार्थः । तथाचतदापींद्रादित्युपपन्नमितिभावः । कैमुत्यन्यायेनबृहत्याएवानुष्टुब्त्वेनभवनमित्येतत्प्रतिक्षिपति ॥ सहीति ॥ संसर्गबोधकत्वमादिपदार्थः । किमुतद्वतांप्रतिमांतरभवनयोग्यतामित्यपेरर्थः । तर्हिवायोर्बृहत्यभिमानित्वभंगइत्यतआह ॥ तत्प्रसादादिति ॥ तत्प्रसादादितिकुतःस्वातंत्र्येणेतिकिंनस्यादित्यतोज्ञापकमाह ॥ वायुरेवेति ॥ वायुर्यस्माद्भगवन्नियतएवनियामयति तस्मादिंद्रात्परीत्यस्योपलक्षणत्वविवक्षयेंद्रात्प्राणाच्चेतिवक्तव्येऐंद्रात्प्राणादितींद्रनियमितात्प्राणादित्युक्तमितिभावः । वायुर्नियामयतीतिकथमवगतमित्यतोवाह ॥ वायुरेवेति ॥ यस्माद्वायुर्नियामयत्येवतस्मादित्युपलक्षणमित्यभिप्रेत्यैंद्रात्प्राणादितिलक्षणाबीजसंबंधप्रदर्शनपूर्वंव्याख्याकृतेत्यर्थः । तद्वाइदंबृ

भा० । तस्मादेवनिर्मितंभवति । अतएवेंद्रात्परितन्वंममेत्युक्तं । बृहतीस्थविष्णोर्बलादेवतत्संपद्यते । सहितस्याःषट्त्रिंशदक्षरादित्वमपिनियमयतितत्प्रसादाद्वायुश्च । वायुरेवयद्भगवन्नियतोनियमयतितस्मादिंद्रात्परीत्यस्यैंद्रात्प्राणादितिव्याख्याकृता ।

हतीसहस्रमित्यादिना तद्वैतथावै उक्तप्रकारेणानुष्टुबादिभिःसंपन्नमिदंबृहतीसहस्रंपुनरनुष्टुप्संपन्नंचेत्तदाविष्णोर्बृहतीप्राणाख्यमनुष्टुबुमाख्यंप्रतिमाद्वयंसंपन्नं संपादितंस्यात्तथावायोरपिबृहत्याख्यमनुष्टुबाख्यंप्रतिमाद्वयंसंपादितंस्याद्वायोरुमोत्पत्तिज्ञानंचसंपादितंस्यादित्युक्तेर्थेवाचमष्टापदीमितिमंत्रउदाहृतः तंस्पष्टस्मृत्याव्याचष्टे ॥ यावदित्यादिना ॥ सर्वगतः बृहत्यादिसर्वगतः । ऐंद्रात्प्राणादित्यस्यतात्पर्यं तथावायोरिति ॥ उभयोर्बृहत्याख्यैकप्रतिमात्वेसाम्यंस्यादित्यतआह ॥ वायुरिति ॥ बृहत्यांवायुर्वायौविष्णुरितिभावः । वायोर्भगवत्प्रतिमात्वेयुक्ति स्तस्मादिति ॥ वायोःप्रतिमात्वादेवतेनयत्कृतंतत्तदधिकं चसर्वंतेनक्रियतइत्यर्थः । एवमनुष्टुबादिभिःसंपन्नंबृहतीसहस्रंविष्णोर्वायोश्चप्रतिमाभूतंसंपन्नमित्यंशं मंत्रेचाष्टापदींवाचंनवस्रक्तिंकुर्वन्नहमिंद्रस्यविष्णोर्वायोश्चबृहत्याख्यांतन्वंसंनिर्मितवानित्यंशंचव्याख्याय बृहतीसहस्रंपुनरनुष्टुप्संपन्नंचेत्तदावायोरुमोत्पादनज्ञानंसंपादितंस्याद्विष्णोर्वायोश्चानुष्टुबुमाख्यप्रतिमापिसंपादितास्यादित्यंशं मंत्रेचनवस्रक्त्यष्टापदींकुर्वन्निंद्रस्यवायोश्चोमाख्यांतन्वंसंनिर्ममइत्यंशंचव्याख्याति ॥ बृहतीसहस्रमित्यादिना ॥ द्वितीयप्रतिमा बृहतीस्थप्राणापेक्षया । तदुपपादनं

भा० । यावत्सहस्रंबृहतीतावच्छंसेदनुष्टुभा । छंदसावातदन्येषांबृहतीत्वंस्मरेत्ततः । तेनसर्वगतोविष्णुःसर्वस्मादधिकोर्चितः । भवेदेवं जानतस्तुकृताचप्रतिमाभवेत् । तथावायोरपिकृतावायुर्हिप्रतिमाहरेः । तस्माद्वायुकृतंसर्वंक्रियतेविष्णुनैवहि । बृहतीसहस्रंसंपन्नमेकादशशतंपुनः । अनुष्टुभांस्मरेत्पंचविंशोत्तरमुदारधीः । तेनवायोरुमोत्पत्तिःसम्यग्ज्ञानात्स्मृताभवेत् । ततोद्वितीयप्रतिमाविष्णोरेवकृताभवेत् ।

विष्णुनेति ॥ विभागः स्रक्तिरित्यादिशब्दैःकथ्यतइत्यर्थः । सवाएषवाचःपरमोविकारइत्यत्रवाक्पदेनवाचमनुष्टुभमितिप्रस्तुतानुष्टुभोग्रहणंप्रतीयते तदयुक्तं । तथात्वेबृहतीसहस्रस्यानुष्टुबवरत्वप्राप्तेरित्यतःसवाएषवाचःपरमोविकारोयदेतन्महदुक्थमित्येतद्व्याचष्टे ॥ सवाएषइति ॥ नन्वकारस्यकोतिशयोयतस्तद्व्याख्यानेषूत्तमत्वमात्रेणबृहतीसहस्रस्यैवशंसनीयत्वमित्यतआह ॥ अकारइति ॥ प्रथमं मुख्यं । कथमकारस्यमुख्यनामत्वमित्यतस्तद्विरुद्धतदन्यतदभाववाचित्वादितिभावेनोक्तं सर्वगुणानित्यादि ॥ गुणानांसर्वदोषविरुद्धत्वात्सर्वगुणान्ब्रुवन्नित्यर्थः । ततश्चकिमित्यतउक्तं सम्यगिति ॥ सम्यग्वक्तृत्वतः अकारोमुख्यनाम । सम्यग्वक्तृत्वेहेतुस्तस्मादिति ॥ उक्तरीत्यासर्वदोषविरुद्धगुणादिविशिष्टयावद्ब्रह्मप्रतिपादनशक्तित्वादितिभावः । एतेनसवाएषवाचइत्यत्रवाक्पदमकारेमुख्यमितितस्यैवग्रहणमितिसूचितं । शब्दांतरस्यापिगुणपूर्त्यादिप्रतिपादकत्वात्कोस्यविशेषइत्यतआह ॥ तदर्थानिति ॥ केचिद्गुणान् केचिद्दोषाभावं गुणेष्वपिकेचित्कांश्चिदित्येकदेशेनेत्यर्थः । विकार

भा० । विष्णुनानुप्रविष्टौयदुमावायुश्चतद्वशावित्यादिच । स्रक्तयोविभागाः स्रक्तिरंशोविभागश्चविदलंचेतिकथ्यतइतिशब्दनिर्णये । सवाएषवाचःपरमोविकारः । अकाराख्यवाग्विकारेषूत्तमोबृहतीसहस्राख्यः । अकारःप्रथमंनामविष्णोःसर्वगुणान्ब्रुवन् । सर्वदोषविरुद्धत्वाद्गुणनामन्यतामपि । विष्णोर्वेदतिजीवेभ्योजडेभ्यश्चैवसर्वदा । अभावंचैवदोषाणांसर्वेषांकेशवेवदेत् । [illegible]कारोमुख्यनामहि । तदर्थानेकदेशेनशब्दाःसर्वेपिचोचिरे ।

स्तत्परिणामविशेषइतिप्रतीतेर्व्याचष्टे ॥ व्याख्येति ॥ सवाएषवाचइत्यत्रपदार्थमुक्त्वावाक्यार्थमाह ॥ वाचकेष्विति ॥ परमोविकारइत्यस्यार्थः पराव्याख्येति ॥ परमशब्दव्यावर्त्यकथनं अन्येति ॥ नतूक्थवन्मुख्यव्याख्यानत्वेनेतिभावः । तदेतत्पंचविधंमितममितमित्यत्रमहदुक्थस्यैवपरामर्शप्रतीतेर्व्याचष्टे ॥ एषामिति ॥ एषामकारव्याख्यानानांमध्ये तदुक्थंपरमंतदेतत्पंचधास्थितमित्यस्यैवविवरणं व्याख्यानमिति ॥ उक्थेनसहैवस्थितंसर्वशः सर्वमेवाकारस्यव्याख्यानं । मितामितेस्वरःसत्यमनृतंचेतिपंचधास्थितमित्यर्थः । पंचविधशब्दराशेरकारव्याख्यानत्वेश्रौतलिंगप्रतिपादकमकारोवैसर्वावाक्सैषास्पर्शोष्मभिरित्येतद्व्याचष्टे ॥ तस्मादिति ॥ यस्मात्तस्याकारस्यसर्ववेदादिविस्तरोव्यक्तिरूपोव्याख्यानरूपस्तस्मादकारःसर्वावागित्यादिश्रुतौ अकारःसर्ववागात्मेत्यादिस्मृतौचाकारःसर्ववागात्मकःश्रुतः प्रसिद्धः व्याख्यानव्याख्येययोरभेदोपचारादन्यथाऽनुपपत्तेरितिभावः । सर्ववेदादिविस्तरइत्युक्त्यास्पर्शोष्मभिरित्युपलक्षणं अंतःस्थादिरूपेणपदवाक्यादिरूपेणचव्यज्यमानेत्यपिग्राह्यमित्युक्तंभवति । नन्वस्त्वेवमकारस्यसर्वासामपिवाचांचव्याख्यानव्याख्येयभावस्तथापिप्रकृतेकिमायातमित्यतआह

भा० । व्याख्याव्याख्येयरूपत्वंविकारत्वमिहोदितं । विकारत्वंचनान्यत्स्यान्नित्यावेदायतोखिलाः । वाचकेषुतथाविष्णोःसहस्रबृहतीमयं । उक्थमुत्तममुद्दिष्टंव्याख्याकारस्यसापरा । अन्येपिशब्दाःसर्वेपिह्यकारार्थाभिधायिनः । एषांपरममुख्यंतत्तदेतत्पंचधास्थितं । व्याख्यानमेवाकारस्यसहैवोक्थेनसर्वशः । मितामितेस्वरःसत्यमनृतंचेतिपंचधा । तस्मादकारएवायंसर्ववागात्मकःश्रुतः । तस्यैवव्यक्तिरूपोयंसर्ववेदादिविस्तरः ।

॥ तस्मादिति ॥ यद्यस्मादकारोविष्णोःसर्वान्गुणान्वक्तितस्मात्तद्व्यक्तयोयेसर्वेशब्दास्तेपिविष्णुगुणान्ब्रुवंतीतिविष्णुगुणब्रुवाः । किमु व्याख्यानोत्तमंबृहतीसहस्रमाधिक्येनविष्णुगुणान्वक्तीतिवक्तव्यमितिभावः । ननुबृहत्युक्थादिसर्ववाग्व्याख्येयत्वेनाकारस्योत्तमत्वं तद्व्याख्यानत्वाद्बृहत्युक्थस्योत्तमत्वमित्युक्तावन्योन्याश्रयत्वमितिचेन्न । स्यादिदमन्योन्याश्रयत्वं यदिबृहत्युक्थमात्रव्याख्येयत्वेनाकारस्योत्तमत्वंतद्व्याख्यानत्वादुक्थस्योत्तमत्वंब्रूमः । नचैवं । किंतुबृहतीसहस्रादियावच्छब्दजातव्याख्येयत्वादकारस्योत्तमत्वंतत्परमव्याख्यानरूपत्वादुक्थस्यतद्विवक्षितयावदर्थप्रतिपादनेनस्वातिरिक्तशब्दजातविवक्षितार्थस्याप्युक्थेनोक्तेस्तदुत्तममित्युच्यमानत्वेनदोषानवकाशात् । तस्ययदुपांश्वित्यादिव्याचष्टे ॥ अकारस्येत्यादिना ॥ तच्छरीरमितिशरीरपदेनतन्मात्रंनविवक्षितमितिभावेनोक्तं देहेति ॥ स्थूलसूक्ष्मशरीरस्येत्येवं सर्वेषामभिमानिनीभारत्युच्चोदितस्याकारस्याप्यभिमानिनीत्यर्थः । प्राणभारत्योरुपांशूच्चारणाभिमानित्वेज्ञापकमाह ॥ तस्मादिति ॥ हियस्माद्भारत्याःपतिर्वायुरुपांशोर्देवता तस्मादुच्चादुपांशुःफलाधिकइत्यर्थः । एवंखंडंसामान्यतोव्याख्यायोमितिसत्यमित्येतद्विवृणोति ॥ ततइत्यादिना ॥ ततःअकारस्यसर्ववाग्व्याख्येयत्वादित्यर्थः । समुदीरितः अकारेणाधिकंप्रोक्तमुकारेणोच्चमिष्यते । तथामितंसर्ववेदैरि

तास्रपर्णी. २।३।६

भा० । तस्मात्सर्वगुणान्विष्णोरकारोवक्तियत्प्रभोः । तद्व्यक्तयोपिशब्दायेसर्वेविष्णुगुणब्रुवाः । अकारस्यतथोपांशोरभिमानीतुमारुतः । देहेंद्रियांतःकरणनाम्नोस्यद्विविधस्यच । स्थूलसूक्ष्मशरीरस्यसर्वेषामभिमानिनी । भारत्युच्चोदितस्यापिह्यकारस्याभिमानिनी । तस्मादुच्चादुपांशुर्हिजपादिषुफलाधिकः । वायुःपतिर्हिभारत्याउपांशोर्देवता(म)ततः । अकारस्यविकारोयमोंकारइतिकथ्यते ।

॥ १०५ ॥

त्यादौसमुदीरितइत्यर्थः । तत्सर्वं मोंकारवर्णत्रयोक्तंसर्वं । आधिक्यवक्तृत्वादित्युक्तंत्रेधाविशदयति ॥ अधिकोच्चेति ॥ अधिकएवह्यधिकएवखल्वधिकोच्चस्वरूपोधिकोमाताचेत्यर्थः ॥ एतदुभयमाधिक्येंतर्गतमितिभावः । यद्वा आधिक्यवाचिनोऽकारस्येतरान्वितस्वार्थाभिधायकत्वादुच्चत्वमप्यधिकं मातृत्वमप्यधिक मितिप्रतिपादनशक्तिसद्भावादितिभावः । नारायणशब्दोप्योंकारव्याख्यानरूपत्वादकारार्थइत्याह ॥ एकार्थत्वादिति ॥ अन्यत्वार्थकोकारोसावेकार्थत्वान्नकारत्वमुपागतः । पुनस्तेनान्यत्ववाचिनाकारेणसहस्थितोदीर्घीभूतः । रीङ्क्षयइतिधातोःक्षयंवदन्रेफोऽभाववाच्यकारस्यार्थः । सोपिरेफोप्याधिक्यवाचिनाकारेणसहितोदीर्घत्वंसमुपागतः । सोऽभाववाच्यकारएवगतिरपगतिर्विनाशइतिगत्यभावशब्दयोरेकार्थत्वाद्यकारत्वंगतः । याप्रापणइतिधातोर्यातेर्गत्यर्थत्वात् । तस्माद्यकारात्परो नो नकारः रेफात्परत्वाद्रषाभ्यांनोणःसमानपदेइतिसूत्रानुसारेणणत्वंगतः । असौणत्वंगतोनकारोविरुद्धार्थवाचकोकारएवेत्यर्थः । ननुयकारात्परोंतिमणकारात्परश्चाकारोस्ति । तस्यार्थःकुतोनोक्तइतिचेन्न । तस्योच्चारणार्थत्वात् । सर्वत्रास्योच्चारणार्थस्याकारस्यार्थस्यानुक्तत्वात् । अतएवाद्यद्वितीयवर्णयोर्दैर्घ्यमकःसवर्णे

भा० । अधिकोच्चत्वमानंहितस्यार्थःसमुदीरितः । अकारेणैवतत्सर्वमुक्तमाधिक्यवक्तृतः । अधिकोच्चस्वरूपोसौमाताचाधिकएवहि । एकार्थत्वादकारोसौनकारत्वमुपागतः । दीर्घीभूतःपुनस्तेनैवाकारेणसहस्थितः । अभाववाच्यकारस्यह्यर्थोरेफःक्षयंवदन् । सोप्यकारेणसहितो दीर्घत्वंसमुपागतः । अभाववाच्यकारस्सएकार्थाद्गत्यभावयोः । यकारत्वंगतस्तस्मान्नोरेफस्योत्तरत्वतः । णत्वंगतोह्यकारोसौनोविरुद्धार्थवाचकः ।

दीर्घइतिस्मरणादितिज्ञेयं । एवंनारायणशब्दस्याकारात्मकत्वंतत्प्रतिनिधित्वंचोक्त्वार्थमाह ॥ अन्यत्वादिति ॥ अन्यत्वात्सर्वजीवेभ्यइतिनकारार्थः । जडेभ्यइत्यकारार्थः । यद्वाजीवेभ्योजडेभ्योन्यत्वादितिनकारस्यैवार्थः । दीर्घीभूतःपुनस्तेनेत्यत्राप्याधिक्यवाचिनाकारेणेत्यर्थः । किंतदन्यत्वे आधिक्यमित्यतउक्तं ॥ सदैवेति ॥ नेदमन्यत्वमौपाधिकंकादाचित्कंकिंतुस्वाभाविकंसार्वकालिकमितिनकारात्परात्पराकारस्यार्थइतिभावः । सर्वदोषोज्झितत्वादितिरेफार्थः । सर्वतोप्यधिकत्वतइतितत्पराकारार्थः । निरासनाच्चदोषाणामितियकारार्थः । सर्वदोषविरुद्धेतिणकारार्थइतिविवेकः ॥ उपसंहरति ॥ अकारार्थइति ॥ हियस्मादयमेवाकारार्थस्तस्मादकारबीजेयंनारायणाभिधाप्रणवश्चेत्यर्थः । ततः सर्वशब्दमूलत्वात् । ननुसर्वाणिपदानिहरिनामान्येव किमकारस्यविशिष्यनामत्वमुच्यतइत्यतआह ॥ अकारनामेति ॥ तदुपपादयति ॥ ब्रह्मेति ॥ यानिब्रह्मरुद्रादिविष्णुनामानितानिब्रह्मादिष्वप्यमुख्यतोवर्तते अयमकारःकेशवंविनाकुत्रापिनवर्तते । तदुक्तमुपपन्नमितिभावः । ननुऋतेनारायणादीनिनामानिपुरुषोत्तमः । प्रादादन्यत्रभगवान्राजेवर्तेस्वकंपुरमित्यादिनानारायणादिनाम्नामन्यत्रावृत्तिःश्रूयतइत्यतआह ॥

भा० । अन्यत्वात्सर्वजीवेभ्योजडेभ्यश्चसदैवहि । सर्वदोषोज्झितत्वाच्चसर्वतोप्यधिकत्वतः । निरासनाच्चदोषाणांस्वभक्तेभ्यःसमंततः । सर्वदोषविरुद्धोरुगुणपूर्णस्वरूपतः । नारायणइतिप्रोक्तोह्यकारार्थोयमेवहि । तस्मादकारबीजेयंविष्णोर्नारायणाभिधा । प्रणवश्चततोकारःप्रधानं नामचक्रिणः । अकारनामानान्योस्तितमृतेपुरुषोत्तमं । ब्रह्मरुद्रादिनामानिब्रह्मादिष्वप्यमुख्यतः । वर्ततेनत्वकारोयंवर्ततेकेशवंविना ।

नारायणादीति ॥ नारायणादिनामान्यपीत्यन्वयः । ननुब्रह्मवाय्वोरप्यकारनामत्वंक्वचिदुच्यतेऽतःकथंविष्ण्वेकनामत्वंतस्येत्यतआह ॥ वायुरिति ॥ वाशब्देनशिवः । अकारोब्रह्मविष्ण्वीशकमठेष्वितिनानार्थरत्नमालायां । ब्रह्मशिवनामत्वमपितदभिमन्यमानत्वादेवनतुतत्रगुणसमर्पकत्वेनेतिभावः । बृहतीसहस्रस्यैवशंसनीयत्वेउक्तयुक्त्यंतरमुपसंहरति ॥ तस्मादिति ॥ तदेतत्पंचविधमित्यतःप्रागितरविकाराणामप्रकृतत्वात्कथंतत्परामर्शोव्याख्यातइत्यतआह ॥ परमेति ॥ एषपरमोविकारइत्यत्रपरमत्वावधित्वेनविकारमात्रस्यप्रस्तुतत्वादित्यर्थः । ऋग्गाथाकुंब्येत्येतद्व्याचष्टे ॥ स्वराणामिति ॥ अन्यामिताक्षराः स्वरनियमरहिताःछंदोबद्धाः । परस्परंपूर्वोत्तरार्धयोरसमानिविषमसंख्याक्षराणिखंडवाक्यानि । यजुर्निगदइत्येतद्व्याचष्टे ॥ यज्ञेति ॥ वृथावागिति स्तोभाक्षराणीतिप्रसिद्धमितिभावः । अथैतन्मूलंवाचोयदनृतमितिनकारस्याकारमूलत्वोक्त्याप्राधान्यप्रतीतिंनि

भा० । नारायणादिनामानिनृणांनामक्रियास्वपि । विहितान्यकारोनैवायंविहितस्तमृतेप्रभुं । वायुर्ब्रह्मापि(चा)वाकारदेवतेनतुनामिनौ । यथावेदाभिधेयोन्योवेदाख्यादेवतापरा । एवंनामाभिमानीतुवायुर्वाच्योजनार्दनः । तस्मादइतिनामैतद्विष्णोःकेवलमेवहि । विशेषतोस्यव्याख्यानंबृहतीनांसहस्रकं । तस्मात्प्रोक्तोभवेद्विष्णुःशंसनादस्यसर्वदा । तस्माद्यज्ञेपिवाशंसेदयज्ञेपिरहःपुमान् । ध्यात्वानारायणंदेवंविष्णोरन्नंहितत्परमित्यादिब्रह्मसारे । परमविकारेणसहविकारमात्रस्यापिप्रस्तुतत्वात्तदेतत्पंचविधमितिपरामर्शः । स्वराणांनियमोयत्रब्रह्मचोनामैवताःस्मृताः । अन्यामिताक्षरायास्तुतागाथाःपरिकीर्तिताः । खंडवाक्यानिकुंब्याःस्युरसमानिपरस्परं । यज्ञांगंयजुरुद्दिष्टंनिगदंवाक्यमात्रकमित्यादिशब्दनिर्णये ।

वारयति ॥ अकारार्थत्वादिति ॥ नकारस्याकारैकदेशार्थप्रतिपादकत्वेनकिंचिदकारार्थत्वादकारस्यमूलमिव शब्दोत्पत्तिकारणत्वाभावेप्यर्थज्ञानोपायत्वात् । ननुज्ञानादियोग्यायतदनुच्चारणमिवतदर्थाप्रतिपादनमपिकिंनकार्यमित्यतआह ॥ तस्मादिति ॥ अर्थज्ञानहेतुत्वेनमूलत्वात् । तस्मान्नकारादप्यकारार्थोज्ञेयएवातः तदर्थव्युत्पादनंकार्यमितिभावः । यदिसर्वैरपिशब्दैरकारार्थोज्ञेयः तर्हिॐकारनारायणशब्दाभ्यामेवकुतोनप्रदर्शितइत्यतआह ॥ नायोग्यानामिति ॥ सम्यप्रपंचेनस्वल्पएवदिक्प्रदर्शनायप्रदर्शितः । तेनयोग्यानामुत्तमानांयथायोग्यंबोधोभविष्यतीतिभावः । ननुवाङ्मूलस्यनकारस्यज्ञानान्नदानयोग्येभ्यःप्रकटनेवृक्षवद्वागुद्वर्तनेनभाव्यंकथंस्वस्यतदित्यतआह ॥ वाचइति ॥ यदायंनकारप्रदर्शनेनयोग्येभ्योवाचंनोपदिशति यदाचान्नंसत्पात्रायदरिद्रायनप्रयच्छति तदापितेषामन्नाभावेनविद्यास्वप्रवृत्तेर्वाचउद्वर्तनंप्रसक्तं । तच्चाशक्यंवेदानांनित्यत्वात्देवानांतदधीनत्वात्स्वयमेवोद्वर्ततइत्यर्थः । अन्यत्रप्रसक्तमुद्वर्तनंकथमन्यत्रापततीत्यतआह ॥ यद्धीति ॥ यदाज्ञानान्नयोरदानेनवाचायोग्येष्वप्रसारणंतदा प्रविष्टःकर्णरंध्रेणस्वानांभावसरोरुहमित्युक्तरीत्यावाक्प्रतिपाद्यानांविष्ण्वादीनांतदभिमानिनांरमादीनांचतत्रासन्निधापनात् । तद्गुणाज्ञापनात् तदुपभोग्यान्नादेरप्रदानाच्च । देवतास्वपराधमेवकरोतियद्धिदेवतासुकरोतितदात्मन्यापतति । अपूजिताअधर्मादिदातारस्तेतथाभिधाःइत्यादिवचनात् । तथाचस्वयंधर्मज्ञानादिशोषंनरकाद्यनर्थ

॥ १०७ ॥

भा० । अकारार्थत्वान्नकारस्यकिंचिन्मूलमिव । तस्मान्मूलत्वादकारार्थोपिज्ञेयएव । नायोग्यानांसम्यग्वाच्यइतिस्वल्पएवप्रकाशितोस्माभिः । वाचउद्वर्तनाशक्तेःस्वगमेवोद्वर्तते । यद्धिदेवतासुकरोतितदात्मन्यापतति ।

चप्राप्नोत्येवेतिभावः । तस्मात्कालएवदद्यात्कालेनदद्यादित्येतत्देयप्रदर्शनपूर्वंव्याचष्टे ॥ तस्मादिति ॥ अयोग्येभ्योदानेऽनर्थप्राप्तेर्योग्येभ्योप्रदानेपितथात्वादित्यर्थः । एवशब्देनादिशब्दोक्तापात्रानुसारेणनकुर्यादितिलभ्यते । ॐमितिसत्यमित्यत्रोंकारस्यसत्यत्वंघटयति ॥ अकारस्येति ॥ व्याख्येयमनतिक्रम्यवर्तमानंहिसत्यं ॥ ॐकारेचाकारश्रवणेनतल्लोपाभावात्सत्यत्वमितिभावः । प्रकारांतरेणसत्यत्वमाह ॥ अकारस्यचेति ॥ व्याख्येयंप्रथमतोनूद्यव्याख्यानंहिसत्यं । अकारस्यादावेवस्थितत्वेनयथामूलानुवादेनोंकारस्यार्थनिरूपकत्वाच्चसत्यमोंकारइत्यर्थः । तदेतत्पुष्पंफलंवाचइत्येतद्विवृणोति ॥ उकारेति ॥ ॐकार इतिवक्ष्यमाणमनुकृष्यते । इतश्चोंकारःसत्यमित्याह ॥ अकारस्यार्थरूपइति ॥ सन्नेव उत्तमएव । तथाचसदुत्तमंब्रह्मप्रतिपादकतयायातीत्योंकारःसत्यमितिव्युत्पत्तिरितिभावः । अकारार्थाव्यभिचारित्वंचसत्यत्वमोंकारस्येतिपक्षांतरमाह ॥ यमेवेति॥ इत्यतश्चसत्यमोंकारइतियोज्यं । नेत्यनृतमित्येतद्व्याचष्टे ॥ नकारस्त्विति ॥ अच्छिरस्कत्वा दकारशिरस्कत्वात् । तस्यविवरणं मूलेति । अथैतन्मूलंवाचोयदनृतमित्येतद्व्याचष्टे ॥ तथापीति ॥ यद्यपिमूलंप्रथमतोनूद्य अप्रवृत्तेरसत्यरूपस्तथाप्येका

भा० । तस्माद्व्यदानंज्ञानदानंवाकालेपात्राद्यनुसारेणैवकुर्यात् । अकारस्योंकारतात्वकारलोपेनैवजातेतिसत्यमोंकारः । अकारस्यादौस्थितत्वेनचयथार्थरूपत्वात् । उकारादिविकारसहितत्वात्पुष्पफलात्मकश्च । अकारस्यार्थरूपःसन्नेवचभगवांस्तमेवोंकारोवक्ति । अतश्चसत्यमोंकारः । यमर्थमकारोवक्तितमेववक्तीति । नकारस्त्वच्छिरस्कत्वान्मूलभूतस्याकारस्यांतेस्थितिरूपत्वादयथास्थितेरसत्यरूपः । तथाप्यकारस्यनकारस्यचैकार्थत्वान्मूलभूतश्च ।

र्थत्वादर्थज्ञानोपयुक्तत्वेनज्ञप्तिविवक्षयाकारस्यमूलभूतश्चेत्यर्थः । ननुवृथावाचोर्थशून्यत्वाद्वानविशेषस्यापितथात्वात्कथमकार व्याख्यानत्वमित्यतआह ॥ तस्मादिति ॥ वृथावाचामकारोकारमकारनकारात्मकत्वात्केषांचिद्घटितत्वाद्वानस्यचतद्व्यंजकत्वा दित्यर्थः । खंडार्थमुपसंहरति ॥ तस्मादिति ॥ ६ ॥ (॥ १८ ॥) यद्बृहतीसहस्रस्यभगवत्प्रतिपादकत्वमुक्तंतदाक्षेपपरिहार पूर्वंद्रढयितुमयंखंडः । बृहतीसहस्रस्यभगवत्परत्वेऽनुपपत्तिंपरिहर्तुंप्रथमंप्रतिज्ञायते ॥ तद्वाइदमिति ॥ उक्तरीत्यासंपादितं तदिदंबृहतीसहस्रंतस्यनारायणस्यैवयशइत्यर्थः । ननुबृहतीसहस्रे "इंद्रवायूबृहस्पतिंमित्राग्निंपूषणंभगं । आदित्यान्मारुतं गणं । प्रवोभिर्यंतइंदवोमत्सरामादयिष्णव" इत्यादाविंद्रादिनामश्रवणात्कथंबृहतीसहस्रंतद्यशइत्यतउच्यते ॥ सइंद्रइति ॥ सएवेंद्रनामेत्यर्थः । नन्विंद्रशब्दस्यस्वर्गाधिपतौरूढत्वात्कथमिंद्रोनारायणइत्यतश्चोक्तं ॥ सइंद्रइति ॥ यतःसनारायणएवय ज्ञनामाप्रथमामिंद्रनामा एतस्मात्सएवस्वर्गपतिरिंद्रइत्यर्थः । इंद्रशब्दप्रवृत्तिनिमित्तभूताधिपत्यादिमहैश्वर्यशालित्वाच्चेंद्रनामेत्यु च्यते ॥ सभूतानामिति ॥ यएतमिंद्रंभूतानामधिपतिंवेदविस्रसा विस्रस्तोऽखिलबंधविनिर्मुक्तः । सोस्माल्लोकाद्धरिलोकं प्रैति । ऐतरेयोमहिदासइत्याह तस्मान्नात्रसंशयःकार्यइत्यभिप्रायः । एवमिंद्रशब्दोयज्ञेरूढःपरमैश्वर्यप्रवृत्तिनिमित्तेनयौगिकश्चे

भा० । तस्मादकारस्यैतद्वृथावागादिकमपिव्याख्यानं । तस्माद्विजानतःसर्वमपिभगवन्नामैव ॥ ६ ॥ (॥ १८ ॥)

उप० । तद्वाइदंबृहतीसहस्रंसंपन्नंतद्यशःसइंद्रःसभूतानामधिपतिःसयएवमेतमिंद्रंभूतानामधिपतिंवेदविस्रसाहैवास्माल्लोकात्प्रैतीतिहस्माह

त्युक्तं । तमेवैश्वर्यंतस्यैवमहिदासादिरूपेणस्वरमणतयाराजनेनविवरितुमुच्यते ॥ महिदासऐतरेयःप्रेत्येंद्रोभूत्वेत्यादिना ॥ यद्वाइदंमहिदासाद्यवतारंप्राप्यराजतइतींद्रः । पूर्णमदःपूर्णमिदमित्यत्रेदंशब्देनावताराणांपरामृष्टत्वात् इदंभूस्थानंप्राप्यराज तइतिवा इष्टप्रदत्वादिंद्रो रमायां इष्टप्रदेस्वस्वरूपेवा राजतइतींद्रइत्यनेकप्रकारेणव्याख्यातुमुच्यते ॥ महिदासइत्यादिना ॥ इंद्रो यज्ञनामा । प्रेत्य श्वेतद्वीपंप्राप्य श्वेतद्वीपपतिनैकीभूय । पुनस्तेनैवांशेनमहिदासोभूत्वाएषुलोकेषुविराजतइत्यर्थः । विराजनमेवविवरितुंपूर्वपक्षउच्यते ॥ तदाहुरिति ॥ त त्तत्र । केचिदाहुः पृच्छंति । किमिति यत् यदि । एषभगवान्हरि रनेनमहिदासादिरूपेणामुंलोकं भूलोकंप्राप्य अभिसंभवति । रमतइतियावत् । अथ तदास्त्रीसंभोगकाले । केनरूपेण कया । स्त्रियाभवति रतिंकुर्यादिति । त त्तत्रचोद्ये स्वस्मिन्नेवस्त्रीरूपेस्वयंरमतइतियत्समाधानमाहुस्तत्राप्याहुः पृच्छेयुः । किमिति । अनेनरूपेण भूमिष्ठेनरूपेण अमुं दिविस्थितं । लोक्यतइतिलोकं स्वस्त्रीरूपमभिसंभवतियत् गच्छेत्किं । अथ यद्येवमंगीकि यतेतदापिपृच्छंति । किमिति । इमं पृथिवीस्थं । लोकं स्त्रीरूपं । केनरूपेणभवति प्राप्नोतीतिहस्म । इत्येवंस्वशिष्यैःपृष्टोम हिदासऐतरेयउत्तरमाहस्म । किमिति । त त्तत्रलोकेस्त्रियां स्त्रीषु यल्लोहितंभवतितदेतदग्ने रग्निस्थस्यज्वलज्वालासमप्रभस्य स्त्रीरूपस्यहरेरूपं प्रतिमा । तस्मात्कारणात् तस्माद्भार्याशरीरगाद्रक्ताद्भर्तानबीभत्सेत नजुगुप्सेत । अथपुरुषेयदेतद्रेतोभवति

उप० । महिदासऐतरेयःप्रेत्येंद्रोभूत्वैषुलोकेषुराजतितदाहुर्यदनेनरूपेणामुंलोकमभिसंभवतीँ३ अथकेनरूपेणेमंलोकमाभवतीँ३ तद्यदेतत्स्त्रि यांलोहितंभवत्यग्नेस्तद्रूपंतस्मात्तस्मान्नबीभत्सेताथयदेतत्पुरुषेरेतोभव

तदादित्वाज्जगदादित्वादादित्यनाम्नस्तद्गतस्यविद्युत्प्रभस्यहरेरूपं प्रतिमा । तस्मात्कारणात्तस्मात्पतिस्थिताद्रेतसोभार्यानबी भत्सेत । सोयमात्मा भूमिष्ठोमहिदासोभगवानिममात्मानं पृथिवीलोकगतं । भूमिष्ठस्त्रीलोहितगतंचात्मनएवस्त्रीरूपंच । अ मुष्यैद्युस्थायस्त्रीपुंरूपायतथासूर्यगतायपुंरूपायदेवरेतोगतस्वपुंरूपायचप्रयच्छति । असावात्मा द्युस्थःसूर्यगतोविष्णु रमुमा त्मानं आत्मनोद्युस्थंस्त्रीरूपंदेवीलोहितगतस्त्रीरूपंच । अस्मै भूमिष्ठायमहिदासादिरूपायमानुषरेतसिस्थितरूपेभ्यश्चसंप्रयच्छ तीत्येवंतौ द्युभूमिगतावन्योन्यमभिसंभवतः संबद्धौभवतः । यद्वाभूमौप्रादुर्भावस्थितंमहिदासादिपुमात्मकंरूपंदेवीषुस्थितस्त्री रूपेणद्युस्थंपुंरूपंचभूलोकेमानुषस्त्रीगतस्वस्त्रीरूपेणेत्येवंतावन्योन्यंरमेतेइत्यर्थः । उपसंहियते ॥ अनेनेति ॥ सोयमात्मेममा त्मानमित्यादिनोक्तप्रकारेणानेनपृथिव्यनुबंधिनारूपेणामुंद्यनुबंधिरूपमभिसंभवत्यमुनाद्यनुबंधिनारूपेणेमंपृथिव्यनुबंधिनंरूप मभिसंभवतीत्यर्थः ॥ ७ ॥ ननुबृहतीसहस्रंतस्यनारायणस्ययशइत्येतावतापूर्णत्वात्तद्वाइदंसंपन्नमित्यधिकं । पूर्वखंडेष्वपिबृ हतीसहस्रस्यसंपन्नस्यैकादशानुष्टुभांशतानीत्यादिनापूर्णत्वात्तद्वाइदमित्यादिपुनःपुनःपरामर्शोव्यर्थइत्यतआह ॥ विद्यांतरे ति ॥ पूर्वसंगततयाविद्यांतरोपदेशार्थमित्यर्थः । अत्रयत्प्रीणनार्थंविश्वामित्रेणबृहतीसहस्रंसंपादितंतदिदंतस्ययशः । सकइ

उप० । त्यादित्यस्यतद्रूपंतस्मात्तस्मान्नबीभत्सेतसोयमात्मेममात्मानममुष्माआत्मनेसंप्रयच्छत्यसावात्मामममात्मानमस्माआत्मनेमंप्रयच्छति तावन्योन्यमभिसंभवतोनेनहरूपेणामुंलोकमभिसंभवत्यमुनारूपेणेमंलोकमाभवति ॥ ७ ॥ (॥ १९ ॥)

भा० । विद्यांतरोपदेशार्थंतद्वाइदंबृहतीसहस्रमितिपुनःपुनःपरामर्शः ।

त्यतउक्तं । सइंद्रःप्रसिद्धःशचीपतिरित्यन्यथाप्रतीतिंनिवारयन्व्याचष्टे ॥ तदिदमिति ॥ ननुतद्यशइत्यत्रयदितच्छब्देननारायणःपरामृश्येत तर्हिसइंद्रइतितस्येंद्राभेदःस्यादित्यतआह ॥ यस्येति ॥ नात्रसइंद्रइत्यनेनप्रसिद्धेंद्रस्यबृहतीसहस्रप्रतिपाद्यत्वंवातत्प्रतिपाद्येनाभेदोवोच्यते किंतु "इंद्रवायूबृहस्पति" मित्यादिबृहतीसहस्रशंसनीयानामृचांभगवत्परत्वसिद्धये उपलक्षणयातस्येंद्रनामकत्वमुच्यतइतिभावः । ननुस्वर्गपदंप्राप्तएवेंद्रशब्दप्रसिद्धेः कथंविष्णोस्तदित्यतःसएवेंद्रःप्राप्तेंद्रपदइतिप्रकारांतरेणव्याचष्टे ॥ सहीति ॥ प्रथमतः प्रथममन्वंतरे । तस्मात्प्राप्तेंद्रपदत्वात् । इंद्रशब्दप्रवृत्तिनिमित्तभूताधिपत्याख्यैश्वर्याच्चेंद्रनामत्वमितिभावेनसभूतानामधिपतिरित्यस्यतात्पर्यमाह ॥ इदिपरमेति ॥ अधिकःपतिरित्यधिपतिशब्दार्थविवरण मन्येषामिति ॥ श्रुत्यंतरेइंद्रशब्दस्यविष्णौप्रयोगाच्चसएवेंद्रःप्रसिद्धइत्यर्थांतरंसूचयितुमाह ॥ अतोविष्णाविति ॥ अत स्तत्रैवेंद्रशब्दस्यमुख्यत्वात् । कासाश्रुतिरित्यतस्तामुदाहरति ॥ मत्सीति ॥ सोम सोमाभिमानिन् । मत्सि मदयसि । इंदो इष्टप्रद । पवमान वायो । अत्रेंद्रंविष्णुंमत्सीतींद्रशब्दस्यविष्णुशब्दसामानाधिकरण्यादिंद्रशब्दस्यविष्णुपरत्वंज्ञायतइति भावः । नन्विंद्रंविष्णुंचेतिपृथगन्वयसंभवान्नसामानाधिकरण्यमित्याशंक्यनिषेधति ॥ नचेति ॥ कुतोनेत्यतःपृथगन्वयेबाध

भा० । तदिदंबृहतीसहस्रंतद्यशस्तस्यनारायणस्ययशः । यस्यनारायणस्यैतद्यशःसभगवानेवेंद्रनामासहियत्प्रथमतइंद्रोबभूवस्वेच्छयायज्ञ नामा । तस्मात्तमेववेदाइंद्रशब्देनवदंतिमुख्यतः । इदिपरमैश्वर्यइतिधातोश्चतस्यैवहिपरमैश्वर्यं । अन्येषांतुद्वादशानांतेनदत्तमेवेंद्रत्वंनतुमुख्यतः । अतोविष्णावेवेंद्रशब्दंप्रयुंक्तेश्रुतिः । मत्सिसोमवरुणंमत्सिमित्रंमत्सींद्रमिंदोपवमानविष्णुमिति । नचेंद्रंविष्णुंचेतिपृथगन्वयःक्रियते ।

कमाह ॥ तदेति ॥ साधकाभावंचाह ॥ नचेति ॥ ननु "प्रातरग्निंप्रातरिंद्रंहवामहेप्रातर्मित्रावरुणाप्रातरश्विना ॥ प्रातर्भगंपूषणंब्रह्मणस्पतिंप्रातःसोममुतरुद्रंहुवेम । प्रातर्जितंभगमुग्रंहुवेमे" तिश्रुतौप्रातर्भगंपूषणंब्रह्मणस्पतिमित्यत्रप्रातःपूषणंप्रातर्ब्रह्मणस्पतिमितिपृथक्प्रातःपदप्रयोगाभावेपि उतरुद्रंहुवेमेत्यत्रेवसमुच्चायकोतपदाभावेपिप्रातःपदस्योतपदस्यवासंयोजनेनदेवतात्रयप्रतिपादकत्ववत्प्रकृतेपिमत्सिपदस्यचशब्दस्यवासंयोजनेनदेवताद्वयंकिंनस्यादित्यतोदृष्टांतोपिनसंप्रतिपन्नइतिभावेनोक्तं न्यायंतत्राप्यतिदिशति ॥ तस्मादिति ॥ पृथक्प्रातःपदाभावात्चशब्दाभावाच्चेत्यर्थः । विशेषणं गुणसमर्पकं । इत्यादीत्यादिपदेनप्रयोगांतरपरिग्रहः । अन्यथाप्रातर्जितंभगमितिभगशब्देनपौनरुक्त्यप्रसंगइतिभावः । ननु "ऋतंसत्यंपरंब्रह्मपुरुषंकृष्णपिंगलं । ऊर्ध्वरेतंविरूपाक्षंशंकरंनीललोहित" मित्यादौयथाचकाराद्यभावेपिवाक्यभेदःकल्प्यते तथात्रापिकिंनस्यादित्यत आह ॥ यत्रचैवमिति ॥ एवंभूतेषु वाक्यभेदज्ञापकचकारादिरहितेषु । एकत्वे एकवाक्यत्वे । विरोधः पुनरुक्त्यादिः । नचात्रविरोधंपश्यामइतिभावः । "इंद्रवायूबृहस्पति" मित्यत्रेंद्रादिशब्दाभगवत्पराएवमुख्यतः । सोमस्यदेवतामदहेतुत्वप्रतिपादकतयातत्समाख्यावाक्येमत्सिसोममित्यत्रविष्णाविंद्रपदप्रयोगादित्युक्तं । भगवतःसर्वशब्दवाच्यत्वस्यसमर्थितत्वाच्चेंद्र

भा० । तदावरुणादिषुपृथक्पृथङ्मत्सिशब्ददर्शनादत्रापिपृथङ्मत्सिशब्दोदृश्यते । नहिसर्वेषांपृथङ्मत्सिशब्ददर्शनेएकस्यैवान्यथात्वं युज्यते । नचात्रद्वित्वगमकंचकारादिकंविद्यते । तस्मात्प्रातर्भगंपूषणंब्रह्मणस्पतिमित्याद्यप्येकस्यैवविष्णोर्विशेषणं । यत्रचैवंभूतेष्वेकत्वेविरोधोदृश्यतेतत्रतेनैवविरोधेनद्वित्वंभवति । अन्यथैकत्वमेव ।

शब्दस्तत्परइत्याह ॥ योदेवानामिति ॥ न "न्वादित्यान्मारुतंगण" मितिबहुवचनं गणत्वंचकथमित्यतआह ॥ बहुरूपत्वादिति ॥ चशब्दाद्गणत्वंच । उपसंहरति ॥ तस्मादिति ॥ इतोपिमत्सींद्रमिंदोपवनविष्णुमित्यत्रेंद्रशब्दोविष्णुपरइतिसिंहावलोकनन्यायेनाह ॥ मत्सीति ॥ मत्सिमहामिंद्रमिंदोमदायेत्युत्तरवाक्येपुरंदरस्यपृथगुक्तेःपूर्वोक्तोनपुरंदरइतिज्ञायते । ननुमहामिंद्रमितिमहत्वविशेषणात्कथमयमिंद्रशब्दःपुरंदरविषयइत्यतआह ॥ महत्वंचेति ॥ नकेवलमवतारेकालज्यैष्ठ्यंमहत्वं किंतुपूज्यत्वंचेतिसयुक्तिकमाह ॥ महेति ॥ सामर्थ्याधिक्यंविष्णोरेव । पुरंदरस्यत्वग्रजत्वेनपूज्यत्वमेवमहत्वमित्येतच्छ्रुत्यादर्शयति ॥ आयइति ॥ सुकृत्तरः सुष्ठुकुर्वतांमध्येश्रेष्ठः । दैव्यो देवस्येंद्रस्येष्टंदैवं । योविष्णुः सुकृते सुष्ठमहाव्रतंकुर्वतेइंद्राय । सचथाय सख्याय । आविवाय संयुक्तोभूत् । त्रिषधस्थः श्वेतद्वीपादिस्थानत्रयगतः । वेधाः विशेषेणधारणपोषणकर्ता । आर्य पूज्यं । इंद्रमजिन्वदजनयत् । यजमानं महाव्रतेनात्मानंयजमानंइंद्रं । ऋतस्य यज्ञस्य । भागेआभजत् आभाजयत् । यज्ञभागादियुक्तंपदमदादित्यर्थः । दैव्यइत्यस्यार्थः इंद्रस्यपरमंदैवमिति । अजिन्वदित्यस्यजनकइति । ऋतस्यभागइत्यस्ययज्ञभा

भा० । योदेवानांनामधाएकएवेतिचोक्तं । बहुरूपत्वाद्बहुवचनंचविष्णोरेवयुज्यते । तस्मान्मुख्यतोविष्णावेवेंद्रादिशब्दाअन्येषामुपचारतः । मत्सिमहामिंद्रमिंदोमदायेत्यन्येंद्रस्यपृथगुक्तेश्चमत्सींद्रमिंदोपवमानेतिपूर्वोक्तइंद्रोविष्णुरेवेतिसिद्धं । महत्त्वंचतस्यादितिपुत्रत्वेऽप्रजत्वमात्रं नतुसामर्थ्यतः । महपूजायामितिधातोः । पूज्योह्यग्रजोभवति । आयोविवायसचथायदैव्यइंद्रायविष्णुःसुकृतेसुकृत्तरः । वेधाअजिन्वत्रिषधस्थ आर्यमृतस्यभागेयजमानमाभजदितींद्रस्यपरमंदैवंजनकोयज्ञभागादिप्रदाताविष्णुरेवहिश्रूयते ।

गादीतीतिविवेकः । नन्वत्रयजमानइंद्रइतिकुतइत्यतआह ॥ इंद्रश्चेति ॥ सुकृतेसुष्ठुकृतेइंद्रायेतिप्रकृतत्वादितिभावः । महत्त्वंचाग्रजत्वमात्रमित्युक्तमुपसंहरति ॥ तस्मादिति ॥ प्रसिद्धेंद्रस्यभगवदनुग्रहादेवयज्ञभागोभगवतस्तुस्वातंत्र्येणेत्यत्रश्रुत्यंतरसंमतिमाह ॥ अन्येंद्रइति ॥ चतुर्थे अह्नि । ग्रहं सोमपात्रं । सोमपानमितियावत् । ब्राह्मणेद्वितीयपंचकेनवमेध्यायेप्रथमखंडे । देवावैसोमस्यराज्ञोग्रपेयेनसमपादय न्नहंप्रथमःपिबेयमहंप्रथमःपिबेयमित्येवाकामयंत । तेसंपादयंतोब्रुवन् । हंताजिमयाम सयोनउज्जेष्यति सप्रथमःसोमस्यपास्यतीति तथेतिताजिमयुः । तेषामाजिंयतामभिसृष्टानांवायुर्मुखंप्रथमं(मः) प्रत्यपद्यत । अथेंद्रोथमित्रावरुणावथाश्विनौ । सोवेदिंद्रोवायुमुद्दैजयतीतितमनुपरापतत् । सहनावथोज्जयावेति । सनेत्य ब्रवी दहमेवोज्जेष्यामीति । तृतीयंमेथोज्जयावेति नेतिहैवाब्रवी दहमेवोज्जेष्यामीति । तुरीयंमेथोज्जयावेति । तथेति तंतुरीयेत्यार्जत । तत्तुरीयभागिंद्रोभवत् त्रिभाग्वायु स्तौसहैवेंद्रवायूउदजयतामित्यत्रेदंप्रमेयंस्पष्टमितिभावः ॥ विष्णोस्त्विति ॥ मारुतस्यवेधसोविधातुर्विष्णोःक्रतुंयज्ञंसचंतायोजयन्निति विष्णोस्तुवायोरपिविधातृत्वंश्रूयतइत्यर्थः । अस्यविष्णुसूक्तगतत्वाद्विष्णोरितिविशेष्यमुपक्षिप्तं । वेधसइतिविधातुरित्युक्तार्थेमूलभूतधातुव्याख्यानंपठित्वासमर्थयते ॥ डुधाञ्इति ॥

इंद्रश्चयजमानः । तस्मात्तत्प्रसादादवताराग्रजत्वमेवतस्यमहत्त्वं । अन्येंद्रोह्यहंप्रथमःपिबेयमहंप्रथमःपिबेयमितिवायुनाविवदमानआजौ पराजितोवायुंप्रसादयित्वाचतुर्थेवायुनासहग्रहमाप । विष्णोस्तुक्रतुंसचंतमारुतस्यवेधसइतिवायोरपिविधातृत्वंश्रूयते । डुधाञ्धारणपोषणयोरितिधातोर्विशेषेणधारणपोषणकर्तांहिवेधाः ।

उपसंहरति ॥ तस्मादिति ॥ उक्तार्थेप्रमाणमाह ॥ ऋक्सहस्रात्मकमिति ॥ त्रयोदशेतिवक्तव्यं । कथंद्वादशेत्युक्तिरित्यतआह ॥ पुरंदरइति ॥ अदित्यांतु अदित्यामेव । वामनाग्रजत्वान्नतुसर्वत्र । विष्णुप्रीत्यर्थमहाव्रतंकर्मकृत्वैवनतुस्वतः । सयएतमेवमिंद्रमित्यादिव्याचष्टे ॥ एवमित्यादिना महिदासस्वरूपकथनेन ॥ सएतमेवमिंद्रंवेदसप्रेत्यमृत्वैंद्रोभूत्वैषुलोकेषुविराजतीत्यप्याहमहिदासइत्यन्यथाप्रतीतेः महिदासऐतरेयइत्याद्युत्तरवाक्येनापिसंबध्यव्याचष्टे ॥ श्वेतद्वीपादिकानि ति ॥ सर्वेषामवताराणांश्वेतद्वीपपतिनाविश्लिष्यागतत्वाद्यज्ञनामेंद्रःश्वेतद्वीपंप्राप्यश्वेतद्वीपपतिनैकीभूयपुनस्तेनैवांशेनमहिदासोभूत्वा एषुलोकेषुविराजतीत्यर्थः । नेदंवाक्यमधिकारिणःफलकथनपरं बाधितत्वात्किंतुसइंद्रइतियत्परमैश्वर्ययोगेनयज्ञेंद्रस्येंद्रशब्दार्थत्वमुक्तंतत्परमैश्वर्यंमहिदासादिरूपेणराजनेनविवरितुंप्रवृत्तमितिभावः । विराजनविवरणपरं तदाहुर्यदनेनेत्यादि । तत्रतदाहुर्यदनेनरूपेणेमंलोकमाभवति । अथकेनरूपेणभवतीत्यध्याहृतकर्तृनिर्देशरूपः । अनेनरूपेणभवतीतिव्यवहितमन्वय

भा० । तस्माद्भगवतएवैतद्यशोबृहदुक्थादिकं । ऋक्सहस्रात्मकंविष्णोर्यशइंद्राभिधस्यहि । इंद्रोहिप्रथमोविष्णुर्यज्ञनामाजगत्पतिः । तत्प्रसादादथेंद्रत्वंद्वादशान्येप्रपेदिरे । पुरंदरस्त्वेकएववासुदेवप्रसादतः । द्विवारमिंद्रतामापतस्माद्वादशतेपरे । अग्रजत्वाददित्यांतुमहेंद्रोनामचाभवत् । महाव्रतंकर्मकृत्वाचैवनान्नामहेंद्रकः । महत्त्वंमुख्यतोविष्णोर्नह्यन्यस्यकदाचन । एवंयोवेदतंविष्णुंविस्रस्तोबंधतोखिलात् । अस्माल्लोकाद्धरेर्लोकमेतिनास्त्यत्रसंशयः । इत्याहभगवान्विष्णुर्महिदासस्यरूपकः । श्वेतद्वीपादिकान्प्राप्यसइंद्राख्योहरिःस्वयं । महिदासाभिधोभूत्वालोकेष्वेषुविराजति ।

मभिप्रेत्यव्याचष्टे ॥ तत्रेत्यादिना ॥ तदित्यस्यार्थस्तत्रेति । आहुरित्यस्यकर्त्रध्याहारः केचिदिति ॥ यदित्यस्यार्थो यद्दीति ॥ एषभगवान्हरिरित्येतत् आभवतीत्यस्याध्याहृतकर्तृनिर्देशरूपं । अनेनरूपेणेत्यस्यार्थोमहिदासेति ॥ इमंलोकमाभवतीत्यस्य तात्पर्यं भूमिष्ठइत्यादि ॥ अथकेनरूपेणाभवतीत्यस्यार्थस्तदायदेत्यादि ॥ कया नकयापि । कुतः हियस्मादच्युतोन्यरतिर्नभवति । तस्मादितियोज्यं । यत्तत्रसमाधानमाहुस्तत्तत्राप्याहुःशंकेयुःकिमितिअनेनभूमिष्ठेनरूपेणामुंदिविस्थितंस्वस्त्रीरूपमभिसंभवतियत्गच्छेत्किमित्यर्थतयासमाधानप्रदर्शनपूर्वंतदाहुरित्यादिव्याचष्टे ॥ स्त्रीरूपइति ॥ तत्तत्रचोद्यईदृशंसमाधानंवाच्यं । तत्रतुतत्रापिभूमिष्ठेनरूपेणदिविस्थितंरूपंस्त्रीरूपमसौगच्छेत्किमितिचाहुः पृच्छेयुरितियोज्यं । अथकेनरूपेणेत्येतद्व्याचष्टे ॥ अथेति ॥ अत्रविषयेयद्येवमंगीक्रियते अथ तथापीमंपृथिवीसंस्थलोकंस्त्रीरूपंकेनरूपेणभवेत्संव्रजेदित्यर्थः । ननुकोत्रजेदितिप्रष्टव्येरूपविशेषप्रश्नःकिमर्थइत्यतस्तात्पर्यमाह ॥ नहीति ॥ नकेवलंपुंरूपोन्यस्त्रियानरमते अपितुस्त्रीरूपोभवतीत्यर्थः । इतिहस्माहमहिदासऐतरेयइत्येतदत्राप्यनुवर्त्यव्याचष्टे ॥ इतिपृष्टइति ॥ तद्यदेतत्स्त्रियामित्येतद्व्याचष्टे ॥

भा० । तत्रपृच्छंतिकेचित्तुयद्येषभगवान्हरिः । महिदासादिरूपेणभूमिष्ठोरमतेप्रभुः । तदायदास्त्रियाविष्णूरमतेनित्यसत्सुखः । कयास्त्रियारतिंकुर्यान्नह्यन्यरतिरच्युतः । स्त्रीरूपेतत्स्वयंस्वस्मिन्रमतेसावितीदृशं । वाच्यंतत्रचभूमिष्ठरूपेणतुदिविस्थितं । स्त्रीरूपंकिमसौगच्छेदथयद्येवमत्रच । स्त्रीरूपंपृथिवीसंस्थंकेनरूपेणसंव्रजेत् । नह्यन्यगम्योभगवांस्त्रीरूपोपिजनार्दनः । इतिपृष्टःस्वशिष्यैःसमहिदासोवदद्धरिः ।

स्त्रीष्वित्यादिना ॥ तदित्यस्यार्थो लोकइति ॥ सर्वेष्वपिलोकेष्वित्यर्थः । अग्नेस्तद्रूपमित्यस्यतात्पर्यं ॥ तत्राग्निस्थइति ॥ तस्मादित्यस्यानूद्यार्थमाह ॥ तस्माद्विष्णोरिति ॥ द्वितीयस्यतस्मादित्यस्यार्थोभार्याशरीरगाद्रक्तादिति ॥ अथयदेतत्पुरुषेरेतइत्यादिव्याचष्टे ॥ तथेत्यादिना ॥ आदेःसर्वस्यकारणत्वादादित्यः । आदिशब्दस्यस्वरादिगणपाठात्स्वरादिनिपातमव्ययमित्यव्ययसंज्ञायामव्ययात्त्यबितित्यपिकृते आदित्यशब्दोनिष्पन्नइतिभावः । तस्मात्तस्मादित्येतद्व्याचष्टे ॥ तस्मादित्यादिना ॥ तस्मादित्यंतेन ॥ अत्रयोजना । तस्माद्द्युमत्प्रभःतत्रस्थःपुंरूपोभगवान्रेतःसंस्थः । तस्मात्पतिस्थितात्तस्माद्रेतसोभार्यानबीभत्सेतेति । सोयमात्मेत्यादिव्याचष्टे ॥ यद्भूमिगमित्यादिना ॥ भूमिगं पृथिवीलोकगतं । महिदासादिस्त्रीरूपं । स्त्रीलोहितगतंचेत्यर्थः । दिविस्थितपुमात्मनः तथासूर्यगतस्य तथापुंसोदेवादिलक्षणस्यद्युगतस्यपुंसोरेतसिस्थस्येत्यर्थः । असावात्मेत्यादिव्याचष्टे ॥ देवीष्विति ॥ असावात्मादिविसूर्यगतोविष्णुरात्मनोद्युस्थस्यपरंयद्रूपं यच्चदेवीषुलोहितगतंस्त्रीरूपं

भा० । स्त्रीषुयल्लोहितंलोकेतत्राग्निस्थोजनार्दनः । स्त्रीरूपःसोग्निनामैवज्वलज्ज्वालासमप्रभः । तस्माद्विष्णोःसन्निधानाद्भर्ताभार्याशरीरगात् । नबीभत्सेतैवरक्तात्तथापुंरेतसिस्थितः । आदित्येसंस्थितोविष्णुरादेरादित्यनामकः । तस्मान्नरेतसोभार्यांबीभत्सेतपतिस्थितात् । पुंरूपोभगवान्विष्णूरेतसिस्थोद्युमत्प्रभः । तस्माद्यद्भूमिगंविष्णोःस्त्रीरूपंतत्स्वयंहरिः । प्रादुर्भावगतोदद्यादिविस्थितपुमात्मनः । सूर्यगस्यतथापुंसोरेतसिस्थस्यचात्मनः । देवीषुयल्लोहितगंस्त्रीरूपंपरमात्मनः । तत्सूर्यगतोविष्णुःपुंरेतस्थस्यचात्मनः ।

तद्भूमिगतस्य । तथापुंरेतस्थस्यमानुषरेतस्थितस्यचात्मनएवदद्यादित्यर्थः । तावन्योन्यमित्येतद्व्याचष्टे ॥ रूपद्वयमित्यादिना ॥ प्रकारांतरेणव्याचष्टे ॥ प्रादुर्भावेति ॥ भूमौप्रादुर्भावात्मनास्थितंयत्पुमात्मकंतद्देवीषुस्थितस्त्रीरूपेणात्मना चापिशब्दाभ्यां यच्चदिविपुमात्मकंरूपंतदपिमानुषीषुस्थितेनस्त्रीरूपेणात्मनेत्येवमन्योन्यतोविष्णुःस्वस्मिन्नमतइत्यर्थः । तावन्योन्यमभिसंभवतइत्यादेस्तात्पर्यमाह ॥ नचान्यतइति ॥ तत्कैमुत्येनोपपादयति ॥ रमयेति ॥ यदैवंरमयारममाणोपितत्स्थेनस्त्रियास्त्रीरूपेणात्मनारमतेतदाकिमुवाच्यंनित्यव्यक्तसुखात्मनःक्वाप्यन्यतोरतिर्नास्तीतीत्यर्थः । ननुयदिरमयारतिर्नास्तितर्हि रमयारमणंनामकिमित्यतआह ॥ रमयेति ॥ हियस्माद्विष्णोरन्यतोरतिर्नास्तीतिप्रसिद्धंतस्मादितियोज्यं । यद्यपिमत्सींद्रमिंदोपवमानविष्णुमित्यादौसोमादीनामपिभगवत्सुखप्रयोजकत्वमुक्तं तथापिसोमस्वरूपंसंपाद्यतत्रप्राणरमासन्निधानंसंपाद्यस्वयं चानंदरसात्मकस्तमधिष्ठायसोमादेर्विषयत्वशक्तिंचदत्वातन्निमित्तेनस्वयंरमतइतिनिमित्तत्वमात्रेणतदुक्तिरितिज्ञेयं । अतएवरमयाभगवतःक्वचित्सुखोक्तिरप्यविरुद्धेतिज्ञेयं । प्रेत्येंद्रइत्याद्यन्यथाप्रतीतिनिरासायस्पष्टंव्याचष्टे ॥ सएवमहिदासइत्यादि

भा० । दद्याद्भूमिगतस्यैवरूपद्वयमिदंततः । परस्परंसंभवतिविष्णोर्नित्यसुखात्मकं । प्रादुर्भावस्थितंरूपंयच्चभूमौपुमात्मकं । विष्णोस्तद्पिदेवीपुस्थितःस्त्रीरूपकात्मना । एवमन्योन्यतोविष्णूरतःस्वस्मिन्नचान्यतः । रमयारममाणोपितत्स्थेनैवस्त्रियात्मना । रमतेनान्यतःक्वापिरतिर्विष्णोःसुखात्मनः । रमयारमणंतस्माद्रमायारतिपात्रता । नैवास्यारतिदातृत्वंविष्णोर्नेह्यन्यतोरतिरित्यादिच । सएवमहिदास

ना ॥ इंद्रनामासभगवानेवेमंलोकंभूसन्निहितंश्वेतद्वीपंप्राप्यात्रभूलोकेमहिदासाभिधोभूत्वैषुलोकेषुराजतीत्यन्वयः । भूत्वेत्यस्यविवरणं ॥ प्रादुर्भूयेति ॥ तस्यापिविवरणं ॥ मनुष्येति ॥ "प्रत्यक्षत्वंहरेर्जन्मे" तिवचनादितिभावः । सयएतमिंद्रंवेदसोस्माल्लोकात्प्रैतिप्रेत्यमृत्वेंद्रोभूत्वैषुलोकेषुराजतीतिप्रतीतार्थंव्यवच्छिद्यस्वार्थंप्रयोगपूर्वंसमर्थयते ॥ नात्रेत्यादिना ॥ शंभुवा शंभुवौ सुखाश्रयौ । यज्ञस्यप्रेतां यज्ञंप्रत्यागच्छतां । प्रतीतार्थेबाधकमाह ॥ नहीति ॥ मृतस्यामुष्मिकलोकेषुराजनंयुक्तं नपुनरेष्वेवलोकेषुराजनंयुक्तमितिभावः । उपलक्षणमेतत् । इंद्रभावोपियस्यकस्यचिन्मृतस्यबाधितइत्यपिद्रष्टव्यं । ननुमरणेपिदिगंतविश्रांतकीर्त्यनाशात्तद्विवक्षयैषुलोकेषुराजतीतियुज्यतइत्याशंक्यनिषेधति ॥ नचेति ॥ ननुप्रेत्यशब्दोमरणेबहुप्रयोगसिद्धोनतथाप्राप्तावित्यतःश्रुतिस्मृतिप्रसिद्धिंदर्शयति ॥ यद्वेत्यादिना ॥ यद्वह्यैवैतिप्राप्नोति प्रैतिप्रकर्षेणाप्नोतीत्यर्थः । वक्तव्यबाहुल्यादनेनेत्येतदनूद्यव्याचष्टे ॥ यदनेनेति ॥ ननुलोकमित्यस्यकथंस्वरूपमितिव्याख्यानमित्यतआह ॥ लोक्यतइति ॥ व्युत्पत्त्येतिशेषः । प्रयोगंचाह ॥ आत्मानमिति ॥ लोकंलोक्यमवश्यंज्ञेयं आत्मानमुपासीतेत्यत्रेवात्रापिलोकशब्दः

भा० । इंद्रनामाप्राप्येमंलोकमत्रभूत्वाप्रादुर्भूयमनुष्यदृष्टिगोचरतांप्राप्यैषुलोकेषुराजति । नात्रप्रेत्यशब्दोमरणवाची । किंतुप्रेतांयज्ञस्य शंभुवेत्यादिवत्प्राप्तिवाच्येव । नहिमृतःपुनरेषुलोकेष्वेवराजति । नचयशोमात्रराजनेनस्वस्यराजनंभवति । भिन्नपदार्थत्वात् । यद्वाएतिचप्रैतिचेत्यादौप्राप्त्यर्थेपिवेदेषुप्रसिद्धत्वाच्च । लक्ष्मणःप्रेत्यसुग्रीवंबभाषेरामचोदितमितिस्कांदे । यदनेनरूपेणामुंलोकमभिसंभवति । अनेनमहिदासादिरूपेणामुंलोकंदिविष्ठंस्वरूपं । लोक्यतइतिस्वरूपवाचीलोकशब्दः । आत्मानमेवलोकमुपासीतेतिवत् ।

लोक्यपरः । स्वेनैवसाकल्येनावलोक्यंस्वस्वरूपमेवेतिलोकशब्दःस्वरूपंप्रकृतेबोधयतीतिभावः । यद्यप्यात्मनमेवलोकमित्यत्र लोकंसर्वाश्रयमितिग्रंथांतरेव्याख्यातं । तथापिव्याख्यानांतरमिदमित्यविरोधः । यदनेनरूपेणामुंलोकमभिसंभवतीत्येतत्प्राक् तत्रतुभूमिष्ठरूपेणतुदिविस्थितंस्त्रीरूपंकिमसौगच्छेदितिप्रमाणेनव्याख्यातं । किमसौगच्छेदित्यस्यव्याख्येयादर्शनात्कथमेतदि त्यतआह ॥ यच्छब्दइति ॥ वाक्यार्थमाहानेनेति ॥ यच्छब्दस्यकिंशब्दार्थत्वेज्ञापकमाहोभयोरिति ॥ किमनेनरूपेणअ थकेनरूपेणेत्युभयोरप्युपपादनपूर्वमनेनरूपेणामुंलोकममुनारूपेणेमंलोकमित्युपसंहारेस्पष्टंपरिहारदर्शनादित्यर्थः । यच्छब्दस्य प्रश्नार्थेप्रयोगंदर्शयति ॥ यतश्चेति ॥ अभिसंभवतीरितिआभवतीरितिस्थलद्वयेरंगस्यप्रयोजनमाह ॥ रंगस्त्विति ॥ प्र श्नविषयेप्रष्टव्यार्थेदुर्गमेसतीत्यर्थः । केनरूपेणकेनप्रकारेणेत्यन्यथाप्रतीतेस्तदनूद्यव्याचष्टे ॥ केनरूपेणेति ॥ केनस्वरूपेणेत्य स्यायमर्थः । विष्णुर्दिविस्थितेनकेवलस्वपुंरूपेण भूमिष्ठेनात्मनएवस्त्रीरूपेणसाकंसंबध्यतइति । सोयमात्मेममात्मानमित्येत त्प्रमाणेनस्पष्टंव्याख्यातं । तत्रभूमिगंस्त्रीरूपमिति भूगतस्यैकस्यैवस्त्रीरूपस्यप्रतीतेर्दिविस्थितपुमात्मनःसूर्यगस्येतिसामानाधि

भा० । यछब्दःकिंशब्दार्थे । अनेनरूपेणतद्रूपमभिसंभवतिकिं । उभयोरपिपरिहारदर्शनादस्यापिप्रश्नत्वमवगम्यते । यतश्चोदेतिसूर्य इत्यादिवत् । रंगस्तुप्रश्नविषयस्यदुरवगमत्वंप्रकाशयति । दुर्गमेप्रश्नविषयेप्रश्नोरंगथुतोभवेत्इतिशब्दनिर्णये । केनरूपेणेमंलोकमाभवति । के नस्वरूपेणभूमिष्ठेनात्मनएवस्त्रीरूपेणविष्णुःसंबध्यते ।

॥ ११४ ॥

करण्यप्रतीतेः पुंसोरेतसीत्यस्ययस्यकस्यचित्पुंसइत्यन्यथाप्रतीतेश्चस्ववचनेनव्याचष्टे ॥ सोयमिति ॥ असावात्मामुमात्मान मित्येतदपिनप्रमाणेनविशदं । सूर्यगतरूपातिरिक्तस्यदिविष्ठरूपस्यतत्राप्रतीतेःपुंरेतःस्थस्येत्यत्रपुरुषविशेषाविवेचनादित्यतःस्व वचनेनव्याचष्टे ॥ देवीति ॥ सभगवान्दिविष्ठैर्विष्ण्वादिरूपैःकरणैरात्मनःस्त्रीरूपंद्युलोकस्थंभूमिष्ठेभ्योमहिदासादिरूपेभ्यः प्रयच्छति । देवी लोहितस्थंचात्मनःस्त्रीरूपंमानुषरेतःस्थितरूपेभ्यःप्रयच्छतीत्यर्थः । नन्वेवंरूपाणांबहुत्वेकथंताविति द्विवचन मित्यतआह ॥ तानीति ॥ स्त्रीपुंरूपाणि । लोहितरेतसोरभ्यादित्यैक्यप्रतीतेःस्पष्टंस्ववचनेनव्याकुर्वन्प्रतीतार्थेबाधकमाह अग्नेरित्यादिना ॥ सोयमात्माकन्यापितेममात्मानंकन्याममुष्मैवरायसंप्रयच्छत्यसावात्मावरस्यपिताऽमुमात्मानंवरमिममस्मै कन्यायैपतित्वेनसंप्रयच्छतितौजायापतीअन्योन्यमभिसंभवतइत्यपव्याख्यांप्रत्याख्याति ॥ नचेति ॥ प्रस्तुतइति ॥ एत द्ब्रह्मेत्यारण्यकादौ तद्यशइतिखंडादौचोपक्रांतः । नकेवलमुपक्रमेणार्थनिर्णयःश्रुत्याचेत्याह ॥ असावात्मेति ॥ ज्ञापकांतर

भा० । सोयंमहिदासादिप्रादुर्भावरूपइदंभूमिष्ठस्त्रीरूपंलोहितगतंचस्वकीयमेवरूपममुष्मैदिविष्ठायस्वपुरुषरूपायप्रयच्छतिदेवरेतःस्थिता यच । देवीलोहितस्थितमात्मनःस्त्रीरूपंमहिदासादिरूपेभ्योमानुषरेतःस्थितरूपेभ्यश्चदिविष्ठैश्चविष्ण्वादिस्वरूपैःप्रयच्छतिच । तानिभूमिष्ठत्वेन दिविष्ठत्वेनद्विविधत्वात्तावित्युच्यंते । अग्नेस्तद्रूपमग्निनाग्नोविष्णोःप्रतिमातत्सन्निधानात् । एवमादित्यनाग्नोविष्णोः । नह्यग्न्यादिस्वरूपमेवंलो हितादि । नचलौकिकस्त्रीपुरुषसंबंधमात्रमत्रोच्यते । अप्रस्तुतत्वात्तस्य । भगवानेवह्यत्रप्रस्तुतः । असावात्मेत्यात्मशब्दाच्चभगवानेवेतिज्ञायते । आत्मशब्दःपरेविष्णौनान्यत्रकचिदिष्यते । गुणपूर्त्यभिधायीसनान्यस्यगुणपूर्णता । अमुख्यात्मानएवातोब्रह्माद्याःसर्वएवहीत्यादिचब्रह्मांडे ।

माह ॥ यदक्षरमित्यादिना ॥ अन्यथाअन्यत्प्रमेयमुक्त्वाऽन्यत्रप्रमाणोदाहरणेअसांगत्यापातादितिभावः । नन्वेवमपि य दक्षरंपंचविधंसमेतीत्यादिकंनोदाहृतेर्थेप्रमाणमस्मिन्खंडेपंचविधस्त्रीरूपाणामप्रकृतत्वादित्यतो नायंयदक्षरमित्यादिखंडएतत्खं डोक्तएवप्रमाणप्रतिपादनपरः । किंतुपूर्वोक्तार्थेष्वपिप्रमाणं । तत्रचपंचविधस्त्रीरूपाणांप्रकृतत्वादित्याशयेनाह ॥ गायत्रीत्या दिना ॥ पंचविधस्यानिरुद्धादिरूपेण ॥ ७ ॥ पूर्वमुक्तार्थेषुमंत्रोदाहरणार्थमयंखंडइतिसंगतिरुपनिषद्येवस्पष्टा । तत्रयोहवैय ज्ञेयज्ञमितिखंडेगायत्र्युष्णिग्बृहतीत्रिष्टुप्जगतीपदेत्यनिरुद्धादिनारायण्यंतानिस्त्रीरूपाण्युक्तानिनारायणादिनामकानिपुरुषरूपाणि चविवक्षितानि । तेषांचान्यतोरतिर्नास्तीतिस्वरमणत्वंचातीतखंडेनिरूपितं । तत्रमंत्रउदाह्रियते ॥ यदक्षरमिति ॥ यन्नारा यणादिरूपेणपंचविधमक्षरंनाशरहितंछंदःप्रतिपाद्यत्वाच्चाक्षरंपरंब्रह्मतत्स्वस्मिन्नेवस्त्रीरूपेणनारायण्यादिनामकेनसमेति मिथुनी

भा० । यदक्षरंपंचविधंसमेति । सत्यस्यसत्यमनुयत्रयुज्यतइत्यादिनोक्तार्थविषयोदाहृतैःश्लोकैरपिभगवतएवस्वरूपाणांपरस्परयोगस्यो क्तत्वात् । गायत्र्युष्णिग्बृहतीत्यादिनाभगवतएवपंचविधस्यस्त्रीरूपस्यमहिदासादिपंचपुंरूपाणांचप्रस्तुतत्वाच्च ॥ ७ ॥ (॥ ११ ॥) यन्नाराय णादिरूपेणपंचविधमक्षरंपरंब्रह्मतत्स्वस्मिन्नेवस्त्रीपुंरूपेणसमेति । स्त्रीपुंरूपेणयुजोदेवाअश्वरूपेणरथेयुक्ताःसंतोयन्नारायणाख्यंपरंब्रह्माभिसंवहंति । तदेतत्सत्यस्यसत्यंनारायणाख्यंब्रह्मयत्रानुयुज्यतेयस्मिन्त्स्वरूपएवस्त्रीपुंरूपेणयुज्यते । तत्रतस्मिन्नेवपरेब्रह्मणिनारायणाख्येसर्वेदेवाएकीभवंतिमु क्ताःसंतोमिलिताभवंति । नायमेकीभावोनामस्वरूपैक्यंकिंत्वेकस्थानेवासोत्यनुकूलचित्तताच ।

उप० । तत्रैतेश्लोकाः । यदक्षरंपंचविधंसमेति

भवति । स्त्रीपुंसभावेनार्धनारीपुमात्मनावासमेति । तस्यविभवउच्यते ॥ युजइति ॥ युजः स्त्रीपुंरूपेणसंयुक्ताःभार्यासहि ताःसूर्यादयोदेवाअश्वरूपेणरथेयुक्ताःसंतःयन्नारायणाख्यंपरंब्रह्माभिसंवहंति । तदेतत्सत्यस्यसत्यंवायोरपिसत्यताप्रदंनारायणा ख्यंपरंब्रह्मप्रागुक्तरीत्यायत्रयस्मिन्स्वरूपेणस्त्रीरूपेणानुयुज्यते । तत्रतस्मिन्नेवनारायणेतेसर्वेदेवाःमुक्ताःसंतः एकमेकत्वंस्थानै क्यंवाभवंति प्राप्नुवंति । सायुज्यादिलक्षणंमेलनंवागावःसायंगोष्ठएकीभवंति ब्राह्मणाराजकुलएकीभवंतीतिवत् । यद्वैकत्वंसं श्लेषविश्लेषलक्षणंसायुज्यंप्राप्नुवंतीत्यर्थः । एकत्वमप्युतदीयमानंनगृह्णंतीतिप्रयोगात् । सायुज्यादिलक्षणमेलनंप्राप्नुवंतीत्यर्थः । यद्वायत्रवैकुंठादिदेशविशेषेसत्यस्यसत्यमक्षरं यत्रस्वात्मन्यर्धनारीपुमाकारेणयुज्यते । तत्रदेशेमुक्ताःसर्वेदेवाःस्वभार्याभिरर्ध नारीपुमात्मनैकीभवंतिसंयुक्ताभवंति । एकीभूयचैकंभवंति एकमनस्कास्तमेवोपासीनाभवंतीत्यर्थः । महिदासऐतरेयःप्रेत्येंद्रो भूत्वैषुलोकेषुविराजतीत्यत्रश्वेतद्वीपादिस्थाद्भगवतोमहिदासस्यप्राक्विश्लेषोविश्लिष्टस्यचस्वयमेवस्त्रीपुंरूपेणरमणंचोक्तं । तत्र मंत्रो यदक्षरादिति ॥ यस्मादक्षराद्यन्नारायणाख्यात्मूलरूपादक्षरमवताररूपंयुक्तं । स्त्रीपुमात्मनामिलितमेवैत्यागच्छति । तस्यवाहनभूतादेवास्तेषांचालौकिकंफलंभवतीतिविभवउच्यते ॥ युजइति ॥ सवाएषवाचःपरमोविकारइत्यादिनायत्सर्वशब्द वाच्यत्वंभगवतउक्तं । तत्रमंत्रउदाह्रियते ॥ यद्वाचइति ॥ वाचअकारस्ययदोमितियॐकाराख्योविकारःयच्चनेतिनकारा

उप० । युजोयुक्ताअभियत्संवहंति । सत्यस्यसत्यमनुयत्रयुज्यतेतत्रदेवाःसर्वएकंभवंति । यदक्षरादक्षरमेतियुक्तंयुजोयुक्ताअभियत्संवहंति । सत्यस्यसत्यमनुयत्रयुज्यतेतत्रदेवाःसर्वएकंभवंति । यद्वाचओमितियच्चनेति

ख्योविकारः । यद्वाचोवाक्समूहस्यमध्येयदोमितिपदमंगीकारवाचीतियावत् । यच्चनेतिपदंप्रतिषेधार्थमितिसुधोक्तंव्याख्यानं बोध्यं । यच्चास्याःव्याख्यानभूतमर्थतःकठिनंशब्दरूपं यदुयदेवचोल्बणिष्णुश्रवणाप्रियंशब्दरूपं । उपलक्षणमेतत् । मितम मितमित्यादिकंतत्सर्वंकवयोज्ञानिनोदेवावियूयविचार्यनामायतान्यकारादिनामार्थभूतभगवन्माहात्म्यान्यन्वविंदन् । स्वयो ग्यतानुसारेणज्ञातवंतः । शृतेतस्मिन्ज्ञानेपरिपक्केसति अधिअधिकं समतृप्यन्कृतकृत्यामुक्ताअभूवन् । तथाचोक्तमनुव्याख्याने । नामवित्कृतकृत्यतेति । यस्मिन्विष्णौविष्णुविषयेनामानिज्ञात्वातस्मिन्ज्ञानेशृतेपक्केधिसमतृप्यंस्तत्रविष्णौदेवाःसर्वयुजोमनो वाक्कायकर्मभिर्युक्ताभवंति । नान्यत्रसाधनफलयोरैकरूप्यादितिभावः । एवंज्ञानिनःफलमुच्यते ॥ तेनेति ॥ एवंविद्वांस्तेन ब्रह्मणातदनुग्रहेणपाप्मानमनिष्टपुण्यंचाप्रारब्धमपहत्यनिरस्यप्रारब्धंचभोगोपमर्दाभ्यांक्षपयित्वास्वर्गलोकंविष्णुलोकमप्येति प्राप्नोति । यदुक्तंनारायणादिरूपस्यमहिदासाद्यवताररूपस्यचस्त्रीपुमुभयात्मकमेवस्वरूपंनतुव्यवस्थितंस्त्रीत्वंपुंस्त्वंचेतितत्रमंत्र उदाहृियते ॥ नैनामिति ॥ एनंस्त्रीपुंरूपिणंविष्णुंप्रमाणहीनयाकेवलवाचा स्त्रियंकेवलस्त्रियंब्रुवन्नवदति । एनमस्त्रीपुमांसंब्रुव न्नवदतिविष्णोःस्त्रीपुंरूपयोःसद्भावात् । यद्वैनमस्त्रीपुमानितिब्रुवन्नवदतीतीतिशब्दाध्याहारेणयोज्यं । अस्मिन्पक्षेनविभक्ति व्यत्ययः । एनंकेवलपुमांसमेवब्रुवन्नपिनवदति । यःकश्चनलोकविलक्षणोज्ञानीपुरुषएनंस्त्रियंपुमांसंचवदन्वर्ततेसएववदति ॥

उप० । यच्चास्याःक्रूरंयदुचोल्बणिष्णु । तद्वियूयकवयोन्वविंदन्नामायत्तासमतृप्यंछृतेधितत्रदेवाःसर्वयुजोभवंति । तेनपाप्मानमपहत्यब्र ह्मणास्वर्गलोकमप्येतिविद्वान् । नैनंवाचास्त्रियंब्रुवन्नैनमस्त्रीपुमान्ब्रुवन् । पुमांसन्नब्रुवन्नेनंवदन्वदतिकश्चन ।

लौकिकस्त्रीपुंविलक्षणत्वादस्त्रीपुमानितिवदन्नपिवदति । स्त्रीरूपःपुंरूपश्चेतिवदन्नपिनवदति । भगवतअप्रसिद्धत्वेनसाकल्येन वचनागोचरत्वादितिभावः । ननुमितममितमित्यादिनास्ववाक्येन यद्वाच ॐमितिमंत्रेणापिसर्वेशब्दाभगवद्वाचकाइत्युक्तं । कथमेवंसत्यकारस्यैवसवाएषवाचःपरमोविकारःयद्वाच ॐमित्यादौवाक्त्वोक्तिःउच्यतेतेनार्थइतिवागितिनिर्वचनस्येतरतुल्यत्वा दित्यतअकारोविशेषेणभगवद्वाचकइत्युच्यते ॥ अइतिब्रह्मेति ॥ अइत्यनेनब्रह्मपूर्णअपूर्णेभ्यःचित्प्रकृतिजीवजडेभ्योन्यत्पूर्ति विरोधिदोषहीनं सकलदोषविरुद्धगुणपूर्णंचवस्तूच्यते । किंतदित्यतोहमेवेत्युच्यतेमहिदासेन ॥ तत्रेति ॥ इतियस्मादइत्य नेनदोष्यन्यद्दोषहीनंदोषविरुद्धगुणपूर्णंवस्तूच्यते तस्मात्तत्राकारवाच्यत्वेज्ञेयान्यत्वाद्धेयदोषवर्जितत्वाद्धेयविरोधिगुणपूर्ण त्वादहंनामाहमेवागतमागतइत्यर्थः । बृहतीसहस्रनिष्ठविद्यांतरोपदेशमुखेनयदक्षरादक्षरमेतियुक्तमित्युदाहृतमंत्रव्याख्यानार्थं चपुनःपरामृश्यते ॥ तद्वाइदमिति ॥ यत्तदिदंबृहतीसहस्रंसंपन्नंतस्यैतस्यैवंसंपन्नस्यबृहतीसहस्रस्याक्षराणांपुरुषोच्चार्यतयात दनुबंधिनांव्यंजनाक्षराणांतद्वतानांस्त्रीरूपाणांचषट्त्रिंशतंसहस्राणिभवंति । तथास्वराक्षराणांतद्वतानांपुंरूपाणांचषट्त्रिंशतंस हस्राणिभवंति । पुरुषायुषोह्नांअहोरात्रात्मकदिनानांअह्नांरात्रीणांचपृथक्कृतावंतिषट्त्रिंशत्संख्याकानिसहस्राणिभवंति । तथा पुरुषायुषोह्नामहोरात्राभिमानिसूर्यगतानांपुंरूपाणांस्त्रीरूपाणांचप्रत्येकंषट्त्रिंशत्सहस्राणिभवंतीत्यर्थः । ततश्चकिमित्यतउच्यते

उप० । अइतिब्रह्मतत्रागतमहमिति । तद्वाइदंबृहतीसहस्रंसंपन्नंतस्यवाएतस्यबृहतीसहस्रस्यसंपन्नस्यषट्त्रिंशतमक्षराणांसहस्राणिभवंति तावंतिपुरुषायुषोह्नांसहस्राणिभवंति

॥ जीवेति ॥ अनकाममारः । अनस्यप्राणस्योत्पत्तिकामःसन्मायांरमायांस्थितायांज्ञानरूपायांस्वस्त्रीतनौरमतइतिअनकाम मारनामकोभगवान्विष्णुःजीवाक्षरेणजीवैःपुरुषगतैरक्षरैःबृहत्युक्थव्यंजनाक्षरगतैःस्त्रीरूपैः जीवाहःसूर्याहर्गतानिपुंरूपाण्या प्नोतिइति । एवंप्रकारेणजीवाक्षरेणपुरुषगतैःस्वराक्षरगतैःपुंरूपैः जीवाहःसूर्यरात्रितदभिमतरात्र्याख्यदिनावयवगतानिस्त्रीरू पाण्याप्नोति । कदाचिज्जीवाह्नासूर्याहर्गतैरेवपुंरूपैर्जीवाक्षरंपुरुषव्यंजनाक्षरगतस्त्रीरूपाण्याप्नोति । तथाजीवाह्नासूर्यतदभिम तदिनावयवरात्र्यवस्थितैर्जीवाक्षरंपुरुषगतस्वराक्षरगतपुरुषरूपाण्याप्नोति । यद्वाजीवाक्षरेणजीवाक्षरमाप्नोति । जीवाह्ना जी वाहरित्यन्वयः । जीवाक्षरेणपुरुषस्वराक्षरगतपुंरूपैर्जीवाक्षरंपुरुषव्यंजनाक्षरगतस्त्रीरूपाण्याप्नोति । तथाजीवाह्नासूर्याहर्गतपु रुषरूपैर्जीवाहःसूर्यरात्रिगतस्त्रीरूपाण्याप्नोतीत्यर्थः । अर्थांतराणितुभाष्यव्याख्यानदशायामेवस्पष्टयिष्यामः । यन्मंत्रे युजो युक्ताअभियत्संवहंतीतिदेवस्यरथंवहंतीत्युक्तंतत्प्रकारउच्यते ॥ अथेति ॥ अथदेवस्यवायोर्विष्णोश्चाध्यात्ममधिदैवंचरथउ च्यते । तस्याध्यात्मंदेहरथस्यवागिंद्रियाभिमानिन्युमाऽधिदैवंविष्णुरथस्यनागाकारोद्धिरुद्धरणरज्जुरूपा । श्रोत्रे दक्षवामश्रो त्रगतचंद्रतद्धार्ये पक्षसी पार्श्वयोर्निंयुक्ते । अन्यत्रोभावश्वरूपौपार्श्वयोर्निंयुक्तौ । चक्षुषीसूर्यतद्धार्ये युक्तेअग्रतोनियुक्ततद्रथ गतिहेतुभूतौ । अन्यत्रत्वग्रतोनियुक्ताश्वौ । मनस्तदभिमानीरुद्रउभयत्रसंगृहीतासारथिः । तदुभयविधस्यंदनमयंप्रकृष्टानंद ॥ ११७ ॥

उप० । जीवाक्षरेणैवजीवाहराप्नोतिजीवाह्नाजीवाक्षरमित्यनकाममारोऽथदेवरथस्तस्यवागुद्धिःश्रोत्रेपक्षसीचक्षुषीयुक्तेमनःसंग्रहीतातदयं

रूपत्वात्प्राणोवायुर्विष्णुश्चाधितिष्ठति । यद्वासचासावयंचेति तदयं । लिंगव्यत्ययोवासोयं । तदुक्तमृषिणासर्वज्ञेनहयग्रीवेण । आतेनयातंमनसोजवीयसारथंयंवामृभवश्चक्रुरश्विना ॥ यस्ययोगेदुहिताजायतेदिवउभेअहनीसुदिनेविवस्वतइतिप्रथममंत्रस्या यमर्थः । हेअश्विनावाशुवानाद्गमनाद्धयास्यत्वाच्चाश्विनामानौविष्णुवायू । मनसोजवीयसामनसोप्यतिवेगवताऽधिदैवंतेनप्र सिद्धेनरथेनायातं । अध्यात्मंमनसोपिजवीयसा कार्यसाधनेपटुनातेनशरीराख्येनरथेनायातं । आगत्यसन्निधानेअधिष्ठानतया शरीरस्यकारणत्वात्तृतीया । शरीरेसन्निहितौभवतंइतियावत् । एतेनास्मदादिदेहस्यकथंमनसोजवीयस्त्वं कथंचदेवागमनका रणत्वमितिनिरस्तं । कार्यसाधनेमनसःपटीयस्त्वस्यजवीयःशब्देनविवक्षितत्वात् । आगमनकार्यसन्निधानंप्रतिशरीरस्याधिष्ठा नतयाकारणत्वेनरथेनायातमित्युक्तिसंभवाच्च । तदुक्तंतत्वप्रकाशिकायां । मनसोजवीयसापटुना । तेनशरीराख्येनरथेनायातं शरीरेसन्निहितौभवतमिति । केचित्तुशरीराभिमानिदेवताशरीरविवक्षयेयमुक्तिरित्याहुः । रथस्यातिशयउच्यते । ऋभवः सर्वे देवाः । यंद्विविधंरथं । वांयुवयोरर्थमेवचक्रुः । यस्यचरथस्याधिदैवंवैष्णवरथस्ययोगेऽश्वादिभिर्योगेसतिविवस्वतो विविधंवा सवत्वाद्विवस्वन्नामकान्नारायणा दिवोदुहिता महालक्ष्मीपुत्रीभारती जायते । सुदिनेसुखप्रदे । उभेअहनीअहेयत्वाज्ज्ञाना त्मकत्वाच्चाहर्नामके । वायोर्द्वेरूपेचजायेते । यस्याध्यात्मंदेहाख्यरथस्यमनोवाक्कर्मभियोंगेजातेसति । विवस्वन्नामकाद्विष्णो र्दिवोदुहिता रमायाःपुत्रीसरस्वती । तदभिमन्यमानंभगवदपरोक्षज्ञानंजायते । उभे उभयविधेसुदिनेसुखप्रदे । वाय्वभिमते

उप० । प्राणोधितिष्ठतितदुक्तमृषिणा आतेनयातंमनसोजवीयसा

जीवन्मुक्तिमुक्त्यवस्थालक्षणेअहनीचजायतइत्यर्थः । निमिषश्चिज्जवीयसारथेनायातमश्विना ॥ अंतिषद्भतुवामवःइतिद्वितीय मंत्रस्यायमर्थः । अश्विनामानौविष्णुवायू निमिषश्चिच्चक्षुर्निमेषादपि । जवीयसारथेनद्विविधेनायातं । वांयुवयोःसकाशाद्यद वनंतदस्मदंतिकेभवत्विति । देहरथस्यनिमेषादपिजवीयस्त्वंनामचक्षुर्निमेषकालादत्यल्पेपिकालेसाधनौन्मुख्यंबोध्यं । शरीरेस न्निधिंकृत्वात्यल्पमपिकालंसफलंकुरुतमितियावत् ॥ ८ ॥ यदक्षरंपंचविधमित्यादेर्मितादिरूपेणपंचविधमक्षरंशब्दतत्वं । यद्ब ह्मलक्षणयैतिप्रतिपादयति । युक्तामननशीलायुजोयोगिनोयत्संवहंतिध्यायंति । पूर्वमुपाधिविनिर्मुक्तंपारमार्थिकसत्यंचैतन्यंय त्रयुज्यते तत्रसर्वेदेवाअप्येकंयथाभवतितथाभवंत्येकीभवंतीत्यन्यथाप्रतीतेर्व्याचष्टे ॥ यन्नारायणादीति ॥ गायत्र्युष्णिगा दिप्रतिपाद्यंनारायणादिरूपेणपंचविधमक्षरमित्यर्थः । स्त्रीरूपेणस्वयमेवयुगपदेवसमग्ररूपेणस्त्रीपुमांश्चभूत्वेत्यर्थः । अर्धनारी नरात्मनावेत्यर्थः । स्त्रीपुंरूपेणेतियुजइत्युत्तरेणापिसंबध्यते । एकंभवंतीत्यस्यपरेव्ययेसर्वएकीभवंतीतिवाक्यानुसारेणतात्पर्य कथनमेकीभवंतीति । मिलिताःसायुज्यरूपेणपरमात्मनिपरस्परंवासंसृष्टाः । एकत्वमप्युतदीयमानंनगृह्णंतीत्यादावेकत्वश

उप० । निमिषश्चिज्जवीयसेतिजवीयसेति ॥ ८ ॥ (२०) ॥ इत्यैतरेयोपनिषत्सुद्वितीयारण्यकेतृतीयोध्यायः ॥ ३ ॥ ७ ॥

भा० । यन्नारायणादिरूपेणपंचविधमक्षरंपरंब्रह्मतत्त्वस्मिन्नेवस्त्रीपुंरूपेणसमेति । युजोदेवाअश्वरूपेणरथेयुक्ताःसंतोयन्नारायणाख्यंपरंब्र ह्माभिसंभवंति । तदेतत्सत्यस्यसत्यंनारायणाख्यंब्रह्मयत्रानुयुज्यतेयस्मिन्स्वरूपएवस्त्रीपुंरूपेणयुज्यते । तत्रतस्मिन्नेवपरेब्रह्मणिनारायणाख्येसर्व देवाएकीभवंति

ब्दस्यसायुज्येप्रयोगात् । यद्वासंसारेभिन्नभिन्नस्थानगताः मुक्ताःसंतः एकीभवंतिमिलिताएकस्थानवासलक्षणमेलनयुक्ताः सा मीप्यंसालोक्यंवाप्राप्ताभवंतीत्यर्थः । अस्मिन्पक्षेस्थानगतमैक्यंस्थानिन्युपचर्यतेइतिलक्षणाबोध्या । प्रतीतार्थप्रतिक्षिपति ॥ नायमिति ॥ यद्यप्यत्रैकीभावशब्दोनास्ति । तथापिसर्वोपाधिगतंचैतन्यमेकंयथाभवतितथाभवंतीत्युक्ते एकीभावप्रतिपादक एवायंशब्दोभवतीतितथोक्तिः । प्रतीतार्थोनचेत्कोर्थइतिशंकते ॥ किंत्विति ॥ पूर्वोक्तार्थानुवादपूर्वमर्थांतरमाह ॥ एकस्था नेति ॥ अनुकूलचित्तत्वंएकविषयचित्तत्वं । बुद्धिसारूप्यलक्षणोमोक्षइतियावत् । जीवस्यपरमत्वंतुबुद्धिसारूप्यमेवत्विति वचनात् । अस्मिन्पक्षेदेवानामैक्यस्यानुपपन्नत्वादेवाएकीभवंतीत्यनेनतन्मत्यैक्येउपस्थितेतस्याप्यनुपपन्नत्वात् तन्मतिविषयै क्यमनेनोच्यतेइतिलक्षितलक्षणेतिज्ञातव्यं । लक्षणायांप्रयोजनंवाच्यमित्यतोरूढलक्षणात्वान्नप्रयोजनमन्वेषणीयमितिभावेन स्थानैक्येचप्रयोगंदर्शयति ॥ एकीभूयेति ॥ ननुकिंलक्षणया मुख्यएवार्थःकिंनस्यादितिचेन्मुख्यमेवार्थमंगीकुर्वाणःप्रष्टव्यः । किंप्रागभिन्नस्यैवजीवस्यमुक्तौब्रह्मणैक्यमुच्यते उतभिन्नस्य । आद्यंदूषयति ॥ नचेति ॥ च्विप्रत्ययांतएकीभावशब्दःस्वरू पैकत्वविषयेप्रागभिन्नस्यैवपश्चादैक्यविषयेप्रयुज्यमानःकुत्रचिन्नदृष्टः । अभूततद्भावार्थेच्विप्रत्ययविधानादितिभावः । नन्वे

भा० । मुक्ताःसंतोमिलिताभवंति । नायमेकीभावोनामस्वरूपैक्यं । किंत्वेकस्थानेवासोत्यनुकूलचित्तताच । एकीभूयनृपाःसर्वेवृषुःपां डवंशरैः । एकीभूतातुसासेनापांडवानभ्यवर्ततेत्यादिवत् । नचैकीभावशब्दःस्वरूपैकत्वविषयेप्रयुज्यमानःकुत्रचिद्दृष्टः ।

कीभूयपुनःशेतेनिदोंषोहरिरादिकृदित्यादौएकस्यैवहरेःपुनरेकीभावउच्यते तत्कथंकुत्रचिन्नदृष्टइत्युच्यतइत्यतआह ॥ एकइति ॥ स्थानैक्यंसंस्थानैक्यंचैतन्यसंश्लेषइतियावत् । तदुक्तं हरेरपिस्वरूपाणामेकीभावोयदोच्यते ॥ संश्लेषएवसिद्धत्वात्स्वरूपैक्यस्यनोभवइति ॥ ननुप्रागभिन्नस्यपुनरेकीभावःप्रतीत्यपेक्षयायुज्यतेऽतोनच्विप्रत्ययानुपपत्तिः । प्राग्भिन्नतयादृष्टोयंजीवोब्रह्मणाअथेदानींमुक्तावभिन्नतयादृश्यतइत्यतःएकीभवंतीतिप्रयोगसंभवादित्यतआह ॥ नचेति । उपसंहरति ॥ तस्मादिति ॥ भावसहितःभावशब्दसहितः । नस्वरूपवाची प्रागभिन्नस्यस्वरूपैक्यवाचीनभवतीत्यर्थः ॥ द्वितीयंदूषयति ॥ नहिपूर्वमिति । भवतिकुत्रचिद्भवत्य दृष्टत्वादितिभावः । तदुक्तं नहिभिन्नमभिन्नतां ॥ गच्छदृष्टंकचिदिति । ननूदकस्योदकेनैकीभावदर्शनात्कथंभिन्नस्यपश्चादेकीभावाभावइतिशंकते ॥ किंत्विति ॥ उत्तरमाह ॥ संसर्गएवेति ॥ तथाचश्रुतिः । यथोदकंशुद्धेशुद्धमासिक्तंतादृगेवभवतीति । ततश्चकिमित्यतआह ॥ तस्मादिति ॥ प्राग्भिन्नत्वेनपश्चादभेदस्यबाधितत्वात् । अत्राप्येकीभावशब्देनसंसर्गएवविवक्षितः । नतुस्वरूपैक्यमित्यर्थः । तथाचप्रह्लादवचनं परमात्मात्मनोर्योगःपरमार्थइतीष्यतां । मिथ्यैतदन्यद्रव्यंहिनैतितद्द्रव्यतांक्वचिदिति । अत्रसंसर्गोनामैकस्थानवासःपरस्परंसंबंधोवेतिज्ञेयं । ननुयदुक्तमेकीभावशब्दः

भा० । एकःपुरुषोपियदाद्विधाभूत्वाएकीभवतीत्युच्यतेतदापिस्थानैक्यमेव । स्वरूपैक्यस्यपूर्वमेवसिद्धत्वात् । नचाज्ञातएकत्वेपुनर्ज्ञातेऐक्यंप्राप्तइतिप्रयोगोदृश्यते । किंतुज्ञातइत्येवप्रयुज्यते । तस्माद्भावसहितएकशब्दोनस्वरूपवाची । नहिपूर्वंभिन्नस्यपश्चात्स्वरूपैक्यंभवति । किंतुसंसर्गएवभवति । तस्मादत्रापिसंसर्गएवविवक्षितः ।

प्रागभिन्नस्यपश्चादैक्यवाचीनभवति । अभूततद्भावार्थकच्विप्रत्ययविरोधात् । नापिप्राग्भिन्नस्यपश्चादैक्यवाची प्राग्भिन्नेपश्चादैक्यस्यबाधितत्वेनयोग्यताविरहात् । तथाचपक्षद्वयेप्येकीभावशब्दःस्वरूपैक्यपरोनभवतीति । तदयुक्तं । तथात्वेलक्षणाश्रयणस्यायुक्तत्वात् । मुख्यार्थस्यान्यस्यसद्भावेहिप्रकृतेतदनुपपत्त्यालक्षणादृष्टा । अतएवनलक्षणाबीजःसंबंधोस्ति । तथाचस्थानैक्यमत्यैक्यलक्षणाविष्णुतत्वनिर्णयसुधादावुक्ताऽत्रोक्ताचविरुद्धेतिचे न्नवयमेकीभावशब्देलक्षणांब्रूमः । किंतुगंगायांघोषाधारत्वेबाधितेगंगापदेनतत्संबंधिनःतीरस्यलक्षणेव देवानामेकीभावपदोपस्थापितेप्रागभूतैक्येबाधिते देवपदेनतत्संबंधिनःस्थानस्य तन्मतिविषयस्यवालक्षणांब्रूमः । तथाचदेवाएकीभवंतीत्यस्यप्रागभूतंदेवतास्थानस्यैक्यं तन्मतिविषयस्यैक्यंवामुक्तावभूदित्यर्थःसंपद्यते । यदात्वेकीभावंस्वभार्याभिरर्धनारीपुमात्मना ॥ एकत्वमप्युतदीयमानंनगृह्णंतीत्यादिप्रयोगं परमात्मात्मनोर्योगःपरमार्थइतीष्यतामितिस्मार्तव्याख्यानंचानुसृत्यैकीभावशब्दःसंयोगविशेषपरस्तदानलक्षणाश्रयणीयेत्यलंविस्तरेण । यदक्षरंपंचविधंनारायणादिलक्षणं तत्स्वस्मिन्नेवस्त्रीपुंरूपेणसमेतीत्युक्तत्वात् सत्यस्यसत्यंनारायणादिलक्षणंब्रह्मयत्रयस्मिन्नेवस्त्रीपुंरूपेणयुज्यतइतिपुनरुक्तमित्यतआह ॥ यदक्षरमिति ॥ उक्तस्य विहितस्य । परामर्श मनुवादं । उच्यते विधीयते । अधिकविधानायपूर्वोक्तस्यानुवादोनपुनर्विधिर्येनपौनरुक्त्यंस्यादितिभावः । यदक्षरादक्षरमेतियुक्तमित्येतद्व्याचष्टे ॥यस्मादिति॥

भा० । यदक्षरंपंचविधंसमेतीत्युक्तसत्यस्यसत्यमनुयत्रयुज्यतेइतिपरामर्शकृत्वातत्रदेवाःसर्वएकंभवंतीत्युच्यतेतस्मान्नपुनरुक्तिः । यस्मादक्षरान्नारायणात्स

कीभूयपुनःशेतेनिर्दोषोहरिरादिकृदित्यादौएकस्यैवहरेःपुनरेकीभावउच्यते तत्कथंकुत्रचिन्नदृष्टइत्युच्यतइत्यतआह ॥ एकइति ॥ स्थानैक्यंसंस्थानैक्यंचैतन्यसंश्लेषइतियावत् । तदुक्तं हरेरपिस्वरूपाणामेकीभावोयदोच्यते ॥ संश्लेषएवसिद्धत्वात्स्वरूपैक्यस्यनोभवइति ॥ ननुप्रागभिन्नस्यपुनरेकीभावःप्रतीत्यपेक्षयायुज्यतेऽतोनच्विप्रत्ययानुपपत्तिः । प्राग्भिन्नतयादृष्टोयंजीवोब्रह्मणाअथेदानींमुक्तावभिन्नतयादृश्यतइत्यतःएकीभवंतीतिप्रयोगसंभवादित्यतआह ॥ नचेति । उपसंहरति ॥ तस्मादिति ॥ भावसहितःभावशब्दसहितः । नस्वरूपवाची प्रागभिन्नस्यस्वरूपैक्यवाचीनभवतीत्यर्थः ॥ द्वितीयंदूषयति ॥ नहिपूर्वमिति । भवतिकुत्रचिद्भवत्य दृष्टत्वादितिभावः । तदुक्तं नहिभिन्नमभिन्नतां ॥ गच्छद्दृष्टंक्वचिदिति । ननूदकस्योदकेनैकीभावदर्शनात्कथंभिन्नस्यपश्चादेकीभावाभावइतिशंकते ॥ किंत्विति ॥ उत्तरमाह ॥ संसर्गएवेति ॥ तथाचश्रुतिः । यथोदकंशुद्धेशुद्धमासिक्तंतादृगेवभवतीति । ततश्चकिमित्यतआह ॥ तस्मादिति ॥ प्राग्भिन्नत्वेनपश्चादभेदस्यबाधितत्वात् । अत्राप्येकीभावशब्देनसंसर्गएवविवक्षितः । नतुस्वरूपैक्यमित्यर्थः । तथाचप्रह्लादवचनं परमात्मात्मनोर्योगःपरमार्थइतीष्यतां । मिथ्यैतदन्यद्रव्यंहिनैतितद्द्रव्यतांक्वचिदिति । अत्रसंसर्गोनामैकस्थानवासःपरस्परंसंबंधोवेतिज्ञेयं । ननुयदुक्तमेकीभावशब्दः

भा० । एकःपुरुषोपियदाद्विधाभूत्वाएकीभवतीत्युच्यतेतदापिस्थानैक्यमेव । स्वरूपैक्यस्यपूर्वमेवसिद्धत्वात् । नचाज्ञातएकत्वेपुनर्ज्ञाते ऐक्यंप्राप्तइतिप्रयोगोदृश्यते । किंतुज्ञातइत्येवप्रयुज्यते । तस्माद्भावसहितएकशब्दोनस्वरूपवाची । नहिपूर्वंभिन्नस्यपश्चात्स्वरूपैक्यंभवति । किंतुसंसर्गएवभवति । तस्मादत्रापिसंसर्गएवविवक्षितः ।

प्रागभिन्नस्यपश्चादैक्यवाचीनभवति । अभूततद्भावार्थकच्विप्रत्ययविरोधात् । नापिप्राग्भिन्नस्यपश्चादैक्यवाची प्राग्भिन्नेपश्चादैक्यस्यबाधितत्वेनयोग्यताविरहात् । तथाचपक्षद्वयेप्येकीभावशब्दःस्वरूपैक्यपरोनभवतीति । तदयुक्तं । तथात्वेलक्षणाश्रयणस्यायुक्तत्वात् । मुख्यार्थस्यान्यस्यसद्भावेहिप्रकृतेतदनुपपत्त्यालक्षणादृष्टा । अतएवनलक्षणाबीजःसंबंधोस्ति । तथाचस्थानैक्यमत्यैक्यलक्षणाविष्णुतत्वनिर्णयसुधादावुक्ताऽत्रोक्ताचविरुद्धेतिचे न्नवयमेकीभावशब्देलक्षणांब्रूमः । किंतुगंगायांघोषाधारत्वेबाधितेगंगापदेनतत्संबंधिनःतीरस्यलक्षणेव देवानामेकीभावपदोपस्थापितेप्रागभूतैक्येबाधिते देवपदेनतत्संबंधिनःस्थानस्य तन्मतिविषयस्यवालक्षणांब्रूमः । तथाचदेवाएकीभवंतीत्यस्यप्रागभूतंदेवतास्थानस्यैक्यं तन्मतिविषयस्यैक्यंवामुक्तावभूदित्यर्थःसंपद्यते । यदात्वेकीभावंस्वभार्याभिरर्धनारीपुमात्मना ॥ एकत्वमप्युतदीयमानंनगृह्णंतीत्यादिप्रयोगं परमात्मात्मनोर्योगःपरमार्थइतीष्यतामितिस्मार्तंव्याख्यानंचानुसृत्यैकीभावशब्दःसंयोगविशेषपरस्तदानलक्षणाश्रयणीयेत्यलंविस्तरेण । यदक्षरंपंचविधंनारायणादिलक्षणं तत्स्वस्मिन्नेवस्त्रीपुंरूपेणसमेतीत्युक्तत्वात् सत्यस्यसत्यंनारायणादिलक्षणंब्रह्मयत्रयस्मिन्नेवस्त्रीपुंरूपेणयुज्यतइतिपुनरुक्तमित्यतआह ॥ यदक्षरमिति ॥ उक्तस्य विहितस्य । परामर्श मनुवादं । उच्यते विधीयते । अधिकविधानायपूर्वोक्तस्यानुवादोनपुनर्विधिर्येनपौनरुक्त्यंस्यादितिभावः । यदक्षरादक्षरमेतियुक्तमित्येतद्व्याचष्टे ॥यस्मादिति॥

भा० । यदक्षरंपंचविधंसमेतीत्युक्तसत्यस्यसत्यमनुयत्रयुज्यतेइतिपरामर्शंकृत्वातत्रदेवाःसर्वएकंभवंतीत्युच्यतेतस्मान्नपुनरुक्तिः । यस्मादक्षरान्नारायणात्स

उभयत्राक्षरपदप्रयोगेनमूलरूपमेवावताररूपमितिद्योतितंतदभिप्रायःस्वयमेवेति । युक्तआगच्छति विश्लेषकालएवार्धनारीपु मात्मनायुक्तआगच्छतीत्यर्थः । पंचविधमक्षरंतुविभागानंतरंस्त्रीपुंरूपेणसमेतीत्यपौनरुक्त्यंपरिहरति ॥ तात्पर्येति ॥ तद्वियू येत्यादेःसर्वाण्यपिशब्दजातानिकेवलंनाममात्राणिनतुयाथातथ्येनार्थवंतीतिनामवाक्ऋग्वेदःसोहंनामविदेवास्मिनानात्मविदित्या दिनाविचार्यतद्ब्रह्मान्वविंदन्नित्यन्यथाप्रतीतेर्व्याचष्टे ॥ वियूयेत्यादिना ॥ नामायत्ता । नामबोध्यतयानामाधीनानिनामार्थ भूतानीत्यर्थः । माहात्म्यादीनीत्यादिपदेनरूपादीनांग्रहणं अधीत्यस्यार्थोधिकमिति । समतृप्यन्कृतकृत्यामुक्ताअभवन् परोक्ष ज्ञानमात्रेणनमोक्षइत्यतउक्तस्यशृतइत्यस्यार्थोशृतइतिपरिपाकःपरोक्षज्ञानस्यापरोक्षज्ञानपर्यवसानं । ननुशब्दजातमुपक्रमादिना विचार्यविष्णुमाहात्म्यंज्ञात्वासमतृप्यन्निितिदेवानांभगवद्विषयवेदोच्चारणस्यमनसस्तदर्थाभिनिवेशस्यतेनचतज्ज्ञानस्यफलस्यचो क्तत्वात् किंपुनर्यस्मिन्नामेत्यादिना यस्मिन्नामानिज्ञात्वातस्मिन्ज्ञानेशृतेपरिपक्वेमुक्ताअभूवन् तत्रहरौदेवाःसर्वयुजइतिमनोभि निवेशादिकमुच्यतइत्यतोयस्मिन्नामेत्यादिव्याकुर्वन्नेवपौनरुक्त्यंपरिहरति ॥ यस्मिन्नित्यादिना ॥ शब्दजातंविचार्यनामार्थ भूतानिविष्णोर्माहात्म्यादीन्यन्वविंदन्नितिकुतः । वेदैरन्यविचारादिकंकृतवंतइतिकिंनस्यादित्याशंक्य वेदार्थत्वेनयज्ज्ञानेमो क्षोभवतितत्रैवदेवाःसर्वयुजोभवंति नान्यत्र । नहिमोक्षादन्यत्रमोक्षार्थवेदविचाराभियोगःसंभवतीत्याशयेन यस्मिन्नामेत्यादि

भा० । स्वयमेवभगवान्प्रादुर्भावरूपीस्त्रीपुंरूपेणयुक्तआगच्छति । तात्पर्यार्थतस्यैवार्थस्यपुनरभ्यासः । वियूयविचार्यनामायत्तान्येवना मार्थभूतान्येवविष्णोर्माहात्म्यादीन्यन्वविंदन् । ततश्चाधिकंसमतृप्यन् । शृतेपरिपक्वेसतिज्ञाने । यस्मिन्विष्णौनामानिज्ञात्वातस्मिन्ज्ञानेपरिपक्वेसम

॥ १२० ॥

नापूर्वोक्तं फलंपरामृश्य तस्मिन्फलप्रदएवविष्णौदेवाःसर्वयुजोभवंतीत्यवधारणार्थंपुनर्वचनमितिभावः । किंचात्रसर्वयुजोभवं तीतिमनोवाक्कर्मभिर्भगवत्यभिनिवेशोदेवानामुच्यते । तद्वियूयेतिमनोवागभिनिवेशमात्रमतोधिकांशोक्तेर्नपौनरुक्त्यमितिभावेना नूद्यव्याचष्टे ॥ सर्वेति ॥ यच्चास्याःक्रूरमित्यादेःपौनरुक्त्यंपरिहरति ॥ अर्थतइति ॥ एनमस्त्रीपुमानितिद्वितीयाप्रथमयोः अन्वयाभावाद्विभक्तिविपरिणामेनार्थसप्रमाणकमाह ॥ अस्त्रीति ॥ विभक्तिव्यत्ययस्यप्रयोजनंसूत्रेणैवाह ॥ स्वातंत्र्यइति ॥ स्वातंत्र्येज्ञापनीयेविभक्तिव्यत्ययःस्यादित्यर्थः । स्वातंत्र्येविभक्तिव्यत्ययइत्युक्तंविवृणोति ॥ स्वतंत्रइति ॥ अस्त्रीपुमांसंवद न्नितिकर्मत्वेवक्तव्ये । अस्त्रीपुमानितिभगवतःकर्तृत्वोक्त्यास्वतंत्रोहिभगवांस्तत्प्रेरितएवमतस्त्रीपुमांसंवदतीतिज्ञाप्यतइतिभावः । ननुवदतीत्यस्यएनंकेवलस्त्रियंब्रुवन्नवदतिएनमस्त्रीपुमांसंब्रुवंश्चनवदति । केवलंपुमांसंचब्रुवन्नवदतीतिव्यवहितेननञ्सूत्रयेणान्व-येतत्सन्निहितंवदन्नित्येतदनन्वितंस्यादित्यतःवदतीत्यस्यसन्निहितेनवदन्नित्यनेनाप्यन्वयमाह ॥ वदन्वदतीति ॥ एतेनएनंस्त्रि यंपुमांसंचवदन्वदति । अस्त्रीपुमांसंवदन्नपिवदतीतियोजनासूचिताभवति ॥ नञ्अनुवृत्त्यायोजनांतरमाह ॥ वदन्नेवनवदती ति ॥ एतेनस्त्रीरूपःपुंरूपश्चेतिवदन्नपिनवदत्येवेतियोजनासूचिता ॥ स्त्रियंपुमांसंचवदन्वदतीत्येतदुपपादयति ॥ भवतीति ॥

भा० । तृप्यन्तस्मिन्नेवदेवाःसर्वयुजोभवंतीत्यवधारणार्थंपुनर्वचनं । सर्वयुजोभवंति मनोवाक्कर्मभिस्तत्रैवयुक्ताभवंति । अर्थतःकठिनं क्रूरमुल्बणंश्रवणाप्रियमितिशब्दनिर्णये । अस्त्रीपुमान्ब्रुवन् अस्त्रीपुमांसंब्रुवन् । सप्तसुप्रथमेतिसूत्रात् । स्वातंत्र्येविभक्तिव्यत्ययइतिच । स्वतं त्रोहिभगवांस्तत्प्रेरितएवतंवदतीत्यभिप्रायः । वदन्वदतिवदन्नेववदति । वदन्नेवनवदति । भवत्येवहिभगवान्स्त्रीरूपःपुंरूपश्च ।

हियस्मात्स्त्रीरूपःपुंरूपश्चभवत्येवतस्मात्स्त्रियंपुमांसंचवदन्वदत्येवे[redacted]तवदन्नपिवदतीत्येतदुपपादयति ॥ वद त्येवाप्रसिद्धत्वादिति ॥ प्रसिद्धलौकिकस्त्रीपुंविलक्षणत्वादस्त्रीपुमांसंवदन्नपिवदत्येवेत्यर्थः । स्त्रीरूपःपुंरूपश्चेतिवदन्नपिनवद तीत्येतदुपपादयति ॥ अप्रसिद्धत्वान्नवदतिचेति ॥ अप्रसिद्धत्वेनसाकल्येनव्यवहारागोचरत्वान्नवदति ॥ अप्रसिद्धेरवाच्यं तदित्यादेरितिभावः । उक्तार्थेप्रमाणमाह ॥ स्त्रीरूपइति ॥ वाच्योतइत्यंतंपुमांसंचवदन्वदतीत्यत्रप्रमाणं । वैलक्षण्याल्लौकि कस्त्रीपुरुषवैलक्षण्याच्चयत्पुमान्स्त्रीचनेत्यपिवाच्योसावित्येतदस्त्रीपुमांसंवदन्वदतीत्यत्रप्रमाणं । वैलक्षण्यादप्रसिद्धत्वाद्यत्पुमां स्त्रीचेतिवाच्योपिनोच्यतइत्येतत्स्त्रियंपुमांसंचवदन्नपिवदतीत्यत्रप्रमाणमितिविवेकः । ननुनपुंसकंरूपंकिमितिनोक्तं । स्त्रीपुल्लिं गशब्दानामिवब्रह्मेत्यादिनपुंसकशब्दानामपितत्रप्रयोगादित्याशंक्याह ॥ विष्णोरिति ॥ यद्यपीत्यादावुपस्कार्यं । अरागाकृ ष्टत्वान्नपुंसकवत्स्त्रीपुरुषरागानाक्रांतचित्तत्वात् । यदक्षरमित्यादिव्याचष्टे ॥ नारायणादिति ॥ यदित्यस्यार्थो यत्स्यंदन मिति ॥ युजइत्यस्यार्थो भार्येति ॥ अधिदेवेतथाध्यात्मेयत्स्यंदनमित्यन्वयः । अधिदैवेध्यात्मेचरथंविवरीतुमथदेवरथइ त्यादिग्रंथइत्यभिप्रेत्यतद्व्याचष्टे ॥ अधिदैवइति ॥ अधिदैवेप्रसिद्धंरथः । ससूर्यःसूर्यभार्याचाश्वात्मकौवहतः । अध्यात्मेजीव

भा० । तस्माद्वदत्येव । अप्रसिद्धत्वान्नवदतिच । स्त्रीरूपश्चैवपुंरूपोयस्मान्नारायणःस्थितः । पुमांस्त्रीचेतिवाच्योतोवैलक्षण्यान्नचोच्यते । विष्णोर्नपुंसकाकारोनैवास्तिकचनप्रभोः । तथाप्यरागाकृष्टत्वात्तच्छब्दैरपिकथ्यतइतिगारुडे । नारायणादिरूपेणपंचधैवहरिःस्थितः । तन्नामभिश्च स्त्रीरूपैःसमेतिस्त्रैःसकेशवः । यत्स्यंदनंवहंत्येतेदेवाभार्यासमन्विताः । अधिदैवेतथाध्यात्मेजीवदेहात्मकंरथं ।

देहात्मकंरथंचक्षुर्द्वयसमाश्रितौवहतइत्यन्वयः । देहमित्याद्युत्तरेणान्वेति । उभयोरित्यादौदैवंरथमितियोज्यं । तस्यवागुद्धिरित्य स्यतात्पर्यं उद्धारणेति ॥ एषामध्यात्मरथेचक्षुरादीनांवैष्णवेरथेत्वेतेषामश्वरूपाणांसूर्यादीनामुद्धारणार्थमुमानागाकारासर्पा कारारश्मित्वमगमदित्यन्वयः । मनःसंगृहीतेत्यस्यार्थः मनसीति ॥ अत्रविरोधस्तुविरोधोद्धारेअपाकृतोज्ञेयः । तदयमि त्यस्यार्थः ॥ विष्णुर्वायुश्चेत्यादि ॥ ननुतदयंप्राणइत्यत्रप्राणपदेनघ्राणाभिमानिनोरश्विनोर्ग्रहणंयुक्तं । मंत्रेश्विनामसद्भावादि त्यतआह ॥ तावैवेति ॥ सत्यस्यसत्यमित्येतत्श्रुत्यैवव्याचष्टे ॥ तस्योपनिषदिति ॥ श्रुत्यर्थेप्रमाणंवदन्मंत्रंप्रमाणेनव्या चष्टे ॥ सर्वेत्यादिना ॥ सत्यस्यसत्यमनुयत्रेत्यादिकं स्ववचनेनसत्यस्यसत्यत्वंनारायणाख्यंयत्रयस्मिन्स्वरूपएवस्त्रीपुंरूपेणयु ज्यते । तत्रनारायणेसर्वेदेवाएकीभवंतिमिलिताभवंतीतिव्याख्यातं । अधुनातुयत्रवैकुंठादिस्थानेयत्रस्वात्मनिसत्यस्यसत्यमनुर मणानुकूल्येनस्त्रीपुमात्मनाऽर्धनारीरूपेणयुज्यते । तत्रस्थानेरूपेचदेवाभवंति तदेशस्थंभगवद्रूपंप्राप्नुवंतीत्येकमित्यंशंपरित्यज्य

भा० । ससूर्यःसूर्यभार्याचक्षुर्द्वयसमाश्रितौ । वहतोश्चात्मकौदेहंनारायणरथात्मकं । सोमश्चरोहिणीचैवदक्षवामश्रुतिस्थितौ । उभयोः पक्षयोःस्थित्वावहतोश्चात्मकौतयोः । उद्धारणार्थमेतेषामुमावाचिसमास्थिता । नागाकारैवरश्मित्वमगमद्वैष्णवेरथे । मनःस्थितःशिवश्चात्रमनोना मामहाबलः । अभवत्सारथिर्विष्णोर्विष्णुवायुश्चतंरथं । प्रकृष्टानंदरूपत्वात्प्राणाख्यावधितिष्ठतः । तावेवचाश्विनामानौहयास्यौजगदीश्वरावित्या दिगारुडे । तस्योपनिषत्सत्यस्यसत्यमितिप्राणावैसत्यंतेषामेषसत्यमितिचश्रुतिः । सर्वसाधुगुणत्वात्तुवायुःसत्यइतीर्यते । तस्यापिसत्यतादातासा धुपूर्णगुणोहरिः । सत्यस्यसत्यएतस्मात्स्त्रीपुंरूपःसकेशवः ।

देवपदव्यावर्त्यपूर्वव्याचष्टे ॥ यस्मिन्नित्यादिना ॥ अर्धनारीपुमाकार[redacted]वामस्थितानिचेत्यादिना ॥ तस्य विष्णोरत्यद्भुतानिसर्वाणिस्त्रीरूपाणिवामस्थितानि । अस्यविष्णोर्यानिपुंरूपाणितानिदक्षिणेआस्थितानीत्यर्थः । पंचविधाक्षरस्य प्रकृतत्वाद्बहुवचनं । देवगम्यदेशविशेषेअर्धनारीपुमात्मकान्यनंतानिरूपाण्यपिसंतीतिवाद्रष्टव्यं । भोगप्रकारमाह ॥ अस्यैव तुरूपाणियुज्यंतेऽत्रपरस्परमिति ॥ स्त्र्यर्धपुमर्धंचपरस्परंमिथुनीभवतीतियावत् । यद्वार्धनारीपुमाकारस्यनारायणस्यताद्दशवासुदेवेनयोवासुदेवनारायण्योः नारायणवासुदेव्योश्चरमणमित्यादिरूपेणेतिभावः । किंचसर्वाण्यपिरूपाणियुगपदेवयुज्यंतेऽत्यद्भुतत्वात्तद्रमणस्येत्युक्तमत्यद्भुतानीति । किंचैकमर्धतःशुक्लवर्णमर्धतोरक्तं । अपरमर्धतःशुक्लमर्धतःपीतं । एकमर्धतः स्त्रीभूतव्यासात्मकमर्धतःपुरुषभूतनारायणात्मकं । एकमर्धतःपुरुषमत्स्यात्मकं । अर्धतःस्त्रीभूतकृष्णात्मकं । अर्धतस्त्रीभूतहयात्मकमर्धतःपुरुषहंसात्मकमित्यादिरूपेणसजातीयविजातीयनानावर्णाकृतानीत्यत्यद्भुतानिरूपाणिपरस्परंसंयुज्यंतइत्यर्थः । यद्वातस्यवामस्थितानीत्यादेरयमर्थः । तस्यविष्णोरर्धनारीनरात्मकस्यनारायणस्यैकस्यैवरूपस्यात्यद्भुतानिसर्वजातीयानिनानावर्णाकृ

भा० । यस्मिन्स्वात्मनियुक्तःसरमतेस्त्रीपुमात्मना । मुनिगंधर्वपित्राद्यैर्नतत्प्राप्यंकथंचन । आप्नुवंतिसुराःसर्वेतद्रूपंजाज्वलत्सदा । अर्धनारीपुमाकारंतस्यवामस्थितानिच । स्त्रीरूपाणितुसर्वाणिविष्णोरत्यद्भुतानिच । विष्णोर्योनितुपुंरूपाण्यास्थितान्यस्यदक्षिणे । तान्यस्यैवतुरूपाणियुज्यंतेत्रपरस्परं । एषनारायणोदेवोह्यर्धनारीपुमात्मकः ।

॥ १२२ ॥

तीनि नानापरिमाणानिसर्वाणियानिविष्णोःस्त्रीरूपाणितानिवामस्थितानियान्येवंभूतानिविष्णोःपुंरूपाणितानिदक्षिणेआस्थितानि अस्यतानिस्त्रीपुंरूपाणिपरस्परंयुज्यंतइत्येवमादयोभाष्यरहस्यार्थविशेषाः अस्मदाचार्यवर्यैरनुदिनमनुशिक्षितायथावबोधं मयादिङ्मात्रप्रदर्शनायतत्रतत्रोच्यंतइतिज्ञेयं । तंस्थानंदेवाःप्राप्नुवंतीत्युक्तं । प्राप्यचकिंकुर्वंतीत्यतःएकंभवंतीत्येतद्व्याचष्टे ॥ ॥ सर्वेदेवाइति ॥ एकंभवंतिएकभगवद्विषयचित्ताभवंतीत्यर्थांतरमाह ॥ उपासतइति ॥ तत्रदेवाभवंतीत्यस्यानंदमनुभवंतीत्यर्थः । सद्भाववाचकाःशब्दाःसर्वेतेसुखवाचकाइतिवचनाद्भवतेरनुभवार्थत्वाच्चानंदमनुभवंतीतिलभ्यते । यद्वानंदरमणंविभागंचभवंतिप्राप्नुवंतिभवतेःप्राप्त्यर्थत्वादितिभावेनयोग्यकर्मान्वयेनव्याचष्टे ॥ मोदंतइति ॥ भवंतीत्यस्यभूबहाविति धातुव्याख्यानमनुसृत्यार्थांतरंबहुधाचेति ॥ एतेदेवावासुदेवस्यप्रसादात्स्त्रीपुमात्मकंरूपात्पृथग्भावेनविश्लेषेणभागैःस्त्रीपुंस्वरूपिणएवबहुधाभवंत्यर्धनारीरूपाद्विश्लिष्टान्यर्धनारीरूपाणिअनंतानिभवंतीतिभावः । यदक्षरादक्षरमेतीत्येतदपिविवृणोति ॥ स्त्रीपुंरूपेणेति ॥ अश्वादीत्यादिपदेनसारथिग्रहणं । यद्वाच॰मितीत्यादिमुपलक्षणमभिप्रेत्यव्याचष्टे ॥ मितादीति ॥ वाचइत्यस्यपौ

भा० । सर्वेदेवास्सभार्याश्चतंप्राप्यपुरुषोत्तमं । एकीभावस्वभार्याभिरर्धनारीपुमात्मना । प्राप्यैवोपासतेविष्णुंमुक्ताःसंसारसागरात् । मोदंतेचरमंतेचविभागंचेच्छयाप्नुयुः । बहुधाचभवंत्येतेस्त्रीपुमात्मपृथक्त्वतः । प्रसादाद्वासुदेवस्यभागैःस्त्रीपुंस्वरूपिणः । तेनैवनियतानित्यंतद्भशास्तत्परायणाः । रमंतेनान्यगम्योसौदेशोविष्णोःपरात्मनः । स्त्रीपुंरूपेणयुक्तंतद्विष्ण्वाख्यंपरमक्षरं । अक्षरादेवपरमात्पुंसोनारायणाभिधात् । आगच्छंतितदैतेचदेवाभार्यासमन्विताः । वहंत्यश्वादिरूपेणरथस्थंपरमंवपुः । तत्सर्वदैवैःप्राप्यंचनान्यैःकथमपिकचित् । मितादिपंचरूपं

रुषेयापौरुषेयवाचांमध्येयदोमित्यादिकंयच्चमितादिकमित्यर्थइत्यर्थः । [redacted]तच्चेतिग्राह्यं । मितादिकंसर्वनारायण स्यैवनामेतिजानंतीत्येतदवधारणार्थतत्रदेवाःसर्वयुजइत्युक्तमित्यभिप्रेत्यव्याचष्ट ॥ मनइति ॥ यस्माद्वेदार्थत्वेननारायणंज्ञात्वामुक्ताअभूवंस्तस्मात्तत्रैवमनोवाकर्मभिर्वेदविचाराभियोगमाप्स्यंतीतिज्ञायते । नहिमोक्षसाधनादन्यत्रमोक्षसाधनेवेदविचाराभियोगइतिभावः । देवपदव्यावर्त्यमाह ॥ सर्वेति ॥ अनुतारतम्यानुसारेण । विंदन्नित्यस्यार्थः ॥ वाय्वंताइति ॥ विष्णुनामानि मितादीनिव्यवहितमहइतिब्रह्मेत्येतद्वाचञ्मित्यनेनसंगतमित्यवतारयति ॥ एवमिति ॥ विशेषतोभगवद्वाचकत्वमकारस्यनप्रतीयतइत्यतइतिशब्देनप्रतीयतइतिभावेनतत्रप्रमाणमाह ॥ इतिशब्दइति ॥ यत्रयस्याभिधानस्यांतइतियोज्यं । तथाचअइत्यकारेणब्रह्मविशेषतउच्यतेइत्युपनिषदर्थइतिभावः । नन्वकारेणकथंब्रह्मोच्यतइत्यतउक्तस्यतत्रागतमहमितीत्यस्यानुवादपूर्वमर्थमाह ॥ तत्रेति ॥ इतियस्मादित्यर्थइतिभावेनतत्परामृष्टहेतुप्रदर्शनायायस्मादित्यादि । तत्रेत्यस्यार्थः ॥ तस्मादि

भा० । यद्वाक्यंलोकेथवाश्रुतौ । नारायणस्यनामैतंदितिजानंतिदेवताः । मनोवाकर्मभिस्तस्माद्योगमाप्स्यंतितत्रते । सर्वशब्दान्हरौनेतुं कस्यदेवानृतेबलं । वाय्वंतास्तारतम्येनविष्णुनामार्थवेदिनः । सम्यग्वेत्तामारुतोत्रतस्मान्मुक्तेभ्यएवच । सुरेभ्योधिकमानंदंनित्यंभुंक्तेहरेरन्वित्या द्यर्धनारीनारायणतंत्रे । एवंसर्वेशब्दाभगवद्वाचकाइत्युक्त्वाअकारोविशेषतोनारायणवाचकइत्याह । अइति ब्रह्मेति । इतिशब्दोभिधानांतेयत्रवैशेषिकंहितत् । नामस्यादितिमेसाक्षान्निर्णयःसमुदाहृतइतिशब्दनिर्णये । तत्रागतमहमिति । यस्मादित्ययंशब्दःप्रस्तुतस्याभावंविरोधिनमन्यंच वदति ।

॥ १२३ ॥

ति ॥ अहमहेयइत्यस्यार्थस्तदन्यइति । हेयजगदन्यः । हेयदोषविरोधिगुणरूपः हेयदोषवर्जितश्चेत्यर्थः । तत्रागतमित्यंशस्य तत्राकारवाच्यत्वेआगतमागतस्तदर्थतयाप्राप्तइत्यर्थमभिप्रेत्योक्तमकारार्थतयासिध्यतीति । ननुअस्त्वकारस्यप्रतियोगिसमर्पकशब्दघटितस्यतदन्यत्वादिकमर्थः केवलस्यतुकथं प्रतियोग्युपस्थापकपदाभावादित्यतउक्तं । प्रत्यक्षत्वादिति ॥ प्रस्तुतरूपत्वात्पदांतरेणप्रस्तुतस्वरूपत्वात् । ननुशाब्दीह्याकांक्षाशब्देनैवनिवर्तत इतिन्यायविरोधइतिचेन्न । तन्नियमाभावात् । प्रत्यक्षसिद्धंद्वारमधिकृत्यपिधेहीत्युक्तेद्वारपदाभावेप्याकांक्षाविच्छेदस्यानुभवसिद्धत्वात् । अतीतस्यव्यवहितस्यचकथंप्रस्तुतिरित्यतआह ॥ मनसीति ॥ नन्वतींद्रियस्यकथंप्रस्तुतिः । अनुमितिशब्दानुभवजन्यस्मृतिसंभवेपिस्मारकाभावादित्यतआह ॥ दृष्टेति ॥ ननुहरेरपिदृष्टसंबंधित्वेनप्रस्तुतत्वेतस्यापिप्रतियोगिकोव्यनुप्रवेशःस्यादित्यतआह ॥ भगवांस्त्विति ॥ भगवांस्त्वकारेणपृथक् दृष्टादृष्टवैलक्षण्येनविवक्षितत्वात्प्रतिपिपादयिषितत्वान्नप्रस्तुतसमुदायेगणनीयइत्यर्थः । नन्वकारस्यपदत्वविवक्षायामन्विताभिधायित्वात्किमन्वयप्रतियोगिसमर्पणायप्रत्यक्षाद्यनुसरणेनेतिचेन्न । पदानांसामान्यतोयोग्येतरान्वितस्वार्थाभिधायिकत्वेपिविशेषान्वयसिध्यर्थंपदांतरस्यतदभावेप्रमाणांतरस्यानुसरणीयत्वात् । ननुयदुक्तमकारस्यप्रस्तुतान्यत्वादिविशिष्टविष्णुवाचकत्व

भा० । तस्मात्प्रत्यक्षत्वाज्जीवजडात्मकस्यजगतएवानुक्तावपिप्रस्तुतरूपत्वात्तदन्यस्तद्विरोधीतत्रदृश्यमानदोषवर्जितश्चाकारशब्दार्थइति सिध्यति । मनसिप्रस्तुतत्वादवचनेपिप्रस्तुतमेवेदंसर्वं । दृष्टसंबंधत्वाददृष्टंसर्वमपिप्रस्तुतंभवति । भगवांस्त्वइतिपृथग्विवक्षितत्वादेवनप्रस्तुत समुदाये ।

मिति तदयुक्तं । तस्यसर्वप्रपंचनिषेधात्मकशून्यपरत्वादितिकेषांचित[redacted]यति ॥ नचशून्यस्येति ॥ प्रपंचप्रतिषेधात्मकस्यशून्यस्येत्यर्थः । उक्तंचसुधायां प्रपंचप्रतिषेधोनामशून्यमयतत्त्वपारमार्थिकमेवनकल्पितमिति । नन्वेवंसत्यसदितिचेन्नप्रतिषेधमात्रत्वादित्यादावसत्वोक्तिविरोधः । अस्माभिःसर्वविशेषविनिर्मुक्तत्वादसत्वमापाद्यदूषणाभिधानादतएवसुधायांअनुक्तोपालंभपरिहारायात्रसर्वत्रशून्यस्यासत्वमापाद्यदूषणाभिधानमितिज्ञातव्यमित्युक्तं । कुतोनवाच्यमित्यतआह ॥ शून्येति ॥ शून्यप्रतिपाद्यत्वांगीकारेअभावाख्यःसर्वप्रतिषेधात्मकत्वाख्यएकएवार्थःसिध्यति । सर्वप्रतिषेधात्मकस्यशून्यस्यपरिच्छेदत्रयराहित्यांगीकारेणजगदन्यत्वस्यनिर्विशेषत्वांगीकारेणदोषविरोधिगुणत्वस्यचाभावादितिभावः ॥ विष्णोरिति ॥ अभावता । अभावः । भावभवित्रोरभेदोपचारः । यद्वानविद्यतेभावःदोषलक्षणःपदार्थोयस्मिन्सोभावःदोषाभाववान् । तस्यभावोभावता । अभावएवदंडित्वं दंडइतियथा । तथाचविष्णोरकारवाच्यत्वांगीकारेतुअभावतादोषाभावः । अन्यताजगदन्यत्वं विरोधिता दोषविरोधिगुणरूपत्वमितित्रयोप्यर्थाःप्रवृत्तिनिमित्तार्थाःसम्यगनुपचारेणप्रमाणबाधंविनैवसिध्यंति ॥ यद्वक्ष्यति । विरुद्धतानिषेधान्यभावयुक्तेहीत्यत्रेतिज्ञेयं । तस्मात्प्रवृत्तिनिमित्तपौष्कल्यात् । एतेनविष्णोरभावरूपत्वाभावात्कथमभावतेत्युक्तमितिनिरस्तं । विस्तरस्तुविरोद्धोद्धारेनुसंधेयः । नन्वकारस्यशून्यपरत्वाभा ॥ १२४ ॥

भा० । नचशून्यस्याशब्दार्थता । शून्यांगीकारेह्यकारस्याभावताख्यएवार्थइतिसिध्यति । विष्णोरंगीकारेत्वभावतान्यताविरोधितेतित्रयोप्यर्थाःसम्यगेवसिध्यंति ।

वेकथंतत्प्रतिपत्तिरित्यतआह ॥ तस्मादिति ॥ तस्मादेकदेशार्थत्वेनअन्ययुक्तेनभावशब्दयुक्तेन । उच्यते नाभावउपलब्धेरित्यादौ । यद्वाकारस्याभावापरपर्यायप्रतिपाद्यशून्यार्थत्वंपराभ्युपगतंनिराकृत्यतेनैवहेतुनाप्रागभावाद्यभावपरत्वंचनिराह ॥ तस्मादिति ॥ नन्वइत्येवेति ॥ केवलेनाकारेणकेनचिदपिवाक्येनोच्यते । कुतः प्रयोगादर्शनादितिभावः । भवत्वेवमकारस्यप्रस्तुतान्यपरत्वादौशक्तिसद्भावाद्धेयजगदन्यत्वादिवाचित्वं । तथाप्यकारस्यब्रह्मनामत्वंकथमित्यतःअकारब्रह्मशब्दयोरेकार्थत्वादितिभावेनाह ॥ तस्मादिति ॥ अर्थांतरस्यानुपपन्नत्वात् । ब्रह्मैव ब्रह्मशब्दार्थएव । ननुब्रह्मशब्दार्थःतद्विरुद्धवाच्यकारार्थश्चैकोस्तु । अन्यत्वादिवाच्यकारस्यकथंब्रह्मशब्देनैकार्थतेत्यतस्तदुपपादयति ॥ पूर्णहीति ॥ उक्तमर्थमुपनिषदारूढंकरोति ॥ तदेतदिति ॥ अइतिब्रह्मेतिवक्तव्ये अःइत्यसंहिततयानिर्देशस्यप्रयोजनमाह ॥ अइति ॥ कथमसंहिततयानिर्देशस्योक्तार्थत्वमित्यतस्तत्रप्रमाणमाह ॥ विवृत्ताविति ॥ यत्रपदेसंहितायामवश्यभाविन्यांविवृत्तिरसंहिततयानिर्देशः

भा० । तस्मादकारस्यभगवानेवमुख्यार्थोनशून्यं । एकदेशार्थत्वात् । तस्मादमुख्यार्थत्वादन्ययुक्तेनैवाकारेणाभावइतितदुच्यते नत्वइत्येवकेनचित्कचित् । नचतथाप्रयोगोस्ति । तस्मात्पारतंत्र्यात्पगुणत्वादिसर्ववस्तुस्वभावविरुद्धस्वभावंस्वतंत्रंपूर्णगुणंसर्वजीवजडेभ्योन्यदज्ञा(चित्क)नदुःखाल्पत्वपारतंत्र्योत्पत्तिनाशादिसर्वदोषविवर्जितंब्रह्मैवाशब्दार्थः । पूर्णहिब्रह्मशब्दस्यार्थः । नचदोषयुक्तस्यपूर्णता । नचजीवजडाद्यपूर्णवस्त्वभिन्नस्यपूर्णत्वंभवति । तस्मादकारशब्दार्थएवब्रह्मशब्दार्थः । तदेतदुक्तंअःइतिब्रह्मेति । अःइतिपृथक्त्वेनवचनंतत्समधिकंवाकिमपिनास्तीतिदर्शयितुं । विवृत्तावपि

स्यात्तत्रतस्यवस्तुनःसमानोत्तमहीनत्वमुच्यते । विवृत्तावपिसर्गोविसर्गश्च [redacted] सासमानोत्तमहीनत्वमुच्यतइतियोज्यं । आद्यंयथा तमेवैकंजानथआत्मानमिति । तदुक्तंतत्वप्रकाशिकायांजानथआत्मानमित्यत्रविवृत्तिस्तस्यसर्वतोविलक्षणत्वज्ञापनार्थेति द्वितीयस्यत्विदमेवोदाहरणमिति । एवमइत्यकारेणब्रह्मनारायणएवविशेषतउच्यते । कुतः । अकारस्यहेयजगदन्यत्वादिप्रतिपादकत्वात् । ब्रह्मशब्दस्यापितत्प्रतिपादकत्वेनाकारब्रह्मशब्दयोरेकार्थत्वात् अकारोब्रह्मशब्दितभगवन्नामैवेत्युक्तं । किंचाकारस्यपूर्णत्वाभिधायकत्वान्नारायणावतारस्यममपूर्णत्वादकारोनारायणस्यविशेषनामेत्यर्थत्वेनअःइतिब्रह्मेत्यादिव्याचष्टे ॥ अःइतीति ॥ अस्त्वकारस्यपूर्तिवाचित्वंतस्यनारायणनामत्वंकुतइत्यतस्तत्रागतमित्येतदनूद्यव्याचष्टे ॥ तत्रेति ॥ तत्राकारस्यपूर्णवाचित्वेसतिअहमेवतत्राकारवाचकत्वेआगतःअकारवाच्यतइत्याहमहीदासरूपोभगवान्नारायणइत्यर्थः । नन्वकारस्यपूर्णवाचित्वेपिमहिदासस्याकारवाच्यत्वंकुतः । अन्यस्यपूर्णत्वसंभवादित्यतस्तत्रपूर्णत्वेविशेष्यतयाहमेवागतोनत्वन्यइत्यर्थांतरमाह ॥ अहमेकएवेति ॥ ननुप्रलयेप्रलीनानांमुक्तानांचब्रह्मणैक्यात्कथमन्येषांतदधीनत्वमित्याशंकापरिहारकत्वेनापिपृथग्वचनंव्याचष्टे

भा० । सर्गःस्यात्संहितायांचयत्रहि । समानोत्तमहीनत्वमुच्यतेवस्तुनोजसेतिशब्दनिर्णये । अःइतिब्रह्मपूर्णवस्तूच्यते । तत्रागतमहमिति । तत्राकारस्यपूर्णवाचित्वेहमेवसोकारवाच्यइत्याहमहिदासरूपोभगवान्नारायणः । अहमेकएवपरिपूर्णः । अन्येषांसर्वेषांमदधीनत्वादल्पत्वादिति ।

॥ मुक्तेभ्यइति ॥ उक्तार्थेप्रमाणमाह ॥ तच्चेति ॥ ननुमाभूद्यादृशतादृशानांभगवदैक्यं ब्रह्मादीनांतुलोकेश्वराणांस्यादित्यत आह ॥ ब्रह्मेति ॥ संहितायांप्रसक्तायामपिपदात्मना । सविसर्गपदात्मना । एवंविधः पूर्णः । अकारस्यशून्यप्रतिपादकत्वंप्रागभावादिपरत्वंवाव्यवच्छिनत्ति ॥ नाभावेति ॥ नात्राभावइतिशून्यंप्रागभावश्चविवक्षितः । यतःअकारअर्थत्रयेणप्रवृत्तिनिमित्तार्थत्रयेणयुक्तस्तत्प्रवृत्तिनिमित्तकः अतोनाभाववाची । नन्वकारस्यत्रिविधप्रवृत्तिनिमित्तकत्वेप्यभाववाचित्वाभावःकुतइत्यत उक्तं ॥ एकेति ॥ केवलमर्थात्मैव नतुविष्णुवत्तद्वान् । कुतःनिषेधैकस्वरूपतः केवलंनिषेधरूपत्वेनतद्वत्ताभावात् । अतएकदेशस्वरूपत्वादितियोज्यं । नन्वकारस्याभावार्थत्वेपिपूर्णार्थत्वंस्यादेव भावान्यत्वभावविरुद्धत्वयोरप्यभावेप्रागभावादौसत्वादि

भा० । मुक्तेभ्यःप्रलयेलीनेभ्यश्चसर्ववस्तुभ्यस्सदाविभिन्नएवभगवानितिदर्शयितुंचअःइतिपृथग्वचनं । तच्चोक्तंवाक्यनिर्णये । मुक्ताअपिनविष्णुत्वंयांतितत्समतामपि । आधिक्यंकुतएवस्यान्मुक्तानांमुक्तिदातृतः । कुतएवप्रलीनानांप्रलयेतुतदात्मता । ब्रह्मशर्वेंद्रपूर्वाणांमुक्तावपिनविष्णुता । यदातदातुसंसारेकतद्रूपत्वमिष्यते । अन्योसौसर्वतोविष्णुःस्वातंत्र्याद्गुणपूर्तितः । सर्ववस्तुस्वभावस्यविरुद्धोरुस्वभावकः । पारतंत्र्याल्पताज्ञानजनिनाशादिवर्जितः । अकारेणततोविष्णुःसंहितायांपदात्मना । बह्वृचोपनिषत्प्रोक्तस्तेनैवपरमात्मना । महिदासावतारेणसोहमेवंविधस्त्विति । मत्तोन्योन्महिपूर्णोस्तियतोकारश्चपूर्णतां । वक्तितस्मादकारोयंमामेववदतिस्फुटं । नाभाववाच्यकारःस्यादर्थत्रययुतोयतः । एकार्थात्माह्य भावस्तुनिषेधैकस्वरूपतः । एकदेशस्वरूपत्वान्नाकारेणैवभण्यते । किंत्वभावइतित्वेवतेनाकारोदितोहरिरिति ।

त्याशंक्यनिषेधति ॥नचेति॥ एतावताप्रकृतिनिमित्तद्वयसद्भावमात्रेण [redacted]र्थत्वमित्यतआह ॥तदेति॥ अर्थत्रयकल्पनस्य प्रवृत्तिनिमित्तार्थत्रयकल्पनस्य। ननुनिर्मूलमेवप्रवृत्तिनिमित्तत्रयकल्पनमित्यतआह ॥उक्तमिति ॥ विरुद्धत्वयुक्तेनिषेधयुक्ते अन्यत्वयुक्ते वस्तुनिकेवलाकारोवर्ततेतेषांत्रयाणांप्रवृत्तिनिमित्तार्थानांमध्येएकार्थात्मनिएकप्रवृत्तिनिमित्तार्थभूतेभावेभावान्यत्वात्तद्विरोधित्वाच्चाभावइत्येवशब्दोवर्तते । नतुकेवलोअइतिशब्दः । प्रवृत्तिनिमित्तपौष्कल्याभावादितिभावः । उपसंहरति ॥ तस्मादिति ॥ यद्वाचओमितीत्यत्रोंकारस्यभगवन्नामत्वमुक्तंतदयुक्तं । अकारोकारमकाराद्यात्मकस्योंकारस्यहिरण्यगर्भादिप्रतिपादकत्वादित्यतःप्रमाणेनैवशंकांपरिहरति ॥ यतइत्यादिना ॥ तद्व्याख्यानरूपःप्रणवोपीतियोज्यं सृष्ट्यावृंहणाद्ब्रह्मनामा उच्चलोकगतत्वादुकारवाच्यः । प्रद्युम्नाद्यान्प्रद्युम्नसंकर्षणवासुदेवनारायणात्मकान् । नतुकामपुत्रानिरुद्धादिजीवानित्यर्थः ।

भा० । नचनिषेधस्वरूपेविरुद्धताचान्यताचास्तीत्येतावतापूर्णार्थताभवति । तदार्थत्रयकल्पनस्यवैयर्थ्यात् । उक्तंहिशब्दनिर्णये । विरुद्धतानिषेधान्यभावयुक्तेहिकेवलः । अकारोवर्ततेतेषामेकार्थात्मन्यभावके । वर्ततेभावइत्येवनत्वइत्येवकेवलइति । तस्मान्नारायणएवाकारवाच्य इतिसिद्धं । यतोकारःसदाविष्णोर्वाचकत्वेनसंस्थितः । तस्माद्वर्णत्रयात्मायंप्रणवोपित्रयात्मकं । हरिमेवसदावक्तिनैवान्यंकंचनकचित् । सृष्टिकर्तात्रह्मनामायोसृजच्चतुराननं । अंतर्यामीविरिंचस्यसोकारार्थोजनार्दनः । वैकुंठलोकआस्तेसद्वितीयवपुषाहरिः । उकारवाच्यःसविभुर्नृसिंहोरुद्रनामकः। रौद्रत्वात्सशिवस्यापिसृष्टासंहारकारकः । अंतर्यामीशिवस्यापिमकारार्थःप्रकीर्तितः । एवंत्रियात्मकंविष्णुंप्रणवोयंत्रियात्मकः । एवंपृथगिवाचष्टेबिंदुर्वक्त्यनिरुद्धकं । प्रद्युम्नाद्यान्नादपूर्वाःसर्वान्नारायणात्मकान् ।

प्रणवप्रतिपाद्यरूपांतराण्यपिदर्शयति ॥ पद्मनाभेति ॥ पद्मनाभदामोदरसंकर्षणवासुदेवप्रद्युम्नानिरुद्धपुरुषोत्तमनारायणाभिधामूर्तीरित्यर्थः । तस्यवाएतस्यबृहतीसहस्रस्येत्यादिव्याचष्टे ॥ षट्त्रिंशतिसहस्राणीत्यादिना ॥ अत्रयोजना । हरेःषट्त्रिंशतिसहस्राणिस्त्रीरूपाणि तावंतिपुमाकाराण्यपिरूपाणि बृहत्युक्थार्णगानि स्वरव्यंजनभेदभिन्नबृहतीसहस्रमतानि । तुशब्देन व्यंजनगतानिस्त्रीरूपाणिस्वरगतानिपुंरूपाणीतिविशेषंद्योतयति । तथाषट्त्रिंशतिसहस्राणिस्त्रीरूपाणितावंतिपुमाकाराण्यपिरूपाणिअह्नामभिमानिषुअहोरात्रात्मकदिनाभिमानिषुसर्वशःसर्वेषुसूर्यरूपेषुवर्ततइति । एतेनषट्त्रिंशतमक्षराणांसहस्राणिभवंति । तावंतिशतसंवत्सरस्याह्नामित्येतद्व्याख्यातंभवति । जीवाक्षरेणेत्येतद्विवृणोति ॥ एतैःपुरुषगैरित्यादिना ॥ जीवेत्यस्यार्थः पुरुषगैरिति ॥ अक्षरेणेत्यस्यार्थो बृहत्युक्थेति ॥ कदाचिद्भगवान्विष्णुःएतैःपुरुषगैःबृहत्युक्थव्यवस्थितैःव्यंजनगतैःस्त्रीरूपैःसूर्यगतानितन्नियमिताहर्गतानिपुमाकाराण्याप्नोति । कदाचिदेतैर्बृहत्युक्थस्वरगतैःपुरुषरूपैःसूर्यगतानिसूर्यतन्नियमितरात्रिगतानिस्त्रीरूपाण्याप्नोति । कदाचिद्भगवान्विष्णुःएतैःसूर्याहर्गतैरेवपुंरूपैःअक्षरगतानिस्त्रीरूपाण्याप्नोति । कदाचित्तैःसूर्यनियमितरात्रिगतैरेवस्त्रीरूपैरक्षरगतानिस्वरगतानिपुमाकाराण्याप्नोति । कदाचिद्भगवान्विष्णुःसूर्यगतानिस्त्रीरूपाणितैरेवतद्गतै

भा० । पद्मनाभादिकाएवमूर्तीर्नारायणोत्तराः । प्रणवोयंवदत्यष्टौतस्मान्नान्याभिधायकइतितत्वसारे । षट्त्रिंशतिसहस्राणिबृहत्युक्थार्णगानितु । स्त्रीरूपाणिहरेस्तावदह्नामप्यभिमानिषु । सूर्यरूपेषुरूपाणिपुमाकाराणिसर्वशः । एतैःपुरुषगैरूपैर्बृहत्युक्थव्यवस्थितैः । कदाचिद्भगवान्विष्णुः

रेवपुंरूपैराप्नोति । तथातैरेवाक्षरगतैरेवपुंरूपैरक्षरगतान्येवस्त्रीरूपाण्याप्[redacted]गतानिपुमाकाराणिस्त्रीरूपाणिकृत्वा स्त्रीरूपाणिपुमाकाराणिविधायतैस्तान्याप्नोति । कदाचित्सूर्यरात्रिगतानिस्त्रीरूपाणिपुमाकाराणिकृत्वाअक्षरगतान्यक्षरस्वरगता निपुमाकाराणिस्त्रीरूपाणिविधायतैस्तान्याप्नोति । एवमक्षरगतपुमाकाराणिविधायतैःस्त्रीरूपैःसूर्यगतस्त्रीरूपाणिपुमाकाराणिकृ त्वातान्याप्नोति । अक्षरगतस्त्रीरूपाणिपुमाकाराणिकृत्वातैःपुमाकारैःसूर्यगतानिपुंरूपाणिविधायतान्याप्नोति । कदाचित्सूर्यग तानिपुमाकाराणिकृत्वातान्याप्नोति । स्त्रीरूपाणिचयुगपदर्धनारीनरात्मनाविधायाक्षरगतानिरूपाणिपुमाकाराणिरूप्याकाराणि चार्धनारीरूपेणविधायजीवाक्षरगतार्धनारीरूपैःसूर्यगतरूपाणितैर्वाजीवगतरूपाण्याप्नोतीत्यर्थः । अत्यलौकिकंरमणप्रकारमु क्त्वोपसंहरन्घटकमाह ॥ आत्मेच्छयेति ॥ पुंरूपस्वरूपैःपुमाकारस्वरूपैः । प्रमदाकारस्वरूपै र्युगपदेवपुंरूपप्रमदारूपस्वरूपै रित्यर्थः । जीवाक्षरेण जीवाहरित्येकवचनाभिप्रायमाह ॥ एकीकृत्येति ॥ अनकाममारइत्येतद्व्याचष्टे ॥ सएवेति ॥ मायां रमायां । मायामित्यस्यार्थांतरं स्थित्वात्मस्त्रीतनाविति ॥ एतेनकेवलंभगवतःस्त्रीपुमात्मरूपमेलनेनप्राणस्योत्पत्तिर्नेतिध्व न्यते। अनेच्छामारशब्दस्योपनिषद्यभावादौपनिषदंपदंस्ववचनेनव्याचष्टे ॥ वायोरिति ॥ जीवाक्षरेणेत्येतत्स्ववचनेनस्पष्टंव्या

भा० । पुमाकाराणितानिच । कृत्वासूर्यगतान्येवस्त्रीरूपाणिविधायच । तान्याप्नोतिचपुंरूपैस्तैरेवाक्षरगानिच । स्त्रीरूपाणिजगन्नाथः प्राप्नोत्यात्मेच्छयाप्रभुः । पुंरूपप्रमदारूपस्वरूपैरमतेस्वयं । एकीकृत्यचतान्येवद्विरूपोरमतेतथा । सएवरमतेमायांस्थितात्मस्त्रीतनौहरिः । प्राण स्योत्पत्तिकामःसन्ननेच्छामारनामकइत्यर्धनारीनारायणतंत्रे । वायोरुत्पत्तिकामो मायांरमायांरमतइतिअनकाममारः ।

चष्टे ॥ जीवस्थितेनेति ॥ तेनचाक्षराख्यमितिजीवशब्दितसूर्यस्थाहराख्यस्वरूपेणजीवाक्षराख्यंस्वरूपमाप्नोतीत्यर्थः । यद्वाते नजीवेस्थितेनाक्षरनामकेनतदेवाक्षराख्यंस्वरूपमाप्नोति । तेनचसूर्याहर्गतेनतदेवस्वरूपमाप्नोतीत्यर्थः । एतेनजीवाक्षरेणजीवा हराप्नोति । जीवान्हाजीवाक्षरंजीवाक्षरेणजीवाक्षरं । जीवान्हाजीवाहरितियोजनासूचिताभवति ॥ उक्तार्थेप्रमाणमुक्तमंतरंगंच ज्ञापकमाह ॥ यदक्षरादिति ॥ यद्वा तद्वाइदंबृहतीसहस्रमित्यादिकंयदक्षरादक्षरमतीतिश्लोकव्याख्यानायप्रवृत्तमितिसंगत्यं तरंचोक्तंभवति । अतएवयदक्षरादितिश्लोकस्ययद्विष्ण्वाख्यंब्रह्माक्षराद्बृहत्यक्षरगेनरूपेणैत्यहराख्यंसूर्यमेतिसूर्याच्चाक्षरगतमेति तदुभयंस्त्रीपुंरूपेणयुक्तंभवति । तथाक्षरादक्षरगतरूपेणाक्षरगतमेवस्त्रीरूपमेति । एवंपरस्परंस्त्रीपुमात्मनासंयुक्तंभगवद्रूपंस्त्रीरू पेणयुजोदेवाअश्वरूपेणरथेयुक्तावहंतीतियोजनांतरमुक्तंज्ञेयं ॥ नैनंवाचेत्यत्रैनंस्त्रियंब्रुवन्नवदतिपुमांसंचब्रुवन्नवदतीत्युभयाकार निषेधंकेचिद्व्याचक्षते । तदपाकरोति ॥ पुमांसमिति ॥ केवलंपुमांसंस्त्रियंचवदन्नवदतीत्युक्त्वादुभयसंस्थानात्मकमेवरूपंप्र तीयते नतुतदुभयाभावइत्यर्थः । ननुकेवलमितिकुतःसंयोज्यव्याख्येयं सर्वथातदुभयाभावएवार्थःकिंनस्यादित्यतआह ॥ अ स्त्रीति ॥ अस्त्रीपुमानितिवदन्नवदतीतिनपुंसकइतिब्रुवन्नबदतीत्युक्त्वात्स्त्रीत्वपुंस्त्वयोःप्रतीयमानत्वादित्यर्थः । एतेनास्त्रीपुमां

भा० । जीवस्थितेनाक्षरगेनाक्षरनाम्नास्वरूपेणजीवाख्यसूर्यस्थितमहराख्यंस्वरूपमाप्नोति तेनचाक्षराख्यंस्वरूपमाप्नोति । यदक्षरादक्षरमे तियुक्तमित्यस्यव्याख्यानरूपत्वाच्चैतदवसीयते । पुमांसंस्त्रियंचवदन्नेवनवदतीत्युक्त्वादुभयात्मकंरूपंप्रतीयते । अस्त्रीपुमानितिब्रुवन्नपिनवदती त्युक्त्वाच्चस्त्रीत्वंपुंस्त्वंचप्रतीयतेविष्णोः ।

समितिविपरिणामंविनेतिशब्दाध्याहारेणापियोजनोक्ताद्रष्टव्या । न[redacted]काकारोप्यत्रनिषिध्यते नतावतास्त्र्या द्याकाराभ्यनुज्ञेतिचेन्न । तर्हिवदन्नवदतीतिस्त्रियंपुमांसंचवदन्वदतीत्यु[redacted]दितिभावः ॥ १ ॥ नन्वस्त्रीपुमानिति वदन्नवदतीतिकुतइत्यतआह ॥ नचेति ॥ २ ॥ यद्वाननुकेवलस्त्रियंब्रुवन्यथानवदतितथाकेवलमस्त्रीपुमान्नपुंसकइतिवदन्नवद तीत्यर्थःकिंनस्यादित्यतआह ॥ नचेति ॥ यद्वाननुवदन्वदतिकश्चनेत्यतस्त्रियंपुमांसंचवदन्वदत्युभयरूपत्वादितियथाव्याख्या यतेतथास्त्रीपुमांसंवदन्वदतीतिव्याख्यानंकिंनस्यादित्यतआह ॥ नचेति ॥ ४ ॥ यद्वाननुयथालौकिकस्त्रीपुरुषवैलक्षण्याभिप्रा येणस्त्रियंपुमांसंचवदन्नपिवदतीतिनञोनुषंगेणव्याख्यायते तथास्त्रीपुमांसंवदन्नपिनवदति नपुंसकरूपस्यालौकिकत्वादितिकिंन व्याख्यायतइत्यतआह ॥ नचेत्यादिनाऽनुषज्यतइत्यंतेन ॥ ५ ॥ वदन्वदतीत्यत्रअस्त्रीपुमानितिवदन्नपिवदतीतियोजनामं गीकृत्याप्यविरोधेनव्याचष्टे ॥ नपुंसकेप्रमाणाभावादित्यादिना ॥ नन्वेवंयोजनायांनपुंसकत्वमपिव्यज्ञास्येत । कथमियं योजनाभवतीत्यतउक्तं ॥ नपुंसकइति ॥ अप्रामाणिकत्वेनायोग्यार्थस्यप्रतीत्ययोगाल्लौकिकस्त्रीपुंविलक्षणत्वादेवास्त्रीपुमानि तिवदन्वदतीतियोजनाभवत्येवेत्यर्थः । विष्णोर्नपुंसकंरूपंनास्तीत्यत्रसयुक्तिकंप्रमाणमाह ॥ स्त्रीति ॥ तस्माद्बिंबभूतस्यनपुंस

भा० । नचनपुंसकरूपंभगवतःकुत्रचिदुक्तं । प्रसिद्धमेवचरूपद्वयं । अतोनपुंसकेवदन्नपिनवदतीतिनतद्वदनुषज्यते । नपुंसकेप्रमाणाभा वादेव । लौकिकस्त्रीपुंविलक्षणत्वादस्त्रीपुमानित्यपिवदन्नितिभवति । स्त्रीपुंरूपद्वयंविष्णोर्नतृतीयंकथंचन ।

कत्वाभावादेवस्वरूपनपुंसकाभावादेवसाक्षान्नपुंसकःस्वरूपतोनपुंसकःक्वचिदपिमुक्तिभागीतिनोच्यतइत्यर्थः । ननुतत्तदाकार त्वेनहरेःसर्वत्रावस्थानांगीकारान्नपुंसकेतादृशरूपस्यांगीकार्यत्वात्कथंतृतीयाकारनिषेधइतिचेन्न । सर्वत्रनिर्दोषस्यसौंदर्याविरोधि नोरूपस्यांगीकारेणदुष्टभावस्याभावादितिभावः । तनुनपुंसकरूपाभावेकथंनपुंसकशब्दवाच्यत्वमित्यतआह ॥ नचेति ॥ अनेच्छा मारनामकइत्यत्रानकाममारइत्यस्यनामत्वमुक्तं । तत्रज्ञापकमाह ॥ भवतीति ॥ जीवाक्षरेणजीवाह राप्नोतीतिवदन्नकाममारो भवतीतिपदाभावान्नानकाममारत्वंविधीयते । किंत्वनकाममारस्तन्नामकोभगवान्जीवाक्षरेणजीवाहराप्नोतीत्येवविधीयते । अ न्यथाप्नोतीत्यस्यकर्त्रध्याहारोभवतीतिपदस्यचसंबंधइतिबहुकल्पनाप्रसंगइतिभावः । नन्वपौरुषेयेणमंत्रेणोक्तत्वात्कथंऋषिणोक्त मित्युच्यते ऋषिश्चकइत्यतआह ॥ ऋषज्ञानइति ॥ ततश्चकिमित्यतआह । मंत्राणामिति ॥ अतोभगवतोमंत्रद्रष्टृत्वाद्ब्राह्म णानिविनियोजकवाक्यानिमंत्रोक्तमप्यर्थंऋषिणोक्तमितिप्राहुरित्यन्वयः । प्रथमइत्यस्यएकराट्स्वतंत्रोद्रष्टेत्यस्यचव्यावर्त्यमाह ॥ तत्प्रसादादित्यादिना ॥ ब्राह्मणंपश्चात्तैर्ब्रह्मादिभिर्दृष्टं मंत्राउपनिषदश्चऋषिभिर्मधुछंदप्रभृतिभिःपृथगेकैकदेशतोदृष्टाः ।

भा० । साक्षान्नपुंसकस्तस्मान्मुक्तिभागीनतुक्वचिदितिब्रह्मांडे । नचरक्षइतिनपुंसकशब्दमात्रेणरावणादयोनपुंसकाभवंति । भवतीतिप दाभावादनकाममारइतिभगवान्नामैवेतिज्ञायते । ऋषज्ञानइतिह्यस्माद्धातोःसर्वज्ञएकराट् । वेदद्रष्टापरमऋषिर्हयास्यःपुरुषोत्तमः । मंत्राणांप्रथ मोद्रष्टासर्वेषांयतएवतु । ऋषिणोक्तमितिप्राहुर्मंत्रोक्तंब्राह्मणान्यतः । तत्प्रसादाद्धितपसापश्चान्मंत्रान्प्रपेदिरे । ब्रह्माद्याब्राह्मणंपश्चात्तैर्दृष्टमृषिभिः पृथक् । मंत्राश्चोपनिषच्चैवनाकृत्वासुमहत्तपः ।

प्र[illegible]ह्मादाभमेत्रोपनिषदर्शनसाधनतपोपे क्षयापृथक्तपोविनातेनैवतपसाब्राह्मणंयतोऽदृश्यतातोमंत्राश्चोपनिषदश्चब्राह्मणादुत्तमाः । तत्रमंत्रोपनिषदोर्मध्येउपनिषच्छ्रेष्ठा कुतः । युक्तावस्थायांध्यानावस्थायांअधिगम्यत्वादित्यर्थः । अथदेवरथस्तस्यवागुद्धिरित्यादौशरीररथस्यप्रकृतत्वात्तेनरथेनायात मित्युक्तेशरीराख्येनेत्येवप्रतीतेर्यथावद्व्याचष्टे ॥ तेनरथेनेति ॥ ऋभुपदेनऋभवोनामतपसासोमंप्राप्ताःसहस्रशइतिभागवतोक्ताः केचनदेवाइत्यन्यथाप्रतीतेर्व्याचष्टे ॥ ऋभवइति ॥ द्वादशाष्टादिकेष्वपीति ॥ द्वादशादित्येष्वष्टवसुषुएकादशरुद्रेषुदश विश्वेषुसहस्रऋभुष्वपिआदित्यादिसमाख्यावर्ततइत्यर्थः । समग्रंमंत्रंप्रमाणेनव्याचष्टे ॥ निर्मितइति ॥ प्राणोधितिष्ठति । हे अश्विनौवांरथमित्युक्त्याप्रतीतंसाम्यंनिराकर्तुमुक्तंवायुनासहविष्णुनाधिष्ठितइति ॥ दिव्योरथोध्यात्मंदेहनामकोरथश्चत स्यदेहाख्यस्यरथस्यमनसाध्यानंवाचास्तवनंकर्मणाकायिकेननमस्कारादिनेत्येवंमनोवाक्कर्मभिर्योगोयदाभवेदित्यर्थः ॥ विविध

भा० । प्रथमंयद्ध्यास्येनदृष्टंकेनचिदीक्ष्यते । विनापृथक्तपोदृश्येद्ब्राह्मणंमुनिभिर्यतः । मंत्राश्चोपनिषच्चैवब्राह्मणादुत्तमास्ततः । तत्राप्यु पनिषच्छ्रेष्ठायुक्तावस्थाधिगम्यतइत्यादिप्रमाणविवेके । तेनरथेनाध्यात्मंशरीराख्येनाधिदैवंरथरूपेण । ऋभवइत्यत्रदेवानांसाधारणंनाम । आदि त्यावसवोरुद्राविश्वेऋभवइत्यपि । सर्वेदेवसमाख्याचद्वादशाष्टादिकेष्वपीतिशब्दनिर्णये । निर्मितोदैवतैःसर्वैर्विष्णुनावायुनासह । अधिष्ठितोरथो दिव्यःसोध्यात्मंदेहनामकः । सम्यग्योगोयदातस्यमनोवाक्कर्मभिर्भवेत् । देहाख्यस्यरथस्यैवतदानारायणात्प्रभोः ।

॥ १२९ ॥

मिति ॥ शरीरेद्वासप्ततिसहस्रनाड्यादिषु अधिदैवंचानेकेषुस्थानेषु विविधरूपेणवासयुक्तत्वादित्यर्थः । दिवोदुहितृनामक मिति ॥ द्युशब्दवाच्यमहालक्ष्म्यभिमतवेदद्वारामनसोत्पन्नत्वादपरोक्षज्ञानंदिवोदुहितृनामकमित्यर्थः । सुदिनेइत्यस्यतात्पर्यं शोभनेइति ॥ ननुज्ञानावस्थामुक्त्यवस्थयोःकथमहःशब्दवाच्यत्वमित्यतउक्तं ॥ उभेएवेति ॥ परेमुख्येअहनीइतिपूर्वो क्तेउभेएव ज्ञानस्याहर्दिनंप्रकाशश्चेति । प्रकाशरूपत्वान्मुक्तेश्चस्वरूपप्रकाशरूपत्वादितिभावः । नकेवलमभिमन्यमानस्योत्प त्तिरपितुतदभिमानिनामपीत्याह ॥ जायंतइति ॥ एषामपरोक्षज्ञानादीनामभिमानिदेवताःरूपद्वयीत्युक्त्यादेवताइतिबहुवचनं घटितंज्ञेयं । सर्वस्त्रीणांमध्येक्रीडादिगुणैरुत्तमत्वादित्यर्थः ॥ ज्ञानात्मत्वादिति ॥ अहर्दिनंप्रकाशश्चेतिवचनादितिभावः । नकेवलंभारत्यावायोरूपद्वयस्यचाध्यात्ममभिमन्यमानेउत्पन्ने भूतंभूताभिमानीचेत्युक्तन्यायेनतदभिमानिरूपेणोत्पत्तिः किंतुबा ह्याभ्यंतरयज्ञार्थमागमनकालेधिदैवरथस्याश्वादिभिर्योगोभारत्यादयोविष्णोर्लक्ष्म्यांजायतइत्यप्यर्थमाह ॥ अधिदैवइति ॥ तद्व

भा० । विविधंवासवत्वात्तुविवस्वन्नामकाच्छुभं । संसारवारकंज्ञानंदिवोदुहितृनामकं । विष्णुतत्वापरोक्षाख्यमहनीद्वेचशोभने । ज्ञानावस्थामु क्त्यवस्थेत्युभेएवाहनीपरे । जायंतेदेवतास्त्वेषांभारतीवायुरेवच । जीवन्मुक्तेश्चमुक्तेश्चदातारूपद्वयीप्रभुः । सर्वस्त्रीणामुत्तमत्वाच्चौर्नामाश्रीरुदाहृता । दुहितास्याभारतीतुनित्याहेयस्वरूपतः । अहरित्युच्यतेवायुर्ज्ञानात्मत्वात्तथैवच । अधिदैवेरथेप्येतेविष्णोर्लक्ष्म्यांप्रजज्ञिरे । रथेनतेनदेवेशौविष्णुवायू जगत्पती । आयातमितिदेवौतौप्रार्थयेद्यज्ञकर्मणि । अन्यथाप्यर्थयेदेतौज्ञानेच्छुःपुरुषःसदा । जपन्मंत्रद्वयंनित्यमातेननिमिषस्तथा ।

पेभ्योविभक्ताएवांशाःअध्यात्ममुत्पद्यंतअंशिनामधिदैवरथउत्पादइति [redacted] वामवइत्येतद्व्याचष्टे ॥ रक्षणमिति ॥ हयास्यत्वाच्चेति ॥ चकारादाशुवानाद्वतेरश्वीतिप्रमाणानुसारेणाशुगतित्वाच्चेतिसमुच्चिनोति । अतएवतत्वप्रकाशिकायामाशुगतीइत्यर्थउक्तः । नकेवलमश्विनोयंमंत्रोभगवत्परः किंत्वन्येपीत्याह ॥ ऐंद्रेति ॥ ऐंद्राग्नेयादिकाःसर्वमंत्रामुख्यतः इंद्रादिनामानंहरिमेववदंति । मुख्यतोन्यंनवदंति । यथा । ऐंद्रसानसिंरयिं । अग्निमींळइत्यादिः । केचिदैंद्रादिमंत्राहरिमेववदंति । नान्यं नाकिंरिंद्रत्वदुत्तरोनज्यायाँअस्तिवृत्रहन् । विमेकर्णापतयतोविचक्षुरित्यादिः । तत्रद्विवचनोमंत्रोवायुदेहस्थंपृथक्संस्थंचकेशवंवदति । यथा । आतेनयातमित्यादिप्रकृतः । अथवा द्विवचनोमंत्रःपृथक्रूपद्वयेनसंस्थंकेशवमेववदति । यथाघर्मासमैताश्विवृतंव्यापतुस्तयोर्जुष्टिंमातरिश्वाजगामेत्यादिः । बहुवचनयुक्तेष्वपिमंत्रेषुतथातथैवार्थः । बहुत्वप्रतिपादकोमंत्रोपिदेवतांतरगाणिपृथग्रूपाणिचप्रतिपादयति ॥ यथा विश्वेदेवाःशृणुतेत्यादिः । अथवाबहुवचनोमंत्रःपृथग्रूपेणसंतंकेशवमेववदति ॥ यथाइंद्रोमायाभिःपुरुरूपईयतेयुक्ताह्यस्यहरयःशतादशेत्यादिरितिभावः । सुदिनेइत्यस्याक्षरार्थमाह ॥ सुखमिति ॥ विवस्वतःसूर्यस्यतद्रथस्यचयोगेदिवोद्युलोकस्यदुहिताआलोकःउभेअहनीअहोरात्रसंज्ञेजायेतेइत्यपव्याख्यानिरासायस्वव्याख्यांपरिष्करोति

भा० । रक्षणंवांसमीपेस्यान्ममेत्यध्यात्ममेवच । हयास्यत्वाच्चाश्विनौतावित्याहपरमाश्रुतिः । ऐंद्राग्नेयादिकाश्चैवंसर्वेमंत्राहरिंपरं । वदंति मुख्यतोनान्यंसर्वनामानमच्युतं । अथवावायुदेवस्थंपृथक्संस्थंचकेशवं । मंत्रोद्विवचनोवक्तिथाबहुवचस्वपीत्याद्यैतरेयसंहितायां । सुखंददतइतिसुदिने ।

॥ विवस्वतइति ॥ नन्वहनीइतिद्विवचनेनद्वित्वसिद्धेरुभेइतिव्यर्थमित्यतआह ॥ अहनीइतीति ॥ उभयोरुभयविधयोः । अपव्याख्यानंनिराह ॥ नचेति ॥ ज्ञापकाभावादितिभावः । नन्वहनीजायतेइत्यहोरात्रजनकत्वंलिंगमस्तीत्यतआह ॥ नचेति ॥ अहश्चाहश्चाहनीत्यहर्द्वयंवाहःशब्दस्यदिनपरत्वेदिनद्वयंवोच्यते । नत्वहोरात्रेअहनीइत्युच्येते । सरूपाणामेकशेषइतिसरूपाणामेवैकशेषविधानादितिभावः । विरूपाणामपिसमर्थानामेकशेषोवक्तव्यइतिवार्तिकवचनाद्विरूपाणामप्येकशेषइतिचेन्न । तत्रह्यर्थसारूप्यमंगीकृत्यशब्दवैरूप्येप्येकशेषोभ्यनुज्ञातः । वक्रदंडःकुटिलदंडश्चवक्रदंडावित्याद्युदाहरणात् । नचशब्दतोर्थतश्चविरूपयोरहोरात्रशब्दयोरेकशेषोभिप्रेतइतियत्किंचिदेतत् । साधकाभावमुक्त्वाबाधकंचाह ॥ सूर्यस्येति ॥ तथाचाश्विश्रुतिविरोधइतिभावः । नचावरनाम्नामुत्तमपरत्वमस्तीतिवाच्यं । सत्यमेतदिंद्रांतेषु । तदवराणांतुविशेषलिंगसद्भावएवस्वावरशब्दवाच्यत्वमन्यथानेतिऋग्भाष्येनियमितत्वात् । पूर्वप्रसिद्धवर्जंतुशक्रांतादेवतामताः ॥ इंद्रावराविशेषेणलिंगेनैवपृथक्पृथगिति ॥ नचात्रसौरंलिंगमस्तीत्युक्तं लिंगविरोधंचाह ॥ सप्तेति ॥ सप्तयुंजंतिरथमेकंचक्रमितिश्रुतेरितिभावः । नचोत्तरवाक्येएकोश्वोवहतिसप्तनामेतिएकएवाश्वःकेवलंसप्तनामेत्युक्तमितिवाच्यं । एकएवाश्वचेतनःसप्तरूपीसप्तनामावहतीतितदर्थस्यतत्वप्रदीपिका

भा० । विवस्वतोविष्णोःसकाशादिवोदुहिताअहनीचजायंते । अहनीइतिद्विवचनेनद्वित्वेसिद्धेप्युभेइतिवचनमध्यात्माधिदैवतयोरुभयोरपिवचनार्थं । नचसूर्यरथोत्रवर्ण्यते । नचाहोरात्रेअहनीइत्युच्येते । सूर्यस्याश्विनामाभावात् । सप्ताश्वत्वाच्चतद्रथस्य । चतुरश्वत्वंचात्रोच्यते ।

यांव्यवस्थापितत्वेनसप्ताश्वत्वाविरोधादिति । बाधकांतरमाह ॥ अध्यात्मेति ॥ श्रोत्रेपक्षसीचक्षुषीयुक्तेइत्यश्वानामध्यात्मरथसंबंधात् । अत्रोक्तस्यविवस्वतोप्यध्यात्मरथसंबंधा त्सूर्याश्वानांसूर्यस्यचाध्यात्मरथसंबंधाभावान्नायंसौरोरथो नहिदेहाख्येरथेसूर्योधिष्ठाता प्राणस्तथानुगमादितिसूत्रकृतैवनिराकृतत्वात् ॥ उक्तंचभाष्ये । विष्णुमेवानयन्देवाविष्णुंभूतिमुपासते ॥ सएव सर्ववेदोक्तस्तद्रथोदेहउच्यतइति ॥ अहःशब्देनाहोरात्रविवक्षायांसुदिनइतिरात्रिविशेषणंचस्यात्तच्चायुक्तमित्याह ॥ नचेति ॥ ननुमेघच्छन्नेह्यदुर्दिनमितिवचनात्तदतिरिक्तदिनांतर्गतरात्रिःसुदिनमेव ।महात्मदर्शनादियुक्तंसुदिनमितिव्यवहारात्तदंतर्गतत्वा द्वारात्रिःसुदिनमित्यतआह ॥ असुदिनस्येति ॥ स्वपक्षेवैयर्थ्यपरिहरति ॥ अस्मिन्निति ॥ तदुपपादयति ॥ जीवन्मुक्तिरिति ॥ ननुमुक्तौभोगबाहुल्यात्सुदिनत्वमस्तु । जीवन्मुक्तेःकथंतदित्यतआह ॥ सयइति ॥ उपास्तेपरोक्षतोजानातिच । अस्यापरोक्षज्ञानिनः । कथं । समुक्तोयद्यत्कामयतेतत्सर्वमस्मदात्मनःप्रसादात्कर्मसृजतइत्यर्थः । नन्वसतिप्रारब्धेज्ञानानंतरमेवमोक्षनियमात्कथंज्ञानावस्थायाःभोगविशेषहेतुत्वं तदानींतनभोगस्यमुक्तावनुष्ठितसाधनेनैवोपपत्तेरित्यतआह ॥ नहिमुक्तावित्यादि

भा० । श्रोत्रेपक्षसीचक्षुषीयुक्तेइत्यध्यात्मसंबंधाच्च । नचरात्रौसुदिनमितिप्रयोगोदृष्टः । असुदिनस्यापितत्एवजातत्वाद्व्यर्थविशेषणताच । अस्मिन्पक्षेतुलौकिकाहर्व्यावृत्त्यर्थसुदिनेइतियुज्यते । जीवन्मुक्तिश्चमुक्तिश्चहिमुख्येसुदिने । सयआत्मानमेवलोकमुपास्तेनहास्यकर्मक्षीयतेऽस्माद्धेवात्मनोयद्यत्कामयतेतत्तत्सृजतेइतिज्ञानावस्थायांमुक्तौभोगबाहुल्यकारणत्वात्सापिमुक्तिवत्सुदिनं । नहिमुक्तावधिक्यार्जनमस्ति । नहीयते यत्रगत्वायत्रगत्वानवर्धतइतिवचनात् ।

ना ॥ नपुनरार्जनमस्तीति ॥ पुनरार्जनंनास्तीतिहेतोःमुक्तौभोगविशेषार्थसाधनान्यनुष्ठानायेश्वरेणावशेषितप्रारब्धकर्मभोगविशेषणाधिकार्जनार्थं ब्रह्मणांशतकालात्तुपूर्वमारब्धसंक्षयः ॥ ब्रह्मणस्त्वेवतावत्वंपंचाशद्ब्रह्मणस्तथा ॥ रुद्रस्यविंशदेवस्यादिंद्रस्यार्कादिकेदशेत्याद्युक्तदिशाऽवरक्रमेणकिंचित्किंचित्कालंज्ञानित्वेनावस्थानमितिसुदिनमेवांततएकगुणोपासकानांज्ञानदेहापगमनानंतरमेवमुच्यमानानामपितद्देहएवज्ञानोदयानंतरंकिंचित्कालावस्थानमपिसुदिनमेवेतिभावः । नन्वेवंतर्हिज्ञानात्पूर्वावस्थायाअपिमुक्तिसाधनानुष्ठानहेतुत्वात्सुदिनत्वंस्यादित्यतआह ॥ अज्ञानादिति ॥ जिज्ञासोरुत्तमद्रोहादिनापुनःपतनसंशयेनज्ञाननिश्चयान्नसुदिनत्वं । अपरोक्षज्ञानिनस्तुतदवस्थावधृते ब्रह्मसंस्थोमृतत्वमेत्येवेत्यादिसूत्रश्रुतिबलेनमोक्षनियमाद्यथायोग्यमानंदोत्कर्षापादकसाधनानुष्ठाननियमाच्चज्ञानावस्थायाःसुदिनत्वमिति ॥ ननूक्तानुपपत्तिबलात्सूर्येरथांगीकारोनयुक्तश्चेत्माभूदश्विरथोवर्ण्यतइतिकिंनस्यादित्यतआह ॥ नचेत्यादिना ॥ तद्रासभइति ॥ तद्रासभोनासत्यासहस्रमाजायमस्यप्रधनेजिगायेतिप्रथमाष्टकाष्टमाध्यायवचनादित्यर्थः ॥ नचेति ॥ स्वोत्तमवाचिशब्दस्यतत्रसर्वथानवकाशादितिभावः । ननुभवत्पक्षे प्राणाश्विविवस्वच्छब्दानांत्रयाणामप्यनुपपत्तिरित्यतआह ॥ योदेवानामिति ॥ नकेवलंयोदेवानामितिनिगमनबलादत्रत्यप्राणादिश

भा० । अतोज्ञानोत्पत्तिसमनंतरमेवमुक्तौनपुनरार्जनमस्तीतिकिंचित्कालंज्ञानित्वेनावस्थानमपिसुदिनमेव । ज्ञानात्पूर्वंतुपतनसंशयादेवनसुदिनं । नचाश्विरथोवर्ण्यते । नह्यश्विरथयोगादहनीजायेते । एकरासभयुक्तोहितद्रथः । तद्रासभोनासत्यासहस्रमितिवचनात् । नचविवस्वच्छब्दोश्विनोर्विद्यते । योदेवानांनामधाएकएवेतिविष्णोःसर्वनामानिप्रसिद्धानिच ।

ब्दवाच्यत्वं किंतूपक्रमाच्चेत्याह ॥ युजइति ॥ सूर्योदयोदेवायत्स्यंदनंवहंतीतत्सत्यस्यसत्यमितिविष्णोःतद्रथस्यचोपक्रांतत्वाच्चेत्यर्थः । अध्यायांतेद्विरुक्तेरभिप्रायवर्णनमुखेनाध्यायार्थनिगमयति ॥ अतइति ॥ सर्वनामाविष्णुरेवबृहतीसहस्रादावुक्तइतिसिद्धमित्यर्थः ॥ ८ ॥ इतिश्रीमद्विट्ठलाचार्यपुत्रेणश्रीमत्तीर्थाचार्यचरणसेविनाश्रीनिवासेनरचितायांश्रीमन्महैतरेयभाष्यार्थरत्नमालायांद्वितीयप्रघट्टकेतृतीयोध्यायः ॥ २ ॥ ३ ॥

ॐएषपंथाइत्यादौवासुदेवादिचतुर्मूर्तितयाप्रकृतस्यनारायणस्यप्रागुक्तसर्वशब्दवाच्यत्वेनलब्धगुणपूर्तिप्रकारोनिरूप्यतेसिसृक्षया । यद्वासृष्टिवाक्यानांसमन्वयमुखेनजगज्जन्मादिकारणत्वादिगुणपूर्तिप्रकारोनिरूप्यते । तत्रतावत्कालकोटिविहीनत्वलक्षणकालाग्र्यत्वं । गुणाग्र्यत्वंचोच्यते ॥ आत्मेति ॥ इदमस्यजगतोग्रेप्रलयेआत्मा आततगुणोनारायणएकएवासीदित्येकोनारायणआसीदित्यादौवाप्रसिद्धमित्यर्थः । यद्वेदंसर्वंजगदपेक्ष्यात्मैवकालतोगुणतश्चाग्रइतिविभक्तिपरिणामेनविनायोज्यं। अथवेदंसर्वंजगदपेक्ष्यात्मैवसर्वैर्गुणैरग्र्यःकालाग्र्यत्वस्यापिगुणत्वाद्गुणाग्र्यइत्यनेनैवतल्लाभोत्रानुसंधेयः। रमायाअविनष्टशरीरतयावस्थानादात्मनःकालतोग्रत्वंकथमित्यतउच्यते ॥ नान्यत्किंचनेति ॥ विष्णोरन्यत्किंचनालौकिकंश्रीतत्वंसर्वदैकप्रकारेणविद्यमानमपि

भा० । युजोयुक्ताअभियत्संवहंतीत्यादिनातस्यैवप्रस्तावाच्च । अतोविष्णुरेवमुख्यतःसर्वनामोक्तइतिसिद्धं ॥ ८ ॥ २० ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेश्रीमन्महैतरेयोपनिषद्भाष्येद्वितीयप्रघट्टकेतृतीयोध्यायः ॥ २ ॥ ३ ॥ ७ ॥

उप० । आत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिष-

॥ १३२ ॥

कालतोग्रंनासीत्कुतइत्यतउक्तमात्मास्वामीनारायणइति ॥ अस्यास्तुतद्वशत्वादविनष्टशरीरतयाविद्यमानापिनाग्रस्था नहिपराधीनजीवनंजीवनमितिभावः । तद्वशत्वमुपपादयितुमुक्तं नमिषदिति ॥ नोद्रिक्तगुणानुभववदित्यर्थः । अतोगुणैरूनत्वात्तद्वशत्वमितिभावः । ब्रह्मादीनांतुकालतोग्रत्वंनशंकार्हमित्युच्यते ॥ नान्यत्किंचनेति ॥ अन्यद्ब्रह्मशंकरादिकंकिंचनकिमपिप्रलयेनासीत् । ननुकालआसीत्पुरुषआसीदितिपुरुषावस्थानमुक्तमितिचेत्स्वरूपतोविद्यमानमपिदेहाद्यभावान्नासीदेव । किंचान्यत्किंचनमिषज्जाग्रत्नासीदित्यर्थः । ननुश्रियोमुक्तानांचसत्वात् । असुप्तत्वाच्चकालाग्रत्वंस्यादित्यतउक्तं । नान्यत्किंचनमिषदिति । किंचनालौकिकंसंसारिभ्योन्यच्छ्रीतत्वंमुक्तजातंचमिषज्जाग्रदपिस्वातंत्र्येणोन्मेषाभावान्नमिषदजाग्रदेवेत्यर्थः। पूर्वमविनष्टशरीरत्वात्कालाग्र्यत्वमाशंक्यसमाधानमधुनाविलुप्तावबोधत्वमाशंक्येतिभेदः । अथवा रमाद्यपेक्षयायद्गुणाग्र्यत्वमुक्तं तत्रहेतुर्नान्यत्किंचनमिषदिति । विष्णोरन्यद्रमाब्रह्मादिकंयत्किंचनजगत्तत्स्वातंत्र्येणमिषद्यथायोग्यगुणानुभवयुक्तमेवनासीत्तदाकिमु मिषद्गुणसंपूर्तेरुद्रिक्तानुभववन्नासीदितिवक्तव्यमितियोज्यं । उक्तंगुणाग्र्यत्वंसमर्थयितुंसृष्टिकर्तृत्वमुच्यते ॥सईक्षतेति॥ सआत्मालोकांस्तदभिमानिनश्चसृजासृजेत्रक्ष्यामीतीक्षतऐक्षतऐच्छत्। सइमान्लोकान्तदभिमानिनश्चासृजत कांस्तान्कथंचेत्यत उक्तमंभइति ॥ प्रथममापोसृजत्ताःसृष्ट्वांभोमरीचिर्मरमित्येतान्लोकान्असृजदितियोज्यं । तत्रांभआदिशब्दार्थउच्यतेऽद्इत्यादिना ॥ अदोसौद्यौः परेणदिवं दिवःपरेमहरादयोलोकास्तदभिमानिनश्चांभइत्युच्यंते । कुतःयस्मान्महरादिषुदिव्यपिवि

उप० । त्सईक्षतलोकान्नुसृजाइतिसइमांल्लोकानसृजतांभोमरीचीर्मरमापोऽदोंभःपरेणदिवंद्यौः

ष्णुःप्रकर्षेणप्रत्यक्षरूपेणतिष्ठतीतिप्रतिष्ठामहरादित्यस्तस्मादित्यर्थः । अंतरिक्षंमरीचयइतिव्युत्पत्तिरत्रानुसंधेया । सूर्यमरीचीनां विशेषेणायनाद्गमनादंतरिक्षंमरीचयः । पृथिव्यांक्षिप्रंम्रियंतइतिपृथिवीमरः । याअधस्ताल्लोकोत्पत्तेरंडाद्बहिर्जातामहराद्यभिमानिन्योदेवतास्ताआपः । येषामेवलोकाभिमानित्वेनपुनर्जननाल्लोकत्वं । सआत्मापुनरीक्षतैच्छत् । इमेलोकास्तदभिमानिनःतन्मूलरूपभूतामहराद्याश्चनुइदानींमयासृष्टाइतःपरंलोकान्सृजाइति । पूर्वसृष्टानेवलोकपालकरूपेणलोकस्थतत्वनियामकरूपेणापि स्रष्टुमैच्छदितिभावः । सआत्माद्भ्योन्नामकेभ्यःपूर्वसृष्टेभ्यश्चेतनाचेतनरूपेभ्यस्तत्वेभ्योंशानुद्धृत्यमहत्तत्वाभिमानिनंपुरुषंब्रह्माणं विशेषेणांशेनोद्धृत्याहंकारादितत्वाभिमानिभिःसहामूर्छयन्मूर्तमकरोत्सर्वतत्वतदभिमानिपरिवृतंब्रह्मणोविग्रहंपिंडाकारेणाजनय दितियावत् । तंब्रह्माणंअभिप्रत्य(त)पदैच्छत्तस्यांगोत्पत्तिमैच्छदितियावत् । तस्याभितप्तस्यैवमीप्सितस्यमुखंशिरोनिरभिद्यताजा यतांडंयथांऽडवत् । तदनंतरंतस्यमुखमास्यंवागिंद्रियगोलकंवागिंद्रियंचनिरभिद्यताभूत् । मुखाद्ध्यात्मंवाङ्नामकोवह्निर्वाच उत्पत्त्यनंतरमधिदैवमग्निरग्निनामावह्निश्चाभूत् । नासिकेघ्राणगोलकमिंद्रियंश्वासवायुश्चअध्यात्मप्राणनामावायुसूनुर्नासिक्योवा युःप्राणात्प्राणोत्पत्त्यनंतरमधिदैवंवायुर्वायुनामकःसएवाभूत् । एतेनप्राणाद्वायुरजायतश्वसनंमातरिश्वेतिविरोधः । श्वसितंमातरि श्वेत्यादावधिदैवरूपस्यश्वासोत्पन्नत्वोक्तेरत्रप्राणनामकाध्यात्मरूपादुत्पत्त्युक्तेरितिनिरस्तं । नासिकाशब्दितश्वासवायोर्मातरिश्वो

उप० । प्रतिष्ठांतरिक्षंमरीचयःपृथिवीमरोयाअधस्तात्ताआपःसईक्षतेमेनुलोकालोकपालान्नुसृजाइतिसोऽद्भ्यएवपुरुषंसमुद्धृत्यामूर्छयत्तमभ्य तपत्तस्याभितप्तस्यमुखंनिरभिद्यतयथांडंमुखाद्वाचोग्निर्नासिकेनिरभिद्येतांनासिकाभ्यांप्राणः

त्पत्तेरिहांगीकारात् । प्राणाद्वायुरित्यस्याध्यात्मंप्राणरूपोत्पत्त्यनंतरंश्वासवायोरेवाधिदैवंवायुरित्यंगीकारात् । अक्षिणीगो लकंचक्षुरिंद्रियंचाध्यात्मंचक्षुर्नामकश्चक्षुषोनंतरमधिदैवमादित्यनामकःसूर्यः । एतेनचक्षोःसूर्यइतिविरोधइतिनिरस्तं । कर्णौगो लकमिंद्रियंचाध्यात्मंश्रोत्रनामकामित्रादयः । श्रोत्रोत्पत्तेरनंतरंद्वितीयेनरूपेणतएवदिङ्नामानः । एतेनदिशःश्रोत्रादितिविरो धइतिनिरस्तं । कर्णपदेनेंद्रियस्यापिग्रहणात्त्वग्गोलकंस्पर्शेंद्रियत्वग्गतलोमानिचनिरभिद्यंत । त्वचोध्यात्मंलोमनामानःतदनंत रमधिदैवमोषध्यादिनामानःपारिजाताद्याः । एतेनतनूरुहाणिमहीरुहाविश्वतनोर्नरेंद्रेतिपारिजातादीनांलोमभ्यउत्पत्त्युक्तेस्त्वयं उत्पत्तिःकथमितिनिरस्तं । हृदयंगोलकं मनसोहृदयादध्यात्ममनोनामानोगरुडादयो मनसउत्पत्त्यनंतरमधिदैवंचंद्रमाश्चंद्रगरु डादयस्तएवाभूवन् । एतेनचंद्रमामनसोजातइतिनिरस्तं । हृदयशब्देनाप्यत्रमनसोग्रहणात् । नाभ्याअध्यात्ममपाननामाऽपा नोत्पत्त्यनंतरमधिदैवंद्वितीयरूपेणमृत्युस्तन्नामामुख्यवायुः । शिश्नादध्यात्मंरेतोनामा रेतसउत्पत्त्यनंतरमधिदैवमन्नामाशिवो भूदित्यर्थः । यद्वामुखादास्याद्गोलकात् वागिंद्रियंनिरभिद्यत । वाचोवागिंद्रियाद्वागग्निश्चेतिद्विरूपोवह्निरुत्पन्नः । नासिकाभ्यां प्राणःप्राणवायुःघ्राणात्प्राणोवायुरितिद्विरूपोवायुपुत्रइत्यादियोजनाद्रष्टव्या । अस्यांयोजनायांभाष्यविरोधंतत्रैवापाकरिष्यामः

उप० । प्राणाद्वायुरक्षिणीनिरभिद्येतामक्षिभ्यांचक्षुश्चक्षुषआदित्यःकर्णौनिरभिद्येतांकर्णाभ्यांश्रोत्रंश्रोत्रादिशस्त्वङ्निरभिद्यतत्वचोलोमा निलोमभ्यओषधिवनस्पतयोहृदयंनिरभिद्यतहृदयान्मनोमनसश्चंद्रमानाभिर्निरभिद्यतनाभ्याअपानोअपानान्मृत्युःशिश्नंनिरभिद्यतशिश्नाद्रेतोरेत सआपः ॥ ९ ॥ (२१)

॥ १ ॥ २१ ॥ अत्राग्नेर्विनिर्धूतोपाध्यवस्थायांप्रलयेआत्माजीवइदंब्रह्मेत्यासीत्तदन्यन्मिषच्चेतनंनासीदन्यत्किंचनस्वरूपतएवना सीदित्याद्यपव्याख्यानिरासायप्रमाणेनव्याचष्टे ॥ एकइत्यादिना ॥ तुशब्दोवधारणे एकएवेत्यन्वयः । इदमस्येतिषष्ठ्यर्थेद्वि तीया नप्रथमा येनैक्यंस्यादितिभावेनाग्रइत्यस्यतात्पर्यंप्रलयइति । यथाब्रह्मादीनांदेहनाशस्तथानरमायाइतिभावेनोक्तंरमया सहेति ॥ यद्वासर्वजगन्नियामकरूपैरेकीभूतयामूलरूपयारमयासहेत्यनेनतस्याअपिलयंसूचयति ॥ यथोक्तं । हरेरत्यंतसामी प्यंलयोलक्ष्म्याःप्रकीर्तितः ॥ सुप्तिस्तुप्रकृतेःप्रोक्ताअतीवभगवद्रतिः ॥ अनास्थान्यत्रचप्रोक्तेति । नित्यगुणत्वादाततगुणत्वादा त्मा । तनुविस्तारइतिधातोराततत्वादात्मा । योग्यतयाततेर्गुणाविशेष्यतयान्वीयंते । गुणानामाततिश्चकालतःसंख्यादिनाचेति भावः । विभक्तिविपरिणामंविनायोजयति ॥ इदमिति ॥ समस्तेशइत्यात्मशब्दःस्वामित्वार्थतयापिव्याख्यातः । प्राचीनयोज नायांकालाग्र्यत्वंवक्तुमस्यप्रलयस्थितिरुक्ता गुणाग्र्यत्वमात्मपदेनोक्त मधुनातूभयमपीदमपेक्ष्याग्रइत्यनेनलब्धं । रमामपेक्ष्यका लतोग्र्यत्वंकथमित्येतच्छंकापरिहारकंनान्यत्किंचनेत्यंशंव्याचष्टे ॥ रमापिसाविद्यमानापिनाग्रस्थेति ॥ आद्योपिशब्दोनके वलंब्रह्मादिःकिंतुरमापीतिसमुच्चये द्वितीयोनौचित्यद्योतकः । कुतोनाग्र्येत्यतस्तत्रहेतुतयात्मपदलब्धमुक्तं तद्वशत्वादिति ॥ तद्वशत्वोपपादकस्यनमिषदित्यस्यतात्पर्यं गुणैरिति ॥ ब्रह्मादीनांकालाग्र्यत्वाभावोपपादकंनान्यत्किंचनेतिअंशंव्याचष्टे ॥

भा० । एकोनारायणस्त्वासीत्प्रलयेरमयासह । नित्याततगुणत्वात्सआत्मेतिश्रुतिषूदितः । इदंसर्वमपेक्ष्यासौकालतोगुणतस्तथा । अग्र्यएव समस्तेशस्तद्वशत्वाद्रमापिसा । विद्यमानापिनाग्रस्थागुणैरूनाततोयतः ।

नब्रह्मासीन्नशिवआसीन्नान्यच्चासीदिति ॥ हिरण्यगर्भःसमवर्तताग्रे । एकोरुद्रोनद्वितीयायतस्थइत्यादिश्रुत्याऽऽपातप्रती तार्थमनुसृत्यकेचिद्ब्रह्मशर्वयोःप्रलयावस्थानमाहुस्तन्निरासायपृथक्क्रियासंबंधोक्तिः । कथंनासीत्स्वरूपस्यनित्यत्वादित्यतआह ॥ मिषदिति ॥ नेत्यनुवर्तते । ब्रह्मावायुःप्रलयेवृत्तिरूपज्ञानेनैवप्रतिभातपरावरोपिकिंचनकदाचनभगवदीक्षणक्षणेक्वचिद्वि षयविशेषेननिमिषन्नजाग्रद्वर्तते । शिवोन्यच्चकिंचनकिमपिक्वचिदपिननिमिषदित्यर्थः । तदुपपादयति ॥ सुप्ताइति ॥ अत्रवि रोधःस्पष्टंविरोधोद्धारेस्माभिरुद्धृतोनुसंधेयः । श्रियोमुक्तानांचसुप्त्यभावात् कालाग्र्यत्वमाशंक्यतत्परिहारत्वेननान्यत्किंचनमि षदित्येतद्व्याचष्टे ॥ असुप्ताइति ॥ यद्रमादिसर्वगुणाग्र्यत्वमुक्तं तत्रहेतुतयापिनान्यत्किंचनमिषदित्येतद्व्याचष्टे ॥ नचान्य इति ॥ स्पष्टीकरिष्यतिचैतत् । उन्मिषतामपिरमासहितमुक्तानांपराधीनत्वेनानुन्मेषणमुक्तंतद्दृष्टांतेनाह ॥ पराधीनेनेति ॥ सर्वदामिषंतोपीत्यन्वयः । नन्विदंसर्वंजगदपेक्ष्यात्मैवकालतोगुणतश्चाग्र्यइत्युक्तैवकालाग्र्यत्वस्यलाभादस्याग्रआसीदितिकिमर्थं प्रलयेस्थितिरुच्यतइत्यतआह ॥ कालेति ॥ वक्तुमुपपादयितुं । सईक्षतेत्यादिव्याचष्टे ॥ सऐच्छदिति ॥ लोकनामवत्वेहेतु

भा० । नब्रह्मानशिवश्चासीन्नैवान्यच्चमिषत्क्वचित् । सुप्तास्तत्रयतोजीवाःसर्वेब्रह्मशिवादिकाः । असुप्ताःश्रीश्चमुक्ताश्चस्वतंत्रोन्मेषवर्ज नात् । अनुन्मेषाएवतेपिस्वतंत्रोन्मेषएकराट् । नारायणोनचान्योस्तिपूर्णोन्मीलगुणात्मकः । पराधीनेनवित्तेनभुंजन्नपिहिभिक्षुकः । वित्तवा नितिनैवोक्तस्तथाश्रीर्मुक्तिगाअपि । मिषंतोप्यन्यतंत्रत्वान्नमिषंतःकथंचन । सर्वदाप्येकएवायंस्वतंत्रोनापरःक्वचित् । कालाग्र्यत्वंवक्तुमस्यप्रलये स्थितिरुच्यते । सऐच्छद्भगवान्विष्णुःस्रष्टुंलोकाभिमानिनः ।

लोकाभिमानिनइति । सइमान्लोकानसृजतेत्यत्रप्रथममपोसृजत् । सृष्ट्वांभआदीन्यसृजदित्यर्थमभिप्रेत्यव्याचष्टे ॥ सलोकेभ्य इत्यादिना ॥ याअधस्तादित्यस्यतात्पर्यंलोकेभ्यःपूर्वतनानिति । लोकत्रयकथनमुपलक्षणमितिभावेनदिवमाकाशमुर्वीचेत्यादि द्विसप्तकानित्युक्तं । सईक्षतेमेनुलोकाइत्यादिव्याचष्टे ॥ इतिसृष्ट्वेति ॥ इतिपूर्वोक्तप्रकारेणब्रह्मांडांतर्लोकान्सृष्ट्वापुनस्तेषांअधिदैवंप्रसिद्धयज्ञादिना ऽध्यात्मंप्राणाग्निहोत्रादिना पूज्यत्वसिद्धयेतानेवलोकान्स्रष्टुमैच्छत् । सोऽद्भ्यएवपुरुषंसमुद्धृत्यामूर्च्छयदित्येतद्व्याचष्टे ॥ अन्नामकेभ्यइति ॥ अत्रयोजना पूर्वसृष्टेभ्योन्नामकेभ्यस्तेभ्यश्चेतनेभ्योरुद्रादिचेतनानामंशानुद्धृत्यब्रह्माणंचांशेनोद्धृत्यरुद्राद्यैरप्रधानैःसहसमयोजयत्तथैवाचेतनानांचभागानुद्धृत्यचेतनाचेतनाराशिंपिंडवदेकस्थंविमिश्रीभावेनावस्थितंविदधे । ततश्चपिंडवत्पिंडाकारंसर्वाधिकत्वात्पूर्णत्वात्पुरुषाभिधंब्रह्माणमसृजदिति । तमभ्यतपदित्येतद्व्याचष्टे ॥ पुनरिति ॥ स्यादित्यालोचनान्नान्यत्तपोविष्णोःकदाचनेतिवचनादतपदित्यस्यैच्छदितिव्याख्यानं । मुखंनिरभिद्यतयथांडमित्येतद्व्याचष्टे ॥

भा० । लोकाभिधानवद्देवान्जडलोकांश्चशाश्वतः । सलोकेभ्यःपूर्वतनानबाख्यान्महदादिकान् । ब्रह्मशर्वादिकान्सृष्ट्वाजडैःसहजनार्दनः । दिवमाकाशमुर्वीचससृजेथद्विसप्तकान् । इतिसृष्ट्वासलोकांस्तुपुनस्तानेवलोकपान् । अंडांतःस्रष्टुमैच्छच्चतेषांपूज्यत्वसिद्धये । अन्नामकेभ्यस्तेभ्यश्चपूर्वसृष्टेभ्यएवच । सर्वजीवाधिकत्वात्तुब्रह्माणंपुरुषाभिधं । अंशेनोद्धृत्यरुद्राद्यैःसहचैनमयोजयत् । तथैवाचेतनानांचभागानुद्धृत्यपिंडवत् । चेतनाचेतनंराशिमेकस्थंविदधेप्रभुः । पुनरैच्छज्जगन्नाथस्तस्यांगोत्पत्तिमच्युतः ।

अंडवदिति ॥ मुखंनिरभिद्यतेत्येतत्प्रकारांतरेणव्याचष्टे ॥ भिन्नमिति ॥ मुखाद्वागित्यस्यतात्पर्यं ॥ तत्रवाङ्नामकमिति ॥ वाचःसृष्ट्यनंतरंअग्निनामकमधिदैवंरूपमुत्पन्नमितिभावेनपुरातनंवाङ्नामकंरूपंयदग्निरितिगीयते तद्द्वितीयंरूपमित्युक्तं । नासिकाभ्यांघ्राणइत्यादिव्याचष्टे ॥ तथैवेति ॥ अत्रापिनासिकापदेनगोलकमिंद्रियं तद्गतःश्वासादिरूपःप्राणवायुश्चगृह्यते । अक्षिभ्यामित्यस्यार्थश्चक्षुषइति ॥ चक्षुरादित्यइतिद्विरूपः । आप्योबभिमानीवरुणःद्विरूपेणश्रोत्रदिङ्नामकद्विरूपेण । हृदयान्मनोमनसश्चंद्रमाश्चेत्यस्यार्थोहृदयादिति ॥ वैदिकंगरुडोप्यैंद्रोयज्ञादिविषयंमनइत्युक्तरीत्यापृथक्पृथङ्मनोबुद्ध्यभिमानिनः । तन्नामानोऽध्यात्मंमनोनामानोऽधिदैवंगरुडादिनामानः । एतेनचंद्रग्रहणमुपलक्षणमित्युक्तंभवति । त्वचोध्यात्मंलोमाभिमानित्वाल्लोमनामानःअधिदैवंदेववृक्षरूपत्वात्पारिजातमंदरादिवृक्षनामानःकल्पलताद्योषधिनामानश्चेतिद्विविधाइत्यर्थः । प्राक्छिन्नग्रहणंपाणिपादपायूपलक्षणमित्यभिप्रेत्यव्याचष्टे ॥ हस्ताभ्यामित्यादिना ॥ द्विविधोयज्ञइतिचसंबध्यते । यज्ञइत्युप

भा० । अंडवन्मुखमस्यासीत्प्रथमंतुशिरोभिधं । भिन्नमास्यंपुनस्तस्यविष्णोरेवेच्छयाप्रभोः । तत्रवाङ्नामकंरूपंवह्नेरासीत्पुरातनं । तस्यैवाथद्वितीयंचयदग्निरितिगीयते । तथैवनासिकातोभून्मुख्यवायोःसुतोमरुत् । प्राणोवायुरितिद्वेधाचक्षुषोभूत्तथारविः । द्विरूपएवकर्णोभ्यांमित्रधर्माऽऽप्यवित्तपाः । दिग्देवताद्विरूपेणबभूवुःसर्वएवच । हृदयाद्गरुडानंतशिवचंद्राःपृथक्पृथक् । मनोबुद्ध्यभिमानास्तेतन्नामानश्च जज्ञिरे । त्वचश्चरोमनामानोवृक्षनामानएवच । द्विविधाःपारिजाताद्याबभूवुर्ब्रह्मदेहतः । हस्ताभ्यांद्विविधःशक्रःपद्भ्यांतत्सूनुरेवच । यज्ञस्त्वजनिपायोश्च

लक्षणंशंभुश्चेतिग्राह्यं । गीतातात्पर्येयज्ञशंभुशचीसुताइत्युभयोःपाददेवत्वोक्तेः यमोनिर्ऋतिरेवचद्विरूपावितिचग्राह्यं । शिश्नाद्रेतआपश्चेत्यस्यार्थः रेतोम्नामेति ॥ रेतोऽम्नामाचेत्यर्थः । मुख्योमारुतो मुख्यवायुः ॥ १ ॥ २१ ॥ एवंनारायणस्यसृष्टिकर्तृत्वमुक्त्वाऽऽयतनप्रदत्वेनस्थितिकर्तृत्वंसृष्टेष्वपिप्राणस्योत्तमत्वंसृष्टदेवानामध्यात्ममवस्थानप्रकारश्चोच्यतेस्मिन्खंडे।वागादिभ्यःसृष्टास्ताअधिदैवस्थाएताअध्यात्मस्थादेवताअस्मिन्महत्यर्णवेप्रापतन्प्राविशन् । तंदेवसमूहं । आत्माविष्णुरशनापिपासाभ्यांतदभिमानिभ्यांमारुतरूपाभ्यामन्ववार्जत् । प्रापयामासायोजयत् । ताएतादेवताएतमात्मानमब्रुवन् नआयतनंप्रजानीह्यनुजानीहिदेहीतियावत् । यस्मिन्नायतनेप्रतिष्ठिताअन्नमदामेत्यब्रुवन्इत्यन्वयः । ताभ्योदेवताभ्योगां गोरूपंचतुर्मुखमानयत् । वासायसृष्ट्वाऽदादितियावत् । तादेवतास्तत्रप्रविश्येतिशेषः । न अयंगौर्भोगायनालंवाइत्यब्रुवन् । आत्मापुनस्ताभ्योश्वरूपंचतुर्मुखमानयदादिशत् । तादेवतास्तद्रूपेपिप्रविश्यैवनोयमश्वेपिप्रविश्यैवनोयमश्वोपिनालमित्यब्रुवन्ताभ्यःपूर्वसृष्टंपुमाकारंब्रह्माणंआनयत्पुनरावासायादात् । तास्तद्दृष्ट्वैवाब्रुवन्किमिति । सुकृतं भवतासुष्टुकृतं । अस्मद्भोगाययथापर्याप्तंस्यात्तथाकृतंबतेत्यवद

यमोनिर्ऋतिरेवच । रेतोम्नामाद्विरूपस्तुशिवएवचगुह्यतः । अपानोमृत्युरितिचमुख्योनाभेश्चमारुतः ॥ १ ॥ (२१)

उ० । ताएतादेवताःसृष्टाअस्मिन्महत्यर्णवेप्रापतंस्तमशनापिपासाभ्यामन्ववार्जत्ताएनमब्रुवन्नायतनंनःप्रजानीहियस्मिन्प्रतिष्ठिताअन्नमदामेति । ताभ्योगामानयत्ताअब्रुवन्नवैनोयमलमिति । ताभ्योश्वमानयत्ताअब्रुवन्नवैनोयमलमितिताभ्यःपुरुषमानयत्ताअब्रुवन्त्सुकृतंबतेति

न्नलमित्यवदन्नितियावत् । पुरुषदेहस्यपर्याप्तत्वमुपपाद्यते ॥ पुरुषइति ॥ पुरुषदेहःसुकृतंसुकृतसाध्यंतत्साधनंचवै । तादेवताःप्रति यथायतनंयोदेवोयेनस्थानेनोत्पन्नस्तमनतिक्रम्यप्रविशतेत्यब्रवीत् । अग्निर्वाग्भूत्वाधिदैवमग्निनामावह्निरंशेनवाग्भूत्वावाङ्नामकवह्निनासंश्लेषंप्राप्यतेनरूपेणमुख्यंप्राविशदेवमुत्तरत्रापियोजना । एतेनाधिदैवरूपस्यवाग्भावेऽधिदैवरूपमपरंनस्यात् । वाङ्नामकरूपांतरस्यविद्यमानत्वादग्नेर्वाग्भावश्चकथमितिनिरस्तं । तंविष्णुमशनापिपासेतन्नामकेमुख्यवायुरूपेआवाभ्यामानुकूल्येनयथात्वच्छासनानुगौनित्यंभवावतथाप्रजानीह्यनुज्ञापयेत्यब्रूतामित्यर्थः । आत्मा तेअशनापिपासेअब्रवीत् । किमिति । वांएतास्वेवदेवतास्वाभजामिप्रवेशयामि । तासुदेवतासुभागिन्यावग्रभागार्हौकरोमितस्मादेतासुप्रविशतमिति । तस्मादग्रभागभाक्त्वाद्यस्यैकस्यैदेवतायैहविर्गृह्यतेदीयतेतस्यांदेवतायामशनापिपासेभागिन्यौभवतः । नचअशनापिपासाभ्यामन्ववार्जदितितयोःस्थानक्लृप्तेरुक्तत्वात्पुनःप्रार्थनमभ्यनुज्ञानंचव्यर्थमितिवाच्यं । देवानांभोगशक्तयेप्रागशनापिपासाभ्यामन्ववर्जनमुक्तमिदानींवायोःसर्वत्राग्रभागलाभायसर्वदाप्रवेशनमुच्यतइत्यंगीकारात् ॥ २ ॥ २२ ॥ ताएताइत्यादिप्रमाणेनव्याचष्टे ॥ एव

उप० । पुरुषोवावसुकृतंताअब्रवीद्यथायतनंप्रविशतेत्यग्निर्वाग्भूत्वामुखंप्राविशद्वायुःप्राणोभूत्वानासिकेप्राविशदादित्यश्चक्षुर्भूत्वाऽक्षिणीप्राविशद्दिशःश्रोत्रंभूत्वाकर्णौप्राविशन्नोषधिवनस्पतयोलोमानिभूत्वात्वचंप्राविशंश्चंद्रमामनोभूत्वाहृदयंप्राविशन्मृत्युरपानोभूत्वानाभिंप्राविशदापोरेतोभूत्वाशिश्नंप्राविशंस्तमशनापिपासेअब्रूतामावाभ्यामभिप्रजानीहीतितेअब्रवीदेतास्वेववांदेवतास्वाभजाम्येतासुभागिन्यौकरोमीतितस्माद्यस्यैकस्यैचदेवतायैहविर्गृह्यतेभागिन्यावेवास्यामशनापिपासेभवतः ॥ २ ॥ २२ ॥

मिति ॥ रूपद्वयेनसृष्टाइतियोज्यं । दीव्यतेःस्तुत्यर्थत्वादेवमाइत्यस्यैवार्थस्तुवंतइति । प्रापतन्प्रकर्षेणापतन्निपेतुरित्यन्यथाप्रतीतेरर्थमाह ॥ दिव्यांबराइत्यादिना ॥ [illegible]युपसर्गोक्तार्थविवरणं दिव्यांबराइति ॥ अपतन्नित्यस्याविशन्निति । तमशनापिपासाभ्यामन्ववार्जदित्यत्रप्रसिद्धक्षुत्पिपासयोर्ग्रहणेत[illegible]नाशनापिपासेअब्रूतामितिउपसंहारविरोधइत्यतोव्याचष्टे ॥ तदेति ॥ प्रजानीहीत्यस्यबुध्यस्वेत्यन्यथाप्रतीतेरक्षरार्थमुत्तरत्रवक्ष्यंस्तात्पर्यमाह ॥ तेब्रुवन्निति ॥ गोऽश्वपुरुषशब्दानांप्रसिद्धार्थनिवारयन्व्याचष्टे ॥ गोरूपमित्यादिना ॥ तत्रप्रविश्येत्यादिशेषोक्तिः । ताभ्यःपुरुषमानयदित्यत्रगवाश्ववदिदानींसृष्टंपुरुषमितिप्रतीयतेतोव्याचष्टे ॥ पूर्वेति ॥ सुकृतंबतेत्यस्यतात्पर्यं तदृष्ट्वैवालमिति ॥ ताअब्रवीद्यथायतनमित्यादिव्याचष्टे ॥ विशतेति ॥ यथोत्पन्नाःयेनयेनशरीरावयवेनोत्पन्नास्तमायतनमनतिक्रम्यविशतेत्यब्रवीत्तथाविविशुश्चेतियोज्यं । तमशनापिपासेअब्रूतामित्येतद्व्याचष्टे ॥ अशनेति ॥ प्रजानीहीत्यस्यार्थःकुर्वाज्ञामिति ॥ अभीत्यस्यानुकूल्येनेत्यर्थमभिप्रेत्यतात्पर्यमुक्तं ॥

भा० । एवंरूपद्वयेनापिस्तुवंतोविष्णुमव्ययं । दिव्यांबराकुंडलिनःप्राविशन्नुदकार्णवं । तदाशनापिपासाख्यंद्विरूपंमारुतंपुनः । तस्मिन्देवसमूहेतुविष्णुःप्रावेशयत्प्रभुः । तेब्रुवन्देहिनोवासंयत्रचान्नमदामहे । गोरूपमेभ्योब्रह्माणंददौनारायणःप्रभुः । तत्रप्रविश्यतेदेवानालमित्यब्रुवन्पुनः । अश्वरूपंविरिंचंचपुनरेवाददात्प्रभुः । तद्रूपेपिप्रविश्यैवनालमित्यब्रुवन्पुनः । पूर्वसृष्टंपुमाकारंब्रह्मणोदात्पुनर्हरिः । तदृष्ट्वैवालमित्यूचुर्विशेततिसचाब्रवीत् ॥ विविशुश्चयथोत्पन्नाःसर्वेदेवाश्चतुर्मुखं ॥ अशनापिपासामानीतुद्विरूपोमारुतोवदत् ॥ कुर्वाज्ञामावयोश्चैव

॥ १३७ ॥

यथेति ॥ अभीत्यस्यार्थांतरंनित्यमिति ॥ भागिन्यौकरोमीत्यतःपरंअध्याहार्यमाह ॥ सर्वत्रेति ॥ तस्माद्यस्यैकस्यैचनेत्येतद्व्याचष्टे ॥ तस्मादित्यादिप्राणनामेत्यंतेन ॥ ग्रंथांतरेप्राणस्यभागभोक्तृत्वोक्तिपरिहारायोक्तंप्राणनामेति ॥ प्राणनामाशनापिपासानामाचमरुदेकएवेत्यर्थः । यद्वावायुरेकएवभागभुक्नान्योदेवइत्यर्थः ।एतास्त्वेवदेवतासुभागिन्यावित्याद्युक्त्याशनापिपासयोर्नाभिदेशस्थापानमृत्युप्रवेशेनभोगःप्रतीयते । तथानमंतव्यमित्याह ॥ नाभिस्थोपिसएवत्विति ॥ तथाचनतयोरशनापिपासाप्रवेशइतिभावः । मृत्यवपानयोर्देवताप्रायपठितत्वादेवतासुप्रवेशोनेतिप्रतीयते तांवारयत्यशनेति ॥ २ ॥ २२ ॥ प्रागीश्वरस्यायतनप्रदत्वमुक्तमधुनान्नदातृत्वेनापिपालकत्वंनियामकत्वंप्राणद्वारेणापिभोगशक्तिप्रदत्वसर्वात्मत्वंज्ञानक्रियामोक्षप्रदत्वादिगुणानंत्यंनियमनायरूपानंत्यंरूपाणामपिमूलरूपवद्व्यादिपूर्तिरित्यादिकमुच्यतेस्मिन्खंडे ॥ सआत्मा । लोकालोकपालाश्चेमेन्वेवं सृष्टाहि । येभ्योन्नंसृजासृजेइतीक्षतैच्छदित्यर्थः । सआत्माअपःपूर्वसृष्टाबाख्यान्महदादितत्वाभिमानिनोदेवान्अभिसम्यक्प्रीतिपूर्वमतपत् अपश्यत् । एतासांदेहांतरंस्रक्ष्यामीत्यैच्छच्च । अभितप्ताभ्योदृष्टाभ्यस्ततःपरंदेहविशिष्टत्वेनसिसृक्षाविषयाभ्यश्चताभ्यस्तद्देहैकदेशेभ्यःतासांमूर्तिरेकंशरीरमजायत । नन्वन्नसृष्टिंप्रतिज्ञायदेहसर्जनमयुक्तंइत्यतउक्तं ॥ यावैसेति ॥ यासा

भा० । यथात्वच्छासनानुगौ ॥ नित्यंभवावेतिहरिःसर्वत्रप्रविशेत्यमुं ॥ आहतस्मादेवतानांसर्वासांभागभुङ्मारुत् । एकएवप्राणनामा नाभिस्थोपिसएवतु ॥ अशनापिपासाषानश्चमृत्युश्चेतिचतुर्विधः । एकएवमहान्वायुःसर्वदेवेषुसंस्थितः ॥ २ ॥ २२ ॥

उप० । सईक्षतेमेनुलोकाश्चलोकपालाश्चान्नमेभ्यःसृजाइतिसोपोभ्यतपत्ताभ्योपितप्ताभ्योमूर्तिरजायतयावैसामूर्तिरजायता

मूर्तिरजायत तद्वैतदेव दिव्यावयवसुगंधसुस्वादुत्वादिसंपत्त्याभोग्यत्वाद्ब्रह्मणोदेवानांचान्नमितिवैप्रसिद्धं । यद्वातदन्नंवै अन्नाभिमानिनोब्रह्मणोविशेषेणरूपंवै । तस्मात्तस्यविशेषतोभोग्यमितिभावः । सृष्टंतदेनत्तदेतदन्नाख्यंचतुर्मुखरूपं । अति स्वावस्थानदेशमतिक्रम्यपराक्पश्चादजिघांसत् । अगच्छत् । हनहिंसागत्योरितिधातोः । ब्रह्मातद्भोग्यंरूपंवाचावागाख्येनकरणेनाजिघृक्षद्ग्रहीतुंभोक्तुमैच्छत् । तद्वाचाकेवलंव्याहरणेनग्रहीतुंभोक्तुंनाशक्नोत् । वागिंद्रियस्यकेवलंव्यवहारकारणत्वेपिभोगशक्तिप्रदत्वाभावादितिभावः । नन्वेवंसतिब्रह्मणइच्छामोघास्याद्भोगशक्तिप्रदोवायुस्तेनैवभोक्तव्यमितिज्ञानाभावश्चप्रसक्तइत्यतउच्यते ॥ सयद्धैनदिति ॥ सब्रह्मायद्वाचाग्रहीष्यद्ग्रहीतुमैच्छत् वर्णयतुमैच्छत् । एनदेतदन्नमभिव्याहृत्यसम्यक्तत्स्वरूपंवर्णयित्वैवात्रप्स्यत्तृप्तोभूत् । ब्रह्माह्यन्नमूर्तिंवर्णयितुमेवैच्छत् वर्णयित्वातृप्तिंचाप । तदुद्देश्यफलस्यलब्धत्वान्नेच्छादिवैयर्थ्यं । यत्तुवागाद्येकैकेंद्रियेणसर्वभोग्यभोगेच्छायास्तत्तल्लिंगेनप्रदर्शनंतत्केवलंक्रीडयादेवतातारतम्यज्ञापनायाभिहितमतोनाज्ञानादिकमितिभावः ।

उप० । ऽन्नंवैतत्तदेनत्सृष्टंपराङ्त्यजिघांसत्तद्वाचाजिघृक्षत्तन्नाशक्नोद्वाचाग्रहीतुंसयद्धैनद्वाचाग्रहीष्यदभिव्याहृत्यहैवान्नमत्रप्स्यत्तत्प्राणेनाजिघृक्षत्तन्नाशक्नोत्प्राणेनग्रहीतुंसयद्धैनत्प्राणेनाग्रहीष्यदभिप्राण्यहैवान्नमत्रप्स्यत्तच्चक्षुषाऽजिघृक्षत्तन्नाशक्नोच्चक्षुषाग्रहीतुंसयद्धैनच्चक्षुषाग्रहीष्यद्दृष्ट्वाहैवान्नमत्रप्स्यत्तच्छ्रोत्रेणाजिघृक्षत्तन्नाशक्नोच्छ्रोत्रेणग्रहीतुंसयद्धैनच्छ्रोत्रेणाग्रहीष्यच्छ्रुत्वाहैवान्नमत्रप्स्यत्तत्त्वचाजिघृक्षत्तन्नाशक्नोत्त्वचाग्रहीतुंसयद्धैनत्त्वचाग्रहीष्यत्स्पृष्ट्वाहैवान्नमत्रप्स्यत्तन्मनसाजिघृक्षत्तन्नाशक्नोन्मनसाग्रहीतुंसयद्धैनन्मनसाग्रहीष्यद्ध्यात्वाहैवान्नमत्रप्स्यत्

एवमुत्तराण्यपिवाक्यानियोज्यानि । अभिप्राण्याघ्राय । सब्रह्मायच्छिश्नेनाग्रहीष्यत् शिश्नव्यापारनिरोधेसर्वेंद्रियशक्तिकुंठनात्सएवसर्वेषुरतिंकर्तुमैच्छदेनदेतदन्नंविसृज्यतदालिंगनादिनारेतोविसृज्यतृप्तोभूदित्यर्थः । तदन्नमपानेनकरणेनाजिघृक्षद्ग्रहोक्तुमैच्छदपानंकरणीकृत्यसर्वेंद्रियभोग्यभोगंकर्तुमैच्छदितियावत् । तदावयदशक्नोत् । अपानव्यापारनिरोधेसर्वेंद्रियशक्तिकुंठनात्सएवसर्वेषुभोगशक्तिप्रदइतिभावः । वायोर्भोगशक्तिप्रदत्वोपसंहारपूर्वंभोक्तृत्वंचोच्यते ॥ सएषइति ॥ यद्वायुर्योवायुःसएषोन्नस्यग्राहयतीतिग्रहोभोजकः गृह्णातीतिग्रहोभोक्ताच । नकेवलमेतावत्किंत्वायुष्यादिप्रदश्चेत्युच्यतेऽन्नायुरिति ॥ यद्वायुर्योवायुरेषःअन्नात्मकदेहवतांदेवानामन्नदेवस्यब्रह्मणश्चायुष्यप्रदः । यद्वादेवानामायुर्ज्ञानक्रियामोक्षप्रदश्च । अयतेर्गत्यर्थत्वाद्गतेश्चज्ञानक्रियारूपत्वात् । देवानामन्योन्यापेक्षयाप्रवर्तकत्वेभगवत्स्वातंत्र्यंनस्यादित्यतःपुरावृत्तउच्यते ॥ सईक्षतेति ॥ सआत्मादेवानांब्रह्मशरीरेप्रवेशात्पूर्वमित्थमैक्षतेदंब्रह्मादिजीवजातंमदृतेमांविनामत्प्रेरणांविनाकथंनुस्यात्कथंविशिष्टज्ञानादिमत्स्यान्नकथमपि । तस्मादहमेतेषांचेष्टासिध्यर्थमेतेषुप्रवेक्ष्यामीत्याशयः । सपुनरित्थमैक्षत । कतरेणसुखतरेणोर्ध्वलोकंगतानांसुखसाधकेन । पूर्णानंदभगवत्संबंधित्वाद्वाकतरेण सुषुम्नाख्यद्वारेण । कतरेणपूर्णसुखेनवायुनासह प्रपद्यैप्राप्नुयामिति । ननुत्वत्प्राप्तिःकुतोधिष्ठानभूतेनब्रह्मणाकर्त्रातदधिष्ठितैर्वागादिभिरिंद्रियैःकरणैश्चस्वतःप्रवृत्तिसंभवादित्यतउच्यते ॥ सईक्षतेति ॥ सपुनरित्थमैक्षत ।

उप० । तच्छिश्नेनाजिघृक्षत्तन्नाशक्नोच्छिश्नेनग्रहीतुंसयद्धैनच्छिश्नेनाग्रहीष्यद्विसृज्यहैवान्नमत्रप्स्यत्तदपानेनाजिघृक्षत्तदावयत्सएषोन्नस्यग्रहोयद्वायुरन्नायुर्वाएषयद्वायुःसईक्षतकथंन्विदंमदृतेस्यादितिसईक्षतकतरेणप्रपद्याइतिसईक्षत

यदिब्रह्मणाकर्त्रावागादिभिरिंद्रियैःकरणैःस्वातंत्र्येणाभिव्याहरणादिविसर्जनांतंकर्मकृतंस्यादथतर्ह्यहंकःस्यांविशिष्टचेष्टावत्त्वाद्य
भावात्कथंविष्णुशब्दवाच्यःस्यामित्यर्थः । एवमीक्षित्वासनारायणःएतमेवमस्तकसीमानंविदार्यैतयासुषुम्नाख्ययाद्वाराप्रापद्यत
प्रविवेश । सैषाद्वाःविदारितत्वात्विदृतिः । तदेतन्नाड्याख्यंस्थानं पूर्णानंदस्यहरेःसंबंधित्वान्नांदनं । उपलक्षणमेतद्वासुदेवःप्र
पदाभ्यांचप्रविष्टइतिग्राह्यं । तस्यैवहरेरनिरुद्धप्रद्युम्नसंकर्षणाख्यस्यरूपत्रयस्यक्रमेणत्रयआवसथाःत्रीणिस्थानानि । अतएवत्रयः
स्थानविशेषाः अक्षिकंठहृदयरूपाःस्वप्नाः स्वःस्वतंत्रःसुखरूपोवाभगवान् अत्राप्नोतीतिस्वप्ननामकाः । आवसथानिर्दिश्यंते ॥
अयमिति ॥ अयं सन्निहितोक्ष्याख्यएकआवसथः । अयंतदनंतरंसन्निहितःकंठाख्योपरः । अयंतदनंतरंसन्निहितोहृदयाख्यो
न्यइतित्रयआवसथाइत्यन्वयः । नकेवलंरूपपंचकेननियामकत्वं किंतुमत्स्यादिभिरनंतैरपिरूपैरंतर्नियमनेनबहिरुपदेशेनच
ज्ञानप्रदत्वंप्राप्तोपद्रवनिवारणेनपालकत्वंचोच्यते ॥ सजातइति ॥ यश्चतुर्मुखस्यमूर्धन्यनाड्यनुप्रविष्टोनारायणःसएवभगवा
न्विष्णुःचतुर्मुखहृद्गुहायांमत्स्यादिरूपेणजातःप्रादुर्भूतःसन्भूतानिप्रवेष्टुंअभिसमंतात्सर्वेषुकालेषुविशेषेणाख्यदपश्यत्प्राविशच्च ।
इहभूतेषुमत्तोन्यंप्रवर्तकंवावदिषत्किं । किमाक्षेपे । कोपिनवदेदितिमत्वाप्राविशदित्यन्वयः । ननुमूलरूपिणोहरेर्भवतुसर्वनिया

उप० । यदिवाचाभिव्याहृतंयदिप्राणेनाभिप्राणितंयदिचक्षुषादृष्टंयदिश्रोत्रेणश्रुतंयदित्वचास्पृष्टंयदिमनसाध्यातंयद्यपानेनाभ्यपानितंयदि
शिश्नेनविसृष्टमथकोहमितिसएतमेवसीमानंविदार्यैतयाद्वाराप्रापद्यतसैषाविदृतिर्नामद्वास्तदेतन्नांदनंतस्यत्रयआवसथास्त्रयःस्वप्नाअयमावसथोयमा
वसथोयमावसथइति सजातोभूतान्यभिव्यख्यत्किमिहान्यंवावदिषदिति

मकत्वंकथमवताररूपस्येत्यतउच्यते ॥ सएतमेवेति ॥ सभगवान्मूलरूपीप्रादुर्भावरूपीचैतमेवपुरुषमवतारपुरुषंब्रह्मसर्वगुण
संपूर्णततमं देशतःकालतश्चातिशयेनततमभिसर्वदाऽपश्यत् । तत्रेंद्रशब्दप्रयोगएवलिंगमित्युच्यते ॥ इदमिति ॥ इतिशब्दो
हेतौ । रंगोवधारणे । इति यस्मादिदंमेरूपमदर्शमेवतस्मादहमिंद्रोनामइदंद्रोहवैनामेतिपुनर्वचनंप्रमाणप्रसिद्धिद्योतनाय । य
द्वायइदंद्रोहवैनामतमिदंद्रमिदंद्रशब्दस्यमुख्यार्थसंतंपारोक्ष्येणमध्येइतिवर्णस्योद्धारेणाव्यवधानेनेंद्रइत्याचक्षते । कुतः । देवा
ब्रह्माद्यावेदाद्यभिमानिनोवा परमात्मनोयत्परोक्षत्वंसम्यगज्ञातत्वंतत्रप्रीतियुक्ताइवअसुराणांसम्यगदर्शनंदेवानांप्रियमपि यो
ग्यानांतथादर्शनमप्रियं । प्रत्युतसम्यग्दर्शनमेवप्रियमितिइवशब्दः ॥ ३ ॥ २३ ॥ सईक्षतेतितच्छब्देनप्रकृतपुरुषनामकहिरण्य
गर्भपरामर्शभ्रांतिंवारयन्व्याचष्टे ॥ पुनरिति ॥ सोपोभ्यतपदित्यादिव्याचष्टे ॥ अबाख्याइति ॥ अभिसम्यक्प्रीतिपूर्वमि
त्यस्यतात्पर्यंसुविशालेत्यादि ॥ ताभ्योभितप्ताभ्यइत्यस्यतात्पर्यंतद्दर्शनात्तादिच्छातइति ॥ ताभ्यइत्यस्यषष्ठ्यंततयाविप
रिणामेनार्थः ॥ तासामिति ॥ पृथक्प्रातिस्विकदेहातिरिक्तः । विभक्तिविपरिणामंविनाताभ्यस्तदेहैकदेशेभ्योयासामूर्तिरजा

उप० । सएतमेवपुरुषंब्रह्मततममपश्यदिदमदर्शमितीँ ३ तस्मादिदंद्रोनामेदंद्रोहवैनामतमिदंद्रंसंतमिंद्रइत्याचक्षतेपरोक्षेणपरोक्षप्रियाइव
हिदेवाःपरोक्षप्रियाइवहिदेवाः ॥ ३ ॥ (२३) इत्यैतरेयोपनिषत्सुद्वितीयारण्यकेचतुर्थोध्यायः ॥ २ ॥ ४ ॥

भा० । पुनरैच्छत्केशवोसावन्नमेभ्यःसृजाइति ॥ अबाख्यादेवताःपूर्वंसृष्टाब्रह्मादिकाःपुनः । ददर्शसुविशालाभ्यांनेत्राभ्यांपुष्करेक्षणः ।
तद्दर्शनात्तदिच्छातस्तासांदेहोभवत्पृथक् ॥

यत तद्वैतदेव । ब्रह्मणो[illegible]वानांचाधिष्ठानतयापरममार्दवोपेतदिव्यावयवसुस्वादुतमत्वादिनाचान्नंभोग्यमित्यर्थतयाचोत्तरवाक्यं व्याचष्टे ॥ सर्वासामपिदेहैकदेशेभ्यइत्यादिना ॥ यासामूर्तिरजायतैतदन्नमन्नाभिमानिनोब्रह्मणोविशेषेणरूपंवाइत्यर्थसूचनायविरिंचेनविशेषतइत्युक्तं । मूर्तिरित्येकवचनार्थएकमिति ॥ ननुब्रह्मणएवभोग्यभोक्तृभावेदेवानांचतथात्वेदुःखंस्यादन्यथा तदेनत्सृष्टंपराङत्यजिघांसदितिभयेनापक्रमणोक्त्यसंभवइत्यतोव्याचष्टे ॥ भोग्येति ॥ यद्यपीत्यादावुपस्कर्तव्यं । तस्यब्रह्मणः । अन्नात्मकोदेहः । तद्वाचाजिघृक्षदित्यादिव्याचष्टे ॥ तदासाविति ॥ ननुसर्वज्ञस्यब्रह्मणोपानेनैवान्नग्रहोनवागादिभिरितिज्ञानसंभवात्किमितिवागादिभिरन्नग्रहमैच्छदित्यतउक्तस्य सयद्ध्येनद्वाचाग्रहीष्यदभिव्याहृत्यहैवान्नमत्रप्स्यदित्यादेस्तात्पर्यमाह ॥ जानन्नपीति ॥ उक्तरीत्याजानन्नपिवागादयःसर्वभोगशक्तिप्रदानेऽसमर्थाः किंत्वपानएवेतितारतम्यंप्रकाशयन्क्रीडयैवैवंचकार । वागादिभिरत्तुमैच्छदित्यर्थः । अशनापिपासादयोलोकेदुःखहेतवःकथंब्रह्मणोदेवानांचतेस्युरित्यतआह ॥क्षुदिति॥ आदिपदेनरिरंसादीनांग्रहणं । ऐश्वर्यमणिमादिः । यादृशानंदकामस्यतादृशानंदसंभवः ॥ विषयान्विनापिप्राकाम्यमितिवचनात्प्रा

भा० । सर्वासामपिदेहैकदेशेभ्योमिलितंशुभं । सर्वैरधिष्ठितंचैवविरिंचेनविशेषतः । दिव्यावयवसंपन्नमेकमेवसुलोचनं । भोग्यभोक्त्रात्मनानास्तितस्यदुःखंकथंचन । तेहिदेवाःस्वयंभोग्याःस्वयंभोक्तारएवच । क्रीडंतेमोदिनोनित्यंतथाप्यन्नात्मकस्त्वसौ । क्रीडयापाक्रमत्किंचित्तंतदासौचतुर्मुखः । अत्तुंवागादिभिःसर्वैरैच्छन्नाप्यशकत्तदा । जानन्नपिक्रीडयैवतारतम्यंप्रकाशयन् । एवंचकारब्रह्मासक्वाज्ञानंलोककर्तरि । क्षुत्पिपासादयश्चैवदेवानांभोगसाधकाः । नतुपीडाकरास्तेषामैश्वर्यादिगुणोन्नतेः ।

काम्यसिद्धिसंपादनत्वादितिभावः । तदपानेनाजिघृक्षदित्यादिव्याचष्टे ॥ अन्नमूर्तिमिति ॥ आशु स्वप्रयत्नविशेषंविनातिशीघ्रं । प्राणस्यभोगशक्तिहेतुत्वोपसंहारपूर्वंभोक्तृत्वोपपादकंसैषोन्नस्यग्रहइत्येतद्व्याचष्टे ॥ तस्मादिति ॥ गृह्णातीतिग्रहइत्यर्थमभिप्रेत्यभोक्तेति ग्राहयतीतिग्रहइत्यप्यभिप्रेत्यतत्प्रसादात्परेश्नंतीति । ननुस्वावरसर्वात्तृत्वंप्राणस्येवरुद्रादेरप्यस्ति सुपर्णशेषरुद्राणांसर्वात्तृत्वंविशेषतइतिवचनात् । स्वोत्तमभोक्तृत्वंकस्यापिनास्ति तत्कथमेतदितिचेन्न । इयदामननादितिउक्तन्यायेनाधिकारिजीववर्गेभगवद्भोग्याविरुद्धसर्वसारभोक्तृत्वंप्राणस्येवनकस्याप्यस्ति । भोगाश्चयेयानिचकर्मजातानि । सर्वंसपूतमश्नातिस्वदितंमातरिश्वनेत्यादेःरुद्रादीनांनतथेतिविवक्षितत्वात् । इंद्रादीनांतुस्वावरसर्वभोगएवनसंभवति प्रायेणात्तृत्वमिंद्रादेरितिवचनात् । तथाचतत्प्रसादात्प्राणप्रसादात्परेरुद्रादयःकिंचित्किंचिद्भगवद्भोग्यंविनास्वावरमेवाश्नंतिअखिलंनाश्नंति । परेइंद्रादयस्तुस्वावरेष्वप्यखिलंसर्वदानाश्नंतीत्यर्थः । अन्नायुर्वाएषयद्वायुरित्येतद्द्वेधाव्याचष्टे ॥ आयूरूपइति ॥ आयूरूपआयुष्यनिरूपकः । यद्वाऽऽयुष्याभिमानीत्यर्थः । आयुःशब्दस्यार्थांतरमाह ॥ आयुःशब्दइति ॥ गतिवाचीचेष्टावाचीमोक्षगमनवाचीच । सुराणामुत्तमइत्यत्रसहेतुकमपवादमाह ॥ अन्योन्येति ॥ वायोरायुःप्रदत्वाद्ब्रह्मणश्चान्नरूपेणवायोःपुष्टिप्रदत्वादित्यर्थः ॥ बृहद्भाष्येच ॥

भा० । अन्नमूर्तिततोब्रह्माप्रधानेनैववायुना । अपानाख्येनात्तुमैच्छत्तदैवाशकदाशुसः । तस्माद्भोक्तैकएवासौसर्वस्यान्नस्यमारुतः । तत्प्रसादात्परेश्नंतिकिंचित्किंचि[illegible]चाखिलं । आयूरूपोखिलानांचदेवानांवायुरेवहि । अन्नदेवस्यचायुःसतस्माद्देवोत्तमोमरुत् । आयुःशब्दोज्ञानवाचीगतिवाचीचयत्ततः । चेष्ट[illegible]दातासुराणांमारुतस्ततः । अन्योन्यगुणदातृत्वात्समानौब्रह्ममारुतौ ।

अन्नाभिमानीब्रह्मैवप्राणोवायुरुदाहृतः ॥ अन्योन्यानुप्रविष्टौतौसर्वदेवेषुसंततौ ॥ वायुंविनाब्रह्मणोपिशरीरंपूतिमेष्यति ॥ वा युश्चशोषमायातिविनाब्रह्माणमंजसेति ब्रह्मवाय्वोराधिक्यवर्णनंमूलेप्रकृतानुपयुक्तमित्यतोभगवदुत्कर्षपर्यवसन्नमित्याह ॥ तयो रिति ॥ सईक्षतकथंन्विदमित्यारभ्याथकोहमित्यंतस्यतात्पर्यमाह ॥ देवतानामित्यादिना ॥ ब्रह्माद्यामांविनाक्रियासुनसमर्थाः स्युरित्यादौयोज्यं । तेनकथंन्विदंमदृतेस्यादित्याक्षेपलभ्यार्थउक्तोभवति ॥ सईक्षतकतरेणप्रपद्याइत्यस्यार्थः ॥ तस्मादेषांप्रवृ त्यर्थंप्रवेक्ष्येसहवायुनेति ॥ कतरेणपूर्णसुखेनवायुनासहेत्यर्थमभिप्रेत्यवायुनासहेत्युक्तं । यदिवाचाभिव्याहृतमथकोहमित्य स्यार्थः ब्रह्माद्याइति ॥ ब्रह्माकर्ताआद्यपदेनकरणानिवागादीनिचेत्येतेमांविनाक्रियाज्ञानादिषुसमर्थाःस्युस्तर्हिनमेविष्ण्वभि धाभवेदिति । तदुपपादनं ॥ सर्वेति ॥ णकारोबलंषकारःप्राणआत्मेतिश्रुतेरितिभावः । सएतमेवसीमानमित्येतद्व्याचष्टे ॥ इतिमत्वेत्यादिना ॥ अग्न्यादयइत्यधिदैवगताइत्यर्थः । सएतमेवसीमानंविदार्यैतयाद्वाराप्रापद्यतेत्युपलक्षणमित्यभिप्रेत्यव्या चष्टे ॥ प्रपदाभ्यामिति ॥ प्रवेशकार्यमाह ॥ बिभर्तीति ॥ तेनप्रथमंप्रपदाविष्टेनपश्चात्तच्छिरोश्रयतेतिप्रागुक्तदिशामूर्धावि

भा० । तस्मान्मोक्षेसुखेज्ञानेविष्णुभक्त्यादिकेष्वपि । सर्वेभ्यश्चाधिकौतौहितयोर्विष्णुःपरःसदा । देवतानांप्रवेशात्तुपूर्वमेवजनार्दनः । इत्थ मैक्षतदेवेशोब्रह्माद्यायदिमांविना । क्रियादिषुसमर्थाःस्युर्नमेविष्ण्वभिधाभवेत् । सर्वचेष्टयितृत्वाच्चविशिष्टबलतस्तथा । विष्णुरित्यभिधामह्यंसानयु क्तादिवौकसां । स्वतंत्रत्वेततःसर्वेमद्वशाएवनान्यथा । तस्मादेषांप्रवृत्त्यर्थंप्रवेक्ष्येसहवायुना । इतिमत्वाविरिंचस्यशरीरंप्रविवेशसः । मूर्धन्यनाड्या प्रथमंब्रह्मवायुःसमन्वितः । अग्न्यादयस्ततःपश्चात्प्रविष्टास्तन्नियोजिताः । प्रपदाभ्यांतथान्येनरूपेणप्रविवेशसः । बिभर्तिदेहंतेनैवमूर्धाविष्टेनचेष्टयन् ।

ष्टेनैकेनरूपेण । तेनप्रथममेवमूर्धाविष्टेनचरूपेणचेष्टयन्बिभर्तीत्यर्थः । केतेरूपेइत्यतआह ॥ नारायणइति ॥ व्यवस्थितोदेहे वासुदेवश्चमूर्धाविष्टोनकेवलंनारायणइत्यर्थः । तस्यत्रयआवसथाइत्येतत्प्रकृतरूपद्वयपरामर्शकत्वेनव्याचष्टे ॥ मूर्धेति ॥ यःप्रप दादिक्रमेणमूर्धाविष्टोवासुदेवःयश्चप्रथमंमूर्धाविष्टोनारायणस्तस्यचावसथास्त्रयइतियोज्यं । अतएवतंप्रपदाभ्यामित्यत्र तमिमंप्र थमज्ञानिपुरुषंचतुराननं । वासुदेवाभिधंब्रह्मप्रापप्रपदयोःपुरेत्युक्त्वातच्छिरोश्रयतेतिमूर्धाविष्टतावासुदेवस्योक्ता । सुषुम्नायांवां सुदेवोमूर्धन्येवव्यवस्थितइतिचानुपदमेववक्ष्यति । तस्यत्रयआवसथाअयमावसथइत्यादिव्याचष्टे ॥ तस्यचावसथाइति ॥ त्र यःस्वप्नाइत्येतद्व्याचष्टे ॥ तएवेति ॥ स्वयंस्वतंत्रः । मूर्धाविष्टयोर्वासुदेवनारायणयोरेवतत्रिषुस्थानेष्ववस्थानप्रतीतेराह ॥ अनिरुद्धादीति ॥ क्रमशोनिरुद्धादिरूपेणा निरुद्धप्रद्युम्नसंकर्षणरूपेण । तेषु त्रिष्वक्षिकंठहृत्सु । अवस्थात्रयस्य जाग्रत्स्वप्न सुषुप्तिलक्षणस्य । अत्रविरोधपरिहारस्तुविरोधोद्धारेऽस्माभिःकृतोनुसंधेयः । वासुदेवनारायणयोर्मूर्ध्नवस्थानप्रकारमाह ॥ सु षुम्नायामिति ॥ तस्यांतन्मध्यवर्तिन्यां । धातूनामनेकार्थत्वमभिप्रेत्यसजातोभूतान्यभिव्यैरुयदित्येतद्व्याचष्टे ॥ सएवेति ॥

भा० । नारायणोवासुदेवइतिद्वेधाव्यवस्थितः । मूर्धाविष्टोवासुदेवस्तस्यचावसथास्त्रयः । अक्षिकंठोहृदित्येवंतएवस्वप्ननामकाः । आग्नो त्यत्रस्वयंविष्णुरतःस्वप्नाःप्रकीर्तिताः । अनिरुद्धादिरूपेणत्रिधातेषुव्यवस्थितः । दातावस्थात्रयस्यास्यजीवस्यक्रमशोविभुः । सुषुम्नायांवासुदेवो मूर्धन्येवव्यवस्थितः । तस्यामेवब्रह्मनाड्यांस्थितोनारायणःप्रभुः । सएवभगवान्विष्णुःप्रादुर्भावात्मनापुनः ।

ब्रह्मनाड्यामनुप्रविष्टोनारायणएवचतुर्मुखस्यहृद्गुहायाप्रादुर्भावात्मनाजातः । तेनैवमत्स्यादिरूपेणसर्वभूतेषुचाविशत् । किमिहान्यंवावदिषदित्येतद्व्याचष्टे ॥ असुराणामित्यादिना ॥ असुराणांअध्यात्मंज्ञानादिप्रतिबंधकानांकामाद्यभिमानिनांकालनेम्यादीनां बहिःकंसादीनां । ज्ञानादिगुणदमंतर्नियमनेनबहिरुपदेशेनज्ञानादिगुणदं । मत्वेत्युपनिषदिशेषोक्तिः । तुविशेषेणज्ञानार्थमित्यन्वयः । प्रादुर्भूतः चतुर्मुखस्यहृदयेप्रादुर्भूतः । प्रभुःभुविवसुदेवादिषुप्रविष्टस्तद्वाराप्रादुर्भूतःसर्वेषुभूतेषुप्रेरणेच्छयाचप्रविष्ट इतियोजना । तदुक्तंकाठकभाष्ये । उत्तमोदेवताभ्यश्चसोत्मानंविविधात्मना ॥ मत्स्यकूर्मादिरूपेणगुहासंस्थमजीजनदिति ॥ अत्रावताररूपाणामंतर्यामिरूपाद्विभक्तत्वेंतर्नियामकत्वेचविरोधस्तुविरोधोद्धारेपरिहृतोनुसंधेयः । अवताररूपाणामपिमूलरूपवद्द्रव्यगुणदेशकालादिपूर्तिप्रतिपादकं सएतमेवपुरुषमित्येतद्व्याचष्टे ॥ ससर्वेति ॥ समूलरूपीनारायणः ब्रह्मशब्दस्यार्थःसर्वगुणेति । ततमंदेशतःकालतस्ततमित्यस्यार्थः ॥ सर्वगमित्यादि ॥ तस्मात् मूलरूपवत्सर्वगतत्वस्यतत्प्रत्यक्षसिद्धत्वादेव । नकेवलंमूलरूपीकिंतुसर्वावताराश्चेत्यर्थः । नकेवलंसर्वगतत्वं किंतुब्रह्मशब्दोक्तंगुणपूर्णत्वंकालतस्ततत्वंचेत्याह ॥ प्रादुर्भावाइति ॥ स

भा० । जातोमत्स्यादिरूपेणसर्वभूतेषुचाविशत् । असुराणांनिहंतारंज्ञानादिगुणदंतथा । चेष्टाप्रदंचभूतेषुनमदन्यंवदंत्यपि । इतिमत्स्य जगन्नाथोदैत्यनिग्रहणेच्छया । ज्ञानदानार्थमपितुप्रादुर्भूतोभुविप्रभुः । तथाजीवेषुसर्वेषुप्रविष्टःप्रेरणेच्छया । कोह्यन्यस्तमृतेविष्णुमेतत्कर्मकरिष्यति । ससर्वगुणसंपूर्णसर्वगंनित्यमव्ययं । एतदेवस्वरूपंसत्वपश्यदवतारगं । तस्मात्सर्वावताराश्चसर्वजीवेषुसंस्थिताः । प्रादुर्भावाःसर्वगुणैःपूर्णा एवसदास्थिताः ।

दैकप्रकारेणस्थिताः । सएतमेवपुरुषमित्येतत्सोवतारूपीत्यर्थतयाचव्याचष्टे ॥ पश्यंतीति ॥ प्रादुर्भावाइत्यनुवर्तते । इदमदर्शमितीत्यत्रेतिशब्दोहेतावित्यभिप्रेत्यव्याचष्टे ॥ गुणपूर्णेति ॥ सर्वदादर्शनादेवेत्यन्वयः । तेनावधारणार्थतयारंगोव्याख्यातोभवति । नामतोनाम्ना । इदंद्रोनामप्रसिद्धः । तमिदंद्रंसंतमितितस्यैवेदंद्रशब्दमुख्यार्थत्वमुक्तं । तदुपपादयति ॥ ब्रह्मादीनामित्यादिना ॥ जायतेदर्शनमितिशेषः । तत्कैमुत्येनाह ॥ रमेति ॥ नकेवलमिदंद्रक्ष्यतीत्युक्तंदर्शनंपरतंत्रमितिरमादीनामिदंद्रशब्दमुख्यार्थत्वाभावः । किंतुसर्वप्रकारेणपूर्णज्ञानाभावाच्चेतिभावेनाह ॥ अल्पज्ञानाइति ॥ आद्यपदेनसरस्वत्यादीनांग्रहणं । क्रमेण तारतम्यक्रमेणानिंद्राइंद्रशब्दमुख्यवाच्यत्वरहिताः । परोक्षप्रियाइवहिदेवाइत्येतद्व्याचष्टे ॥ पापैरिति ॥ देवाब्रह्माद्याः आत्मनःपरमात्मनः । पापैरज्ञाततां । हर्षेणहर्षपूर्वं मानयंति । तेनसविष्णुरिंद्रइत्यपिशब्द्यतइत्यर्थः । देवाइत्यस्यवेदाभिमानिनोदेवाइत्यर्थांतरमभिप्रेत्याभिमन्यमानप्राधान्येनव्याचष्टे ॥ नेदंद्रतेति ॥ प्रमाणेनव्याख्यातंखंडत्रयंस्ववचनेनस्पष्टंव्याचष्टेउत्तरग्रंथसंदर्भेण ॥ आत्मावाइदमित्यत्रात्मशब्दःआततगुणत्वयोगेननारायणपरइत्युक्तं । नकेवलमेतावत्किंतूपक्रमपर्यालोच

भा० । पश्यंतिचतथानित्यंनिर्दोषोरुस्वसंविदा । गुणपूर्णस्वरूपस्यत्वापरोक्ष्येणदर्शनात् । सर्वदैवह्यसौविष्णुरिंद्रोनामतोमतः । ब्रह्मादीनांहिसर्वेषांतत्प्रसादेनजायते । जानंतिनस्वतस्तेननेदंद्रास्तेप्रकीर्तिताः । रमापितत्प्रसादेनजानातिकिमुतापरे । अल्पज्ञानाअल्पगुणाअल्पानंदाश्चतेखिलाः । रमाजशंकरेंद्राद्यास्तेनानिंद्राःक्रमेणते । पापैरज्ञाततांदेवामानयंतिसदात्मनः । हर्षेणतेनविष्णुःसइंद्रइत्यभि(पि)शब्द्यते । नेदंद्रताऽसुरादीनांज्ञायेतेतिश्रुतीर्हरिं । इंद्रइत्येववदतिपारोक्ष्येणोरुसद्गुणमित्याद्यैतरेयसंहितायां ।

नयाचेत्याह ॥ आततेति ॥ नकेवलमाततगुणत्वादात्मानारायणः किंतुतस्यनारायणस्यैववासुदेवादिरूपाणांब्रह्मपंथाःसत्यंक र्मेतिपंचरात्रप्रसिद्धैरेवनामभिरारब्धत्वादुपक्रांतत्वाच्चात्मानारायणइत्यर्थः । कर्मादिनाम्नामनिरुद्धादिषुप्रवृत्तिप्रकारंदर्शयति ॥ मुख्यतइति ॥ प्रादुर्भावात्मकोनिरुद्धतनुर्हरिरेवेतियोजना । नतुकामपुत्रोनिरुद्धइत्येवार्थः । सर्वनामत्वेपिविशिष्यकर्मनामत्व मितिभावेनकर्मनामात्वितितुशब्दः । कर्मनामत्वेहेतुस्तत्रेति ॥ अनिरुद्धतनावमितचेष्टितं हियस्मादनिरुद्धतनावमितचेष्टितं अनिरुद्धतनूश्चेतिचशब्दान्मातृत्वंचतस्मात्कर्तृत्वान्मातृत्वाच्चकर्मनामेतियोज्यं । कर्तृत्वात्कर्ममातृतइतिव्याख्यातत्वात् । ननु कर्मण्यकर्मयःपश्येदिति जीवानामपिकर्मशब्दार्थत्वमुक्तमित्यतआह ॥ कर्माभासाइति ॥ श्रुत्यंतरेभगवत्येवेंद्रशब्दाभ्यासाच्चे यमुपनिषद्भगवद्विषयेत्याह ॥ मत्सीति ॥ इंद्रउपनिषसाद । तेनेंद्रस्यप्रियंधामोपेयाय । तमिंद्रउवाच । सइंद्रःसभूतानामधिपतिः। प्रेत्येंद्रोभूत्वाइदमदर्शमिति तस्मादिंद्रोनामेत्यादौबहुशोभ्यासादित्यर्थः । अभ्यासांतरमाह ॥ अकारस्येति ॥ अइति । अंभोम रीचिः । अकारोवैसर्वावागित्यादौअकाराभ्यासादित्यर्थः । पुंडरीकाक्षत्वबलेनसूर्यमंडलस्थत्वंविष्णोःप्रसिद्धं । तस्यात्रबहुशोनुसं

भा० । आततगुणत्वादात्मानारायणः । ब्रह्मपंथाःसत्यंकर्मेतितस्यैवपंचरात्रप्रसिद्धैरेवनामभिरारब्धत्वाच्च । मुख्यतःकर्मनामातुप्रादुर्भा वात्मकोहरिः । अनिरुद्धतनुश्चैवतत्रह्यमितचेष्टतः । कर्माभासाजीवसंघाःसत्यंप्रद्युम्ननामकः । संकर्षणोहरिःपंथात्रह्मोक्तोवासुदेवकइत्यादिहिना मनिर्णयेमत्सींद्रमिंद्रोपवमानविष्णुमित्यादिश्रुतौतस्मिन्नेवप्रसिद्धस्येंद्रशब्दस्यात्रबहुशोभ्यासाच्च ॥ अकारस्यचविष्णावेवप्रसिद्धस्यात्राप्यभ्यासात् ।

धानाच्चेयमुपनिषद्विष्णुपरेत्याह ॥ तस्येति ॥ यएषतपतीत्यादिनेति ॥ एषइमंलोकमभ्यार्चत्पुरुषरूपेण यएषतपति प्राणो ह्येषयएषतपति प्राणस्त्वंप्राणःसर्वाणिभूतानिप्राणोह्येषयएषतपति । एषतपन्नेवास्मीतिहोवाचेतिबहुशोनुसंधानादित्यर्थः । पुंड रीकाक्षत्वंसूर्यस्यकिंनस्यात् इत्यतआह ॥ सूर्योहीति ॥ शिवःसूर्यःसुराचार्योविनायकश्चविरूपाक्षः । तत्रवैचित्र्यंहिरण्याक्षः सवितेत्यादिग्रंथेभ्योवगंतव्यं । किंचैषइमंलोकमभ्यार्चदित्यादिनातावाएताःसर्वाऋचइत्यंतेनसकलर्षिदेववेदादिवाचकसर्वनामं वत्त्वमुक्तं । विश्वामित्रमित्यादिनातत्रैवाख्यायिकाप्रदर्शनमुखेनसर्वनामवत्त्वमुक्तं । तच्चहरेरेवलिंगं । अतश्चास्यामुपनिषदिसएवो क्तइत्याह ॥ योदेवानामित्यादिना ॥ उपसंहारबलाच्चेयमुपनिषद्विष्णुविषयेत्याह ॥ णकारइति ॥ उपक्रमेब्रह्मशब्दस्यमध्ये आत्मशब्दस्यांतेविष्णुशब्दस्यात्रैवरूढस्यप्रयोगाच्चनान्यपरत्वमित्याह ॥ आत्मेति ॥ तमृतेनवर्तते । कथंतर्हिआत्माविरिंचः सुमनाः तस्मादेतद्ब्रह्मेत्यादावन्यत्रवृत्युक्तिरित्यतउक्तंतदन्यत्रेति । तदन्यत्रब्रह्मादौ आत्मब्रह्मादयस्तत्रैवप्रसिद्धविष्णुनारायणा

भा० । तस्ययथाकप्यासंपुंडरीकमेवमक्षिणीइतिसूर्यमंडलेपुंडरीकाक्षत्वेननिर्दिष्टस्यात्रापियएषतपतीत्यादिनाबहुशोभ्यासाच्च । सूर्योहिहिर ण्याक्षःसवितादेवआगादितिपिंगलाक्षःप्रसिद्धः । विरूपाक्षःशिवःसूर्यःसुराचार्योविनायकः । पुंडरीकेक्षणोविष्णुःसहस्राक्षःसुराधिपइतिचस्कांदे । योदेवानांनामधाएकएव । नामानिसर्वाणियमाविशंतितंवैविष्णुंपरमुदाहरंति । यमिंद्रमाहुर्वरुणंयमाहुः । चंद्रसूर्योदयःशब्दाविष्णावेवहिमु ख्यतः । उपचारात्तदन्येषांविष्णुनैवकृताःपुरेत्यादिनातस्यैवसर्वनामवत्त्वाच्च । णकारोबलंषकारःप्राणआत्मेत्यादिनांतेपिविष्णुशब्दव्याख्यानेनोपसं हाराच्च । आत्मब्रह्मादयःशब्दास्तमृतेविष्णुमव्ययं ।

दिशब्दातिरिक्ताःशब्दाःशृंगिबेरेआर्द्रकेदाहकत्वगुणयागनाग्नशब्दवत् । अल्पप्रवृत्तिनिमित्तयोगेनवर्ततइतियोज्यं ॥ श्रुत्यंतर समाख्यानाच्चात्मशब्दोनारायणपरइत्याह ॥ एकइति ॥ आदिपदेन ब्रह्मवाइदमग्रआसीदित्यादिश्रुति रेतस्यजगतोह्यग्रआसीन्नारायणःपरः ॥ एकएवश्रियासार्धमितिब्रह्मतर्कादिस्मृतिर्गृह्यते । इदंसर्वमपेक्ष्यासौकालतोगुणतस्तथेतिव्याख्यातमधुनाकालाग्र्यत्वस्यापिगुणांतर्भावविवक्षयाप्रकारांतरेणव्याचष्टे ॥ अग्रइति ॥ ननुअस्याग्रेप्रलयइत्यर्थोक्तौविरोधपरिहारकत्वेन नान्यत्किंचनमिषदितिसंगच्छते । गुणाग्र्यत्वप्रतिज्ञानेकथमुत्तरवाक्यंसंगच्छतइत्यतःसंगमयति ॥ तत्रेति ॥ तत्रगुणाग्र्यत्वे उपसर्गस्यधात्वर्थव्यंजकत्वान्मिषदित्यस्योन्मेषणमितितात्पर्यादुक्तः । ननुस्वयोग्यगुणानुभवस्यरमायांमुक्तेषुचसत्वात्कथंनिषेधइत्यत आह ॥ स्वतइति ॥ ननुविष्णोःसदाविद्यमानत्वात्कथमासीदितिप्रयोगइत्यतआह ॥ अस्तिशब्दवदिति ॥ यथास्तिब्रह्मेत्युक्तेब्रह्मणोनवर्तमानकालमात्रसंबंधित्वमर्थः । एवमासीच्छब्दोपिसर्वकालसाधारणइत्यर्थः । प्रयोगएककालीनःसर्वकालेनुष ज्यतेइतिवचनादितिभावः । किंचनमिषदित्यस्योन्मिषत्पूर्णोन्मेषयुक्तमित्यर्थस्तच्चभगवत्येवमुख्यमतःसएवगुणाग्र्यइत्याह ॥

भा० । नवर्ततेतदन्यत्रशृंगिबेरेम्रिशब्दवदितिचपाद्मे । एकोनारायणआसीन्नब्रह्मानचशंकरः । एकोनारायणआसीन्नब्रह्मानेशानः । वासुदेवोवाइदमग्रआसीन्नब्रह्मानचशंकरइत्यादिश्रुतिभ्यश्च । अग्रशब्दोगुणाधिक्यवाची । इदंरमाब्रह्मशिवादिकंसर्वजगदपेक्ष्यात्मैवाग्रेविष्णुरेवाग्र्यः सर्वगुणैरित्यर्थः । तत्रहेतुस्तदन्यत्किंचिन्नमिषदासीत् । सर्वस्याप्युन्मेषणंनासीदित्यर्थः । स्वतउन्मेषणंकस्यापिनास्ति । अस्तिशब्दवदासीच्छब्दोपिसर्वकालसाधारणः ।

भगवदिति॥ कोयमुन्मेषोनामेत्यतआह॥ उन्मेषइति ॥ तदेवोन्मेषणमेव । कथंसत् अत्युत्तमंनिर्दुष्टंस्वरूपंयतोमिनुतेविषयीकरोतिअतउन्मेषणमेवमेषणंनामेत्यर्थः । मिनुतेसदितिमिषत् । सकारस्यषत्वमितिभावः । मेषणोन्मेषणयोर्भेदमंगीकृत्यकैमुत्येनवोन्मेषणनिषेधलाभइत्याह ॥ सद्रूपामिति ॥ यतोविष्णुःसदुत्तमंनिर्दिष्टंस्वस्वरूपंमिनुतेऽतःविष्णोरन्यत्स्वातंत्र्येणमिषदेवनास्ति । किमुतोन्मिषन्नेष्यतइतिवक्तव्यं । यद्वाविष्णुरेवसत्पूर्णस्वस्वरूपंमिनुतेविष्णोरन्यत्परिपूर्णंब्रह्ममिषदेवनास्ति । कोहितंवेदितुंशक्तइत्यादेः ॥ उच्चैर्मिषत्तुनास्तीतिकिमुवाच्यं । कुतइत्यतआह ॥ उच्चैरिति ॥ स्पष्टतयासर्वदैवस्वरूपंमिषन्भगवान्हीत्यर्थः। उक्तंचस्पष्टातिस्पष्टविशदब्रह्मणोशेषवस्तुगमिति । विष्णोरन्यत्किमपिगुणसंपूर्तेरुद्रिक्तानुभववन्नासीदित्यतीतनिषेधाद्वर्तमानकालेस्यादुत्तरत्रचेत्यतःकदापितत्समंनास्तीतिप्रमाणमाह ॥ नास्तीति ॥ नकुलाग्र्यत्वमात्रव्युत्पादनायप्रलयेन्यस्वरूपनिषेधएवात्रोच्यतइतिकिंनस्यादित्यतआह ॥ सर्वेति ॥ मुक्तसर्वजीवानांरमायाश्चासुप्ततयेतरजीवानांचस्वरूपतःप्रलयेविद्यमानत्वस्य प्रमितत्वादेवनेतरस्वरूपनिषेधेनविलसत्स्वस्वरूपत्वेनकालाग्र्यत्वविवक्षयाऽग्रइत्युक्तिः । नापिगुणाग्र्यत्वंविहायकालमात्रापेक्षया । मुक्तामुक्तसर्वजीवानांरमायाश्चप्रलयेविद्यमानत्वेनकालाग्र्यत्वस्येतरसाधारण्यात् । यदिसंसारिणांबोधपरिलोपात्सर्वेषांस्वा

भा० । भगवत्प्रसादादेवसर्वदासर्वंकिंचिदुन्मिषति । स्वातंत्र्येणपूर्णोन्मेषोविष्णुरेव । उन्मेषोगुणसंपूर्तेरुद्रिक्तानुभवःस्मृतः । तदेवमिषणंनामसद्रूपंमिनुतेयतः । मिषन्वनान्यद्विष्णोर्हिकिमुतोन्मिषदिष्यते । उच्चैर्मिषन्हिभगवान्सर्वदैवजनार्दनइतिचसत्तत्वे । नास्तिनारायणसमंनभूतंनभविष्यतीतिचभारते । सर्वजीवानांरमायाश्चप्रलयेपि

तंत्र्याभावाद्विद्यमानमपिकालाग्र्यत्वमसत्कल्पमितिकालाग्र्यत्वमसाधारणमित्युच्यते । तर्हिनकालमात्रापेक्षयेत्यापन्नं । गुणाग्र्यत्वंविनैतदुपपादनासंभवादितिभावः । तत्रहेतुस्तदन्यत्किंचिन्नमिषदासीदित्यवतार्यव्याख्यायहेतुवाक्यस्याभिप्रायमाह ॥ तदधीनेति ॥ नान्यत्किंचनमिषदितिवाक्यंस्वातंत्र्याभावाभिप्रायकमितिकुतइत्यतस्तदुपपादकोत्तरवाक्यबलादितिभावेनाह ॥ तदधीनत्वमेवेति ॥ ननुतस्यैवकालाग्र्यत्वोपपादनायप्रलयेस्थूलशरीरप्रागभावोपपादनायसृष्टिकथनमितिकिंनस्यादित्यतआह ॥ स्थूलशरीरस्येति ॥ ततएवपराधीनविशेषावाप्तिलक्षणसृष्ट्युक्त्यैवार्थतएव नतुमुख्यतः । एवंचमुख्यतोलब्धार्थपरित्यज्यार्थिकार्थमात्रग्रहणमयुक्तमितिभावः । रमायामुक्तानांचप्रलयेतदधीनमिषणमुक्तं तत्रप्रमाणांतरंआह ॥ प्रलयइति ॥ ध्यानस्थिताःनत्वखिलसाक्षात्कारवंतः । तज्ज्ञानस्यशक्त्यवस्थापन्नत्वादितिभावः । ननुयदुक्तंसर्वजीवानांप्रलयेविद्यमानत्वादेवानाग्र इतिकालापेक्षयेति तदयुक्तं । ब्रह्मादिसर्वजीवानांस्वरूपतःसत्वेपिशरीराभावविवक्षयाग्रेनासीदितिवचनोपपत्तेरित्यतआह ॥ ब्रह्मादीनामिति ॥ ब्रह्मादीनांवाय्वादीनांशरीरांतरस्यलिंगशरीरातिरिक्तस्थूलशरीरस्याभावोनुक्तेरप्य नुक्तावपि सृष्ट्युक्त्यार्थतःसिध्यत्येव । तथाचनावश्यंतदर्थमेवतद्वाक्यंप्रवृत्तं । तस्यार्थस्यार्थतोपिलाभेनश्रुतेःकेवलंतादर्थ्येनप्रवृत्त्ययोगात् । गुणाग्र्यत्व

भा० । विद्यमानत्वादेवनाग्रइतिकालापेक्षया । तदधीनमिषत्वादन्येषामग्र्यःसएवेत्याशयः । तदधीनत्वमेवतेषांसृष्ट्यादिनादर्शयति । स्थूलशरीरस्यपूर्वाभावस्तएवार्थतःसिध्यति । प्रलयेप्यखिलंदेवीरमाविष्णुप्रसादतः । जानातिनित्यज्ञानेनमुक्ताध्यानस्थितालयेइतिचसत्त्वे । ब्रह्मादीनांशरीरांतरस्यापिप्रलयेनुक्तेरेवाभावःसिध्यति ।

स्यप्राधान्येनप्रतिपादनेषुआर्थिकार्थस्यापिस्पष्टीकरणमनुजानीमइतिभावः । उक्तार्थेप्रमाणमाह ॥ आत्मेति ॥ आत्मावाइदमेकएवाग्रआसी द्ब्रह्मवाइदमग्रइत्यादिवाक्यंगुणाग्र्यत्वंहरेर्वदेत् । कालज्यैष्ठ्यमात्रंनवदेत् । यस्मात्तत्कालज्यैष्ठ्यंसृष्ट्युक्त्यासृष्टिकर्तुर्हरेःसिध्यति । अतोन्यतोलभ्यार्थेवाक्यस्यतत्रैवपर्यवसितत्वमयुक्तमितिभावः । ननुसृष्ट्युक्त्यागुणाग्र्यत्वमपिलभ्यतएव । जगज्जन्मादिहेतुत्वस्यगुणपूर्तिसंभावकलक्षणत्वात् । स्पष्टंगुणाग्र्यत्वमात्माग्रइत्यनेनोच्यतइतिचेत् । कालाग्र्यत्वमपिस्पष्टमुच्यतइतिकिंनस्यादितिआशंक्य सत्यमुभयविधाग्र्यत्वंसृष्ट्युक्त्यालभ्यते स्पष्टमुभयविधाग्र्यत्वमात्मादिवाक्येनोच्यतइति । अतएवास्माभिःकालतोगुणतस्तथा ॥ अग्र्यएवसमस्तेशइतिव्याख्यातं । तथापिआदिवाक्येकालाग्र्यत्वमात्रोक्तौगुणाग्र्यत्वंनलभ्यतेगुणाग्र्यत्वमात्रोक्तौतुकालाग्र्यत्वमपिलभ्यतेतस्यापिगुणत्वादतःकालाग्र्यत्वमात्रमत्रनोच्यतइतिभावेनाह ॥ गुणाग्र्यतायामिति ॥ एवेतिकालाग्र्यत्वेगुणाग्र्यत्वस्यनांतर्भावइतिसूचयति । अंभसोविष्णुलोकत्वंकथमित्यतोंभःशब्दंनिर्वक्ति ॥ अमिति ॥ कोसौ विष्णुलोकइत्यतःपरेणदिवंद्यौरित्येतद्व्याचष्टे ॥ दिवइति ॥ दिवःपरेमहरादय श्चशब्दाद्यौश्चेत्यर्थः । कथंविष्णुलोकत्वंतेषामित्याशंक्यपरिहारायप्रतिष्ठेत्येतद्व्याचष्टे ॥ दिव्यपीति ॥ अपिशब्दान्महरादिषुचेतिलभ्यते । ननुपृथिव्यादिष्वपिभगवान्प्रतिति

भा० । आत्मा ब्रह्माऽग्रइत्यादिगुणाग्र्यत्वंहरेर्वदेत् । कालज्यैष्ठ्यंनयस्मात्तत्सृष्ट्युक्तेरेवसिध्यतीतिवाक्यनिर्णये । गुणाग्र्यतायामेवकालज्यैष्ठ्यस्याप्यंतर्भावाच्च । अंविष्णुंबिभर्तीत्यंभोविष्णुलोकः । दिवःपरेमहरादयश्च । दिव्यपिभगवान्प्रतितिष्ठतीतिप्रतिष्ठा ।

ष्ठतिकोविशेषोव्यादीनामित्यतआह ॥ तेष्विति ॥ पदार्थमुक्त्वाऽदोंभःपरेणदिवंद्यौरितिवाक्यार्थमाह ॥ दिवइति ॥ अदों भःद्यौरितियोज्यं । अंतरिक्षंमरीचयइत्यत्रमरीचयशब्दार्थमाह ॥ सूर्येति ॥ व्युत्पाद्यदर्शयति ॥ मरीचीनामयनादिति ॥ अंभोमरीचिरित्यत्रमरीचिशब्दस्तुमरीचिमान्मरीचिरितियोज्यइतिभावः।मन्वंतरायुषःस्वर्ग्यामहर्लोकेतुकाल्पिकाइत्यादेर्व्यादिष्व पिमरणसद्भावात्कोविशेषःपृथिव्याइत्यतउक्तं पृथिव्यांक्षिप्रमिति ॥ ननुब्रह्मणोलोकसृष्टयुक्तेः कथंविष्ण्वाख्यस्यात्मनोलोक सृष्टिकथनं तस्मादयमात्माविरिंचएव आत्माविरंचःसुमनाःसुधौतश्चेतिकथ्यतइत्यभिधानादित्याशंक्य नात्रकेवलमात्मनोलोक स्रष्टृत्वमुच्यते किंतुभूतादिसृष्टिपूर्वलोकस्रष्टृत्वं ब्रह्मणस्तुभगवन्निर्मितलोकवैशद्यकर्तृत्वमेवातोनासावत्रोच्यतइतिप्रमाणमाह ॥ भूतेभ्यइति ॥ महदादिभ्योनंतरंभूतसृष्टेरनंतरमितियोज्यं । सुरान्लोकाभिमानिनः तत्पालकांश्च । ततःसब्रह्मापिविशेषतो लोककर्तेत्युच्यतेइत्यर्थः । नन्वत्रभूतादिसृष्ट्यनंतरंलोकसृष्टिर्नोच्यतइत्यतोयाअधस्तात्ताआपइत्येतद्व्याचष्टे ॥ याइति ॥ पूर्वमे वलोकसृष्टेःपूर्वमेव । देवतामहदाद्यभिमानिन्यः । आपोदेवाइतिकथमवगतमित्यतआह ॥ आपइति ॥ पूर्वसप्तमेखंडेमनसा

भा० । तेषुसर्वेषुप्रत्यक्षतश्चरतिविष्णुस्तस्मादंभइत्युच्यते । दिवःपरेद्यौश्चांभोनामकाःइत्यर्थः । सूर्यमरीचीनांतत्रविशेषेणवितततत्वादंतरिक्षं मरीचयः । मरीचीनामयनात् । पृथिव्यांक्षिप्रंमरंतीतिपृथिवीमरः । भूतेभ्योनंतरंत्वंसृष्ट्वाविष्णुः(सुरान्)पुराप्रभुः । लोकभेदांश्चचक्रेत्रपश्चाद्ब्रह्मा विशेषतः । सम्यक्चकारलोकांस्तांल्लोककर्तातत:सचेतिब्रह्मवैवर्ते । याअधस्तात्पूर्वमेवसृष्टादेवतास्ताआपइत्युच्यंते । आपइत्यापइतिपूर्वं

॥ १४६ ॥

सृष्टाआपश्चवरुणश्चेतिभगवदंगसृष्टतयोक्तानामेवदेवानामापाइत्यापइत्यष्टमेखंडेविवादपूर्वमप्छब्
र्थः। तत्राप्युदकस्यैवाप्छब्दवाच्यत्वंनिर्धारितमितिकिंनस्यादित्यतआह ॥ अयंपितेति ॥ का
स्यादित्यतआह ॥ अहमिति ॥ प्रकृतास्वप्सुदेवश्रुतेर्देवताएवैताआपइतिभावः । देवान
मानित्वं तेभ्यःसाभिमानिलोकोत्पत्तिः महदादिदेवानामेवांडांतस्तत्वाभिमानिरूपेणोत्पत्ति
र्वंभगवदुत्कर्षपर्यवसन्नमितिभावेनप्रमाणमाह॥ ब्रह्मवायूइत्यादिना॥ ऋषयोमध्यमाधिकारिणः । मत्या
वायूइत्यादिद्वंद्वनिर्देशनिमित्तमाह ॥ नविशेषइति ॥ शेषशिवयोश्चनविशेषः । कुतः अधिकाराविभेदतः ।
ति ॥ सरस्वतीभारत्योः वारुणीपार्वत्योश्चनविशेषः अधिकाराविभेदतःइत्यर्थः । ननुतर्हिब्रह्मवायूइतिवत् शेषशिववींद्रादिन
र्देष्टव्यं।वींद्रशेषौचतत्स्त्रियौइतिनिर्दिश्यशिवस्तद्दयितेतिपृथङ्निर्देशःकुतइत्यतआह ॥ सुपर्णेति॥ सुपर्णशेषयोस्तत्पत्न्योश्चसा
म्येवनतुपदैक्यं । अतःसाम्यविवक्षयावींद्रशेषौचतत्स्त्रियावितिद्वंद्वनिर्देशःकृतः । शिवस्यतद्भार्यायाश्चतदनंतरंतत्पदप्राप्यत्वद्योत

भा० । भगवदंगसृष्टानामेवापूशब्देनोक्तेः । अयंपितेतेपुत्राइतिच । अहंमांदेवेभ्योवेदओमदेवान्वेदेतिच । ब्रह्मवायूचतद्भार्येवींद्रशेषौच तत्स्त्रियौ । शिवस्तद्दयिताशक्रकामौतद्दयितादयः । सर्वेसुराःक्रमेणैवविष्णोर्जाताअबाल्यकाः । ज्ञानानंदबलाद्येषुविष्णुभक्तौचसर्वशः । हीनाः शतगुणेनैवक्रमेणानेनतेमताः । तेभ्यश्चऋषयोमर्त्याहीनाएवक्रमेणच । विशेषतस्तुमुक्तानांसर्वसंसारबंधनात् । क्रमोयंसम्यगुद्दिष्टोनित्यानंदैकभो गिनां । नविशेषोब्रह्मवाय्वोरधिकाराविभेदतः । नशेषशिवयोश्चैवतत्पत्नीनांचसर्वशः । सुपर्णशेषयोश्चैवसाम्यंसर्वगुणेष्वपि ।

नायशिवस्तद्दयितेतिशेषादिभ्यःपृथगुक्तिः । वायोस्तुब्रह्मपदप्राप्तत्वेपिब्रह्मव्यतिरिक्तस्यतत्पदाप्राप्तुःसमस्यानिरूपणात्तस्यैवतत्स मतयाद्वंद्वनिर्देशः । तदुक्तं नकश्चिद्वायुनासमइति । शक्रकामयोःईषत्तारतम्यमविवक्षित्वासाम्योक्तिः । प्रायइंद्रवत्कामइत्यु क्तत्वात् ॥ एतेत्विति ॥ ये सर्वेसुराःक्रमेणैवविष्णोर्जाताअवाख्यकाइतिकालक्रमेणसर्वेसुराःसाक्षाज्जाताएतएवसर्वेपिमहदादी नामभिमानिनः । महदादिमानिनश्चेतिसर्वशःतैर्महदादिभिःसहजाताः । तत्रपूर्वस्यचरमःप्रतिबिंबस्तथातत्सुतस्तद्वशश्च । अखि लाविष्णोर्वशेनाविष्णुःकस्यचिद्वशइतियोजना । इमेनुलोकाइत्यादेरर्थमाह ॥ एतइति ॥ एतेमहदादयएवयदापश्चाद्ब्रह्मांडोत्प त्त्यनंतरंप्रजज्ञिरे तदालोकाभिमानित्वाल्लोकाइतिप्रोक्ताःतएवपश्चाज्जातैरूपैर्यस्माल्लोकस्थान्पालयंतितदालोकपालाश्चेत्यर्थः । अमूर्छयन् मोहावस्थांगतानकरोदित्यन्यथाप्रतीतेर्व्याचष्टे ॥ अमूर्छयदिति ॥ मूर्छनंनामसंमेलनमितिभावः । मुखाद्वाग्वा चोग्निरित्यादिकं तत्रवाङ्नामकंरूपंवह्नेरासीत्पुरातनं ॥ तस्यैवाथद्वितीयंतुयदग्निरितिगीयतइत्यध्यात्माधिदैवभेदेनै पद्वयपरतयाप्रमाणेनव्याख्यातं उत्तरत्राक्यबलाच्चैतदेवमेवेत्याह ॥ अग्निरिति ॥ द्वितीयखंडे आयत

भा० । साम्यमेवैतयोःपत्न्योःसाम्यंशक्रमनोजयोः । एतेतुमहदादीनांसर्वेपिह्यभिमानिनः । पू शाश्चाखिलाविष्णोर्नविष्णुःकस्यचिद्वशे । महदादिमानिनश्चैतेजातास्तैःसहसर्ववशः । एतेलोकाइतिप्रोक्ता श्चयदापश्चात्प्रजज्ञिरे । पश्चाज्जातैर्हिरूपैस्तैर्लोकस्थान्पालयंत्यलं । इत्यादितत्वसारे । अमूर्छयत् मूर्तमकरो तीतेरेकस्यैवरूपद्वयंतदितिप्रतीयते ।

चष्टे ॥ प्रजानीहीति ॥ तृतीयखंडे यावैसामूर्तिरजायतान्नंवैतदित्यत्रान्नशब्दार्थमाह ॥ अन्नदेवतेति ॥ नन्वेवंचेत्तदपानेना जिघृक्षदित्यत्रब्रह्मातदन्नात्मकंरूपमजिघृक्षद्ग्रसितुमैच्छदित्युक्तंग्रसनंनसंभवति । ग्रसनेऽवयवशैथिल्येनपीडाप्राप्तेरित्यतआह ॥ ग्रसनंचेति ॥ तस्यान्नदेवस्यग्रसनंचैतस्मिन्नंतःप्रवेशएवातस्तेननतुपीडेत्यर्थः । ननुभोक्तृभोज्यभावःप्रवेष्टृप्रवेश्यभावश्चभेदेनो पलब्धः तत्कथमेकस्यतदुपपद्यते । प्रवेशेचस्वरूपानुपमर्दाद्भोज्यत्वायोगश्चेत्यतआह ॥ एकएवेति ॥ विशेषबलेनैकएवभोक्तृ त्वेनभोज्यत्वेनचस्थितःभोज्यरूपेणैकीभूयस्वरूपानुपमर्देनैवसंश्लेषविशेषंप्राप्यातितरांमुमोदेत्यर्थइतिभावः । क्षुत्पिपासाभ्यांपी डेवग्रसनेनापिपीडास्त्वित्यतस्तमशनापिपासाभ्यामन्ववार्जदित्यस्यतात्पर्यमाह ॥ देवानामिति ॥ अशनापिपासेहिलोकेऽपद्रवेण भोक्तृत्वशक्त्याचसमनियते । देवानामुपद्रवाभावादशनापिपासाभ्यामन्ववार्जनंनामतद्व्याप्तेनतदभिमान्यभिमतेनभोक्तृत्वसाम र्थ्येनयोजनमेवविवक्षितमितिभावः । तदभिमान्यभिमतत्वमुपपादयति ॥ वायुरेवेति ॥ अशनापिपासाभिमानीवायुरेवभोक्तृ त्वशक्त्यभिमानीत्यर्थः । यदिवाचाभिव्याहृतमित्यारभ्याथकोहमित्यंतवाक्यतात्पर्यमाह ॥ यदीति ॥ किमिदंविष्णुत्वंयद्देवा

भा० । प्रजानीहिप्रकर्षेणानुजानीहि । अन्नदेवताचसर्वदेवतायुक्तोविरिंचएव । ग्रसनंचैतस्मिन्प्रवेशएवनतुपीडातस्य । एकएवहिब्रह्माभो क्तृभोज्यत्वेनस्थितोभोज्यरूपेणैकीभूयातितरांमुमोदेत्यर्थः । देवानामुपद्रवाभावाद्भोक्तृत्वशक्तियोजनमेवाशनापिपासाभ्यामन्ववार्जनं । वायुरेव चभोक्तृत्वशक्तिरूपः । यदिवागादीनामेवाभिव्याहरणादिशक्तिःस्यान्मांविनातर्हिविष्णुत्वंनममस्यात् । तस्मात्कोहंभवानीत्याक्षेपः ।

नांस्वसामर्थ्येनचेष्टकत्वेनस्यादित्यतआह ॥ विशेषेणेति ॥ तदुपपादयति ॥ णकारइति ॥ आक्षेपलब्धमर्थमाह ॥ तस्मा दिति ॥ तदेतन्नांदनमित्यत्रनंदनशब्दार्थमाह ॥ पूर्णेति ॥ सजातोभूतान्यभिव्यैरुयदित्यत्रधातूनामनेकार्थत्वमाश्रित्यप्राक्प्र वेशनेवृत्तिरभिहिता । अधुनातुचक्षिङःख्याञितिसूत्रानुसारेणदर्शनार्थकचक्षिङादेशरूपत्वमभिप्रेत्यव्याचष्टे ॥ प्रादुर्भावरूपे णेति ॥ किमिहान्यंइत्येतद्व्याचष्टे ॥ इहेति ॥ सएतमेवपुरुषंब्रह्मततममपश्यदितिवाक्यं समूलरूपीभगवानेतमेवपुरुषमवता ररूपंगुणादिपूर्णं अपश्यत् सोवतारूपीचैतमेवस्वात्मानमेवचब्रह्मततममपश्यदितिप्रमाणेनद्वेधाव्याख्यातं । तत्रद्वितीयव्या ख्यांस्ववचनेनविवृणोति ॥ अहमेवेति ॥ ननुकृष्णरामादीनांजन्मादिदोषदर्शनात्कथंपरिपूर्णत्वमित्यतआह ॥ नायमिति ॥ स्तंभाद्वा स्तंभान्नरसिंहइव । नरदेहाद्वेतिवाशब्देनऋष्यादिदेहात्प्रादुर्भूतइत्यर्थः । एतमेवेतिपरामर्शविषयंदर्शयन्व्याचष्टे ॥

भा० । विशेषेणप्राणयतिसर्वान्सर्वेभ्योविशिष्टबलश्चेतिहिविष्णुः । णकारोबलंषकारःप्राणआत्मेतिव्याख्यानात् । तस्मान्मत्प्रेरिताएवैते अभिव्याहारादिशक्ताइत्यभिप्रायः । पूर्णानंदस्वरूपत्वान्नंदनोभगवान् । प्रादुर्भावरूपेणजातोपिभगवान्सर्वभूतान्यभितःसर्वकालेषुविशेषेणपश्य त्येव । इहभूतेषुमत्तोन्यंप्रवर्तकंवदेत्किमित्याक्षेपः । अहमेवस्वतंत्रःपरिपूर्णगुणइतिकृष्णराघवादिसर्वावताररूपोपिसर्वदानुभवत्येव । नायंदशरथा ज्जातोनचापिवसुदेवतः । काख्याज्ञानंकुतोदुःखंप्रादुर्भावेष्वपिप्रभोः । प्रादुर्भूतश्चिदानंदशरीरेराघवःस्वयं । स्तंभाद्वानरदेहाद्वानैवास्यप्राकृतीतनुः । दैत्यानांमोहनार्थायसोज्ञानाद्यंप्रकाशयेत् । पूर्णचित्सुखरूपोपिसदासर्वावतारगइत्यादिस्कांदे

एतमेवेति ॥ सएतमित्यत्रतच्छब्देनावताररूपपरामर्शमंगीकृत्यावताररूपस्यापिस्वरूपपूर्तिज्ञातृत्वंव्याख्यातं । तत्रोपनिषज्ज्ञाप कप्रदर्शनायेदमदर्शमितींमित्येतद्व्याचष्टे ॥ इदंमेरूपमिति ॥ अस्यमहिदासावतारवाक्यत्वात्प्रकृतसिद्धिः । इतिशब्दस्तूपनिष दीवहेत्वर्थे । यद्वारंगस्यावधारणार्थत्वमन्वयपूर्वमाह ॥ इदमिति ॥ इदंमेरूपंअदर्शमेवाहमित्यन्वयसंभवेनरंगस्त्ववधारणइ त्यर्थः । अपश्यदित्यतीतार्थकलङप्रयोगात्सर्वदादर्शनंनेतिभ्रांतिंवारयति ॥ अपश्यदित्यत्रेति ॥ अनुषंगादिति ॥ अपश्य दित्यस्याभिशब्दानुषंगेचाभ्यपश्यदितिभवति । अभितोर्थदर्शनंचसार्वकालिकमेवेतिभावः । नन्वनुषक्तस्याभीत्यस्यसर्वकालसं बंधित्वेर्थेविवक्षितेअपश्यदित्यतीतकालसंबंधितयानिर्देशोव्याहन्येतेत्यतआह ॥ अपश्यदिति ॥ अपश्यत्इति पश्यतीतिवा कालसंबंधंविनानिर्देष्टुमशक्यत्वादेवतथाव्यवहारः । वस्तुतस्तुअभिशब्देनदर्शनस्यसर्वकालसंबंधित्वेवगतेलकारःकालमात्रसंबं धीपर्यवस्यतीत्यविरोधःइतिभावः । माभूदभिशब्दानुषंगः । विष्णुविषयोददर्शेत्यादिप्रयोगःसार्वकालिकदर्शनमेवावगमयती तिप्रमेणाह ॥ प्रयोगइति ॥ विष्णुर्ददर्शेत्यादौएककालाविषयेपिलकारप्रयोगः । सर्वकालेनुषज्जते । सार्वकालिकंदर्शनादिकम

भा० । एतमेवपुरुषंव्यासकृष्णकपिलराघवादिरूपंततममपश्यत् । ततमंततंतमंपरिपूर्णतमंब्रह्मापश्यत् । इदंमेरूपमदर्शमेवाहमिति । रं गस्त्ववधारणे । रंगोवधारणेचैवसंवादेचप्रयुज्यतइतिपदविवेके । अपश्यदित्यत्रनातीतकालत्वंविवक्षितं । अभिव्यैरुयदित्यभिशब्दस्यानुषंगात् । अ पश्यत्पश्यतीतिचैककालसंबंधंविनावक्तुमशक्यत्वात्तथाप्रयोगः । प्रयोगएककालीनःसर्वकालेनुषज्यते । ददर्शविष्णुरित्यादौनित्यचिद्रूपतोहरेरि त्यादिसत्तत्वे ।

भिधत्ते । कुतःहरेर्नित्यचिद्रूपत्वादित्यर्थः । परोक्षप्रियादेवाइत्येतद्व्याचष्टे ॥ परोक्षेति ॥ तर्हीवशब्दवैयर्थ्यमित्यतआह ॥ तथापीति ॥ अपरोक्षदर्शिन्येवसम्यग्दर्शिन्येवप्रीतिंकुर्वतीत्यर्थः । सर्वेषामपिपरोक्षोपदेशेयोग्यानामपितत्रज्ञानानुदयात्परोक्षप्रियाइवेतीवशब्दप्रयोगइतिभावः ॥ ३ ॥ २३ ॥ इतिश्रीमद्विट्ठलाचार्यपुत्रेणश्रीमत्तीर्थाचार्यचरणसेविनाश्रीनिवासेनरचितायांऐतरेयभाष्यार्थरत्नमालायांद्वितीयप्रघट्टकेचतुर्थोऽध्यायः ॥ २ ॥ ४ ॥

पूर्वाध्यायेभगवतःसर्वैर्गुणैरन्यत्वंप्रतिज्ञायतदुपपादनायसृष्ट्याद्यष्टकर्तृत्वमुक्तं । नकेवलंबहिर्गतेनरूपेणमहदादिसर्वष्टृस्रत्वं किंतुपितृमात्रंतर्गतेनरूपेणगर्भाधानादिमुखेनचस्रष्टृत्वं पुत्रांतर्गतेनचरूपेणाभिव्यक्तत्वमित्यादिनिरूप्यतेऽस्मिन्नेकखंडात्मकेऽध्याये । अयं नारायणः आदितः प्रथमं पुरुषेगर्भः अंतर्गतो भवति प्रविशेत् अन्नस्थोन्नेनसहितइतिशेषः । यद्यदा एतद्भुक्तमन्नं सर्वांगेषुव्याप्तंसत्सर्वांगेभ्यःसंभूतं तेजस्तेजोरूपंतद्रेतःसंपन्नं अन्नस्थंभगवद्रूपंचरेतःसंभूतंरेतसिसंपन्नं तत्तदा आत्मानंरेतसिस्थंस्वरूपं आत्मनि पुरुषस्थेस्वस्मिन्नेवबिभर्ति । तद्रेतोगतंस्वरूपं रेतसासाकंपुरुषस्थोभगवान्यदास्त्रियांसिंचतिअथतदाएन

भा० । परोक्षप्रियाइत्येवसुराणांसम्यग्दर्शनेनपतनंदेवानांप्रियं तथाप्यपरोक्षदर्शिन्येवप्रीतिंकुर्वतीतीवशब्दः ॥ ३ ॥ २५ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेश्रीमन्महैतरेयोपनिषद्भाष्येद्वितीयप्रघट्टकेचतुर्थोध्यायः ॥ २ ॥ ४ ॥

उप० । ॐ (अपक्रामंतुगर्भिण्यः ।) पुरुषेहवाअयमादितोगर्भोभवतियदेतद्रेतस्तदेतत्सर्वेभ्योंगेभ्यस्तेजस्संभूतमात्मन्येवात्मानंबिभर्तितद्यदास्त्रियांसिंचति

द्रेतोगतस्वरूपंजनयति स्थानांतरेप्रादुर्भावयति । अथ तस्मादस्यस्थानांतरगतेरेतदेवास्यप्रथमंजन्म । ननुरेतसासाकमीश्वरस्यस्त्रीगर्भेवृद्ध्यंगीकारेस्त्रियःपीडास्यात्किमित्यतउच्यते ॥ तदिति ॥ तद्रेतोगतंभगवत्स्वरूपंरेतश्च स्त्रियायथास्वमंगंतथाआत्मभूयं आत्मभावं संश्लेषविशेषं गच्छति । तस्मादेनांनहिनस्ति नपीडयति सास्त्रियत्रगतं स्वगर्भगतं पुत्रंभावयति तेनचास्यपरमात्मनोत्रगतंपुत्रगतमेतमात्मानं पुत्रनामकंस्वरूपमेवभावयति । प्रतिमोपासनवदितिभावः । भावयित्री परमात्मस्वरूपमेवंभावयित्री सा स्त्री भावयितव्या माननीया भवति । भर्त्रेतिशेषः । कुतोभावयितव्येत्यतोभगवद्भावयितृत्वादित्येकंकारणं । कारणांतरमुच्यते ॥ तमिति ॥ गर्भगतंतंहरिंबिभर्तीत्यर्थः । यदिगर्भगतस्तर्हिंजीववद्दुःखीस्यादित्यतउच्यते ॥ सइति ॥ यंस्त्री गर्भंबिभर्तिसभगवांत्सर्वैर्गुणैरन्यएव । नकेवलंभर्त्राभार्यासंभावनीयागर्भगतःपुत्रश्चेत्युच्यते ॥ कुमारमिति ॥ जन्मनोग्रेपूर्वं कुमारंपिताऽधिभावयत्यादरपूर्वंभावयति । सपिता जन्मनोग्रेकुमारमधिभावयतीतियत्तत्तेनपुत्रगतंपरमात्मानमेवभावयतीत्यर्थः । पुत्रांतर्गतहरिसंभावनंकिमर्थंकार्यमित्यतउच्यते ॥ एषामिति ॥ एषांपृथिव्यादीनांलोकानांसंतत्यैविस्तृत्यैसर्वदालाभायेत्यर्थः । तस्यैवोपपादनमेवमिति ॥ एवंपुत्रस्थहरिसंभावनेहीमेपृथिव्यादयोलोकाःसंतताः सर्वदाप्राप्ताभवंति । पितुःस्वर्गादि

उप० । अथैनज्जनयतितदस्यप्रथमंजन्मतत्स्त्रियाआत्मभूयंगच्छतियथास्वमंगंतथा तस्मादेनांनहिनस्ति सास्यैतमात्मानमत्रगतंभावयति साभावयित्रीभावयितव्याभवति तंस्त्रीगर्भंबिभर्ति सोग्रएव कुमारंजन्मनोग्रेधिभावयति सयत्कुमारंजन्मनोग्रेधिभावयत्यात्मानमेवतद्भावयत्येषांलोकानांसंतत्याएवंसंततीहीमेलोका-

लोकप्राप्तावपिप्राक्पुत्रस्थस्यहरेरन्नपानवस्त्रभूषणादिभिरर्चनेनप्रतिमाभूतस्यपुत्रस्यापिपृथिव्यांप्रतिष्ठापनेनपुत्रकृतपुण्यभाक्त्वा पृथिवीलोकस्थितिःफलतोलभ्यतएवेतिभावः । तथाचवाजसनेये । सोयंमनुष्यलोकःपुत्रेणजेयइति । तत्तस्यांपृथिव्यांयज्जन्म तदस्यपरमात्मनोद्वितीयंजन्म । अस्यभगवतःसंबंधीसोयमात्मापुत्रगतंतन्नामकंरूपमस्यपितृजीवस्यार्थेपुण्येभ्यःकर्मभ्यः पुण्य कर्मसिद्ध्यर्थंपुत्रांतर्गतेनपरमात्मनाभूमौप्रतिधीयते विधीयते । अथास्यपरमात्मनःइतरःपुत्रनामकादितरोवयोगतः वयोगतपित्रं तर्गतोयमात्मापितृनामकरूपविशेषः कृतं निष्पादितं कृत्यं विहितं जीवानां येनेतिकृतकृत्यः सः पितृशरीरंपरित्यज्यतेनसह प्रैति अन्यत्रगच्छति । सपितृजीवइतःशरीरात्प्रयन्नन्यत्रगच्छन्पुनर्जायते । तत्पितुरन्यत्रजननमस्यतदंतर्गतस्यहरेस्तृतीयंजन्मे त्यर्थः ॥ यदुक्तमीश्वरस्यापिपितृमातृपुत्राभिधसर्वजीवांतर्गतत्वं गर्भवासेपितत्कृतलेपराहित्यं ज्ञानादिगुणाढ्यत्वं तद्दृषिणोक्त मित्युच्यते ॥ तदुक्तमिति ॥ गर्भो नु सन् अनु एषामितिपदपाठः । नुइदानींगर्भेनु गर्भएवसन्वर्तमान एषांदेवानांविष्ण्वादीनां विश्वा विश्वानिनानाविधानि देवानांजीवशरीरेअभिमानिरूपेण ईश्वरस्यनियामकत्वेन इत्येवंविधानि जनिमानि जन्मानिअह महेयंदुःखादिहेयरहितंयथाभवतितथान्ववेदं । तत्रज्ञापकमुच्यते ॥ शतमिति ॥ अथतस्मादेवकारणात् आयसीःआयस्यः

उप० । स्तदस्यद्वितीयंजन्म सोस्यायमात्मापुण्येभ्यःकर्मेभ्यःप्रतिधीयते ऽथास्यायमितरआत्माकृतकृत्योवयोगतःप्रैति सइतःप्रयन्ने वपुनर्जायतेतदस्यतृतीयंजन्म । तदुक्तमृषिणागर्भेनुसन्नन्वेषामवेदमहंदेवानांजनिमानिविश्वा ॥ शतंमापुरआयसी-

विशेषेणज्ञानिन्यः । शतं शतसंख्याका मानुषानपेक्ष्यपूर्णत्वात्पुरः तादेवता मुख्यतःपूर्णोविष्णुश्चमामरक्षन् । अत्राधश्येनइ त्यत्राधेतिपदपाठः । अथतस्माद्रक्षणादेवश्येनः श्यः सुखज्ञानरूपीविष्णुरिनःस्वामीतिज्ञानंयस्यसपूर्णानंदः पूर्णज्ञानस्वरूपो विष्णुर्ममस्वामीतिज्ञात्वाजवसावेगेनगर्भवासान्निरदीयंतत्कृतक्लेशेभ्योनिष्क्रम्यातिक्रांतोस्मीतिऋषिणोक्तमित्यर्थः । कोयंवक्ता ऋषिरित्यत्रउच्यते गर्भइति ॥ गर्भएवशयानोवामदेवएतत्प्रमेयमेवमुवाच । सउपासकएवंविद्वान् अस्माच्छरीरभेदाच्छरीरविशे षात् । यद्वाशरीराख्यात्स्वभेदकाद्भंधात् । यद्वाशरीरगतस्थानप्रभेदादित्यर्थः । "नाभ्यांस्थितंहृद्यवरोप्यतस्मादुदानगत्योरसितन्न येन्मुनिः ॥ स्वतालुमूलंशनकैर्नयेते" त्युक्तप्रकारेणोर्ध्वब्रह्मनाड्योत्क्रम्यामुष्मिन्स्वर्गेलोकेअमृतोमुक्तःसन्सर्वान्कामानाप्त्वायथा योग्यंप्राप्यसमभवत्सर्वदानुभवति ॥ १ ॥ (२४) पुरुषेहवाइत्यादौजीवमात्रोत्पत्तिप्रक्रियोच्यतइत्यपव्याख्यानिरासायप्रमा णेनव्याचष्टे ॥ अयमिति ॥ आत्मावाइदमित्यत्रप्रकृतपरामर्शोयमितिभावेनोक्तमयंनारायणइति ॥ गर्भोभवतीत्यस्यतात्प र्यं विशेदिति ॥ परामर्शसिद्ध्यर्थमध्याहृत्यव्याचष्टे ॥ अन्नस्थइति ॥ यद्यदाएतदन्नंप्रसिद्धंरेतःसंभूतंतत्तदेत्यस्यार्थस्तस्मिन्

उप० । ररक्षन्नधःश्येनोजवसानिरदीयमिति गर्भएवैतच्छयानोवामदेवएवमुवाचसएवंविद्वानस्माच्छरीरभेदादूर्ध्वमुत्क्रम्यामुष्मिन्त्स्व र्गेलोकेसर्वान्कामानाप्त्वाऽमृतःसमभवत्समभवत् ॥ १ ॥ (२४) (यथास्थानंगर्भिण्यः) इत्यैतरेयोपनिषत्सुद्वितीयारण्यकेपंचमोऽ ध्यायः ॥ २ ॥ ५ ॥

भा० । ॐ ॥ अयंनारायणोदेवःपुरुषेप्रथमंविशेत् । अन्नस्थोन्नेनसहितस्तस्मिन्

रेतस्त्वमागतइति ॥ यद्वायद्यदाएतदन्नमन्नगतंभगवद्रूपंरेतःसंभूतंरेतःप्राप्तंरेतोंतर्गतत्वंप्राप्तंतदेत्यस्यार्थांतरमाह ॥ तस्मिन्नि ति ॥ तस्मिन्नन्नगतेरेतस्त्वंरेतोंतर्गतत्वं । आत्मन्येवात्मानमित्येतद्व्याचष्टे ॥ तस्मिन्निति ॥ तद्यदाख्रियामित्यस्यकर्त्रध्याहारपूर्वमर्थ माह ॥ तद्रूपमिति ॥ अथैनज्जनयतीत्यस्याथ तदा एतद्रेतोगतंस्थानांतरे जनयतिप्रादुर्भावयति । अथतस्मादस्यस्थानांतर गतेरित्यर्थमभिप्रेत्याऽथैतज्जनयतितदस्यप्रथमंजन्मेत्येतद्योजयति ॥ तस्यैवेति ॥ यथास्वमंगंतथेत्यादिव्याचष्टे ॥ सतस्या इति ॥ अंगवदानुकूल्यादित्यन्वयः । सात्रगतंभावयतीत्यस्यार्थः ॥ सापुत्रमिति ॥ सास्यैतमात्मानमत्रगतंभावयतीतिविशि ष्टवाक्यंव्याचष्टे ॥ पुत्रस्येति ॥ साभावयतीत्यस्यार्थः संभावितव्येति ॥ कुमारंजन्मनोग्रइत्यस्यार्थः पुत्रश्चेति ॥ अ धीत्यस्यार्थः सादरमिति ॥ सयत्कुमारमित्यस्यार्थः संभावनमिति ॥ ननुपुत्रसंभावनंकथंभगवत्संभावनंस्यादित्यतोजान तइत्युक्तं । अस्मिन्हरिःस्थितइतिजानतइत्यर्थः । कथंतत्रहरिःस्थितइतिज्ञानमात्रेणपुत्रसंभावनंकेशवेभवेदित्यतआह॥तस्येति॥ यथाप्रतिमाभिषेकालंकारादिपूजनंतदंतर्गतस्यहरेरित्यर्पणमात्रेणहरिःपूजितस्तथात्रेतिभावः । ननुयदुक्तमेषांलोकानामित्यादित दयुक्तं । तथाहि । अस्तुपुत्रगतहर्युपासकस्यस्वर्गादिप्राप्तिः पृथिवीप्राप्तिस्तुनयुज्यते । उपासनादशायांसिद्धत्वात् । स्वर्गप्राप्त्य

भा० । रेतस्त्वमागते । तस्मिन्स्थितंस्वरूपंसपुरुषस्थोविभर्त्यजः । तद्रूपंरेतसासाकंस्वयंपुंसिस्थितोहरिः । स्त्रियांसिंचतितस्यैवस्थानांतर गतेःप्रभोः । प्रथमंजन्मविष्णोस्तुसतस्याअंगवत्प्रभुः । नैनांहिनस्त्यानुकूल्यात्सापुत्रंभावयत्यथ । पुत्रस्यभावनासैवतद्रूत्वाद्धरिभावना । संभावि तव्यासाचैवभर्त्रापुत्रश्चसादरं । संभावनंकुमारस्यजानतःकेशवेभवेत् । तस्येत्यर्पणमात्रेणपूजितोहिभवेद्धरिः ।

नंतरंतदसंभवादित्यतस्तद्घटयति ॥ पुत्रस्थस्येति ॥ प्राक्पुत्रस्थस्यहरेःपूजांकुर्वतःतदवांतरफलतयास्वर्गस्थस्यापिजन्मांतरंवि नापृथिवीस्थितिर्भवत्येव । यतःपुत्रपुण्यमखिलंस्वर्गस्थस्यभवतीतियोज्यं । ननु"पुनःपुनःकर्मकृतिर्मानुष्यजयउच्यते ॥ जन्मां तरंविनानैवकर्मणातत्तुयुज्यते ॥ पुत्रेणविद्ययानित्यमेकैकेनापियुज्यते ॥ उभाभ्यांकिमुवक्तव्यमष्टभागफलंसुतात् ॥ विद्यया त्वर्धमाप्नोतिसर्वंसप्तान्नविल्लभे"दितिसप्तान्नब्राह्मणोदाहृतवचनेसप्तान्नविद्योपासकानांदेवानां "देवमानुष्यतामंशैःप्राप्तायेपुत्रतः फलं ॥ स्यात्तेषामेवचामुक्ते"रित्युक्तरीत्यामनुष्यतयावतीर्णानांस्वपुत्रकृतनिखिलपुण्यभाक्त्वस्यान्येषामष्टभागपुण्यभाक्त्वस्यो क्तत्वाद्विरोधइत्यतआह ॥ अत्यल्पेति ॥ यद्युक्तप्रकारेणज्ञानपूर्वंपुत्रांतर्गतंकेशवंनार्चयेत्तर्ह्यत्यल्पपुण्यभागष्टभागपुण्यभाग्भव तीतितत्रविवक्षितं । उक्तप्रकारेणतत्रहरिंभावयितुस्त्वखिलंपुत्रपुण्यंभवतीत्यत्रविवक्षितं । बृहद्भाष्येयदिपितासप्तान्नविद्योपास कस्तदापुत्रसंतानस्थैःसर्वैर्यत्कृतंपुण्यंतदखिलंभवतीतिविवक्षितं । नपुत्रमात्रंकृतं । " पुत्रतःफलं स्यात्तेषामेवचामुक्ते " रित्यु क्तत्वादतोनविरोधइति । तदस्यद्वितीयंजन्मेत्येतत् । तत्तस्यांपृथिव्यामस्यपुत्रस्ययज्जन्मतदस्यहरेर्द्वितीयंजन्मेत्यावृत्त्यायोजय ति ॥ पृथिव्यामिति ॥ सोस्यायमात्मेत्यादितात्पर्यतोव्याचष्टे ॥ एतद्रूपमिति ॥ जीवार्थे पितृजीवार्थं । कर्मकर्तवे पुण्या

भा० । पुत्रस्थस्यहरेःपूजांकुर्वतःपृथिवीस्थितिः । स्वर्गस्थस्यापिभवतिपुत्रपुण्यंयतोखिलं । अत्यल्पपुण्यभाक्तस्यान्नार्चयेत्केशवंयदि । पृथिव्यांजन्मपुत्रस्यद्वितीयंविष्णुजन्महि । एतद्रूपंनिधायैवजीवार्थेधर्मकर्तवे ।

निकर्माणिकर्तु । पुत्रजीवार्थेधर्मकरणायेतिवा । अथास्यायमितरआत्मेत्येतद्व्याचष्टे ॥ पितृस्थेनेति ॥ सइतःप्रयन्नेवेत्यादि व्याचष्टे ॥ पितुरिति ॥ सएवमित्यादिफलवाक्येएवमितिपरामृष्टंदर्शयति ॥ अंतर्यामितयेति ॥ पुरुषेहवायं तद्यदास्त्रियां सिंचति सयत्कुमारमिति सर्वजीवेषुसंस्थितं सोग्रएवेति । सर्वदोषोज्झितं नित्यानंदं स्वतंत्रंच सर्वतोधिकं पुण्येभ्यःकर्मभ्यः इति कर्तारंसर्वकर्मणांयोवेदशरीरभेदात् शरीराख्यात्स्वरूपविदारकाद्बंधादमृतोमुक्तःसन्यथायोग्यंसर्वान्कामानाप्त्वासमभवद्भुङ्क्तइत्यर्थइतिभावः । अध्यायोक्तस्यास्यमोक्षोपायस्यावश्यमनुष्ठेयत्वंयोगशास्त्रविहितत्वादित्यवधारणायद्विरुक्तिरित्यभिप्रेत्योक्तमितिवेदानुशासनमिति ॥ खंडप्रतिपाद्यप्रमेयवगतेतदुक्तमृषिणेतिप्रतिज्ञयोदाहृतमंत्रस्यसामंजस्यंभवतीतिभावेनखंडप्रतिपाद्यपरामर्शकंसएवंविद्वानितिवाक्यमेवंव्याख्यातमितिबोध्यं । अपव्याख्यानमपाकरोति ॥ नात्रेति ॥ इतश्चनजीवोत्पत्तिमात्रमत्रोच्यतइत्याह ॥ गर्भइति ॥ अस्तुदेवजन्मकथ्यतइति विष्णुजन्मतुकथंलभ्यतइत्यतआह ॥ विष्णुर्हीति ॥ तर्हिदे

भा० । पितृस्थेनतुरूपेणगच्छत्यन्यत्रकेशवः । पितुरन्यत्रजननंतृतीयंजन्मतद्धरेः । अंतर्यामितयैवंहिसर्वजीवेषुसंस्थितं । सर्वदोषोज्झितंविष्णुंकर्तारंसर्वकर्मणां । नित्यानंदंस्वतंत्रंचसर्वज्ञंसर्वतोधिकं । योवेददेहबंधात्सविमुक्तोनित्यमुक्तमान् । भोगान्भुंक्तेयथायोग्यमितिवेदानुशासनमित्यैतरेयसंहितायां । नात्रजीवोत्पत्तिमात्रमुच्यते । नहिजीवोत्पत्तिमात्रपरिज्ञानादमृतत्वंभवति । ज्ञातमेवसर्वैःपितापुत्रसंबंधमात्रंपश्वादिभिरपि । गर्भेनुसन्नन्येषामवेदमहंदेवानांजनिमानिविश्वेत्युक्तार्थउदाहृतमंत्रेदेवजन्मकथनाच्च । विष्णुर्हिपरमोदेवः ।

वानामितिबहुवचनंकथं कथंचविष्ण्वादीनांजनिरित्यतआह ॥ तेनैवेति ॥ जायंतइवेत्युपमार्थमाह ॥ शरीरेति ॥ अन्येषामपि जीवानामपि । तर्हिकोविशेषोदेवानां येनेवशब्दइत्यतआह ॥ अयमेवेति ॥ देवानां विष्ण्वादीनां । विष्णोरसाधारणविशेषमाह ॥ स्वातंत्र्यंचेति ॥ इतोप्ययंखंडःपरमात्मविषयएवमुख्यइत्याह ॥ आत्मन्येवेति ॥ आदिपदेनसास्यैतमात्मानमित्यादिगृह्यते । आत्मशब्दस्यविष्णौमुख्यत्वंकुतइतिचेत्पूर्वोदाहृतप्रमाणादितिस्थितेयुक्तिमप्याह ॥ णकारइति ॥ " आप्नोतत्वंसर्वगुणैर्देशतःकालतस्तथा ॥ आत्मशब्दोदितंतच्चषशब्देनाभिधीयत" इतिवक्ष्यमाणत्वादितिभावः । आत्मशब्दस्यभगवत्परत्वेज्ञापकांतरमाह ॥ एतयेति ॥ आत्मावाइदमित्युक्तात्मनएव सएतमेवसीमानमितिपरामर्शंविधाय शरीरप्रवेशस्योपक्रांत्वादात्मन्येवात्मानमित्यत्रात्मनीत्युक्तआत्मापुरुषशरीरस्थोभगवानित्यर्थः । अत्रात्मशब्देनपरमात्मांगीकारेप्रैतीत्युक्तमरणविरोधइत्यतआह ॥ जीवेति ॥ प्रैतीत्युक्तंप्रयाणंनमरणं येनविरोधःस्यात्किंतुजीवशरीरंपरित्यज्यान्यत्रगमनमात्रमितिभावः । जीवशरीरंपरित्यज्येतिजीवशरीरग्रहणव्यावर्त्यमाह ॥ कृष्णेति ॥ कृष्णराघवादिसंज्ञितंस्वरूपंदेहमित्यर्थः । कृष्णस्यस्वर्गारो

भा० । तेनैवसहसर्वेपिदेवाजीवदेहजननेजायंतइव । शरीरप्राप्तिरेवहिजन्मान्येषामपि । अयमेवविशेषोदेवानांदुःखाभोगः । स्वातंत्र्यंचविष्णोः । आत्मन्येवात्मानंबिभर्तिआत्मानमेवतद्भावयतीत्याद्यात्मशब्दश्चमुख्यतोविष्णावेवयुज्यते । णकारोबलंषकारःप्राणआत्मेतिविष्णुशब्दार्थैकदेशवाचित्वाच्चात्मशब्दस्य । एतयाद्वाराप्रापद्यतेतितस्यैवशरीरप्रवेशस्यप्रस्तुतत्वाच्च । जीवशरीरंपरित्यज्यान्यत्रगमनमात्रंविष्णोरप्यस्तीतिप्रैतीत्युक्तेप्यविरोधः । कृष्णराघवादिस्वरूपमेवह्यसौनपरित्यजति ।

हणकालेशरीरत्यागोक्तेरर्थमाह ॥ कृष्णइति ॥ लोकानांलोचनानियस्मिंस्तल्लोकलोचनं सौंदर्यातिशयेनसर्वैरवलोकनीयं । स्वबिंबं स्वमूर्तिं नृणांप्रदर्श्य सर्वदादर्शनसाधनंतपोनतप्तंयैस्तेऽतप्ततपसस्तेषामवितृप्तदृशांसतांयःस्वबिंबमादायैवांतरधादंतर्धानमगान्नतुतत्परित्यज्यागात्सभगवानित्युत्तरेणान्वयः । प्रैतीत्यस्यगतिवाचित्वे उदाहरणमाह ॥ प्रेतामिति ॥ तर्हिमरणेतत्प्रयोगोनस्यादित्यतआह ॥ प्रकृष्टेति ॥ जीवदेहगतानांविष्ण्वादिदेवानांदुःखंविनाजीवदेहंपरित्यज्यप्रकर्षेणगतिरूपत्वादेवमरणेप्ययंशब्दःप्रयुज्यते । ब्रह्मणःशरीरंपरित्यज्यगतेरेवजीवमरणत्वात् । "ब्रह्मणासंपरित्यक्तोमृतइत्युच्यतेबुधै" रितिवचनादितिभावः । ननुसयत्कुमारमितिवाक्यं प्रतिमात्वेनपुत्रसंभावनांजानतस्तद्गतहरिसंभावनैवेतिव्याख्यातं । कुतएतदेवंव्याख्यायते । जीवेश्वरयोरभेदात्कुमारंभावयतीतियत्तेनपरमात्मानमेवभावयतीतिवा । पितृपुत्रचैतन्यैक्यात्पुत्रसंभावनंस्वसंभावनमेवेतिवार्थःकिंनस्यात् । नचोदाहृतमंत्रविरोधः । तत्राहमेवगर्भेसन् एषांदेवादीनांविश्वानिजनिमान्यनुभवामि मांशतंपुरःशरीराण्यरक्षन् श्येनपक्षीववेगेनाधःतस्माद्गर्भाद्बहिर्निर्गतोस्मीतितद्वाक्यस्यापिजीवैक्याभिप्रायेणोपपत्तेरित्यतआह ॥ एषामवेदमिति

भा० । कृष्णोह्यत्यक्तदेहोपित्यक्तदेहवदेवच । लोकानांदर्शयामासस्वरूपसदृशाकृतिं । येनरूपेणकंसादीन्जघ्नेतद्रूपमेवहि । पूज्यतेद्यापिशर्वाद्यैर्निर्मितान्याशवाकृतिः । स्वर्गारोहणकालेतुजनास्तेनैवमोहिताः । यत्तद्रूपंनिजंविष्णोर्दृष्टंसर्वजनैर्भुवि । अद्यापितद्देवलोकेपूज्यतेसर्वदैवतैरित्यादिस्कांदे । प्रदर्श्यातप्ततपसामवितृप्तदृशांनृणां । आदायांतरधाद्यस्तुस्वबिंबंलोकलोचनमितिचभागवते । प्रेतांयज्ञस्यशंभुवेत्यादिवत्प्रकृष्टगतिवाच्येवायंशब्दः । प्रकृष्टगतित्वादेवचमरणेपिप्रयुज्यते । एषामवेदमहमित्यत्रापि

जीवभेदो जीवेश्वरभेदःपरस्परंजीवभेदश्च । देवपदेनदेवानांदेवोत्तमस्यचविवक्षितत्वादितिभावः ॥ अन्यथेति ॥ अभेदविवक्षयास्वस्यैवानेकशरीरप्रवेशेनजन्मानुभवाभिप्रायत्वे ममेत्यश्रुतंपदंकल्प्यमितिभावः । श्रुतहानंचाह ॥ व्यर्थतेति ॥ एषांदेवानामहमितिविशेषणानामित्यर्थः । अहमित्यस्यकथंवैयर्थ्यमित्यतआह ॥ अवेदमिति ॥ उत्तमपुरुषप्रयोगादेवेत्यर्थः । अप्राप्तशास्त्रमर्थवदितिन्यायादितिभावः । ननुभवत्पक्षेप्यहमितिव्यर्थमित्यतआह ॥ अहमिति ॥ अस्मिन्पक्षेयोजनामाह ॥ जन्मेति॥ नन्वहंमनुरभवंसूर्यश्चेत्यस्मिन्वाक्येवामदेवस्यमन्वाद्यभेदउच्यते अतःप्रकरणवशाद्गर्भेनुसन्नित्यादिकमप्यभेदपरमंगीकार्यं। तत्रोत्तमपुरुषप्रयोगेप्यहंशब्दावैयर्थ्यवत्प्रकृतेप्यहंशब्दस्यावैयर्थ्यमित्युपपत्तेरित्यतआह ॥ तस्मादिति ॥ अहंमनुरभवमितिजीवैक्यार्थत्वेऽभवमित्यनेनैवाहमित्यस्यसिद्धत्वेनवैयर्थ्यादस्मिन्प्रकरणेदेवानामितिभेदोक्तेश्चेत्यर्थः । नन्वहंशब्दस्यास्मदादेशत्वाभावेअहेयत्वगुणेनविष्णुवाचकत्वेअभवमित्युत्तमपुरुषप्रयोगायोगइत्यतआह ॥ सर्वांतरत्वादिति ॥ उत्तमपुरुषप्रयोगोहिप्रत्यक्चैतन्येभवति । भगवानेवहिसर्वेषांप्रत्यग्भूतः अतोवामदेवोपिस्वांतर्यामिण्यभवमितिप्रयुक्तवानितिभावः । अहंशब्दस्याहेयगुणवत्तयाविष्णुवाचित्वे उत्तमपुरुषस्यांतर्यामिण्युपपन्नत्वेचप्रमाणमाह ॥ अहेयत्वादिति ॥ सर्वांतरत्वतइति ॥ प्रति

भा० । जीवभेदएवोक्तः । अन्यथाममजनिमानीत्येवोच्येत । व्यर्थताचैषामित्यादिविशेषणानां । अवेदमित्यनेनैवस्वस्यसिद्धत्वादहमित्यपि अहेयत्वेनेतिक्रियाविशेषणं । जन्मजानन्नपिदेवानांदुःखादिहेयरहितत्वेनव्यजानामीत्यर्थः । तस्मादहंमनुरित्यादावप्यहेयगुणंभगवंतमेवाहं शब्दोवक्ति । सर्वांतरत्वात्तस्मिन्नेवाभवमित्युत्तमपुरुषशब्दोपिसर्वोवर्तते । अहेयत्वादहंविष्णुःसतुसर्वांतरत्वतः ।

योगिभूतवस्त्वंतर्गतत्वात्तत्वमसीति प्रत्यग्भूतस्वांतर्गतत्वात् सोहमस्म्यहंमनुरभवमित्यादिभिःशब्दैरुच्यतइत्यर्थः । ननुलोक व्यवहारोहिशब्दशक्तिग्रहणोपायः लोकेचाहमस्म्यादिशब्दाःस्वात्मन्येवव्यवह्रियंते तत्त्वमस्यादिशब्दाश्चप्रतियोगिनिजीवे तेन चाहंमनुरभवमित्यादौस्वस्यमन्वाद्यभेदः तत्वमसीत्यादौजीवस्यब्रह्माभेदइतिनिर्णीयतइत्यतआह ॥ नचेति ॥ किंतुसर्वेषांव्य वहारोनुभवइतियोज्यं ॥ तस्मादिति ॥ अहमादिशब्दानांभगवत्येवमुख्यतयाज्ञानिभिर्व्यवह्रियमाणत्वान्नाहमीश्वरइत्याद्यनु भवस्य विरुद्धधर्माधिकरणत्वादियुक्तेः 'अहेयत्वादहंविष्णु'रित्यादिनिर्णायकवाक्यांतरस्यच सद्भावादितिभावः । ननुगर्भेनुस न्नन्वेषामित्यस्याभेदपरत्वांगीकारेनाहमादिपदवैयर्थ्यं अभवमित्युत्तमपुरुषप्रयोगलब्धार्थस्यस्फुटीकरणेनाहमित्यस्यसार्थकत्वात् स्वस्यैवोपाध्यंतरत्वाभिप्रायेणैषांदेवानामितिपरोक्षनिर्देशबहुवचनयोःसंभवादित्यतआह ॥ नवेदेष्विति ॥ गत्यंतराभावेह्यहमि त्येतल्लब्धार्थप्रदर्शकमितिकल्प्यं। वेदविचारनियतैश्चयथायोग्यमर्थभेदऊह्यऊहितश्चास्माभिः । सतिचैवंगत्यंतरेवेदिभिर्वेदे नैकंपदं नैकोवावर्णो व्यर्थयिष्यते बहूनांपदानांवैयर्थ्यमंगीकुर्वन्भवान्नपरीक्षकइतिभावः । ननुभवत्पक्षेपिरेतोन्नकुमारादिशब्दानांतद्गते हरौलक्षणांगीकार्येतिसमानोदोषइत्यतआह ॥ शब्दाइति ॥ सास्यैतमात्मानमत्रगतंभावयतीत्यत्रोत्पादयतीत्यर्थप्रतीतेर्व्याचष्टे॥

भा० । अस्यस्मीत्यादिभिःशब्दैरुच्यतेन्योपिजीवतइतिब्रह्मवैवर्ते । नचमूढव्यवहारएववेदनिर्णायायभवति । किंतुसर्वेषामनुभवोयुक्तय श्चवाक्यांतरंचनिर्णयकारणं । तस्मात्सर्वजीवादिभ्योन्यःसर्वोत्तमोविष्णुरेवात्रोक्तः । नवेदेषुपदंकिंचिद्वर्णोवाव्यर्थइष्यते । यथायोग्यंचार्थभेदऊ ह्यःसर्वत्रवेदिभिरितिशब्दनिर्णये । शब्दारेतोन्नमित्याद्याअपितत्रगतंहरिं । वदंत्यविष्णुवाचीहिनशब्दःक्वचिदिष्यतइतिच ।

भावयतीति ॥ उत्पादनार्थकत्वेउत्तरवाक्येतंस्त्रीगर्भंबिभर्तीतिपुनर्गर्भधारणोक्तिविरोधादितिभावः । ननुतंस्त्रीगर्भंबिभर्तिसो ग्रएवेत्यत्रसा उ अग्रेइतिपदच्छेदस्तथाच सास्त्रीअग्रेउत्पादनात्पूर्वंतंगर्भंबिभर्तीत्यर्थस्यविरोधइत्यतोव्याचष्टे॥ सोग्रएवेति ॥ ननु पुत्रेश्वरयोर्भेदेकथंपुत्रसंभावनमात्मसंभावनंस्यादित्यतआत्मानमेवतद्भावयतीत्यस्यतात्पर्यमाह ॥ पुत्रसंभावनमिति ॥ तत्पुत्र संभावनमपि । तत्रस्थंविष्णुंसंभावयामीतिज्ञानेसति तस्य विष्णोरेव भवतीत्यर्थः । ननुब्राह्मणे "नापुत्रस्यलोकोस्तीतितत्सर्वेपश वोविदुः । तस्माच्चपुत्रोमातरंस्वसारंचाधिरोहति । एषपंथाउरुगायःसुशेवःयंपुत्रिणआक्रमंतेविशोकास्तंपश्यंतिपशवोवयांसिचत स्मात्तेमात्रामिथुनीभवंती" त्यत्रयस्मान्नापुत्रस्यलोकोस्तीतिप्रमेयंपशवोविदुस्तस्मात्स्वपुत्रमुखनिरीक्षणार्थंपुत्रोमातरंभ्रातास्वसारं चाधिरोहति । एवमधिरोहणेनपुत्रजन्मोपलंभवतांयंलोकंविशोकाःपुत्रिणआक्रामंति तस्यलोकस्योरुगायःसुशेवःसुखप्रदएषभग वान्पंथाः मार्गभूतः। तंपश्यंतिपशवोवयांसिच । तस्मात्तेमात्रामिथुनीभवंतीति पश्वादीनामपिपुत्रोत्पत्तिज्ञानमात्रेणामृतत्वप्राप्त्युक्तेः कथं नहिजीवोत्पत्तिमात्रज्ञानादमृतत्वंभवति ज्ञातमेवसर्वैःपितृपुत्रसंबंधमात्रंपश्वादिभिरपीत्युक्तमित्यतआह ॥ एवंभावय तामेवेति ॥ एवमुक्तप्रकारेणपुत्रस्थंहरिंभावयतामेवैषपंथाइत्युक्तममृतत्वाख्यंफलंनपुत्रमात्रज्ञानिनां तंपश्यंतिपशवइतिमुरुगा यंपश्यंतीतिवाक्यशेषादितिभावः । ननुतंपश्यंतीत्यस्यतंपुत्रंपश्यंतीत्यर्थः पश्वादीनांभगवद्दर्शनायोगादित्यतआह ॥ तंपश्यं

भा० । भावयतिसंभावयति। सोग्रएवसोग्र्योविष्णुरेव। पुत्रसंभावनमपितत्रस्थंविष्णुंसंभावयामीतितत्तस्यैवभवति । एवंभावयतामेवै षपंथाउरुगायइत्याद्यपि । तंपश्यंतिपशवइत्याद्यपिदिव्यपश्वादीनामेव ।

तीति ॥ आदिपदेनतत्सर्वेपशवोविदुरित्युक्तंगृह्यते । अन्येषांपश्वादीनांस्वभावतएवमात्राद्यधिरोहणादौप्रवृत्तिरित्यर्थः । शतं पुरआयसीरित्येतदनूद्यविशेष्यप्रदर्शनपूर्वमर्थमाह ॥ ताएवदेवताइति ॥ गत्यर्थादयतेर्भावेऽस्प्रत्ययेअयस्शब्दात्संबंधार्थेण् प्रत्ययेङीपिअयःशब्दितज्ञानवत्यआयस्यो विभक्तिव्यत्ययेनआयसीरितिभावः । कथंविशेषतोज्ञानित्वमित्यतउक्तस्यपुरइत्य स्यार्थोमानुषानिति ॥देवशब्देनविष्णोरपिग्रहणात्तत्रज्ञानित्वंतदुपपादकंपूर्णत्वंचमुख्यमित्याह ॥ विष्णुरिति ॥ अपव्याख्यां प्रत्याख्याति ॥ नचेति ॥ बंधकत्वादितिभावः । ननुबंधकत्वेपितात्कालिकसुखलवहेतुत्वाद्रक्षकत्वं अन्यथाभवतामपिदेवाना मितिपुल्लिंगेनप्रकृतानांस्त्रीलिंगेनपरामर्शायोगइत्यतआह ॥ मुख्यइति ॥ देवतापरत्वमंगीकृत्यमुख्येरक्षणेर्थतयायुज्यमाने अमुख्यार्थोनयुक्तः । लिंगव्यत्ययेनपरामर्शस्तुनतावद्दोषावहइतिभावः । अपव्याख्यानिरासायश्येनपदार्थमाह ॥ शमिति ॥ भूमत्वविवक्षायांमतुबितिभावेनोक्तंपूर्णेति ॥ "भूमनिंदाप्रशंसासुनित्ययोगेऽतिशायने ॥ संसर्गेऽस्तिविवक्षायांभवंतिमतुबाद य"इतिवचनादितिभावः ॥ सएवेति ॥ शीएवज्ञानरूपत्वाद्यश्चेतिश्यः । शीचासौयश्चेतिविग्रहः । निरुक्तत्वादिकारलोपइति भावः । शंरूपत्वाच्छः ज्ञानरूपत्वाद्यः शश्चासौयंश्चेतिश्यइतिकिंनव्याक्रियतइतिचेत् । अत्रापिशकारात्पराकारलोपस्यवाच्यत्वेन

भा० । अन्येषांस्वभावप्रवृत्तिः । ताएवदेवताःशतंपुरआयसीर्ज्ञानिन्योविशेषतः । अयपयगताविति धातोः । मानुषानपेक्ष्यपूर्णत्वात्पुरः । विष्णुर्मुख्यतएवपूर्णः । नचशरीरैर्जीवोरक्षितः । मुख्येयुज्यमानेचनामुख्यार्थःकल्प्यः । शमस्यविद्यतइतिशीविष्णुःपूर्णानंदत्वात् । सएवज्ञान त्वाद्यश्चेतिश्यः । सोस्यजीवस्येनइतिश्येनः ।

विनिगमनाविरहादानंदपूर्तेर्लाभेनास्मिन्पक्षेविशेषलाभाच्च।ननुविष्णुःस्वामीसर्वेषामपिभवति कोस्यविशेषइत्यतोज्ञानेनविशेषइति भावेनगर्भवासदुःखातिक्रमेणतथाज्ञानंकारणमितिभावेनतात्पर्यमाह ॥ विष्णुमिति ॥ निरदीयमित्यत्रनिरोर्थोनिष्क्रम्येति ॥ दुःखेभ्यइतिभावः । अदीयमित्यस्यार्थोतीतइति ॥ कर्माध्याहृतंगर्भवासमिति ॥ गर्भवासातिक्रमोनामतत्रस्थस्यैवतदब द्धत्वं । स्वर्गेलोकेसर्वान्कामानित्यस्य प्रसिद्धेस्वर्गेलोकेसर्वान्कामाननुभूयामृतोभवन्निर्गुणमोक्षंप्राप्तोभवदित्यपव्याख्यानिरासाय व्याचष्टे ॥ स्वरित्यादिना ॥ अमृतस्यसर्वकामावाप्तिव्यतिरेकेणकोयंसंभवइत्यतःसर्वकामावाप्तिमनुभवतीत्युक्तंविवृणोति ॥ अ पेक्षितेति ॥ समभवदित्यस्यभोगेप्रयोगंवाजसनेयेदर्शयति ॥ तामिति ॥ ब्रह्मा तांस्त्रियंसमभवत् बुभुजे । ततोमनुष्याअ जायंतेत्यर्थः । ननुयथाश्रुतएवार्थःकिंनस्यात् किममृतःसन्सर्वान्कामानाप्त्वेत्यन्वयभेदेनेत्यतआह ॥ मुक्तीति ॥ ननुस्वर्गेयथा योग्यंसर्वान्कामानाप्त्वेत्यर्थःकिंनस्यादित्यतआह ॥ मुख्यएवेति ॥ स्वर्गपदस्यसर्वपदस्यचेतिशेषः । ननुस्वर्गेपिसर्वकामावा प्तिःकिंनस्यात् मुक्त्यनंतरमेवेतिकिंनियम्यतइत्यतःकैमुत्येनोत्तरमाह ॥ अमुक्तानामिति ॥ विष्णुलोकगानांवैकुंठगतानामपि

भा० । विष्णुंस्वामिनंज्ञात्वेत्यर्थः । निरदीयंनिष्क्रम्यातीतोस्मिगर्भवासंस्वरानंदोविष्णुरत्रगइतिस्वर्गलोकोविष्णुलोकः । अमृतःसन्सर्वा न्कामानाप्त्वातानेवसर्वान्कामान्समभवदनुभवति । अपेक्षितवस्तुस्वीकारआप्तिः । संभवोभोगः । "तांसमभवत्ततोमनुष्याअजायंते"त्यादिवत् । मुक्त्यनंतरमेवह्यनुपचरितसर्वकामावाप्तिः । मुख्यएवचार्थःस्वीकार्यः । अमुक्तानांविष्णुलोकगानामपि

नसर्वकामावाप्तिः किमुस्वर्गगतानांनास्तीतिवाच्यमित्यर्थः । तदुदाहृत्यदर्शयति ॥ जयेति ॥ अप्रियं शापादिनिमित्तंदुःखं । स्वकृतं व्याख्यानमुपपाद्योपसंहरति ॥ अतइति ॥ उक्तार्थेप्रमाणमाह ॥ मुक्तइति ॥ २ ॥ (२४) ॥ इतिश्रीमद्विट्ठलाचार्यपुत्रेणतीर्थाचार्यचरणसेविनाश्रीनिवासेनरचितायांश्रीमन्महैतरेयभाष्यरत्नमालायांद्वितीयप्रघट्टकेपंचमोध्यायः ॥२॥५॥ मोक्षयोग्यानांसर्वसाधारण्येनोपास्यानानंदादिगुणान्रूपविशेषंनामविशेषंचवक्तुं तथातत्तद्योग्यविशेषगुणप्रतिपादनार्थंचायमेकखंडात्मकोध्यायः । कतरइत्यानंदस्य संज्ञानमित्यादिनाज्ञानस्य समितिनिर्दोषत्वस्य सर्वतत्प्रज्ञानेत्रमितिस्वामित्वस्य हृदयमितिनाम्नोबिंबाख्यरूपविशेषस्यच वक्ष्यमाणत्वात् । यथोक्त"मानंदादयःप्रधानस्ये"ति । बहुनामकीर्तनेनमुक्तनियामकत्वादिबहुगुणप्रतिपादनात्तत्तदधिकारियोग्यप्रातिस्विकगुणविशेषप्रतिपादनंचनप्रतीयते । प्रकृतमात्मानमधिकृत्यरमयापृच्छ्यते ॥ कइति ॥ अयमात्माकः किंगुणविशिष्टः किंनामकः केनवारूपविशेषेणविशिष्ट इतिवयंसर्वेभगवद्भक्ता उपास्महे । तत्रापिवयंसर्वे

भा० । नसर्वकामावाप्तिः । जयविजयादीनामप्रियदर्शनात् । अतोऽमृतःसन्सर्वान्कामानाप्त्वेत्यर्थः । मुक्तःकामानवाप्नोतिभुङ्क्तेचैवयथेष्टतः। सर्वानपिनिरातंकःसर्वदाचहरेर्वशइतिसत्तत्वे ॥ १ ॥ (२४) इतिश्रीमदानंदतीर्थविरचितेश्रीमन्महैतरेयोपनिषद्भाष्येद्वितीयप्रघट्टके पंचमोऽध्यायः ॥ २ ॥ ५ ॥

॥ १५६ ॥

उप० । हरिःॐ । कोयमात्मेतिवयमुपास्महे ।

भगवद्भक्ताउपास्महे । तत्रापिवयंदेवाःकथमुपास्महइतिप्रश्नः । तत्रमहिदासेनोत्तरमुच्यते ॥ कतरइत्यादिना ॥ स त्वयापृष्ट आत्मा कतरः कतमः आनंदतमः परिपूर्णानंदइत्युपास्यः । नचानंदस्यदंडस्यपुरुषेणेवभेदोमंतव्यइत्युच्यते ॥ सआत्मेति ॥ स आनंदो स्यात्मा स्वभावः । पूर्णानंदत्वेलोकचेष्टकत्वंहेतुरितिभावेनलक्षणांतराण्युच्यंते ॥ येनवेति ॥ पृथक्पृथक्लक्षणत्वज्ञापनायवाशब्दः । जीवोयेनयत्प्रेरणयापश्यतीत्यादि सआत्मेत्यन्वयः । सर्वदर्शनकर्तृत्वादीनिपंचलक्षणानीत्युक्तंभवति । तस्यनामान्युच्यंते ॥ यदित्यादिना ॥ ज्ञातृत्वाद्यत् सन्निहितत्वादेतत् हृदिबिंबरूपेणायनाद्गतत्वाद्धृदयं मननकर्तृत्वान्मनः गुणनिचयरूपत्वाच्च पूर्णत्वादा इतत्वात्सर्वैःशरणंप्राप्तत्वात्ततत्वाच्चइतत् निर्दुष्टज्ञानरूपत्वात्संज्ञानं आततज्ञानरूपत्वादाज्ञानं विविधज्ञानरूपत्वाद्विज्ञानं प्रकृष्टात्मगुणविषयज्ञानरूपत्वात्प्रज्ञानं विस्मृतिरहितत्वान्मेधा चाक्षुषदर्शनरूपत्वाद्दृष्टिः धारणत्वाद्धारणाशक्तिरूपत्वाद्धैर्यरूपत्वाद्वाधृतिः । मासुप्रमाणेषुततत्वाद्वाच्यतयास्थितत्वान्मतिः । मनूनां बोधवैशेष्यान्मनुनामकानांब्रह्मादीनामीशतइतिमनीषा । सर्वप्रेरकत्वाज्जूतिः सर्वेषुदेशकालेषुस्वरूपेषुचसमंरमतइतिस्मृतिः । सर्वकृप्तिःसर्वव्यवस्था तद्धेतुत्वात्संकल्पः । सर्वकर्तृत्वात्क्रतुः । असनादैत्यानांतमसिप्रक्षेपणादोषाणांस्वभक्तेभ्योनिरसनाद्वाअसुः । अमितानंदरूपत्वात्कामः । अःपरमात्मा

उप० । कतरःसआत्मायेनवापश्यतियेनवाशृणोतियेनवागंधानाजिघ्रतियेनवावाचंव्याकरोतियेनवास्वादुचास्वादचविजानातियदेतद्धृदयंमनश्चैतत्संज्ञानमाज्ञानंविज्ञानंप्रज्ञानंमेधादृष्टिर्धृतिर्मतिर्मनीषाजूतिःस्मृतिःसंकल्पःक्रतुरसुःकामो

स्वयंतत्तंत्रत्वादवशः। यद्वानकस्यापिवशइत्यवशः। एतानिसर्वाणित्रयोविंशतिसंख्याकानिप्रज्ञानस्यप्रकृष्टज्ञानरूपस्यहरेःनामधेयानिभवंतीत्यर्थः। मनीषेत्युक्तंसर्वेश्वरत्वंप्रपंच्यते ॥ एषइत्यादिना ॥ प्रजापतिःशिवः पृथिवीवायुराकाशआपोज्योतींषीत्येतानीमानिपंचभूतानीत्यन्वयः। एतेसर्वेदेवाइत्युक्तेप्यधिभूतरूपग्रहणार्थंपुनर्वचनं। मोक्षयोग्यजीवोपलक्षणमेतत्। क्षुद्राण्यल्पानिचतानिपुण्यपापमिश्राणिच।क्षुद्रमिश्राणीतराणिमोक्षयोग्येभ्यइतराणीमानिमानुषस्वभावानिनित्यसंसारिजीवजातानिइतराणि तेभ्योपीतराणिआसुरस्वभावजीवजातानिचेत्येवंत्रिविधानि। तानिकीदृशानि बीजानीवशाल्यादिबीजानीव। परस्परं स्वस्वजात्यांचविचित्रस्वभावानि। तथांडजान्यंडंभित्त्वाजातानि। जरायुजानि जरायुर्गर्भसंवेष्टनंतेनजातानियूकादीनि उद्भिज्जानि भुवमुद्भिद्यजातान्यंकुरादीनि। तथादेवानांमनआदिभ्योजाताअश्वागावःपुरुषाहस्तिनःपतत्रिच यत्किंचेदंजंगमं यच्चस्थावरंकल्पवृक्षादि तथायत्किंचेदंप्राणि शिलादार्वादिकंसर्वतत्प्रज्ञानेत्रं प्रकृष्टज्ञानरूपपरमात्मनेतृकं प्रज्ञानेप्रतिष्ठितंप्रज्ञानाधारतयास्थितं। नकेवलंसंसारिजीवजातमेवतदधीनं किंतुसंसारिभिरलोक्यत्वादलोकोमुक्तवर्गोपिप्रज्ञानेत्रः। ननुप्रज्ञारूपोभगवान्कुत्रा

उप०। ऽवशइतिसर्वाण्येवैतानिप्रज्ञानस्यनामधेयानिभवंत्येषब्रह्मैषइंद्रएषप्रजापतिरेतेसर्वेदेवाइमानिचपंचमहाभूतानिपृथिवीवायुराकाश आपोज्योतींषीत्येतानीमानिचक्षुद्रमिश्राणीवबीजानीतराणिचेतराणिचांडजानिचजारुजानिचस्वेदजानिचोद्भिज्जानिचाश्वागावःपुरुषाहस्तिनोय त्किंचेदंप्राणिजंगमंचपतत्रिचयच्चस्थावरंसर्वतत्प्रज्ञानेत्रंप्रज्ञानेप्रतिष्ठितंप्रज्ञानेत्रोऽलोकः

॥ १५७ ॥

श्रितइत्यतउच्यते ॥ प्रज्ञाप्रतिष्ठेति ॥ प्रज्ञारूपोभगवान्प्रकर्षेणस्वातंत्र्येणानन्याधारतयातिष्ठतीतिप्रतिष्ठा। कोयमात्मेतिपृष्टं लक्षणंनामच"ब्रह्मदृष्टिरुत्कर्षा"दितिसूत्रानुसारेणोपासनार्थंपिंडीकृत्योच्यते ॥ प्रज्ञानमिति ॥ प्रज्ञानंब्रह्म देशतःकालतोगुणतश्चातिपूर्णत्वाद्ब्रह्मनामकमुपास्यमित्यर्थः। एवमुपासकस्यफलमुच्यते ॥ सएतेनेति ॥ योविद्वान्त्सोधिकारीत्यर्थः। यद्वा प्रज्ञानेत्रोलोकइत्युक्तंमुक्तस्यभगवन्नियतत्वंप्रपंच्यते ॥ सइति ॥ स सकलकर्मबंधान्मुक्तः। प्रज्ञेन प्रकृष्टज्ञानरूपेणात्मनाविष्णुना प्रेरितः तत्प्रसादेनैवास्माल्लोकाच्छरीरादुत्क्रम्यतेनैवामुष्मिन्स्वर्गेलोकेविष्णुलोकेऽमृतःसन्तेनैवसर्वान्कामानाप्त्वातेनैवसर्वान्कामान्समभवदनुभवतीत्यर्थः ॥ १ ॥ (२५) अत्रकोयमात्मेतिप्रष्टाकइतिनप्रतीयते। कतरइत्यादीनामपिप्रश्नत्वेउत्तरं चात्रनप्रतीयतेऽतोयथावद्व्याचष्टे ॥ अयमित्यादिना ॥ किंरूपः किंलक्षणकः। केनवानाम्नारूप्यतेनिरूप्यतइतिकिंरूपः किंनामकः। अनेकेषांरूपाणांमध्येकिंरूपश्चोपास्योस्माभिःसर्वैर्भगवद्भक्तैर्विशेषतोदेवैरस्माभिरित्यर्थः। सत्वयापृष्टआत्माकतरइत्यस्य सुखेनपूर्णःकतरः अतिशयेनपूर्णःकतमइति तरप्तमपोरुभयोरप्यर्थमाह ॥ पूर्णानंदतमइति ॥ आनंदेनपूर्णतमइत्यर्थः।

उप०। प्रज्ञाप्रतिष्ठाप्रज्ञानंब्रह्मसएतेनप्रज्ञेनात्मनास्माल्लोकादुत्क्रम्यामुष्मिन्स्वर्गेलोकेसर्वान्कामानाप्त्वाऽमृतःसमभवत्समभवत् ॥ १ ॥ ॥ २५ ॥ इत्यैतरेयोपनिषत्सुद्वितीयारण्यकेषष्ठोऽध्यायः ॥ २ ॥ ६ ॥

भा०। ॐ ॥ अयंविष्णुर्हिकिंरूपउपास्योस्माभिरच्युतः। इत्यपृच्छद्भरमादेवीमहिदासंजनार्दनं। आहतांमहिदासोथपूर्णानंदतमस्त्विति।

सआनंदोस्यआत्मास्वभावभूतइत्यर्थांतरमाह ॥ तादृशइति ॥ अस्यपरमात्मनःस्वभावस्तादृशआनंदरूपः । येनवापश्यतीत्या दिव्याचष्टे ॥ येनजीवइति ॥ यदेतद्धृदयमित्येतद्व्याचष्टे ॥ योविष्णुरिति ॥ सर्वैरप्यधिकारिभिर्हृद्ययनाद्धृदयनामकंबिंब रूपमुपास्यमितिदर्शयितुंतृतीयस्यापिहृदयनाम्नआदावुपादानं । जीवोयेनदर्शनादीन्कुरुते । यश्चहृदयमित्यादिनामभिःकीर्तितः सविष्णुरितियोजना । पुनरेतदित्यत्रआ इतदितिपदविभागमभिप्रेत्यव्याचष्टे ॥ पूर्णत्वादिति ॥ त्रिविधपूर्तियुक्तत्वादाकारे णोच्यतइत्यर्थः । इतत्वाच्छरणमितत्वा त्ततत्वाद्गतत्वात्सर्वांतर्गतत्वादित्यर्थः । ततत्वादाकाशवद्व्याप्तत्वादितिवा "तदंतरस्य सर्वस्यतदुसर्वस्यबाह्यत"इतिहिश्रुतिः । इतन्नामेतदितिप्रसिद्धः । उच्चयः निचयः । समुदायः । "गुणोरुसमुदायोयंवासुदेव"इ तिवचनात् । ज्ञानस्याततत्वंनामगुणिवद्व्याप्तत्वं निरतिशयस्पष्टत्वंवा । "व्याप्तज्ञानमहांशुमान् । स्पष्टातिस्पष्टविशद"मित्यादेः विविधज्ञानरूपत्वात् विविधविषयकज्ञानरूपत्वात् प्रकृष्टायेआत्मगुणास्तद्विषयज्ञानरूपः । अविस्मृतित्वाद्विस्मृतिशून्यत्वात् । दर्शनरूपतः चाक्षुषज्ञानरूपत्वात् । सम्यक्ज्ञानंमानसमितिभेदः । धारणं धैर्यं जगद्धारणं ज्ञानस्यधारणाशक्तिर्वा । मासुप्रमा

भा० । उपास्यस्तादृशोह्यस्यस्वभावःपरमात्मनः । येनजीवोदर्शनादीन्प्रेरितःकुरुतेसदा । योविष्णुर्हृदयमितिहृद्गतत्वात्प्रकीर्तितः । म न्तृत्वान्मनइत्येवयच्चज्ञानस्वरूपतः । एतत्सन्निहितत्वाच्चपूर्णत्वादेतिकीर्तितः । इतत्वाच्चततत्वाच्चसइतन्नामकेशवः । गुणानामुच्चयोयस्मात्सचइ त्येवशब्दितः । सम्यग्ज्ञानस्वरूपत्वात्संज्ञानमितिकीर्तितः । आततज्ञानरूपत्वादाज्ञानंभगवान्हरिः । विविधज्ञानरूपत्वाद्विज्ञानमितिकीर्तितः । प्रकृष्टात्मगुणज्ञानरूपःप्रज्ञानमुच्यते । अविस्मृतित्वान्मेधासदृष्टिर्दर्शनरूपतः । धृतिर्धारणरूपत्वान्मतिर्मासुततत्वतः ।

णेषुततत्वतः नियामकत्वेनप्रतिपाद्यत्वेनवाततत्वात् । मनूनामीष्टइतिमनीषेत्यभिप्रेत्योक्तंमनुनाम्नामिति ॥ सर्वप्रेरकरूपत्वा दिति ॥ जुगताविधातोरूतियूतिजूतिसातिहेतीतिजूतिशब्दस्यनिपातनादितिभावः । गतिरत्रप्रेरणारूपाविवक्षितेतिध्येयं । समंरमतइति ॥ एकप्रकारेणरमतइत्यर्थः । सकारमकाररेफपराणांलोपेसंप्रसारणेस्मृतिरितिभवतीतिभावः । कृप्तिर्व्यवस्था । ऋतुःससर्वकर्तृत्वादिति ॥ कृञःकतुरित्युणादिसूत्रात्कृञःकर्त्रर्थेकतुप्रत्ययइतिभावः । कंसुखममममितंयस्यासौकामइत्यस्य तात्पर्यममेयेति ॥ यद्वाविशेषणोत्तरपदकर्मधारयोयमित्यभिप्रेत्योक्तममेयानंदरूपत्वादिति ॥ अकारस्यभगवन्नामत्वाद स्यविष्णोर्वशस्तंत्रोऽवशइत्यर्थमभिप्रेत्योक्तं ॥ अवशइति ॥ सएतेनप्रज्ञेनात्मनेत्येतत्योवेदैवंहरिमित्यध्याहारपूर्वंफलकथनप रतयाव्याचष्टे ॥ योवेदेति ॥ एषब्रह्मेत्यादिव्याचष्टे ॥ ब्रह्मेत्यादिना ॥ इमानिक्षुद्रमिश्राणीतराणीत्यस्यार्थः पुण्यपापेति ॥ इतरेअसुराइति द्वितीयेतरशब्दार्थः । सर्वंतत्प्रज्ञानेत्रंप्रज्ञानेप्रतिष्ठितमितिपदद्वयतात्पर्यं ॥ सर्वमिति ॥ पदयोरक्षरार्थमाह ॥

भा० । मनुनाम्नामजादीनांमनीषेशोयतोहरिः । सर्वप्रेरकरूपत्वाज्जूतिरित्यभिधीयते । सर्वदेशेषुकालेषुस्वरूपेषुचसर्वशः । समंरमतइ त्येवस्मृतिर्नामजनार्दनः । सर्वस्यकृप्तिकर्तृत्वात्संकल्पइतिगीयते । ऋतुःससर्वकर्तृत्वादसुरघ्यसनाद्धरिः । अमेयानंदरूपत्वात्कामइत्यभिधीयते । अवशःस्वतंत्रत्वात्रयोविंशतिनामकं । योवेदैवंहरिंसम्यङ्मुच्यतेऽखिलसंसृतेः । ब्रह्माशिवश्चशक्रश्चदेवाश्चान्येसमस्तशः । तथैवपंचभूतानिपु ण्यपापविमिश्रिताः । क्षुद्रात्मानस्तुयेमर्त्याइतरेअसुराअपि । सर्वंजगदिदंविष्णोर्वशेतिष्ठतिसर्वदा ।

तेनैवेत्यादि ॥ प्रज्ञानेत्रोऽलोकइत्यस्यार्थोमुक्ताइति ॥ प्रतिष्ठेत्यस्यार्थःस्वयमिति ॥ प्रज्ञानंब्रह्मेत्यस्यार्थोदेशतइति ॥ सएते नप्रज्ञेनात्मनेतिवाक्यंफलकथनपरतयाव्याख्यातं । मुक्तस्यभगवन्नियतत्वोपपादकतयापिव्याकुर्वन्सइतिपरामृष्टंदर्शयति ॥ स इति ॥ सइत्यनूद्यालोकनामामुक्तइत्यर्थोक्तिः । अलोकशब्दनिर्वचनायोक्तंचितिमात्रेति ॥ चितिमात्रस्वरूपत्वेनलो कविलक्षणत्वादलोकनामेत्यर्थः । प्रज्ञेनात्मनेत्यस्यतात्पर्यप्रकृष्टेति ॥ अस्माल्लोकादित्यस्यार्थोस्मादिति ॥ स्थूलशरी रादित्यर्थः । अमृतः लिंगशरीरवर्जितः । अध्यायार्थस्यप्रामाणिकत्वेनावधारणायद्विरुक्तिरितिभावेनोक्तं ॥ वेदेति ॥ ननुकोयमात्मेतिरमादेव्याप्रश्नेकृतेतवसिद्धार्थत्वाल्लक्षणप्रश्नोनयुज्यतइत्युत्तरंवाच्यं । किंकतरइत्युत्तरप्रदानेनेत्यतस्तात्पर्यमाह ॥ जानंत्येति ॥ लोकानुग्रहार्थं सामान्येनसर्वमोक्षयोग्यानुग्रहार्थं । देवादीनांविशेषज्ञानार्थमित्यर्थः । कतरइतितरप स्तमबर्थवर्णनंकथमित्यतस्तदुपपादयति ॥ यत्रेति ॥ यत्रवाक्येउभयोःप्रयोगोनास्तितत्रवाक्येतरप्रमपावेकार्थौ उभयो

भा० । तेनैवनीयतेनित्यंतस्मिन्नेवप्रतिष्ठितं । मुक्तायेलोकनामानोनीयंतेतेपिविष्णुना । स्वयंचानन्यनिष्ठत्वात्प्रतिष्ठेत्यभिधीयते । देश तःकालतश्चैवगुणतश्चातिपूर्तितः । विष्णोर्ब्रह्मेतिनामैतन्मुख्यतोन्यत्रनकचित् । सोलोकनामामुक्तस्तुचितिमात्रस्वरूपतः । प्रकृष्टज्ञानरूपस्यप्रसा दात्परमात्मनः । अस्माद्देहात्समुत्क्रम्यगत्वोर्ध्वंलोकमुत्तमं । अमृतःसन्विष्णुलोकेभोगान्संप्राप्यपुष्कलान् । भुंक्तेयथेष्टतोनित्यमितिवेदानुशासन मित्याद्यैतरेयसंहितायां । जानंत्याऽपिदेव्यालोकानुग्रहार्थविशेषज्ञानार्थंचकोयमात्मेतिपृष्टःसभगवानाह । कतरःसआत्मेति । कतरः आनंदतमः । यत्रोभयोःप्रयोगोनतत्रैकार्थौतरप्रमाविशब्दनिर्णये ।

र्थोर्थःसमिलित्वाएकएवार्थोऽनयोरित्यर्थः । येनवापश्यतीत्यादौसआत्मापरमात्मायेनवाकरणेनदर्शनादीन्करोतीतिपृष्टे सर्वम पिमनसाकरोतीति यदेतद्धृदयंमनइत्युत्तरमुच्यतइतिप्रतीतेर्यथावत्स्ववचनेनापिविवृणोति ॥ यत्प्रेरणादिति ॥ नात्रपश्यती त्यत्रकर्तृतयासन्निधानेनप्रकृतःपरमात्मासंबध्यते । किंतुसएवंविद्वानितिप्रकृतोजीवएव । येनवेत्यत्रापियेनयेनकारणेनेतिनप्रश्नः किंतु यत्प्रेरणेनपश्यतिसआत्मेतितस्यलक्षणोक्त्यर्थंपरामर्शइतिभावः । ननुप्रकृतात्मनोदर्शनादिकारणत्वंलक्षणंचेदनेनोच्यतेन तुकरणविशेषप्रश्नस्तदापृथग्वाशब्दानुषंगःश्रूयमाणोव्यर्थइत्यतआह ॥ रमेत्यादिना ॥ अत्रेदंतावद्योज्यं । जीवानांदर्शनादिका रणत्वंयथामिलितंभगवल्लक्षणंभवति तथैकैकमपितस्यहरेर्लक्षणंभवतीतिसूचनायवाशब्दःसर्वत्रानुषज्यतइति । ननुदर्शनादिकार णत्वमेकैकंसूर्यादिष्वतिव्याप्तं । मिलितंरमाब्रह्मादिष्वतिव्याप्तमित्यतउक्तं ॥ रमेति ॥ रमाब्रह्मादीनांसर्वेषामपितत्प्रेरितत्वा त्स्वातंत्र्येणदर्शनादिकारणत्वस्यात्रविवक्षितत्वादितिभावः । ब्रह्मपदेनापौनरुक्त्याय दक्षाद्यर्थत्वप्रतीतिनिवारणायवाप्रजापतिं शब्दंसोपपत्तिकंव्याचष्टे ॥ प्रजापतिरिति ॥ अभिमान्यभिमन्यमानयोरेकशब्दवाच्यत्वादितिभावः । क्षुद्रमिश्राणीवबीजा

भा० । यत्प्रेरणादयंजीवोदर्शनादीन्करोतिच । रमाब्रह्मादीनामपितत्प्रेरितत्वात् । सर्वेषांदर्शनादिकारणत्वमेकैकमपितस्यलक्षणंभवि ष्यतीतिवाशब्दःसर्वत्रानुषज्यते । प्रजापतिःशिवः । लिंगाभिमानित्वात् । प्रजापतिःशिवःशेषोलिंगमित्यभिधीयते । लिंगाभिमानीलोकस्यस्रष्टा गिरिशएवहीतिशैवपुराणे । सममस्त्वनयोर्युद्धमितिप्राहप्रजापतिः । वाक्यंशिवस्यतच्छ्रुत्वाशक्रोनेत्याहसत्वरइतिभारते ।

नीत्यनूद्यैवबीजानीत्यस्यार्थमाह ॥ क्षुद्रेति ॥ एतेनैवबीजानीत्येतदेषब्रह्मेत्यादिसर्वविशेषणमित्युक्तंभवति । इतराणिचेतराणीत्यनयोरर्थभेदमाह ॥ प्रथमेति ॥ लोकइतिपदभ्रमंवारयन्प्रज्ञानेत्रोऽलोकइत्यस्यार्थमाह ॥ प्रज्ञेति ॥ प्रतीतेर्थेपौनरुक्त्यंबाधकंवदन्नुक्तंनिर्धारयति ॥ ब्रह्मादीति ॥ मुक्तस्यचितिमात्रत्वेनसंसारिलोकविलक्षणत्वमलोकशब्दप्रवृत्तिनिमित्तमित्युक्तं । संसार्यप्रत्यक्षत्वंचप्रवृत्तिनिमित्तमित्याह ॥ मुक्तइति ॥ नचदृष्टाश्चतेभगवतानारदेनेतिगीताभाष्यविरोधः । तदर्थंसाधनविशेषंविनेत्यत्रविवक्षितत्वात् । नन्वश्वादीनांजरायुजत्वात्पतत्रिणामंडजत्वात्स्थावराणामुद्भिज्जत्वात्पुनरुक्तिरित्यतआह ॥ अंडजानिचेति ॥ तर्ह्युभयविधानामप्यश्वागावइत्यादिनैवोक्तिसंभवादंडजत्वादिकथनंकिमर्थमित्यतआह ॥ अंडजत्वादीति ॥ जंगमंचपतत्रिचयच्चस्थावरमित्यनेनप्राणिनांगृहीतत्वात्पुनःप्राणीतिकिमर्थमित्यतःसप्रमाणकंसार्थक्यमाह ॥ तथेति ॥ भारते आदिपर्वणिययात्यष्टकसंवादे "संस्वेदजाअंडजाश्चोद्भिदश्चसरीसृपाःक्रिमयोथाप्सुमत्स्याः । तथाश्मान"इत्यत्रस्थावरजंगमात्म

भा० । क्षुद्रमिश्राणीवबीजानि शाल्यादिबीजवत् । भिन्नस्वभावाब्रह्मादयःसर्वजीवाः । ब्रह्माद्याःसर्वएवैतेजीवाभिन्नस्वभावकाः । यथा शाल्यादिबीजानिभिन्नवीर्याणिसर्वशइतिसत्तत्वे । प्रथमेतराणीतिशब्दोमानुषाणांद्वितीयोसुरादीनां । प्रज्ञानेत्रोऽलोकइति अलोकशब्देनमुक्तसमुदायउच्यते । ब्रह्मादिस्थावरांतस्यलोकस्यसर्वतत्प्रज्ञानेत्रमितिविष्ण्वधीनत्वस्यपूर्वमेवोक्तत्वात्पुनःप्रज्ञानेत्रोलोकइतिमुक्तविषयमेव । मुक्तोह्यलोक्यत्वादलोकः । अंडजानिचेत्याद्युक्त्वापुनरश्वागावइत्यादिदेवादीनांमनआदेरेवजातानामपिस्वीकारार्थं। अंडजत्वाद्युत्पत्तिप्रकारोपिविष्ण्वधीनइतिज्ञापयितुंतत्कथनं । तथाश्मानस्तृणकाष्ठाश्चसर्वेदिदृक्षयेस्वांप्रकृतिंभजंतइतिभारतवचना

॥ १६० ॥

कानांजीवानां तथाश्मादीनामपिस्वस्वाभिमन्यमानेषुस्थावरजंगमात्मकदेहेषुअश्माद्यचेतनेषुचाभिमानापादककर्मक्षयानंतरंस्वयोग्यनिजरूपलाभवचनात्स्वेदजादिवदश्मादीनामपिप्राणित्वादित्यर्थः । "कर्माणितानिचपृथक्चेतनान्येवसर्वश"इतिवचनात्कर्मणांचेतनत्ववदश्मादीनांचेतनत्वंबोध्यं । एवंतर्हिस्थावरजंगमाश्मादिजडाभिमानिनांचप्राणिशब्देनग्रहणसंभवात्पृथग्जंगममित्यादिग्रहणंव्यर्थमित्यतआह ॥ गमनेति ॥ गमनपतनस्थिरत्वादीनिशब्दप्रवृत्तिनिमित्तान्यादिपदेनमानुषत्वपशुत्वादिजंगमावांतरभेदनिष्ठधर्माणांगरुडत्वहंसत्वाद्यवांतरधर्माणामश्वत्थादिस्थावरावांतरधर्माणांग्रहणं । सएतेनेत्यत्रद्वितीययोजनायांसइतिपरामर्शविषयंदर्शयति ॥ सइति ॥ तस्यमुक्तत्वज्ञापकमाह ॥ सकलेति ॥ यद्वायदिमुक्तपरामर्शस्तर्ह्युत्क्रांत्युक्त्ययोगोमुक्तस्यतदयोगादित्यतआह ॥ सकलेति ॥ अप्रारब्धस्यज्ञानेनक्षयानंतरं प्रारब्धस्यभोगोपमर्दाभ्यांक्षयानंतरंहीत्यर्थः । प्रज्ञेनात्मनाब्रह्मरूपेणसर्वान्कामानाप्त्वेत्यन्यथाप्रतीतेर्व्याचष्टे ॥ प्रकृष्टेति ॥ प्रेरितइतिशेषोक्तिः । नकेवलमध्याहृतेनान्वयः । किंतुसमभवदितिक्रियापदेनचान्वयइत्याह ॥ प्रज्ञेनेति ॥ प्रसन्नेनप्रज्ञेनतत्प्रसादेनेतियावत् । प्रज्ञानेत्रोलोकइत्युक्त्वात्पुनरुक्तमेत

भा० । दश्मादीनामपिप्राणित्वात्तत्स्वीकारार्थंप्राणीति । गमनपतनस्थिरत्वादयोपिभावाविष्ण्वधीनाइतिज्ञापयितुंजंगममित्यादिवचनं । सएतेनेत्यलोकशब्दोक्तोमुक्तःपरामृश्यते । सकलकर्मबंधमुक्त्यनंतरंहिशरीरादुत्क्रामति । प्रकृष्टज्ञानरूपेणविष्णुनाप्रेरितःप्रज्ञेनात्मनैवोत्क्रम्यतेनैवसर्वान्कामानाप्त्वातेनैवसर्वान्कामान्सभुंक्तइतिसर्वत्रानुषज्यते ।

दित्यतआह ॥ प्रज्ञानेत्रइति ॥ तर्हिव्याख्यानपरेणानेनैवालं प्रज्ञानेत्रोलोकइतिपूर्ववाक्यंव्यर्थमित्यतआह ॥ अनुक्तेति ॥ ब्राह्मेणजैमिनिरुपन्यासादिभ्यः चितिमात्रेणतदात्मकत्वादित्यौडुलोमिः भावंजैमिनिर्विकल्पान्नानात् संकल्पादेवचतच्छ्रुतेरित्याद्युक्तानामत्रानुक्तविशेषाणामित्यर्थः । ननूत्क्रांतेःपूर्वक्षीणकर्मत्वमात्रेणकथंमुक्तत्वं देहबंधएवखलुबंधइत्यतःकर्मक्षयस्यापिमुक्तित्वेप्रमाणमाह ॥ अनारब्धेति ॥ प्रारब्धानांदाहोनामभोगेनक्षयउपमर्दोवेत्यविरोधः । "भोगेनत्वितरेक्षपयित्वाथसंपत्स्यते उपमर्दंचे"तिहिभगवद्वचनं । ननु"प्रारब्धकर्मशेषस्तुविरजातरणावधि"रित्यत्रप्रारब्धस्यविरजातरणावधित्वोक्तेः प्रारब्धानांचसर्वशइतिकथंसर्वप्रारब्धनाशानंतरंस्थूलशरीरादुत्क्रमणमितिचेन्न । "प्रारब्धकर्मशेषस्तुविरजातरणावधिः ॥ स्वोदयात्फलदंज्ञानमादेहंकर्मवारवे"रितिन्यायविवरणवाक्यशेषेलिंगदेहापादकप्रारब्धकर्मशेषातिरिक्तप्रारब्धानामधिकारिभेदेनप्राचुर्येणवाचरमशरीरएवभोगेनपर्यवसानोक्तेस्तद्विवक्षयास्यग्रंथस्यप्रवृत्तत्वात् । विस्तरस्तुतत्वप्रकाशिकावाक्यार्थमुक्तावल्यामनुसंधेयः । एषब्रह्मेत्यादावेषएतइमानीतिविशेषणानांकृत्याप्रतीतेःकृत्यमाह ॥ ब्रह्मेंद्रादीति ॥ ननुब्रह्मादिशब्दाभगवत्पराएवभवंतु गुणसमर्पक

भा० । प्रज्ञानेत्रोलोकइत्युक्तेकथंप्रज्ञानेत्रोमुक्तइत्याकांक्षायांतस्यैवव्याख्यानंसएतेनप्रज्ञेनात्मनेत्यादि । अनुक्तविशेषाणामपिभगवदधीनत्वज्ञापनार्थंप्रज्ञानेत्रोलोकइतिसामान्यवचनं । अनारब्धफलानांचप्रारब्धानांचसर्वशः । कर्मणांदाहएवायंमुक्तिरित्यभिधीयते । सतुमुक्तस्ततोदेहादुद्गच्छतिपरात्मना । प्रेरितोविष्णुलोकंचप्राप्यभोगानवाप्यच । भुंक्तेविष्णुप्रसादेननाविष्णोरवशःकचित् । विष्णुतंत्राइमेसर्वेमुक्ताअपियतोऽखिलाइतिब्रह्मांडे । ब्रह्मेंद्रादिशब्दाविष्णावेवमुख्यतइतितद्व्यावृत्त्याजीवानांस्वीकारार्थमेषइत्यादिशब्दः ।

त्वात् । नचप्रज्ञानेत्रंप्रज्ञानेप्रतिष्ठितमित्युक्तप्रज्ञानेत्रत्वादिविरोधः । प्रागवशइतिपदेनस्वतंत्रत्वापरपर्यायस्यस्वनेतृकत्वस्योक्तत्वादित्यतआह ॥ सहीति ॥ भगवतःस्वनेतृकत्वमेवात्रोच्यते नानुग्राह्यत्वमित्यतआह ॥ अनुग्राह्यत्वमिति ॥ अत्रब्रह्मादीनामनुग्राह्यत्वमेवविवक्षितं । नविष्णोःस्वनेतृकत्वं । "ब्रह्माशिवश्चशक्रश्चे"तिसमाख्यावचनादेषइत्यादिविशेषणाच्चप्रज्ञानेत्रमित्यत्रविवक्षितानुग्राह्यतारूपानेयतानविष्णोःसंभवतीत्यत्रप्रमाणमाह ॥ नेयतेति ॥ याऽनुग्राह्यतारूपानेयतासाविष्णोःस्वतःपरतोपिनास्तीत्यर्थः । प्रथमापिपदेनप्रज्ञानेप्रतिष्ठितमित्युक्ताश्रितत्वंचसमुच्चीयते ॥ ॥ इतिश्रीमद्विट्ठलाचार्यपुत्रेणश्रीमत्तीर्थाचार्यचरणसेविनाश्रीनिवासेनरचितायांमहैतरेयभाष्यरत्नमालायांद्वितीयप्रघट्टकेषष्ठोध्यायः ॥२॥ ६ ॥ ॐ ॥ अस्यैकखंडात्मनोध्यायस्यसंगतिरुत्तरत्रभाष्यएवस्पष्टीभविष्यति । मेवाक् मनस्यवबोधरूपेविष्णौप्रतिष्ठिता तदाधारतयास्थिता । यद्वातद्विषयिणीत्यर्थः । मनोनामकंब्रह्म वाचि नियामकतया वाग्व्यवहारे विषयतयावस्थितं । अतोमेआविरावीरेधि अतिप्रकटोभव । मेवेदस्य मयाधीयमानस्यवेदस्याण्यामाधारभूतायांमुख्यवाग्व्याख्यायांदेवतायांतिष्ठतीत्याणीस्थविष्णो मेमया श्रुतं शास्त्रश्रवणजनितविद्यां माप्रहासी र्मांमुंच सर्वदाविद्याविषयोभव । विस्मृतोमाभवेरित्यर्थः । अनेनाधीतेन त्वद्विषयेणै

भा० । सहिभगवान्स्वनेतृकोपिनानुग्राह्यः । अनुग्राह्यत्वंहिब्रह्मादीनामत्रविवक्षितं । नेयतानुग्राह्यतापिनसाविष्णोःस्वतोपित्वितिशब्दतत्वे ॥ १ ॥ (२५)इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेश्रीमन्महैतरेयोपनिषद्भाष्येद्वितीयप्रघट्टकेषष्ठोध्यायः ॥ २ ॥ ६ ॥

उप० । ॐ ॥ वाङ्मेमनसिप्रतिष्ठितामनोमेवाचिप्रतिष्ठितमाविरावीर्मएधिवेदस्यमआणीस्थश्रुतंमेमाप्रहासीरनेनाधीतेना

वाधीतेनाहोरात्रान्संदधामि सर्वाहोरात्रेषुत्वद्विषयाध्ययनमेवकरोमि । ऋतं यथावदवगतं । वदिष्यामि । सत्साधुगुणैस्ततं यं नियंतारमितिसत्यं सत्यनामानं वदिष्यामि । तद्ब्रह्म मां शिष्यं श्रोतारमवतु । तद्ब्रह्म वक्तारं स्वस्वरूपोपदेशकमस्मद्गुरुम वतु । अवतुमामितिपुनर्वचनमवधारणार्थमवत्वेवेति । वाङ्मेमनसिप्रतिष्ठितेत्यनूद्यवाङ्मइत्यस्यातिरोहितार्थत्वात्मनसिप्रतिष्ठि तेत्येतदन्यथाप्रतीतेर्व्याचष्टे ॥ वाङ्मइत्यादिना ॥ मनोमइत्यस्यार्थोविष्णुरिति । मनःशब्दस्यावबोधरूपइतियोगउक्तः रू ढिंचाह ॥ यदेतदिति ॥ आविरावीर्य्यत्कंप्रतिष्ठितमित्यन्वयभ्रमंवारयितुमुत्तरेणान्वयमभिप्रेत्यानुवदति ॥ आविरावीर्मएधीति ॥ मनइत्येतत्संबुद्ध्यंतमत्रानुवर्ततइतिभावेनव्याकुर्वन्वाक्यार्थमाह ॥ हेविष्णविति ॥ असभुवीतिधातोर्मध्यमपुरुष स्येदंरूपमित्यभिप्रेत्यएधीत्यस्यप्रतिपदमुपादत्ते भवेति ॥ आणीस्थेत्यस्यप्रतिपदमाणीस्थितेति ॥ आणीत्वेनस्थितेत्यन्यथाप्रती तिनिरासायव्याचष्टे ॥ अण्यामिति ॥ वेदस्थाणीस्थेतिपदद्वयार्थकथनपूर्वमाणीस्थपदस्यविष्णुपरत्वेप्रमाणमाह ॥ आधार

उप० । होरात्रात्संदधाम्यृतंवदिष्यामिसत्यंवदिष्यामितन्मामवतुतद्वक्तारमवत्ववतुमामवतुवक्तारमवतुवक्तारं ॥ १ ॥ (२६) इत्यै तरेयोपनिषत्सुद्वितीयारण्यकेसप्तमोऽध्यायः ॥ २ ॥ ७ ॥ द्वितीयारण्यकंसंपूर्णं ॥ २ ॥

भा० । ॐ वाङ्मेमनसिप्रतिष्ठिताअवबोधरूपेविष्णौप्रतिष्ठिता । सचविष्णुर्मेवाचिस्थितः । यदेतद्धृदयंमनश्चेतिविष्णुनामधेयेषूक्तत्वात् आविरावीर्मएधिहेविष्णोममाविराविर्भव । आणीस्थितआण्यांस्थितविष्णोइतिसंबोधनं । आधारःसर्ववेदानांवेदाणीप्राणउच्यते । तस्मिन्स्थितो हरिर्नित्यमाणीस्थइतिगीयतइतिशब्दतत्वे ।

इति ॥ नचाविराविरितिद्विर्वचनमादरार्थमितिसुगमं आवीरितिदैर्घ्यंकिमर्थमित्यतआह ॥ आविरिति ॥ शब्दाधिक्येर्थाधि क्यंभवतीतिसूत्रार्थः ॥ आधारत्वात्प्राणमाणीत्युक्तं तद्व्युत्पाद्यदर्शयति ॥ अणश्शब्दस्येति ॥ अणगताविितिधातोरणशब्दस्य गतिवाचित्वाच्चलनक्रियावाचित्वात्तस्येदमित्यणिकृतेचलमाणमित्युच्यते । तस्यधारणेनतद्वानाणी फलितमर्थमाणीशब्दस्याह ॥ स्थापकइति ॥ वेदस्यश्रुतंश्रवणंमत्तोमाप्रहासीरित्यन्यथाप्रतीतिनिरासायान्वयमुखेनानुवदति ॥ मेश्रुतमिति ॥ श्रुतंश्रव णंज्ञानमित्यभिप्रेत्यतात्पर्यमाह ॥ ममेति ॥ अनेनवेदेनाधीतेनपठितेनेत्यन्यथाप्रतीतिनिरासायसोपस्करंव्याचष्टे ॥ हेवि ष्णविति ॥ ऋतसत्यपदयोरपुनरुक्तमर्थमाह ॥ ऋतमित्यादिना ॥ ऋगतावित्यतःकर्मणिक्तप्रत्ययेऋतमवगतमितिसिध्यति। अवगमनंचनभ्रमरूपमितिभावेनयथावदित्युक्तं । सच्छब्दःसाधुगुणवाची सद्भावेसाधुभावेचेत्यादेः । तनुविस्तारे यमनियमने तथाचसाधुगुणैस्ततं यं नियंतारमितिसत्यमितिसिद्ध्यतीतिभावः । तद्वेदश्रवणंमामवत्वितिप्रतीतिनिरासायव्याचष्टे ॥ तद्वि ष्णवाख्यमिति ॥ ननुविष्णुश्चेदेधीत्यादिवक्त्वंमामवेतिवक्तव्यमित्यतआह ॥ तस्यैवेति ॥ खंडस्यसंगतिंदर्शयन्खंडार्थंप्रमा

भा० । आविरावीरितिदैर्घ्यमितिशयार्थे । आधिक्येधिकमितिसूत्रात् । अणशब्दस्यगतिवाचित्वाच्चलमाणमुच्यते । तस्यधारणेनतद्वा नाणी । स्थापकइत्यर्थः । मेश्रुतंमाप्रहासीः । ममविद्यागोचरएवसर्वदाभव । विस्मृतोमाभव । हेविष्णोअनेनत्वद्विषयेणैवाधीतेनाहोरात्रान्संद धामि । सर्वाहोरात्रेष्वपित्वद्विषयाध्ययनमेवकरोमीत्यर्थः । ऋतंयथावदवगतंत्वांवदिष्यामि । सत्यंसाधुगुणैस्ततंसर्वनियंतारंच । तद्विष्णवाख्यंब्र ह्ममामवत्वितितस्यैवविष्णोःपरोक्षत्वेनैवप्रार्थनं ।

णमाह ॥ वाङ्मइत्यादिकमिति ॥ १ ॥ (२६) इतिश्रीमद्विट्ठलाचार्यपुत्रेणश्रीमत्तीर्थाचार्यचरणसेविनाश्रीनिवा
सेनरचितायांमहैतरेयभाष्यरत्नमालायांद्वितीयप्रघट्टकेसप्तमोध्यायः ॥ २ ॥ ७ ॥ द्वितीयप्रघट्टकंसंपूर्ण ॥ २ ॥
अथकोहमितित्रयोविंशखंडेविष्णुशब्दवाच्यत्वमुपक्षिप्तं । तदनंतरखंडेचविष्णुशब्दार्थभूतमाततगुणत्वमात्मशब्दार्थतयोक्तं ।
विष्णुशब्दार्थैकदेशवाचित्वाच्चात्मशब्दस्येतिभाष्योक्तेः । तदनंतरखंडेचायंविष्णुर्हिकिंरूपइत्यादिभाष्यदिशाप्रकृतविष्णोर्णकार
षकारार्थभूतं यदिवाचाभिव्याहृतमित्यादिनाक्षिप्तं दर्शनादिसर्वक्रियाप्रवर्तकत्वमुक्तं । अंतिमखंडेविष्णुसंहिताध्ययनेविघ्नपरि
हारायविष्णुप्रार्थनंकृतं । भाष्ये "अबोध्यरूपेविष्णौ सचविष्णुः । हेविष्णो विष्णवितिसंबोधन"मितिविष्णुशब्दाभ्यासात् ।
तदेवंप्रकृतेविष्णुनामनिष्ठांविद्यांवक्तुमिदमारण्यकं । अथ श्रोतृणामधिकारसंपत्त्यनंतरं । तानुद्दिश्यातः मोक्षाख्यप्रयोजनस्य
सद्भावात् संहितायाः विष्णुनामाक्षरतत्संधिदेवताया स्तथातद्व्याख्यानरूपवेदाद्यक्षरतत्संधिदेवतायाश्चपूर्वरूपं । उपनिषत्
रहस्यविद्या उच्यतइतिशेषः । तत्राधिदैवतमुपास्तिप्रकारउच्यते ॥ पृथिवीत्यादिना ॥ पृथिवीपृथुत्वात्पृथिवीनामकंपृथवीस्थं
वराहरूपंपूर्ववर्णप्रतिपाद्यं पूर्ववर्णइतिनामकंच । द्यौःदिविस्थितंक्रीडनात्द्युनामकंवामनरूपमुत्तररूपं उत्तरवर्णप्रतिपाद्यमुत्तर

भा० । वाङ्मइत्यादिकंखंडंविष्णुप्रार्थनरूपकं । अविघ्नत्वमभीप्सूनांशिष्याणांदृष्ट्वान्हरिरितिच ॥ १ ॥ ७ ॥ (२६) इतिश्री
मदानंदतीर्थविरचितेश्रीमन्महैतरेयोपनिषद्भाष्येद्वितीयप्रघट्टकेसप्तमोऽध्यायः ॥ २ ॥ ७ ॥ द्वितीयप्रघट्टकंसंपूर्णम् ॥ २ ॥
उप० । अथातस्संहितायाउपनिषत् पृथिवीपूर्वरूपंद्यौरुत्तररूपं

वर्णनामकंच । वायु र्वायुस्थंवेदकत्वादयनत्वाच्चवायुनामकंनृसिंहरूपं रूपद्वयसहितत्वात्संहितानामकंसंहितास्थंसंधिप्रतिपाद्य
मितिमांडूकेयोमन्यते । आकाशः आकाशनामानृसिंहः अस्य वर्णद्वयस्य संहिता मध्यदेवतेतिमाक्षव्योवेदयांचक्रे । पक्षांतरे
स्वपक्षदूषकेमाक्षव्येणोपात्तेकथंमांडूकेयोमन्यतइत्यतउच्यते ॥ सहेति ॥ समांडूकेयोमाक्षव्येणस्वपक्षोविपरिहृतोननिराकृत
इतिमेने । कथंमेनइत्यतस्तदुपपाद्यते ॥ नमेस्येति ॥ मे मदीयेन । मदुपासितेनास्याकाशस्यपुत्रेणवायुनामाक्षव्यस्तत्स्थहर्युपा
सनान्नसमागान्नसंगतइतिहेतोरपरिहृतइत्यन्वयः । तस्यात्मपक्षोपस्थितेरेवाभावात्तेनानिराकरणंस्वपक्षस्येतिभावः । तस्यैतत्पक्षा
नुल्लेखेनतेननिराकरणेपिवस्तुतःप्रबलतद्विरोधेनत्वत्पक्षःपरिहृतइत्यतउच्यते ॥ समानेवैतदिति ॥ तत्तथाप्याकाशस्थस्यसंहि
तानामकत्वेपियद्यस्मादेतेउपासनेभगवद्विषयत्वात्प्राबल्यदौर्बल्याभावाच्चसमाने तत्तस्माद्वायुस्थस्यसंहितात्वानपायादपरिहृतइ
तिमेनइत्यर्थः । आकाशेविष्णूपासनपक्षस्यप्रबलत्वात्त त्तेनपक्षेण दुर्बलोमांडूकेयपक्षःपरिहृतइत्यहंमेने मन्ये इत्यागस्त्योमेने ।
एवंऋषिमतविप्रतिपत्तिमुक्त्वाभगवतामहिदासेनस्वपक्षउच्यते ॥ समानमिति ॥ हियस्माद्वायुश्चाकाशश्चेत्येतदुपासनाधिष्ठा
नद्वयंसमान माकाशस्यपितृत्वाद्वायोर्बलाधिकत्वात् । तस्मात्तदुभयंग्राह्यंभवतीतियोज्यं इत्यधिदैवतंसंहितायाउपनिषदभिहि

उप० । वायुःसंहितेतिमांडूकेयआकाशःसंहितेत्यस्यमाक्षव्योवेदयांचक्रेसहाविपरिहृतोमेनेनमेस्यपुत्रेणसमगादितिसमानेवैतत्परिहृतोमे
नइत्यागस्त्यःसमानंह्येवतद्भवतिवायुश्चाकाशश्चेत्यधिदैवत-

ता । अथाध्यात्ममभिधीयते । वक्तृत्वादाद्वाङ्नामकं मंतृत्वान्मनोनामकं प्रकर्षेणाननाच्चेष्टकत्वात्प्राणनाम । शिष्टंस्पष्टं । त त्राप्यधिष्ठानमात्रविषयेविप्रतिरुच्यतेऽथेति ॥ अथतत्रमनोनामकंवराहरूपंपूर्ववर्णप्रतिपाद्यं । वाङ्नामकंवामनरूपमुत्तरवर्ण प्रतिपाद्यमितिस्वपक्षेपुत्रेणयुक्तिरुच्यते ॥ मनसेति ॥ उपसंहियते ॥ तस्मादिति ॥ तस्मात्सयुक्तिकत्वान्मनएवपूर्वरूपंवागे वोत्तररूपंसंहितातुप्राणएवेत्याहेत्यन्वयः । नन्वेवंपुत्रपक्षस्यप्रबलत्वेपितापुत्रपक्षयोःसाम्यमितिप्रसिद्धिविरोधइत्यतोमहिदासेनो च्यते ॥ समानमिति ॥ पितुश्चपुत्रस्येत्येनयोरत्र प्राणाख्यस्यप्राणेस्थितस्यनरसिंहस्यसंहितादेवतात्वविषये । मतंसमानमि त्यर्थः । यद्वैतयोःसमानंसमानत्वंसाम्यमितिभावप्रधानतयायोज्यं । सएषः अध्यात्मशब्देनप्रकृतोदेहाख्यः अश्वरथः इंद्रिया ख्याश्वयुक्तोरथः । प्रष्टेःप्रच्छनीयस्यपृच्छाविषयस्य । यद्वातस्यैवोत्तरप्रदानसमर्थत्वेनप्रच्छनीयस्योपदेशकस्यहरेर्वाहनः । कथं मनोवाक्प्राणसंहतः मनोवाक्प्राणनामकेनतत्स्थेनोपदेशोपयुक्तत्वादिसामर्थ्योपेतेनपरमात्मनासंबद्धइत्यर्थः । यउपासकएवमु क्तप्रकारेणसंहितां पूर्वोत्तरवर्णसंहितां वेद स प्रजया प्रकृष्टत्वेनजननात्प्रजाज्ञानं तेनपांतिशंसाधनाश्चेतिपशवोवेदाः । तै

उप० । मथाध्यात्मंवाक्पूर्वरूपंमनउत्तररूपंप्राणःसंहितेतिशूरवीरोमांडूकेयोऽथहास्यपुत्रआहज्येष्ठोमनःपूर्वरूपंवागुत्तररूपंमनसावाअग्रे संकल्पयत्यथवाचाव्याहरतितस्मान्मनएवपूर्वरूपंवागुत्तररूपंप्राणस्त्वेवसंहितेतिसमानमेनयोरत्रपितुश्चपुत्रस्यचसएषोश्वरथःप्रष्टिवाहनोमनोवा क्प्राणसंहतःसयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभि-

॥ १६४ ॥

र्यशसाकीर्त्याब्रह्मणोवरणादेवसम्यक्चायितंस्वरूपंतेजोब्रह्मवर्चस्तेनस्वर्गेणलोकेनविष्णुलोकेनसंधीयते सर्वमायुर्नित्यायुश्चैतिलौ किकप्रजादिभिःसंधीयते । पूर्णायुष्यंचैतीत्यप्यर्थः । इतिनु एताहिमांडूकेयानांसंबंधिन्यः । तैरुपासितविद्याइत्यर्थः ॥ १ ॥ (२७) ॥ अथातइत्यादौकेवलंजडसंहिताविषयविद्योच्यतइत्यन्यथाप्रतीतेःप्रमाणेनव्याचष्टे ॥ विष्णुनाम्नीति ॥ बहुरूपाणां वा मनप्रद्युम्नादिबहुरूपाणां । बहुधास्थितस्य वराहवासुदेवाद्यात्मनाबहुधास्थितस्य । संहितायाइत्येकवचनतात्पर्यमेकस्वरूपिण इति ॥ एवंसंहितायाविष्णुनामाक्षरतत्संधिदेवतायावराहादिबहुरूपायाउपनिषत् बहुभिःखंडैर्व्याख्यायतइत्यर्थमुक्त्वा विष्णु नामव्याख्यानभूतानांवेदादिशब्दानांपूर्वोत्तरवर्णतत्संधिदेवतायाउपनिषदुच्यतइत्यर्थांतरमाह ॥ विष्णुनामार्थेत्यादिना ॥ लौकिकाःपौरुषेयवाक्यगताः । वैदिकावेदगताः सर्वेवर्णास्तद्वाचकाः णकारषकारार्थवाचकाः । पृथिवीरूपमित्यादिव्याचष्टे ॥ पृथिवीति ॥ पृथुत्वात् विस्तरत्वात्। पूर्वेणवर्णेनषकारादिनारूप्यतेनिरूप्यतेप्रतिपाद्यतइतिपूर्वरूपमित्यभिप्रेत्योक्तं॥ देवतेति॥

उप० । र्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेतीतिनुमांडूकेयानां ॥ १ ॥ (२७)

भा० । विष्णुनाम्निषकारस्यणकारस्यचसंहितां । विष्णोस्तुबहुरूपाणांवाचिकामृषयोविदुः । तौचवर्णौहरेःसम्यक्स्वरूपप्रतिपादकौ । बहु धैवस्थितस्यास्यसदैवैकस्वरूपिणः । विष्णुनामार्थरूपत्वाद्वेदानामपिसर्वशः । अन्येषामपिशब्दानांसंहताविष्णुवाचिकाः । तद्वाचकास्तथावर्णाः सर्वेलौकिकवैदिकाः । पृथिवीनामकंरूपंपृथुत्वात्पृथिवीस्थितं । देवता-

यद्वा पूर्वरूपं पूर्ववर्णमित्युच्यते । कुतः यतःपूर्ववर्णस्यदेवतेतियोज्यं । प्रतिपाद्यप्रतिपादकयोरभेदोपचारश्च "अयंवैलोकःप्रथमामहानाम्नी तथौप्राणात्मका"वित्यादौदृष्टइतिभावः । देवतोत्तरवर्णस्येत्यादिकमप्येवंयोज्यं ॥ वेदकत्वादिति ॥ वागतिगंधनयोरितिधातोरितिभावः॥अयनत्वादिति॥अयपयगताविति धातोरितिभावः। मध्यदेवतासंधिदेवता॥रूपद्वयेति॥पूर्वोत्तरवर्णप्रतिपाद्यरूपद्वयेत्यर्थः । विष्णुनाग्निकौतौपूर्वोत्तरवर्णौ किंचमध्यं यद्देवतात्वंपृथिव्यादीनामित्यतऋषिमतभेदेनाह ॥ वर्णद्वयमिति ॥ विकारंषकारंचशब्दात्णकारंचकेचिद्वर्णद्वयमब्रुवन् । तथाचवीतिपूर्वोवर्णः । ष्णुइत्युत्तरोवर्णइतिभावः । किमत्रमध्यमित्यतआह ॥ षकारंमध्यमिति ॥ अस्मिन्पक्षेषकारमेवमध्यमाहुरित्यर्थः । पक्षांतरमाह ॥ णकारंकेचिदुत्तरमिति ॥ एतेनविष्इत्येतत्पूर्वमित्युक्तंभवति । किमत्रमध्यमित्यतउक्तं ॥ षकारमिति ॥ अत्रापिषकारमेवमध्यमाहुरित्यर्थः । ननुपूर्वपक्षेषकारोणकारेणसहोत्तरोवर्णः अस्मिन्पक्षेविकारेणसहपूर्वोवर्णः पक्षद्वयेपिषकारस्यकथंमध्यत्वमित्यतआह ॥ पृथगिति ॥ एषामुभयेषांपक्षे वर्णयो र्विकारषकारयोःषणयोर्वा पृथक्करणं पृथगुच्चारणमेव मध्यमुच्यते । पृथक्करणेनव्यक्तीकृतषकारएवमध्यमित्यर्थः । पक्षांतरमाह ॥ उपसर्गेति ॥ ऊष्मणः षकारस्य । व्यक्तिर्नामसंधिदशायामनन्यशेषत्वं णकारोहिपश्चाद्भावीष

भा० । पूर्ववर्णस्यपूर्वरूपंतदुच्यते । देवतोत्तरवर्णस्यक्रीडनाच्चद्युनामकं । दिविस्थितंहरेरूपमुत्तरंरूपमुच्यते । वेदकत्वाच्चायनत्वाद्रूपंयद्द्युनामकं । विष्णोस्तद्वर्णयोर्मध्यदेवतेतिप्रकीर्तितं । संहितानामकंतच्चरूपद्वयसहस्थितेः । वर्णद्वयंविकारंचषकारंकेचिदब्रुवन् । षकारंमध्यमत्रैवणकारंकेचिदुत्तरं । पृथक्करणमेवैषांवर्णयोर्मध्यमुच्यते । उपसर्गमात्रंवीत्याहुःकेचिन्नामष्णुमात्रकं ।

कारशेषतयासंधिदशायांभासते । षकारस्तुशेषितयाप्राधान्येनष्णुइतिभासते । तथाचशेषितयाभासमानत्वंमध्यत्वमित्यर्थः । विरलोच्चारणेउभावपिप्रधानौ । संश्लिष्टोच्चारणेतुणकारःशेषभूतः । तत्रयःशेषितयाणकारानुबद्धतयाषकारोदृश्यते समध्यमितिभावः । आकाशःसंहितेत्येतद्व्याचष्टे ॥ आकाशस्थइति ॥ अस्यवर्णद्वयस्येत्यर्थमभिप्रेत्योक्तंवर्णयोरिति ॥ संहिताशब्दं निर्वक्ति ॥ उभयेति ॥ सहाविपरिहृतइत्येतद्व्याचष्टे ॥ सइति ॥ इतिशब्दस्यवक्ष्यमाणस्यात्राप्यन्वयमाह ॥ इतीति ॥ नमेस्येत्येतद्व्याचष्टे ॥ मेमदीयेनेति ॥ मदुपासितेन अधिष्ठानतयेतिशेषः । नसमागादधिष्ठानतयाबुद्धिसंगतिंनाकरोत् । कुतइत्यतउक्तंवायुस्थेति ॥ एतेनेतिशब्दोहेतोरितिव्याख्यातोभवति । समानेवैतदित्यस्यतात्पर्यमाह ॥ यद्यपीति ॥ अनेनतत्तथापितेउपासनेसमानेयत्तत्तस्मादपरिहृतइतियोजनेत्युक्तंभवति । परिहृतोमेनइत्यस्यमांडूकेयपक्षःस्वेनपरिहृतइतिमाक्षव्योमेनइत्यन्यथाप्रतीतेर्व्याचष्टे ॥ परिहृतइति ॥ मेने मन्ये । आगस्त्याभिमतांयुक्तिमाह ॥ आकाशइति ॥ यस्मादाकाशोवायोःपि

भा० । षकारंचणकारंचवर्णौपूर्वोत्तरावपि । व्यक्तिरेवोष्मणस्तत्रमध्यमित्यभिधीयते । सर्वेष्येतउपादेयाःपक्षानिर्दोषकायतइत्याद्यैतरेयसंहितायां । आकाशस्थआकाशनामाभगवान्वर्णयोर्मध्यदेवतेतिमाक्षव्यः । उभयरूपसंहितत्वात्संहितानामकः । समांडूकेयस्तेनमाक्षव्येणापरिहृतःस्वपक्षइतिमेने । मेमदीयेनमदुपासितेनास्याकाशस्यपुत्रेणवायुनानसमगादसौमाक्षव्यः । वायुस्थविष्णवनुपासनात् । यद्यप्याकाशस्थोभगवान्संहितानामकोभवति । तथापिनवायुस्थस्यासंहितात्वंभवतीत्यपरिहृतत्वं । परिहृतोमांडूकेयपक्षइत्यहंमेनइत्यागस्त्यः । आकाशेविष्णूपासनस्याधिकफलत्वात् । पिताह्याकाशोवायोः ।

तातस्मादाकाशेविष्णूपासकस्याधिकफलवत्त्वादितियोजना । समानंह्येतद्भवतीत्येतत्कस्यपक्षइत्यतआह ॥ भगवतइति ॥ स र्वोपिभगवतःपक्षइत्यतःस्वपक्षइत्युक्तं । उपदेशात्पूर्वमन्यैरज्ञातःस्वमात्रज्ञातःपक्षइत्यर्थः । साम्यमुपपादयन्वाक्यार्थमाह ॥ आकाशस्येति ॥ एतेनहिशब्दोयस्मादित्यर्थे । एतदित्यधिष्ठानद्वयमित्यर्थः । समानमित्यतःपरंतस्मादितिपूरणीयं । भवती त्यस्याग्राह्यंभवतीत्यर्थइत्युक्तंभवति । प्रकारांतरेणसाम्यमुपपादयति ॥ त्वगिंद्रियेति ॥ अहंकारस्त्रिविधोवैकारिकस्तैजसस्ता मसश्चेति । तत्रवैकारिकापरपर्यायसात्विकाहंकारात्"दिग्वातार्कप्रचेतोश्विवह्नींद्रोपेंद्रमित्रका"इत्युक्तादशेंद्रियदेवाउत्पन्नाः । " वैकारिकान्मनोजज्ञेदेवावैकारिकादशे"तिपूर्वशेषात् । तदनंतरंतैजसादिंद्रियाणि तामसाद्भूतानीतितत्वं । तथाचत्वगिंद्रिय देवतात्वेनआकाशात्पूर्वमेववायोःसात्विकाहंकारजन्यत्वात् "आदिसृष्टौपूर्वजायेतेधिकाःसर्वतोगुणै"रित्युक्तरीत्याआकाशाद्वा योर्गुणाधिक्यं। तथाप्यात्मनआकाशःसंभूतइतिभूतोत्पत्तिप्रकरणेआकाशस्यपितृत्वाद्भूतांतर्गतरूपेणवाय्वपेक्षयाव्याप्त्याधिक्या च्चसाम्यमितिभावः । पूर्ववायुशब्दप्रवृत्तिनिमित्तबलादाधिक्यंवायोरुक्तमाकाशस्यभूतसृष्टौकालज्यैष्ठ्यंसाम्योपपादकं अधुना त्वादिसृष्टौपूर्वजत्वयुक्त्यासर्वैर्गुणैराधिक्यंवायो राकाशस्यत्वाकाशशब्दप्रवृत्तिनिमित्तेनसंमतात्काशमानलक्षणेनव्याप्त्यागुणेन

भा० । भगवतःस्वपक्षः (तस्तुपक्षः) समत्वमेववाय्वाकाशयोरिति । आकाशस्यपितृत्वाद्वायोर्बलाधिकत्वाच्चोभयोरुपासनास्थानत्वे साम्यम् । तस्मादुभावपिग्राह्यौ। त्वगिंद्रियदेवतात्वेनाकाशात्पूर्वमेववायोःसात्विकाहंकारजत्वाद्वायोराकाशाद्गुणाधिकत्वं । तथाप्यत्राकाशस्यपितृ त्वंव्याप्तिश्चाधिकेत्युपासनायांसाम्यं ।

भूतसृष्टौपितृत्वेनमान्यतयाचाधिक्यमितिसाम्यमुच्यतइतिभेदः । नन्विंद्रियदेवतात्वेनवायोःसात्विकाहंकारादाकाशापेक्षयापूर्व जत्वेनगुणाधिक्येघ्राणाभिमानिनोरश्विनोर्दिगभिमानिकुबेरस्यपादमानिनोजयंतस्यचविघ्नेशादुत्तमत्वंस्यादितिचेन्न । रूपविशेषेऽ श्विकुबेरयोर्विघ्नेशात्कालज्यैष्ठ्येपिरूपविशेषेतदपेक्षयाविघ्नेशस्यव्याप्त्याधिक्येनदेशज्यैष्ठ्यसद्भावेनतयोःस्वरूपसाम्यस्योपपत्तेः। जयंतस्यतु "पाददेवोजयंतोन्य"इत्युक्तत्वेनपादनियामकोपेंद्रशेषत्वेनपश्चाज्जन्मसंभवति । इंद्रियदेवोत्पत्तिदशायांतूपेंद्रस्यैवा भिव्यक्तिसंभवात् । अतएवभागवतेउपेंद्रग्रहणंकृतं । समानमेनयोरत्रपितुश्चपुत्रस्यचेतिवाक्यस्थंअत्रेतिपदमनूद्यव्याचष्टे ॥ अ त्रेति ॥ पितापुत्रयोरिति ॥ तत्पक्षयोरित्यर्थः । अत्रेतिविशिष्योक्त्याव्यावर्त्यमाह ॥ अन्यत्रेति ॥ ननुपूर्वोत्तरवर्णदेवता विषयेपुत्रपक्षोबलीयानितिनयुक्तं । तथाहि । किमस्यवराहादिवर्णप्रतिपाद्यदेवताविषयइत्यर्थः । उतउमावैवाक्समुद्दिष्टामनोरुद्र उदाहृतइतिसूत्रभाष्योक्तरीत्यावाङ्मनसनामकयोरुमामहेश्वरयोःपूर्वोत्तरवर्णाभिमानिदेवतात्वंविषयइति । नाद्यः । ऋषिमतद्व येवराहादीनामेवपूर्वोत्तरवर्णप्रतिपाद्यदेवतात्वेनतत्रप्राबल्यदौर्बल्याभावात् । नापिद्वितीयः । वाङ्मनसशब्दवाच्ययोरुमामहे श्वरयोरुभयोरपिमतद्वयानुसारेणपूर्वोत्तरवर्णाभिमानिदेवतात्वोपपत्तेःपुत्रपक्षस्यतद्विषयेप्राबल्यायोगात् । नहिवाक्प्रभृतेर्मनो धीनत्वयुक्तिर्मनसएवपूर्ववर्णाभिमानित्वंनवाचः वाचएवोत्तरवर्णाभिमानित्वंनमनसइत्यत्रसाधिकाभवत्यप्रयोजकत्वात् । तत्कथ मेतदितिचेन्न । अन्यत्रेतिभाष्यस्यतट्टीकायाश्चपूर्वोत्तरवर्णाभिमानिदेवतयोर्गुणप्रधानभावोविषयइत्यर्थांगीकारेणबाधात् । तथा

भा० । अत्र प्राणाख्यस्यप्राणेस्थितस्यविष्णोःसंहितानामत्वेपितापुत्रयोःसाम्यमेव । अन्यत्रतुपुत्रपक्षएवबलीयान् । युक्तिमत्त्वात् ।

र्हि । तत्रहिवाङ्मनसयोरुमारुद्रयोःपूर्वोत्तरवर्णाभिमानिदेवतात्वविषयेगुणप्रधानभावेचमुनिमतविवादउच्यते । तत्रवर्णदेवतात्वविषयेतूक्तयोःसाम्यमन्यतरपक्षेविशेषयुक्त्यभावेनोत्तरयोरप्युभयवर्णाभिमानित्वोपपत्तेः । गुणप्रधानभावेतुपुत्रपक्षएवबलीयान्युक्तिमत्वात् । नचवाचोमनोधीनत्वेपिदेवतयाकुतस्तदितिवाच्यं । अचेतनस्यान्योन्यवशत्वस्यदेवतानिमित्तत्वादिति । नन्वेवंवाङ्मनसयोःपूर्वोत्तरवर्णाभिमानिदेवतात्वविषयेमतयोःसाम्ये समानमेनयोरत्रपितुश्चपुत्रस्यचेत्युपनिषद्वाक्यंभाष्येअत्रप्राणाख्यस्यप्राणेस्थितस्यविष्णोःसंहितानामत्वेपितापुत्रयोःसाम्यमेवेतिप्राणस्थस्यसंहितानामकत्वमात्रेसाम्यपरतयाकथंव्याख्यानमितिचेन्न । वाङ्मनसयोर्वर्णाभिमानिदेवतात्वविषयेउक्तरीत्यासाम्यंसिद्धवत्कृत्यसंहिताविषयेपिसाम्यमित्येवंपरतयाव्याख्यातत्वात् । अतएवन्यायविवरणेवाक्पूर्वरूपंमनउत्तररूपमितिवाचःपूर्ववर्णदेवतात्वनिर्देशमात्रेणमनःपूर्वरूपमित्यनेनसाम्यं । "मनसावाअग्रेसंकल्पयत्यथवाचाव्याहरती"तियुक्तितोविशेषोमनःपूर्वकत्वस्यैवश्रुतइतिप्राधान्यंमनसएवहिज्ञायतइत्यादिनासमानमेनयोरितिवाक्यंपितापुत्रयोर्मतमत्रवाङ्मनसयोःपूर्वोत्तरवर्णाभिमानिदेवतात्वविषयेसमानमितिव्याख्यातं । स्पष्टंचवाङ्मनसीत्यधिकरणेतत्वप्रकाशिकायां । अत्रखलुवाक्पूर्वरूपमित्यादिनावाङ्मनसयोःपूर्वोत्तरवर्णदेवतात्वेगुणप्रधानभावेचमुनिमतविवादउच्यते । तत्रवर्णदेवतात्वविषयेतूक्तयोःसाम्यमन्यतरपक्षेविशेषादर्शनात् । नचतत्रव्यामिश्रतापि । उभयोरपिवर्णदेवतात्वोपपत्तेः । गुणप्रधानभावेतुसाम्यमेवनास्ति । "मनसावाअग्रेसंकल्पयत्यथवाचाव्याहरती"तियुक्त्यामनःपूर्वकत्वस्यैवविशेषश्रवणादिति । ननुतत्पूर्वकत्वाद्वाचइत्यधिकरणेवाङ्मनसाभिमानिनोरुमामहेश्वरयोःकार्यकारणभावेइदंवाक्यमुदाहृतं । तत्कथंभग

वद्रूपाणांपूर्वापरवर्णसंधिप्रतिपाद्यत्वमत्रव्याख्यायतइत्येतदप्येतेनैवनिरस्तं । वर्णप्रतिपाद्यभगवद्रूपाधिष्ठानयोरुमामहेश्वरयोर्गुणप्रधानभावोपपादकतयापूर्वरूपादिपदेनकार्यकारणभावस्याप्युपनिषदभिप्रेतत्वेनाविरोधात् । अतएवतत्वप्रकाशिकायां "अत्रपूर्वोत्तरशब्दौकार्यकारणपरा"वित्युक्तमित्यलंविस्तरेण । सएषोश्वरथइत्यत्रमनोवाक्प्राणस्थेनतन्नामकेनविष्णुनासंहितःबद्धः सएषदेहाख्यइंद्रियाश्वयुक्तोरथइत्यन्वयमभिप्रेत्यव्याचष्टे ॥ मनइति ॥ वक्तृत्वाच्चैववाङ्नामेतिस्मृत्युक्तार्थेश्रुतिमुदाहरति ॥ प्राणान्निति ॥ कर्मनामानि प्राणनवचनादिक्रियाप्रवृत्तिनिमित्तकानिनामानि । स्वर्गलोकशब्दस्यमुक्तिपरत्वेयुक्तिमुक्त्वासमाख्यास्मृतिंदर्शयन्फलवाक्यंव्याचष्टे ॥ मुक्तइति ॥ यएवमेतांसंहितां संहितानामकंहरेरूपंवेद सः प्रजयाप्रकृष्टज्ञानैः पशुभिः वेदैः ब्रह्मवर्चसेन विष्णूत्थतेजसा संधीयते युक्तःस्यात् । स्वर्गेणलोकेनचसंधीयते मुक्तःस्यात्सर्वमायुरेति नित्यायुषाचयुक्तःस्यादित्यर्थः । प्रज्ञादिशब्दानामुक्तार्थेषुनिरुक्तिंदर्शयति ॥ प्रकृष्टत्वेनेत्यादिना ॥ विष्णोर्वरणादितिकर्तरिषष्ठी । मदीयोयमितिविष्णुनाभक्तत्वेनस्वीकृतत्वादित्यर्थः । कर्मणिवाषष्ठी । विष्णुभजनेनेत्यर्थः । चायितं उपचायितं वर्धितं । नांतरीयफ

भा० । मनोवाक्प्राणनामासौमनआदिषुसंस्थितः । विष्णुस्तस्यरथोदेहइंद्रियाश्वःप्रकीर्तितइतिच । प्रष्टिःसप्रच्छनीयत्वात्परमात्माजनार्दनः । वक्तृत्वाच्चैववाङ्नामामनोमंतृत्वहेतुतइतिच । प्राणन्नेवप्राणोनामभवति वदन्वाक्पश्यंश्चक्षुःशृण्वन्श्रोत्रंमन्वानोमनस्तान्यस्यैतानिकर्मनामान्येवेतिच श्रुतिः । मुक्तिरेवस्वर्गलोकः । अमुष्मिन्स्वर्गेलोकेसर्वान्कामानाप्नोतीतिप्रस्तुतत्वात् । मुक्तःप्रकृष्टज्ञानैश्चवैर्दैर्विष्णूत्थतेजसा । नित्यायुषाचयुक्तःस्यात्संहितारूपविद्धरेरितिच । प्रकृष्टत्वेनजननात्प्रजेतिज्ञानं । पांतिशंसाधनाश्चेतिपशवोवेदाः । परब्रह्मणोविष्णोर्वरणादेवसम्यक्चायितंस्वरूपंतेजःब्रह्मवर्चसं ।

लतयाप्रसिद्धप्रजादिकमत्रोच्यतइत्याह ॥ लौकिकेति ॥ इतिनुमांडूकेयानामित्येतद्व्याचष्टे ॥ मांडूकेयैरिति ॥ १ ॥ २७ ॥ अथेतिपूर्वमताद्वैलक्षण्यद्योतकः । विद्योच्यतइतिशेषः । पृथिवी पृथिवीनामकंतद्गतंवासुदेवाख्यंरूपं । द्यौर्दिविस्थंद्युनामकंसंकर्षणाख्यं । वर्षणाद्वृष्टिनामकोवृष्टौस्थितःप्रद्युम्नःसंधिः संहितादेवता । परंसस्यादिकंजनयतीतिपर्जन्यनामापर्जन्यस्थोनिरुद्धः संधाता उच्चारयितृपुरुषस्थः । वृष्टेःसंधित्वंपर्जन्यस्यसंधातृत्वंलोकप्रसिद्धमित्युच्यते ॥ तदुतेति ॥ यत्र यदा । एतत् एषपर्जन्यः । बलवदनूद्गृह्णन् बलवद्यथाभवतितथा अनु वर्षकालानुसारेण । उद्गृह्णन् उद्गर्जन्नपि । अहोरात्रेसंदधत् संमेलयन्नुत संमेलयन्नपि वर्षति । तत्तदाद्यावापृथिव्यावपिसमधातां संधितेअभूतामित्याहुरुत आहुःस्म तस्माद्वृष्टिःसंधिःपर्जन्यःसंधातेतिभावः । इतिनु इत्थंह्यधिदैवमुपासनं । अथाध्यात्मंपृथिव्यादीनांतदधिष्ठानकसंहितारूपाणामधिष्ठानमुच्यते । अयंसर्वःपुरुषः समग्रःपुरुषदेहः । आंदं एकोवयवी । तस्यदेहस्यद्वेविदले द्यौपूर्वोत्तरभागौभवतइत्याहुः । तस्येदं पादादिकटिपर्यंतंपूर्वार्धमेव पृथिव्यारूपं सरूपं । पृथिवीदेवतायाःप्रतिमाभूतंचपृथिवीनामकस्यवासुदेवस्यापिप्रतिमाभूतंच । इदं नाभ्यादिशिरःपर्यंतं । दिवो द्युलोकस्य रूपं सरूपं समानं । द्युदेवतायास्तद्गतस्यतन्नामकस्यसंकर्षणस्यचरूपंप्रतिमाभूतंच । एतेनशरीरस्यपूर्वार्धंपूर्व

भा० । लौकिकप्रजादिकमपितदिच्छतांयथायोग्यंभवति । मांडूकेयैर्ऋषिभिरुपासिताएताविद्याः ॥ १ ॥ २७ ॥

उप० । अथशाकल्यस्यपृथिवीपूर्वरूपंद्यौरुत्तररूपंवृष्टिःसंधिःपर्जन्यःसंधातातंदुतापियत्रैतद्बलवदनूद्गृह्णन्संदधदहोरात्रेवर्षतिद्यावापृथिव्यौसमधातामित्युताप्याहुरितीन्वधिदैवतमथाध्यात्मंपुरुषोहवाअयंसर्वआंदंद्वेविदलेभवतइत्याहुस्तस्येदमेवपृथिव्यारूपमिदंदिव- ॥ १६८ ॥

रूपमुत्तरार्धमुत्तररूपमित्युक्तंभवति । उपलक्षणमेतत् । वाचोवृष्ट्यासाम्यं । वृष्टिदेवतायाःप्रद्युम्नस्यचवाच्यवस्थानं शरीरगतस्यात्मनउच्चारयितृपुरुषत्वेनतस्यपर्जन्येनसाम्यं पर्जन्यस्यतद्गतस्यानिरुद्धस्यात्मन्यवस्थानंचोक्तम् वाक्संधिःआत्मासंधातेतिच द्रष्टव्यं । साम्यमेवप्रपंच्यते ॥ तत्रायमित्यादिना ॥ यथाद्यावापृथिव्यावंतरेण द्यावापृथिव्योर्मध्ये । असावाकाशस्तत्रआकाशाभिमानीदेवआकाशनामानृसिंहोप्यस्ति । तथातत्रदेहेंतरेण पूर्वोत्तरार्धयोर्मध्ये । अयमाकाशोवर्ततेतत्राकाशेअसावाकाशआकाशाभिमानीदेवस्तन्नियामकोनृसिंहश्चास्तीतियोज्यं।यथाऽमुष्मिन्बाह्याकाशेवायुस्तदभिमानीदेवोवायुनामादाशरथिश्चास्ति तथातस्मिन्हस्मिन् तस्मिन्नस्मिन्नंतराकाशे । प्राणोवायुरायत्तोवर्तते । तस्मिन्प्राणेवायुर्बाह्यवाय्वभिमानीदेवस्तन्नामादाशरथिश्चायत्तइतियोज्यं । यथाद्यादिष्वमूनित्रीणिज्योतींष्यादित्यादीनितन्नामकानितत्स्थानिकपिलादीनिवर्तते तथापुरुषदेहेइमानित्रीणिज्योतींषिचक्षुरादीनि । तस्यैवविवरणं ॥ यथासौदिवीत्यादि ॥ यथासौदिव्यादित्यस्तन्नामातद्गतःकपिलश्च एवंशिरसीदंचक्षुर्नामासूर्यःकपिलश्चात्रास्ति । यथासावंतरिक्षेविद्युत्तन्नामातद्गतोहंसः एवमात्मनि मध्यदेहे । हृदयं मनः हृदयनामाविद्युद्देवोहंसश्चास्ति । यथापृथिव्यामयमग्निस्तद्देवस्तन्नामाजामदग्न्यश्च एवमुपस्थेरेतोस्तितन्नामाग्निर्जामदग्न्यश्चेत्यर्थः । एवंसाम्यमुप

उप० । स्तत्रायमंतरेणाकाशोयथासौद्यावापृथिव्यावंतरेणाकाशस्तस्मिन्हस्मिन्नाकाशेप्राणआयत्तोयथामुष्मिन्नाकाशेवायुरायत्तोयथामूनि त्रीणिज्योतींष्येवमिमानिपुरुषेत्रीणिज्योतींषियथासौदिव्यादित्यएवमिदंशिरसिचक्षुर्यथासावंतरिक्षेविद्युदेवमिदमात्मनिहृदयंयथायमग्निःपृथिव्यामेवमिदमुपस्थेरेत

पाद्योपसंहियते ॥ एवमिति ॥ एवमुह एवमेवखलूक्तप्रकारेणैव । पृथिव्यादिकंसर्वलोकमनु तदानुरूप्येणात्मानं स्वशरीरं विधायेदमेवपृथिव्यारूपमिदंदिवइतिशाकल्यआहस्मेत्यर्थः । सएवमेतामित्याद्युक्तार्थं ॥ ७ ॥ अथशाकल्यस्येत्यत्राथेतिसूचितं पूर्वमताद्वैलक्षण्यंवक्तुंपूर्वमतमनुवदति ॥ वराहइति ॥ नतत्रपूर्वरूपादिशब्देनकार्यकारणभावउक्तइतिभावेनोक्तं ॥ सनातनमिति ॥ अथशाकल्यस्येत्यादिव्याचष्टे ॥ शाकल्यइत्यादिना ॥ शाकल्यस्तुभूमिद्युवृष्टिपर्जन्यनाम्नाऽउर्व्यादिषुसंस्थितंवासुदेवादिरूपिणंचतुर्विधंविष्णुंतेषुपूर्वोत्तरवर्णमध्येषूच्चारकेचस्थितमाहेत्यन्वयः । अथाध्यात्ममित्येतद्व्याचष्टे ॥उर्व्यादीनामिति॥ आहेतिसंबंधः । अध्यात्मंदेहे । उर्व्यादीनांचतुर्णांतद्वतरूपाणांचावस्थानमुच्यतइत्यर्थइतिभावः । इदमेवपृथिव्यारूपंसरूपं सममित्याद्यर्थमभिप्रेत्येदमेवपृथिव्यारूपमित्यादिव्याचष्टे ॥ अधरार्धस्येत्यादिना ॥ मूलमुपलक्षणमित्यभिप्रेत्योक्तंवाचइत्यादि ॥ इदमेवपृथिव्याः पृथिवीनियामकस्यवासुदेवस्य रूपं प्रतिमेत्यर्थांतरमुक्तं ॥ विष्णोरिति ॥ चतुरात्मनोविष्णोस्तुविशे

उप० । एवमुहस्मसर्वलोकमात्मानमनुविधायाहेदमेवपृथिव्यारूपमिदंदिवःसयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेति ॥ २ ॥ (२८)

भा० । वराहोवामनःसिंहइतिरूपत्रयंहरेः । पूर्वोत्तरार्णमध्येषुस्थितमुक्तंसनातनं । मांडूकेयैर्हिशाकल्योवासुदेवादिरूपिणं । तेषुचोच्चारकेचैवस्थितमाहचतुर्विधं । भूमिद्युवृष्टिपर्जन्यनाम्नोर्व्यादिषुसंस्थितं । उर्व्यादीनांचतुर्णांचदेहएवस्थितिंप्रनः । अधरार्धस्यचोर्व्याश्चसाम्यमन्यस्यवैदिवा । वाचोवृष्ट्यैवसाम्यंचपर्जन्येनैवचात्मनः । तेषांतेषुस्थितिंचैवविष्णोश्चचतुरात्मनः ।

षेणनियामकत्वेनयेष्वधरार्धादिषुतद्वतदेवेषुचस्थितिमित्यर्थः । देहेयमाकाशस्तत्रासावाकाशइत्यस्यार्थः आकाशस्येति ॥ आकाशस्याभिमानिनः अंतराकाशेसंस्थितिमत्रनृसिंहस्यआकाशाख्यस्यसंस्थितिमित्यर्थः । अस्मिन्प्राणेवायुरायत्तइत्यस्यार्थोवायोरिति ॥ प्राणात्मतां प्राणांतर्गतत्वं । दाशरथेः वाल्मीकेरित्यस्य । शिरसीदंचक्षुरात्मनिहृदयमुपस्थेरेतइत्यस्यार्थः सूर्येति ॥ चक्षुर्हृदयरेतोनामकानामितियोज्यं । तेषुद्दगादिस्थेषुसूर्यादिषुचक्षुरादिनाम्नःसंस्थितिंवदतिशाकल्यः । सयएवमित्यादेस्तात्पर्यंविद्येयमपिमोक्षप्रदायिनीति ॥ प्रागनिरुक्तान्शब्दान्निर्वक्तिवर्षणादित्यादिना ॥ परं सस्यादिकं । "जननात्परसस्यादेःपर्जन्य" इतिवचनात् । संधिनोतीत्यस्यपुष्णातीत्यर्थंतन्मूलधातुव्याख्यानपठनेनदर्शयति ॥ धिन्विति ॥ वृष्टिःसंधिरित्यत्रवृष्टिपदस्यवर्षणक्रियावाचित्वं वृष्यमाणोदकवाचित्वंच संधिपदस्यचसंधानंसंधिरितिक्रियावाचित्वं संधीयतइतिसंधिरितिविषयवाचित्वंचास्ति । प्रकृतेविवक्षितमर्थमाह ॥ वर्षणमिति ॥ वृष्टिरितिवर्षणं संधिरितिसंधानक्रियेत्यर्थइतिभावः । क्रियावाचित्वेज्ञापकमाह ॥ पर्जन्यइति ॥ पर्जन्यःसंधातेत्युत्तरवाक्येपर्ज्यन्यस्थस्यहिक्रियाकर्तृत्वमुच्यते अतःपूर्वंक्रियोच्यतइत्यर्थः । यद्वाद्यावापृथिव्यौसमधातां संधितेअभूतामित्ययुक्तं । व्यवहितत्वेनसंयोगघटकावांतरक्रियाभावादित्यतोवर्षणमेवसंधानक्रियेत्याह ॥

भा० । आकाशस्यांतराकाशेनृसिंहस्यात्रसंस्थितिं । वायोःप्राणात्मतांचैवतत्रदाशरथेःस्थितिं । सूर्यविद्युद्धुताशानांदृग्घृद्रेतःसुचस्थितिं । कपिलस्यचहंसस्यजामदग्न्यस्यतेषुच । स्थितिंवदतिविद्येयमपिमोक्षप्रदायिनीत्यादिच । वर्षणाद्वृष्टिः । परंजनयतीतिपर्जन्यनामाविष्णुः । संधिनोतीतिसंधिः । धिनुपुष्टाविधातुः । सम्यग्धारणात्संधाता ।

वर्षणमेवेति ॥ कुतोवर्षणंसंधानक्रियेत्यतःपर्जन्योयदावर्षतितदाद्यावापृथिव्यौसमधातामिति पर्जन्यस्थस्यसंयोगघटकवर्षणलक्षणसंधानक्रियाकर्तृत्वेननिर्दिष्टत्वादित्याह ॥ पर्जन्यस्यइति ॥ २ ॥ (२८) एवंविष्णुनाम्नितद्याख्यारूपवेदादिषुचपूर्वोत्तरवर्णसंधिविषयाविद्योक्ता । अधुनासंहितापदक्रमविषयाविद्योच्यतइत्युच्यते ॥ अथेति ॥ अथ पूर्वोत्तरवर्णसंधिविषयविद्योपदेशानंतरं । शिष्याणामधिकारसंपत्त्यनंतरंवा । निर्भुजं संहिता । तन्मूलत्वेनपदक्रमावपिनिर्भुजं । तद्विषयाःप्रवादाः प्रकृष्टाविद्याउपदिश्यंते । निर्भुजं संहिताख्यं । पृथिवीस्थितं पृथिवीनामकवराहविषयं । प्रतृण्णंपदं । दिविविद्यमानस्तन्नामकोयोवामनस्तद्विषयं । उभयमंतरेण क्रमः । अंतरिक्षगततन्नामकनृसिंहविषयं । यदिनिर्भुजं संहितां ब्रुवंतंविष्णुभक्तं नित्यसंसार्युपवदेदपवदेन्निंदयेदथ तर्हि अवराभ्यां भूम्यंतरिक्षाभ्यां स्थानाभ्यामच्योष्ठाः च्युतोसीत्येनंब्रूयात् । अधीयानइतिशेषः । यदिप्रतृण्णं वदंतमुपवदेत् अथ तर्ह्युत्तराभ्यामंतरिक्षद्युभ्यांस्थानाभ्यामच्योष्ठाइतिब्रूयात् । यस्तूभयमंतरेण क्रमं आह अधीते तस्योपवादोनास्त्येव । क्रमाध्येतृनिंदनस्यत्रैलोक्यादधोनिरयेदुःखातिशयलक्षणानर्थफलत्वात्तन्निंदकोनास्तीत्यभिप्रायः । ब्राह्मणस्यहंता

भा० । वर्षणमेवद्यावापृथिव्योःसंधानं । पर्जन्यस्थोभगवांस्तुतत्कर्ता ॥ २ ॥ (२८)

उप० । अथातोनिर्भुजप्रवादाःपृथिव्यायतनंनिर्भुजंदिव्यायतनंप्रतृण्णमंतरिक्षायतनमुभयमंतरेणाथयद्येनंनिर्भुजंब्रुवंतमुपवदेदच्योष्ठाअवराभ्यांस्थानाभ्यामित्येनंब्रूयादथयद्येनंप्रतृण्णंब्रुवंतमुपवदेदच्योष्ठाउत्तराभ्यांस्थानाभ्यामित्येनंब्रूयाद्यस्त्वेवोभयमंतरेणाहतस्यनास्त्युपवादो

॥ १७० ॥

नास्तीत्यादिवत् । निर्भुजादिस्वरूपमुच्यते ॥ यद्वीत्यादिना ॥ पूर्वोत्तरवर्णयोःसंधिंविशेषेणवर्तयत्यभिव्याहरतीतियत्तत्संहिततयोच्चार्यमाणंनिर्भुजस्यरूपं । भुजोभंगइतिधातोर्भजनवर्जितत्वात् । अथशुद्धेअसंश्लिष्टेअक्षरेअभिव्याहरतीतियत्तदुच्चार्यमाणंशब्दतत्वंप्रतृण्णस्यरूपं । तृणछेदनइतिधातोः । उभयमंतरेण क्रमस्तु । अग्रेउ । अतिशयेनाढ्यएव कुतः । उभयं संहितापदंचेत्युभयं अनेनव्याप्तंभवति । उभयमंतरेणमध्येनिधायतद्गर्भतयाप्राप्तत्वात्क्रमउभयमंतरेणेत्यर्थः । फलतारतम्येनसंहितादीनामध्ययनेतारतम्यमुच्यते ॥ अन्नाद्यकामइत्यादिना ॥ मुक्तावन्नाद्यंयद्भोग्यंतत्कामोनिर्भुजंब्रूयात् । स्वर्गकामोमोक्षकामः । उभयकामः । मुक्तितद्गतभोगकामः । यदिनिर्भुजंब्रुवंत मधीयानं परश्शत्रुः विष्णुवैष्णवद्वेष्यसुरप्रकृतिस्तमोयोग्यः उपवदेदपवदेन्निंदयेदथ तर्हि पृथिवींदेवतां संहिताप्रतिपाद्यांवराहाख्यां आरः निंदयाप्राप्तोसि । तस्मात्पृथिवीदेवतात्वारिष्यति नाशयिष्यतितमसिपातयिष्यतीत्येनंप्रतिब्रूयात् । एवमथयद्येनंप्रतृण्णमित्यादिव्याख्येयं । दिवंदेवतां वामनं । अंतरिक्षंदेवतां नृसिंहं । ननुसंहिताध्येत्राविष्णुभक्तेनतमोयोग्येनिंदकेशप्तेतत्तथाभवतिकिमित्यतोभवत्येवेत्युच्यते ॥ यथातुकथाचेति ॥ य

उप० । यद्धिसंधिंविवर्तयतितन्निर्भुजस्यरूपमथयच्छुद्धेअक्षरेअभिव्याहरतितत्प्रतृण्णस्याग्रउएवोभयमंतरेणोभयंव्याप्तंभवत्यन्नाद्यकामोनिर्भुजंब्रूयात्स्वर्गकामःप्रतृण्णमुभयकामउभयमंतरेणाथयद्येनंनिर्भुजंब्रुवंतंपरउपवदेत्पृथिवींदेवतामारःपृथिवीत्वादेवतारिष्यतीत्येनंब्रूयादथयद्येनंप्रतृण्णंब्रुवंतंपरउपवदेद्दिवंदेवतामारोद्यौस्त्वादेवतारिष्यतीत्येनंब्रूयादथयद्येनमुभयमंतरेणब्रुवंतंपरउपवदेदंतरिक्षंदेवतामारोंतरिक्षंत्वादेवतारिष्यतीत्येनंब्रूयाद्यथातुकथाच

एवंविद्ब्रुवन् संहिताधिकमधीयानो। वाशब्दादब्रुवन्वा। यथातुकथाच लोकेयथातुकथावाक्यप्रबंधः। तथाप्रबंधरूपेणब्रुवंतं निंदां कुर्वंतं। यद्वा। यथातुकथा यथाकथंचिद्येनकेनापिप्रकारेण । निंदांकुर्वंतंप्रकारांतरेणकोपविषयंवाप्रतिच्छायरूपंवाक्यंब्रूयात् तदुक्तमस्याभ्याशः शीघ्रमेव तथास्यात्। शापरूपंतद्वचनंनमोघंस्यादितिभावः। शापविषयत्वंचनित्यसंसारितमोयोग्ययोरेव न मोक्षयोग्यस्येत्युच्यते॥ नत्वेवेत्यादिना ॥ ब्राह्मणं ब्रह्मप्राप्तियोग्यंप्रति कुशलादन्यदकुशलं शापरूपंवचनं नब्रूयात्। तत्रापवाद उच्यते ॥ अतीति ॥ द्युतिस्वरूपत्वात्द्युम्नोभगवान्। तदाज्ञामितिवर्ततइत्यतिद्युम्नः। ब्राह्मणेभगवदाज्ञातिवर्तिनिसत्येवतं ब्राह्मणंप्रतिलोकच्युतोसीत्येवंशिक्षारूपेणब्रूयात्। नतुभगवदाज्ञानुवर्तिनं। चनशब्दोप्यर्थः। ब्राह्मणेअतिद्युम्नेचन। अतिद्युम्नेभवत्यपिलोकच्युतोभवेतिब्राह्मणंप्रतिशापरूपंवचनंनब्रूयादित्यर्थः। प्रत्युतब्राह्मणेभ्योमोक्षयोग्येभ्योनमोस्त्वितिशूरवीरोमांडूकेयआहस्मेत्यर्थः ॥ ३ ॥ (२९) अत्रनिर्भुजादिपदानामर्थाप्रतीतेर्निर्भुजंपृथिव्यायतनंपृथिव्याआश्रयइत्यन्यथाप्रतीतेश्चप्रमाणेनव्याचष्टे ॥ पृथिवीस्थइत्यादिना ॥ एतेन पृथिवीनामकोवराहः आयतनं विषयो यस्येतिवा पृथिव्याआयतनं प्रतिपादकतयाआश्रयइतिवार्थइत्युक्तंभवति। दिव्यायतनमित्यत्रदिवीत्यधिकरणसप्तमीतिभावेनोक्तंदिविष्ठइति ॥ अथयद्येनंनिर्भुज

उप० । ब्रुवन्वाब्रुवंतंवाब्रूयादभ्याशमेवयत्तथास्यान्नत्वेवान्यत्कुशलाद्ब्राह्मणंब्रूयादतिद्युम्नएवब्राह्मणंब्रूयान्नातिद्युम्नेचनब्राह्मणंब्रूयान्नमोअस्तुब्राह्मणेभ्यइतिहस्माहशूरवीरोमांडूकेयः ॥ ३ ॥ (१९)

भा० । पृथिवीस्थोवराहस्तुसंहितादेवतोदिता । दिविष्ठोवामनश्चैवसंप्रोक्तःपददेवता । नृसिंहस्त्वंतरिक्षस्थोभगवान्क्रमदेवता ।

मित्यादिनानिंदकस्यानर्थोक्त्यानिंदानकार्येतिविधिर्गम्यतइतिभावेनाह ॥ स्वाध्यायमिति ॥ प्रतिपाद्यरूपाज्ञानिनोनिंद्यत्वादुक्तं ॥ एवंध्यात्वेति ॥ अच्योष्ठाअवराभ्यामित्यादेस्तात्पर्यमाह ॥ तस्येति ॥ निर्भुजप्रतृण्णामध्येत्रपवदितालोकद्वयात्प्रच्याव्यते यस्तुक्रमपाठनिंदकःसलोकत्रयादधोनिरयेनाशंदुःखमाप्नोतीतियोज्यं। नत्वेवान्यत्कुशलाद्ब्राह्मणंब्रूयादित्यस्यतात्पर्यमाह ॥ गच्छसीति ॥ ब्राह्मणश्चनप्रथमवर्णोत्रविवक्षितइत्याह ॥ ब्रह्मेति ॥ संहितादौनिर्भुजादिशब्दान्निर्वक्ति ॥ भंजनेत्यादिना॥संहितापदोभयगर्भत्वात्क्रमउभयमंतरेणेतिस्फुटत्वान्नोक्तं। ननुसंहिताविषयविद्याप्रतिपादनंप्रतिज्ञायपदक्रमविषयविद्याप्रतिपादनमसंगतमित्यतआह ॥ निर्भुजमूलत्वादिति ॥ निर्भुजज्ञानाधीनज्ञानत्वादित्यर्थः। यद्वातदाश्रितत्वादित्यर्थः। पदादीनामिति ॥ पदक्रमजटानामित्यर्थः ॥ "संहितापाठतःप्रोक्तंद्विगुणंपदपाठतः ॥ त्रिगुणंक्रमपाठेस्याज्जटापाठेतुषड्गुणं ॥ महाभारतपाठस्तुवेदतुल्यःप्रकीर्तितः ॥ " इतिवराहपुराणेचातुर्मास्यमाहात्म्येदशमाध्यायेकथितत्वात्क्रमांतर्भावविवक्षयापृथग्देवताद्यनुक्तिः। पृथिव्यादिशब्दस्य " पृथिवीनामकंरूपंपृथुत्वात्पृथिवीस्थित"मित्याद्युक्तार्थंस्मारयति ॥ पृथिवीस्थितेति॥

भा० । स्वाध्यायमेवंध्यात्वायःकरोत्युपवदेन्नतं । तस्यापवदितायातित्रैलोक्यादधएवहि । नाशमाप्नोतिनिरयेतस्मादपवदेन्नतं । गच्छस्यधइतिब्रूयादन्यंब्राह्मणतस्तथा । ब्रह्मप्राप्तेर्हियोग्योयोब्राह्मणःसनचेतरइतिच । भंजनवर्जितत्वान्निर्भुजंसंहिता । तृणच्छेदनइतिधातोःप्रतृणंपदं। उभयमंतरेणक्रमः । निर्भुजमूलत्वात्पदादीनांतद्विषयप्रवादाअपिनिर्भुजप्रवादाइत्येवोच्यंते । पृथिवीस्थितपृथिवीनामकविष्ण्वायतनंपृथिव्यायतनमित्यादि ।

लोकचतुष्टयाभावादवराभ्यामुत्तराभ्यामितिकथमित्यतस्तद्घटयन्व्याचष्टे ॥ अवराभ्यामिति ॥ तस्यनास्त्युपवादइत्यस्यक्रमस्वाध्यायकर्तुर्निंदकएवनास्तीतिप्रतीतेस्तात्पर्यमाह ॥ क्रमेति ॥ तस्मा दनर्थफलत्वेनतन्निंदनस्यातिदुष्टत्वादित्यर्थः । अतिदुष्टत्वेनाभावव्यपदेशेउदाहरणमाह ॥ तंकृष्णमिति ॥ जरासंधादौकृष्णेनयुध्यतिसत्यपितेनसहयुद्धस्यानर्थफलहेतुत्वेनातिदुष्टत्वेनाभावव्यपदेशोयथातथेत्यर्थः । अथयद्येनंनिर्भुंजंवदंतमुपवददेद्च्योष्ठाइत्यादिना परउपवदेदित्यादीनांपौनरुक्त्यंपरिहरति ॥ उपवदेदित्युक्तइति ॥ कुतस्तस्यासुरत्वमित्यतःपरशब्दादित्याह ॥ सर्वेति ॥ फलभेदश्रवणाच्चनित्यसंसारितमोयोग्यलक्षणाधिक्कारिभेदेनापौनरुक्त्यमितिभावेनोभयत्रफलवाक्यंप्रमाणेनव्याचष्टे ॥ अमुक्तियोग्यैरिति ॥ रिष्यतीत्यस्यार्थोनाशयिष्यतीति । तस्यविवरणमंधेतमसीति ॥ "अथचदैत्यहतिःतमसिस्थिरानियतसंस्थितिरेवनचान्यथे"तिवचनात् । ननुपरोन्योयःकोपीत्यर्थःकिंनस्यादित्यतस्तथात्वे नातिद्युन्नेचनब्राह्मणंब्रूयादित्युपसंहारविरोधइतिभावेनतत्तात्पर्यमाह ॥ नत्विति ॥ यद्धिसंधिंविवर्तयतितन्निर्भुजस्यरूपमित्याद्युक्तंसंहितादिस्वरूपंलक्ष्यविष्णुनामनिष्ठतयादर्शयति ॥ षणयोरित्यादिना ॥ णकारंके

भा० । अवराभ्यांपृथिव्यंतरिक्षाभ्यांच्युतोसीति । उत्तराभ्यामंतरिक्षद्युभ्यां । क्रमस्वाध्यायकृद्यस्तंविशेषेणननिंदयेत् । लोकत्रयादपिभ्रष्टोयस्मात्तन्निंदकोभवेदितिच । तस्मादतिदुष्टत्वात्तन्निंदकोनास्त्येवेत्युक्तंतस्यनास्त्युपवादइति । तंकृष्णंपुंडरीकाक्षंकोनुयुध्येतबुद्धिमानित्यादिवत् । उपवदेदित्युक्तोमनुष्यमात्रः । परउपवदेदित्यसुरः । सर्वशत्रुत्वात् । अमुक्तियोग्यैस्तुनरैर्विदुषांनिंदनेकृते । ब्रूयाल्लोकच्युतोसीतिनिंदितोसुरसर्गगैः । नाशयिष्यतिविष्णुस्त्वामंधेतमसिपातयेत् । इतिब्रूयान्नतुब्रूयादेवस्वर्गात्मकंकचिदितिच । षणयोः

तान्त्रपर्णी. ३ । १ । ३ ॥ १७२ ॥

चिदुत्तरमितिप्रागुक्तेर्विष्इतिपूर्वोवर्णः णुरित्युत्तरोवर्ण इतिपक्षेषकारणकारयोःसंधिकरणात्विष्णुरितिसंहिताध्ययनंभवेत् । यथाग्निमीळइत्यत्राग्निम्इतिमकारस्यईकारस्यचसंश्लिष्टतयोच्चारणेअग्निमीळइतिसंहिताध्ययनंतथेतिभावः । योविष्णुरितिषकारणकारावसंश्लिष्टतयाब्रूयात्सपदाध्यायीभवेत् । यथाग्निम् ईलइतिमकारेकारावसंश्लिष्टतयाब्रुवन्पदाध्यायीतथेतिभावः । अत एवयच्छुद्धेअक्षरेअभिव्याहरतीत्युक्तं । असंहितादशायामितियावत् । ष्णुरित्यशुद्धं संश्लिष्टत्वात् । पदकालेमकारेकारावविषकारणकारौशुद्धौभवतइतिज्ञातव्यं । क्रमेणतुविष्णुरितिषकारणकारयोःसंध्युक्तिः णुरितिविभाग इतिद्वयंव्याप्तं तस्माद्विधावचनात् विष्णुः णुः इतिवचनात्सः क्रमाध्यायीभवेत् । अथाअग्निमीले ईलेपुरोहितमितिमकारेकारयोःसंधिं ईकारस्यविभागंचवदन्क्रमाध्यायी तथेतिभावः । ननुसंश्लिष्टयोरुत्तरमादायतदुत्तरेणसंयोजनेहिक्रमः । यथामकारेकारयोःसंश्लिष्टयोर्मध्येउत्तरईकारउत्तरपदेसंबध्यते । कथमस्यक्रमलक्षणलक्षितत्वं । उक्तंचप्रातिशाख्ये । " क्रमोद्वाभ्यामतिक्रम्यप्रत्यादायोत्तरंतयोः । उत्तरेणोपसंदध्यादथार्धर्चसमापये"दितिचेन्न । सत्यमेतद्यत्रोत्तरमस्ति । तदभावेतत्रैवपर्यवसानसंभवात् । यत्रतूत्तरमस्ति चतुर्थीविभक्त्यंतेविष्णवइत्यादौ तत्रैतेनोपसंधानमस्त्येवेतिभावेनान्नाद्यकामोनिर्भुंजंब्रूयादित्यादिव्याख्यानमिषेणविष्णवेनमइतिमंत्रेसंहितादिकंदर्शयति ॥ भोगवृद्धिमिति ॥ भोगवृद्धिं भोग्यपूर्तिं । यद्वा आनंदानुभववृद्धिं । अन्नाद्यंतद्व्यंजकमितिभावः ।

भा० । संधिकरणात्संहिताध्ययनंभवेत् । विष्णुस्त्वितियोब्रूयात्पदाध्यायीभवेतसः । संध्युक्तिश्चविभागश्चद्वयंव्याप्तंक्रमेणतु । तस्माद्विधापिवचनात्क्रमाध्यायीभवेतसः । भोगवृद्धिंचयोमोक्षइच्छेद्विष्णवइत्यसौ ।

अलंबुद्धिगोचरप्रचुरतरानंदस्यलिंगशरीरनिवृत्त्याब्रह्मप्राप्तिलक्षणमोक्षेणलाभादस्यतत्रत्यकादाचित्कभोगवृद्ध्यपेक्षयाधिकत्वात्प दाध्ययनफलत्वंबोध्यं ॥ द्वयकामइति ॥ तदुभयकामः विष्णवेइतिद्वयं उभयगर्भक्रमंवदेदित्यर्थः । एवंविष्णुनामसंहितादि विषयत्वेनेमंप्रकरणंव्याख्यायवेदसंहितादिविषयत्वेनापिव्याख्याति ॥ विष्णवति ॥ विष्णुनामात्मकत्वात् तद्व्याख्यानत्वात् । मोक्षश्चतद्भोगश्चद्वयंचेतिविग्रहः । तज्ज्ञानांसंहितादिप्रतिपाद्यभगवत्परिज्ञानिनां । नन्वपरोक्षज्ञानात्पूर्वभाव्येवंज्ञानपूर्वंसंहिता पदक्रमाध्ययनमपरोक्षद्वारामोक्षकारणं । उत्तरंत्वानंदातिशयसाधनं । तत्कथमयंभेदइतिचेन्न । प्राणस्यवस्त्रबुद्ध्यातुभोजनोभ यतःपिबन् ॥ स्वर्गेमुक्तौतदादिव्यवस्त्रभागीभवत्यलमित्यत्रपूर्वोत्तरापोशनयोर्मुख्यप्राणस्यवस्त्रबुद्ध्याकरणेमुक्तौदिव्यवस्त्रला भोक्तेस्तद्वत्प्रकृतेप्युपपत्तेः विस्तृतंचैतदस्माभिरन्यत्रेत्यलं । ब्रुवन्वाब्रुवंतंवाब्रूयादित्यादिवाशब्दार्थकथनपूर्वंव्याचष्टे ॥ संहिता व्याइत्यादिना ॥ नब्रुवंतं प्रकारांतरेणकोपविषयं । अग्रउएवेत्यत्राग्रइत्यस्यसप्तम्यंततयापदविभागमुक्त्वाव्यवहितेनैवकारणेना न्वयंचाह ॥ अग्रएवेति ॥ अग्रे उ इतिस्थिते अयादेशे लोपःशाकल्यस्येतियकारलोपेचाग्रइत्यत्राग्रेइतिपदंभवति । उकारस्तू

भा० । मोक्षकामोविषणवेद्वयकामोद्वयंवदेत् । विष्णुनामात्मकत्वाच्चाथसंहितपदक्रमाः । सर्ववेदस्थितामोक्षतद्भोगद्वयसाधकाः । तज्ज्ञा नामेवनान्येषामितिवेदानुशासनं । संहिताद्याब्रुवन्वापियएवंविन्नचाब्रुवन् । परिवादंब्रुवंतंवानब्रुवंतमथापिवा । यद्वदेतत्तथैवस्यात्क्षिप्रमेवनसं शयइतिच । अग्रएव

॥ १७३ ॥



ञ्चारणार्थः अतिशयेनाढ्यत्वमाहेतिभावेनव्याचष्टे ॥ अग्रएवेति ॥ अतिद्युम्नएवब्राह्मणंब्रूयादित्येतद्व्याचष्टे ॥ द्युम्नइति ॥ अति द्युम्नएवेत्येवकारव्यवच्छेद्यमाह ॥ नाज्ञास्थितमिति ॥ नातिद्युम्नेचनब्राह्मणंब्रूयादित्यत्र ब्राह्मणेअतिद्युम्नेचनातिद्युम्नेपिब्रा ह्मणंब्रूयादितिव्याहतं अतिद्युम्नेब्राह्मणंब्रूयादित्युक्त्वादित्यतोव्याहतिंपरिहरन्व्याचष्टे ॥ लोकच्युतोभवेति ॥ एनमतिद्युम्न मपिब्राह्मणंलोकच्युतोभवेतिशापरूपेणनब्रूयात् तर्हिकथंब्रूयादित्यतउक्तंविशदयति ॥ च्युतइति ॥ ननुनित्यसंसारिणंप्रत्यपि "ब्रूयाल्लोकच्युतोसीती"तिशिक्षारूपंवचनमुक्तं । तमोयोग्यंप्रत्यपि "नाशयिष्यतिविष्णुस्त्वा"मितितादृशंवचनमुक्तं । नतुलो कच्युतोभव तमसिपतेतिशापरूपमुक्तं । कथंताभ्यांमुक्तियोग्यस्यविशेषइतिचेन्न । नित्यसंसारिणंतमोयोग्यंचप्रतिलोकच्युतोसि विष्णुस्त्वांतमसिपातयिष्यत्येवनात्रसंदेहइतिवचनमेवशापरूपं । शापेपिस्वस्यस्वातंत्र्याभावाद्भवेत्यनुक्त्वाच्युतोसिपातयिष्यती तिपरोक्षवचनं । वैष्णवंप्रतितुभगवदाज्ञालंघनेनलोकच्युतोभवितुमर्हसि नपुनरेवंत्वयाकार्यमिति शिक्षारूपेणवचनमितिमहान् भेदइति ॥ ३ ॥ (२९) अस्यखंडस्यपूर्वखंडादपौनरुक्त्यंसंगतिश्चभाष्येस्पष्टीभविष्यति ॥ अथ निर्भुजाद्युपासकस्ययस्मिन्क

भा० । अभ्यमेवोभयमंतरेण । द्युम्नोद्युतिस्वरूपत्वाद्विष्णुरेवप्रकीर्तितः । योतिकामतितस्याज्ञामतिद्युम्नःप्रकीर्तितः । मोक्षयोग्योपिय स्त्वेवमतिद्युम्नोभवेत्पुमान् । लोकच्युतोसीत्येवंतंब्रूयान्नाज्ञास्थितंकचित् । लोकच्युतोभवेत्येनमपिनैववदेत्कचित् । च्युतोसीतितुशिक्षार्थंब्रूयान्नैवा न्यथाकचिदितिच ॥ ३ ॥ (२९)

स्मिंश्चिद्विषयेनिंदायांप्राप्तायांप्रत्युत्तरप्रकारनिरूपणानंतरं अतः प्रयोजनसद्भावात् अनुव्याहाराः आत्मनोज्ञानसामर्थ्यानुसारेणवक्तव्याः भगवदुपासनाविषयएवप्राणनिंदाप्रत्युत्तररूपवाग्व्यवहारविशेषाउच्यंते । प्राणोविष्णुर्मुख्यश्च । वंशः । उत्तराध्यायेप्राणोवंशइतिस्थविरःशाकल्यइतिवक्ष्यमाणप्रकारेणसर्वेषामिंद्रियदेवानामाधारस्तथाविष्णुनामादिसर्वविद्यास्थानामूष्माद्यक्षराणामाधारभूतप्राणास्थिमज्जादिमानितिचविद्यात् उपासीतसयो यःकश्चित्प्राणंवंशंप्रति तदुपासकमेनं त्वदुपासनंतत्प्रीतिजननायनालमित्युपवदेन्निंदेत । सउपासकःशक्नुवन् समर्थोहमित्यात्मानंचेन्मन्येत ज्ञानसामर्थ्ययुक्तमात्मानंयदिमन्येत । देवादिश्चेदितियावत् तर्ह्येवंब्रूयादहंप्राणंवंशंसमधां संधितवानुपासितवानस्मि । प्राणंवंशंसंदधतंमांनशक्नोषीत्याह आत्थ त्वं तस्माद्वंशःप्राणस्त्वाहास्यतीत्येनंब्रूयात् । चेद्यदि । आत्मानमशक्नुवंतमल्पज्ञानसामर्थ्ययुक्तंमन्येत गंधर्वपित्रादिश्चेदितियावत् । अथ तर्ह्यात्मानमुपवदंतं त्वमुपासनायांनसमर्थः तयाभगवत्प्रीतिश्चनभवतीत्यतउपासनोद्योगोव्यर्थइतिनिंदंतं एवंब्रूयात् प्राणंवंशं समधित्सिषंतं सर्वाधारंप्राणमुपासितुमिच्छंतं तत्प्रीत्याचसंधितुमिच्छंतंमां संधातुंत्वंनाशकः उपासनादौनशक्नोषीतिवचनेनमदुपासनाविघटनोद्योगान्ममप्रीतिंकर्तुंनाशकः । अतोभक्तप्रियोवंशः प्राण स्त्वा हास्यतीत्येनंब्रूयादित्यर्थः । यथातुकथाचेत्यादि

उप० । अथातोनुव्याहाराःप्राणोवंशइतिविद्यात्सयएनंप्राणंवंशमुपवदेच्छक्नुवंश्चेन्मन्येतप्राणंवंशंसमधां ३ प्राणंमावंशंसंदधतंनशक्नोषीत्याहप्राणस्त्वावंशोहास्यतीत्येनंब्रूयादथचेदशक्नुवंतंमन्येतप्राणंवंशंसमधित्सिषंतंनाशकःसंधातुंप्राणस्त्वावंशोहास्यतीत्येनंब्रूयाद्यथातुकथाचब्रुवन्वाब्रुवंतंवाब्रूयादभ्याशमेवयत्तथास्यान्नत्वेवान्यत्कुशलाद्ब्राह्मणंब्रूयादतिद्युम्नएवब्राह्मणंब्रूयान्नातिद्युम्नेचनब्राह्मणंब्रूयान्नमोअस्तुब्राह्मणेभ्यइतिहस्माहशूर

पूर्ववद्व्याख्येयं ॥ ७ ॥ अथातइत्यत्रपूर्वखंडादस्यखंडस्यविषयविभेदसूचकस्याथशब्दस्यतात्पर्यमाह ॥ भगवदुपासकस्येति॥ यस्मिन्कस्मिंश्चि द्विषये उपासनातिरिक्तविषयइत्यर्थः । पृथिवींदेवतामारइत्यादिनासंहितादिप्रतिपाद्यभगवन्निंदनोक्तिस्तुविषयांतरेपिस्वनिंदनस्यतदप्रियत्वात्तन्निंदनमेवेतिवा निर्भुजादिप्रवचनकालेयत्रकुत्रचिद्विषयेचेन्निंदाप्रागुक्ताकथंतर्हिनिर्भुजंवदंतमुपवदेदित्याद्युक्तिरित्यतआह ॥ निर्भुजमितीतिवाप्रवृत्तेत्यविरोधः । अशक्त्यादीत्यादिपदेनोपासनंतत्प्रीतिकरंनभवतीत्यस्य ग्रहणं । ननुयस्मिन्कस्मिंश्चिद्विषयेचेन्निंदाप्रागुक्ताकथंतर्हिनिर्भुजंवदंतमुपवदेदित्याद्युक्तिरित्यतआह ॥ निर्भुजमिति ॥ अवस्थामात्रप्रदर्शनं नतुनिंदायानिर्भुजादिविषयत्वप्रदर्शनमित्यर्थः । अवस्थायाअप्रदर्शनेभगवन्निंदनापर्यवसानादितिभावः। अनुव्याहारशब्दार्थमाह ॥ आत्मनइति ॥ प्राणवंशशब्दयोरन्यथार्थवारयन्नतःशब्दसूचितमुपासकस्यफलंप्रमाणेनदर्शयन्व्याख्याति ॥ सर्वेत्यादिना ॥ विष्णुनावायुनाचसहितं विष्णुंवायुंचोपासीनमपिमामितियावत् । नशक्नोषि तत्प्रीतिसंपाद

उप० । वीरोमांडूकेयः ॥ ४ ॥ (३०)

भा० । भगवदुपासकस्ययस्मिन्कस्मिंश्चिद्दोषउक्तेतंप्रत्युक्तिप्रकारःपूर्वदर्शितः । अनुव्याहारशब्देनभगवदुपासनाविषयएवास्माशक्त्यादिकंवदतःप्रत्युक्तिरुच्यतेनिर्भुजंवदंतमित्यादित्ववस्थामात्रदर्शनं । आत्मनोज्ञानसामर्थ्यानुसारेणवक्तव्यत्वादनुव्याहारः । सर्वाधारत्वतोवंशइत्युपासीतयोहरिं । वायुंचमुक्तिमाप्नोतियएवंतदुपासकं । निंदेतविष्णुविज्ञानविशेषेतंवदेतसः । विष्णुनावंशभूतेनवायुनासहितंतथा ॥ नशक्नोषीतिमामात्थहास्यतस्त्वामतोहितौ ।

नेनशक्नोषीत्यात्येत्यर्थः । शक्नुवंश्चेन्मन्येतेत्यस्यार्थोज्ञानसामर्थ्येति ॥ देवादिरित्यादिपदेनाजानजांतानामंशविभागयोग्यानांग्रहणं । अथचेदशक्नुवन्नित्यादेरर्थः अन्यइति ॥ तदवरदेवगंधर्वपित्रादिरल्पज्ञानसामर्थ्योपेतःसोपिब्रूयात् किमिति विष्णुवायुभ्यांसंधिमिच्छंतंमामुपासनायांतत्प्रीतिसंपादनेपिनशक्नोषीत्यात्थ अतोमांसंधातुंनाशकोयतोतस्तौत्वांहास्यतइतियोज्यं । ननुप्राणंवंशमुपवदेदित्युपनिषदः "उपासकं । निंदेते" तिकथंप्रमाणेनव्याख्यानमित्यतस्तद्घटयति ॥ यएनमिति ॥ प्राणमित्युद्देश्यद्वितीया । प्राणंप्रतिविद्यमानमेनमित्यस्यतात्पर्यमुपासकमिति ॥ प्राणंप्रत्युपासकस्यपरकृतउपवादःकिंरूपइत्यतआह ॥ प्राणस्येति ॥ अनयोपासनयातवविष्णुप्रियत्वंनलभ्यते त्वदुपासनंतत्प्रीतिजनकंनभविष्यतीत्युपवदेदित्यन्वयः । नाशकःसंधातुनित्यस्य त्वयासंधिमिच्छंतंप्राणंतंसंधातुंनाशकइत्यन्यथाप्रतीतेर्व्याचष्टे ॥ नाशकइति ॥ तस्यैवविवरणं ममेति ॥ उपासकस्यप्रीत्यकरणमात्रेणकथंप्राणप्रहापणमित्यतस्तत्रप्रमाणमाह ॥ तद्भक्तेति ॥ तद्भक्तोदेदेवादिस्तद्भक्तोगंधर्वादिः ॥ ४ ॥ (३०) पूर्ववराहादीनांपृथिव्यादिपरिच्छिन्नाधिकरणवर्तित्वमुक्तं अधुनापूर्वोत्तरवर्णलक्षणव्याप्ताधिष्ठानत्वमु

भा० । ज्ञानसामर्थ्यवानित्थंब्रूयादेवादिरुत्तमः । अन्योगंधर्वपित्रादिरल्पज्ञानबलोहियः । सब्रूयाद्विष्णुवायुभ्यांसंधिमिच्छंतमेवमां । संधातुंनाशकोयस्माद्वास्यतस्त्वामतोहितावितिच । सयएनंप्राणंवंशमुपवदेत्प्राणंप्रत्येनमुपासकमुपवदेत् । प्राणस्यविष्णोःप्रियत्वंतवनप्राप्स्यतीति । नाशकःसंधातुंमयासहसंधानंकर्तुनाशकः । ममप्रीतिंकर्तुनाशकः । तद्भक्तभक्तेष्वपियोनकुर्यात्प्रीतिमंजसा । विष्णुर्जहातितंपापमिहचामुत्रचप्रभुरितिचभारते ॥ ४ ॥ (३०)

च्यते ॥ अथेति ॥ परिच्छिन्नाधिष्ठानकभगवद्विद्यातोवैलक्षण्यमस्याविद्यायाःसूचयति ॥ निर्भुजवक्राइति ॥ बहुवचनमाद्यर्थे । निर्भुजवक्राःकेचिदृषयःपक्षांतरमाहुःखलु । पूर्वमक्षरं पूर्वाक्षरस्थितंपूर्वाक्षरनामकंवराहाख्यंरूपं । पूर्वरूपं पूर्ववर्णप्रतिपाद्यं । उत्तरं उत्तराक्षरस्थितंतन्नामकवामनरूपं उत्तररूपं उत्तरवर्णप्रतिपाद्यं । पूर्वोत्तररूपे पूर्वोत्तराक्षरयो रंतरेण मध्ये योवकाशः अवनात्काशनादवकाशनामानृसिंह्योस्ति सासंहिता संहिताप्रतिपाद्येत्याहुरितिपूर्वेणान्वयः । सयएवमेतामितिफलवाक्यमुक्तार्थं । अथह्स्वोमांडूकेयः निर्भुजवक्राइतिसंबोध्य इतिवयंब्रूमइतिहस्माह । किंब्रवीषीत्येतदुच्यते ॥ पूर्वमिति ॥ पूर्वमेवाक्षरंपूर्वरूपमुत्तरमुत्तररूपंनात्रविवादः । पूर्वोत्तररूपेअंतरेण मध्ये योवकाशोनृसिंहउक्तः तत्स्थानेसादेवतासंहिताप्रतिपाद्यातिष्ठति । कासादेवतेत्यतोव्यासइतिलक्षणमुखेनोच्यते ॥ येनेति ॥ येन व्यासेन तदनुग्रहेण पूर्वोत्तरवर्णयोःसंधिं विशेषेणवर्तयति उच्चरति । येनचात्रायमुदात्तएवस्वरोन्योविस्वरइतिविजानाति येनचात्रदीर्घोमात्रानह्स्वइतिमात्राऽमात्रां विभजते सासंहितेतिब्रूमइत्यन्वयः । अथह्स्वमांडूकेयस्यप्रातिबोध्यांजातोमध्यमःपुत्रआह । किमिति । इमेपूर्वोत्तरेअक्षरे

उप० । अथखल्वाहुनिर्भुजवक्राःपूर्वमक्षरंपूर्वरूपंउत्तरमुत्तररूपंयोवकाशःपूर्वरूपोत्तररूपेअंतरेणसासंहितेतिसयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेत्यथवयंब्रूमोनिर्भुजवक्राइतिहस्माह ह्स्वोमांडूकेयःपूर्वमेवाक्षरंपूर्वरूपमुत्तरमुत्तररूपंयोवकाशःपूर्वरूपोत्तररूपेअंतरेणयेनसंधिंविवर्तयतियेनस्वरास्वरंविजानातियेनमात्रामात्रांविभजतेसासंहितेतिसयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेत्यथहास्यपुत्रआहमध्यमःप्रातीबोधीपुत्रोक्षरे

वराहवामनयोरधिष्ठानभूते वाक्पूर्वरूपंमनउत्तररूपंमनःपूर्वरूपंवागुत्तररूपमितिमतयोरिवाविकर्षन् । पूर्वोत्तरवर्णदेवतयोरेकत्वमप्यचिंतयन्यथावर्णंयथोच्चरितयोर्वर्णयोर्मध्येस्थितंसंधिप्रतिपाद्यमन्यमाह । किमिति । तद्यासौमात्रा यासामापयतित्राय तिचेतिमात्रानाम्नी पूर्वोत्तररूपे पूर्वोत्तराक्षररूपे पूर्वोत्तराक्षरयोरंतरेण मध्ये संधिर्विज्ञापिनीज्ञापयित्रीयस्याःसासंधिविज्ञापिनी तत्साम । समत्वात् श्वेतद्वीपेसर्वैर्मुक्तैःप्राप्यत्वेनवा समत्वात्सामनामकंवासुदेवाख्यंभवति प्रमाणप्रमितंभवति । अतो हंसामैव सामनामकंवासुदेवमेव संहितां संहिताप्रतिपाद्यांदेवतांमन्यइत्यर्थः । तदप्येतदृषिणोक्तं वासुदेवस्यसामनामकत्वंतस्यसंहिताप्रतिपाद्यत्वंचऋषिणोक्तं । बृहस्पते बृहतोवेदस्यपतेवायो साम्नोवासुदेवात्परः परं येनविदुः तेभ्योब्रूहीतिविद्यादेव ताप्रार्थनं । सयएवमेतांसंहितांवेदेत्यादिपूर्ववत् ॥ ५ ॥ (३१) पूर्ववर्णप्रतिपाद्यस्यपूर्ववर्णप्रतिपाद्यत्वंसिद्धमेवकिमनूद्यविधीयतइत्यतःपूर्वमक्षरमित्यादेस्तत्प्रतिपाद्यमितिनार्थः किंतुतदधिष्ठानकमेवतत्प्रतिपाद्यंनत्वधिष्ठानांतरंमृग्यमितितदर्थइतिभावेनाह ॥ पूर्ववर्णेत्यादिना ॥ पूर्वोत्तररूपेअंतरेणेत्यस्यार्थो वर्णयोरंतरस्थितमिति ॥ योवकाशइत्यस्यावनादिति ।

उप० । खल्विमेअविकर्षन्ननेकीकुर्वन्यथावर्णमाहतद्यासौमात्रापूर्वरूपोत्तररूपेअंतरेणसंधिविज्ञपनीसामतद्भवतिसामैवाहंसंहितांमन्यइतितदप्येदृषिणोक्तंबृहस्पतेनपरःसाम्नोविदुरितिसयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेति॥५(३१)

भा० । पूर्ववर्णस्थितंयत्तद्रूपंपूर्वाक्षराभिधं । वराहाख्यंहरेरन्यवर्णगंवामनाभिधं । उत्तराक्षरसंज्ञंचवर्णयोरंतरस्थितं । अवनात्काशना चैतदवकाशाभिधंहरेः । नृसिंहरूपमित्याहुर्

निर्भुजास्याः निर्भुजवक्राः । अथवयमित्यादेरर्थस्तथावदत्यादि ॥ मात्रासंधिस्वरात्मकः मात्रासंधिस्वरविषयः । व्यासांतर व्यावृत्त्यर्थंसाक्षाद्व्यासरूपीहरिरित्युक्तं । सामशब्दंव्याचष्टे ॥ सामोच्चारणकारणः ॥ सामनामेति ॥ मात्राशब्दंनिर्वक्ति ॥ मापयतीति ॥ यथावर्णमाहेत्येतद्व्याचष्टे ॥ यथोच्चारितेति ॥ भगवानित्यनुवर्तते । एतेनयथोच्चारितवर्णयोर्मध्यस्थितंसंधिप्रतिपाद्यंभगवद्रूपमन्यदाहेत्यर्थउक्तोभवति । बृहस्पतेनःपरःसाम्नइत्येतद्व्याख्यातुमादितःपठति ॥ मानइत्यादिना ॥ यद्यपिद्वितीयाष्टकेषष्ठेध्याये मानस्तेनेभ्योयेअभिद्रुहस्पदेनिरामिणोरिपवोन्नेषुजागृधुः ॥ आदेवानामोहतेविव्रयोहृदिबृहस्पतेन परःसाम्नोविदुरित्येवपठ्यते । नतुयेषांनैतदित्यादि । तथाप्युपवेदगतसूक्तेयेषांनैतदित्यादेःपठितत्वादर्थानुगुण्यायतस्यात्रोदाहरणंबोध्यं । तदुक्तमृग्भाष्ये । "मानस्तेनेतिपूर्वासुह्यूनतादृश्यतेऽर्थत" इति । ब्रह्मणोवेदस्यपतेवायो येऽभिद्रुहस्पदे अभितोद्रोहस्थनित्यदुःखस्यास्पदेधेतमसिस्थातुंयोग्याः निरामिणः पूर्णानंदस्वरूपोभगवान्स्वामीतिज्ञानंयेषामस्तितेरामिणः तेभ्यो निर्गताबहिर्भूतानिरामिणः । ऐक्यज्ञानेनतन्नीचताविदइतियावत्। ततएवतस्यरिपवः । अन्नेषु भोग्येषु जागृधुः । गृधुआकांक्षायां । भोगेष्वाकाक्षावंतः । येषामेतत्सर्वोत्तमंब्रह्मनास्तीतिपक्षः कुतस्तदीशितव्यंकिंचनकिंमपिजगन्नास्ति किंतर्हि किंचनैकं नि

भा० । निर्भुजास्यास्तथावदत् । ह्रस्वोयेनाक्षरोच्चारोमात्रासंधिस्वरात्मकः । व्यासरूपोहरिःसाक्षात्संहितानामकस्त्विति । तत्पुत्रोमध्यमःप्राहसामोच्चारणकारणः । सामनामावासुदेवःसंहितानामवानितीतिच । मापयतित्रायतिचेतिमात्राभगवान् । यथोच्चारितवर्णयोर्मध्यस्थितश्च । मानस्तेनेभ्योयेअभिद्रुहस्पदेनिरामिणोरिपवोन्नेषुजागृधुः । येषांनैतन्नापरंकिंचनैकं

र्गुणमेववस्त्वस्ति । भासमानंचापरंजगत्किंचन अनिर्वाच्यं तेभ्यस्तेनेभ्योस्मान्माब्रूहि । अथो किन्नाम । बृहस्पते बृह तोवेदस्यपतेवायो । धर्मिणो निवृत्तधर्मवंतोयेमनुष्याः शमेन विष्णुनिष्ठयोपरतास्तस्मिन्नेवरताः साम्नो विष्णोःपरंकिमपिन विदुः । किंत्वेतदेवदेवानांव्रयः वरत्वेसतिनियामकंब्रह्म हृद्याव्योहते सम्यग्वहंति ध्यायंतीतियावत् । तेभ्योनःसदाब्रूहीति श्रुत्यर्थसप्रमाणमाह ॥ अभिद्रुहइत्यादिना ॥ अभिद्रुहइत्यस्यार्थोऽभितोद्रोहस्येति ॥ तस्यविवरणं नित्येति ॥ विष्णुवै ष्णवद्रोहसाध्यत्वात् द्रोहपदेनदुःखमुच्यते । "यद्वापंचकष्टेतिकष्ट" इत्युक्तरीत्यापंचेंद्रियपीडासाध्यत्वाद्दुःखमुच्यतइति भावः । अभितोद्रोहस्यपदेआश्रयेतमसिस्थातुंयोग्याइत्यस्यतात्पर्यमंधतमसस्ययोग्याइति ॥ अत्रपूर्वस्यामृच्यैकात्म्यज्ञानि नांकामोपहतचेतसांब्रह्मणोनिर्गुणत्वज्ञानिनांस्तेनत्वंतमश्चफलमुक्तं कस्यस्तेनास्तइत्यतःशास्त्रस्यब्रह्मणश्चेतिभावेनप्रमाणमाह ॥ ऐकात्म्यमिति ॥ एकश्चासावात्माचैकात्मातस्यभावऐकात्म्यं सर्वात्मनांब्रह्मैक्यमितियावत् । यदैकात्म्यंनामेदमनैपुणा अविद्यमाननैपुणाः केचिद्ब्रूयुस्तेषांतथावचनेकिंमूलमित्यतउक्तं शास्त्रेति ॥ केवलमहंब्रह्मास्मीत्यादिशास्त्राणांतत्वमभिप्रेतमर्थ मविज्ञायब्रूयुः । कथमविज्ञानमात्रेणतदुक्तिरित्यतउक्तंतथेति ॥ ऐक्यप्रतिपादकसदृशोनयोवादएकविभक्तित्वादिरूपःसबलं

भा० । ब्रह्मणस्पतेब्रूहितेभ्यःकदाचित् । अथोशमेनोपरतामनुष्यायेधर्मिणोब्रूहितेभ्यःसदानः । आदेवानामोहतेवित्रयोहृदिबृहस्पतेन परःसाम्नोविदुः । अभिद्रुहस्पदेअभितोद्रोहस्यनित्यनिरतिशयदुःखस्यांधतमसस्ययोग्याः । ऐकात्म्यंनामयदिदंकेचिद्ब्रूयुरनैपुणाः । शास्त्रतत्वम विज्ञायतथावादबलाजनाः ।

येषांतेतथोक्ताः । अहंब्रह्मास्मीत्यादिवाक्यानांतात्पर्यमविज्ञायापातप्रतीतएवार्थेभ्रांताइत्यर्थः । सर्वेषामविद्यमानंशास्त्रतत्वाप रिज्ञानादितेषामेवकिंनिमित्तमित्येतदुक्तं कामेति ॥ यथोक्तं "इच्छाद्वेषसमुत्थेनद्वंद्वमोहेने" ति । ननु "द्वासुपर्णासयुजे" त्यादिशास्त्रेषुविरोधिषुसत्सुकथमैक्यंब्रूयुरित्यतआह ॥ याथातथ्यमिति ॥ भेदपराणांयाथार्थ्यमविज्ञाय शास्त्रदस्यव स्ता निशास्त्राण्यतत्वावेदकानीतिमन्यमानाइत्यर्थः । एवमैक्यंमन्यमानानांब्रह्मस्तेनानांकामादीनामागंतुकत्वान्मूलकारणमाह ॥ निरानंदाइत्यादि ॥ एतेनाधमानांस्वरूपयोग्यतांलक्षयति । तथापिसर्वज्ञत्वादिविरुद्धधर्माधिकरणत्वानुमानविरुद्धमैक्यंक थंब्रूयुरित्यतआह ॥ वैगुण्यमेवेति ॥ जीवब्रह्मणोस्तत्वतोनिर्गुणत्वमेवपश्यंतो गुणानि गुणान् । सार्वज्ञादीन्ननियुंजते त त्स्वरूपेणनयोजयंति । एवंभूतानांफलमाह ॥ तेषामिति ॥ तमोगुणप्रचुरशरीराणां । तमो नरकविशेषः । परायणंप्राप्यमि तिमोक्षधर्मेसमाख्यारूपभगवद्वचनात् एवंविधाएव शास्त्रप्रामाण्यब्रह्मगुणापलापकाएवात्रविवक्षिताःस्तेनाः । तमएवपराय णमित्युक्ताएवाभिद्रुहस्पदस्थाः । ऐकात्म्यंब्रूयुरित्युक्तविधाएवनिरामिणश्च । तत्कथमित्यतोव्याचष्टे ॥ निरामिणइति ॥ एतेनरामएषामस्तीतिरामिणोमोक्षयोग्याभगवत्सर्वोत्तमत्वविदस्तेभ्योनिर्गताबहिर्भूताभगवतोजीवैक्यज्ञाननेननीचताविदोनिरा

भा० । कामक्रोधाभिभूतत्वादहंकारवशंगताः । याथातथ्यमविज्ञायशास्त्राणांशास्त्रदस्यवः । ब्रह्मस्तेनानिरानंदाअपक्रमनसोशिवाः । वैगुण्यमेवपश्यंतिनगुणानिनियुंजते । तेषांतमःशरीराणांतमएवपरायणमितिमोक्षधर्मेभगवद्वचनादेवंविधाएवस्तेनाः । अभिद्रुहस्पदस्थाश्च । निरामिणःरामस्यरमणरूपस्यपूर्णानंदस्वरूपस्याविष्णोर्जीवस्वरूपताज्ञानेननीचताविदः ।

मिणइत्यर्थउक्तोभवति । रामविरुद्धानिरामिणइतितत्वप्रकाशिकावाक्यमपितात्पर्यकथनपरमित्यविरोधः ॥ निरानंदाअपक्व मनसोशिवाइत्युक्तास्तेऽसुरप्रकृतयएवात्रविवक्षितारिपवः । ननुविरोधिनोहिरिपवः । कथमेतेरिपवइत्यतश्चोक्तं तएवेति ॥ नीचताविदएवेत्यर्थः । द्वेषोऽवमताबुद्धिरित्यन्यत्रोक्त्वादितिज्ञेयं । अवमंतॄणामसुरप्रकृतित्वेप्रमाणमाह ॥ अवजानंतीति ॥ इत्यादिवचनादवज्ञानादिविशिष्टाअसुरादयएवरिपवइत्यर्थः । कामक्रोधाभिभूतत्वादित्युक्ताःकामग्रस्ताएवान्नेषुजागृधुरित्युक्ता इतिभावेनानूद्यव्याचष्टे ॥ अन्नेष्विति ॥ अन्नशब्देनभोग्यमात्रमुच्यतइतिभावेनोक्तं भोगमात्रेति ॥ मात्रशब्दःसाकल्यार्थः । यद्वानतुज्ञानभक्त्यादिकमित्यवधारणार्थमात्रपदं । नगुणानिनियुंजतइत्युक्ताएवयेषांनैतदित्यादावुक्ताइतिभावेन व्याचष्टे ॥ येषामिति ॥ निर्गुणव्यावृत्त्यर्थंसर्वेभ्यःसर्वैर्गुणैरुत्तमंवासुदेवाख्यमित्युक्तं । कुतोनास्तीत्यतस्तद्धेतुतयानापरमित्येतद्व्याचष्टे ॥ ईशितव्यइति ॥ ईशितव्येविद्यमानेहीश्वरोभवति । नचापरमीशितव्यंकिंचिदितिहेतोःसर्वोत्तमंनास्तीतियोजना । ईशितव्यस्वरूपस्यैवमिथ्यात्वादितिभावः । उत्तमाभावंहेतुत्वेनोपादायाधमाभावंप्राहुरित्याह ॥ नचापरंकिंचित्परमापेक्षयाह्यपरमितीति ॥ वैगुण्यमेवपश्यंतीत्युक्तमेवकिंचनैकमित्यनेनोच्यतइतिभावेनावतार्यव्याचष्टे ॥ किंतर्हीति ॥

भा० । तएवरिपवश्चतस्य । अवजानंतिमांमूढामानुषींतनुमाश्रितं । परंभावमजानंतोममभूतमहेश्वरं । मोघाशामोघकर्माणोमोघज्ञानाविचेतसः । राक्षसीमासुरींचैवप्रकृतिंमोहिनींश्रिताइत्यादिवचनादसुरादयः । अन्नेषुजागृधुःभोगमात्रगृध्नवः । येषामेतत्सर्वोत्तमंवासुदेवाख्यंपरंब्रह्मनास्तीतिपक्षः । ईशितव्येविद्यमानेहीश्वरोभवतीति । नचापरंकिंचित्परमापेक्षयाह्यपरमिति । किंतर्हिकिंचनैकंकिमप्येकमेववस्त्वस्ति

किमपिनिर्गुणमित्यर्थः । एवकारव्यावर्त्यमाह ॥ नपरामिति ॥ परंसर्वोत्तमंसगुणंवासुदेवाख्यं अपरमीशितव्यंचनास्ति । ईशेशितव्यरूपप्रपंचस्यमिथ्यात्वादितिभावः । तेषामयंपक्षइत्यत्रप्रमाणमाह ॥ असत्यमिति ॥ अप्रतिष्ठं प्रतिष्ठापकप्रमाणरहितं । प्रत्युतज्ञानबाध्यं । ईश्वराधिष्ठितायाःप्रकृतेर्महान्महतोहंकारइतिपरस्परसंभवरहितं । सत्यंनचेत्किं अन्यत् । सदसद्व्यामितिशेषः । परस्परसंभूतंनचेत्किं कामहैतुकं । कामइतिकार्येणकारणमविद्योपलक्ष्यते । तद्धेतुकं । नष्टात्मानो दुष्टचित्ताः । अल्पबुद्धयः अधिष्ठानमात्रेयथार्थबुद्धयः । येषांपक्षेएकमेववस्त्वित्येतत्प्रमापणायेश्वरोहमित्येतदुदाहरणं । वायुर्ब्रह्मणस्पतिरित्यत्रप्रमाणमाह ॥ अथहेममिति ॥ आसन्यं आस्येभवं । तेभ्योब्रूहीत्यस्यतेभ्यःस्तेनेभ्योमाब्रूहीतिपूर्वार्धेनान्वयइत्याह ॥ एतादृशेभ्यइति ॥ रिपवोद्वेषिणइत्यस्यविरोधिभूतंशमेनोपरताइत्येतद्व्याचष्टे ॥ शमेनेति ॥ येषामेतत्सर्वोत्तमंवासुदेवाख्यं ब्रह्मनास्तीत्यस्यविरोधितया साम्नोनपरः देवानांत्रय इत्येतद्व्याचष्टे ॥ साम्नइत्यादिना ॥ अधिकरणस्यापिकारणत्वेनहृदीत्यस्यहृदेत्यर्थकथनं । अतएवतत्वप्रकाशिकायांहृदिवहंतीतिव्याख्यातं । त्रयइत्यस्यपरतममितितात्पर्यमुक्तं अक्षरार्थमाह ॥

भा० । नपरमपरंचेतितेषांपक्षः । असत्यमप्रतिष्ठंतेजगदाहुरनीश्वरं । अपरस्परसंभूतंकिमन्यत्कामहैतुकं । एतांदृष्टिमवष्टभ्यनष्टात्मानोल्पबुद्धयः । प्रभवंत्युग्रकर्माणःक्षयायजगतोऽहिताः । ईश्वरोहमहंभोगीसिद्धोहंबलवान्सुखीत्यादिवचनात् । ब्रह्मणस्पतेब्रह्मणोवेदस्यपतेवायो । अथहेममासन्यंप्राणमूचुः । एषउएवब्रह्मणस्पतिर्वाग्वैब्रह्मतस्याएषपतिस्तस्मादुब्रह्मणस्पतिरित्यादिश्रुतेरेतादृशेभ्योमाब्रूहि । शमेनविष्णुनिष्ठयाउपसमीपेतस्मिन्नेवरताः । साम्नोविष्णोःपरंकिमपिनविदुः । तदेवदेवानांत्रयः । सर्वेदेवानांपरतमंविष्ण्वाख्यंब्रह्महृदाव्योहते ।

वासुदेवादिरूपेणेति ॥ येशमादियुतास्तेभ्योनब्रूहीत्यन्वयभ्रमंवारयितुमन्वयमाह ॥ तेभ्योब्रूहीति ॥ साम्नःपरंनविदुरिति नञोन्वस्योक्तत्वादितिभावः । स्तेनेभ्योमाब्रूहि वैष्णवेभ्योब्रूहीत्यन्वयद्वयेप्रमाणमाह ॥ वायुमिति ॥ सर्वासांविद्यानांप्रसिद्धंवासुदेवादिपदमपहाय सामैवाहंसंहितांमन्यइत्युक्तेरभिप्रायंप्रमाणेनाह ॥ सामनाम्नेति ॥ यतस्तन्नाम सामनाम । संहितार्थं संहिताशब्दार्थं । वदेत् । अतइह भगवन्नाममध्ये । तन्नामविष्णोःप्रियं । यस्मात्प्रियं ततः सामनाम्नाश्रुतिर्विष्णुमाहेति योजना ॥ इतिवचनादिति ॥ इतिवचनात्सामनाम्नःसंहिताशब्दार्थत्वा त्संहिताशब्दार्थत्वावगमाद्विष्णोस्तस्यनाम्नःश्रुतिसिद्धत्वा च्छ्रुतिसिद्धत्वावगमाच्च । तद्रूपंसंहितानामकमित्यन्वयः । तथापिरूपांतरपरित्यागेनवासुदेवरूपंसामनामकमितिनिर्बंधेकोविशेषहेतुरित्यतस्तत्राभिप्रेतांयुक्तिमाह ॥ सामनाम्नइति ॥ ५ ॥ (३१) एवंभगवद्रूपयोरेवपूर्वोत्तरवर्णसंधिदेवतात्वमुक्त्वादेवतांतरसाहित्येनापितदुच्यतेस्मिन्खंडे ॥ पूर्वोत्तरवर्णदेवतयोर्बृहद्रथंतरयो र्लक्ष्मीनारायणयोः । रूपेण रूपाभ्यां । संहिता संहितानामकरूपमर्धनारीनराकारंलक्ष्मीनारायणरूपं । संधीयते तदेवसंहिताप्रतिपाद्यमितितार्क्ष्यआह । रथंतरस्य

भा० । वासुदेवादिरूपेणवरंनियामकंचेतित्रयः । तेभ्योब्रूहि । वायुंविद्याःसमासाद्यसर्वासांपतिमूचिरे । स्तेनेभ्योमैवनोब्रूहिब्रह्मथोवैष्णवेषुचेतिच । सामनाम्नाश्रुतिर्यस्माद्विष्णुमाहतत:प्रियं । तन्नामविष्णोरिहतुसंहितार्थंवदेद्यतइतिच । सामनाम्नःसंहिताशब्दार्थत्वाद्विष्णोस्तस्यनाम्नःश्रुतिसिद्धत्वाच्चसामनाम्नोवासुदेवरूपसमाख्यासुपंचरात्रेपठितत्वाच्चतद्रूपंसंहितानामकमितियुक्तमित्यभिप्रायः ॥ ५ ॥ (३१)

॥ १७९ ॥

उप० । बृहद्रथंतरयोरूपेणसंहितासंधीयतइतितार्क्ष्यो

रथंतरसामप्रतिपाद्यायारथंतरनाम्न्यालक्ष्म्याःस्वरूपं । वाग्वै वेदात्मकत्वाद्वाङ्नामकंवाचिस्थितंवै बृहतो बृहत्सामप्रतिपाद्यस्यपूर्णत्वाद्बृहन्नामकस्यनारायणस्यस्वरूपं । प्राणः प्रणेतृत्वात्प्राणनामकंप्राणेस्थितं । वाचाचप्राणेनचेत्युभाभ्यांवाक्प्राणस्थाभ्यांलक्ष्मीनारायणाभ्यां । उ एव । संहितासंधीयतइतिखलु प्रसिद्धंवै । बहुशुश्रूषासाध्यत्वादतीवेयंविद्यारहस्येतिभावेनोच्यते ॥ एतस्यामिति ॥ एतस्यामुपनिषदि रहस्यविद्यायां । तादर्थ्येसप्तमी । एतद्विद्यालाभार्थंतार्क्ष्यःसंवत्सरंगुरोर्गारक्षयतेहस्म । एतावन्मात्रविद्यार्थंकथंसंवत्सरकालंगोरक्षणमित्यतोस्याएवपरमगोप्यत्वादेतल्लाभार्थमेवेत्यवधारणेनोच्यते ॥ एतस्यामिति ॥ एतस्यांमात्रायां एतावन्मात्रविद्यालाभार्थं । तदेत लक्ष्मीनारायणयोरथंतरबृहच्छब्दवाच्यत्वं । ऋषिणाप्युक्तं । वसिष्ठोरथंतरमाजभार आजहार । भरद्वाजोऽग्नेश्चतुर्मूर्तेर्बृहदाचक्रे आह्वयामासेति । सयएवमित्यादेरुक्तोर्थः । संहितादेवतावह्नयइतिमतांतरमुच्यते ॥ वाक्प्राणेनेति ॥ कौठरव्यः कुंठरव्यस्यापत्यंपुमान् । वाग्रमा । प्राणेनाच्युतेनमिलितैकासंहितादेवता । प्राणो हरिः । पवमानेन वायुना । मिलितोद्वितीयासंहिता । पवमानोविश्वैः सर्वैर्देवैर्मिलितस्तृतीयासंहिता ।

उप० । वाग्वैरथंतरस्यरूपंप्राणोबृहतउभाभ्यामुखलुसंहितासंधीयतेवाचाचप्राणेनचैतस्यांहस्मोपनिषदिसंवत्सरंगारक्षयतेतार्क्ष्यएतस्यांहस्ममात्रायांसंवत्सरंगारक्षयतेतार्क्ष्यस्तदप्येतदृषिणोक्तंरथंतरमाजभारवसिष्ठःभरद्वाजोबृहदाचक्रेअग्नेरितिसयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेति । वाक्प्राणेनसंहितेतिकौठरव्यःप्राणःपवमानेनपवमानोविश्वैर्देवैर्विश्वेदेवाःस्वर्गेणलोकेन

विश्वेदेवाःस्वर्गेणलोकेनशिवेन मिलिताचतुर्थीसंहिता । स्वर्गोलोकःशिवः ब्रह्मणा चतुर्मुखेनमिलितःपंचमीसंहितेत्याहेत्यन्वयः । सैषासंहिताऽवरपरा अवरपरयोर्मेलनात् । वामभागगपङ्क्तौक्रमेणावरपरभावस्यविद्यमानत्वाद्वा अवरादिपरांतत्वाद्वाऽवरपरनाम्नी । सयोह प्रसिद्धोयएतामवरपरांसंहितांवेदसः । यथैषापंचविधसंहितासंधिता एवंहैव एवमेवखलु । प्रजादिभिः संधीयतइत्यर्थः । पठतोप्यभीष्टंभवतिकिमुपासकस्येतिभावेनोच्यते ॥ सयदीत्यादिना ॥ सउपासकःपरेणवा प्रयोजनार्थमुपसृजः । स्वेनवार्थेन स्वप्रयोजननिमित्तेनवा । मंत्ररूपामवरपरविद्यांयद्यभिव्याहरेत् ब्रूयात् । वचनात्पूर्वमभिव्याहर्तुमिच्छंश्च । विदुषा मेतद्विद्यामुख्योपासकानां । देवाना मेवमुक्तंफलंभविष्यति । कुतःसंहितादेवताविष्णुःस्वविदुषांदेवानामनुग्रहार्थंदिवमगमदितिविद्यात् चिंतयीत । तथा तथासत्येवंचिंतनेहि । यदर्थमेतद्विद्यापठनमेतत्फलं तथा स्वकामानुसारेण । शश्वन्नियमेन । स्यात् । नकेवलमेतद्विद्यापठितुरुद्देश्यंफलं किंतुयएतांसंहितामेवंदेवानांमहाफलप्रदेत्येवंवेदैतावन्मात्रंवेद सोपिसंधीयतेप्रजयेत्यादिपूर्ववत् । पूर्वहरिशर्ववन्मिलितानांलक्ष्म्यादीनांसंहितात्वमुक्तमधुनासरस्वत्याएवसंहिताभिमानिदेवतात्वमितिपक्षांतरमुच्यते ॥ वागिति ॥ पंचालचंडनामामुनिर्वाक्सरस्वतीसंहितेतिमन्यते । वाचःसंहितात्वमु

उप० । स्वर्गोलोकोब्रह्मणासैषाऽवरपरासंहितासयोहैतामवरपरांसंहितांवेदैवंहैवंसप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसंधीयते यथैषासंहितासयदिपरेणवोपसृतःस्वेनवार्थेनाभिव्याहरेदभिव्याहार्षन्नेवविद्यादिवंसंहितागमद्विदुषांदेवानामेवंभविष्यतीतिशश्वत्तथास्यात्सयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेतिवाक्संहितेतिपंचालचंडो

॥ १८० ॥

पपाद्यते ॥ वाचेत्यादिना ॥ वाचा वागनुग्रहेण । वेदाःसंधीयंते संहिततयोच्चार्यंते । वाचाच्छंदांसि छंदोभंगंविनासंधीयंते । वाचामित्राणिसंदधति । वाचासर्वाणिभूतानिपरस्परंसंधीयंते । अथो तस्मादिदंसंधीयमानंसर्ववागेव वागधीनमेवेतिहेतोर्वाक्संहितेत्यन्वयः । नन्वेवमस्तुवाचःसंहिताभिमानित्वं प्रतिपाद्यस्तुकइत्यतः "सादेवीसंहितानाम्नीवाच्योस्याविष्णुरेवही" तिभावेनतयोःपरस्परानुबंधउच्यते ॥ तद्यत्रैतदित्यादिना ॥ त द्वेदादिकं । यत्र यदा । अधीतेभाषतेऽध्यापयतिवा तदतिरिक्तंभाषतेवा तदाप्राणस्थःप्रणेतृत्वात्प्राणनामाभगवान्वाचिभवति प्रतिपादकव्यापारप्राचुर्येणतदंतर्गतोभवति । अतएववेदोच्चरणादिकालेप्राणवायुनिरोधइतिज्ञातव्यं । तदावाक्प्राणंरेहि आस्वादयतीव अतिसंश्लेषात् । अथयत्र यदा । तूष्णीं वेदादिकमुच्चारयन्वाभवति । प्रतिपाद्यप्राणांतर्गतभगवद्व्यापारप्राचुर्येणतदंतर्गताभवति । अतएवतूष्णींभावकालेप्राणवायुप्रवृत्तिप्राचुर्यमितिध्येयं । तदाप्राणोवाचंरेल्ह्यास्वादयतीवातिसंश्लेषेणस्वांतर्निवेशेनेनाप्रकटनात् । तौ वाक्प्राणौ । एव मन्योन्यंरीह्नः आस्वादयतः । कुतः । वाग्वैमाता व्यंजकत्वात् । प्राणःपुत्रो व्यंग्यत्वात् । तदप्येतत् तदन्योन्यास्वादकत्वमेतन्मातृत्वंचऋषिणोक्तं । सुपर्णः सुष्ठुपरमानंदरूपः । सः चतुष्कपर्देतिप्रकृतलक्ष्मीनारायणः । एकएवक्षीरसमुद्रंप्रविवेश । सइदंविश्वं

उप० । वाचावैवेदाःसंधीयंतेवाचाछंदांसिवाचामित्राणिसंदधतिवाचासर्वाणिभूतान्यथोवागेवेदंसर्वमितितद्यत्रैतदधीतेभाषतेवावाचितदाप्राणोभवतिवाक्तदाप्राणंरेल्ह्यथयत्रतूष्णींवाभवतिस्वपितिवाप्राणेतदावाग्भवतिप्राणस्तदावाचंरेहितावन्योन्यंरीह्नोवाग्वैमाताप्राणःपुत्रस्तदप्येतदृषिणोक्तमेकःसुपर्णःससमुद्रमाविवेशसइदंविश्वं

भुवनंविचष्टे पश्यति । तंपाकेन परिपक्वेन । मनसांतितः समीपेऽपश्यं । तंमातारेह्वि । सउ सोपि । मातररेह्वि आस्वादय तीवातिमित्रभावेनप्रतिपाद्यप्रतिपादकतयावर्तेतेइतिभावः । सयएवमित्यादिपूर्ववद्व्याख्येयं । अथोपसंहारे । भगवतएवचतुर्मुर्तेःपूर्वोत्तरवर्णसंधिसंधानदेवतात्वंशर्वपक्षतयोच्यते ॥ अथेत्यादिना ॥ अथातःप्रजापतिनाशिवेनोक्तासंहितोच्यते । जाया गतोवासुदेवःपूर्ववर्णप्रतिपाद्यः । पितृगतःसंकर्षणउत्तरवर्णप्रतिपाद्यः । पुत्रगतःप्रद्युम्नःसंधिः । प्रजननं प्रजननकर्मस्थोनिरुद्धः संधानं पूर्वोत्तरवर्णयोःसंहिततयोच्चारणलक्षणकर्मणिस्थः । सैषाचतुर्मूर्त्यात्मिकासंहितादेवताऽदिति रदितिनाम्नी । पिताचमाताचपुत्रश्चप्रजननंचेतियदिदंकिंचरूपचतुष्टयमिदंसर्वंचादितिर्हि अधिष्ठानभूतंचपित्रादिकमदित्यधीनंहि । इदंपित्रादिशब्दजातंतत्प्रतिपादकंहि । तदेतत्सर्वमपिऋषिणोक्तं । अदितिर्मातासपितासपुत्रइतीदंप्रतीकग्रहणं । सयएवमित्यादिफलवाक्यंपूर्ववत् ॥ ६ ॥ (३२) बृहद्रथंतरयोरित्यस्यसामविशेषपरत्वप्रतीतिंवारयन्व्याचष्टे ॥ देवतेति ॥ उपनिषद्यल्पाच्तरंपूर्व

उप० । भुवनंविचष्टे । तंपाकेनमनसापश्यमंतितस्तंमातारेह्विसउरेह्विमातरमितिसयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसात्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेत्यथातःप्रजापतिसंहिताजायापूर्वरूपंपतिरुत्तररूपंपुत्रःसंधिःप्रजननंसंधानंसैषाऽदितिःसंहिताऽदितिर्हीदंसर्वंयदिदंकिंचपिताचमाताचपुत्रश्चप्रजननंचतदप्येतदृषिणोक्तमदितिर्मातासपितासपुत्रइतिसयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसात्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेतिसर्वमायुरेति ॥ ६ ॥ (३२) इत्यैतरेयोपनिषत्सुतृतीयारण्यकेप्रथमोध्यायः ॥ ३ ॥ १ ॥

॥ १८१ ॥

भा० । देवतापूर्ववर्णस्य

मितिन्यायमनुसृत्यबृहतःप्रथममुपादानं । वस्तुतस्तुरथंतरशब्दोक्तालक्ष्मीरेवपूर्ववर्णदेवतेति । रथंतरशब्दोक्तेतिशेषः । नारायणोबृहन्नामा । ननुबृहद्रथंतरशब्दयोर्लक्ष्मीनारायणपरत्वे वाग्वैरथंतरस्यरूपंप्राणोबृहतइत्युक्तिविरोधइत्यतआह ॥ ताविति ॥ संहितासंधीयतइत्यस्यतात्पर्यं मध्यस्थइति ॥ सबृहद्रथंतररूपाभ्यांपूर्वोत्तरवर्णगताभ्यांसंधितोमध्यस्थोवर्णमध्यगतोर्धनारीपरमात्मकोरूपविशेषःसंहितानामेत्यर्थः । वाक्प्राणरथंतरबृहच्छब्दान्निर्वक्ति ॥ वेदात्मकत्वाद्वेदाभिमानित्वादिति ॥ स्वयं स्वातंत्र्येण । प्रणेतृत्वात्साक्षा न्मुख्यतःप्राणनामेत्यर्थः । रथंचततृतरंचेतिविग्रहमभिप्रेत्यरथशब्दस्यावयवार्थतावदाह ॥ रमिति ॥ उदाहृतं । "अन्नंथ" मितिश्रुतौ । समुदायार्थो विष्णुभोग्येति ॥ रथंतरेत्यस्यार्थो रतितरेति ॥ विशिष्टसुखरूपेत्यर्थः । रथंतरस्यबृहत स्तन्नामकस्यसाम्नः वाग्रथंतरस्यरूपं प्रतिमा । प्राणोबृहतोरूपं प्रतिमेत्यर्थांतरमाह ॥ वाक् प्राणसंस्थितौचैवेति ॥ उभाभ्यामुखलुसंहितासंधीयतइत्यस्यार्थस्ताभ्यामेवेति ॥ प्राणेनेत्यादितृतीयासहयोगइतिभावे

भा० । लक्ष्मीरेवप्रकीर्तिता । नारायणस्तूत्तरस्यतौवाक्प्राणाभिधौमतौ । मध्यस्थःसंहितानामासोर्धनारीपुमात्मकः । वेदात्मकत्वाद्वाङ्नाम्नीलक्ष्मीरेवप्रकीर्तिता । प्राणनामाप्रणेतृत्वात्साक्षान्नारायणःस्वयं । रमित्यानंदउद्दिष्टःसंभोग्यंथमुदाहृतं । विष्णुभोग्यारतिरालक्ष्मीरेवरथंतरं । नारायणोबृहत्वात्तुबृहन्नामाप्रकीर्तितः । रथंतरस्यबृहतोदेवतेचैवतावुभौ । वाक्प्राणसंस्थितौचैवताभ्यामेवहिसंधितं । लक्ष्मीनारायणंरूपंसंहितानामकंशुभं । एतांविद्यामवासुंहिवत्सरंगाअरक्षत । तार्क्ष्यएतावन्मात्रंचसमुद्दिश्यनचापरं । संहितादेवताबह्वयइतिकुंठरवात्मजः ।

नाह ॥ द्वयमिति ॥ देवतानांद्वयंद्वयंहरिशर्ववत् यथैकस्मिन्नेवसंस्थानेऽर्धतःशंकरोर्धतोनारायणइतितौमिलितौ तथामिलितंसंहितानामकंसत्तत्तत्र पूर्वोत्तरवर्णतन्मध्यानांमध्ये । वर्णमध्यस्यदेवतेत्यर्थः । पूर्वोत्तरवर्णयोस्तुपूर्वोक्ताएवेतिहृदयं । सैषाऽवर परेत्येतद्विवृणोति ॥ तयोरेकमित्यादिना ॥ वागादिशब्दकथनपूर्वकंवाक्प्राणेनसंहितेत्यादिसंहितापंचकंदर्शयति ॥ वाक् प्राणाख्याविल्यादिना ॥ सयोहैतामितिफलवाक्यतात्पर्यमुक्तं ॥ संहितामोक्षदाइति ॥ संहितास्वेतासुकःपरःकोवरइत्य तोविवेचयति ॥ प्रथमायामित्यादिना ॥ तृतीयायांवायुरेवपरः । विश्वदेवशब्देनसरस्वत्यादीनांग्रहणादितिभावः । अतए वचतुर्थ्यांसर्वदेवताःपरमाः । पंचम्यांविरिंचःपरमः । इतरेस्वस्वसंहितायामवराइत्यर्थः । अवरपरसंयोगात्संहितावरपरेत्युक्तं अधुनाऽवमपङ्क्तौप्रथमायांसंहितायांवामभागगोलक्ष्म्याख्योऽवरः । द्वितीयायांवामगोविष्णुःपरमः । तथातृतीयायांवामगः सर्वदेवसमुदायोऽवरः । चतुर्थ्यांसएवसरस्वत्यादिदेवसमुदायःपरमः । पंचम्यांवामगःशिवोऽवरइतिवामगपङ्क्त्युक्तावरपरभा

भा० । द्वयंद्वयंदेवतानांमिलितंहरिशर्ववत् । संहितानामकंतत्रवर्णमध्यस्यदेवता । तयोरेकंदेवतयोःपरमन्यत्तथाऽवरं । अवरस्यपरस्यापि संयोगात्संहितातुसा । प्रोक्तावरपरेत्येववाक्प्राणाख्यौरमाच्युतौ । संहितैकातथैवान्याकेशवोवायुसंयुतः । वायुःसपवमानाख्योदेवताश्चाखिला अपि । तृतीयासंहिताप्रोक्तादेवतास्ताःसशंकराः । चतुर्थीसंहिताप्रोक्ताशंकरोब्रह्मणासह । पंचमीसंहिताचैवसंहितामोक्षदाइमाः । प्रथमायांद्वि तीयायांविष्णुरेवपरोमतः । तृतीयायांवायुरेवचतुर्थ्यांसर्वदेवताः । विरिंचएवपंचम्यामवराइतरेततः ।

॥ १८२ ॥

वस्यक्रमेणानुवृत्तेरियंसंहितावरपरेतिप्रकारांतरेणव्याचष्टे ॥ प्रथमायामित्यादिना ॥ ननुप्रथमानिर्दिष्टोवामभागइतिस्थान चतुष्टयेदृष्टं तच्चायेनतृतीयायामपिपवमानोवामगइतिप्राप्तं तत्कथंतृतीयायांवामगोऽवरइतिव्याख्यायते किंतुतृतीयांवामगः पवमानोवरउत्तमइतिव्याख्येयमितिचेन्न । तथात्वेतृतीयायांतथापरइतिनिर्देशप्रसंगात् । अवरपरशब्दपर्यावृत्तिदशायांवरइ तिपदच्छेदस्यायुक्तत्वात् । प्रथमानिर्दिष्टस्यापिपवमानस्यदक्षभागस्थत्वसंभवात् । नह्यन्यत्रदर्शनंतन्नियामकमप्रयोजकत्वादि तिज्ञेयं । प्रकारांतरेणावरपरत्वमुपपादयति ॥ अवराद्याइति ॥ यद्यस्मादेताःसर्वादेवताः संहिताअवराद्याः विष्ण्वपेक्षया अवराश्रीरेवाद्यायासांताअवराद्याः । रुद्रापेक्षयापरोविरिंचोंतोयासांताःपरांताः । ततश्च तस्मादपिहेतोः । अवरपराःप्रोक्ताः । शब्दशास्त्रेप्रत्याहारसंज्ञावदितिभावः । एवंसंहिताशास्त्रेथावरपरशब्दार्थंव्याख्यायार्थांतरंदूषयति ॥ नैवोक्ताइति ॥ प्रथमा ऽवराद्वितीयापरातृतीयावराःचतुर्थीपरापंचम्यवरेत्येवंनैवोक्तास्ताःपरावराइत्यर्थः । स्वर्गलोकशब्दंशिवेनिरुच्यदर्शयति ॥ अ भिमानीति ॥ लोकनात् द्योतनाच्च । द्युलोकइतिशेषः । शाखांतरेद्युलोकशब्दस्यग्रहणात्तदनुसारेणेदंव्याख्यानं । एतदुप निषदनुसारेणतु अभिमानीस्वर्गलोकस्यस्वर्गइत्युच्यते । अभिमान्यभिमन्यमानयोरेकशब्दवाच्यत्वात् । यद्वास्वोविष्णुस्तद्व तेर्वायुस्तद्गोमुक्तःसदाशिवः । अतःस्वर्गइतिछांदोग्यभाष्यवचनात्स्वतंत्रविष्णुरतवायुगतत्वात्स्वर्गःसर्वस्यलोकनादवलोकनाल्लो

भा० । प्रथमायांसंहितायामवरोवामभागगः । द्वितीयायांतुपरमस्तृतीयायांतथावरः । चतुर्थ्यांपरमश्चैवपंचम्यांवामगोवरः । अवरा द्याःपरांतायदेताःसर्वाश्चसंहिताः । ततोऽपरपराःप्रोक्तानैवोक्तास्ताःपरावराः । अभिमानीद्युलोकस्यशिवःसर्वस्यलोकनात् ।

कइतिव्याख्येयं । सयदिपरेणवोपसृतःस्वेनवार्थेनाभिव्याहरेदित्यत्रकर्माध्याहारपूर्वंविवक्षितमर्थमाह ॥ यदिब्रूयादित्यादि ना ॥ अथापिवान्यद्वामंत्रंविद्यादित्यस्यभविष्यतीतीत्यत्रत्येतिशब्देनान्वयमाह ॥ चिंतयेदेवमिति ॥ विदुषांदेवानामेवमुक्तंफलमित्यस्यार्थोविदुषामित्यादि ॥ दिवंसंहितागमद्विदुषांदेवानामर्थइत्यस्यविवरणं हरिश्चैवेत्यादि ॥ शश्वत्तथास्यादित्यस्य तथातथासत्येवंचिंतनेहिपरेणवोपसृतःस्वेनवार्थेनेत्यभिलषितंफलं तथा स्वकामनानुसारेणसम्यक्स्यादित्यर्थमभिप्रेत्योक्तं इतिचिंतयतइति ॥ वाक्संहितेत्यत्रवाक्शब्देनप्रकृतालक्ष्मीरित्यन्यथाप्रतीतेर्व्याचष्टे ॥ पंचालचंडइति ॥ मन्यते संहितामितिशेषः । ननुवाग्वैमाताप्राणःपुत्रइतिप्राणमातृत्वेनोक्तावाक्श्रीरेव । कथंसरस्वतीत्यतस्तद्व्याचष्टे ॥ मन्यतइति ॥ वेदैर्व्यंग्यत्वात् । सरस्वत्याःकथंमातृत्वमित्यतउक्तंसाचेति ॥ पुत्रशब्दोगौणइत्युक्तं मुख्यार्थेबाधकमाह ॥ ब्रह्मणइत्यादिना ॥ ननुविष्णुनामादिसंहिताप्रतिपाद्यत्वंसरस्वत्याःकथमित्यतआह ॥ सादेवीति ॥ संहिताभिमानित्वात्संहितानाम्नी । एतेनपूर्वोक्तदेवतानामप्यभिमानित्वमेव । नतुविष्णुनामादिपूर्वप्रसिद्धशब्दसंहिताप्रतिपाद्यत्वं । तत्तु तत्तन्नामकस्यतत्तदंतर्गत

भा० । द्योतनाच्चयदिब्रूयान्मंत्रमेतमथापिवा । आत्मार्थेथपरार्थेवाचिंतयेदेवमंजसा । विद्वांसोदेवतायस्मात्सम्यक्तेनमहत्फलं । तेषामेवहरिश्चैवसंहितारूपकःप्रभुः । अगमद्देवलोकंहिकर्तुंदेवेष्वनुग्रहं । इतिचिंतयतस्तेषांप्रसादात्फलमंजसा । पंचालचंडोवाचंतुब्रह्माणींहिसरस्वतीं । मन्यतेऽस्याःपुत्रवच्चदेवंनारायणंप्रभुं । वेदैर्हिव्यज्यतेविष्णुःसाचवेदाभिमानिनी । प्राणस्थोभगवान्विष्णुःप्राणनामाप्रणेतृतः । ब्रह्मणोपिपितानित्यंभगवान्पुरुषोत्तमः । उपचर्यतेपुत्रइतिवेदैर्व्यज्यतेहरिः । सादेवीसंहितानाम्नीवाच्योस्याविष्णुरेवहि ।

स्यहरेरेवेत्युक्तंभवति । अथातःप्रजापतिसंहितेत्यस्यप्रजापतिप्रतिपादिकासंहितेत्यन्यथाप्रतीतेर्व्याचष्टे ॥ प्रजापत्याख्येति ॥ ननुतद्देवताकासंहितेत्येवकिन्नस्यादित्यतः "सैषाऽदितिसंहिते" त्युत्तरवाक्येऽदितेःसंहिताप्रतिपाद्यत्वश्रवणाददितिशब्दस्य "चात्ताचराचरग्रहणात् सर्ववाअत्तीतितददितेरदितित्व" मितिश्रुतितन्मीमांसयोर्विष्णुविषयतयोक्तत्वादितिभावेनाह ॥ विष्णुरेवेति ॥ जायापूर्वरूपंपतिरुत्तररूपमित्यादिव्याचष्टे ॥ सएवेत्यादिना ॥ सो दितिनामाविष्णुरेव । मातापूर्वरूपंपितोत्तररूपमितिशाखांतरानुसारेणपिताचमाताचेत्युत्तरवाक्यानुसारेणचेदंव्याख्यानं । प्रकृतेतुजनयतीतिजायापालकत्वात्पतिरितिव्याख्येयं । "तज्जायाजायाभवति यदस्यांजायतेपुन" रितिश्रुतेः । पुत्रेसंधिप्रजननसंधानशब्दान्निर्वक्ति ॥ पोषकत्वादित्यादिना ॥ धिनुपुष्टाविति धातोरितिप्रागेवोक्तत्वात्पोषकत्वात्संधिनामेत्यर्थः । अर्थांतरमाह ॥ वर्णयोरिति ॥ पूतितो नरकात् । वर्णसंधानकर्मणि स्थितइतिशेषः । सैषादितिःसंहितेत्युपसंहारवाक्यंव्याचष्टे ॥ एवमिति ॥ पिताचमाताचपुत्रश्चप्रजननंचेतियत्किंचिदिदंसर्वमदितिर्हीत्येतद्व्याचष्टे ॥ वासुदेवादीति ॥ एवंमात्रादिशब्दवाच्यवासुदेवादिरूपेणविष्णुरदि

भा० । प्रजापत्याख्यशर्वेणप्रोक्तान्यासंहितापिहि । विष्णुरेवादितिर्नामसर्वस्यात्तायतःप्रभुः । सएवपितृसंस्थस्तुपातृत्वात्पितृनामकः । देवतोत्तरवर्णस्यमातृस्थोमातृनामकः । माननात्पूर्ववर्णस्यदेवतेतिप्रकीर्तितः । पोषकत्वात्संधिनामावर्णयोरंतरस्थितः । सएवपुत्रसंस्थश्चपुत्रनामा जनार्दनः । त्राणात्पूतितएवासौवर्णसंधानकर्मणि । संधाननामासंधानकर्तृत्वात्पुरुषोत्तमः । प्रजातिकर्मसंस्थश्चसएवप्रजनाभिधः । जनकत्वात्परोविष्णुरेवंविष्णुर्हिसंहिता । वासुदेवादिरूपेण

तिशब्दवाच्यश्चतुर्धाव्यवस्थितइत्यर्थः । उदाहृतमंत्रशेषेपुत्रजननयोरदितित्वानुक्तेस्तल्लाभा "यादितिर्द्यौरदितिरंतरिक्षमदितिर्मा तासपितासपुत्रः ॥ विश्वेदेवाअदितिःपंचजनाअदितिर्जातमदितिर्जनित्व"मितिसमग्रश्रुतिंव्याचष्टे ॥ सएवेत्यादिना ॥ अदितिनामाविष्णुरेवेत्यर्थः । अंतरेवेति स्वांतःसर्वस्येक्षणात्स्वस्यवासर्वांतरीक्षणादित्यर्थः । मातापितृपुत्रशब्दानांप्रागेवव्याख्यातत्वात् विश्वेदेवाइत्यस्य विश्वेषांदेवानांयानिप्रातिस्विकानिनामानितद्वाच्यः विश्वेदेवाइतिसमुदायनामवाच्यश्चेत्यर्थः । इतिभावेनव्याचष्टे ॥ मुख्येत्यादिना ॥ बहुधास्थितत्वाद्विश्वे ज्ञानात्द्युतेश्चदेवनामा । दीव्यतेर्गत्यर्थत्वात्द्युत्यर्थत्वाच्च । ज्ञानात्मकद्युतेरितिवा । पंचजनाइत्यस्यापि देवगंधर्वमानुषपित्रसुरलक्षणपंचजनानांयानिप्रातिस्विकनामानितद्वाच्यः । पंचजनाइतिसमुदायनामवाच्यश्चेत्यर्थइतिभावेनदेवादिशब्दान्व्याचष्टे ॥ ज्ञानद्युतेरित्यादिना ॥ गांभूमिंस्वर्गंवेदवाचंवा । माननात्तस्यबहुभिर्मानकरणान्मान्यत्वादितियावत् । सर्वेषांबहुमानकरणाद्वामानुषः । मनोर्जातावव्यतौषुक्तेतिस्मरणादितिभावः । प्राणे असुनामके रतेरसुरइत्यर्थः । नित्यप्रादुर्भूतगुणत्वतोजातनामेत्यन्वयः । जनित्वशब्दोहिजनिक्रियावाची । जनी

भा० । चतुर्धैवंव्यवस्थितः । सएवदिविसंस्थश्चद्युनामाक्रीडनात्प्रभुः । अंतरेवेक्षणाच्चैवसोंतरिक्षोंतरिक्षगः । पृथिवीपृथिवीस्थश्चप्रथितत्वाज्जनार्दनः । मुख्यार्थत्वात्सर्वनाम्नांसर्वदेवाभिधोहरिः । विश्वेदेवाइतिप्रोक्तोबहुधातेषुसंस्थितः । ज्ञानद्युतेर्देवनामास्थितोदेवेषुकेशवः । गांधारयंश्चगंधर्वोगंधर्वेषुव्यवस्थितः । माननान्मानुषोनाममानुषेषुस्थितोहरिः । पालनात्पितृनामासौपितृष्वेवव्यवस्थितः । रतेःप्राणेऽसुराख्यश्चसोसुरेषुव्यवस्थितः । एवंपंचजनेषुस्थोहरिःपंचजनाभिधः । जातनामाजातसंस्थःप्रादुर्भूतगुणत्वतः ।

॥ १८४ ॥

प्रादुर्भावइत्यतोभावेइत्वन्प्रत्ययस्य जनिदाच्युसृवृमदिमषिनमिभृञ्भ्यइत्वन्नित्युणादिसूत्रेविधानात् । जनित्वशब्दितजनिक्रियास्थत्वात्सोपिजनित्वशब्देनोच्यतइत्याह ॥ जनिक्रियेति ॥ यद्यपिकर्तरीत्वन्प्रत्ययेनजनित्वशब्दोमातापितृपरउदाहृतः तथापिव्युत्पत्तिपक्षेभावेद्युपपद्यतइतिज्ञेयं । जनित्वशब्दंहरौनिरुच्यापिदर्शयति ॥ जनिमिति ॥ यस्माज्जनिंतवयतितस्माच्च जनित्वमितिगीयते । तवेर्णिज्वेरयुणादिस्मरणाज्जनिपदेकर्मण्युपपदेतवेःसौत्रस्यधातोरिदंरूपमितिभावः । किमिदंतवनमित्यतआह ॥ तवनंहीति ॥ हिशब्देन "तेवर्धंतस्वतवसोमहित्वने" तिप्रयोगंसूचयति ॥ रथंतरमाजभारावसिष्ठइत्युदाहृतंमंत्रमादितआरभ्यव्याचष्टे ॥ प्रथश्चेति ॥ प्रथश्चयस्यसप्रथश्चनामानुष्टुभस्यहविषोहविर्यत् । धातुर्द्युतानात्सवितुश्चविष्णोरथंतरमाजभारावसिष्ठइतिसमग्रोमंत्रः । हविषः स्वमुखेसर्वस्यजगतोहवनाद्धविर्नामकस्य अनुष्टुभस्य अनुष्टुप्प्रतिपाद्यस्यनृसिंहस्य मुखइतिशेषः । यस्यराज्ञःप्रथइतिनामसराजाहविर्यत् अयापयत् । यस्यचराज्ञःसप्रथइतिनामसोपिहविर्यत् अयापयत् । तस्मिन्यज्ञेवसिष्ठःधातुर्द्युतानात्सवितुश्चविष्णोर्धात्रादिनामकादनिरुद्धादिरूपचतुष्टयाद्रथंतरनाम्नींश्रियंआजभार अजहार । आहूतवानितियावत् । अत्रपूर्वार्धस्यार्थः ॥ प्रथश्चेत्यादि ॥ योनृसिंहोनुष्टुब्देवता "उग्रंवीर" मित्यादिनृसिंहानुष्टुब्देवता स्वमुखेजगतोहवनाद्धविरितिगीयते । तस्यहविर्नाम्नोनुष्टुभाख्यविष्णोर्नृसिंहस्यमुखेप्रथश्चसप्रथश्चेतिमत्स्यदेशराजानौहविर्यापया

भा० । जनिक्रियास्थितश्चासौजनित्वमितिगीयते । जनियस्मात्तवयतितवनंहिप्रकाशनमितिच । प्रथश्चसप्रथश्चैवराजानौमत्स्यदेशजौ । यापयामासतुर्विष्णोर्हविर्नाम्नोहविर्मुखे । अनुष्टुब्देवतायस्तुनृसिंहोजगतोस्यच । स्वमुखेहवनादेवहविरित्यभिधीयते ।

मासतुरितियोजना । द्वितीयार्धस्यार्थः **तस्मिन्यज्ञइत्यादि** ॥ **धातुर्द्युतानादित्यादेर्घट्टार्थश्चतूरूपादिति** ॥ **नश्रियोवसिष्ठसामर्थ्येनचतूरूपादवतारइतिभावेनाह** ॥ **चतुर्मूर्तिरिति** ॥ प्रेषयामास स्वगतांव्यक्तीचकार । किमर्थमाजभारेत्यतःस्वस्योपदेशायेतिभावेनाह ॥ **साचेति** ॥ धात्रादिशब्दार्थविवेचयति ॥ **धातेत्यादिना** ॥ तत्तत्कालेप्राप्तनिरोधनिवृत्त्याधारकत्वादनिरुद्धोधातेत्युक्तः । प्रकृष्टद्युतिमत्त्वात्प्रद्युम्ननामाहरिर्द्युतिविस्तारोपेतत्वात्द्युनामकः । "वानात्सूतेर्देवनाद्वासुदेव" इत्यादेर्वासुदेवशब्दवाच्योहरिर्योग्यस्यसर्वस्यजगतोमोक्षाख्यपुरुषार्थप्रसवकर्तृत्वात्सवितेत्युच्यते । सम्यक्कर्षकत्वात्संकर्षणनामाहरिः । प्रणेतृत्वात् प्रकर्षेणनेतृत्वाद्बलरूपत्वाच्चविष्णुनामेत्यर्थः । भारद्वाजोबृहदाचक्रेअग्नेरित्येतदादितआरभ्यव्याचष्टे ॥ **चतूरूपमित्यादिना** ॥ तेविंदन्मनसादीध्यानायजुष्कन्नंप्रथमंदेवयानं । धातुर्द्युतानात्सवितुश्चविष्णोर्भरद्वाजोबृहदाचक्रेअग्नेरितिसमग्रोमंत्रः । ते पूर्वमंत्रेप्रकृताःप्रथसप्रथवसिष्ठाः । भरद्वाजश्च । यजुष्कन्नंप्रथमंदेवयानं यजुरादिशब्दवाच्यसंकर्षणादिचतूरूपंविष्णुं । दीध्यानाः दीधीङ्दीप्तिदेवनयोः । देवनंचध्यानमत्रविवक्षितं । ध्यायंतो मनसाऽविंदन् अपश्यन् । तत्रभरद्वाजोधात्रादिशब्दवाच्यादग्र्यत्वादग्निनामकादनिरुद्धादिरूपचतुष्टयात्पूर्णत्वाद्बृहन्नामकंनारायणरूपमाचक्रे आकारयामासेति

भा० । तस्मिन्यज्ञेवसिष्ठस्तुचतूरूपाज्जनार्दनात् । आजहारश्रियंदेवींरथंतरवराभिधां । चतुर्मूर्तिःस्तुतस्तेनप्रेषयामासतांश्रियं । साचास्मैप्रददौविद्यांप्रददौचपुनर्हरिं । धातेत्युक्तोनिरुद्धस्तुप्रद्युम्नस्तुद्युनामकः । वासुदेवःप्रसवितासर्वस्यप्रसवाद्विभुः । संकर्षणोविष्णुनामाप्रणेतृत्वाद्बलादपि । चतूरूपंपरंविष्णुंराजानौप्रथसप्रथौ । भरद्वाजोवसिष्ठश्च

मंत्रार्थसंक्षेपः । प्रथमार्धंव्याचष्टे ॥ **चतूरूपमित्यादिना** ॥ यजुष्कन्नमित्यादेरर्थकथनमेतत् । तइत्यस्यार्थोराजानावित्यादि । दीध्यानाइत्यस्यतात्पर्यं ॥ **ध्यात्वेति** ॥ यजुरादिशब्दार्थविवेचयति ॥ **यजनीयइत्यादिना** ॥ पितृभ्योदेवेभ्यश्चस्वधादेः सम्यक्कर्षणात्संकर्षणः तदंतर्गततयायजनीयत्वाद्यजुः । सृष्ट्याप्रकर्षेणद्योतनात्प्रद्युम्नो जीवानांस्वांतर्गतानांस्कंदनात्सर्जनात्स्कन्नः । वासुदेवशब्दप्रवृत्तिनिमित्तैः "वानात्सूतेर्देवनाद्वासुदेव" इत्याद्युक्तैर्गुणैःश्रेष्ठोवासुदेवःगुणैःसर्वेभ्यउत्तमत्वात्प्रथमावतारत्वाच्चप्रथमः । स्वप्राप्तिंप्रतिदेवानामनिरोधकत्वादनिरुद्धो यतोदेवैःप्राप्योतोदेवयानः । द्वितीयार्धंव्याचष्टे ॥ **तस्मादेवेत्यादिना** ॥ अत्रापिनबलादाहानमित्यभिप्रायेणोक्तं ॥ **स्तुतिसंतोषितादिति** ॥ आहानप्रयोजनमुक्तं ॥ **तद्बृहन्नामकमिति** ॥ अग्नेरित्येतद्धात्रादिसर्वविशेषणमित्यभिप्रेत्यव्याचष्टे ॥ **चतुर्मूर्तिरिति** ॥ उपनिषदिचातुरात्म्यसमुद्गतयोर्बृहद्रथंतरयोरूपेणसंहितासंधीयतइतिस्वाभिप्रेतार्थेमंत्रद्वयोदाहरणेपि वाग्वैरथंतरस्यरूपंप्राणोबृहतइत्यध्यात्मं । प्राणेस्थितस्यप्राणनान्नोनारायणस्योपास्यत्वेप्रमाणत्वेनाभिप्रेतमविंदंतेतिहितमितिमंत्रंव्याचष्टे ॥ **चत्वारएवेत्यादिना** ॥ "अविंदंतेतिहितंयदा

भा० । ध्यात्वाविंदत्परात्परं । यजनीयोयजुर्नामाविष्णुःसंकर्षणाभिधः । जीवानांस्कंदनादेवस्कन्नःप्रद्युम्नउच्यते । प्रथमोवासुदेवस्तुदेवयानोनिरुद्धकः । प्राप्योदेवैर्यतोनित्यमनिरुद्धाभिधोहरिः । तस्मादेवंचतुर्मूर्तेःस्तुतिसंतोषिताद्धरेः । आजहारभरद्वाजोरूपंनारायणाभिधं । तद्बृहन्नामकंविष्णोश्चातुरात्म्यात्समुद्गतं । भरद्वाजमुपागम्यप्रादान्मोक्षवरंपरं । चतुर्मूर्तिःसभगवानग्निरित्यभिधीयते । अग्र्यत्वात्सर्वभूतानामेवं चत्वारएवते । अविंदंस्तं

सीद्यज्ञस्यधामपरमंगुहायत् । धातुर्द्युतानात्सवितुश्चविष्णोरासूर्यादभरन्धर्ममेत" इतिमंत्रस्यायमर्थः । ते प्रथादयश्चत्वारः । यज्ञस्य सर्वज्ञस्य । विष्णोः । परममुत्तमं । धाम तेजोरूपं । "सयुजासखाये" तिश्रुतेर्जीवानामतिहित मुपकारकं । गुहामे तीतिगुहायत् गुहांतर्गतमासीत्तदध्यात्ममपिचतुर्मूर्त्यात्मकनारायणरूपमविंदन् । सूरिप्राप्यत्वात्सूर्यनाम्नोधात्रादिपदोदिताद निरुद्धादेरेतेचत्वारःसर्वलोकस्यघर्षणान्नाशनाद्धर्मनामानंनृसिंहं आ अभरन्नाहरंश्चेति । पूर्वार्धस्यव्याख्यानमेवंचत्वारइति ॥ तएवचत्वारः । अस्यजीवजातस्यातीवहितं । गुहायत् गुहाशब्देकर्मण्युपपदेइण्गतावित्यतःशतृप्रत्ययेगुहामेतीतिगुहायत्गु हायतीगुहायंतीतिशब्दरूपंभवति । तथाचगुहागतंगुहायामपिसंस्थितंचतुर्मूर्तिंनारायणमेवयथाधिदैवमविंदन्तथासाक्षादविं दन् अपरोक्षतोव्यजानन्नित्यर्थः । नन्वत्रोक्तोविष्णुरितिकथमवगतमित्यतोगुहानिहितत्वलिंगा "द्रुहांप्रविष्टावात्माना" विति सूत्रादितिसिद्धेपि यज्ञस्यधामेतिविशेषणाच्चावगतमितिभावेनतद्व्याकुर्वन्नाह ॥ सर्वज्ञत्वादिति ॥ यद्गुहायामप्यविंदन् तत् यदस्तितज्जानातीतिव्युत्पत्त्यासर्वज्ञत्वाद्यज्ञनाम्नोविष्णोःपरमंतेजोहीत्यन्वयः । हिशब्देन "यज्ञोविष्णुर्देवता इदंज्योतिर्हृदय आहितंयत् प्राणेषुहृद्यंतज्र्योतिः ज्योतिश्चरणाभिधानात् तेजःस्वरूपंचगृहंप्राज्ञैर्धामेतिकथ्यत" इत्यादिश्रुतिसूत्राभिधानान्यु क्तेर्थेसूचयति । द्वितीयार्धंव्याचष्टे ॥ तस्मादेवेत्यादिना ॥ धर्मन्नित्युणादिसूत्रेघृक्षरणदीप्त्योरितिधातोर्मन्प्रत्ययेगुणेचकृतेधर्म

॥ १८६ ॥

भा० । चतुर्मूर्तिंसाक्षान्नारायणंप्रभुं । गुहायांसंस्थितमपिह्यतीवहितमस्यच । सर्वज्ञत्वाद्यज्ञनाम्नोविष्णोस्तेजःपरंहितत् । तस्मादेवचतु र्मूर्तेःसूरिप्राप्यत्वहेतुतः । सूर्यनाम्नोहरन्धर्मनामानंतंनृसिंहकं ।

शब्दस्यनिष्पादितत्वात्सर्वलोकस्यघर्षणात्विनाशनात् । नृसिंहोघर्मउच्यते । क्षरणंविनाशनमेवेतिभावः । अत्राप्याहानंनव लादितिवदन्तत्प्रयोजनमाह ॥ निर्गत्येत्यादिना ॥ होत्रध्वर्योरितिसमाहारैकवद्भावः । वसिष्ठाद्धोतुः भरद्वाजादध्वर्योश्चे त्यर्थः । प्रथश्चयस्येत्येतत्स्ववचनेनस्पष्टंव्याचष्टे ॥ यस्येत्यादिना ॥ यदित्येतत्क्रियापदमितिभावेनानूद्यप्रतिपदमुपादत्ते ॥ यत् अयदिति ॥ अयतेर्लङिरूपमेतत् । नन्वाडजादीनामितिस्मरणादायदितिभवितव्यमितिचेत्बहुलंछंदस्यमाङ्योगेपी त्याडागमाभावपक्षेअयदिति ॥ पृथक्संबंधइति ॥ अन्यथैकवचनानुपपत्तेरितिभावः । आचक्रइत्येतदंतर्णीतणिचूत्वेनव्या चष्टे ॥ आचक्रइति ॥ अविंदन्ते तेविंदन्निितिमंत्रयोःपूर्वार्धस्यपौनरुक्त्यंपरिहरति ॥ अविंदन्तइति ॥ तत्रज्ञापकमाह ॥ देवयानमिति ॥ यद्यप्यनिरुद्धस्यात्रदेवप्राप्यत्वमुक्तं नतुगुहायदितिवद्रूपचतुष्टयविशेषणमेतत् तथापितद्यूहगतस्यैकाधिदे वगतत्वमन्येषामप्यधिदैवगतत्वंविनानसंभवतीतिप्रद्युम्नादीनामधिदैवगतत्वेज्ञापकंभवतीतिभावः । एकःसुपर्णःससमुद्रमाविं वेशेत्यत्रसइतिपरामर्शविषयंदर्शयितुं "चतुष्कपर्दायुवतिःसुपेशाघृतप्रतीकावयुनानिवस्ते । तस्यांसुपर्णावृषणानिषेदतुर्यत्रदेवाद

भा० । घर्षणात्सर्वलोकस्यनृसिंहोघर्मउच्यते । निर्गत्यसचतुर्मूर्तेर्विप्रक्षत्राभिसंस्तुतात् । प्रथादीनांचतुर्णांचपुरुषार्थचतुष्टयं । दत्वाज गामभगवान्स्वकीयांतनुमेवच । वसिष्ठाच्चभरद्वाजाद्धोत्रध्वर्योर्नृपौतुतौ । यथेष्टसिद्धिंसंप्राप्तौसम्यगिष्टाज्जनार्दनादित्याद्यृग्वेदसंहितायां । यस्य प्रथइतिनामसचहविर्नाम्नोविष्णोर्हविर्यत् अयत् । अटोलोपेनांतर्णीतणिच्त्वेनअयापयदित्यर्थः । एवंसप्रथइतियस्यनामासौ । हविर्यदितिपृथ क्संबंधः । आचक्रेआकारयामास । अविंदंतेतेअविंदन्नित्यध्यात्माधिदैवतयोरुभयत्रापिभगवंतमविंदन्नित्यर्थः । देवयानंगुहायदितिवचनात् ।

धिरेभागधेयं" मितिमंत्रंव्याचष्टे ॥ चतुःशिखंडामिति ॥ चतुष्कपर्देत्यस्यार्थः ॥ चतुःशिखंडामिति ॥ चतुर्वेणीकृतकेश पाशामित्यर्थः । एतेनयाचतुष्कपर्दा तस्यां ता मित्यर्थउक्तोभवति । सुपर्णेत्यस्यार्थोद्विरूपइत्यादि ॥ निषेदतुरित्यस्यतात्पर्य रमयामासेति ॥ तस्यांनिषेदतुरित्यस्यार्थांतरं तस्यामिति ॥ ततश्चायंमंत्रार्थः । याचतुष्कपर्दा पार्श्वयोःसीमंतदेशेपश्चा दित्येवंचतुर्धाकृतजटाकलापा । युवति र्नित्ययौवनसंपन्ना । सुपेशा शोभनावयवा । पिशअवयवइतिधातोः । घृतप्रतीका प्र काशमानदेहा । "घृक्षरणदीप्त्योः । प्रतीकंदेहउद्दिष्ट" इतिवचनात् । वयुनानि ज्ञानानि । वस्ते आच्छादयति । ज्ञानपूर्णे त्यर्थः । "त्वद्दत्तयावयुनयेदमचष्टविश्व" मितिभागवतेप्रयोगात् । तस्यां विभक्तिव्यत्ययः । तांरमां । सुपर्णा सुपर्णौ । सुष्ठु परमानंदरूपौ । वृषणौ वृषसेचने । सर्वाभीष्टसेचकौभगवद्रूपविशेषौ । निषेदतुः निषण्णौ । संगतावभूतां । रमयामासतुरि तियावत् । स्वरमणार्थंचतस्यांनिषेदतुः निषण्णौ । स्थितावभूतां । "रमयाररममाणोपितत्स्थेनैवश्रियात्मना । रमत" इत्युक्त त्वात् । यत्र यस्मिन्द्विरूपेहरौ । देवाभागधेयं स्वस्वविहितंकर्म । दधिरे अर्पितवंतः । एवंसइतिपरामर्शार्थंप्रकृतत्वंदर्शयित्वा एकइतिमंत्रंव्याकुर्वन्नपश्यमितिवक्ताकइत्यतोऽजोवक्तेत्याह ॥ एकइति ॥ सुपर्णः सुष्ठुपरमानंदरूपः । सएकएव विष्णुः । स मुद्रंक्षीरसागरमाविवेश प्रविष्टः । असौदेवः विश्वं सर्वं भुवनं । पाकेनः पूर्णेनाकुंठेन । मनसा चेतसा । विचष्टे पश्यति । तं

भा० । चतुःशिखंडांतुरमांद्विरूपोभगवान्हरिः । परमानंदरूपत्वात्सुपर्णइतिनामकः । रमयामासतस्यांचनिषण्णःसर्वदैवसः । एकएव चविष्णुःसप्रविष्टःक्षीरसागरं । सर्वंपश्यत्यसौदेवःपूर्णाकुंठेनचेतसा ।

पाकेन परिपक्वेन । मनसाअंतितः सर्वस्यांतिके । सर्वांतरपश्यं । तं प्राणस्थं । माता मातेवव्यंजकत्वान्मातेत्युक्तावाग्वेदाभि मानिनीसरस्वती रेहि लिहतइव । तद्गुणानास्वादयति । सउ सोपि । मातरं सरस्वतीं रेहि । साप्राणस्थेनपरमात्मनासदा लिह्यतेततपरमप्रियतयाऽऽस्वाद्यतइवेतिमंत्रभाष्ययोरर्थः । मातृत्वमेवसरस्वत्याःकिंनस्यादित्यतआह ॥ स्वयंत्विति ॥ ६ ॥ (३२) ॥ इतिश्रीमद्विट्ठलाचार्यपुत्रेणश्रीमत्तीर्थाचार्यचरणसेविनाश्रीनिवासेनरचितायांश्रीमन्महैतरेयभा ष्यार्थरत्नमालायांतृतीयप्रघट्टकेप्रथमोध्यायः ॥ ७ ॥

ॐ प्राणोवंशइतिविद्यादितियत्प्राणस्यविष्णुनामप्रतिपाद्यभगवद्रूपाधिष्ठानभूतास्थाद्यभिमानिसर्वदेवाश्रयत्वमुपक्षिप्तंतदुपपाद यितुमयमध्यायः । प्राणो मुख्यवायु र्वंशः सर्वाश्रयइतिस्थविरःशाकल्यःशालामध्यगतेवंशेसर्वेआच्छादकपदार्थाअन्येवंशाश्च समाहिताःस्युस्तन्निदर्शनंयथा एवमस्मिन्प्राणे चक्षुःश्रोत्रंमनोवागन्यानींद्रियाणि तदभिमानिदैवतानि । शरीरं तदभिमानी । सर्वआत्मा एवमुक्तोऽनुक्तश्चेतनाचेतनात्मकःसर्वोपिसंघातः । समाहितः । तेषुसर्वेषुसर्वोबहुरूप्यात्मापूर्णत्वादात्मनामाभगवा

भा० । परिपक्वेनमनसाऽपश्यमित्याहतंत्वजः । मातेवव्यंजकत्वात्तंप्राणस्थंवाक्सरस्वती । लिहतेलिह्यतइवप्राणस्थेनतुसासदा । स्वयंतु भगवान्विष्णुर्वाक्पतेर्ब्रह्मणोपिहि । नित्यःपितास्वतंत्रश्चनास्यमातापितापिचेत्यादिच ॥ ६ ॥ (३२) इतिश्रीमदानंदतीर्थभगवत्पादाचा र्यविरचितेश्रीमन्महैतरेयोपनिषद्भाष्येतृतीयप्रघट्टकेप्रथमोऽध्यायः ॥ ३ ॥ १ ॥ ७ ॥

उप० । प्राणोवंशइतिस्थविरःशाकल्यस्तद्यथाशालावंशेसर्वेन्येवंशाःसमाहिताःस्युरेवमस्मिन्प्राणेचक्षुःश्रोत्रमनोवागिंद्रियाणिशरीरंसर्व

न्समाहितः स्थितः । यआत्मातेषुसर्वेषुसमाहितःसएवविष्णुनामाक्षरेषुतद्व्याख्यानरूपेषुसर्वेषुशब्देषुचसमाहितइतियोज्यं । त देवविविच्योच्यते ॥ तस्येत्यादिना ॥ तस्यैतस्यात्मनः तस्य शरीराख्यस्य आत्मनः आदानादिकर्तृत्वादात्मनः । एतस्यवि ष्णोः । प्राणः प्राणगतमध्यात्मरूपं । अधिदैवंसमर्थत्वादूष्मनामक मूष्मसुस्थितमूष्माक्षरप्रतिपाद्यं । अस्थिरत्वादस्थिनामका न्यस्थिषुस्थितरूपाणिअधिदैवंस्पर्शरूपं स्पर्शहेतुत्वात्स्पर्शनामकानिस्पर्शगतानिस्पर्शाक्षरप्रतिपाद्यानि । मदजनकत्वान्मज्जाना मानिमज्जास्थितानिरूपाणि अधिदैवंस्वररूपं । स्वस्मिन्नतत्वात्स्वरनामकानिस्वरगतानिस्वरसंज्ञिताज्वर्णप्रतिपाद्यानि । मांसं लोहितमित्येतन्मांप्रमाणंसारयतिप्रवर्तयतीतिमांसं । रक्तवर्णत्वाल्लोहितमित्येतन्नामकंतदुभयगतंपूर्वोक्तरूपेभ्योन्यच्चतुर्थरूपं । अंतस्थरूपंसर्वांतस्थत्वादंतस्थनामकमंतस्थाक्षरगतंतत्प्रतिपाद्यंचेतिहस्माह स्थविरःशाकल्यः । ह्रस्वोमांडूकेयस्तु इति वक्ष्य माणप्रकारेणाहस्म । नोमते एतत्रयमेवोपास्यंप्रोक्तं । नः अस्मभ्यं । एतत्रयमेव अस्थिमज्जापर्वगतंत्रिविधरूपमेव । गुरुभिः प्रोक्तमितिवा । अस्थ्नांमज्ज्ञांपर्वणामितित्रयस्य त्रयगतस्यतस्यैतस्यहरेरूपाणि । इतो दक्षभागे । त्रीणिषष्टिशतानि षष्टयुत्तर त्रिशतानि । इतो वामभागे । त्रीणिषष्टिशतानि षष्टयुत्तरत्रिशतानिसंति । एकैकभागेऽस्थ्नामशीत्युत्तरशतमेवंमज्ज्ञां । पर्वणा मस्थ्यंतर्भावान्नपृथग्गणना । एवंचैकैकभागेषष्टयुत्तरत्रिशतानीतिभावः । तानि पार्श्वद्वयस्थानिमिलितानितानिरूपाणि ।

उप० । आत्मासमाहितस्तस्यैतस्यात्मनःप्राणऊष्मरूपमस्थीनिस्पर्शरूपंमज्जानःस्वररूपंमांसंलोहितमित्येतदन्यच्चतुर्थमंतस्थरूपमितिहस्मा ह्रस्वोमांडूकेयस्त्वयंत्वेवनएतत्प्रोक्तंतस्यैतस्यत्रयस्यास्थ्नांमज्ज्ञांपर्वणामितित्रीणीतःषष्टिशतानित्रीणीतस्तानि

सप्तविंशतिशतानिभवंति विंशत्युत्तरसप्तशतानिभवंति । एवमध्यात्मगतानांरूपाणांतत्समसंख्याकसंवत्सराहोरात्रगतत्वमित्यु च्यते ॥ सप्तचेति ॥ यान्यध्यात्मंसप्तशतानिविंशतिश्चरूपाणिभवंतितान्येव सप्तशतानिविंशतिश्चसंवत्सरस्याहोरात्रावै । विं शत्युत्तरसप्तशतसंख्याकसंवत्सराहोरात्रगतान्यहार्यत्वाद्रतिदत्वाच्चाहोरात्रनामकानीत्यर्थः । रतिंरातिददातीतिरात्रिरितिव्या ख्यातंभविष्यति । एवमध्यात्मगतस्यभगवतउपास्त्यर्थंगुणाउच्यंते ॥ सएषइत्यादिना ॥ सएषो ध्यात्मगतआत्मा । अहः संमानः अहोभिःसमसंख्याकत्वादहःसंमानः । सर्वदर्शनसर्वश्रवणसत्यकामत्वसर्वमंतृत्वसर्ववक्तृत्वशक्तियुक्तत्वाच्चक्षुर्मयादि नामकोबलरूपत्वादात्माच । सयएतमात्मानमहःसंमानत्वादिधर्मोपेतंवेद सोह्ना महर्नामकानांरूपाणां । सायुज्यादिकमश्नुते प्राप्नोति । ज्ञानाख्यपुत्रवान्भवति पीयमानसुखवान्भवति । सर्वं पूर्णंनित्यमायुश्चैति ॥ ७ ॥ प्राणस्यवंशत्वोपपादकंतद्यथे त्यादिव्याचष्टे ॥ गृहस्येति ॥ आच्छादनमावरकंफलकादि । आदिपदेनोपवंशग्रहणं । इंद्रियाभिमान्यादीत्यादिपदेनशरी राभिमानिनः सर्वआत्मेत्युक्तसंघाताभिमानिनश्चग्रहणं । शरीरपदेनपरिदृश्यमानमवयविभूतंगृह्यते । आत्मपदेनप्राणेंद्रियश

उप० । सप्तविंशतिशतानिभवंतिसप्तचवैशतानिविंशतिश्चसंवत्सरस्याहोरात्राःसएषोहःसंमानश्चक्षुर्मयःश्रोत्रमयश्छंदोमयोमनोमयोवाङ्म यआत्मासयएवमेतमहसंमानंचक्षुर्मयंश्रोत्रमयंछंदोमयंमनोमयंवाङ्मयमात्मानंवेदाह्नासायुज्यंसरूपतांसलोकतामश्नुतेपुत्रीपशुमान्भवतिसर्वमायु रेति ॥ १ ॥ (३३)

भा० । ॐ ॥ गृहस्याच्छादनादीनांमध्यवंशोयथाश्रयः । तथेंद्रियाभिमान्यादिदेवानांवायुराश्रयः ।

रीरसप्तधातुतदभिमानिलक्षणचेतनाचेतनसमुदायोगृह्यते । अतएवसर्वआत्मासमाहितइत्यस्यसर्वेषुतेषुबहुरूपआत्मापरमात्मासमाहितइत्यर्थांतरमाह ॥ तेष्विति ॥ प्रकारांतरेणव्याचष्टे ॥ तेष्विति ॥ यस्त्वेषुसर्वेषुप्राणादिष्वात्मांतर्यामीसमाहितः सएवसर्वेषुविष्णुनामाक्षरेषु तदर्थत स्तद्व्याख्यानरूपत्वा देवंविष्णुनामाक्षरेष्विवान्येषुवेदाद्यक्षरेषुच । समाहितइत्यर्थः । तस्यै तस्यात्मनःप्राणइत्यादिकंव्याचष्टे ॥ प्राणनामेत्यादिना ॥ ऊष्मसूष्माक्षरेषु । समर्थत्वा च्छत्रुदाहेसमर्थत्वात् । उषदाहइति धातोः । यद्वोषिरेवसामर्थ्येपिवर्तेते । "ऊष्मावच्चानूष्मावच्च । अस्यैवचोपपत्तेरूष्मे" तिप्रयोगात् । तस्यैतस्यात्मनइत्यत्रात्म शब्दार्थमाह ॥ पूर्णत्वादिति ॥ आततत्वादात्मा ततिश्चपूर्तिरितिभावः । संघातस्यकथंतर्ह्यात्मशब्दवाच्यत्वमित्यतआह ॥ प्रतिमात्वादिति ॥ संघातस्तुप्रतिमात्वादेवात्मशब्दोक्तोनतुपूर्णत्वादित्यर्थः । एतेनतस्यात्मनःसंघाताख्यात्मनःआदानादि कर्तुरेतस्यपरमात्मनइत्युपनिषदर्थइत्युक्तंभवति । अस्थिस्पर्शमज्जास्वरमांसलोहितशब्दान्व्याचष्टे ॥ अस्थिरइत्यादिना ॥ "वायुश्चवायुसंस्थश्चकदाचिन्नहितिष्ठत" इत्यादेरेकत्रनस्थिरोनित्यसंचारीत्यर्थः । स्पृश्यतेनेनेतिस्पर्शः । मदंजनयतीतिमज्जा । उपपदाकारलोपश्चुत्वंचेतिभावः । यद्वाभावेमदितिक्विबंतः तथाचमत्मदंजनयतीतिमज्जा । "मत्सरामा॑दयि॒ष्णव॑" इत्यत्रऋ

भा० । तेषुसर्वेषुभगवान्बहुरूपोहरिःस्थितः । विष्णुनामाक्षरेष्वेवमन्येष्वपितदर्थतः । प्राणनामापिभगवान्प्राणस्थश्चोष्मसुस्थितः । ऊष्मनामासमर्थत्वात्सएवभगवान्हरिः । पूर्णत्वादात्मनामासौप्रतिमात्वादमुष्यतु । संघातआत्मशब्दोक्तोह्यस्थिरश्चास्थिनामकः । अस्थिस्थितोहरिःस्पर्शसंस्थितःस्पर्शनामकः । स्पर्शहेतुत्वतःस्पर्शनामासभगवान्हरिः । मज्जासुस्थःसमज्जाख्योमदंजनयतीतिह ।

ग्भाष्यटीकायां "मत् मदं । सरंति सारयंतीतिमत्सरा" इतिव्याख्यातत्वात् । श्वन्नुक्षन्नित्याद्युणादिसूत्रेकनिन्प्रत्ययांततया निपातितत्वेनमज्जामज्जानौमज्जानइतिनकारांतस्योपनिषद्युपात्तत्वेप्याकारांतस्यमज्जाशब्दस्यप्रायिकत्वाद्भाष्येमज्जासुस्थइत्युक्तं। प्रमाणंवेदादिकंसारयेत्प्रवर्तयेत् । मांसपुष्ट्यभावेऽस्थिचर्मावशेषस्यवेदोच्चारणशक्त्यभावादितिभावः । ननुदेहेऽस्थ्नांमज्ज्ञांपर्वणामधिष्ठानभूतानांपृथक्षष्ट्युत्तरशतत्रयसद्भावात्कथंतद्गतरूपाणामेकैकभागेषष्ट्युत्तरत्रिशतत्वंसंभूयविंशत्युत्तरसप्तशतत्वंच किंत्वेष्वेतत्खंडानुसारेणैकैकभागेचत्वारिंशदुत्तरपंचशतत्वंसंभूयाशीत्युत्तरसहस्रत्वंवक्तव्यमित्यतआह ॥ अस्थिस्थान्येवेति ॥ यतोहरेरास्थिस्थान्येवरूपाणिपर्वस्वपिसंति तत् ततः । तेषां पर्वगतानां । पृथक्संख्यानास्ति । तस्मात्तस्यहरेरस्मदादिदेहेतस्यविष्णोरूपाणिसप्तशतानिविंशच्च विंशतिसंख्याकानिच । भागेतु एकैकस्मिन्भागेतु । रूपाणांषष्ट्युत्तरशतत्रयमितियोजना । नन्वस्थिपर्वगतरूपाणामेकत्वेत्रयंत्वेवनएतत्प्रोक्तमितिकथंरूपत्रैविध्यमुक्तं । कथंवोत्तरखंडेनाविरोधइत्यतउक्तं ॥ ततएवविभक्तानीति ॥ अस्थिगतेभ्यःपर्वगतानांविभक्तत्वात्तेषामेवस्थानद्वयसंबंधाभावात्त्रयंत्वेवेतित्रैविध्यकथनं अशीतिसहस्रंभवतीत्युत्तरखंडाविरोधश्च । विभागेपिसमाननामकत्वाल्लक्षणसाम्याच्चमूलमूलिनोरेकव्यूहत्वविवक्षयाविंशत्युत्तरसप्तशतत्वोक्तिरितिभावः । सप्तचैवशतानिविंशतिश्चसंवत्सरस्याहोरात्राइत्यत्रतान्येवेत्यस्यानुवृत्तिमभिप्रेत्यव्याचष्टे ॥

भा० । सएवस्वरसंस्थश्चस्वराख्यःस्वरतेःप्रभुः । प्रमाणंसारयेद्यस्मान्मांसाख्योमांससंस्थितः । लोहिताख्योरक्तवर्णोलोहितस्थोजनार्दनः । अस्थिस्थान्येवरूपाणिपर्वस्वपिहरेर्यतः । ततएवविभक्तानिसंख्यातेषांपृथङ्नतत् । तस्मात्सप्तशतान्येवदेहेविंशच्चतस्यहि । रूपाणिविष्णोर्भागेतुषष्ट्युत्तरशतत्रयं ।

तान्येवेति ॥ यानिविष्णुरूपाण्यस्थ्यादिस्थानिविंशत्युत्तरसप्तशतसंख्याकानितान्येवेत्यर्थः। अत्राहःशब्दोऽहोरात्रपरः। सएषो हःसंमानइत्यादिव्याचष्टे ॥ अहोभिरित्यादिना ॥ अध्यात्मगानीत्यंतेन। सएषआत्मेत्यन्वयःसूचितः। चक्षुर्मयइत्यादौमयट्प्राचुर्यार्थः। चक्षुरादिशब्दश्चचष्टेऽनयाशक्त्येत्यादिव्युत्पत्त्यादर्शनादिशक्तिपरइत्यभिप्रेत्यव्याचष्टे ॥ पूर्णेति ॥ छंदोमयत्वंनाम कामपूर्णत्वं। छंदेरिच्छार्थत्वात्। कामपूर्तिर्नामकामिताप्रतिघातः सत्यकामत्वमितियावत्। मंतृवक्तृशब्दौभावप्रधानौ। बलं शक्तिः। सर्वमंतृत्वसर्ववक्तृत्वशक्त्यात्मकइत्यर्थः। यद्वाबलात्मकइत्यात्मशब्दार्थः। सयएवमित्यादिफलवाक्यंव्याचष्टे ॥ एवमिति ॥ रूपाण्यहर्नामकानि। ज्ञानस्यापिपुन्नाम्नोनरकात्त्राणहेतुत्वात्पुत्रशब्दवाच्यत्वंज्ञेयं। पशुमानित्यत्रपीयतइतिपं तच्चतत्शंच पशं ताच्छील्यार्थेअकारस्थानेउकारः स्वरूपभूतानुभूयमानानंदवानित्यर्थमभिप्रेत्योक्तंपीयमानमिति ॥ कौंठरव्यस्तु विष्णुनाम्नोन्यनाम्नोवाऽक्षराणांपंचाशदक्षराणांवातन्नामकानांतद्गतानांरूपाणां त्रीणिषष्टिशतानि षष्ट्युत्तरत्रिशतानि। ऊष्मणां विष्णुनामादिनिष्ठोष्माक्षरगतानांतत्प्रतिपाद्यानांरूपाणां त्रीणिषष्टिशतानि। विष्णुनामादिगतसंधिगतानांसंधानात्संधिनामका

भा०। तान्येवविष्णोरूपाणिवत्सराहःसुसर्वशः। अहर्नामाचभगवानहार्यत्वात्प्रकीर्तितः। अहोभिःसमसंख्यानियस्मादध्यात्मगानि तु। रूपाणिविष्णोस्तेनायमहस्संमानउच्यते। पूर्णदर्शनशक्तित्वाच्चक्षुर्मयउदीरितः। तादृक्श्रवणशक्तित्वात्तथाश्रोत्रमयःस्मृतः। छंदोमयःसत्यकामोमंतृवक्तृबलात्मकः। एवंविद्वांस्तस्यरूपाण्याप्नोतिज्ञानपुत्रवान्। पीयमानंशमाप्नोतिप्राप्याहर्नामकंहरिं ॥ १ ॥ (३३)

उप०। अथकौंठरव्यस्त्रीणिषष्टिशतान्यक्षराणांत्रीणिषष्टिशतान्यूष्मणांत्रीणिषष्टिशतानिसन्धीनां

नांरूपाणांत्रीणिषष्टिशतान्याहत्याशीत्युत्तरसहस्ररूपाण्युपास्यान्याहेत्यर्थः ॥ १ ॥ (३३) अक्षरादिगतानामधिष्ठानांतरमुच्यते ॥ यानीति ॥ यानिविष्णुनामाद्यक्षरगतानितन्नामकानिरूपाण्यवोचामतान्येवाहान्यहार्यत्वादहर्नामकानि संवत्सराहर्नियामकानि। यान्यूष्मणः ऊष्मनामकानिरूपाण्यवोचाम ता स्तानि। रात्रयः रतिदत्वाद्रात्रिनामकानिसंवत्सररात्रिगतानि। यान्संधीन् संधिगतानवोचाम ते रूपविशेषाअहोरात्राणांसंधयः संधिगताःसंधिनामकाइत्यधिदैवतंभगवद्रूपाणि। अथाध्यात्मंभगवद्रूपाण्युच्यंते। यान्यक्षराण्यक्षरस्थान्यक्षरनामकानिरूपाण्यधिदैवतमवोचाम तानिरूपाण्यध्यात्ममस्थीनि अस्थिगतान्यस्थिरत्वादस्थिनामकानि। अधिदैवंयान्रूपविशेषानूष्मणः ऊष्मनामकानवोचाम ते प्रादुर्भावाअध्यात्मंमज्जानो मज्जागतामदजनकत्वान्मज्जानामकाः। मज्जास्वधिकंभगवतःसन्निधानमित्युच्यते ॥ एषइति ॥ एष आत्मा संप्रति सम्यग्विशेषतो मज्जावै मज्जागतोवै ॥ कुतः। एषप्राणोवायुर्विशेषतोमज्जास्थोवै। प्राणस्यमज्जासुविशेषतः सन्निहितत्वेपिविष्णोस्तुतत्कुतः। एषआत्मासम्यक्प्राणः प्राणस्थोवै। प्राणस्यविशेषतोमज्जागतत्वंकथमित्यतस्तत्कार्येरेतसिविशेषतःसंनिहितत्वादितिवक्तुंकार्यकारणभावउच्यते ॥ यन्मज्जेति ॥ यन्मज्जा योमज्जा एत देषएवरेतोभवतीत्यर्थः। ततश्चकिमित्यतउक्तं ॥ यन्म

उप०। यान्यक्षराण्यवोचामाहानितानियानूष्मणोवोचामरात्रयस्तायान्संधीनवोचामाहोरात्राणांतेसंधयइत्यधिदैवतमथाध्यात्मंयान्यक्षराण्यधिदैवतमवोचामास्थीनितान्यध्यात्मंयानूष्मणोधिदैवतमवोचाममज्जानस्तेऽध्यात्ममेषहवैसंप्रति

ज्रेति ॥ यन्मज्जा योमज्जागतःप्राणः एषवैतद्रेतः अस्मिन्रेतसिविशेषतःसन्निहितः । कारणेविशेषसंनिधानाभावेकार्येतदयो गादितिभावः । रेतसिप्राणस्यविशेषसन्निधानमेवकुतइत्यतउक्तं ॥ नहवेति ॥ इदंतावदेवंयोज्यं । प्राणा त्प्राणेन । विशेषतो धिष्ठितंरेतएवसिच्यते । गर्भाधानसंज्ञितनिषेककर्मयोग्यंभवति । गर्भत्वंव्रजेत् । तथाचरेतसिसामर्थ्यविशेषसद्भावात्तत्रप्राण स्यविशेषसन्निधानंज्ञायतइतिभावः । ननुकुत्रचिद्रेतसोगर्भत्वाप्राप्तेःकथंरेतसःसामर्थ्यविशेषइत्यतोनहवेतिविशिष्टंवाक्यंयोज्यं । प्राणादृते प्राणसंनिधानमृते । प्राणोरेतसिविशेषतःसंनिहितोनचेत् । तदातद्रेतोनसिच्यतेनगर्भत्वंव्रजेद्वै । उत्सर्गतोरेतसोग र्भीभावसामर्थ्यंदेवानाममोघवीर्यत्वदर्शनात् कलियुगादौमानुषादिरेतसोगर्भत्वाप्राप्तिस्तुसहकारिविरहनिबंधना । प्राणविशेष सन्निधानेतद्दर्शननियमादितिभावः । प्राणसन्निधानविशेषरहितंरेतःसिक्तंचेत्किंस्यादित्यतउच्यते ॥ यद्वेति ॥ वाशब्दोवधा रणे । यदिप्राणादृते प्राणसन्निधानंविना । रेतःसिच्येततर्हिपूये दवयवशैथिल्येनदुर्गंधयुक्तमेवस्या न्नसंभवेन्नबीजंभवेदित्य र्थः । ननुप्राणसन्निधानविशेषादेवरेतसोगर्भत्वप्राप्तियोग्यत्वमितिकुतः स्वतएवकिंनस्यात् क्वचिद्गर्भत्वाप्राप्तिस्तुप्रतिबंधकव शाद्भविष्यतीत्यतश्चोक्तं ॥ यद्वेति ॥ प्राणादृतेप्राणसन्निधानमृतेविशेषप्राणसंबंधवर्जितंरेतो । ऋतेतद्रेतोव्यतिरिक्तंयन्मांसा दिकंधात्वंतरं । तन्नसंभवेत्गर्भत्वंनयातीत्यर्थः । यदिरेतःस्वसामर्थ्येनैवगर्भत्वंप्राप्नुयात्तदामांसादिकमपिपाप्नुयाद्धातुत्वाविशे षात् । अचेतनेकार्यविशेषस्यायस्कांतादाविवदेवतासंनिधानविशेषनिबंधनत्वस्य "रेतोधातुर्वटकणिके" त्यादौव्यवस्थापित

उप० । नहवाऋतेप्राणाद्रेतःसिच्यतेयद्वाऋतेप्राणाद्रेतःसिच्येतपूयेन्नसंभवे

त्वात् । अन्यथास्वभाववादानुसरणप्रसंगादितिभावः । यान्संधीन् संधिनामकप्रादुर्भावानधिदैवतमवोचाम तान्यध्यात्मंप र्वाणि परज्ञानात् । पर्वनामकानि । पर्वगतानि । अस्थ्नांमज्ज्ञांपर्वणामित्येतस्यत्रयस्य त्रयगतस्यहरेरूपाणि इतो दक्षभागे । पंचशतानिचत्वारिंशच्चभवंति । पृथगशीत्युत्तरशतसंख्याकत्वात् । इतोवामभागेपंचशतानिचत्वारिंशच्चभवति । तद्भागद्वय स्थंरूपंमिलितमशीतिसहस्रमशीत्युत्तरसहस्रंभवति । विष्णुनामाक्षरगतरूपाणामधिष्ठानांतरमुच्यते ॥ अशीतीति ॥ अर्केली नत्वेनादृश्यत्वेनस्थिताभगवत्प्रादुर्भावाः अशीत्युत्तरसहस्रंवाइत्यर्थः । सूर्याधिष्ठितानांविष्णुनामाक्षरादिरूपाणांपुरुषेवस्थानं तदुच्चार्यबृहतीसहस्रप्रतिपाद्यत्वं तदधीनत्वं तदनुष्ठेययज्ञाधिष्ठितत्वं सूर्यप्रवर्त्यदिवसाधिष्ठितत्वंचोच्यते ॥ अशीतीति ॥ अशीत्युत्तरसहस्रसंख्याकाअर्कगताविष्णुनामाक्षररूपविशेषाःपुरुषेस्थित्वाबृहतीः सहस्रबृहतीः संपादयंति । बृहती र्बृहत्यः बृहतीस्थाः तन्नामकाः तद्वाच्याश्च । अहर्यज्ञंचसंपादयंति । तदर्थंपुरुषाधिष्ठानंविनासाक्षादह रहानि दिनानिसंपादयंति । सएषो स्थ्यादिगतो क्षरसंमानः विष्णुनामाक्षरगतरूपसमसंख्याकः । चक्षुर्मयइत्यादेरुक्तएवार्थः ॥ ४ ॥ अक्षराणामक्षरगत

उप० । द्यान्त्संधीनधिदैवतमवोचामपर्वाणितान्यध्यात्मंतस्यैतस्यत्रयस्यास्थ्नांमज्ज्ञांपर्वणामितिपंचेतश्चत्वारिंशच्छतानिपंचेतस्तदशीतिस हस्रंभवत्यशीतिसहस्रंवाअर्केलिनोबृहतीरहरभिसंपादयंतिसएषोक्षरसंमानश्चक्षुर्मयःश्रोत्रमयश्छंदोमयोमनोमयोवाङ्मयआत्मासयएवमेतमक्षरसं मानंचक्षुर्मयंश्रोत्रमयंछंदोमयंमनोमयंवाङ्मयमात्मानंवेदाक्षराणांसायुज्यंसरूपतांसलोकतामश्नुतेपुत्रीपशुमान्भवतिसर्वमायुरेति ॥ २ ॥ (३४)

रूपाणांअब्रह्मविद्यात्वप्रतीतेःकौंठरव्यइत्यारभ्यसर्वमायुरित्यंतस्यखंडस्यतात्पर्यमाह ॥ एवमित्यादिना ॥ यथाह्रस्वमांडूके योक्तप्रकारेणविंशत्युत्तरसप्तशतरूपाणिज्ञात्वाविमुच्यते एवंकौंठरव्योक्तप्रकारेणतान्यशीत्युत्तरसहस्ररूपाण्युपास्यमुच्यतइति योजना । कौंठरव्योक्तंप्रकारमेवाह ॥ तस्येति ॥ अक्षरपदेनाक्षरोष्मसंधीनांत्रयाणांग्रहणं । वर्णेषु अक्षरोष्मसंधिषु । अन्येषु अन्यनामाक्षरोष्मसंधिषु । अशीत्युत्तरसहस्ररूपंस्थितं । पंचाशत्संख्याकेष्वपिवर्णेषु तावत्संख्यानिरूपाणिवर्ततइत्यर्थः । एतेन त्रीणिषष्टिशतानीत्यारभ्यसंधीनामित्यंतस्यतात्पर्यमुक्तंभवति । यान्यक्षराण्यधिदैवतमवोचामास्थीनितानीत्यादेस्तात्पर्यं ॥ देहेषुपृथङ्मज्जास्थिपर्वसु ॥ रूपाणिविष्णोस्तावंतीति ॥ मज्जास्थिपर्वसुपृथक्पृथक्षष्ट्युत्तरशतसंख्ययाविद्यमानानि रूपाणिमिलित्वातावंति अशीत्युत्तरसहस्राणीत्यर्थः । अत्राध्यात्ममित्यस्यतात्पर्यं देहेष्विति ॥ अधिदैवादिस्वस्थानांतरमितिसूचनायपृथगिति । यद्वापूर्वखंडेस्थिस्थानामेवपर्वगतत्वादंतर्भावविवक्षयाविंशत्युत्तरसप्तशतत्वमुक्तं अधुनातुमज्जास्थिपर्वसुविष्णोस्तावंतिरूपाणिपृथक्पृथक्विवक्षयोच्यंतइत्यर्थः । मज्जासुविशेषसन्निधानद्योतनायानंतरोक्तायामज्जायाःप्रथमंग्रहणं । तेन एषहवैसंप्रतिप्राणइत्यादेस्तात्पर्यसूचितं । यद्वातावत्संख्यानीत्येतद्देहेष्वित्युत्तरेणसंबध्यते । देहेषुतावत्संख्याकानिरूपाणिवर्ततइत्यर्थः । तेन अशीतिसहस्रंवाअर्कलिनोबृहतीरहरभिसंपादयंतीत्यत्राशीतिसहस्ररूपाणांशरीरेस्थित्वाबृहतीसहस्र

॥ १९२ ॥

भा० । एवमुक्तप्रकारेणतस्याह्यक्षरनामकं । अशीत्युत्तरसाहस्ररूपंवर्णेषुसंस्थितं । विष्णुनाम्नोथवान्येषुपंचाशत्संख्यकेष्वपि । तावत्संख्यानिदेहेषुपृथङ्मज्जास्थिपर्वसु । रूपाणिविष्णोस्तावंति

संपादकत्वंयदुक्तंतस्यतात्पर्यमुक्तंभवति । मज्जास्थिपर्वस्वित्यादेरुक्तएवार्थः । मज्जास्थिपर्वगताशीत्युत्तरसहस्ररूपाण्येवदेहगततयोच्यंतइतिनमंतव्यमितिभावेनदेहगतरूपाण्यन्यानि मज्जादिगतान्यन्यानीतिसूचयितुंदेहगतेभ्यःपृथङ्मज्जास्थिपर्वसुतावंतिरूपाणीत्युक्तं । कुतएवमुक्तवक्ष्यमाणबहुस्थानेष्वशीत्युत्तरसहस्ररूपाणामंगीकार्यत्वमित्यतउक्तंचेष्टकानीति ॥ अक्षरनियामकत्वान्मज्जादिषुस्थित्वारेतआद्यात्मनापरिणामनियामकत्वात्पुरुषेस्थित्वावाक्प्रेरकत्वाद्यज्ञप्रवर्तकत्वात्सूर्यादौस्थित्वाहरादिप्रवर्तकत्वादितिभावः । अशीतिसहस्रंवार्कलिनइत्यादेस्तात्पर्यमर्केति ॥ अर्कस्थितेत्यनेनार्केलीनतयास्थितत्वादर्कलिनामानीत्युक्तंभवति । बृहतीरित्यस्यार्थोबृहत्याख्येति ॥ अहरभिसंपादयंतीत्यस्यार्थस्तान्येवाह्नांसंपादकानीति ॥ सएषोक्षरसंमानइत्यस्यार्थस्तान्यक्षरमितानीति ॥ तान्यस्थ्यादिस्थितरूपाणि अक्षरमितानीत्यर्थः । सयएवमेतदक्षरसमानमित्यादेरर्थस्तान्युपास्येति ॥ एवंखंडद्वयंप्रमाणेनव्याख्यायपूर्वखंडेतस्यैतस्यात्मनःप्राणऊष्मरूपमित्यत्रतच्छब्देनप्रकृतसंघातपरामर्शेतस्योष्माक्षरप्रतिपाद्यत्वमयुक्तं भगवन्मात्रपरामर्शेप्रकृतत्यागइत्यतोव्याचष्टे ॥ तस्यैतस्येति ॥ तस्यैतस्यात्मनइत्यनूद्यतस्यात्मनइत्यस्यार्थस्तस्यशरीराख्यस्यात्मनइति ॥ आत्मनइत्येतदावर्ततइतिभावेनानुवादपूर्वमर्थमाह ॥ आत्मनोयआत्माआदानादिकर्तातस्येति ॥ विशेष्यप्रदर्शकमेतस्येत्येतदर्थकथनपूर्वमनुवदति ॥ परमात्मनएतस्येति ॥ अस्थ्नांमज्ञांपर्वणामितित्री

भा० । चेष्टकानि(सु)पृथक्पृथक् । अर्कस्थितबृहत्याख्यरूपाण्यह्नांचसर्वशः । संपादकानितान्येवतान्यक्षरमितानिच । अस्थ्यादिस्थितरूपाणितान्युपास्यविमुच्यतइतिच । तस्यैतस्यात्मनस्तस्यशरीराख्यस्यात्मनोयआत्माआदानादिकर्तातस्यपरमात्मनएतस्या

णिइत्यादिवाक्यमस्थ्यादिनामकभगवद्रूपपरतयाव्याख्यातं । आथ्यादिपरमेवकिंनस्यादित्यतआह ॥ अस्थ्नामिति ॥ विंशत्युत्तरसप्तशतसंख्याकतयोक्तान्यप्यस्थ्यादीनिकिंनस्युरित्यतआह ॥ अस्थ्यादीन्येवचेदिति ॥ त्रीणिषष्टिशतान्यक्षराणामित्यादिनोष्माक्षरसंधिनामकान्युक्तानिकानितानिविष्णुनाम्नीत्यतआह ॥ ष् ण् ष्ण् इत्येतानीति ॥ षइत्यूष्म णइतितदतिरिक्तमक्षरं ष्णइतिसंधिरित्यर्थः । तर्ह्यूष्मणामक्षराणांसंधीनामितिबहुवचनानुपपत्तिरित्यतआह ॥ तद्गतेति ॥ तद्गतभगवद्विक्षयाबहुवचनं । तथाचोष्मणामूष्माक्षरगतानांरूपाणामितिभावः । उपसर्गमात्रंवीत्याहुः । केचिन्नामष्णुमात्रकंषकारंचवर्णोंपूर्वोत्तरावपीतिपक्षानुसारेणष्ण्ष्ण्इत्येतानीत्युक्तं क्वचिद्विष्णुष्णुरित्येतानिभाष्यटीकयोःपाठःतत्रोपसर्गस्याप्यनुवादमात्रमितिज्ञेयं । अहानितानिरात्रयस्तास्तेसंधयइत्युक्ताहरादिशब्दान्निर्वक्ति ॥ अहार्यत्वादिति ॥ अहार्यत्वात्तिरस्कार्यत्वात् संधानाद्दिवाराज्योःसंधिकरणात् यान्संधीन्अवोचामतेसंधयः । यानूष्मणोवोचामरात्रयस्ताः । तान्यक्षराणितान्यहानीत्येतद्व्याचष्टे ॥ संध्यूष्मेति ॥ साशीतिकसहस्रक मशीत्युत्तरसहस्रसंख्याकानिविष्णोरूपाणीत्यर्थः । यान्यक्षराण्यस्थीनितानीत्यध्या

भा० । स्थ्नांमज्ञांपर्वणांमिलितानामपिविंशोत्तरसप्तशतत्वोक्तेस्तत्रविष्णुरूपाण्येवोच्यंतइतिसिद्धं । अस्थ्यादीन्येवचेदशीत्युत्तरसहस्राणि संतिहिविष्णुष्णुरित्येतानिविष्णुनामगान्यूष्माक्षरसंधिनामकानितद्गतभगवद्रूपाणिमुख्यतस्तन्नामकानि । अहार्यत्वादहर्नामारात्रिनामारतिप्रदः । संधानात्संधिनामासौस्वयंनारायणःप्रभुः । संध्यूष्माक्षरगाण्यस्यविष्णोरूपाणिसर्वशः । संध्यारात्रिदिवास्थानिसाशीतिकसहस्रकं ।

त्मप्रकरणंव्याचष्टे ॥ तान्येवेति ॥ पर्वशब्दव्याख्यानपूर्वमस्थिमज्जाशब्दौचनिर्वक्ति ॥ परज्ञानादिति ॥ वागतिगंधनयोरितिधातोर्वातेर्गत्यर्थत्वादज्ञानादित्युक्तं । तुशब्देनपरज्ञानादेवनतुपूर्वाभेदादित्यर्थः । अस्थानादस्थिरत्वान्मदनान्मदजनकत्वात् । एवकारेणनतुमस्जधातुप्रकृतिकमज्जाशब्दवाच्यप्रसिद्धमज्जाभेदेनेतिसूचयति । एषवैमज्जेत्यस्यतात्पर्यमाह ॥ व्यक्तिरिति ॥ तस्यविष्णोर्व्यक्तिर्विशेषसन्निधानं । एषवैसंप्रतिप्राणोमज्जेत्यस्यार्थःप्राणइति ॥ यन्मज्जैतद्रेतइत्यस्यार्थःमज्जैवरेतोभवतीति ॥ यन्मज्जैतद्रेतइत्यस्यार्थांतरंरेतसिस्थोविशेषतः प्राणइति । मज्जासुस्थितःप्राणइत्यर्थः । नहवाऋतेप्राणाद्रेतःसिच्यतइत्यत्रप्राणात्प्राणेनयुक्तंरेतःसिच्यतेगर्भत्वंप्राप्नोतीत्यर्थतावदाह ॥ तेनहीति ॥ येनकारणेनरेतसिविशेषसन्निधानं तेनकारणेनप्राणेनयुक्तंतद्रेतःसर्वदानियमेनगर्भत्वंव्रजेदितियोजना । तथाचरेतसःसामर्थ्यविशेषदर्शनात्प्राणविशेषसन्निधानंज्ञायतइतिभावः । ननुप्रायोऽधुनारेतसोगर्भत्वाप्राप्तेःकथंसामर्थ्यमित्याशंकावारकत्वेन नहवेतिसमग्रंवाक्यंव्याचष्टे ॥ यदीति ॥ प्राणाद्रेतेप्राणसन्निधानमृतइत्यर्थः ॥ प्राणोरेतसियदिनेति ॥ रेतोनहवासिच्यतइत्यस्यार्थस्तद्रेतइति । क्वचित्कलियुगे मानुषादिषुसर्वदातद्रेतोनगर्भत्वंव्रजेदित्यर्थः । उत्सर्गतोहिकारणानांकार्यकरत्वंक्वचित्सहकारिविरहवशात्कार्याभावःनैतावताशक्त्यभाव

भा० । तान्येवास्थिषुमज्जासुपर्वस्वपिचसर्वशः । परज्ञानात्तुपर्वाणिविष्णोरूपाणितानिहि । अस्थानान्मदनाच्चैवह्यस्थिमज्जाभिधानिच । व्यक्तिर्मज्जासुतस्यैवप्राणोमज्जासुसंस्थितः । मज्जैवरेतोभवतिरेतसिस्थोविशेषतः । प्राणस्तेनहितद्रेतोयुक्तंप्राणेनसर्वदा । यदिप्राणोनतद्रेतोनगर्भत्वंव्रजेत्कचित् ।

निश्चयइतिभावः । एतेनैवयद्वाऋतेप्राणाद्रेतःसिच्येतपूयेदित्यपिव्याख्यातप्रायं । प्रकारांतरेणव्याचष्टे ॥ विशेषेति ॥ प्राणादृतइत्यस्यार्थः विशेषप्राणसंबंधवर्जितानीति । रेतोऋतेरेतोव्यतिरिक्तमित्यस्यार्थः ॥ मांसादीनीति ॥ नसंभवेदित्यस्यार्थोनगर्भत्वमिति । अतएव विशेषसंबंधवर्जनादेव । उपसंहरति ॥ अतइति ॥ भवतुप्राणस्यरेतसिसन्निधानमतएवमज्जासु तावताभगवतोमज्जास्थत्वंकुतइत्यतःप्रवृत्तस्यएषवैसंप्रतिप्राणइत्यस्यैषपरमात्माप्राणःप्राणेस्थितइत्यर्थमाह ॥ प्राणेचेति ॥ त तश्चकिमित्यतआह ॥ तस्मादिति ॥ विशेषतइत्यनुवर्तते । एषवैसंप्रतिप्राणइत्यादेःसंगतिमाह ॥ मज्जास्विति ॥ त्रीणिषष्टि शतान्यक्षराणामित्यादौभगवद्रूपाण्येवोच्यंतइतिप्रमाणेनोक्तंयुक्तिमप्याह ॥ अशीतीति ॥ वर्णानामक्षराणामूष्मणांसंधिना मिलितानामप्यशीत्युत्तरसहस्राभावादित्यर्थः । तत्स्थरूपाणि अक्षरोष्मसंधिनिष्ठरूपाणि । तत्संख्याकान्यशीत्युत्तरसहस्रसंख्याकानि । अर्कलिनइत्येतदप्रतीतेर्व्याचष्टे ॥ अर्कइति ॥ अर्कगतरूपाणांबृहतीसंपादकत्वंकथमित्यतआह ॥ तएवेति ॥ तदुपपादयति ॥ वागिति ॥ नकेवलंसूर्येस्थितानांविष्णुनामाक्षरगतानांतत्प्रतिपाद्यरूपाणांपुरुषेस्थित्वाबृहतीसंपादकत्वं किंतु

भा० । विशेषप्राणसंबंधवर्जितान्यतएवहि । नमांसादीनिगर्भत्वंयांत्यतःसहिरेतसि । विशेषेणस्थितःप्राणःप्राणेचैवविशेषतः । स्थितोनारायणोदेवस्तस्मान्मज्जासुचस्थितइतिच । मज्जास्वधिकसन्निधानज्ञापनार्थमिदंवचनं । अशीत्युत्तरसहस्रवर्णानामभावाच्चतत्स्थविष्णुरूपाण्येवतत्संख्यानीतिसिद्धं । अर्केनिलीनत्वेनादृश्यत्वेनस्थिताभगवत्प्रादुर्भावाअर्कलिनः । तएवशरीरेस्थित्वासहस्रंबृहतीःसंपादयंति । वाक्प्रेरकत्वा

बृहतीस्थत्वंतद्वाच्यत्वंचेतिभावेनाशीतिसहस्रंवार्कलिनोबृहतीरित्युक्तं । तद्विभक्तिव्यत्ययेनव्याचष्टे ॥ विष्णुनामेति ॥ यानिसूर्यगतानिपुरुषेस्थित्वाबृहतींसंपादयंतितान्येवविष्णुनामाक्षरगतानितत्प्रतिपाद्यानिअशीत्युत्तरसहस्ररूपाणिबृहत्यःतदेव ताःबृहतीसहस्रगताः तत्प्रतिपाद्यदेवताश्चेत्यर्थः । तत्रयुक्तिर्विष्णुनामार्थत्वादेवबृहतीसहस्रस्येति ॥ अहरभिसंपादयंतीत्येतद्व्याचष्टे ॥ एतान्येवेति ॥ सूर्यगतानिच । अहःशब्दस्यात्रविवक्षितमर्थमाह ॥ अहःशब्देनेति ॥ उक्तार्थेप्रमाणमाह ॥ यज्ञानामिति ॥ २ ॥ एवंविष्णुनाम्निऊष्मतदतिरिक्ताक्षरसंधिगतरूपसमुदायमुक्त्वासिंहावलोकितन्यायेनपुनःपूर्वोत्तरवर्णसंहितादेवतास्वरूपंवक्तुंतस्याधिष्ठानमुच्यते ॥ चत्वारइति ॥ बाध्वः संसारबाधवद्भिःप्राप्योवायुः । शरीरपुरुषः छंदःपुरुषो वेद पुरुषो महापुरुषइतिचत्वारः पुरुषाइत्याह । यंशरीरपुरुषइत्यवोचामसोयंसन्निहितोदैहिकःसर्वदेहाभिमान्यात्माशिवएव तस्य शिवस्ययोऽशरीरःप्राकृतदेहरहितःप्रज्ञात्माप्रज्ञास्वरूपोनिरुद्धःसोयंरसःसारउपजीव्यःनियामकः । यंछंदःपुरुषइत्यवोचामसो

भा० । द्विष्णुनामार्थवत्त्वादेवचबृहतीसहस्रस्यतदेवताश्चैतान्येवाशीत्युत्तरसहस्ररूपाणिएतान्येवाहःप्रवर्तकानिच । अहःशब्देनयज्ञोदिवसश्चोभावप्यभिप्रेतौ । यज्ञानांदिवसानांचसाशीतिकसहस्रकैः । विष्णुःप्रवर्तकोरूपैर्बृहत्युक्तस्यचांजसा । बृहत्युक्तेनवाच्यानिरूपाण्येतान्यधीशितुरितिच ॥ २ ॥ (३४)

उप० । चत्वारःपुरुषाइतिबाध्वःशरीरपुरुषश्छंदःपुरुषोवेदपुरुषोमहापुरुषइतिशरीरपुरुषइतियमवोचामसयएवायंदैहिकआत्मातस्ययोयमशरीरःप्रज्ञात्मासरसश्छंदःपुरुषइतियमवोचामा

क्षरसमाम्नायः सर्ववर्णाभिमानित्वादक्षराख्यःसएषएवतस्यछंदःसहितस्यैतस्याक्षरसमाम्नायस्य । अइत्याक्रियमाणत्वादकारो वासुदेवोरसः । वेदपुरुषइतियमवोचामसपुरुषः येनतत्प्रेरणयावेदान्तत्प्रभेदंऋग्वेदंयजुर्वेदंसामवेदंचपुमान्वेदससर्ववेदाभिमानीगरुडएवेतियावत् । तस्यवेदपुरुषसंज्ञितस्यैतस्यवेदाभिमानिनोगरुडस्यज्ञोनेनपरिपूर्णत्वाज्ज्ञानेनपूर्णत्वात्ब्रह्मार्त्विक्स्थतत्वाच्चब्रह्मसंकर्षणोरसः । तस्माद्ब्रह्मार्त्विजोवेदाभिमानिगरुडनियामकसंकर्षणाधिष्ठानत्वात् उत्तमप्रतिमालाभायब्रह्मिष्ठंवेदार्थभूतब्रह्मज्ञानिनंयज्ञेब्रह्माख्यमृत्विजंकुर्वीत योयज्ञस्योल्बणंशेषंपश्येत् । दृष्ट्वाचतत्समीकुर्यादितियावत् । उक्तंचब्रह्मणोयज्ञविनिष्टिसंधायकत्वंछांदोग्येचतुर्थाध्यायेचरमखंडे तस्मादेवंविदमेवब्रह्माणंकुर्वीत । नानेवंविदमित्यंतेन । महापुरुषइतियमवोचाम ससंवत्सरएवसंवसतांस्वहितवृत्त्यावसतांरतिदातृत्वात्संवत्सरनामाब्रह्मैवसंवसइतिप्रदत्वमेवोपपाद्यते ॥ प्रध्वंसयन्निति ॥ अन्यानिवेदविहितवृत्त्यानवसंति यानिभगवद्विरोधीनिभूतानिप्राणिजातानितानिप्रध्वंसयंस्तमसिपातयन् अन्यानिभूतानिवेदविहितवृत्त्यासम्यग्वसंति भगवद्भक्तिज्ञानादियुक्तानिप्राणिजातान्यैक्यानिभावयन्मोक्षेस्थानैक्यमत्यैक्ययुक्तानिकुर्वन्संवत्सरएवेत्यन्वयः । तस्यमहापुरुषसंज्ञितस्यैतस्यसंवत्सराख्यस्यब्रह्मणः आदित्वात्तत्तत्वात्नियमनायसर्वत्रविद्यमानत्वान्नियामकत्वा

उप० । क्षरसमाम्नायएवतस्यैतस्याकारोरसोवेदपुरुषइतियमवोचामयेनवेदान्वेदऋग्वेदंयजुर्वेदंसामवेदंतस्यैतस्यब्रह्मारसःतस्माद्ब्रह्माणंब्रह्मिष्ठंकुर्वीतयोयज्ञस्योल्बणंपश्येन्महापुरुषइतियमवोचामसंवत्सरएवप्रध्वंसयन्नन्यानिभूतान्यैक्यानिभावयन्नन्यानितस्यैतस्यासा

दादित्यनामाप्रद्युम्नोरसः । अधिष्ठानभेदेपिनभगवद्रूपाणांभेदोमंतव्यइतिभावेनोच्यते ॥ सयश्चायमिति ॥ सयोयंदेहेसन्निहितोशरीरःप्रज्ञात्माऽनिरुद्धःयश्चासावादित्येस्थितःप्रद्युम्नः एतत्स्थानद्वयगतंभगवद्रूपमेकमितिविद्यात् । चशब्दात्सयअकारोवासुदेवोयश्चब्रह्मासंकर्षणःएकमेतदितिविद्यादितिसमुच्चिनोति । तथातद्रूपचतुष्टयंचैकमितिविद्यात् । तथैतद्रूपचतुष्टयंपूर्ववर्णप्रतिपाद्यमेकंनारायणाख्यंरूपमेवेतिविद्यात् । तथोत्तरवर्णप्रतिपाद्यंभगवत्प्रादुर्भावजातमपिपरस्परंपूर्ववर्णप्रतिपाद्यनारायणेनसंहिताप्रतिपाद्यानिरुद्धादिरूपचतुष्टयेनचैकमितिविद्यात् । अनिरुद्धप्रद्युम्नयोरैक्यमुपपाद्यते ॥ तस्मादिति ॥ आदित्यगतस्यपुरुषगतेनप्रद्युम्नेनैक्यादेवपुरुषंपुरुषंप्रति प्रतिपुरुषमादित्योभिमुखोभवतीत्यर्थः । यद्वाप्रतिपुरुषमादित्यश्चक्षुषिनियामकोभवतीत्यर्थः । यद्वाचतुर्णामैक्यमनेनोच्यते । तस्मात्पुरुषगतेनैक्यादेवादित्यइत्युपलक्षणमादित्यगतःप्रद्युम्नोवेदगतःसंकर्षणःअक्षरगतोवासुदेवश्चप्रतिपुरुषमुपकारकोभवति । आदित्यगतःप्रकाशकोन्योज्ञापकइत्यर्थः । यद्वापूर्वोत्तरवर्णसंहिताप्रतिपाद्यानांसर्वेषामप्यैक्यमनेनोच्यते । तस्मात्पुरुषहृदयमध्यगतेनानिरुद्धेनैक्यादेवादित्यादिःसर्वोपिप्रतिपुरुषंनियामकोभवतीत्यर्थः । सूर्यांतस्थस्यकारणत्वापरपर्यायमादित्वंतत्तत्वंनियामकत्वंद्योतकत्वंचोक्तं । तत्रसंमतिरुच्यतेतदपीति । अतिशयेनचित्तचित्तरंतदेवाकारलोपेनचित्रं । चेतनेभ्योविशिष्टंदेवानामननाच्चेष्टनादीशितृत्वात्कर्तृत्वादनीकं मित्रस्यवरुणस्याग्नेश्चक्षुश्चक्षयवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः ।

तीतिचक्षुर्ज्ञानप्रदं । चष्टइतिवाचक्षुः । अपरोक्षतोज्ञातृसूर्यगतंब्रह्मोदगादुदैत् । जगतोजंगमस्यतस्थुषःस्थावरस्यचस्थावरजंगमात्मकानांसर्वजीवानामादानात्प्रलयेऽन्यदाप्यत्तृत्वाच्चात्मा सूरिप्राप्यत्वात्सूर्यनामासूर्यगोभगवान् द्यावापृथिवीअंतरिक्षंचप्रकाशेन । आअप्राः आसमंतादप्राःपूरयामासेतिऋषिणोक्तमित्यर्थः । उपसंहियते ॥ एतामिति ॥ पूर्ववर्णगतेननारायणेनोत्तरवर्णगतेन प्रादुर्भावसमुदायेन । संधिगतैरनिरुद्धादिभिश्चतुर्भिरेतामेवसंधीयमानांसंहितामनुविधं अनुविधांसमीचीनांमन्यतइतिस्माहबाध्वइत्यर्थः । संहितादेवतायानकेवलमुक्ताधिष्ठानमात्रं किंत्वनंतान्यधिष्ठानानितदनुबद्धानीतिभावेनोच्यते ॥ एतंह्येवेति ॥ एतंमहापुरुषगतमादित्यनामानंसौरमंत्रोक्तमेव बह्वृचाऋग्वेदिनोमहत्युक्थेबृहतीसहस्रेमीमांसंतेजानंति तद्वाइदंबृहतीसहस्रंसंपन्नंतस्ययानिव्यंजनानितच्छरीरमितिखंडे तद्योहं सोसाविति बृहतीसहस्रप्रतिपाद्यस्यसूर्यगतत्वमुक्त्वा तदुक्तमृषिणासूर्य आत्माजगतस्तस्थुषश्चेत्यस्यैवमंत्रस्योदाहरणात् । चक्षुर्मित्रस्यवरुणस्याग्नेरिति अग्निनियामकत्वेनोक्तमेतमेवाध्वर्यवोयजुर्वेदिनोऽग्नौमीमांसंतेऽग्नेरध्वर्युसंपाद्यत्वात् । छंदोगाएतंमहाव्रतेमहाव्रताख्यकर्मांगभूतस्तोत्रेतत्संबंधीष्टकाचितौचमीमांसंते । महाव्रते आदित्यगतस्यैवएषतपन्नेवास्मीत्युक्तत्वात् । सामान्यादित्यादितिछांदोग्येसाम्नामादित्यानुबंधोक्तेश्च । आप्राद्यावापृथिवीअंतरिक्षमित्युक्तमेतमेवास्यांपृथिव्यांएतमेवदिविएतमेवांतरिक्षस्थेवायावेतमेवाकाशेवरुणस्यचक्षुरित्युक्तमेवाप्सुतस्थुषआत्मेत्युक्तमेत

उप० । आप्राद्यावापृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्चेत्येतामनुविधंसहितांसंधीयमानांमन्यइतिहस्माहबाध्वएतंह्येवबह्वृचामहत्युक्थेमीमांसंतएतमग्नावध्वर्यवएतंमहाव्रतेछंदोगाएतमस्यामेतंदिव्येतंवायावेतमाकाशएतमप्स्वेत



मेवौषधीष्वेतंवनस्पतिषु । अतएवतदभिमानित्वादेतंचंद्रमस्येतंनक्षत्रेषुजगतआत्मेत्युक्तमेतंसर्वेषुभूतेषुअनीकमित्युक्तमेतमेवनियामकत्वादिगुणबृंहितत्वाद्ब्रह्मेत्याचक्षतेइत्यर्थः । यद्वाछंदःपुरुषगतंवेदपुरुषगतमेतमेवबह्वृचामहत्युक्थेवेदसारभूतेबृहतीसहस्रेऽस्यांपृथिव्यांतदनुबंधिष्वोषधिवनस्पतिषु अग्नावप्सुचमीमांसंते एतमध्वर्यवोग्नावंतरिक्षस्थेवायावाकाशेचमीमांसंते । छंदोगाएतंमहाव्रतेदिवितदनुबंधिषुचंद्रनक्षत्रेषुएवंसर्वेषुभूतेषुमीमांसंतइत्यर्थः । तथाहिछंदोगश्रुतिः प्रजापतिर्हिलोकानभ्यतपत् । तेषांतप्तानांरसान्प्रावृहन् अग्निंपृथिव्यावायुमंतरिक्षादादित्यंदिवः । एतास्तिस्रोदेवताअभ्यतपत्तासांतप्यमानानांरसान्प्रावृहयत् । अग्नेर्ऋचोवायोर्यजूंषिसामान्यादित्यादिति । यद्वाएतंशरीरपुरुषशब्दितशिवांतर्गतमेवाष्टमूर्तित्वात्क्षित्यादिषुपंचसुतदनुबंधिष्वोषधिवनस्पतिषु चंद्रेतदनुबंधिषुनक्षत्रेषु सूर्यांतर्गतत्वादेवसौरमंत्रोक्तप्रकारेणप्रथमयोजनारीत्यामहदुक्थादिषुसर्वेषुस्थानेष्वाचक्षतइतियोज्यं । पूर्ववर्णप्रतिपाद्योनारायणउत्तरवर्णप्रतिपाद्यःसर्वोपिप्रादुर्भावश्चैतंह्येवेत्येतच्छब्देनपरामृश्यसर्वांतर्गतत्वेनोच्यतइत्यवगंतव्यं । सएषभगवान्संवत्सरसमानःसंवत्सरसंज्ञितचतुर्मुखरूपसमसंख्याकः । चतुर्मुखस्यानंतमूर्तित्वात्तावद्रूपैस्तन्नियामकः । अतएवपूर्णदर्शनशक्त्यादिगुणकः सयएवमेतंसंवत्सरसमानंचक्षुर्मयत्वादिगुणविशिष्टमात्मानंपरस्मा अयोग्यायशंसतितस्यवेदादुग्धदोहाभवंतीत्युत्तरखंडेनान्वयः । चत्वारःपुरुषाइतिबाध्वइत्यत्रबाध्वःकश्चनऋषिरित्यन्यथाप्रती

उप० । मोषधीष्वेतंवनस्पतिष्वेतंचंद्रमस्येतंनक्षत्रेष्वेतंसर्वेषुभूतेष्वेतमेवब्रह्मेत्याचक्षतेसएषसंवत्सरसमानश्चक्षुर्मयःश्रोत्रमयश्छंदोमयोमनोमयोवाङ्मयआत्मासयएवमेतंसंवत्सरसमानंचक्षुर्मयंश्रोत्रमयंछंदोमयंमनोमयंवाङ्मयमात्मानंपरस्मैशंसति ॥ ३ ॥ (३५)

तेर्व्याचष्टे ॥ संसारेति ॥ एतेनबाध्यंतइतिबाधाःतैर्वायतेप्राप्यतइतिबाध्वःइतिमूलार्थइत्युक्तंभवति । एतदुपपादयति ॥ सहीति ॥ शरीरपुरुषइतियमवोचामसदैहिकआत्मेत्यादिवाक्यचतुष्टयंव्याचष्टे ॥ सर्वदेहेत्यादिना ॥ तस्ययोयमशरीरः प्रज्ञात्मासरसः । तस्यैतस्याकारोरसःतस्यैतस्यब्रह्मारसः तस्यैतस्यासावादित्योरसइतिवाक्यचतुष्टयंक्रमेणव्याचष्टे ॥ सारःशिवस्येत्यादिना ॥ अयमित्यस्यार्थोदेहस्थितइति । ज्ञानबृंहणाज्ज्ञानपूर्णत्वात् । यद्वावेदनियामकत्वेनतदध्येतृणांज्ञानेनपूरणात् । ब्रह्मशब्दस्यार्थांतरं ब्रह्मर्त्विगिति । तस्माद्ब्रह्माणंब्रह्मिष्ठमित्यस्यार्थः तस्मादिति । हियस्माद्ब्रह्मर्त्विजिविशेषेणहरिःस्थितस्तस्मात्तस्योत्तमाधिष्ठानलाभायब्रह्मिष्ठंब्रह्माणंकुर्यादित्यर्थः । यआदित्यसंस्थितःप्रद्युम्नोभगवान्हरिःसएवब्रह्मणश्चतुर्मुखस्यसारभूतइतियोजना । एवशब्देनप्रसिद्धमादित्यंव्यावर्तयति । आदित्यशब्दंनिर्वक्ति ॥ सह्यादिरिति ॥ आदित्वादादिःततत्वात्नियामकत्वाद्यइत्यर्थः । सयश्चायमशरीरःप्रज्ञात्मायश्चासावादित्येएकमेवतदितिवाक्यंव्याचष्टे ॥ सएवेति ॥ यआदित्यगः

भा० । संसारबाधितैःप्राप्योवाध्वोवायुरुदाहृतः । सहिमोक्षप्रदोविष्णोराज्ञयासउवाचह । सर्वदेहाभिमानीतुशरीरपुरुषःशिवः । सर्ववर्णाभिमानीचशेषोसौछांदसःपुमान् । सर्ववेदाभिमान्येवगरुडोवेदपूरुषः । संवत्सराभिमानीतुब्रह्मैवहिमहापुमान् । सारःशिवस्यानिरुद्धनामादेहस्थितोहरिः । अइत्याक्रियतेयस्माद्वासुदेवोह्यकारकः । शेषस्यसारःसविभुर्ब्रह्माख्योज्ञानबृंहणात् । संकर्षणाख्यस्तुहरिःसारःसगरुडस्यच । ब्रह्मर्त्विक्संस्थितश्चासौतस्माद्ब्रह्मिष्ठमेवहि । कुर्याद्ब्रह्मर्त्विजंतस्मिन्विशेषेणस्थितोहरिः । ब्रह्मणःसारभूतस्तुप्रद्युम्नोभगवान्हरिः । सएवादित्यसंस्थश्च सह्यादिर्जगतोविभुः । ततश्चसर्वभूतेषुजीवानांविनियामकः । सएवादित्यगोविष्णुर्यःप्रद्युम्नाभिधोहरिः । सएव

प्रद्युम्नाभिधोहरिः यश्चानिरुद्धतनुःसर्वदेहेषुस्थितः ससएकएवेत्यन्वयः । द्वितीयएवशब्दस्तुआदित्यगोविष्णुरेवनतुप्रसिद्धोमंडलांतर्गतःसूर्यइत्यवधारकः । सयश्चायं यश्चासाविति चशब्दसमुच्चययोःसंकर्षणवासुदेवयोरप्यैक्यमनेनोच्यतइत्याह ॥ संकर्षणइति ॥ तद्रूपचतुष्टयमेकमेवविद्यादित्यप्यर्थमाह ॥ एकःसचतुर्विधइति ॥ चतूरूपस्यपूर्ववर्णप्रतिपाद्येननारायणेनाप्यैक्यमनेनोच्यतइत्याह ॥ एकःसचतुर्विधइति ॥ चतुर्विधोप्येकोनारायणइत्यर्थः । उपलक्षणमेतत् । उत्तरार्णप्रतिपाद्यःप्रादुर्भावसमुदायोपिपूर्ववर्णप्रतिपाद्येनसंहिताप्रतिपाद्यैरनिरुद्धादिभिःपरस्परमेकइतिद्रष्टव्यं । अतएवान्येषामपिरूपाणामिति विद्यादित्यभेदमतिदेक्ष्यतितस्मात्पुरुषंपुरुषंप्रत्यादित्योभवतीत्येतदनिरुद्धप्रद्युम्नयोर्देहादित्यगतयोरैक्योपपादकत्वेनव्याचष्टे ॥ प्रतीति ॥ यस्मात्प्रतिपुरुषंयोविष्णुर्नियामकःस्थितोसावेवादित्येस्थित्वाद्योतकएतस्मादुभयगतयोरैक्यादेवप्रतिपुरुषंमांप्रतिमांप्रतीतिद्योतकइत्यन्वयः । यद्वाएतस्मात्पुरुषादित्यगतयोरैक्यादेवादित्यगतोविष्णुःप्रतिपुरुषंचक्षुषिनियामकःस्थितइत्यर्थः । यद्वक्ष्यति सूर्यमंडलगोविष्णुर्देहेचक्षुषिचस्थितइत्यादि । एतेनप्रकारांतरेणव्याख्यातंभवति । चतुर्णामैक्यपरत्वेनापिव्याचष्टे ॥ आदित्यादिष्विति ॥ आदिपदेनवर्णवेदग्रहणं । एतेनादित्यग्रहणमुपलक्षणमितिसूचयति । द्योतकःप्रकाशकोज्ञानहेतुश्चप्रतिप्रति । एतस्मात्पुरुषगतेनैक्यादेवादित्यगतःप्रद्युम्नः वर्णगतोवासुदेवोवेदगतःसंकर्षणश्चप्रतिप्रति प्रतिपूरुषंभवति ।

भा० । सर्वदेहेषुचानिरुद्धतनुःस्थितः । संकर्षणोवासुदेवइत्येकःसचतुर्विधः । प्रतिपूरुषमेतस्मात्स्थितोविष्णुर्नियामकः । आदित्यादिषुचस्थित्वाद्योतकोसौप्रतिप्रति ।

प्रकाशकोज्ञापकश्चभवतीत्यर्थइतिभावः । अनिरुद्धादीनां नारायणस्यप्रादुर्भावानांचैक्यपरत्वेनव्याचष्टे ॥ प्रतिपुरुषमिति ॥ एतस्माच्छरीरेणानिरुद्धेनैक्यादेवविष्णुर्नारायणःवासुदेवःसंकर्षणः प्रद्युम्नःप्रादुर्भावरूपीचप्रतिपुरुषंनियामकोभवतीत्यर्थः । अत्राप्यादित्यग्रहणमुपलक्षणमितिज्ञेयं । मंत्रेचित्रंविचित्रंदेवानामनीकंसेनेत्यर्थप्रतीतेर्यथावद्व्याचष्टे ॥ सचेतनतमत्वादिति ॥ अतिशयेनचित्चित्तरं तदेवाकारलोपेनचित्रमितिभावः । कथंचेतनश्रेष्ठत्वमित्यतोदेवोत्तमत्वादितिभावेनदेवानामनीकमिति प्रवृत्तमितिभावेनोत्तरवाक्यतात्पर्यमाह ॥ मुख्यत्वात्सर्वदेवानामिति ॥ यद्वाचित्रपदंप्रकारांतरेणव्याचष्टे ॥ मुख्यत्वादिति ॥ सर्वदेवानांमध्येमुख्यत्वाच्चचित्रमित्यर्थः । चित्रआश्चर्यइतिधातोःचित्रमद्भुतंश्रेष्ठमितिपर्यायाएतेशब्दाइतिभावः । सुश्चित्रश्रवस्तमइत्यत्रचित्रमद्भुतंश्रवःकीर्तिर्यस्यासौचित्रश्रवाः । अभ्यकीर्तीनांपुरुषाणांमध्यइतिऋग्भाष्यटीकायांव्याख्यातत्वात् । देवानामनीकमित्यस्यार्थः देवानामननादिति । अननात्प्रेरणादन् । ईशितृत्वादी कर्तृत्वात्कमित्यर्थः । उदगादित्यस्यार्थः उदैदिति । मित्रस्यवरुणस्याग्नेश्चक्षुरित्यस्यार्थोज्ञानदत्वादिति । चक्षयतीतिचक्षुर्ज्ञानप्रदइत्यर्थइतिभावः । चष्टइतिचक्षुरित्यप्यर्थमाह ॥ दैवानामिति ॥ कर्मणिषष्ठी एतेन कर्त्रा । यद्वादेवानांमित्रादीनामयंचक्षुश्चक्षुरधिष्ठाता कुतःएतेनचक्षुरधिष्ठितेनदर्शनादित्यर्थः । द्यावापृथिवीअंतरिक्षमाप्राइत्यस्यार्थ आपूरयदिति । जगतस्तस्थुषश्चात्मेत्यस्यार्थः आदानादिति । उपा

भा० । सचेतनतमत्वाद्धिचित्रमित्यभिधीयते । मुख्यत्वात्सर्वदेवानामननादीशितृत्वतः । कर्तृत्वादथनीकंसउदैत्सूर्यस्थितोहरिः । ज्ञानदत्वाच्चदेवानांचक्षुरेतेनदर्शनात् । आपूरयत्सर्वलोकान्प्रकाशेनजनार्दनः । आदाना

दानात्सर्जनात् । प्रलयेप्यन्यदाप्यत्तृत्वाच्चजगतःस्थावरस्यचेतिसर्वजीवानां । एतामनुविधमित्यस्य संहिताप्रतिपाद्यैरनिरुद्धादिभिःपूर्वार्णप्रतिपाद्यनारायणेनोत्तरार्णप्रतिपाद्यप्रादुर्भावैश्चसंधीयमानामित्यभिप्रेत्यव्याचष्टे ॥ एवमिति ॥ एवमुक्तप्रकारेणयदाचतुर्विधोविष्णुःसंहिताज्ञायते पूर्ववर्णस्यनारायणाभिधंरूपंज्ञायते । समस्ताःप्रादुर्भावाश्चरमार्णस्यदेवताज्ञायंते तदैवसंहितामनुविधंसम्यक्संधितांमन्यइतिवायुराहेत्यर्थः । इतिहस्माहबाध्वएतंह्येवेत्युत्तरेणान्वयंमत्वाव्याचष्टे ॥ आहवायुरिमं विष्णुमित्यादिना ॥ एतेनबाध्वोवायुरेतंविष्णुंमहदुक्थादिषुमीमांसंतइत्यप्याहेत्यर्थउक्तोभवति । इममितिपूर्वप्रस्तुतनारायणमनिरुद्धादिचतूरूपिणंप्रादुर्भावरूपंचेत्यर्थः ॥ इष्टकानामिति ॥ महाव्रतेचेतव्येष्टकाधिष्ठितदेवतामित्यर्थः । एतमस्यामित्यादेरर्थ एतमेवेति । ब्रह्मेत्यस्यार्थःपूर्णेति । संवसतोरमयतीतिसंवसद्रः सएववर्णविपर्ययेणसंवत्सरइत्यर्थमभिप्रेत्यसंवत्सरशब्दार्थमाह ॥ संवसदिति ॥ विहितवृत्त्यावसतांसुखप्रदत्वाद्रित्यर्थः । नन्वस्मत्समसंख्याकोपिभवतिभगवान्किंविशिष्योच्यते संवत्सरसंमानइतीत्यतआह ॥ नियामकइति ॥ ३ ॥ (३५) बाध्वोक्तविद्यायानकेवलंपूर्वोक्तन्यायेनफलंसुमहत्किंतुशतवा

भा० । त्सर्वजीवानामत्तृत्वात्प्रलयेपिच । आत्मेत्युक्तःसभगवान्जगतःस्थावरस्यच । एवंचतुर्विधोविष्णुःसंहितादेवतायदा । ज्ञायतेपूर्ववर्णस्यरूपंनारायणाभिधं । प्रादुर्भावाःसमस्ताश्चरमार्णस्यदेवताः । तदातुसंहितांसम्यङ्मन्येहंसंधितामिति । आहवायुरिमंविष्णुंबृहत्युक्थस्यदेवतां । महाव्रताख्यस्तोत्रस्यचेष्टकानांचदेवतां । एतमेवाखिलजगद्व्याप्तंपूर्णगुणात्मकं । संवसद्रतिदातृत्वाद्ब्रह्मासंवत्सराभिधः । नियामकःसजीवानां सर्वेषांप्रभुरीश्वरः। अनंतमूर्तिर्ब्रह्मासावनंतजगदास्थितः। नियामकस्तस्यविष्णुस्तावद्रूपेषुसंस्थितः। तत्संवत्सरसंमानःसविष्णुःपरमेश्वरः ॥३॥ (३५)

रमावर्ततेनायोग्योपदेशादिदोषनिवृत्तिश्चफलमित्युक्तिपूर्वपुरुषादित्यगतयोरैक्ययेयुक्त्यंतरंचोच्यतेस्मिन्खंडे । तत्रतावदयोग्यो पदेशादिनकार्यमितिवक्तुमुपदेशेप्रत्यवायउच्यते ॥ दुग्धेति ॥ यएतमात्मानंपरस्मैमोक्षायोग्यायशंसत्युपदिशति तदर्थेवामहा व्रतेउक्तप्रकारेणस्तवनशंसनेष्टकाचयनाद्यार्त्विज्यंकरोति । तदाऽस्यशंसकस्यवेदादुग्धदोहागाइवपूर्वदुग्धःनेतःपरंदोग्धव्यं दु ह्यतइतिदोहःक्षीरंयासांतागावइवविफलाभवंति । वैफल्यंप्रकारद्वयेनोच्यते ॥ नतस्येति ॥ तस्यशंसकस्यानूक्तेवेदवचनेगुरू क्त्यनुसारेणप्रवचनीयत्वात् । वेदानुवचनंतथेत्यभिधानाच्चभागस्तत्राप्यंज्ञानफलंनास्तिसुकृतस्यपंथांपंथानंसुकृतसाध्यमामुष्मि कमार्गंचनवेदनप्राप्नोतीतिप्रकारद्वयेनदुग्धदोहाभवंतीत्यन्वयः । तद्वेदार्थज्ञानवैफल्यमेतत्कर्मवैफल्यंचऋषिणोक्तं सचिविदंक र्मसंचयवेत्तारं सखायंशरीरेस्थित्वोपकारकं यस्तित्याजायोग्येभ्यउपदिशति । अयोग्यार्थं योग्येष्वप्याचार्यपित्रोरन्यार्थंवा म हाव्रतेशंसनादिकंचकरोति । तस्यवेदवाचिभागःफलंनास्ति सुकृतस्यपंथानंचनप्रवेदनलभतेहि विदॢलाभइतिधातोः । तथायो भगवंतंतत्याजेश्वरएवनास्तीत्यादिरूपेणत्यजति । तथायश्चरमाब्रह्मादितद्भक्तारतम्यापरिज्ञानादिनातंत्यजति । सयदीं यदे वशृणोतितदलकमेवारतिरूपांधतमःप्राप्तिकारणमेवशृणोति । तच्छ्रवणंतमःप्राप्तिकारणमेवेतियावत् । तया योनिषिद्धकर्मा चरणेनविहितत्यागेनचभगवत्प्रियत्यागात्तत्पूजायाअकरणाच्चतंत्यजति । सयदेवशृणोतितदलकमेवशृणोति । नकारस्थानेअ

उप० । दुग्धदोहाअस्यवेदाभवंतिनतस्यानूक्तेभागोस्तिनवेदसुकृतस्यपंथामितितदप्येतदृषिणोक्तंयस्तित्याजसचिविदंसखायंनतस्यवाच्य पिभागोअस्ति । यदींशृणोत्यलकंश्रृणोतिनहिप्रवेदसुकृतस्यपंथामिति

कारः रलयोरभेदः तथाचनरकसाधनमेवशृणोति कार्यकारणयोरभेदोपचारः । (उदाहृतमंत्रेत्यागंसामान्येनानूद्यतमोनरकवे दसुकृतफलाभावलक्षणाश्चत्वारोदोषाउक्ताः । तेदोषाउक्तविधत्यागचतुष्टयवतांसमाइतिप्रतीयते ।) यआत्मानंपरस्मैशंसति न तस्यानुक्तेभागोस्ति सनवेदसुकृतस्यपंथानमित्युक्तार्थे उदाहृतमंत्रे । यदींशृणोत्यलकंशृणोतीत्ययोग्योपदेश तदर्थशंसनलक्षणं त्यागफलत्वेनयदींशृणोत्यलकमितितमसोवर्णनमयुक्तमित्यतस्तदीश्वरस्वरूपत्यागादित्यागांतरफलमयोग्योपदेशादिप्रस्तुतेत्यागे तुनतस्यानूक्तेभागोस्तिनवेदसुकृतस्यपंथामिति प्रागुक्तंदोषद्वयमेवनतस्यवाच्यपिभागोअस्ति नहिप्रवेदसुकृतस्यपंथामित्यंशे नोच्यतइत्यवधार्यते ॥ नतस्येति ॥ तत्तत्रायोग्योपदेशेतदर्थशंसनादौचत्यागेनतस्यानूक्तेभागोऽस्ति नवेदसुकृतस्यपंथामिति यद्दोषद्वयमुक्तंतदेवतदुक्तंतेनोक्तं । नतस्यवाच्यपिभागोस्तिनवेदसुकृतस्यपंथामितिमंत्रखंडेनोक्तंभवतीत्यर्थः । यन्निमित्तंदोषो त्कीर्तनंतदिदानीमुच्यते ॥ तस्मादिति ॥ तस्मादनर्थप्राप्तेरेवंविद्वान्महाव्रतेपरस्माअध्वर्युर्नाग्निंचिनुयात् उद्गातापरस्मैमहाव्र तेनस्तोत्रेणनस्तुवीत होताचनपरस्मैएतदहोबृहतीसहस्रंशंसेत् उक्तस्यापवादउच्यते ॥ पित्रेवेति ॥ अस्यपितुराचार्यस्यवार्थे कृतंतच्छंसनमात्मनएवकृतंभवति फलसाधनंभवति परमात्मनश्चप्रियंभवति । परस्मैअयोग्यायतत्वोपदेशंचनकुर्यादित्यपिद्र ष्टव्यं । यदिप्रमादाद्दाक्षिण्यादर्थलोभाद्वाशंसेत्तदाप्रायश्चित्तार्थंबाध्वोक्तविद्यांशतवारमावर्तयीतेत्यपिद्रष्टव्यं ॥ ७ ॥ सयश्चाय

उप० । नतस्यानूक्तेभागोस्तिनवेदसुकृतस्यपंथानमित्येतत्तदुक्तंभवतितस्मादेवंविद्वान्नपरस्माअग्निंचिनुयान्नपरस्मैमहाव्रतेनस्तुवीत नपर स्माएतदहःशंसेत्कामंपित्रेवाचार्यायवाशंसेदात्मनएवास्यतत्कृतंभवति

मशरीरइतिपूर्वखंडोक्तंभगवद्रूपैक्यंयुक्त्यंतरेणोपपादयितुंपरामृश्यते । सयश्चायमितिचशब्देनपूर्ववद्योक्षरेवासुदेवोयश्चवेदेसंकर्षणएकमेवतदित्यवोचामतन्नारायणादिरूपजातंचैकमितिचावोचामेतियोज्यं । तत्रतावदुपलक्षणत्वेनानिरुद्धप्रद्युम्नयोःशरीरसूर्यगतयोरैक्ययेयुक्तिरुच्यते ॥ सयश्चायमिति ॥ योसावादित्येसूर्यमंडलेप्रद्युम्नःसएवायंपुरुषेदेहेचक्षुषिस्थितः । योयंपुरुषेचक्षुषिस्थितः यश्चदेहेहृदयेऽशरीरःप्रज्ञात्माऽनिरुद्धस्तद्रूपद्वयमेकमेवतस्मात्यःपुरुषेयोनिरुद्धोयश्चासावादित्येप्रद्युम्नःतत्स्वरूपद्वयमेकमित्यवोचामेतियोजना । स्यादेतद्देहगतयोरनिरुद्धप्रद्युम्नयोरैक्ये तदेवकुतःउभयोर्जीवलक्षणैककार्यकारित्वा त्तदेवकुतस्तयोर्जीवशरीरप्रहाणप्रसक्तिकालएवमृतिसूचकदुर्निमित्तदर्शनादितिभावेनोच्यते ॥ ताविति ॥ तौहृदयेचक्षुषिचस्थितावनिरुद्धप्रद्युम्नौयत्रयदायस्मादेहाद्विहीयेते जिगमिषतस्तदादित्यश्चंद्रमाइवदृश्यतेरश्मयोनप्रादुर्भवंति । द्यौर्लोहिनीरक्तवर्णाभवति । यथामंजिष्ठावैद्यशास्त्रप्रसिद्धामूलिका । तथालोहिनीपायुर्व्यस्तःविवृतोभवति । अस्यशिरःकाकस्यकुलायंनीडंतस्यगंधवद्गंधोस्यास्तीतिकाककुलायगंधिकंभवद्वायतिवायतेज्ञायतेघ्राणविषयोभवति । अस्यात्मांतर्यामीपरमात्मासंपरेतःसन्निकृष्टनिर्गमःसपुरुषोचिरमिवनजीविष्यतीतिविद्यात् क्लृप्तंवर्षशतमप्यल्पकालमेवेतिसूचनायचिरमिवेत्युक्तं । सपरलोकसाधनतयायत्कर

भा० । सयश्चायमशरीरःप्रज्ञात्मायश्चासावादित्येएकमेतदित्यवोचामतौयत्रविहीयेतेचंद्रमाइवादित्योदृश्यतेनरश्मयःप्रादुर्भवंतिलोहिनी द्यौर्भवतियथामंजिष्ठाःव्यस्तःपायुःकाककुलायगंधिकमस्यशिरोवायतिसंपरेतोस्यात्मानचिरमिवजीविष्यतीतिविद्यात्सयत्कर

णीयंमन्येततत्कुर्वीतयदंतियच्चदूरकइतिसप्तजपे । यदांत्यच्चंदूरकेभ्यंविंदतिमामिह । पवमानवितर्ज्जहि । पावनात्पवमानवायो । इहयदंतिकेभयं । यच्चदूरकेदूरेभयंमांविंदतिप्राप्नोतितद्भयंविजहिविनाशय ॥ १ ॥ पवमानःसोअद्यनःपवित्रेणविचर्षणिः । यःपोतासपुनातुनः । विचर्षणिःविविधप्रजावान्प्रजाश्चर्षणयःप्रोक्ताइतिवचनात्सःप्रसिद्धोयःपवमानः । नःस्वामिनापवित्रेणपावयित्वात्रातीतिपवित्रनाम्नाहरिणातत्प्रसादेनलोकानांपोता पावयिता सनोस्मानप्यद्यपुनातु ॥ २ ॥ यत्तेपवित्रमर्चिष्यग्नेवितंतमंतरा । ब्रह्मतेनपुनीहिनः । अग्नेअंगनेतृत्वादग्निनामकवायो अंतरापुरुषदेहमध्ये । वितंतेअर्चिषिवितंतमर्चिष्मत्पवित्रंयद्ब्रह्मतेननःपुनीहि ॥ ३ ॥ यत्तेपवित्रमर्चिवदग्नेतेनपुनीहिनः । ब्रह्मसवैःपुनीहिनः । अग्नेवायोतेस्वामिभूतमर्चिवदर्चिष्मत्यत्पवित्रंब्रह्मतेननःपुनीहि । तंप्रसादयित्वातेनपुनीहीतियावत् । ब्रह्मणःपरब्रह्मणःसवैर्ज्ञानाख्यप्रसूतिभिश्चस्वयंपुनीहिनः ज्ञानमुत्पाद्यापिपुनीहीत्यर्थः ॥ ४ ॥ उभाभ्यांदेवसवितःपवित्रेणसवेनच । मांपुनीहिविश्वतः । ज्ञानप्रसवात्सवितृनामकदेव । क्रीडादिगुणविशिष्टवायोपवित्रेणब्रह्मणासवेनप्रसवेनचेत्युभाभ्यांमांविश्वतःसर्वस्मात्पुनीहि । नपुनःप्रसादमात्रेण । तस्यकर्मणापिसंभवान्नापिज्ञानमात्रेण । प्रसादजनकज्ञानमात्रस्येतरसाधारणत्वादित्युभयनियमनायेयंऋगित्यपौनरुक्त्यं ॥ ५ ॥ त्रिभिष्टुंदेवसवितर्वर्षिष्ठैःसोमधामभिः । अग्नेदक्षैःपुनीहिनः । अग्नेसवितर्देव सौम्यस्वरूपत्वात्सोमत्वं वर्षिष्ठैर्भक्ताभिलषितवर्षणशीलैर्दक्षैस्त्रिभिर्धामभिःक्षीराज्यादिधामत्रयगतैर्भगवद्रूपैर्नःपुनीहि । तेजस्वरूपंचगृहंप्राज्ञैर्धामेतिकथ्यतइतिवचनात् ॥ ६ ॥

भा० । णीयंमन्येततत्कुर्वीतयदंतियच्चदूरकइतिसप्तजपे

पुनंतुमांदेवजनाःपुनंतुवसवोधिया । विश्वेदेवाःपुनीतमाजातवेदःपुनीहिमा । हेजातवेदःजातंवेत्तीतिजातवेदाःतस्यसंबुद्धिर्जा तवेदःसर्वज्ञवायोधियासंविदात्वदनुमत्यादेवजनादयःमांधियापुनंतुज्ञानंदत्वापुनंतु तेयथापुनंतितथात्वंमांपुनीहीत्यर्थः ॥ ७ ॥ आदित्प्रह्लस्यरेतसइत्येकाजप्या । आदित्प्रह्लस्यरेतसोज्योतिष्पश्यंतिवासुरं । परोयदिध्यतेदिवा ॥ प्रह्लस्यपुरातनस्यरेतसोम हारतेर्विष्णोर्वासेनस्वसन्निधानेनरमयतिसुखयतीतिवासरं । यज्ज्योतिर्दिवादिवःपरःपरस्ताद्वैकुंठलोकेइध्यतेदीप्यते । अथयद तःपरोदिवोज्योतिर्दीप्यतइतिश्रुतेः । तज्ज्योतीरूपं । आत् इत् अकारवाच्यभगवदनुग्रहादेव । पश्यंत्युपासकाइत्यर्थः । यत्र ब्रह्मापवमानेतिषड्जपेत् । यत्रब्रह्मापवमानःछंदस्यांवाचंवदन् । ग्राव्णासोमेमहीयतेसोमेनानंदंजनयन्निंद्रायेंदोपरिस्रव । इंदोइष्टप्रद पवमानवायो ब्रह्मामुक्तचतुर्मुखः । यत्रयस्यविष्णोर्लोके छंदस्यांछंदःसंबंधिनींवाचंवेदवाचंवदन्व्याकुर्वन् सोमे सौम्यस्वरूपत्वात्सोमनामकभगवद्विषये ग्राव्णासुतेनसोमेनेष्टातत्प्रसादेनस्वस्यानंदंजनयन्मुक्तनिकरैर्महीयते । तस्माइंद्रायवि ष्णवेमांपरिस्रवस्रावय ॥ १ ॥ यत्रज्योतिरजस्रंयस्मिँल्लोकेस्वर्हितं । तस्मिन्मांधेहिपवमानामृतेलोकेअक्षितइंद्रायेंदोपरिस्रव । यत्रलोकेअजस्रंनिरंतरंज्योतिःप्रकाशःयस्मिन्लोकेस्वरानंदरूपंब्रह्महितंनिहितं । अमृते तद्भतानांमृत्यनापादकेमोक्षलक्षणेवा । अक्षितेस्व यंनाशरहितेतस्मिँल्लोकेपवमानमांनिधेहि । निधायचतद्भतायेंद्रायगमयेत्यर्थः ॥ २ ॥ यत्रानुकामंचरणंत्रिनाकेत्रिदि वेदिवः । लोकायत्रज्योतिष्मंतत्तत्रमाममृतंकृधींद्रायेंदोपरिस्रव । अकंसुखंनाकंपरमसुखं त्रिविधंनाकंत्रिनाकंत्रिविधेपरमसुख ॥ २०१ ॥

भा० । दादित्प्रह्लस्यरेतसइत्येकायत्रब्रह्मापवमानेतिष

साधनेत्रिदिवेत्रिदिवशब्दवाच्येस्वेतद्वीपादौयत्रलोके अनुकामंचरणंस्वेच्छयानुसारेणगमनंभक्षणंचविद्यतेयत्रलोकेदिवःसरस्व त्याज्योतिष्मतोलोकावर्ततेतत्रमाममृतंमुक्तंकुर्वित्यादि ॥ ३ ॥ यत्रकामानिकामाश्चयत्रब्रध्नस्यविष्टपं । स्वधाचयत्रतृप्तिश्चतत्रमा ममृतंकृधींद्रायेंदोपरिस्रव । यत्रभोगार्थकामाविषयाश्चनिकामायथेष्टंसंति । ब्रध्नस्यसूर्यस्यविष्टपंस्थानं । स्वधासुखंतृप्तिरलंबु द्धिश्चतदभिमानिदेवतेच । तत्रमाममृतंकृधि ॥ ४ ॥ यत्रराजावैवस्वतोयत्रावरोधनंदिवः । यत्रामूर्यह्वतीरापस्तत्रमाममृतंकृ धींद्रायेंदोपरिस्रव । यत्रवैवस्वतोराजामुक्तोयमः । दिवःसरस्वत्याअवरोधनंपरिवारभूताःसर्वदेव्यः । यह्वतीःस्यंदमानाअमूरा पःगंगाद्याः ॥ ५ ॥ यत्रानंदाश्चमोदाश्चमुदःप्रमुदआसते । कामस्ययत्राप्ताःकामास्तत्रमाममृतंकृधींद्रायेंदोपरिस्रव । यत्रलोके आनंदाअपरोक्षज्ञानव्यंग्याविषयोपाधिरहिताःस्वसुखविशेषावर्तते । भोगनिमित्तकामोदाः मुदोल्पभोगनिमित्तकाः प्रमुदोति प्रकृष्टविषयोत्थाःसुखविशेषाः आसतेतिष्ठंति । यत्रकामस्येच्छायाःकाम्यंतइतिकामाःविषयाःआप्ताःपूर्णाः तत्रमाममृतंकृधि ॥ ६ ॥ उद्वयंतमसस्परीत्येकाजप्या । उद्वयंतमसस्परिज्योतिष्पश्यंतउत्तरं । देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमं । तमसोज्ञाना दुद्गतावयमुत्तमंसर्वोत्तमंविष्वाख्यंज्योतिःपरिपश्यंतःतमेवदेवत्रादेवंदेवविषयेपिदेवं देवानामपिदेवमित्यर्थः । सूरिप्राप्यत्वा त्सूर्यनामकमुत्तमंज्योतिरुत्तमज्योतीरूपमगन्मप्राप्ताःस्मः । अथेतिनिमित्तांतरं । यत्रयदादित्योपिच्छिद्रइवदृश्यतेतस्यैवविव

भा० । लुद्वयंतमसस्परीत्येका—

उप० । अथापियत्रछिद्रइवादित्योदृश्यते

रणं ॥ रथेति ॥ रथचक्रमिवमध्येसरंध्रत्वेनाभिरुच्यायेतदृश्येत । अराइवरथनाभावित्यत्रनाभिपदस्यचक्रेप्रयोगात् । आत्मनःछायांछिद्रांवापश्येत् । तदप्येवमेवसन्निहितमरणद्योतकमेवविद्यात् । अथापियदन्यदपिपश्येत्तत्किमादर्शेदर्पणेवोदकेवा आत्मानंजिह्मशिरसंवक्रशिरसंअशिरसंशिरोहीनंवापश्येत् । कन्याके कनीनिकेविपर्यस्तेव्यत्यस्तेजिह्मेनवक्रत्वेनवादृश्येयातां तदप्येवमेवविद्यात् । अथापियदन्यदपिपश्येत्तत्किंअपिधायाक्षिणी अंगुल्याअक्षिमूलमवष्टभ्योपेक्षेतोपसमीपेपश्येत् । तत्त दायथावटरकाणिवर्तुलास्तेजोंशादृश्यंतेतथाक्ष्णोरपितेजोंशाःसंपतंतीवदृश्यंतेतानियदानपश्येत् तदप्येवमेवविद्यात् । अथान्य दपि स्वस्थःपुरुषःहस्ताभ्यांकर्णावपिधायशृणुयाच्छब्दश्रवणप्रयत्नंकुर्यात् । तदासएषशब्दःज्वलतोग्नेरथस्यवोपब्दिर्ध्वनिरिव भवतिश्रूयतइतियावत् । तंशब्दंयदाशृणुयात् तदप्येवमेवविद्यात् । अथयदन्यदपि यत्रयदामयूरग्रीवातथाग्निर्नीलइवदृश्य तेमेघेअन्यैरदृश्यमानांविद्युतंवापश्येत् । यद्वाअमेघइतिपदच्छेदःमेघरहितेप्रदेशेविद्युतंपश्येदित्यर्थः । मेघेवान्यैर्दृश्यमानांअ विद्युतंपश्येत्विद्युतंनपश्येत् महामेघेवामहामरीचीःसूर्यरश्मीरिवपश्येत् तदप्येवमेवविद्यात् । अथान्यदपि यत्रयदाभूमिं

उप० । रथनाभिरिवाभिरुच्यायेतछिद्रांवाछायांपश्येत्तदप्येवमेवविद्यादथाप्यादर्शेवोदकेवाजिह्मशिरसंवाऽशिरसंवात्मानंपश्येद्विपर्यस्तेवा कन्याकेजिह्मेनवादृश्येयातांतदप्येवमेवविद्यादथाप्यपिधायाक्षिणीउपेक्षेततद्यथावटरकाणिसंपतंतीवदृश्यंतेतानियदानपश्येत्तदप्येवमेवविद्यादथा प्यपिधायकर्णाउपशृणुयात्सएषोग्नेरिवप्रज्वलतोरथस्येवोपब्दिस्तंयदानशृणुयात्तदप्येवमेवविद्यादथापियत्रनीलइवाग्निर्दृश्यतेयथामयूरग्रीवामेघेवा विद्युतंपश्येन्मेघेवाविद्युतंनपेश्यन्महामेघेवामरीचीरिवपश्येततदप्येवमेवविद्यादथापियत्रभूमिं

ज्वलंतीमिवपश्येत्तदप्येवमेव इतिप्रत्यक्षदर्शनानि जाग्रदवस्थायांद्रष्टुंयोग्यानिमरणनिदर्शनानि । अथ मरणसूचकाःस्वप्नाउच्य ते । पुरुषं वर्णतः कृष्णं । कृष्णदंतंचपश्यति । सएनंहंति हंतीतिपश्यति अस्योत्तरत्रसंबंधः । वराहएनंहंति मर्कटएनमास्कंद यति उपर्यापतति । आशुवायुश्चक्रवायुरेनंप्रवहति ऊर्ध्वंनयति । सुवर्णखादित्वापगिरतिउद्गिरति । सापूपंमहामधुभक्षयति । विसा निपद्ममूलानिभक्षयति । एकपुंडरीकमेकंरक्ताब्जंशिरसिधारयति । खरैर्वावराहैर्वायुक्तैरथादिभिर्याति । कृष्णवत्सांकृष्णांधेनुं नलदमालीरक्तकह्लारमालीदक्षिणामुखोव्राजयतिगमयति । अभयंनलदंसेव्यममृणालंजलाशयमित्यमरः । उक्तसर्वदर्शनमपे क्षितमितिनभ्रमितव्यमित्युच्यते ॥ सयदीति ॥ सप्रसक्तमरणोयद्येतेषांमध्येकिंचित्पश्येत् तर्ह्युपोष्यपायसंस्थालीपाकंश्रप यित्वापक्त्वा रात्रीसूक्तेनप्रत्यृचंहुत्वाएकैकर्चाप्रत्येकंहुत्वा अन्येनान्नेनब्राह्मणान्भोजयित्वाचरुंस्वयंप्राश्नीयात् । रात्रीर्व्यख्य दायतीपुरुत्रादेव्याक्षभिः । विश्वाअधिश्रियोधित । रतिंरातिददातीतिरात्रिनाम्नीदेवी स्त्रीरूपोविष्णुर्दुर्गादेवीचायतीआग च्छतीसतीपुरुत्राबहुभिरक्षिभिर्नयनैः । पुरुत्राबहुधाव्यख्यत् जगद्ददर्श विश्वाःअधि सर्वलोकेषु । विश्वाःश्रियःअधित दधार

उप० । ज्वलंतीमिवपश्येततदप्येवमेवविद्यादितिप्रत्यक्षदर्शनान्यथस्वप्नाःपुरुषंकृष्णंकृष्णदंतंपश्यतिसएनंहंतिवराहएनंहंतिमर्कटएनमास्कं दयत्याशुवायुरेनंप्रवहतिसुवर्णखादित्वाऽपगिरतिमध्वश्नातिविसानिभक्षयत्येकपुंडरीकंधारयतिखरैर्वैराहैर्युक्तैर्यातिकृष्णांधेनुंकृष्णवत्सांनलदमाली दक्षिणामुखोव्राजयतिसयद्येतेषांकिंचित्पश्येदुपोष्यपायसंस्थालीपाकंश्रपयित्वारात्रीसूक्तेनप्रत्यृचंहुत्वाऽन्येनान्नेनब्राह्मणान्भोजयित्वाचरुंस्वयंप्रा श्नीयात्

॥ १ ॥ ओर्वप्राअमर्त्यानिवतोदेव्युद्वतः । ज्योतिषाबाधतेतमः । देवीनिवतःनीचान्उद्वतउत्तमान्अमर्त्याअमर्त्यान्ब्रह्मादीन् । आ उरु अप्राः । उरुधाआसमंतादपूरयत् । तेषांतमः अज्ञानं । ज्योतिषाज्ञानेनकरणेनबाधतेनाशयति ॥ २ ॥ निरुस्व सारमस्कृतोषसंदेव्यायती । अपेदुहासतेतमः । आयती देवी । उषसंशुक्लवर्णमुषोनामकंप्रमदात्मकंस्वस्वरूपं । उएव । स्व सारंनिर्निंतरामकृत । अस्कृतेत्यस्यअकृतेत्येवपदपाठः । सूर्यादिषुस्थितः अप इत् उ हासते तमः तमइत् तमश्च । अपहास तएवनिराकरोत्येव ॥ ३ ॥ सानोअद्यस्यावृयंनितेयामन्नविक्ष्महि । वृक्षेनवसतिंवयः । सारात्रिर्नस्वामीयस्यास्तेयामन्यमनान्नि यमनात्प्रलयेस्वांतर्निवेशनेनसंयमनाद्वा यामनामकेउदरे अद्यस्थितिकालेवयःपक्षिणःवृक्षेवसतिंन । नीडमिवन्यविक्ष्महिप्रविष्टाःस्मः ॥ ४ ॥ निग्रामासोअविक्षतनिपद्वंतोनिपक्षिणः । निश्येनासश्चिदर्थिनः । ग्रामासः बहुत्वाद्ग्रामनामकाअसुराःत्वयि निअविक्षत न्यविशन् । पद्वंतःपादमात्रप्रयायिनोमानुषाश्चन्यविशन् । पक्षिणश्चन्यविशन् । श्येनासःशमस्यास्तीतिशीसुखी विष्णुरासमंतादिनःस्वामीतिज्ञानंयेषांतेदेवोत्तमाअपिन्यविशन् । अर्थिनश्चित्अर्थिनोपि प्राप्तपुरुषार्थामुक्ताअपिन्यविशन् । आवृत्यैवोपसर्गस्यक्रियावृत्तिर्भविष्यतीतिवचनात्क्रियावृत्तिः ॥ ५ ॥ यावयावृक्यंवृकंयवयस्तेनमूर्म्ये । अथानःसुतरांभव । ऊर्म्ये ऊरीकृतप्रमाणे अंगीकृतप्रमाणेदेवि क्रूरत्वाद्वृकाअसुराःतत्स्वभावोजनोवृक्यः तंवृक्यं । यवयेतिपदपाठः । निर्यापय । वृकमसुरंचयवय । स्तेनंब्रह्मस्तेनंमहासुरंचयवय । अथतेषामस्मत्तोवियोजनानंतरं नः सुतरासुखतरासदाभव ॥ ६ ॥ उपमा पोपिशत्तमःकृष्णंव्यक्तमस्थित । उषःकृणेवयातय । उषःप्रकाशरूपेदेविपेपिशत् । अज्ञानांपेशलंमनोरमं कृष्णंकृष्णवर्णं । व्यक्तं

यत्तमोभावरूपाज्ञानं । माउप मत्समीपे । सम्यग्ज्ञानावरकतया अस्थितस्थितं । तत्कृणाइवेतिपदपाठः । कृणानीव । यथा सत्पुरुषोकृणपरिहारेत्यंतमवहितोभवतितथावहितासतीयातयनिर्यापयेतिभावः ॥ ७ ॥ उपतेगाइवाकरंवृणीष्वदुहितर्दिवः । रात्रिस्तोमंनजिग्युषे । इव आ अकरमितिपदच्छेदः । दिवोदुहितः ज्ञानस्यसुतेज्ञानव्यंग्येहेरात्रि ब्राह्मणायगाइवजिग्युषेजयिनेस्तोमंन स्तवमिव । तेस्तोमंस्तुतिमुपत्वत्समीपएव । आसम्यगकरंयथानिरुपाधिकंब्राह्मणायगादास्यंति यथावाराष्ट्रस्थाःजिग्युषेराज्ञेप्रमोदभरेणस्तुतिंकुर्वंति तथास्तुतिमकार्षमत्कृतंस्तवंवृणीष्वांगीकुर्विंतिसूक्तार्थः ॥ ८ ॥ नन्वपमृत्युश्चेदुक्तमंत्रजपहोमाभ्यांनिवर्तते कालमृत्युश्चेदनिवर्त्यत्वाज्जपहोमयोर्मोक्षहेतुत्वंवक्तव्यं । कथंजपादिमात्रेणतदित्यतोमंत्रार्थगुणज्ञानपूर्वतद्ध्याने नापरोक्षद्वाराभविष्यतीतिभावेनमंत्रार्थभूतगुणोपासनाविधीयते ॥ सयोतइति ॥ सयःप्रकृतःपरमात्मा अतः देशतःकालतोगुणतश्चव्याप्तः । अतिरेवातः सर्वोत्तमोवा । पूर्णत्वेनसाकल्येनश्रोतुमयोग्यत्वादश्रुतः । अतएवागतःसाकल्येनाज्ञातः । अमतोमननाविषयः । अनतःस्वतंत्रत्वादनम्रः । अदृष्टः प्रत्यक्षेणअविज्ञातःविशेषेणाज्ञातः । अनादिष्टोनाज्ञप्तः अनुपदिष्टो वा । स्वयंसर्वस्यस्वातंत्र्येणश्रोतामंताद्रष्टादेष्टाघोष्टा घोषकर्तावक्तेतियावत् । विज्ञाताप्रज्ञातासर्वेषांभूतानांजीवानांअंतरपुरुषः । अंतस्थःपूर्णत्वात्पुरुषश्च । सर्वेषुरूपेषुसमः। आत्मांतर्नियामकःइतिविद्यादुपासीतेतिखंडार्थः॥४॥ दुग्धदोहाअस्यवेदाभवंतीत्यस्यय

उप० । सयोऽतोश्रुतोऽगतोऽमतोऽनतोऽदृष्टोऽविज्ञातोनादिष्टःश्रोतामंताद्रष्टादेष्टाघोष्टाविज्ञाताप्रज्ञातासर्वेषांभूतानामंतरपुरुषःसमआत्मेतिविद्यात् ॥ ४ ॥ (३६)

आत्मानंपरस्मैशंसतीतिपूर्वेणान्वयंमत्वाव्याचष्टे ॥ यएनमिति ॥ तस्मादेवंविद्वान्नपरस्माअग्निंचिनुयादित्याद्युत्तरग्रंथानुसारेणात्मानमुद्दिश्यपरस्मैयज्ञेपरार्थशंसनादिकरोतीत्यर्थांतरमाह ॥ योथेति ॥ एनमुद्दिश्याशंसेतबृहतीसहस्रंहोता स्तुवीतोद्गाता चितिंकुर्यादध्वर्युः कामंपित्रेवाचार्यायवेत्यपवादलब्धार्थकथनमाचार्यतोअथवापितृतोन्यस्येति । दुग्धदोहावेदानतस्यानूक्तेभागोस्ति । नवेदसुकृतस्यपंथामित्यस्यार्थोनास्यफलमित्यादिश्रुतेः । श्रवणजन्यज्ञानस्यफलमपरोक्षद्वारामोक्षोनभवतिप्रतिबध्यतइतियावत् । सुकृतस्यफलंस्वर्ग्यं । नन्वपरोक्षज्ञानिनाकदाचिदयोग्योपदेशादौकृतेतस्यापिश्रुतिफलमोक्षप्रतिबंधःस्यात्किमित्यतआह ॥ प्रत्यक्षेति ॥ विज्ञायतेप्रतिबध्यते । अज्ञैर्नकर्तव्यमपरोक्षिणोप्यनर्थसद्भावादितिकैमुत्यकथनंचैतत् । आचार्योविद्योपदेष्टैवेतिप्रतीयतेऽतआह ॥ आचार्यमिति ॥ तमेवेत्यन्वयः । तेनाचार्यशब्दस्यगुणाधिकपरत्वेनगुणाधिकस्यैवेत्यन्वयः । ननुकदाचित्प्रमादादिनायोग्योपदेशादिप्रसक्तिमात्रेणज्ञानकर्मफलमोक्षादिप्रतिबंधः । सर्वदास्यात्किमित्यतःप्रायश्चित्तेनतत्समीकरणंसंभवतितदभावेप्रबलसाधनानुष्ठानपर्यंतंमोक्षस्वर्गप्रतिबंधएव । सर्वथानमोक्षाद्यभावइत्यतआह ॥

भा० । यएनंवक्त्ययोग्येभ्योयोथचैनंमहाव्रते । कर्मण्याचार्यतोन्यस्यशंसेतपितृतोथवा । महाव्रतेनस्तोत्रेणस्तुवीतैनमथापिवा । महाव्रतेचितिंवापिकुर्यान्नास्यफलंश्रुतेः । सुकृतस्यफलंचैवनासौसम्यगवाप्स्यति । प्रत्यक्षज्ञानिनोप्येतदानंदह्रासकृद्भवेत् । प्रत्यक्षज्ञानिनोमोक्षोनकथंचिद्विहीयते । आचार्यमेवतंविद्याद्गुणैर्यःस्वात्मनोधिकः । गुणाधिकस्यतेनैवशंसनादिनदुष्यति ।

अयोग्यस्येति ॥ एतदेतांबाध्वविद्यां । एतेनविद्यायाःफलांतरोक्त्यर्थमयंखंडइतिज्ञापितंभवति । नदिवंव्रजेत्किमुमोक्षंव्रजेदितियोज्यं । बाध्वविद्यायोग्यायनोपदेष्टव्येत्युक्तंयोग्यानाह ॥ योग्याइति ॥ उत्तमाश्चतुर्गुणोपासकाः । मंत्रंव्याचष्टे ॥ कर्मेति ॥ संचयःसमुदायः । चिञ्चयनइतिधातोःकर्मेतियोग्यतयालभ्यते । यद्वासचसमवायइतिधातुरत्रकर्मपरस्तत्समुदायपरश्च । क्रतुंसचंतमारुत्स्येत्यत्रसचेःकर्मपरतयाव्याख्यातत्वात् । प्रीत्याप्रीतिपूर्वकंदेशस्थत्वादेकदेहस्थत्वात् । द्वासुपर्णेतिश्रुतेरितिभावः । नतस्यवाच्यपिभागोस्तीत्यस्यार्थो नविद्यायाइति । यदींयदेवशृणोतितच्छ्रुतं । अलकमित्यस्यार्थः ॥ श्रुतंचेति ॥ नरकंनित्यमनित्यंच । नहिप्रवेदसुकृतस्यपंथामित्यस्यार्थः नैवेति । कथमयोग्योपदेशमात्रेणतमइत्यतस्त्यागंचतुर्धाविभज्योक्तं फलंयथायोग्यंयोजयति ॥ मुख्येत्यादिना ॥ ब्रूयादैक्यमितिस्वस्वाभिमतेनेश्वरेणेतिशेषः । ब्रह्मशब्दादेरित्यादिपदेनविष्णुर्गृह्यते । त्रिमूर्त्यैक्यंब्रूयादित्यर्थः । मुक्ताविति ब्रह्मशर्वयोर्मुक्तौविष्णवैक्यमित्यर्थः । अवताराणांव्यासादीनामनवतारत्वमनवता

भा० । अयोग्यस्योपदेशेतुकृतेहौत्रादिकेपिवा । प्रायश्चित्तार्थमेतत्तुशंसीतशतवारकं । अन्यथामानुषेष्वेवजायतेनदिवंव्रजेत् । योग्या अस्याश्चविद्यायादेवाऋषयएवच । एकदेशज्ञानयोग्यामानुषाउत्तमायदि । कर्मसंचयवेत्तारंत्यजेन्नारायणंहियः । प्रीत्यैकदेशसंस्थत्वात्सखायमिति चोदितं । नविद्यायाःफलंतस्यश्रुतंचनरकावहं । नैवप्राप्नोतिसुकृतंसंत्यागात्परमात्मनः । मुख्यत्यागोहरेरेषयन्नास्तीतिवदेदमुं । तत्समंवाधिकंवापिब्रूयादैक्यमथापिवा । ऐश्वर्यादिगुणानांवाह्रासंनास्तित्वमेववा । तत्प्रसादंविनामोक्षंब्रूयाद्वाकस्यचित्कचित । ऐक्यंवाब्रह्मशर्वादेर्मुक्तावैक्यमथापिवा । व्यत्यासंचावताराणां

राणांबलपृथ्वादीनांअवतारत्वंव्यत्यासः । जीवाभेदंसर्वजीवाभेदं । एतदंतानांद्वितीयाविभक्तीनांब्रूयादित्यनेनान्वयः । तथैव तत्क्रियाणांतेनमिथश्चभेदज्ञानं । तद्भूपाणांतेनमूलरूपिणामिथश्चभेदज्ञानं कृष्णोनारायणोनभवति कृष्णरामौभिन्नाविति तद्भूपाणामसाम्यदर्शनं तद्गुणानांचासाम्यदर्शनमितियोज्यं । रामःसंपूर्णावतारो नकृष्णइति । भगवतिज्ञानंबहुलंबलमल्पमिति । तद्भूपाणांतद्गुणानांचपरस्परमसाम्यदर्शनमितिवा । अवयवेषुपरस्परमवयवानांतेनावयविनावाभेददृष्टिरितियोज्यं । कुत्रचित्कालविशेषेकचिद्विषये । अस्यहरेर्मूलरूपिणः । स्वतएवपरतःशापादेर्वाशक्त्यादिदोषसंसर्गंब्रूयादितियोज्यं । यद्वा अज्ञानतः अज्ञानाख्यात्परतः । ज्ञानतोज्ञानाख्यात्स्वतोवादोषसंसर्गइतियोज्यं । अचिदानंददेहतामित्युत्तरेणान्वेति । प्रादुर्भावेपिविभोरचिदानंददेहतामतएवदेहत्यागोद्भवादिकंआदिपदेनजरादिपारवश्यादिकमित्यत्रादिपदेनक्षुत्पिपासादिपरिमाणंपरिच्छिन्नत्वंगुणादिभिःगुणक्रियासंयोगादिभिः । नकेवलमीश्वरादेरभाववचनंत्यागः किंतुतस्यतकैंरीश्वरादेरपलापोपित्यागइत्याह ॥ तर्कैरिति ॥

भा० । जीवाभेदमुष्यवा । भेदज्ञानंतद्गुणानांतेनवाथमिथोपिवा । तथैवतत्क्रियाणांचतद्भूपाणामथापिवा । असाम्यदर्शनंवापितद्गुणानांपरस्परं । देहदेहिविभेदंचतस्मिन्नवयवेषुवा । परस्परंभेददृष्टिस्तेनवाकुत्रचित्कचित् । दोषसंसर्गमस्यापिस्वतःपरतएववा । अज्ञानतोज्ञानतोवानिर्देहत्वममुष्यच । तद्देहस्यप्राकृतत्वमचिदानंददेहतां । प्रादुर्भावेष्वपिविभोर्देहत्यागोद्भवादिकं । अज्ञानदुःखासामर्थ्यपारवश्यादिकंतथा । अतद्वशत्वंकस्यापिकदाचित्कचिदप्युत । परिमाणंबलादेर्वातस्यविष्णोर्महात्मनः । भेदाभेददृशिर्वास्यजीवैर्वास्वगुणादिभिः । तर्कैस्तस्यापलापोवा

तत्रेश्वराभावादौरक्तेनाग्रहाभिनिविष्टेनशुष्कतर्कप्रामाण्येवारक्तेनेत्यर्थः । नकेवलंतत्समाधिकादेर्भाववचनंत्यागःकिंतुतत्समंवाधिकंवापिब्रूयादित्यादौउक्तानांतत्समोवाधिकोवास्तीत्यादिवचनज्ञानरूपाणांत्यागानांतर्काद्यैःसम्यक्साधनंचत्यागइत्याह ॥ तर्काद्यैरिति ॥ असंभवनिरूपणंयुगपदणुत्वमहत्वादिलोकविरुद्धधर्माणांद्वितीयंत्यागमाह ॥ रमेति ॥ तारतम्यापरिज्ञानेतारतम्यांतगत्वेनोत्कर्षज्ञानानुपपत्तेः । जगन्मिथ्यात्वेजगत्कारणत्वादेरसत्यत्वापातात् । भगवद्भक्तनिंदायास्तन्निंदापर्यवसानत्वात् । विष्णोरेवैषःद्वितीयस्त्यागइतिभावः। तृतीयत्यागमाह ॥ निषिद्धेति ॥ निषिद्धवर्जनंस्यविहितकरणस्यचभगवत्प्रियत्वात्तत्त्यागेभगवदाज्ञालंघनाच्चतृतीयोपिविष्णोरेवत्यागइतिभावः । ननुविप्रचित्यंशंमागधंप्रतिवैष्णवाग्रेसरेणभीमसेनेननविष्णूत्कर्षादिकंकथं तर्हिप्रतिपादितमित्यतआह ॥ यथाशास्त्रेति ॥ शास्त्रोक्तप्रमेयप्रनाडीमनतिक्रम्येत्यर्थः । परपक्षदूषणायखंडशःप्रमेयोपन्यासोनदोषावहइतिभावः । यथायोग्योपदेशस्तथैवाचार्यपित्रोरन्यत्रमहाव्रतेहोत्राद्यार्त्विज्यानिचतुर्थस्त्यागः । एवंत्यागश्चतुर्विध

भा० । तत्ररक्तेनचेतसा । त्यागानामेवमुक्तानांतर्काद्यैःसाधनंतथा । अचिंत्यविभवेष्यस्मिन्नसंभवनिरूपणं । सएवमुख्यतस्त्यागोवासुदेवस्यकीर्तितः । रमात्रह्मादिकानांचतारतम्यानभिज्ञता । संशयश्चोक्ततत्वेषुजगन्मिथ्यात्वदर्शनं । अस्मृतिर्वासुदेवस्यतद्भक्तानांचनिंदनं । द्वितीयएषत्यागस्तुविष्णोरेवप्रकीर्तितः । निषिद्धकर्मकरणंविहितस्यचवर्जनं । त्यागस्तृतीयोहिहरेश्चतुर्थोऽयोग्यपूरुषे । उपदेशःकेशवस्ययथाशास्त्रोदितक्रमात् । आचार्यपित्रोरन्यत्रतथैवचमहात्रते । हौत्रौद्गात्राध्वर्यवाणित्यागएवंचतुर्विधः ।

इतियोज्यं । त्यागानांफलंविवेचयति ॥ त्यागेति ॥ क्रमादिति ॥ प्रथमत्यागेंधतामिस्रंद्वितीयत्यागेतामिस्रमितिक्रमादित्यर्थः । तामिस्रश्चांधतामिस्रौद्वौनित्यौसंप्रकीर्तितावितिद्वैविध्यंस्पष्टं । निरयंरौरवादि । एतेनश्रुतंचनरकावहमित्येतद्विवृतं भवति । नदिवमित्युपलक्षणंश्रवणफलंचनेतिज्ञेयं । संशयश्चोक्तत्वेष्वितितत्वेसंशययुक्तस्यद्वितीयत्यागिनस्तमउक्तं । तत्रशास्त्रोक्तत्वेष्वितिनार्थः । किंतुगुरूपदिष्टत्वेष्वित्यर्थइतिभावेनाह ॥ उपदिष्टइति ॥ अन्योगुर्वनुपदिष्टतत्वःस्वयमेवसंशयी । एतैर्दोषैस्तत्समंवाधिकंवापीत्याद्युक्तदोषैर्विनातद्रहितत्वेनयदिसाक्षादपरोक्षतोज्ञायतेतर्हिसाक्षान्मुक्तिदःलिंगभंगदइत्यर्थः । यद्वाएतैर्दोषैर्मुख्यत्यागादिदोषैर्विनाविद्यमानेनपुरुषेणयदिज्ञायतइत्यर्थः । ननुयदुक्तमन्योनिरयायैवेतितदयुक्तं । भगवत्सर्वोत्तमत्वनिश्चयवतांबहुवाक्यविरोधदर्शनेनतत्रतत्रसंशयसद्भावेनिरयांगीकारे । यैर्निश्चितंपरत्वंतुविष्णोःप्रायोनयातनां । ब्रह्महत्यादिभिरपियांत्याधिक्येचिरंनत्वितिवचनविरोधादित्यतआह ॥ यदीति ॥ सरागंस्वर्गादौ । आवृत्तिरेवनतुनिरयप्राप्तिः । संसारस्यसंशयनिवृत्त्यवधिकत्ववत्तमसोमोक्षस्यचसावधिकत्वंनमंतव्यमित्याह ॥ पुनरावृत्तीति ॥ तदुभयस्वरूपमाह ॥ पूर्वेत्वि

भा० । त्यागद्वयात्तुप्रथमात्प्राप्यतेंधंतमःक्रमात् । तृतीयान्निरयप्राप्तिश्चतुर्थान्नदिवंव्रजेत् । उपदिष्टेपियस्तत्वेसंशयंकुरुतेपुमान् । सोंधं तमोव्रजेदन्योनिरयायैवगच्छति । सएवभगवान्विष्णुरेतैर्दोषैर्विनायदि । ज्ञायतेमुक्तिदस्साक्षान्नात्रकार्याविचारणा । यदिज्ञानंनातिपकंसरागं चमनोभवेत् । तदास्वर्गादिलोकाप्तिःसंशयश्चेत्कचित्कचित् । आवृत्तिरेवसंसारेयावन्निःसंशयोभवेत् । पुनरावृत्तिहीनंतुतमोंधंमुक्तिरेवच । पूर्वेतुनिःसुखंतत्रनिर्दुःखंचापरंमतं ।

ति ॥ निःशेषगुणहीनं । सुखापादकनिःशेषगुणहीनं । निर्दोषकंदुःखापादकदोषविधुरं । विमिश्रगतयः । सुखदुःखमिश्रगतयः । अन्याःस्वर्गमानुष्यनिरयलक्षणाःनियतवासाभावात्पुनरावृत्तिसंयुताः । त्यागद्वयेनतमः । अन्याभ्यांनिरयः । स्वर्गाभावश्च । त्यागचतुष्टयहीनोमुक्तिंगच्छतीत्युक्तं । गतित्रयेअधिकारिषुविशेषोस्तीत्युच्यते ॥ असुराइति ॥ संकरःफलसंकरः । मर्त्यान्विभज्यफलभेदमाह ॥ मानुषेषूत्तमाइति ॥ निरयंनित्यनिरयं । सृतिभागिनः । सर्वदासंसारयोग्याः । यद्यसुरादेवामानुषोत्तमाश्चतमोमोक्षभागिनस्तर्हिइदानींतेषांकथंसंसारोपलंभइत्यतआह ॥ अच्छिद्रत्वमित्यादिना ॥ अच्छिद्रत्वंपूर्णत्वं । ननुतेषांयुगपत्पूर्तौसृष्टिप्रलयोच्छेदप्रसंगः । नचनित्यसंसारिणआदायतदुपपत्तिः । तथापिमोक्षार्थसाधनानुष्ठानप्रवाहस्योच्छेदप्रसंगात् । तथाचसृष्टिप्रलयवाक्यानांतद्विजिज्ञासस्वेत्यादिविधिवाक्यानामप्रामाण्यप्रसंगापत्तेरित्यतआह ॥ अच्छिद्रत्वमिति ॥ तस्मात् अनर्थफलत्वात् । दोषान्मुख्यत्यागादीन् । सयश्चायमशरीरःप्रज्ञात्मायश्चासावादित्येऽयमेवतदित्यवोचा

भा० । निःशेषगुणहीनंचपूर्वेनिर्दोषकंपरं । विमिश्रगतयस्त्वन्याःपुनरावृत्तिसंयुताः । असुरादेवतामर्त्यायोग्याएतेषुचक्रमात् । नचतेषांसंकरोस्तियथायोग्याहितद्गतिः । मानुषेषूत्तमामुक्तिमधमानिरयंतथा । आप्नुवंतिमनुष्येषुमध्यमाःसृतिभागिनः । नियमोयंनान्यथास्याद च्छिद्रत्वंयथाभवेत् । दोषेथवागुणेरापितदादैत्याःसुराअपि । स्वां । स्वां । गतिंसमायांतितावत्संसारभागिनः । अच्छिद्रत्वंनैवसर्वैःकदाचित्प्राप्यतेयतः । सृष्टिस्थितिलयादीनांनोच्छेदस्तेनकुत्रचित् । तस्मादोषान्प्रहायैकविष्णुंसर्वोत्तमोत्तमं । जानीयात्तेनमुक्तिःस्यादपरोक्षदृशेरनु ।

मेत्येतद्व्याचष्टे ॥ सूर्यमंडलेति ॥ योसावादित्येस्थितःसूर्यमंडलगोविष्णुःप्रद्युम्नःसएवपुरुषेदेहेचक्षुषिस्थितःयोयंपुरुषेचक्षुषि स्थितः यश्चायमशरीरःप्रज्ञात्मापुरुषेदेहेहृदयेऽनिरुद्धःयश्चासावादित्येस्थितःसूर्यमंडलगोविष्णुस्तद्रूपद्वयमेकमेव ।। नचभेदोन योःक्वचिदित्युपनिषद्भाष्ययोरर्थः । चशब्देनरूपांतराणिगृहीत्वातेषामत्रैक्यमुच्यतेइत्याह ॥ अन्येषामपीति ॥ इत्यनेनवा क्येनैवाभेदंविद्यादित्यर्थः । यौयत्रविहीयेतेइत्यादिव्याचष्टे ॥ द्विरूपइति ॥ अपगच्छतिअपजिगमिषति । सयत्करणीयंमन्ये ततत्कुर्वीतेत्येतद्व्याचष्टे ॥ कर्तव्यमिति ॥ सर्वेपरलोकसाधनंमृतिकालेकर्तुमुचितंकार्यमित्यर्थः । यदिकालमृत्युःयदिवापमृ त्युःपक्षद्वयेपियदंतीत्यादिकाऋचएवजपेच्चेत्यर्थः । एतेनयदंतीतिसप्तजपेत्इत्यादिजपविधिवाक्यानिव्याख्यातानिभवंति । य दंतीत्यादिसप्तकेआद्यद्वयंपावमान्यंद्वितीयद्विकमाग्नेयंपंचमंसावित्रंषष्ठंसावित्रमाग्नेयंसौम्यंचेतिप्रतीयते । अतःषट्कस्यदेवतामा ह ॥ ऋग्भिरिति ॥ पवमानादिनामकः । पवमानाग्निसवितृसोमनामकः । षड्भिरित्युक्त्यासप्तमस्यदेवजनादिभिःपरिवृतो जातवेदानामकोवायुर्नकेवलइतिपरिशेषयति । अग्न्यादिशब्दान्वायौनिर्वक्ति ॥ सइति ॥ अंगानांसर्वशरीराणांप्रवर्तकत्वात् अंगशब्दोपपदान्नयतेर्डप्रत्ययउपपदानुस्वारलोपश्चेतिभावः । वायुःपरस्यब्रह्मणोविष्णोर्ज्ञापनाख्यप्रसूतिभिःसवितेकथ्य

भा० । सूर्यमंडलगोविष्णुर्देहेचक्षुषिसंस्थितः । अनिरुद्धश्चहृदयेनचभेदोनयोःक्वचित् । अन्येषामपिरूपाणामितिविद्याद्विचक्षणः । द्वि रूपःसयदाविष्णुरपगच्छतिदेहतः । तदैवदुर्निमित्तानिजायंतेनान्यदाकचित् । तस्मात्तेषांदर्शनेतुकर्तव्यंपारलौकिकं । सर्वमेवजपेच्चैवयदंतीत्या दिकाऋचः । ऋग्भिःषड्भिर्वायुरेवपवमानादिनामकः । स्तूयतेसोंगनेतृत्वादग्निरित्यभिधीयते । परस्यब्रह्मणोविष्णोर्ज्ञापनाख्यप्रसूतिभिः ।

ते । यदस्मात्परस्यनेतृत्वात्ब्रह्मणोविष्णोर्ज्ञापनाख्यप्रसूतिभिर्लोकान्पुनातितस्मात्पवमानःकथ्यतइतिशेषः । वक्ष्यतिहि पवमानश्चपावनादिति । पवमानशब्दनिर्वचनायैवब्रह्मसवैःपुनीहिनइत्युपनिषद्वाक्यमत्रव्याख्यातं । सवितृशब्दप्रवृत्तिनिमित्त प्रसवाभिधानायचेतिद्रष्टव्यं । पवित्रेणविचर्षणिरित्यादौपवित्रशब्दंव्याचष्टे ॥ पवित्रंनामेति ॥ पावयित्वात्रातीतिपवित्रंना मप्रसिद्धः । ननुतप्तंचक्रंद्विभुजेधारयंतितेनपवित्रेणपाप्मानमवधून्वंतीत्यादौपवित्रंचक्रंप्रसिद्धमित्यतउक्तं साक्षान्मुख्यतइति । किंचात्रयत्तेपवित्रमर्चिष्यग्नेवितंतमंतराब्रह्मेतिब्रह्मशब्दस्यपवित्रेप्रयोगात्पवित्रंपरब्रह्मैवेत्युक्तंपरंब्रह्मेति ॥ ननूभाभ्यांदेवसवि तःपवित्रेणसवेनचेतिपवित्रस्यकरणत्वंप्रतीयते । कर्तृप्रयोज्यंचकरणं । नचवायुप्रयोज्यत्वंविष्णोरुपपद्यतेतत्कथंपवित्रंब्रह्मेत्य तआह ॥ प्रसादयित्वेति ॥ असुःप्राणः । सवेनचेत्यस्यार्थः ॥ ज्ञानाख्येति ॥ यत्तेपवित्रमर्चिष्यग्नेइत्येतद्व्याचष्टे ॥ प्राणा ग्नेरिति ॥ एतेनप्राणाग्नयएवैतस्मिन्पुरेजाग्रतीतिश्रुतौप्राणेअग्निशब्दप्रयोगंद्योतयति । अर्चिष्मानित्यनेनार्चिवइत्येतद्व्याख्यातं भवति । यत्रब्रह्मेत्यादौपवमानेंदुशब्दयोःश्रवणादुभयदैवत्यंषट्कमितिप्रतीयतेऽतस्तद्देवताऽध्याहारपूर्वतात्पर्यमाह ॥ यत्रब्रह्मे ति ॥ यद्यप्युपनिषत्पाठक्रमादादित्यस्येत्येतत्प्रथमंव्याख्येयंतथापिपवमानदेवताकस्ययदंतीत्यादेर्व्याख्यानप्रसंगेनैकदेवताक

भा० । वायुःपुनातियल्लोकान्सवितातेनकथ्यते । पवित्रंनामसाक्षात्तत्परंब्रह्मजनार्दनः । प्रसादयित्वातंविष्णुंतेनलोकान्पुनात्यसुः । ज्ञा नाख्यप्रसवेनापिस्वयंवायुःपुनात्ययं । प्राणाग्नेरर्चिषोदेहेवितातास्तेषुकेशवः । अर्चिष्मान्विततोनित्यंवायुस्तेनपुनात्ययं । यत्रब्रह्मेतिषड्भिश्चप्रार्थ नीयःसमारुतः । मोचयित्वैवसंसाराद्विष्णोर्लोकेकृधीतिच ।

त्वाद्यत्रब्रह्मेत्यादिकंव्याकृतं । आदित्यप्रलस्येत्यस्यदेवतामाह ॥ आदिति ॥ परोयदिध्यतेदिवेत्यस्यतात्पर्यंवैकुंठेति ॥ उद्वयमित्यस्यसूर्योदेवतेतिप्रतीतेराह ॥ आदित्येति ॥ साक्षादधिष्ठानव्यवस्थानमंतरेण । नारायणएवनतुसूर्योपीत्यर्थः । तत्रहेतुर्वायोरिति । देवत्रादेवमितिवाय्वादिदेवेश्वरत्वश्रवणादितिभावः । यदंतीत्यादीनांफलभेदमाह ॥ अपेति ॥ यदंतीतिप्रथमक्रुग्जपादित्यर्थः । अन्याभिःपवमानःसोअद्यनइत्याद्याभिःषड्भिःयत्रब्रह्मेतिषट्केनवैष्णवंलोकंव्रजेत् । अन्याभ्यां आदित्यप्रलस्योद्वयमित्येताभ्यां । आदित्यप्रलस्येत्यत्रवासरपदेनविष्णुर्मोक्षसुखप्रदइत्युक्तेःउद्वयमित्यत्रचज्योतिरगन्मेतिसायुज्योक्तेरिति ज्ञेयं । एतेनोपनिषत्पाठातिक्रमेणव्याख्यानेफलक्रमोपिनियामकइत्युक्तंभवति । इंद्रायेंदोइत्यत्रत्येंदुशब्दंनिर्वक्ति ॥ इष्टेति ॥ इष्टशब्दस्यांत्यलोपइकारस्यानुस्वारःतथाचइंइष्टंदातुंशीलमस्येतिइंदुरित्यर्थः । वर्षिष्ठैस्सोमधामभिरित्यत्रसोमशब्दार्थमाह ॥ सोमइति ॥ पावनादितिपवशुद्धावित्यतःकर्तरिशानचूमुमागमश्चेतिभावः ॥ पुरातनत्वादिति ॥ नश्चपुराणेप्रादितिसूत्रेपुराणेर्थेविवक्षितेप्रादुपसर्गान्नपिकृतेप्रलशब्दस्यनिष्पन्नत्वादितिभावः । रेतःशब्दार्थोमहारतिरिति ॥ देवंदेवत्रासूर्यमित्येतद्या

भा० । आदित्यप्रलस्येतिविष्णुःस्तुत्योवैकुंठलोकगः । आदित्यमंडलस्थश्चसाक्षान्नारायणःप्रभुः । उद्वयंत्वितिमंत्रेणस्तुत्योवायोरपीश्वरः । अपमृत्युभयंतस्ययदंतीत्यृग्जपाद्व्रजेत् । कालमृत्युर्यदिभवेत्तथाजन्मादिकंभयं । अन्याभिःकर्मभिःपूतोयत्रब्रह्मेतिवैष्णवं । लोकंव्रजेत्तथान्याभ्यांविष्णुर्मोक्षसुखप्रदः । इष्टप्रदानशीलत्वादिंदुर्वायुःसएवच । सोमःसौम्यस्वरूपत्वात्पवमानश्चपावनात् । विष्णुःपुरातनत्वात्तुप्रलोरेतो महारतिः ।

॥ २०८ ॥

चष्टे ॥ देवत्रेति ॥ सूरिभिर्याप्यतेप्राप्यतइतिसूर्यइत्यर्थः । सूरिप्राप्यत्वोपपादनंनित्यानंदइति । उत्तरमित्यादेर्निरुपचरितसर्वोत्तमत्वमितिभावेनोक्तंरमापतिरिति । सयोतोश्रुतइत्यादिव्याचष्टे ॥ देशतइति ॥ कथमनेनत्रिविधव्याप्तिलाभइत्यतआह ॥ संततइति ॥ सम्यक्ततइतिविस्तृतोह्यतइत्यनेनोच्यते । अतसातत्यगमनइतिधातोर्गमनमत्रस्थितिरितिभावः । यद्वानायमतःशब्दःकिंत्वतीत्यतिशयितइत्यर्थकान्निष्पन्नोतःशब्दइतिभावेनाह ॥ तृतीयेति ॥ यतस्तृतीयोतिशयइतिसूत्राद्योवर्णोयत्रभाव्यस्तस्यपूर्वोपरोवातृतीयोवर्णःअर्थातिशयेविवक्षितेभवति । तेनकारणेनातिशब्दबोध्यत्रिविधव्याप्तेर्निरुपचरितत्वलक्षणाधिक्यविवक्षयाअतिशब्दांत्यइकारस्यतृतीयवर्णह्रस्वाकारप्राप्तौअतिरेवातइत्युच्यतइतिवार्थइतिभावः । अश्रुतइत्यादेःसर्वथानश्रुतइत्याद्यर्थप्रतीतेर्व्याचष्टे ॥ सम्यगिति ॥ पूर्णत्वात्सम्यक्साकल्येनश्रुत्याद्यशक्यत्वात्स्वयोग्यतानुसारेणाल्पस्यापिपूर्णत्वात्तत्प्रसादमृतेस्वातंत्र्येणश्रुत्यादिश्रवणादितदशक्यत्वादित्यर्थः । अंतरपुरुषसमात्मशब्दान्व्याचष्टे ॥ अंतःस्थइत्यादिना ॥ विधेःफलपर्यवसन्नत्वाद्विधिलभ्यंफलमाह ॥ मुच्यतइति ॥ पूर्वखंडेयोयमशरीरःप्रज्ञात्मासरसइत्यादौरसशब्दःसारःशिवस्यापीतिसारार्थतयाप्रमाणेनव्याख्यातः । रससारशब्दौश्रेष्ठपरौ । रसःसारोवरश्चेतिशब्दाःपर्यायवाचकाइत्युक्तत्वात् । तथाच

भा० । देवत्रादेवएवासौसर्वदेवेश्वरोयतः । सूर्यश्चसूरिभिःप्राप्योनित्यानंदोरमापतिः । देशतःकालतश्चैवगुणतश्चापिपूर्णतः । अतइत्युच्यतेविष्णुःसंततोह्यतउच्यते । तृतीयवर्णोतिशयेयतस्तेनातिरेववा । अतइत्युच्यतेविष्णुःसम्यक्श्रुत्याद्यशक्यतः । पूर्णत्वाद्भगवान्विष्णुरश्रुत्वादिनोदितः । अंतःस्थःसर्वजीवानांपूर्णत्वात्पुरुषाभिधः । समःससर्वरूपेषुसर्वजीवानियामकः । इतिविद्यात्परंविष्णुंमुच्यतेतेनसंसृतेरित्यादिच ।

सर्वरूपेषुभगवान्सर्वेभ्योपिश्रेष्ठएवकिंविशिष्यशरीरपुरुषादीनांअनिरुद्धादयःसाराइत्युच्यंतइत्यतःश्रेष्ठत्वेसमानेपिशिवादीना
मनिरुद्धादीनांचविशेषानुबंधोक्तिर्विशिष्योक्तिरुपपद्यतेइत्यतआह ॥ शरीरेति ॥ प्राप्यत्वात्सायुज्यमुक्तौप्राप्यत्वात् । यदीं
शृणोतीत्यत्रयदीमित्यनूद्यईमित्यस्यार्थमाह ॥ ईएवेति ॥ अलकमित्यनूद्यप्रतिपदंअलकंअरकमितिरलयोःसारूप्यादितिभा
वः । यदेवशृणोतितदलकमेवशृणोतीत्यस्यार्थमाह ॥ यत्किंचिदिति ॥ एतेनारमरतिंकरोतीत्यरकमितिव्याख्यातंभवति ।
कोयमरतिर्नामकथंचैतत्प्राप्ततमस्कस्येत्यतआह ॥ तस्यहीति ॥ नञःतदभावः । तद्विरुद्धवाचकत्वात्प्राप्ततमस्कस्यारतिः
सर्वरत्यभावःतद्विरुद्धंदुःखंचपूर्णमित्यर्थः । हीतिप्रमाणप्रसिद्धिंसूचयति । यद्वातस्यहीत्यस्यद्विविधत्यागिनइत्यर्थः । नन्वयो
ग्योपदेशेदोषद्वयमुक्त्वातदप्येतदृषिणोक्तमितितत्रमंत्रंप्रतिज्ञायमंत्रःपठितः । तत्किंनतस्यानूक्तेभागोस्ति । नवेदसुकृतस्यपंथा
मिति एतदुक्तंभवतीतिपुनरुच्यतइतिअतअवतारयति ॥ परस्मैशंसनमात्रादित्यादीति ॥ अरतिरेवेतिकाकुः । अरतिस्तमो
भवतिकिंनभवत्येवेति । ततश्चायमर्थः । उदाहृतमंत्रेपरमात्मानंत्यजतअरतिरपिदोषत्वेनोच्यते । तदयुक्तं । परस्मैशंसनमात्रा
दरत्ययोगादित्याशंकायांत्यागांतरेअरतिर्दोषत्वेनोच्यते । प्रस्तुतेचतुर्थत्यागेतुनतस्यवाच्यपिभागोअस्ति । नहिप्रवेदसुकृतस्य

भा० । शरीरपुरुषादीनांप्राप्यत्वात्तदुपास्यत्वात्तेषांनियामकत्वेनतेभ्योप्युत्तमत्वेनतेषुस्थितत्वाच्चतेषांसारइत्युच्यतेभगवान् । यदींएवअ
लकंअरकंयत्किंचिच्छृणोतितत्सर्वमरतिरूपांधतमःप्राप्तिकारणमेवतस्यभवति । तस्यहिसर्वरत्यभावोरतिविरुद्धदुःखंचपूर्ण । परस्मैशंसनमात्रादे
रतिरेवेत्यतःप्रस्तुतेचतुर्थत्यागेतुनतस्यवाच्यपिभागोअस्ति । नहिप्रवेदसुकृतस्य

पंथामितिदोषद्वयमवत्यवधारयात । नतस्यानूक्तभागास्तनवदसुकृतस्यपथामत्यतत्तदुक्तंभवतीतिवाक्येनेत्यर्थः । ननुयदींशृणो
तीत्येतद्यदिप्रथमद्वितीयत्यागवतोस्तमःप्रतिपादकंतर्हितृतीयत्यागिनःफलंकेनोक्तमित्यतआह ॥ अलकमिति ॥ अलकंशृणो
तीत्युक्तंफलंत्यागंद्वयस्यमुख्यतःतृतीयस्यापित्यागस्यकिंचिद्भवत्यमुख्यंभवेदिति । कुतःनरकंनरकसाधनंशृणोतीत्यर्थांगीकारा
दित्यर्थः । ननुशरीरत्यागकालेकदाचिद्दुर्निमित्तादर्शनात्कथमयंनियमइत्यतआह ॥ तौयदैवेति ॥ आदित्यस्तस्येत्यत्रवासरं
दिनमितिप्रतीतिवारणायनिर्वक्ति ॥ वासेनेति ॥ हृदिवासेनेत्यर्थः । तत्प्रसादेनपश्यंतिहृदिवासाइतिहृदमितिछांदोग्यभाष्यो
क्तेर्ज्योतिरादित्यमंडलमित्यन्यथाप्रतीतेर्व्याचष्टे ॥ विष्णुरिति ॥ नचादित्यमंडलं । दिवःपरइतिछांदोग्यभाष्येउपपादनंद्र
ष्टव्यं । यत्रब्रह्मेत्यत्रग्राव्णासुतेनसोमेनयुज्यतइत्यन्यथाप्रतीतिंवारयन्व्याचष्टे ॥ ग्राव्णेति ॥ ग्राव्णासुतेनसोमेनेत्यन्वयः ।
सोमविषयेसौम्यत्वात्सोमनामकभगवद्विषयेइष्ट्वेत्यध्याहारप्रदर्शनं । महीयतेन्यमुक्तैःयदिसोमेनेष्ट्वेत्यनेनान्वयः । तर्हिआनंदं
जनयन्नित्युक्तानंदव्यंजकमित्याशंकांपरिहरन्आनंदजननेतस्यस्वातंत्र्यप्रतीतिंचापाकरोति ॥ तेनैवेति ॥ विष्ण्वर्थंसुतेपातः

भा० । पंथामितिदोषद्वयमेवेत्यवधारयति । नतस्यानूक्तेभागोस्तिनवेदसुकृतस्यपंथानमित्येतत्तदुक्तंभवतीति । अलकंशृणोतीतित्यागद्व
यस्यमुख्यतस्तृतीयस्यापिनरकंशृणोतीतिकिंचिद्भवति । तौयदैवास्माच्छरीराद्विहीयेतेतदैवैतानिनिमित्तानिपश्यंतीतिनियमः । नचतदापश्यत्ये
वेति । वासेनरमयतीतिवासरंविष्णुर्ज्योतिः । यत्रब्रह्मावेदवाक्यंव्याचक्षाणोमखैर्यजन् । सोमेनचसुतेनेशमास्तेलोकेहरेर्हिसइतिस्कांदे । ग्रा
व्णासोमविषयेसोमेनेष्ट्वामहीयतेतेनैवविष्णुप्रीत्यास्वस्यानंदंजनयन्

मुक्तावनुष्ठितसाधनानांफलरूपत्वोक्तिविरोधः । मुक्तौप्राप्यानंदातिशयस्यापरोक्षोत्तरभाविसाधनसाध्यत्वोक्तिविरोधश्चेतिचे न्न । यथापरोक्षोत्तरभाविसाधनजन्यप्रसादेनमुक्तौभगवान्स्त्र्यादिविषयसंपत्तिंतद्दर्शनंतदनुभवंतद्भोगस्याप्रियत्वात्तेनस्वप्रसा दंविचित्रानंदानुभवंचददाति । तथासोमयागस्यापिविषयतुल्यत्वादपरोक्षोत्तरभाविसाधनजन्यप्रसादेनैवभगवान्मुक्तौसोमया गसंपत्तिंमुक्तस्यदत्वातेनचस्वयंप्रसन्नःपरमानंदंभोजयतीतिकिमनुपपन्नं । संग्रहश्चात्रास्माभिःकृतोविरोधोद्धारे । हरेरुपासना चात्रसदैवसुखरूपिणी । सोमेनानंदमित्युक्तोनविरोधोभवेद्यतः । स्त्र्यादिभिर्विषयैस्तुल्यःसोमयागेइहेष्यते । भोगवत्प्रीतिहेतु श्चपूजारूपत्वतस्तयोरिति । यस्मिंल्लोकेस्वर्हितमित्यत्रस्वःसुखंनिहितमितिप्रतीयते तथासतियत्रानंदाश्चेतिपुनरुक्तंस्यादित्यतो व्याचष्टे ॥ स्वरानंदरूपइति ॥ यत्रावरोधनंदिवइत्यत्र लोकेद्युलोकस्यावस्थानमित्यन्यथाप्रतीतेर्व्याचष्टे ॥ दिवोदेव्याइति॥ रुधिर्आवरणइतिधातोः । दिवमावृत्यपरिवारतयास्थितादेव्यःअवरोधनशब्देनोच्यंतेइत्यर्थः ॥ वायुपत्नीति ॥ भूतपूर्वग त्यासरस्वतीवायुपत्नीत्युच्यते । द्युशब्दस्यतत्रप्रयोगंदर्शयति ॥ अजनयइति ॥ त्वंमरुतोवक्षणाभ्योवचनेभ्यःआसम्यग्वक्ष णाभ्यःप्रवचनेभ्यः वेदशास्त्रपठनार्थंविशिष्टव्याख्यानार्थंचदिवःसरस्वत्याःसकाशादजनयइत्यर्थः । प्रवक्षणाअभिनत्पर्वताना मित्यत्रऋग्भाष्यटीकायांवक्षणाशब्दस्यवचपरिभाषणेसन्प्रत्ययइतिवचनपरत्वेनव्याख्यातत्वात् । चोःकुरितिकुत्वंइण्कोरिति

भा० । स्वरानंदरूपोविष्णुः । दिवोदेव्याअवरोधनंतस्याःपरिवारभूताःसर्वदेव्यःद्यौर्नामवायुपत्नी । अजनयोमरुतोवक्षणाभ्योदिवआ वक्षणाभ्यइत्यादेः ।

षत्वंकषयोगेक्षइतिवक्षणेतिप्रक्रियाशेषोबोध्यः । इत्यादेरित्यादिपदेनद्यौर्वावविद्युत्पतिर्वायुमुपगम्येत्यादेर्ग्रहणं । यह्वतीःस्यं दमानाइति । यहिगताविति धातुरितिभावः । इंद्रायेंदोपरिस्रवेत्येतद्व्याचष्टे ॥ सर्वेष्टदेति ॥ नन्विंद्रायेतिश्रूयतेकथंविष्णुरि तिव्याख्यायतइत्यतआह ॥ इंदुरिति ॥ यत्रानंदाश्चमोदाश्चेत्येतदपुनरुक्ततयाव्याचष्टे ॥ अनन्येति ॥ भगवद्भक्त्यारूप्य तेव्यज्यतइतिभगवद्भक्तिरूपकं । यद्वासैवानंदस्वरूपेणनित्यामुक्तेषुतिष्ठतीत्यादेःसाक्षाद्भगवद्भक्तिस्वरूपमित्यर्थः । उद्वयमि तिमंत्रेतमसस्परिरात्र्यंधकारापगमानंतरंउत्तरंऊर्ध्वभागेविततंसौरंज्योतिःपश्यंतोवयंदेवत्रादेवंउत्तमज्योतीरूपंसूर्यमगन्मसूर्योप स्थानंकृतवंतइत्यन्यथाप्रतीतेर्व्याचष्टे ॥ तमसइति ॥ अज्ञानादित्यर्थः । तमेवेत्यनेनपूर्वोत्तरार्धयोर्भिन्नविषयत्वंउत्तरार्धस्यप्र सिद्धसूर्यपरत्वंचव्यवच्छिनत्ति ॥ ननुयदिपूर्वार्धस्यप्रकाशपरत्वंउत्तरार्धस्यसूर्यपरत्वंइत्यनंगीकृत्योभयोर्भगवत्परत्वमुच्यतेतर्हि पूर्वार्धेउत्तरंज्योतिरुत्तरार्धेप्युत्तमंज्योतिरितिपुनरुक्तंस्यादित्यतआह ॥ तदेवेति ॥ उत्तरार्धगतस्योपयोगमाह ॥ तथैवेति ॥ असौभगवानुत्तमंज्योतिरितियत्तत्तथैवेत्यर्थः । इदंअस्मद्भजनं । ज्ञापयितुमिति । उत्तमज्योतीरूपब्रह्मप्राप्तिलक्षणफलस्यानुभव

भा० । यह्वतीःस्यंदमानाः । सर्वेष्टदजगत्प्राणमामादायपरिस्रव । यत्रासौभगवान्विष्णुस्त्वंहिमोक्षप्रदःसदेतिच । इंदुरिष्टप्रदत्वाद्योवा युरादायगच्छति । इंद्रनाम्नःकेशवस्यसमीपंमुक्तमंजसेतिच । अनन्यहेतुकंसाक्षाद्भगवद्भक्तिरूपकं । सुखमानंदइत्युक्तोमोदोभोगनिमित्तकः । प्रमोदस्तद्विशेषोत्थोमुन्नामात्यल्पभोगतइत्यृग्वेदसंहितायां । तमसःसकाशात्उद्गतावयमुत्तरंसर्वोत्तमंविष्ण्वाख्यंज्योतिःपरिपश्यंतस्तमेवदेवत्रादे वंदेवविषयेपिदेवमगन्म । तदेवज्योतिष्ट्वेनोत्तरत्वेनचपश्यंतइतिदर्शनेइत्थंभावविधानार्थंपूर्वं । तथैवासौभगवानुत्तमज्योतिः । नराजादिष्विवा

सिद्धत्वादविद्यमानोपासनेफलानुपपत्तेःफलबलेनोपासनस्ययाथार्थ्यंसिध्यतीतिज्ञापयितुमित्यर्थः ॥ अर्चिषोंशावर्तुलास्त्विति ॥ उशब्दोवधारणे वर्तुलाएवनत्वर्चिषोदीर्घाकारांशाइतिअर्थः । मधुशब्दस्यमधुमात्रपरत्वप्रतीतेराह ॥ बृहत्तममिति ॥ पुंडरीकंसितांभोजमित्यमरोक्तेःसितमब्जमित्यन्यथाप्रतीतेरर्थमाह ॥ रक्तेति ॥ शिरोधृतइत्यनेनहस्तादौधारणमप्रयोजकमित्युक्तंभवति । तस्ययथाकप्यासंपुंडरीकमेवमक्षिणीपुंडरीकेक्षणोविष्णुरित्यादौपुंडरीकशब्दस्यश्वेताब्जपरत्वायोगाद्रक्ताब्जपरत्वस्यवक्तव्यत्वादत्रापिविशेषवाक्यबलेनरक्ताब्जपरत्वमितिभावः । रात्रीसूक्तंव्याख्यातुंअधिकारंफलंप्रतिपाद्यंचाह ॥ रात्र्याइति ॥ रात्र्यारात्रीसूक्तस्यविष्णुनासहदुर्गादेवतेत्यन्वयः । दुःस्वप्नेजातेसतिविष्णोर्भक्तं तथातद्वेदिनंस्वांतर्गतरात्रिनामकभगवद्वेदिनं । ननुरात्रिसूक्तस्यकथंविष्णुर्देवतारात्रीशब्दस्यदुर्गायांप्रसिद्धत्वादिमंदुर्गास्तवमित्यंतेनित्यंरात्रीसूक्तमितिश्रुतौदुर्गादेवताकत्वस्योक्तत्वाच्चेत्यतःरात्रीपदंव्याचष्टे ॥ रतिदत्वादिति ॥ रतंभावेक्तः रतंरातिददातीतिरतशब्दाद्याकारस्यदीर्घःद्वितीयस्यलोपःस्त्रियामीकारःतथाचोपनिषदिरात्रीतिभवतीतिभावः । ह्यामिरात्रींजगतोनिवेशनीमित्यत्रऋग्भाष्यटीकायामित्थमेव

भा० । विद्यमानभक्तिमात्रमिदमितिज्ञापयितुमगन्मज्योतिरुत्तममितिपुनर्वचनं । अर्चिषोंशावर्तुलास्तुनाम्नावटरकाःस्मृताइतिशब्दनिर्णये । बृहत्तमंमधुयदिसहापूपंप्रभक्षयेत् । स्वप्नेतस्याचिरान्मृत्यूरक्ताब्जेवाशिरोधृतइतित्रह्मांडे । रात्र्यास्तुदेवतादुर्गादुःस्वप्नेसाप्रपूजिता । पायसेनहरेन्मृत्युंरात्रिसूक्तादकालिकं । यदिकालिकमृत्युःस्यात्पदंसापरमंनयेत् । सहैवविष्णुनाभक्तंविष्णोस्तद्वेदिनंतथा । रतिदत्वात्परोविष्णुर्मुख्यतोरात्रिरुच्यते । तदाश्रयत्वादुर्गापिरात्रिरित्यभिधीयते ।

व्याख्यातत्वाद्भगवत्परत्वेऽनीबनुपपत्तिरित्यतउक्तं स्त्रीरूपइति ॥ ततश्चकिमित्यतआह ॥ तस्मादिति ॥ एवंदेवतानिर्णीयसूक्तंव्याचष्टे ॥ बहुभिरिति ॥ पुरुत्रेत्यस्यार्थद्वयंबहुभिर्बहुधेति । विश्वाइत्यस्यार्थः इदंजगदिति ॥ विश्वाअधीत्यप्यन्वयमभिप्रेत्योक्तं सर्वेषुलोकेष्विति ॥ श्रियोधितेत्यस्यतात्पर्यं धृताइति ॥ निवतउद्वतइत्येतन्निर्गतानुद्गतानितिकैश्चिद्व्याख्यातंयथावद्व्याचष्टे ॥ नीचानिति ॥ उपसर्गाच्छंदसिधात्वर्थइतिसूत्रेधात्वर्थविशिष्टसाधनेउपसर्गाद्वतिप्रत्ययोभवतिस्वार्थइतियेनकेनापिधात्वर्थेनविशिष्टसाधनेविवक्षितेस्वार्थेवतिप्रत्ययविधानाद्वृत्तिकारेणापिनिवतउद्वतइत्यनयोरेवोदाहृतत्वान्निउदितिचोपसर्गाच्चयइतिधात्वर्थेविवक्षितेवतिप्रत्ययेनीचानुच्चानितिभवतीतिभावः । अमर्त्येत्यस्यार्थो ब्रह्मादीनिति ॥ आउअप्राइत्यस्यतात्पर्यं उर्वीति ॥ ज्योतिषाबाधतेतमइत्यस्यतात्पर्यंज्ञानेनेति ॥ निरुस्वसारमित्यादेरर्थः स्वसारमिति ॥ स्वयमेवप्रमदारूपमित्यन्वयः । तेनोषःकालंतदभिमानिदेवतांचव्यवच्छिनत्ति । अपइत्उहासतेतमइत्यत्रतमइदित्यन्वयमभिप्रेत्याह ॥ तमश्चेति ॥ अपहासतेऽइत्यस्यार्थो अपाकरोत्येवेति । सानइत्यस्यार्थः सनःस्वामीति ॥ यस्यास्तेयामन्इत्यस्यार्थो यदुदरेइति ॥ वृक्षेवसतिंननीडमिवेत्यस्यतात्पर्यंवृक्षइति ॥ श्येनासःश्येनाइत्यत्रशीआइनइत्यवयवेविभज्यशमस्यास्तीति

भा० । स्त्रीरूपःसपरोविष्णुःपायसेष्टोहिमोक्षदः । तस्मादुभौसहैवेज्यौभक्त्यादुःस्वप्नदर्शने । बहुभिर्नयनैर्विष्णुर्बहुधेदंददर्शह । आयन्सर्वेषुलोकेषुधृतास्तेनैवहिश्रियः । नीचानुच्चांश्चजीवान्सब्रह्मादीनुर्वपूरयत् । ज्ञानेनबाधतेज्ञानंस्वसारंस्वंतथाकरोत् । उषआख्यंशुक्लवर्णंप्रमदारूपमेवच । तमश्चापाकरोत्येवतदासूर्यादिषुस्थितः । सनःस्वामीयदुदरेयमनाद्यामनामके । अविक्ष्महिवयंसर्वेवृक्षेयद्वत्पतत्रिणः ।

शीसुखीविष्णुःसएवआसमंतात्सर्वेषुदेशेषुकालेषुचइनोयेषांतइतिविग्रहमभिप्रेत्यव्याचष्टेइयेनाख्याइति ॥ मानुषाश्चेतिचशब्दे नाश्वगवादयः । पादत्ववस्यपक्ष्यादिसाधारण्यादुक्तंपादमात्रेति ॥ ग्रामाःग्राम्याःपशवइत्यन्यथाप्रतीतेर्व्याचष्टे ॥ ग्रामा ख्याइति ॥ बहुलत्वात्बहुलत्वादेवनतुग्रामस्थत्वात् । दैत्याएवनतुग्राम्याःपशवः । अर्थायेषांसंतीतिअर्थिनः । भूमार्थेमतुप् । पूर्णार्थाइत्यभिप्रेत्यकृतार्थत्वात्पूर्णार्थत्वादित्युक्तं ॥ ऊरीकृतप्रमाणत्वादिति ॥ ऊरीकृतमंगीकृतंप्रमाणंयेनेत्युरीकृतप्रमाणः । यद्वाऊरीकृतमंगीकृतंप्रमाणंयेनसऊरीकृतप्रमाणः । इदंस्वप्रमापकंभवत्वितिस्वांगीकृतप्रमाणत्वादित्यर्थः । वृकंवृक्यंचयवयस्ते नंचयवयेत्येतद्व्याचष्टे ॥ वृकाइति ॥ निर्याप्यानिष्कासनीयाः । वृकवत्क्रूरत्वादसुरावृकाः । राक्षसाःतत्स्वभावाः असुरस्व भावाःपिशाचादयः । महासुराःमणिमदादयः । यतस्तेनित्यमनादिकालादारभ्यैकात्म्यवादिनोऽतःस्तेनाःब्रह्मस्तेनाः । सुखतरे त्येतद्व्याचष्टे ॥ विष्णुरिति ॥ सुखतरःसुखप्रदः । तृप्लवनतरणयोरितिधातुस्तरणंचवितरणंदानमत्रविवक्षितं । तथाचसुसुखं तरतिवितरतिददातीतिसुतरेतिव्याख्यातंभवति । उपमापेपिशदित्यादेरर्थः कृष्णमिति ॥ कृष्णंकृष्णवर्णं व्यक्तंअनुभव

भा० । इयेनाख्यास्तुसुखीनत्वादासमंतात्सुरोत्तमाः । पद्भ्यंतोमानुषाश्चैवपादमात्रप्रयायिनः । ग्रामाख्याबहुलत्वात्तुदैत्याएवप्रकीर्तिताः । अर्थिनस्तुकृतार्थत्वान्मुक्ताएवश्रुताःश्रुतौ । ऊरीकृतप्रमाणत्वादूर्म्यःसभगवान्हरिः । वृकास्तेनैवनिर्याप्यावृकाःक्रूरत्वतोसुराः । तत्स्वभावाश्चवृ क्याःस्युस्तेनास्तत्रमहासुराः । ब्रह्मस्तेनायतस्तेहिनित्यमैकात्म्यवेदिनः । विष्णुःसुखतरश्चैवभक्तानांभवतिप्रभुः । कृष्णंव्यक्तं

सिद्धं । तमो भावरूपमज्ञानं । पेपिशत् । अज्ञानामतिशयेनपेशलंभद्रमित्यर्थः । उषऋणेवयातयेत्यस्यतात्पर्यं तद्यातय तीति ॥ ननुरात्रिर्ह्यत्रदेवताकथंउषऋणेवेत्युषसःप्रार्थनमित्यतआह ॥ सएवेति ॥ रात्रिशब्दितएवेत्यर्थः । वशकांताविति धातोरितिभावः । उपतेगाइवाकरमित्यादिव्याचष्टे ॥ जयिनइति ॥ जिग्युषेजयिनोर्थेस्तोमंन स्तोममिव । ब्राह्मणायेत्यध्या हारः । गाइवतेतवाहंस्तोम मुप । आ । अकरं । तंस्तोमंवृणीष्वेत्यर्थः । दुहितर्दिवइत्यस्यार्थः द्यौरिति ॥ सूक्तार्थमुक्त्वा रात्र्यास्तुदेवतादुर्गेत्यादिकमुपसंहरति ॥ एवमर्थेनेति ॥ साक्षान्मुख्यतः । एषोर्थः बहुभिर्नयनैर्विष्णुर्बहुधेदंददर्शेत्याद्यु क्तिःसर्वज्ञत्वादिरूपोर्थः । एवंस्तुतः एवमर्थानुसंधानपूर्वंस्तुतः । इष्टः पायसेन । सयद्येषांकिंचित्पश्येद्रात्रीसूक्तेनप्रत्यृचंहुत्वे त्युक्त्या यदंतीत्यादीनांदुःस्वप्नपरिहारकत्वंनास्तीतिप्रतीयतेतांवारयति ॥ यदंतीति ॥ दुःस्वप्नदर्शने अयंपायसद्रव्यकोरात्रि देवताकोरात्रीसूक्तेनहोमविशेषइत्यर्थः । रात्रीसूक्तेनहुतइष्टश्चमोक्षदइत्युक्तं तदयुक्तं । ज्ञानस्यैवमोक्षहेतुत्वा ज्ज्ञानद्वाराचेद्धि

भा० । तमोज्ञानमज्ञानांपेशलंतत् । तद्यातयत्यृणमिवभगवान्पुरुषोत्तमः । सएवचोषाःकथितःप्रकाशत्वाज्जनार्दनः । जयिनःस्तोममि वचब्राह्मणाययथाचगाः । उपाकरंतथास्तोमंतवाहंतद्वृणीष्वच । द्यौरितिज्ञानमुद्दिष्टंतद्व्यंग्यत्वाज्जनार्दनः । दुहितादिवइत्युक्तएवमर्थेनपूज्यते । रात्रीसूक्तेनभगवान्साक्षान्नारायणःप्रभुः । तत्सन्निधानाद्दुर्गायाएषोर्थउपचारतः । एवंस्तुतस्तथैवेष्टोभगवान्मोक्षदोभवेत् । यदंतीत्याद्यृचःसर्वा अपिदुःस्वप्नदर्शने । जप्याएवविशेषोयंहीमोदुःस्वप्नदर्शने ।

द्यांतरस्यापितुल्यं । कोविशेषोस्येत्यतआह ॥ परोक्षेति ॥ त्वरयाऽपरोक्षादिहेतुत्वाद्विशेषइतिभावः । द्विविधैः परोक्षापरोक्षज्ञानिभिः । सन्यासिनांदुःस्वप्नदर्शनेकिंकार्यमित्यतआह ॥ न्यासिभिरिति ॥ ४ ॥ संगतिस्तुभाष्यएवास्यखंडस्यस्पष्टा ॥ अथानंतरं सर्वस्यैसर्वस्यावाचः तत्संबंधिनीतद्विषयिणीप्रसिद्धेयमुपनिषद्रहस्यविद्योच्यते । ननुपूर्वोक्तविद्यानामपिसर्ववाक्संबंधित्वात्किंपुनर्विशिष्योच्यतइत्याशंक्यपरिहियते ॥ सर्वाहीति ॥ यद्यपीमाःसर्वाःपूर्वोक्ताःसर्वस्यैवाचःउपनिषदएव हिप्रसिद्धास्तथापि । इमामेव तुविशेषेण सर्ववाग्विषयिणीमुपनिषदमाचक्षतेवैदिकाः । विशेषश्चभाष्येस्पष्टोभविष्यति ॥ पृथिव्याः संबंधि तद्गतंतन्नामकंरूपंभगवद्रूपंस्पर्शाःस्पर्शाक्षरप्रतिपाद्यं । अंतरिक्षस्य रूपमित्यन्वेति । शिष्टंपूर्ववद्व्याख्येयं । एवंस्पर्शादिप्रतिपाद्यस्यलोकाधिष्ठानत्वमुक्त्वातत्साराद्यस्यधिष्ठानत्वमुच्यतेऽग्नेरूपमित्यादिना ॥ अग्न्यादिसारवेदाधिष्ठानत्वमप्युच्यते ऋग्वेदस्येत्यादिना ॥ तथाचश्रुतिः प्रजापतिर्लोकानभ्यतपत् तेषांसप्तानांरसान्प्रावृहत् अग्निंपृथिव्यावायुमंतरिक्षादादित्यंदिवएतास्तिस्रोदेवताअभ्यतपत्तासांतप्यमानानांरसात्प्रबृहत् अग्नेरृचोवायोर्यजूंषिसामान्यादित्यादिति । एवंस्पर्शादिप्र

भा० । परोक्षज्ञानिनोविष्णुरापरोक्ष्यंत्रजेत्त्वरन् । अपरोक्षदृशःप्रीतःसुखाधिक्यंकरोत्यजः । मुक्तस्यद्विविधैस्तस्माज्जपोयोगश्चसर्वथा । कर्तव्योन्यासिभीरात्रीसूक्तंजप्यंत्रिशोंजसेत्यैतरेयसंहितायां ॥ ४ ॥ (३६)

उप० । अथखल्वियंसर्वस्यैवाचउपनिषत्सर्वाह्येवेमाःसर्वस्यैवाचउपनिषदइमांत्वेवाचक्षतेपृथिव्यारूपंस्पर्शाअंतरिक्षस्योष्माणोदिवःस्वरा अग्नेरूपंस्पर्शावायोरूष्माणआदित्यस्यस्वराऋग्वेदस्यरूपंस्पर्शायजुर्वेदस्योष्माणःसामवेदस्यस्वरा

तिपाद्यानामधिदैवमधिष्ठानमुक्त्वाध्यात्ममधिष्ठानद्वयमुच्यते चक्षुषोरूपमित्यादिना ॥ विद्याधिक्यसंपादिकाविद्योच्यते ॥ अथेति ॥ विद्यांतरारंभेअथशब्दः । इयंब्रह्मादितनुर्दैवीदेवस्यविष्णोर्वीणाभवति खलुप्रसिद्धं । तद्गुणगानहेतुत्वात् । ननुदारुविशेषकृतामानुषीहिवीणावीणेतिप्रसिद्धाकथंब्रह्मादितनुर्वीणेत्यतःशिरसिचमसशब्दवत्दैववीणासादृश्यान्मानुष्यांवीणायांवीणाशब्दइतिभावेनोच्यते ॥ तदनुकृतिरिति ॥ असौमानुषीवीणा तांदैवींवीणामनुकरोतीतितदनुकृतिःतत्सादृश्यवतीत्युक्तंसादृश्यंविविच्योच्यते ॥ यथास्याइत्यादिना ॥ अस्याःदैवीवीणायाःशिरोयथैवममुष्यामनुष्यवीणायाःशिरःशिखरं अंभणंतुउदरतुल्योमध्यभागः । वादनंशलाका । यथांगुलयस्तथातंत्रयः । यद्वायथातंत्रयस्तथांगुलयइतियथाश्रुतंयोज्यं । परस्परसाम्यमुपपादयितुंमानुषवीणायादृष्टांतत्वोक्तिः । यथास्यादेववीणायाःस्वराअज्वर्णाउदात्तादयोवा एवममुष्यामनुष्यवीणायाअपिस्वराःषड्जमध्यमादिस्वराअज्वर्णव्यंजकाउदात्तादिव्यंजकावास्वराध्वनिविशेषाश्चेत्यर्थः । यथादैवीवीणायाःस्पर्शाःसंबंधानोदनादिलक्षणाःस्पर्शसंज्ञितावर्णावा एवमस्यामानुषवीणायास्पर्शास्तंत्रीषून्नमनावनमनादिहेतुभूताअंगुलिसंबंधाःस्पर्शा

उप० । श्रोत्रस्योष्माणोमनसःस्वराःप्राणस्यरूपंस्पर्शाअपानस्योष्माणोव्यानस्यस्वराअथखल्वियंदैवीवीणाभवतितदनुकृतिरसौमानुषीवीणाभवतियथास्याःशिरएवममुष्याःशिरोयथास्याउदरमेवममुष्याअंभणंयथास्यैजिह्वैवममुष्यैवादनंयथास्यास्तंत्रयएवममुष्याअंगुलयोयथास्याःस्वराएवममुष्याःस्वरायथास्याःस्पर्शाएवममुष्याःस्पर्शा

क्षरव्यंजकध्वनयोवा । यथाह्येवेयंदैवीवीणाशब्दवतीघोषवतीतर्ह्यवतीनादवतीएवमसौशब्दवतीतर्ह्यवतीयथाह्येवेयंदेहलक्षणा दैवीवीणालोमशेनचर्मणापिहिताभवति एवमसौलोमशेनचर्मणापिहिता अदृष्टिविरोधमाशंक्योच्यते ॥ लोमशेनेति ॥ पुरा कृतयुगादौ । लोमशेनचर्मणाहस्मवीणाअपिदधत्याच्छादयंतीत्यर्थः । योहैतांदैवींवीणांवेदसश्रुतवदनःश्रूयतइतिश्रुतंविद्यात त्पूरितवदनोभवति । अस्यकीर्तिर्भूमिप्राभूमिपूर्णाभवति । आर्यावत्रक्च यत्रकुत्रचित्संसदिवाचोविद्याअधिकविषयाभाषंते तत्रसंसदितेषुमध्येएनंविदुर्भाषंतेगणयेयुरितियावत् । विद्याधिक्यार्थमेवजप्यान्याविद्योच्यते । अथवाचांरसःसारभूताविद्यो च्यते । तस्याविनियोगउच्यते ॥ यस्यामिति ॥ यस्यांसंसद्यधीयमानोभाषमाणोवानविरुरुचिषेत रुरुचिषेत रोचितुमिच्छे त् । विरुरुचिषेतरोचितुंनेच्छत् । वीत्युपसर्गस्यवर्जनार्थत्वात्नविरुरुचिषेत । रोचितुंनेच्छेदितिन । अतिशयेनरोचितुमिच्छे दितियावत् । द्वौनञाविति न्यायात्तत्रसभायामेतांक्रचंजपेत् । अयंक्रगर्थः ॥ वाचिसंस्थितायाविष्ण्वाख्यायादेवतायाओष्ठा ओष्ठौपिधानान पिधानाविव युग्मकवाटाविव याचकुलीकुत्सितंलीनमस्मिन्नितिकुलीप्रलीनाशेषकुत्सितेतियावत् । दंतैः दंताभिमानिदेवैःपरिवृता पातिसर्वंसर्वस्माद्विशिष्टाचेतिपविः सर्वस्यैसर्वस्यावाचईशाना साविष्ण्वाख्यास्त्रीरूपादेवता

उप० । यथाह्येवेयंशब्दवतीतर्ह्यवत्येवमसौशब्दवतीतर्ह्यवतीयथाह्येवेयंलोमशेनचर्मणापिहिताभवत्येवमसौलोमशेनचर्मणापिहितालोमशे नहस्मवैचर्मणापुरावीणाअपिदधतिसयोहैतांदैवींवीणांवेदश्रुतवदनोभवतिभूमिप्राप्यकीर्तिर्भवतियत्रक्चार्यावाचोभाषंतेविदुरेनंतत्राथातोवाग्रसो यस्यांसंसद्यधीयानोवाभाषमाणोवानविरुरुचिषेततत्रैतामृचंजपेदोष्ठापिधानानकुलीदंतैःपरिवृतापविःसर्वस्यैवाचईशाना

॥ २१४ ॥

सहसभायांमांचारुवादयेदितीयंक्रग्वाग्रसः वाग्रसशब्दोक्तेत्यर्थः ॥ ५ ॥ अथखल्वियंसर्वस्यैवाचउपनिषदित्यत्रषष्ठ्यर्थःसंबंधःकइ त्यतोविषयविषयिभावइतिभावेनव्याचष्टे ॥ अथेति ॥ ननुसर्ववाग्विषयविद्याप्रतिपादनंप्रकृतासंगतंविष्णुनामविषयविद्याया एवप्रकृतसंगतत्वादित्यतआह ॥ विष्णुनामार्थत्वादिति ॥ सर्वाह्येवेमाःसर्वस्यैवाचउपनिषदइमांत्वेवेत्येतद्यद्यपितथापीतिप दद्वयाध्याहारपूर्वंव्याचष्टे ॥ विष्णुनामार्थत्वादित्यादिना ॥ अपि यद्यपि । ननुपूर्वोक्तानांविष्णुनामविद्याविषयत्वात्कथं सर्ववागुपनिषत्त्वमित्यतउक्तं ॥ विष्णुनामार्थत्वादिति ॥ इमांत्वेवेतितुशब्दार्थोमुख्यतएवेति ॥ सर्वेपि वैदिकाऋषयः । नतुप्रागिवात्रमतभेदइतिभावः । प्राणोवंशइत्यादौतस्यैतस्यात्मनःप्राणऊष्मारूपंइत्यादिविद्यानांमुख्यतोविष्णुनामविषयत्वं त द्व्याख्यानरूपत्वात्तद्वाराऽन्यविद्याविषयत्वं । विष्णुनामाक्षरेष्वेवमन्येष्वपितदर्थतइतिभाष्येतिदेशात् । अस्मिन्खंडेनिरूपिता विद्यास्तुसाक्षादपिसर्ववाग्विषयाः । उपनिषदितथाविवक्षितत्वा दतएवात्रभाष्येस्पर्शाक्षरादयोविष्णुनामनिष्ठत्वेननोक्ताः । वीणाविद्यायावाक्सारविद्यायाश्चविद्याधिक्यनिमित्तकायाःसर्वविद्याविषयत्वान्मुख्यत्वंबोध्यं । पृथिव्यारूपमित्यारभ्यव्यान

उप० । चारुमामिहवादयेदितिवाग्रसः ॥ ५ ॥ (३७)

भा० । अथसर्ववाग्विषयाविद्योच्यते । विष्णुनामार्थत्वात्सर्ववाचां । पूर्वोक्ताअपिसर्ववागुपनिषत्वात् । [illegible] र्ववाग्विष यत्वाद्वक्ष्यमाणामेवसर्वस्यैवाचउपनिषदितिसर्वेप्याचक्षते ।

स्यस्वराइत्यंतंव्याचष्टे ॥ पृथिव्यादीति ॥ अथखल्वियंदैवीर्वतर्ह्ययंतद्व्याचष्टे ॥ तस्येति ॥ अयंदेहोविष्णोर्वीणाततइयंदेहाख्यासाक्षान्मुख्यतः दैवीवीणाप्रकीर्तितेत्यन्वयः । इयमितिविशिष्योक्त्यभिप्रायमाह ॥ लोकसिद्धा लोकप्रसिद्धेति । सयोहैतामित्येतद्व्याचष्टे ॥ ब्रह्मादीति ॥ श्रुतवदनइत्यस्यार्थोविद्येति । भूमिप्रेत्यस्यार्थोभूमीति । प्रापालनपूरणयोरितिधातोरितिभावः । यस्यांसंसद्यधीयानोभाषमाणोवानविरुरुचिषेततत्रैतामृचंजपेदित्यस्यतात्पर्यमाह ॥ विद्येति ॥ नकेवलंविद्याधिक्यार्थंवीणाविद्यामुपासीतएतांचर्चंजपेदित्यर्थः । ओष्ठापिधानेत्यारभ्येतिवाग्रसइत्यंतस्यार्थमाह ॥ ओष्ठेति ॥ ऋचंव्याचष्टे ॥ विष्णोरिति ॥ विष्णोरेवेतिसंबंधः । तेनसरस्वतीस्तूयतइतिनिरस्तं । अपिधानानेत्यस्यार्थः पिधानवदिति ॥ कुत्सितंलीनमस्मिन्निितिकुलीत्यर्थमभिप्रेत्यतात्पर्यमाह ॥ प्रलीनेति ॥ पविशब्दंव्याचष्टे ॥ पातीति ॥ सर्वस्यैवाचइत्यस्यार्थः ॥ सर्वेति ॥ नन्वोष्ठौपिधानौनभवतइतिनिषेधात्कथंपिधानवदितिव्याख्यानमित्यतआह ॥ नेत्युपमार्थइति ॥ मृगंनभीममि

भा० । पृथिव्यादिस्थितोविष्णुःपृथिव्याद्यभिधानवान् । स्पर्शादीनांदेवतासौक्रमेणैवप्रकीर्तितः । तस्यविष्णोरयंदेहोवीणासाक्षात्प्रकीर्तिता । दैवीवीणाततःसेयंलोकसिद्धातुमानुषी । ब्रह्मादिदेहान्योवेदविष्णोर्वीणेतिभक्तितः । विद्यापूर्णसुखःसस्याद्भूमिपूरितकीर्तिमान् । विद्याधिक्यार्थमेवैतांवाक्सारामप्यृचंजपेत् । ध्यात्वानारायणंदेवंस्त्रीरूपंवाचिसंस्थितं । ओष्ठापिधानेत्येषाह्यृक्सारोवाचःप्रकीर्तितः । विष्णोर्हिवाचि संस्थस्यैवोष्ठावेतौपिधानवत् । कुलीतिचोक्तोभगवान्प्रलीनाशेषकुत्सितः । पातिसर्वविशिष्टश्चसर्वस्मादित्यतःपविः । सर्ववागीश्वरोविष्णुःस्त्रीरूपोमांसुवादयेदितिच । नेत्युपमार्थ ।

॥ २१५ ॥

त्यादिवदेवेतिभावः । ततश्चकिमित्यतोवाक्यार्थंविशदमाह ॥ ओष्ठाविति ॥ नन्वत्रसरस्वतीप्रतिपाद्याकिंनस्यादित्यतआह ॥ नचेति ॥ अस्यामुपनिषदिएतद्ब्रह्मैतत्सत्यमितिब्रह्मोपक्रमात् । एतस्यैसंहितायैणकारोबलमितिविष्णुनामव्याख्यानेनोपसंहाराच्चात्रखंडेउपात्तायाऋचोन्यविषयत्वेचतद्विरोधापत्तेश्चभगवद्विषयेयं ऋगित्याह ॥ तस्यैवेति ॥ यद्वाऋग्वेदखिलेषु ओष्ठापिधानेत्यतःपूर्वंविष्णोःप्रस्तुतत्वादुत्तरत्रचवक्ष्यमाणत्वादित्यर्थः । भगवतोवागीश्वरत्वेस्मृतिंचपठति ॥ श्रियःपतिरिति ॥ अत्रगीरांपतिरितिगीष्पतित्वोक्तेःप्रकृतसिद्धिः । किंचवाजसनेयेभगवतएववाचिस्थत्वोक्तेस्तस्यैव ओष्ठापिधानाइत्यत्रप्रतिपाद्यत्वमित्याह ॥ योवाचीति ॥ तर्हिस्त्रीलिंगविरोधइत्यतोद्वेधासमाधानमाह ॥ स्त्रीलिंगत्वमिति ॥ देवतेत्यादिवच्छब्दस्वाभाव्यादित्यर्थः । स्त्रीलिंगत्वमपीत्यन्वयः ॥ ५ ॥ यत्रयोविंशतिमखंडेयदिवागादीनामेवाभिव्याहरणादिहेतुत्वंतर्ह्यर्थकोहंस्यांविष्णुर्नस्यांविशिष्टबलचेष्टावत्वस्यैवविष्णुनामार्थत्वादित्युक्तं । तदुपपादयितुंसर्वशब्दव्याख्येयविष्णुनामवाच्यत्वाच्चसर्वगुणपूर्णत्वमित्युपपादयितुंचेदमारण्यकमुपक्रांतं । तदुभयोपसंहारायविष्णुनामाक्षरार्थकथनपूर्वंतद्व्याख्यानत्वंसर्ववेदानांऋषि

भा० । ओष्ठावपिधानवदस्येति । नचविष्णोरन्यासर्वस्यावाचईशाना । सहिमुख्यतःसर्वेश्वरः । तस्यैवप्रस्तुतत्वाद्वक्ष्यमाणत्वाच्च । श्रियःपतिर्यज्ञपतिर्जगत्पतिर्गिरांपतिर्लोकपतिर्धरापतिरितिभागवते । योवाचितिष्ठन्वाचोंतरोयंवाङ्वेदेत्यादिश्रुतिश्च । स्त्रीलिंगत्वंदेवतेत्यादिवदपियुज्यते । स्त्रीरूपत्वाच्च ॥ ५ ॥ (३७)

संमत्याप्रदर्श्यतेस्मिन्खंडे । अथतस्मादेव विष्णुनाम्नः सर्वगुणपूर्तिप्रतिपादकसर्ववाग्व्याख्येयत्वादेव । कृष्णनामाहारीतपुत्र अस्मैस्वोपसत्तिंकुर्वतेशिष्यायपुत्रायवाएतद्वक्ष्यमाणंवाग्ब्राह्मणमिववाग्विषयब्राह्मणमिवविद्यमानं अष्टपंचकानंतर्गतत्वेपिसर्व वाचाविष्णुनामव्याख्यानत्वेनविनियोजकत्वात् विष्णुनाममंत्रार्थकथनपरत्वाच्च । ब्राह्मणसदृशंविद्याविशेषमेवो(पो)दाहरत्युप दिशति । यद्वाइवेत्यल्पार्थे । इवकिंचित्संग्रहेणोपदिशतीत्यर्थः । उपमार्थेतथाल्पत्वेपीवशब्दःप्रयुज्यतइतिवचनात् । विष्णु नामसंहितेत्येका । तत्रषकारणकारौवर्तेते । तत्रसंहिताशब्दआख्यानपूर्वंनिरुच्यते ॥ प्रजापतिरिति ॥ संवत्सरनामाब्रह्मा प्रजाःसृष्ट्वाव्यस्रंसतस्रस्तांगोभूत् । सस्रस्तांगःसन्च्छंदोभिःसर्वैर्वेदैरात्मानंपरमात्मानंसमदधात्संधितवान् । ततश्चछंदःप्रति पाद्यत्वात्छंदोनामकैःस्वस्तुतैर्भगवद्रूपैरात्मानंपरमात्मानंसमदधात्संधितवान्विशेषसन्निधानयुक्तमकरोत् । ततश्चायमात्मा नंस्वदेहंसमदधात्समाहितंस्वस्थंदृढमकरोत् । यद्यस्माच्छंदोभिरात्मानंसमदधात्तस्मात्संधानात्तुल्यासंधानाच्चतुर्मुखेसन्निधाने नदेहदार्ढ्यकरणाच्चसामूर्तिःसंहितानाम्नी । तस्यैवाएतस्यैसंहितायैतस्याएतस्याःसंहितायाः संहितानामकस्यविष्णो र्बलंण कारः णइत्यनेनवर्णेनाक्रियमाणःप्रतिपाद्यः । प्राणश्चेष्टकत्वंआत्माआततत्वंचषइत्यनेनाक्रियमाणत्वात्प्रतिपाद्यत्वात्षकारइ त्यर्थः । यतोणकारषकारौणइत्याक्रियमाणंबलंषइत्याक्रियमाणंप्रणेतृत्वमाततत्वंचऋचोनुसंहितंप्रतिसंहितमुपलक्षणमेतदन्यत्र

उप० । अथहास्माएतत्कृष्णहारीतोवाग्ब्राह्मणमेवोपोदाहरतिप्रजापतिःप्रजाःसृष्ट्वाव्यस्रंसतसंवत्सरःसछंदोभिरात्मानंसमदधाच्छंदो



चानुसंहितं । यत्रयत्रवर्णद्वयसमायोगोभवतितत्रतत्रवेदप्रतिपाद्यवेदसम्पादकारीसबलावलपूर्णप्राणांप्रणेतृत्वशक्तिपूर्णा दे शतःकालतोगुणतश्चाततांसंहितांसंहितानामिकांविष्ण्वाख्यांदेवतांवेद । तस्यसर्वशब्दप्रतिपाद्यत्वाज्ज्ञानतज्ज्ञानित्वायोगादिति भावः । एवंविदःफलमुच्यते ॥ आयुष्यमिति ॥ तस्यनित्यायुष्यं मुक्तोभविष्यतीतिविद्यादिवर्णैः । नुप्यग्निमीलइत्यादौअ ग्निमित्यादिसंहितासुणकारषकारार्थानुपलंभाद्भवद्भिश्चोच्यमानत्वात्संदिह्यतइत्याशंक्योच्यते ॥ सयदीति ॥ सउपासकः । सणकारंणकारवाच्यबलानुसंधानपूर्ववेदादिकंब्रवाण्युताणकारंणकारवाच्यबलमननप्रतिपाद्यतइतितदनुसंधानंविनाब्रुवाणीति अनुपलंभोक्तिभ्यांसंदेहकारणाभ्यांयदिविचिकित्सेत्सश्चयंकुर्यात्तदोच्यतेकिमिति । सणकारंणकारार्थानुसंधानपूर्वमेवब्रूयादि ति । यदिषकारार्थानुसंधानपूर्ववेदादिकंब्रवाण्युतषकारंतदननुसंधानपूर्वंब्रवाणीतिविचिकित्सेत तदोच्यते । किमिति । सष कारंषकारार्थानुसंधानपूर्वमेवब्रूयादित्यर्थः । अनुपलब्धिस्तुव्युत्पत्त्यभावनिबंधनेतिभावः । व्युत्पन्नानांतुप्रतिसंहितंतदर्थानुसं धानमस्तीत्यत्रवयमेवसाक्षिणइतिऋषिभिरभिधीयतइत्युच्यते ॥ तेयद्वयमिति ॥ तएवंजानंतोवयंयत्येनकारेणानुसंहितं संहिताप्रतिपाद्यंविष्णुमनुसृत्यतद्युक्तत्वेनतदर्थत्वेनऋचोन्यान्वेदादींश्चाधीमहे । यस्माच्चविष्णुनामार्थत्वंवेदादेःप्रदर्शयंतमांडू केयैरधीयमानमध्यायंप्रब्रूमउपदिशामः । तेनकारणेननोस्माकंणकारषकारौणवर्णषवर्णाभ्यांआक्रियमाणोवाच्योबलादिगुणयु

उप० । संहितमृचोवेदसबलांसप्राणांसंहितांवेदायुष्यमितिविद्यात्सयदिविचिकित्सेत्सणकारंब्रवाणीँ३अणकाराँ३इति । सणकारमेवब्रू यात्सषकारंब्रवाणीँ३अषकाराँ३इति । सषकारमेवब्रूयात्तेयद्वयमनुसंहितमृचोधीमहेयच्चमांडूकेयीयमध्यायंप्रब्रूमस्तेननोणकारषकारा

ष्णुनास्माकंउपात्तोवयतइतिहस्माहहस्वोमांडूकेयः । अथान्यस्थविरःशाकल्योपीतिहस्मेत्येवाहेतिअन्वयः । किंचबहवोप्यृषयःऐकमत्येनेदमेवाहुरित्युच्यते ॥ एतदिति ॥ विष्णुनान्नएवसर्वोत्तमत्वमेतद्व्याख्यानत्वमन्यवचसाभित्येतत्प्रमेयंविद्वांसः [illegible] ष्योप्येतद्वक्ष्यमाणमाहुःस्मविष्णुशब्दार्थज्ञानंसर्वत्रतदनुसंधानंविनावयंकिमर्थाःकिंप्रयोजनमनुसंदधानावेदादीनध्ये [illegible] ष्यामहेविष्णुपूजारूपत्वानुसंधानंविनाकिंप्रयोजनार्थमश्वमेधादीन्यक्ष्यामः । नकिमपिप्रयोजनमुद्दिश्यैतद्विद्याध्ययनयज्ञफल [illegible] यंतावदितिभावः । यदिविष्णुमंत्राध्ययनतेनैवहोमंचनिर्वर्तयामस्तदापिकिमन्यैरध्ययनादि [illegible] तेवक्ष्यतेकिमर्थाइति । य [illegible] विष्णुषडक्षररूपायांजप्यमानायांप्राणंजुहुमः श्वासवृत्तिनिरोधेनतदभिमानिनंप्राणंजुहुम [illegible] संपादनेनतस्यहोम [illegible] तियावत् । यद्यत्रैतदधीतंवाभाषतेवाचितदाप्राणोभवतीतिबाध्वखंडेउक्तत्वात् । यदिवाप्राणेवाजुहुमःमौनेन [illegible] ध्यायंतःप्र [illegible] णेतस्यहोमंचिंतयामइतियावत् । अथयत्रतूष्णींभवतिवाक्प्राणेतदाभवतीत्युक्तत्वात् । तदेवंविष्णुनामाध्ययनहोमा [illegible] करणेकिमर्थंवयमध्येष्यामहेवेदादीन्किमर्थंवयमश्वमेधादीन्यक्ष्यामहे । एतस्याधिक त्वादतएवान्यानांविष्णुमंत्रोक्तिर्होमाभ्यामधिकफलमितिभावः । गृहस्थादेर्बाह्ययज्ञादिफलापेक्षास्तिचेत्तत्रवैचित्र्यसि

उप० । बुपात्तावितिहस्माहहस्वोमांडूकेयोथयद्यपुसंहितमूचोमेत्यधमांडूकेयोमध्यायंप्रमत्तेननोंकारंकारादुपात्तावि [illegible] स्माहस्थविरःशाकल्यएतदुस्मैवैतद्विद्यायैपुरोगमंय । वयंतः किमर्थंवयमध्येष्यामहेमथादेवंयज्ञयास्यामश्चिदिदंतत्प्राणेजुहुमः

[illegible] र्थंतदर्थानुसंधानपू [illegible] द्याध्ययनाश्वमे [illegible] तिभाव । तयो [illegible] न्योन्यस्मिन् [illegible] रुपाद्यते योह्येवेति । योयस्मादुत [illegible] तेस [illegible] तस्मिन्लीयतइतिप्रसिद्धं [illegible] र्जकत्वेन [illegible] णस्यचवागुत्पा [illegible] वात्तःपरस्परंसंश्लेषइतिभावः । [illegible] सोभगवानाचार्यःमुनिर्मौनसहितं [illegible] पाद्यरूपाण्युपदिश्यैतद्विद्याधिकारिणंशिष्यविशेषणास्यातिगोप्यत्वमाहेत्युच्यते । ता एताइति ॥ ताएताः संहिता [illegible] तानाकृतिनीमाद्यिभगवद्रूपाणिअनंतवासिने अन्यविद्यास्वाध्यायमध्यापयेमंब्रूयात् । अ न्यविद्यासुशिष्यत्वेपि [illegible] तेब्रूयात् । संवत्सरांतद्वित्रमासमध्येविद्यांतराध्ययनंनपूर्यते । किंतुसंवत्सरवासंकृत्वाप रिज्ञातविष्णुभक्त्यादिशीलायान्यविद्यासुशिष्यायब्रूयादितिभावः । वैष्णवत्वादिगुणयुक्तत्वेनाप्रवक्तृव्याख्यान्शक्तिहीनाय ब्रूयात् । किंतुविशिष्टव्याख्यानादिगुणसंपन्नायब्रूयादित्याचार्यामहिदासप्रभृतयआचक्षते । एवंयाइत्यारभ्योक्तस्यसर्वस्याव धारणार्थोह्येवशब्दः । प्रजापतिःप्रजाःसृष्ट्वेत्यत्रप्रजापतिर्दक्षादिरित्यन्यथाप्रतीतेर्यथावद्याचष्टे ॥ संवत्सरइति ॥ संवत्सरोवैप्रजापतिरितिश्रुतेरितिभावः । तत्रापिसंवत्सरशब्दःकुतोब्रह्मपरइत्यतउभयत्राभिधानमाह ॥ ब्रह्मेति ॥ सञ्ज्ञोभि

उप० । योह्येवप्रभवःसएवाप्ययस्ताएताःसंहितानानंतेवासिनेप्रब्रूयान्नासंवत्सरवासिनेनाप्रवक्तृइत्याचार्याआचार्याः ॥ ६ ॥ (३८)
इत्यैतरेयोपनिषत्सुतृतीयारण्यकेद्वितीयोध्यायः ॥ ३ ॥ २ ॥ इतितृतीयारण्यकंसंपूर्णं ॥ ३ ॥

भा० । संवत्सरइतिविशेषणाद्विरिंचएवात्रप्रजापतिः । ब्रह्माविरिंचिःकतमःस्वयंभूःप्रजापतिःसंवत्सरइत्यादिश्रुतेः ।

रात्मानंसमदधादित्येतत्सःविस्रस्तःश्रांतःप्रजापतिर्वेदैःपरमात्मानंस्तुतवानित्यर्थतयाव्याचष्टे ॥ श्रांतइति ॥ स्तुत्वेति समद
धादित्यस्यानुवादपरंछंदोभिर्भगवद्रूपैरात्मानंसमदधात्संधितवानात्मनिसंन्यधापयदित्यस्यार्थः ॥ तेनैवसम्यक्संधायेति ॥
आत्मानंदेहंसमदधाद्दृढमकरोदित्यर्थांतरमाह ॥ दार्ढ्यमिति ॥ तस्मात्संहितेत्येतद्व्याचष्टे ॥ संधानादिति ॥ स्तुत्यासंधा
नात् ब्रह्मणिसंनिधानात् देहसमाधानाच्चेत्यर्थः । तस्यैएतस्यैसंहितायैबलंणकारइत्यस्यार्थोविष्णुनाम्नीति । कथंणकारोबलमि
तिसामानाधिकरण्यमित्यतआह ॥ णइत्याक्रियमाणत्वादिति ॥ प्राणःषकारइत्यस्यार्थोविष्णुनाम्नीति । आत्माषकारइत्य
स्यार्थः आत्मतेति ॥ आत्मताचषकारेणोक्तेत्यन्वयः । किंतदात्मत्वमित्यतस्तद्विवरणपूर्वकंवाक्यार्थमाह ॥ आततत्व
मिति ॥ षकारःप्राणइतिसामानाधिकरण्यंघटयति ॥ षइति ॥ षणयोरेवपूर्वोत्तरवर्णत्वेननामत्वेविकारोकारयोर्नामबहिर्भा
वमाशंक्यउपसर्गप्रत्ययमात्रेइतिनामार्थविशेषकत्वात् तदंतर्भावोघटतइत्याह ॥ वीति ॥ उक्तस्य बलादे र्वीत्यनेनान्यगत
बलादिभ्योविशिष्टताऽभिधीयते । अंत्यस्थितउकारोयद्युनोरूपंतदाताच्छील्यंवदे द्यदिस्वतंत्रोवर्णस्तदाऽऽदिपदोक्तमुच्चत्वंवदे

भा० । श्रांतोब्रह्मासर्ववेदैःस्तुत्वानारायणंप्रभुं । तेनैवसम्यक्संधायदार्ढ्यंदेहस्यसोकरोत् । संधानात्संहितेत्युक्तोविष्णुरेवसनातनः ।
विष्णुनाम्निणशब्देनविष्णोर्बलमुच्यते । णइत्याक्रियमाणत्वाण्णकारोस्यबलंस्मृतं । विष्णुनाम्निणकारेणरमाब्रह्मेशपूर्विणः । प्रणेतृताखिलस्यैव
विष्णोरुक्तातथात्मता । आततत्वंसर्वगुणैर्देशतःकालतस्तथा । आत्मशब्दोदितंतच्चषशब्देनाभिधीयते । षइत्याक्रियमाणत्वंप्रणेतृत्वंचपूर्णता ।
विष्णोःषकारइत्युक्तावीत्युक्तस्य विशिष्टता । अंत्यस्थितउकारस्तुताच्छील्यादिहरेर्वदेत् ।

Digitized with financial assistance from
00049103
H T Parekh
FOUNDATION
An Initiative by
HDFC
WITH YOU, RIGHT THROUGH
on 28 December, 2018